पूजन तर्पण के लिये पात्रा सादन करें या विशेषार्घ जल एवं पञ्चामृत एक पात्र में मिलाकर तर्पण करें पात्र की पूजा करे। गंध, अक्षत, खुले पुष्पों को एक पात्र में इकट्ठा करें। पूजन तर्पण यंत्र पर करें या यंत्र व अपने मध्य में अन्य पात्र रखलें उसमें पूजन तर्पण करते रहें। दो व्यक्ति अलग-अलग करें या स्वयं करें तो प्रत्येक नामावलि के साथ **'श्री पादुकां पूजयामि तर्पयामि नमः स्वाहा'** का उच्चारण करते हुये दाहिने हाथ से ज्ञान मुद्रा से पुष्पाक्षत गंध अर्पण करें तथा बायें हाथ से तत्वमुद्रा से तर्पण करें।

हाथ जोड़ें -

ॐ सचिन्मये परे देवि परामृत रस प्रिये। अनुज्ञां देहि गायत्री! परिवारार्चनाय मे॥

अथ प्रथमावरणम् - बिन्दु में मूल मंत्र से **श्री सविता देवता श्री पा. पू. न. त.।**

स्वगुरु क्रम - **ॐ अमुकानन्दनाथ स्वगुरु श्री पा. प. न. त.। ॐ अमुकानन्दनाथ परमगुरु श्री पा. पू. न. त.। ॐ अमुकानन्दनाथ परात्परगुरु श्री पा. प. न. त.। ॐ अमुकानन्दनाथ परमेष्ठिगुरु श्री पा. पू. न. त.।**

अत्रैव षडङ्ग पूजा - (षट्कोणे) बिन्दु समीपे - **ॐ तत्सवितुर्ब्रह्मणे हृदयाय नमः श्री पा. पू. न. त.। ॐ वरेण्यं विष्णवे शिरसे स्वाहा.। ॐ भर्गोदेवस्य रुद्राय शिखायै वषट्.। ॐ धीमहि ईश्वराय कवचाय हुँ.। ॐ धियो यो नः सदाशिव नेत्रत्रयाय वौषट्.। ॐ प्रचोदयात् सर्वात्मने अस्त्राय फट्.।**

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सले। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्॥

पुष्पाञ्जलि देवें। **पूजिताः तर्पिताः सन्तुः** से अर्घेन संतृप्त।

अथ द्वितीयावरणम् - त्रिकोणे - जिस गुरु क्रम में पूजन रेखाओं में कहा है उसी क्रम में पूर्व रेखा, नैर्ऋत्य एवं वायव्य रेखा में करें एवं जिस गुरु क्रम में कोणों में पूजन बताया गया है वे अग्निकोण, पश्चिम एवं ईशान कोण में पूजन करें। **ॐ गायत्र्यै नमः श्री पा. पू. न. त.। ॐ सावित्र्यै नमः.। ॐ सरवत्यै नमः.।**

ॐ अभीष्ट....द्वितीयावरणार्चनम्॥ पुष्पाञ्जलि प्रदान करें। **पूजिताः तर्पिताः सन्तुः** कहकर अर्घपात्र जल से तृप्त करें।

अथ तृतीयावरणम् - त्रिकोण के बाहरी कोणों में वृत्त में - **ॐ ब्रह्मणे नमः श्री पा. पू. न. त.। ॐ विष्णवे नमः.। ॐ रुद्राय नमः.।**

ॐ अभीष्ट....तृतीयावरणार्चनम्॥ पुष्पाञ्जलि प्रदान करें। **पूजिताः तर्पिताः सन्तुः** कहकर अर्घपात्र जल से तृप्त करें।

अथ चतुर्थावरणम् - अष्टदल में पूर्वादि क्रमेण - **ॐ आदित्याय नमः श्री पा. पू. न. त.। ॐ उषायै नमः.। ॐ भानवे नमः.। ॐ प्रज्ञायै नमः.। ॐ भास्कराय नमः.। ॐ प्रभायै नमः.। ॐ रवये नमः.। ॐ संध्यायै नमः.।**

ॐ अभीष्ट....चतुर्थावरणार्चनम्॥ पुष्पाञ्जलि प्रदान करें। **पूजिताः तर्पिताः सन्तुः** कहकर अर्घपात्र जल से तृप्त करें।

अथ पञ्चमावरणम् - पुनः अष्टदले पूर्वादिक्रमेण (केसरेषु) - **ॐ प्रह्लादिन्यै नमः श्री पा. पू. न. त.। ॐ प्रभायै नमः.। ॐ नित्यायै नमः.। ॐ विश्वम्भरायै नमः.। ॐ विशालिन्यै नमः.। ॐ प्रभावत्यै नमः.। ॐ जयायै**

नम:.। ॐ शान्त्यै नम:.।

ॐ अभीष्ट....पञ्चमावरणार्चनम्॥ पुष्पाञ्जलि प्रदान करें। **पूजिता: तर्पिता: सन्तु:** कहकर अर्घपात्र जल से तृप्त करें।

अथ षष्ठमावरणम् – अष्टदल के मूल भाग में प्राची क्रमेण – **ॐ कान्त्यै नम: श्री पा. पू. न. त.। ॐ दुर्गायै नम:.। ॐ सरस्वत्यै नम:.। ॐ विश्वरूपायै नम:.। ॐ विशालायै नम:.। ॐ ईशायै नम:.। ॐ चापिन्यै नम:.। ॐ विमलायै नम:.।**

ॐ अभीष्ट.....षष्ठवरणार्चनम्॥ पुष्पाञ्जलि प्रदान करें। **पूजिता: तर्पिता: सन्तु:** कहकर अर्घपात्र जल से तृप्त करें।

अथ सप्तमावरणम् – अष्टदल के मध्य में प्राची क्रमेण – **ॐ अपरिहारिण्यै नम: श्री पा. पू. न. त.। ॐ सूक्ष्मायै नम:.। ॐ विश्वयोन्यै नम:.। ॐ जयावहायै नम:.। ॐ पद्मालयायै नम:.। ॐ परायै नम:.। ॐ शोभायै नम:.। ॐ पद्मरूपायै नम:.।**

ॐ अभीष्ट....सप्तमावरणार्चनम्॥ पुष्पाञ्जलि प्रदान करें। **पूजिता: तर्पिता: सन्तु:** कहकर अर्घपात्र जल से तृप्त करें।

अथ अष्टमावरणम् – अष्टदलाग्रे (कर्णिकायै) पूर्वादिक्रमेण – **ॐ आं ब्राह्मयै नम: श्री पा. पू. न. त.। ॐ ईं माहेश्वर्यै नम:.। ॐ ऊं कौमार्यै नम:.। ॐ ॠं वैष्णव्यै नम:.। ॐ लृंवाराह्यै नम:.। ॐ ऐं इन्द्राण्यै नम:.। ॐ औं चामुण्डायै नम:.। ॐ अ: महालक्ष्म्यै नम:.।**

ॐ अभीष्ट.....अष्टमावरणार्चनम्॥ पुष्पाञ्जलि प्रदान करें। **पूजिता: तर्पिता: सन्तु:** कहकर अर्घपात्र जल से तृप्त करें।

अथ नवमावरणम् – भूपूरे (प्रथम श्वेत रेखायां) पूर्वादिक्रमेण – **ॐ शुं शुक्राय नम: श्री पा. पू. न. त.। ॐ शुं शुक्राय नम:.। ॐ सों सोमाय नम:.। ॐ बुं बुधाय नम:.। ॐ गुं गुरवे नम:.। ॐ भौं भोमाय नम:.। ॐ शं शनैश्चराय नम:.। ॐ रां राहवे नम:.। ॐ कें केतवे नम:.।** (मंत्रमहार्णव में प्रथम सोम की एवं गुरु के बाद शुक्र की पूजा लिखि है)

ॐ अभीष्ट....नवमावरणार्चनम्॥ पुष्पाञ्जलि प्रदान करें। **पूजिता: तर्पिता: सन्तु:** कहकर अर्घपात्र जल से तृप्त करें।

अथ दशमावरणम् – भूपुरे रक्त परिधौ (पूर्वादिदशदिक्षु) – **ॐ लं इन्द्राय नम: श्री पा. पू. न. त.। ॐ रं अग्नये नम:.। ॐ मं यमाय नम:.। ॐ क्षं निर्ऋत्ये नम:.। ॐ वं वरुणाय नम:.। ॐ यं वायवे नम:.। ॐ सं सोमाय नम:.। ॐ ईं ईशानाय नम:.। ॐ** (ईशानपूर्वयोर्मध्ये) **आं ब्रह्मणे नम:.। ॐ (निर्ऋतिपश्चिमयोर्मध्ये) ॐ अं अनंताय नम:.।**

ॐ अभीष्ट....दशमावरणार्चनम्॥ पुष्पाञ्जलि प्रदान करें। **पूजिता: तर्पिता: सन्तु:** कहकर अर्घपात्र जल से तृप्त करें।

अथ एकादशमावरणम् – भूपुरे कृष्ण परिधौ (पूर्वादिदशदिक्षु) – **ॐ वं वज्राय नम: श्री पा. पू. न. त.। ॐ शं शक्तये नम:.। ॐ दं दण्डाय नम:.। ॐ खं खड्गाय नम:.। ॐ पं पाशाय नम:.। ॐ अं अङ्कुशाय नम:.। ॐ गं गदायै नम:.। ॐ त्रिं त्रिशूलाय नम:.। ॐ पं पद्माय नम:.। ॐ चं चक्राय नम:.।**

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सले। भक्त्या समर्पये तुभ्यं एकादशमावरणार्चनम्॥

पुष्पाञ्जलि प्रदान करें। **पूजिता: तर्पिता: सन्तु:** कहकर अर्घपात्र जल से तृप्त करें।

ॐ मूलमंत्रेण .... श्री गायत्री यंत्र स्थापित देवताभ्यो प्रसन्ना वरदा भव कहकर पुष्पाञ्जलि प्रदान करें।

अगर यन्त्र पर पूजन किया हो तो निर्माल्य पर यन्त्र को शुद्धकर गंधोपचार से पूजन कर धूप दीप नैवेद्य अर्पण कर

निराजन करें।

ततो जप होमादि कर्म विशेष –

ततो गायत्रीशापमोचनं कृत्वा संस्कृतां मालामादाय हृदये धारयन् सर्वे जापकाः बद्धासनेषूपविष्टाः सुनिश्चलाः जपध्यानसमायुक्ताः नासाग्रमवलोकिनो मौनिनः समाहितमानसउन्नतगात्रा एकाग्र चित्तेन मन्त्रदेवतां सवितारं ध्यायन्तो मन्त्रार्थं स्मरन्तः सप्तव्याहृतीस्त्यक्त्वा सप्रणवव्याहृतित्रयपूर्वकं **''ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि॥ धियो यो नः प्रचोदयात्''॥ इति मन्त्रं मध्यंदिनावधिजपेयुः॥**

ततो जपान्ते **''ॐ त्वं माले सर्वदेवानां प्रीतिदा शुभदा भव॥ शुभं कुरुष्व मे भद्रे यशो वीर्यं च देहि मे ॥१॥ ॐ ह्रीं सिद्ध्यै नमः॥** इति मालां शिरसि निधाय गोमुखीं रहस्ये स्थापयेत्॥ न कस्यापि दर्शयेत्॥ नाशुचिः स्पर्शयेत्। नान्येस्मै दद्यात्॥ स्वयोनिवद्गुप्तां कुर्यात्। इति जपं कृत्वा त्रिःप्राणानायम्य पूर्वोक्त न्यासं कृत्वा कवचादिना प्रार्थयित्वा पञ्चोपरारैः सम्पूज्य नीराजनं कृत्वा पुष्पाञ्जलिं च दत्वा **''ॐ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्॥ सिद्धिर्भवतु मे देवि प्रसन्ना सर्वदा भव ॥१॥ ''** इति देव्या दक्षिणकरे जपसमर्पणजलं च दद्यात्॥ एवं प्रत्यहं समासंख्य एव जपो न तु न्यूनाधिकः।

सर्वे जापका भूमौ शयानाः हविष्यान्नमश्नन्तो ब्रह्मचर्याऽस्पृश्यस्पर्शादिनियमांश्चरेयुः। अस्य पुरश्चरणं चतुर्विंशतिलक्षजपः। जपदशांशतो होमः। तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनं च कुर्यात्॥ **देशकालौ संकीर्त्य अद्य पुरश्चरणसाङ्गत्तासिद्ध्यर्थं होमविधिं करिष्ये॥** इति सङ्कल्प्य सामान्यतो गणपतिं सम्पूज्य ततः **कुण्डे स्थण्डिले** वा स्वगृह्योक्तविधिना पञ्चभूसंस्कारपूर्वकं अग्निं प्रतिष्ठाप्य ग्रहपीठे सूर्यादिनवग्रहमण्डलदेवानावाह्य सम्पूज्य कलशस्थापनं कृत्वा कुशकण्डिकां सम्पाद्याघारावाज्यभागौ हुनेत्॥ **'ॐ इदं हवनीयद्रव्यमन्वाधानोक्त देवताभ्योस्तु न मम॥'** इति यजमानो द्रव्यत्यागं कुर्यात्॥ ततः **सूर्यादि ग्रहेभ्योऽर्कादिसमिच्चर्वाज्याहुतिभिः प्रत्येकमष्टाविंशतिमष्टौ वा हुत्वा तैरैव व द्रव्यैरधिप्रत्यधि देवताभ्यश्चतुश्च तुः संख्याकाभिः पञ्चलोकपालदिक्पालेभ्यश्च द्विद्विसंख्याकाभिर्जुहुयात्॥ ''ॐ इदं हवनीय द्रव्यमन्वाधानोक्त देवताभ्योस्तु न मम''**

इस प्रकार यजमान द्रव्य का त्याग करे। इसके बाद सूर्यादि ग्रहों से अर्कादि समिधा, चरु तथा घी की आहुतियों से प्रत्येक को अट्ठाइस या आठ आहुति देकर उन्हीं द्रव्यों से प्रत्येक देवता के लिये चार-चार संख्यक पञ्च लोकपालों तथा दिक्पालों के लिये दो-दो संख्यक आहुतियों से होम करे।

ततः आवरणदेवताभ्यश्चर्वादिद्रव्यैरेकैकाहुतिभिर्हुत्वां प्रधानहोमं कुर्यात्। तथा च प्रधानदेवसवित्रे चतुर्विंशति सहस्रतिलाहुतिभिस्त्रिसहस्र संख्याकाभिः पायसाहुतिभिस्तवतीभिर्घृताहुतिभिस्तावंतीभिर्दूर्वाहुतिभिस्तावतीभिः क्षीरद्रुमसमिधाहुतिभिश्च हुत्वा शेषेण **स्विष्टकृद्धोमं कृत्वा** समापयेत्॥ होमकाले **'इदं सवित्रे न मम'** इति त्यागः॥

''होमे सप्रणवा व्याहृतिरहिता स्वाहान्ता गायत्री।'' दूर्वात्रयस्यैकाहुतिः। दूर्वासमिधां दधिमध्वाज्याक्तानां होमः॥ ततो **बलिदानान्ते** मूलादौ संयोज्य **''समुद्रज्येष्ठ०''** इत्यादिभिर्यजमानस्याभिषेकः॥ **अभिषेकान्ते** प्रतिलक्षं तु स्वर्णनिष्कत्रयं तदर्धं वा शक्त्या वा दक्षिणां प्रत्येकब्राह्मणाय दत्वा **आचार्याय द्विगुणा** दद्यात्। ततो **जले सवितारं** सम्पूज्य होमसंख्यादशांशेन **गायत्र्यंते सवितारं तर्पयामीत्युक्त्वा** दुग्धमिश्रितजलेन तर्पणं कुर्यात्॥ ततस्तर्पण **दशांशेन गायत्र्यन्ते** ''आत्मानमभिषिंचामि नमः'' इति यजमानमूर्ध्न्यभिषेकः॥ होमतर्पणाभिषेकानां **मध्ये समर्थो न भवति** चेत् **तत्तत्स्थानेतद्द्विगुणो जपः॥** तत् अभिषेकसंख्यादशांशं वाधिकं ब्राह्मणान् भोजयेत्॥ **ततो ब्राह्मणान् दक्षिणादिभिः परितोष्य** आशीर्वादं गृहीत्वा चतुर्विंशति लक्षात्मकगायत्रीपुरश्चरणं **सम्पूर्णमस्त्विति भवन्तो ब्रुवन्त्विति** विप्रान प्रार्थ्य ते च गायत्रीपुरश्चरणं सम्पूर्णमस्त्विति ब्रूयः॥ ततः कर्मपूर्तिकामो **विष्णुं स्मरेत्॥** कर्ता ब्राह्मणैः सह हविष्याशी सत्यवागधःशायी परिगृहीतभूप्रदेशानतिचारी च भवेत्॥

एवं कृते गायत्रीपुरश्चरणं सिद्धं भवित। सिद्धे च मन्त्रे मन्त्री प्रयोगान् साधयेत्॥

तथा च- ''गायत्रीच्छन्दोमन्त्रस्य **यथासंख्याक्षराणि च॥ तावल्लक्षाणि कर्त्तव्यं पुरश्चरणकं तथा ॥१॥** जुहुयात्तद्दशांशेन सघृतेन पयोंधसा॥ तिलैः पत्रैः प्रसूनैश्च यवैश्च मधुरान्वितैः ॥२॥'' (शारदातिलके तु शतांशहोमोप्युक्तः)॥ तेन मया प्रोक्तम्॥ तथा च- ''तत्वसंख्यासहस्राणि मन्त्रविज्जुहुयात्तिलैः॥ सर्वपापविनिर्मुक्तो दीर्घमायुः स विंदति ॥३॥ **आयुषेनाज्यहविषा केवलेनाथ सर्पिषा॥ दूर्वात्रिकैस्तिलैर्मन्त्री जुहुयात्रिसहस्त्रकम् ॥४॥ अरुणाब्जैस्त्रिमध्वक्तैर्जुहयाद युतं** ततः **महालक्ष्मीर्भवेत्तस्य** षण्मासान्नात्र संशयः ॥५॥ ब्रह्मश्रियेऽत्र जुहुयात्प्रसूनैर्बह्मवृक्षजैः॥ बहुना किमिहोक्तेन यथा वत्साधुसाधिता ॥६॥ द्विजन्मनामियं विद्या सिद्धा कामदुघा मता। आमध्याह्नं जपं कुर्यादुपांशु वाऽथ मानसम्॥७॥ ''

मन्त्रमहोदधौः- हविष्यं निशि भुंजीत त्रिःस्नाय्यभ्यङ्गवर्जितः॥ व्यग्रतालस्य निष्ठीवक्रोधपादप्रसारणम् ॥८॥ अन्यभाषां त्यजेक्षे च जपकाले त्यजेत्सुधीः॥ स्त्रीशूद्रभाषणं निन्दां ताम्बूलं शयनं दिवा ॥९॥ प्रतिग्रहं नृत्यगीते कौटिल्यं वर्जयेत्सदा॥ भूशय्यां ब्रह्मचर्यं च त्रिकालं देवतार्चनम् ॥१०॥ नैमित्तिकार्चनं देवस्तुतिं विश्वासमाश्रयेत्। प्रत्यहं प्रत्यहं तावन्नैव न्यूनाधिकं क्वचित् ॥११॥ एवं जपान्समाप्यान्ते दशांशं होममाचरेत्। तर्पणं तद्दशांशेन मार्जनं तद्दशांशतः ॥१२॥ एवं कृत पुरश्चर्यः पुरश्चरणसिद्धये। सिद्धे मन्त्रे प्रकुर्वीत प्रयोगान्मनसेप्सितान्॥१३॥

॥ अथ कार्यपरत्वेन प्रयोगः॥

यथा। विद्यार्थी वाग्भवाद्यम्। **लक्ष्मीकामः श्रीबीजम्।** वश्यार्थी कामबीजम्। सर्वकामार्थी मायाबीजम्। **आयुःकामार्थी मृत्युञ्जयचतुरक्षसहितं जपेदिति जपविधिः।** मध्याह्ने मितभुग्मौनी त्रिस्थानार्चनतत्परः। जपेल्लक्षत्रयं धीमान्नान्यमानसिकस्तु यः ॥१४॥ कर्मभिर्यो जपेत्पश्चात् क्रमशः स्वेच्छयापि वा। यावत्कार्यं न कुर्वीत न लोपेत्तावता व्रतम् ॥१५॥ आदित्यस्योदये स्नात्वा सहस्रं प्रत्यहं जपेत्। आयुरारोग्यमैश्वर्यं धनं च लभते ध्रुवम् ॥१६॥ त्रिरात्रोपोषितः सम्यग्घृतं हुत्वा सहस्रशः। सहस्रं लाभमाप्नोति **हुत्वाग्नो खदिरेन्धनम् ॥१७॥ समिद्भिश्चैव पालाशैर्घृताक्तैश्च हुताशने। सहस्रं लाभमाप्नोति राहुसूर्य समागमे ॥१८॥**

हुत्वा तु खदिरं वह्नौ घृताक्तं रक्तचन्दनम्। सहस्त्रहेम चाप्नोति राहुचन्द्रसमागमे ॥१९॥ रक्तचन्दनमिश्रं तु सघृतं हव्यवाहने। हुत्वा गोमयमाप्नोति सहस्रं गोमयं द्विजः ॥२०॥ जातीचम्पकराजार्ककुसुमानां सहस्रशः। हुत्वा वस्त्रमवाप्नोति घृताक्तानां हुताशने ॥२१॥ सूर्यमण्डलविम्बे च हुत्वा तोयं सहस्रशः। सहस्रं प्राप्नुयाद्धेम रौप्यमिन्दुमये हुते ॥२२॥ अलक्ष्मीपापसंयुक्ते मल व्याधिविनाशके। मुच्येत्सहस्रजाप्येन स्नायाद्यस्तु जलेन वै ॥२३॥

गोघृतेन सहस्रेण लोध्रेण जुहुयाद्यदि। चौराग्निमारुतोत्थानि भयानि न भवन्ति वै ॥२४॥ क्षीराहारो जपेल्लक्षमपमृत्युमपोहति। घृताशी प्राप्नुयान्मेधां बहुविज्ञानसञ्चयाम् ॥२५॥ हुत्वा वेत सपत्राणि घृताक्तानि हुताशने। लक्षाधिपस्यपदवीं सार्वभौमं न संशयः ॥२६॥ लक्षेण भस्महोमस्य हुत्वा ह्युत्तिष्ठते जलात्। आदित्याभिमुखः स्थित्वा नाभिमात्रे जले शुचौ ॥२७॥ गर्भपातातिप्रदराश्चान्ये स्त्रीणां महारुजः। नाशमेष्यन्ति ते सर्वे मृतवत्सादि दुःखदाः ॥२८॥ तिलानां लक्षहोमेन घृताक्तानां हुताशने। सर्वकामसमृद्धात्मा परं स्थानमवाप्नुयात् ॥२९॥ यवानां लक्षहोमेन घृताक्तानां हुताशने। सर्वकामसमृद्धात्मा परां सिद्धिमवाप्नुयात् ॥३०॥ घृतस्याहुतिलक्षेण सर्वान् कामानवाप्नुयात्। पञ्चगव्याशनो लक्षं जपेज्जातिस्मृतिर्भवेत् ॥३१॥ तदेव ह्यनले हुत्वा **प्राप्नोति बहुसाधनम्।** अन्नादिहवनान्नित्यमन्नाद्यं च भवेत्सदा ॥३२॥ जुहुयात्सर्वसाध्यानामाहुत्यायुतसंख्यया। **रक्तसिद्धार्थकान् हुत्वा सर्वान् साधयते रिपून्** ॥३३॥ लवणं मधुसंयुक्तं हुत्वा सर्ववशी भवेत्। करवीराणि च हुत्वा तु रक्तानि ज्वालयेज्जलम् ॥३४॥

हुत्वा भल्लातकं तैलं देशादेव प्रचालयेत्। **हुत्वा तु निम्बपत्राणि नृणां विद्वेषशान्तये** ॥३५॥ रक्तानां तण्डुलानां च घृताक्तानां हुताशने। हुत्वा बलमवाप्नोति शत्रुभिर्न स जीयते ॥३६॥ प्रत्यानयन सिद्धयर्थं **मधुसर्पिःसमन्वितम्।** गवां क्षीरं

प्रदीप्तेग्नौ जुह्वतस्तत्प्रशाम्यति ॥३७॥ ब्रह्मचारी मिताहारो यः सहस्त्रत्रयं जपेत्। **संवत्सरेण लभते धनैश्वर्यं न संशयः** ॥३८॥ **शमीबिल्वपलाशानामर्कस्य** तु विशेषतः। **पुष्पाणां समिधश्चैव** हुत्वा हेमह्यवाप्नुयात् ॥३९॥ आब्रह्मत्र्यम्बकादीनां यस्यायतनमाश्रितः। जपेल्लक्षं निराहारः स तस्य वरदो भवेत् ॥४०॥ बिल्वानां लक्षहोमेन घृताक्तानां हुताशने। परां श्रियमवाप्नोति यदि न भ्रूणहा भवेत् ॥४१॥ पद्मानां लक्षहोमेन घृताक्तानां हुताशने। प्राप्नोति राज्यमखिलं सुसम्पन्नमकण्टकम् ॥४२॥ **पञ्चविंशतिलक्षेण दधिक्षीरं हुताशने।** स्वदेहे सिद्ध्यते जन्तुः कौशिकस्य मतं तथा ॥४३॥ एकाहं पञ्चगव्याशी एकाहं मारुताशनः। एकाहं च द्विजोन्नाशी गायत्रीजप उच्यते ॥४४॥ महारोगा विनश्यन्ति लक्षजप्यानुभावतः। स्नात्वा शतेन गायत्र्याः शतमन्तर्जले जपेत् ॥४५॥ शतेन यस्त्वपः पीत्वा सर्वपापैः प्रमुच्यते। गोघ्नः पितृघ्नमातृघ्नौ ब्रह्महा गुरुतल्पगः ॥४६॥ स्वर्णहा तैलहारी यस्तु विप्रः सुरां पिबेत्। चन्दनद्वय संयुक्तं कर्पूरं तण्डुलं यवम् ॥४७॥ लवङ्गं सुफलं चाज्यं सिता चाम्रस्य दारुकैः। अन्यो न्यूनविधिः प्रोक्तो गायत्र्याः प्रासिकारकः ॥४८॥ **एवं कृते महासौख्यं प्राप्नोति साधको** ध्रुवम्। अन्नाज्यभोजनं हत्वा कृत्वा वा कर्म गर्हितम् ॥४९॥ न सीदेत् प्रतिगृह्णानो महीमपि ससागराम्। ये चास्य उत्थिता लोके ग्रहाः सूर्यादयो भुवि। ते यान्ति सौम्यतां सर्वे शिवे इति न संशयः ॥५०॥

॥ इति शारदातिलकादिप्रोक्तो ब्रह्मगायत्री पुरश्चरणप्रयोगः॥

॥ अथ भिन्नपाद गायत्री मंत्रप्रयोगः॥

शास्त्रों में शीघ्र मंत्र सिद्धि हेतु भिन्नपाद गायत्री मंत्र की उपासना कही गयी हैं। अर्थात् इस विधि के बिना ब्राह्मण कर्म फलहीन हैं जिसकी महिमा बताते हुये कहा हैं-

अछिन्नपादा गायत्री ब्रह्महत्या प्रयच्छति । भिन्नपादातुं गायत्री ब्रह्महत्या व्यपोहति॥

अर्थात् प्रत्येक पद के बाद **ॐ, ऐं, ह्रीं, श्रीं** कामना भेद के अनुसार प्रयुक्त करें।

सर्वशांति हेतु- **ॐ भू भुंवः स्वः ॐ तत्सवितुर्वरेण्यं ॐ भर्गो देवस्य धीमहि ॐ धियो यो नः प्रचोदयात् ॐ।**

विद्या प्राप्ति हेतु - व्याहृति बाद **ॐ** की जगह **''ऐं''** लक्ष्मी प्राप्ति हेतु व्याहृति बाद **ॐ** की जगह **'' श्रीं''** का प्रयोग करे।

कामनासिद्धि हेतु - **''ह्रीं''**, वशीकरण हेतु **''क्लीं''**, शत्रुनाश हेतु **''क्रीं''** के द्वारा भिन्नपाद गायत्री मंत्र का प्रयोग करें।

चतुष्पाद गायत्री मन्त्रः- २४ अक्षर गायत्री त्रिपाद गायत्री का जप त्रिकाल संध्या हेतु ही कहा गया हैं। मध्यरात्रि में चतुष्पाद गायत्री का जप करना चाहिये। **चतुर्थपादः- (१) परो रजसे सविता (२) ''परो रजसे सावदोम्'' अतः मंत्र- ॐ परो रजसे सावदोम्। (३) ॐ आपो ज्योती रसोऽमृतं॥ चतुष्पाद गायत्री मंत्र- ॐ भू भुंवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् परोरजसे सावदोम्॥**

पंचपाद गायत्री- ॐ भू भुंवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् आपो ज्योती रसोऽमृतं परोरजसे सावदोम् । इस तरह गायत्री षट्पदा, सप्तपदा, अष्टपदा, नवपदा, शताक्षरी एवं सहस्त्राक्षरी भी हैं।

॥ शताक्षरी गायत्री ॥

ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्॥ ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः। स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः॥ ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय माऽमृतात्॥

विनियोगः- **अस्य शताक्षरा गायत्री मंत्रस्य विश्वामित्र मरीचि कश्यप वशिष्ठ ऋषयो गायत्री त्रिष्टुप् अनुष्टुप्**

छन्दांसि सवितृ जातवेदस्त्र्यम्बक देवता गायत्र्यक्षराणि बीजानि अनुष्टुबक्षराणि शक्तयस्त्रिष्टुबक्षराणि कीलकानि ममारिष्टशान्तये जपे विनियोगः।

ऋष्यादि न्यासः- **विश्वामित्र मरीचि कश्यपवशिष्ठ ऋषिभ्यो नमः शिरसि। गायत्री त्रिष्टुबनुष्टुप् छन्दोभ्यो नमः मुखे। सवितृ** जातवेदस्त्र्यम्बक देवेभ्यो नमः हृदये। **गायत्र्यक्षरेभ्यो बीजेभ्यो नमः गुह्ये। अनुष्टुबक्षरेभ्यो शक्तिभ्यो नमः पादयोः। त्रिष्टुबक्षरेभ्यः कीलकेभ्यो नमः नाभो। विनियोगाय नमः सर्वाङ्गे।**

षडङ्गन्यासः- **ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि।** हृदयाय नमः॥ **ॐ धियो यो नः प्रचोदयात्।** शिरसे स्वाहा॥ **ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः।** शिखायै वषट्॥ **ॐ स नः पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यनिः।** कवचाय हुं॥ **ॐ त्र्यम्बकं यजामहे सुगंधिं पुष्टि वर्धनम्।** नेत्रत्रयाय वौषट्॥ **ॐ उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीयमाऽमृतात्।** अस्त्राय फट्॥

ध्यानम्—

स्मर्तव्याऽखिलालोकवर्ति सततं यज्जङ्गमस्थावरं, व्याप्तं येन च यत्प्रपञ्च विहितं मुक्तिर्यतः सिद्ध्यति। यद्वा स्यात् प्रणवत्रिभेदगहनं श्रुत्वा च यद् गीयते, तद्वस्तु स्थिति सिद्ध्येऽस्तु वरदं ज्योतिस्त्रयोत्थं महः॥

॥ अथ यंत्र पूजनम्॥

मेरुतंत्र के अनुसार षडङ्गन्यास मंत्रों से सूर्य बिम्ब में (षट्कोण में) षडङ्ग पूजा करें। बाद में तीन आवरणों में गायत्री का यंत्रार्चन करें। पश्चात् पांचवें आवरण (विथि) में जातवेददुर्गा की ४४ शक्तियों का पूजन तथा छठे आवरण में आग्नेयास्त्र की ४ शक्तियों का पूजन। सातवें, आठवें, नवें आवरण में मृत्युञ्जय कि शक्तियों का पूजन दशवें, ग्यारहवें, आवरण में इन्द्रादि लोकपालों व उनके अस्त्रों का पूजन करें।

दुर्वा व त्रिमधु के होम से धनायु की वृद्धि करें।

॥ क्रमदीक्षा ॥

गायत्री मंत्र की तीन व्याहृतियों का जप कर त्रिपाद गायत्री मंत्र की दीक्षा ग्रहण कर २४ लाख का पुरश्चरण करे। तुरीय संध्या हेतु चतुष्पाद गायत्री का जप करे। एक एक क्रम से बढते हुये तीन व्याहृतियों के बाद महः, जनः, तपः, सत्यः, के सहित सप्त व्याहृतियों सहित गायत्री मंत्र की साधना करे। वीराचार के अनुसार दीक्षा ग्रहण करके गायत्री की पंचमकारों से साधना करे। यह वीरमार्ग का कर्म हैं विशिष्ट साधक ही करे। इसके बाद हंसगायत्री, परमहंसगायत्री एवं अजपाजप गायत्री की साधना करे।

परमहंसगायत्रीमंत्रः - ॐ परमहंसाय विद्महे महातत्त्वाय धीमहि। तन्नो हंसः प्रचोदयात्।

षड्ङ्गन्यासः - **ॐ परमहंसाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ महातत्त्वाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो हंसः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इस प्रकार करन्यास भी करें।

हंसमंत्र- ॐ सोहं सोहं परो रजसे सावदोम्।

ब्रह्मगायत्रीमन्त्रः- ॐ वेदात्मने च विद्महे हिरण्यगर्भाय धीमहि। तन्नो ब्रह्मा प्रचोदयात्। षडङ्गन्यासः- **ॐ वेदात्मने च हृदयाय नमः ॥१॥ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ हिरण्यगर्भाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो ब्रह्मा नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥**

अजपागायत्री - यह साधना कुण्डली जागरण हेतु हैं। शिव से प्रार्थना करे कि प्रभो मेरी कुण्डलिनी को जाग्रत करे। पश्चात् कुण्डलिनी को उठाकर सुषुम्रा मार्ग द्वारा लाकर भ्रूमध्य में स्थापित कर परमशिव से जोड़े। प्रत्येक श्वास लेने पर ''**सोऽहं**'' तथा निःश्वास छोड़ते समय ''**हंसः**'' मंत्र का ध्यान करते रहे। अभ्यास द्वारा धीरे धीरे ब्रह्मरन्ध्र सहस्त्रार में अजपा जप करे।

मंत्र- (१) ''**सोऽहं हंसः**'' (२) **सोऽहं हंसः स्वाहा।** जपपूर्व ''भूतशुद्धि'' प्रयोग अवश्य कर शरीर शुद्धि कर लेवे।

॥ विलोमगायत्री मंत्र साधना ॥

मंत्र- ॐ स्वः भुवः भूः **त्यादचोप्र नः यो योधि हिमधी स्यवदे गोंभ ण्यंरेवतुः वि (तुर्वि) सतत भू र्भुवः स्वः ॐ।**

अन्यच्च - **ॐ भू र्भुवः स्वः द्यादचोप्र नः यो योधि हिमधी स्यवदे गोर्भ ण्यंरेव तुर्विसतत् स्वः भुवः भू ॐ।**

विलोम मंत्र अग्नि के समान कार्य करता हैं। मारण प्रयोगों में भी कार्य करता हैं। इष्टमंत्र सिद्ध नहीं हो रहा हो तो अनुलोम गायत्री मंत्र पश्चात् पुनः विलोम गायत्री मंत्र जपने से गायत्री शीघ्र सिद्धिप्रदा होती हैं। किसी भी मंत्र के आगे लोमगायत्री तथा मंत्र के बाद विलोम गायत्री मंत्र लगाकर (इस तरह ३ मंत्रों का एक ही मंत्र बनेगा) जप करने से वह मंत्र शीघ्र कार्य करता हैं।

॥ सावित्री साधना मंत्रः॥

मंत्र- ॐ भगवति सावित्रि कं खं गं घं ङंलं तं थं दं धं नं रं क्लीं स्वाहा। इस मंत्र के २४ लाख जप ३ वर्ष में पूर्ण करे तो वाक्सिद्धि प्राप्त होवे।

॥ गायत्री सावित्री समष्टि मंत्र साधना ॥

मंत्र- ॐ ह्रौं ह्रीं ऐं ईं सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धियो यो नः प्रचोदयात् वेदगर्भे भगवति स्वाहा।

यह मंत्र दैन्य, दुरित का क्षय कर सौभाग्य वृद्धि करता हैं। विद्या एवं विवेक प्रदान करता हैं। त्रिपुरसुंदरी का ध्यान करते हुये उसके त्रिनेत्रों का अलग अलग वर्ण का ध्यान करे। एक नेत्र सोनभद्रनदी के जल की तरह लाल, दूसरा नेत्र गंगाजल के समान धवल, तीसरा यमुनाजल के समान श्यामवर्ण का हैं। नित्य १००८ बार जप करे। श्री हरिहरानन्द करपात्री जी ने भी नरवर (बुलन्दशहर) में यह साधना की थी।

॥ वाग्वादिनी सावित्री मंत्र प्रयोगः ॥

मंत्र-ॐ ऐं त्रिपुरे देवि विद्महे ऐं कामेश्वरि धीमहि ऐं तन्नो देवि प्रचोदयात्। यह त्रिपुरसुंदरी गायत्री मंत्र हैं जिसको ''ऐं'' बीज से भिन्नपाद मंत्र बनाने से यह सरस्वती प्रधान मंत्र हो गया हैं। यह मंत्र विद्या बुद्धि देता हैं तथा संमोहन में भी कार्य करता हैं।

॥ अन्य देवताओं के गायत्री मंत्र ॥

सरस्वतीगायत्रीमन्त्रः - ॐ ऐं वाग्देव्यै विद्महे कामराजाय धीमहि। तन्नो देवी प्रचोदयात् षडङ्गन्यास :- **ॐ ऐं वाग्देव्यै हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ कामराजाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो देवी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥**

विष्णुगायत्रीमन्त्रः:- ॐ श्री विष्णवे च विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्। षडङ्गन्यास- ॐ श्री विष्णवे च हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ वासुदेवाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो विष्णुर्नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ द्वितीय विष्णुगायत्रीः- ॐ त्रैलोक्यमोहनाय विद्महे आत्मारामाय धीमहि। तन्नो विष्णुः प्रचोदयात्। तृतीय विष्णुगायत्रीः- ॐ नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्।

लक्ष्मीगायत्रीमन्त्रः:- ॐ महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि। तन्नो लक्ष्मीः प्रचोदयात्। षडङ्गन्यासः- ॐ महादेव्यै च हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ विष्णुपत्न्यै च शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो लक्ष्मीर्नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ लक्ष्मीमन्त्रः- ॐ क्लीं श्रीं श्रीं लक्ष्मीदेव्यै नमः। द्वितीय लक्ष्मीगायत्रीः ॐ महादेवी च विद्महे विष्णुपत्नी च धीमहि। तन्नो लक्ष्मीः प्रचोदयात्। वा ॐ महालक्ष्यै च विद्महे महाश्रियै च धीमहि। तन्नः श्रीः प्रचोदयात्।

नारायणगायत्री मन्त्रः:- ॐ नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो नारायणः प्रचोदयात्। षडङ्गन्यासः- ॐ नारायणाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ वासुदेवाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो नारायणो नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट्। मूलमन्त्रः- ॐ ह्रीं श्रीं श्रीमन्नाराणाय नमः।

श्रीरामगायत्रीमन्त्रः:- ॐ दशरथाय (दाशरथाय) विद्महे सीतावल्लभाय धीमहि। तन्नो रामः प्रचोदयात्। विनियोगः ॐ अस्य श्रीरामगायत्रीमन्त्रस्य वामदेव ऋषिः। गायत्री छन्दः। श्रीजानकीवल्लभो देवता। श्रीरामेति बीजम् दाशरथायेति शक्तिः। गायत्र्यावाहने जपे विनियोगः। ऋष्यादिन्यास : ॐ वामदेवऋषये नमः शिरसि ॥१॥ गायत्री छन्दसे नमः मुखे ॥२॥ श्रीजानकीवल्लभ देवतायै नमः हृदये ॥३॥ श्रीरामेति बीजाय नमः गुह्ये ॥४॥ दाशरथायेति शक्तये नमः पादयोः ॥५॥ विनियोगाय नमः सर्वाङ्गे। षडङ्गन्यासः- ॐ दाशरथाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ सीतावल्लभाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो रामः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ श्रीराममूलमन्त्रः- ॐ ह्रां ह्रीं रां रामाय नमः। श्रीरामतारकमन्त्रः- ॐ जानकीकान्ततारक राँ रामाय नमः। **जानकीगायत्रीमन्त्रः**:- ॐ जनकजायै विद्महे रामप्रियायै धीमहि। तन्नः सीताप्रचोदयात्। षडङ्गन्यासः- ॐ जनकजायै हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ रामप्रियायै शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नः सीता नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ सीतामूलमन्त्रः- ॐ सीं सीतायै नमः। **लक्ष्मणगायत्रीमन्त्रः**:- ॐ दाशरथाय विद्महे अलबेलाय धीमहि। तन्नो लक्ष्मणः प्रचोदयात्। षडङ्गन्यासः- ॐ दाशरथाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ अलबेलाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो लक्ष्मणः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये। मूलमन्त्रः- ॐ ह्राँ ह्रीं राँ राँ लँ लक्ष्मणाय नमः। **हनुमद्गायत्रीमन्त्रः**:- ॐ अंजनीजाय विद्महे वायुपुत्राय धीमहि। तन्नो हनुमान् प्रचोदयात्। षडङ्गन्यासः- ॐ अंजनीजाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ वायुपुत्राय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो हनुमान् नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये। मूलमंत्र : ॐ ह्राँ ह्रीं हूँ हैं ह्रौं हः।

गरुडगायत्रीमन्त्रः:- ॐ तत्पुरुषाय विद्महे सुवर्णपर्णाय (तन्त्रान्तरे तु सुवर्णपक्षायेति पाठः) धीमहि। तन्नो

गरुडः प्रचोदयात्। षडङ्गन्यासः ॐ तत्पुरुषाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ सुवर्णपर्णाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो गरुडो नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहियें। मूलमन्त्रः ॐ ग्राँ ग्रीं ग्रूं ग्रैं ग्रौं ग्रः।

श्रीकृष्णगायत्रीमन्त्रः- ॐ देवकीनन्दनाय विद्महे वासुदेवाय धीमहि। तन्नः कृष्णः प्रचोदयात्। षडङ्गन्यासः- ॐ देवकीनन्दनाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ वासुदेवाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नः कृष्णः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट्। इसी प्रकार करन्यास भी करना चाहिये। मूलमंत्रः ॐ क्लीं कृष्णाय नमः। द्वितीय श्रीकृष्णगायत्रीमन्त्रः ॐ श्रीकृष्णाय विद्महे दामोदराय धीमहि। तन्नो विष्णुः प्रचोदयात्। गोपालगायत्रीमन्त्रः- ॐ गोपालाय विद्महे गोपीजनवल्लभाय धीमहि। तन्नो गोपालः प्रचोदयात्। षडङ्गन्यासः- ॐ गोपालाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ गोपीजनवल्लभाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो गोपालः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये। मूलमन्त्रः ॐ गोपालाय गोचराय वंशशब्दाय नमोनमः। राधिकागायत्रीमन्त्रः- ॐ वृषभानुजायै विद्महे कृष्णप्रियायै धीमहि। तन्नो राधिका प्रचोदयात्। षडङ्गन्यासः ॐ वृषभानुजायै हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ कृष्णप्रियायै शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो राधिका नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास करना चाहिये। मूलमन्त्रः- ॐ राँ राधिकायै नमः।

परशुरामगायत्रीमन्त्रः-ॐ जामदग्न्याय विद्महे महावीराय धीमहि। तन्नः परशुरामः प्रचोदयात्। षडङ्गन्यासः- ॐ जामदग्न्याय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ महावीराय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नः परशुरामो नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये। मूलमन्त्रः- ॐ राँ राँ ॐ राँ राँ ॐ परशुहस्ताय नमः। नृसिंहगायत्रीमन्त्रः- ॐ उग्रनृसिंहाय विद्महे वज्रनखाय धीमहि। तन्नो नृसिंहः प्रचोदयात्। षडङ्गन्यासः- ॐ उग्रनृसिंहाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ वज्रनखाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नोः नृसिंह नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये। मूलमन्त्रः- ॐ नृँ नृँ नृँ नृसिंहाय नमः। द्वितीय नृसिंहगायत्रीमन्त्रः- ॐ वज्रनखाय विद्महे तीक्ष्णदंष्ट्राय धीमहि। तन्नो नारसिंहः प्रचोदयात्। हयग्रीवगायत्रीमन्त्रः- ॐ वागीश्वराय विद्महे हयग्रीवाय धीमहि। तन्नो हंसः प्रचोदयात्। षडङ्गन्यासः ॐ वागीश्वराय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ हयग्रीवाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो हंसः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये।

शिवगायत्रीमन्त्रः- ॐ महादेवाय विद्महे रुद्रमूर्तये धीमहि। तन्नः शिवः प्रचोदयात्। षडङ्गन्यासः ॐ महादेवाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ रुद्रमूर्तये शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नः शिवः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये। मूलमन्त्रः- ॐ सं सं सं ह्रीं ह्रीं ह्रीं ॐ शिवाय नमः। रुद्रगायत्री मंत्रः- ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्। षडङ्गन्यासः- ॐ तत्पुरुषाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ महादेवाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो रुद्रः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये।

दक्षिणामूर्तिगायत्रीमन्त्रः- **ॐ दक्षिणामूर्तये विद्महे ध्यानस्थाय धीमहि। तन्नो धीशः प्रचोदयात्।** षडङ्गन्यासः- **ॐ दक्षिणामूर्तये हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ ध्यानस्थाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो धीशः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये।

गौरीगायत्रीमन्त्रः- **ॐ सुभगायै च विद्महे काममालायै धीमहि। तन्नो गौरी प्रचोदयात्।** षडङ्गन्यासः **ॐ सुभगायै हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ काममालायै शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो गौरी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये। मूलमन्त्रः **ॐ क्लीं ॐ गौं गौरीभ्यो नमः।**

गणेशगायत्रीमन्त्रः- **ॐ तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्तिः प्रचोदयात्।** षडङ्गन्यासः- **ॐ तत्पुरुषाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ वक्रतुण्डाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो दन्तिः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये।

षण्मुखगायत्रीमन्त्रः- **ॐ तत्पुरुषाय विद्महे महासेनाय धीमहि। तन्नः षण्मुखः प्रचोदयात्।** षडङ्गन्यासः- **ॐ तत्पुरुषाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ महासेनाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नः षण्मुखः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये।

नन्दीगायत्रीमन्त्रः- **ॐ तत्पुरुषाय विद्महे चक्रतुण्डाय धीमहि। तन्नो नन्दिः प्रचोदयात्।** षडङ्गन्यासः- **ॐ तत्पुरुषाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ चक्रतुण्डाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो नन्दिः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये।

सूर्यगायत्रीमन्त्रः- **ॐ भास्कराय विद्महे महातेजाय (तन्त्रान्तरे तु महाद्युतिकरायेति पाठः) धीमहि। तन्नः सूर्यः प्रचोदयात्।** षडङ्गन्यासः- **ॐ भास्कराय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ महातेजाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नः सूर्यः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये।** मूलमन्त्रः- **ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॐ विष्णु तेजसे ज्वालामणिकुण्डलाय स्वाहा।** द्वितीय सूर्यगायत्रीमन्त्रः- **ॐ आदित्याय विद्महे मार्तण्डाय धीमहि। तन्नः सूर्यः प्रचोदयात्।**

चन्द्रगायत्रीमन्त्रः- **ॐ क्षीरपुत्राय विद्महे अमृततत्त्वाय धीमहि। तन्नश्चन्द्रः प्रचोदयात्।** षडङ्गन्यासः- **ॐ क्षीरपुत्राय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ अमृततत्त्वाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नश्चन्द्रः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये। मूलमन्त्रः **ॐ चन्द्रत्त्वां चन्द्रेण क्रीणामि शुक्रेण मृतममृतेनगोरस्मोरतेचन्द्राणि।**

भौमगायत्रीमन्त्रः- **ॐ अङ्गारकाय विद्महे शक्तिहस्ताय धीमहि। तन्नो भौमः प्रचोदयात्।** षडङ्गन्यासः **ॐ अङ्गारकाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ शक्तिहस्ताय शिखायै वषट् ॥३॥ ॐ**

धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो भौमः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये। मूलमन्त्रः- ॐ अं अङ्गारकाय नमः। पृथ्विगायत्रीमन्त्रः- ॐ पृथिवीदेव्यै च विद्महे सहस्त्रमूर्त्यै च धीमहि। तन्नो मही प्रचोदयात्। षडङ्गन्यासः- ॐ पृथिवीदेव्यै च हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ सहस्त्रमूर्त्यै च शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नोमहीः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट्॥६॥ इसी प्रकार करन्यास भी करना चाहिये। मूलमन्त्रः- ॐ भूरसिभूतादिरसिश्विस्यधायाभुवनस्यमाहिंसीर्नमः।

अग्निगायत्रीमन्त्रः - ॐ महाज्वालाय विद्महे अग्निमध्न्याय धीमहि। तन्नोऽग्निः प्रचोदयात्। षडङ्गन्यासः- ॐ महाज्वालाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ अग्निमध्न्याय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नोऽग्निः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये। मूलमन्त्रः ॐ अं अं अग्नये नमः। द्वितीय अग्निगायत्रीः- ॐ वैश्वानराय विद्महे लालीलाय धीमहि। तन्नोऽग्निः प्रचोदयात्। जलगायत्रीमन्त्रः- ॐ जलविम्बाय विद्महे नीलपुरुषाय धीमहि। तन्नस्त्वम्बु प्रचोदयात्। षडङ्गन्यासः- ॐ जलविम्बाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ नीलपुरुषाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नस्त्वम्बु नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये। मूलमन्त्रः- ॐ जँ जँ ॐ वँ वँ ॐ लँ लँ ॐ जलविम्बाय नमः। आकाशगायत्रीमन्त्रः- ॐ आकाशाय च विद्महे नभोदेवाय धीमहि। तन्नो गगनं प्रचोदयात्। षडङ्गन्यासः- ॐ आकाशाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ नभोदेवाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो गगनं नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास करना चाहिये। मूलमन्त्रः- ॐ गँ गँ ॐ नँ नँ ॐ आँ आँ ॐ गगनाय नमः। पवन (वायु) गायत्रीमन्त्रः- ॐ पवनपुरुषाय विद्महे सहस्त्रमूर्तये च धीमहि। तन्नो वायुः प्रचोदयात्। षडङ्गन्यासः- ॐ पवनपुरुषाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ सहस्त्रमूर्तये च शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो वायुः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये। मूलमन्त्रः ॐ पँ पँ ॐ वाँ वाँ ॐ युँ युँ ॐ पवनपुरुषाय नमः।

इन्द्रगायत्रीमन्त्रः - ॐ तत्पुरुषाय विद्महे सहस्त्राक्षाय धीमहि। तन्न इन्द्रः प्रचोदयात्। षडङ्गन्यासः ॐ तत्पुरुषाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ सहस्त्राक्षाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्न इन्द्रः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये।

कामगायत्रीमन्त्रः - ॐ मन्मथेशाय विद्महे कामदेवाय धीमहि। तन्नोनङ्गः प्रचोदयात्। षडङ्गन्यासः ॐ मन्मथेशाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ कामदेवाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नोनङ्गः नेत्रत्रयाय वषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये। द्वितीय कामगायत्रीः- ॐ कामदेवाय विद्महे पुष्पबाणाय धीमहि तन्नोनङ्गः प्रचोदयात्।

गुरुगायत्रीमन्त्रः- ॐ गुरुदेवाय विद्महे परब्रह्माय धीमहि। तन्नो गुरुः प्रचोदयात्। षडङ्गन्यासः ॐ गुरुदेवाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ परब्रह्माय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो गुरुः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना

चाहिये। मूलमन्त्र: ॐ हुँ सँ क्राँ सौः गुरुदेवपरमात्मने नमः।

तुलसीगायत्री मन्त्रः:- ॐ श्रीत्रिपुराय हृदयाय तुलसीपत्राय धीमहि। तन्न तुलसी प्रचोदयात्। षडङ्गन्यासः:- ॐ श्रीत्रिपुराय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ तुलसीपत्राय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नतुलसी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये।

देवीगायत्रीमन्त्रः:- ॐ देव्यब्रह्माण्यै विद्महे महाशक्त्यै च धीमहि। तन्नो देवी प्रचोदयात्। षडङ्गन्यासः:- ॐ देव्याब्रह्माण्यै हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ महाशक्त्यै च शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो देवी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये। मूलमन्त्र: ॐ ह्रौं श्रीं क्लीं नमः।

शक्तिगायत्रीमन्त्रः:- ॐ सर्वसम्मोहिन्यै विद्महे विश्वजनन्यै धीमहि। तन्नः शक्तिः प्रचोदयात्। षडङ्गन्यासः:- ॐ सर्वसम्मोहिन्यै हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ विश्वजनन्यै शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नः शक्तिः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये। **दुर्गागायत्रीमन्त्रः**:- ॐ कात्यायन्यै विद्महे कन्याकुमार्यै धीमहि। तन्नो दुर्गा प्रचोदयात्। षडङ्गन्यासः ॐ कात्यायन्यै हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ कन्याकुमार्यै शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो दुर्गाः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये। द्वितीय दुर्गागायत्रीमन्त्र-: ॐ महादेव्यै च विद्महे दुर्गायै च धीमहि। तन्नो देवि प्रचोदयात्। जयदुर्गागायत्रीमन्त्र: ॐ नारायण्यै च विद्महे दुर्गायै च धीमहि। तन्नो गौरी प्रचोदयात्। षडङ्गन्यासः ॐ नारायण्यै च हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ दुर्गायै च शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो गौरी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये।

अन्नपूर्णागायत्रीमन्त्रः:- ॐ भगवत्यै च विद्महे माहेश्वर्यै च धीमहि। तन्नोऽन्नपूर्णा प्रचोदयात्। षडङ्गन्यासः ॐ भगवत्यै च हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ माहेश्वर्यै च शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नोऽन्नपूर्णा नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये।

कालीगायत्रीमन्त्रः - ॐ कालिकायै विद्महे श्मशानवासिन्यै धीमहि। तन्नोऽघोरा प्रचोदयात्। षडङ्गन्यासः ॐ कालिकायै हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ श्मशानवासिन्यै शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नोऽघोरा नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये।

तारागायत्रीमन्त्रः:- ॐ तारायै च विद्महे महोग्रायै च धीमहि। तन्नो देवी प्रचोदयात्। षडङ्गन्यासः ॐ तारायै च हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ महोग्रायै च शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ तन्नो देवी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये।

षोडशी (त्रिपुरसुन्दरी) गायत्रीमन्त्रः– **ॐ ऐं त्रिपुरादेव्यै विद्महे क्लीं कामेश्वर्यै धीमहि। सौस्तन्नः क्लिन्ने प्रचोदयात्।** षडङ्गन्यासः– **ॐ ऐं त्रिपुरादेव्यै हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ क्लीं कामेश्वर्यै शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ सौस्तन्नः क्लिन्ने नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये।** द्वितीय त्रिपुरासुन्दरीगायत्रीमन्त्रः – **ॐ क्लीं त्रिपुरादेव्यै विद्महे कामेश्वरी धीमहि। तन्नः क्लिन्ने प्रचोदयात्।** तृतीय त्रिपुरासुन्दरीगायत्रीमन्त्रः– **ॐ ऐं वागीश्वर्यै विद्महे क्लीं कामेश्वर्यै धीमहिय्यै सोस्तन्नः शक्तिः प्रचोदयात्। इति षोडशीभेदेन बालागायत्रीमन्त्रः।** भुवनेश्वरीगायत्रीमन्त्रः **ॐ नारायण्यै च विद्महे भुवनेश्वर्यै धीमहि। तन्नो देवी प्रचोदयात्।** षडङ्गन्यासः **ॐ नारायण्यै च हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ भुवनेश्वर्यै शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो देवी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये।

भैरवीगायत्रीमन्त्रः– ॐ त्रिपुरायै च विद्महे भैरव्यै च धीमहि। तन्नो देवी प्रचोदयात्। षडङ्गन्यासः– **ॐ त्रिपुरायै च हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ भैरव्यै च शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो देवी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये।

छिन्नमस्तागायत्रीमन्त्रः– ॐ वैरोचन्यै च विद्महे छिन्नमस्तायै धीमहि। तन्नो देवी प्रचोदयात्। षडङ्गन्यासः– **ॐ वैरोचन्यै च हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ छिन्नमस्तायै शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो देवी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये।

धूमावतीगायत्रीमन्त्रः– ॐ धूमावत्यै च विद्महे संहारिण्यै च धीमहि। तन्नो धूमा प्रचोदयात्। षडङ्गन्यासः– **ॐ धूमावत्यै च हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ संहारिण्यै च शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो धूमा नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये।

बगलामुखीगायत्रीमंत्रः– ॐ बगलामुख्यै च विद्महे स्तम्भिन्यै च धीमहि। तन्नो देवी प्रचोदयात्। षडङ्गन्यासः– **ॐ बगलामुख्यै च हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ स्तम्भिन्यै च शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो देवी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये।

मातङ्गीगायत्रीमन्त्रः– ॐ मातङ्ग्यै च विद्महे उच्छिष्टचाण्डाल्यै च धीमहि। तन्नो देवी प्रचोदयात्। षडङ्गन्यासः– **ॐ मातङ्ग्यै च हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ उच्छिष्टचाण्डाल्यै च शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो देवी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये।

महिषमर्दिनीगायत्रीमन्त्रः– ॐ महिषमर्द्दिन्यै विद्महे दुर्गायै धीमहि। तन्नो देवी प्रचोदयात्। षडङ्गन्यासः– **ॐ महिषमर्द्दिन्यै हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ दुर्गायै शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो देवी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये।

त्वरितागायत्रीमन्त्रः:- **ॐ त्वरिता देवी विद्महे महानित्यायै धीमहि। तन्नो देवी प्रचोदयात्।** षडङ्गन्यासः- **ॐ त्वरिता देवी हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ महानित्यायै शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो देवी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये। **इति श्रीत्र्यधिकपञ्चाशद्देवता गायत्रीमन्त्रे गायत्रीपटलतन्त्रं समाप्तम्।**

॥ श्री गायत्री कवचम् ॥

इस कवच में श्लोक ३१ से ३४ अन्य प्रयोग विधि है।

॥ याज्ञवल्क्य उवाचः ॥

स्वामिन् सर्वजगन्नाथ संशयोऽस्ति महान्मम्। चतुः षष्टिकलानां च पातकानां च तद्वद ॥१॥
मुच्यते केन पुण्येन ब्रह्मरूपं कथं भवेत्। देहश्च देवतारूपं मन्त्ररूपं विशेषतः ॥२॥
क्रमतः श्रोतुमिच्छामि कवचं विधिपूर्वकम्।

॥ ब्रह्मोवाचः ॥

विनियोगः- **ॐ अस्य श्री गायत्रीकवचस्य ब्रह्मविष्णुरुद्रा ऋषयः। ऋग्यजुः सामाथर्वाणिच्छन्दांसि। परब्रह्मस्वरूपिणी गायत्री देवता। भूः बीजम्। भुवः शक्तिः। स्वः कीलकम्। श्रीगायत्री प्रीत्यर्थे जपे विनियोगः।**

ऋष्यादिन्यासः- **ॐ ब्रह्मविष्णुरुद्र ऋषिभ्यो नमः शिरसि। ऋग्यजुः सामाथर्वच्छन्दोभ्यो नमः मुखे। परब्रह्मस्वरूपिणी गायत्री देवतायै नमः हृदि। भूः बीजाय नमः गुह्ये। भुवः शक्तये नमः पादयोः। स्वः कीलकाय नमः नाभौ। विनियोगाय नमः सर्वाङ्गे।**

करन्यासः- **ॐ भूर्भुवः स्वः तत्सवितुरित्यंगुष्ठाभ्यां नमः। ॐ भूर्भुवः स्वः वरेण्यं तर्जनीभ्यां नमः। ॐ भूर्भुवः स्वः भर्गोदेवस्य मध्यमाभ्यां नमः। ॐ भूर्भुवः स्वःधीमह्यनामिकाभ्यां नमः। ॐ भूर्भुवः स्वः धियो यो नः कनिष्ठिकाभ्यां नमः। ॐ भूर्भुवः स्वः प्रचोदयात् करतलकरपृष्ठाभ्यां नमः।**

षडङ्गन्यासः- **ॐ भूर्भुवः स्वः तत्सवितुरिति हृदयाय नमः। ॐ भूर्भुवः स्वः वरेण्यमिति शिरसे स्वाहा। ॐ भूर्भुवः स्वः भर्गोदेवस्येति शिखायै वषट्। ॐ भूर्भुवः स्वःधीमहीति कवचाय हुम्। ॐ भूर्भुवः स्वः धियो यो नः इति नेत्रत्रयाय वौषट्। ॐ भूर्भुवः स्वः प्रचोदयादिति अस्त्राय फट्।**

इति न्यासं कृत्वाकरौ बद्ध्वा प्रार्थयेत्। तथा च-

वर्णास्त्रां कुण्डिका हस्तां शुद्धनिर्मलज्योतिषीम्। सर्वतत्त्वमयीं वन्दे गायत्रीं वेदमातरम् ॥१॥
इति सम्प्रार्थ्य ध्यानं कुर्यात्-

॥ ध्यानम् ॥

मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिन्दु निबद्धरत्नमुकुटां तत्त्वार्थ वर्णात्मिकाम्।
गायत्रीं वरदाऽभयांऽकुशकशां शूलं कपालं गुणं, शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥
ॐ गायत्री पूर्वतः पातु सावित्री पातु दक्षिणे। ब्रह्मविद्या च मे पश्चादुत्तरे मां सरस्वती ॥१॥
पावकीं मे दिशं रक्षेत्पावकोज्ज्वल शालिनी। यातुधानीं दिशं रक्षेद्यातुधान गणार्दिनी ॥२॥

पावमानीदिशं रक्षेत्पवमानविलासिनी । दिशं रौद्रीमवतु मे रुद्राणी रुद्ररूपिणी ॥३॥
उर्ध्वं ब्रह्माणी मे रक्षेदधस्ताद्वैष्णवी तथा । एवं दशदिशो रक्षेत्सर्वतो भुवनेश्वरी ॥४॥
ब्रह्मास्त्र स्मरणादेव वाचां सिद्धः प्रजायते । ब्रह्मदण्डश्च मे पातु सर्वशस्त्रास्त्रभक्षकः ॥५॥
ब्रह्मशीर्षस्तथा पातु शत्रूणां वधकारकः । सप्तव्याहृतयः पातु स सदा बिन्दुसंयुतः ॥६॥
वेदमाता च मां पातु सरहस्या सदैवता । देवीसूक्तं सदा पातु सहस्त्राक्षरदेवता ॥७॥
चतुःषष्टिकला विद्या दिव्याद्यां पातु देवता । बीजशक्तिश्च मे पातु पातु विक्रमदेवता ॥८॥
तत्पदं पातु मे पादौ जंघे मे सवितुः पदम् । वरेण्यं कटिदेशं तु नाभिं भर्गस्तथैव च ॥९॥
देवस्य मे तु हृदयं धीमहीति गलं तथा । धियो मे पातु जिह्वायां यः पदं पातु लोचने ॥१०॥
ललाटे नः पदं पातु मूर्द्धानं मे प्रचोदयात् । तद्वर्णः पातु मूर्द्धानं सकारः पातु भालकम् ॥११॥
चक्षुषी मे विकारस्तु श्रोत्रं रक्षेत्तुकारकः । नासापुटे वकारो मे रेकास्तु कपोलयोः ॥१२॥
णिकारस्त्वधरोष्ठे च यंकारस्त्वधरोष्ठके । आस्यमध्ये भकारस्तुर्गोकारस्तु कपोलयोः ॥१३॥
देकारः कण्ठदेशे च वकारः स्कंधदेशयोः । स्यकारो दक्षिणं हस्तं धीकारो वामहस्तके ॥१४॥
मकारो हृदयं रक्षेद्धिकारो जठरं तथा । धिकारो नाभिदेशं च योकारस्तु कटिद्वयम् ॥१५॥
गुह्यं रक्षतु योकार ऊरू मे नः पदाक्षरम् । प्रकारो जानुनी रक्षेच्चोकारो जङ्घदेशयोः ॥१६॥
दकारो गुल्फदेशं तु यात्कारः पादयुग्मकम् । जातवेदेति गायत्री त्र्यम्बकेति दशाक्षरा ॥१७॥
सर्वतः सर्वदा पातु आपोज्योतीति षोडशी । इदं तु कवचं दिव्यं बाधाशत विनाशकम् ॥१८॥
चतुः षष्टिकलाविद्या सकलैश्वर्य सिद्धिदम् । जपारम्भे च हृदयं जपान्ते कवचं पठेत् ॥१९॥
स्त्रीगोब्राह्मणमित्रादि द्रोहाद्यखिल पातकैः । मुच्यते सर्व पापेभ्यः परं ब्रह्माधिगच्छति ॥२०॥
पुष्पाञ्जलिं च गायत्र्या मूलेनैव पठेत्सकृत् । शतसाहस्त्रवर्षाणां पूजायाः फलमाप्नुयात् ॥२१॥
भूर्जपत्रे लिखित्वै तत्स्वकण्ठे धारयेद्यदि । शिखायां दक्षिणे बाहौ कण्ठे वा धारयेद् बुधः ॥२२॥
त्रैलोक्यं क्षोभयेत्सर्वं त्रैलोक्यं दहति क्षणात् । पुत्रवान्धनवाञ्छी मान्नानाविद्यानिधिर्भवेत् ॥२३॥
ब्रह्मास्त्रादीनि सर्वाणि तदङ्गस्पर्शनात्ततः । भवन्ति तस्य तुल्यानि किमन्यत्कथयामि ते ॥२४॥
अभिमंत्रित गायत्री कवचं मानसं पठेत् । तज्जलं पिबतो नित्यं पुरश्चर्याफलं भवेत् ॥२५॥
लघुसामान्यकं मंत्रं महामंत्रं तथैव च । यो वेत्ति धारणां युञ्जञ्जीवन्मुक्तः स उच्यते ॥२६॥
सप्त व्याहृदयो विप्र सप्तावस्थाः प्रकीर्तिताः । सप्तजीवशता नित्यं व्याहृती अग्निरूपिणी ॥२७॥
प्रणवे नित्ययुक्तस्य व्याहृतीषु च सप्तसु । सर्वेषामेव पापानां सङ्कटे समुपस्थिते ॥२८॥
शतं सहस्त्रमभ्यर्च्च्य गायत्री पावनं महत् । दशशतमष्टोत्तरशतं गायत्री पावनं महत् ॥२९॥
भक्तिमान्यो भवेद्विप्रः संध्याकर्मसमाचरेत् । कालेकाले तु कर्त्तव्यं सिद्धिर्भवति नान्यथा ॥३०॥
प्रणवं पूर्वमुद्धृत्य भूर्भुवः स्वस्तथैव च । तुर्यं सहैव गायत्रीजप एव उदाहृतः ॥३१॥

तुरीयपादमुत्सृज्य गायत्रीं च जपेद्विजः । स मूढो नरकं याति कालसूत्रमधोगतिः ॥३२॥
मंत्रादौ जननं प्रोक्तं मन्त्रान्ते मृतसूतकम् । उभयोर्दोषनिर्मुक्तं गायत्री सफला भवेत् ॥३३॥
मंत्रादौ पाशबीजं च मन्त्रान्ते कुशबीजकम् । मन्त्र मध्ये तु या माया गायत्री सफला भवेत् ॥३४॥
वाचिकस्त्वहमेव स्यादुपांशु शतमुच्यते । सहस्त्रं मानसं प्रोक्तं त्रिविधं जपलक्षणम् ॥३५॥
अक्षमालां च मुद्रां च गुरोरपि न दर्शयेत् । जपं चाक्षस्वरूपेणानामिकामध्यपर्वणि ॥३६॥
अनामा मध्यमा हीना कनिष्ठादिक्रमेण तु । तर्ज्जनीमूलपर्यन्तं गायत्रीजपलक्षणम् ॥३७॥
पर्वभिस्तु जपेदेवमन्यत्र नियमं स्मृतम् । गायत्री वेदमूलत्वाद्वेदः पर्वसु गीयते ॥३८॥
दशभिर्ज्जन्मजनितं शतेनैव पराकृतम् । त्रियुगं तु सहस्त्राणि गायत्री हन्ति किल्बिषम् ॥३९॥
प्रातः कालेषु कर्त्तव्यं सिद्धिं विप्रो य इच्छति । नादालये समाधिश्च सन्ध्यायां समुपासते ॥४०॥
अङ्गुल्यग्रेण यज्जप्तं यज्जप्तं मेरुलङ्घने । असंख्यया च यज्जप्तं यज्जप्तं निष्फलं भवेत् ॥४१॥
विना वस्त्रं प्रकुर्वीत गायत्री निष्फला भवेत् । वस्त्रपुच्छं न जानाति वृथा तस्य परिश्रमः ॥४२॥
गायत्रीं तु परित्यज्य अन्य मन्त्रमुपासते । सिद्धान्नं च परित्यज्य भिक्षामटति दुर्मतिः ॥४३॥
ऋषिश्छन्दो देवताख्या बीजशक्तिश्च कीलकम् । नियोगं न च जानाति गायत्रीं निष्फला भवेत् ॥४४॥
वर्णमुद्रा ध्यान पदमावाहन विसर्जनम् । दीपचक्रं न ज़ानाति गायत्री निष्फला भवेत् ॥४५॥
शक्तिन्यासस्तथा स्थानं मन्त्रसम्बोधनं परम् । त्रिविधं यो न जानाति गायत्री निष्फला भवेत् ॥४६॥
पञ्चोपचारकाश्चैव होमद्रव्यं तथैव च । पञ्चाङ्गं च विना नित्यं गायत्री निष्फला भवेत् ॥४७॥
मन्त्रसिद्धिर्भवेज्जातु विश्वामित्रेण भाषितम् । व्यासो वाचस्पतिं जीवस्तुता देवी तपः स्मृतौ ॥४८॥
सहस्त्रं जप्ता सा देवी ह्युपपातकनाशिनी । लक्षजाप्ये तथा तच्च महापातकनाशिनी ॥४९॥
कोटिजाप्येन राजेन्द्र यदिच्छति तदाप्नुयात् । न देयं परशिष्येभ्यो ह्यभक्तेभ्यो विशेषतः ।
शिष्येभ्यो भक्ति युक्तेभ्यो ह्यन्यथा मृत्युमाप्नुयात् ॥५०॥

॥ इति श्रीमद्वसिष्ठ संहितायां महात्म्यसहितं गायत्री कवचं संम्पूर्णम् ॥

॥ मंत्रात्मक गायत्री कवच ॥

॥ श्री देव्युवाच ॥

देव देव महादेव! संसारार्णव तारक ! गायत्री कवचं देव! कृपया कथय प्रभो ।

॥ महादेव उवाच ॥

मूलाधारेषु या नित्या कुण्डली तत्त्वरूपिणी । सूक्ष्माति सूक्ष्मा परमा विसतन्तुस्वरूपिणी ॥
विद्युत्पुञ्जप्रतीकाशा कुण्डलाकृतिरूपिणी । परमब्रह्म गृहिणी पञ्चाशद् वर्णरूपिणी ॥
शिवस्य नर्तकी नित्या परंब्रह्मपूजिता । ब्रह्मणः सैव गायत्री सच्चिदानन्दरूपिणी ॥
तद् भ्रमावर्त्तवातोऽयं प्राणात्मा नित्यनूतनः । नित्यं तिष्ठतु सानन्दा कुण्डली भवविग्रहे ॥

अति गोप्यं महत् पुण्यं त्रिकोटितीर्थसंयुतम् । सर्वयज्ञमयं देवि! सर्वदानमयं सदा ॥
सर्वज्ञानमयं देवि! परंब्रह्ममयं सदा । कवचं कथयाम्याद्य पार्वति! प्राणवल्लभे ॥
ॐ भूः पातु ॐ पातु मे मूलं चतुर्दल समन्वितम् । ॐ भुवः ॐ पातु मे लिङ्गं षड्दल समन्वितम् ॥१॥
ॐ स्वः ॐ पातु मे कण्ठं साकाशं दलषोडशम् । ॐ तत् ॐ पातु मे रूपं ब्रह्मण्य कारणं परम् ॥२॥
ॐ स ॐ वदनं पातु रसना संयुतं मम । ॐ वि ॐ पातु मे गन्धं सदा शरीरसंयुतम् ॥३॥
ॐ तुः ॐ पातु मे स्पर्शं शरीरस्य च कारणम् । ॐ व ॐ पातु मे शब्दं शब्दविग्रहकारणम् ॥४॥
ॐ रे ॐ पातु मे नित्यं त्वचं शरीर रक्षकम् । ॐ णि ॐ पातु मे अक्षं सर्वतत्वैककारणम् ॥५॥
ॐ यं ॐ पातु मे श्रोत्रं श्रवणस्य च कारणम् । ॐ भ ॐ पातु मे घ्राणं गन्धोपादान कारणम् ॥६॥
ॐ र्गो ॐ पातु मे वाक्यं सभायां शब्दरूपिणी । ॐ दे ॐ पातु मे बाहुयुगलं ब्रह्मकारणम् ॥७॥
ॐ व ॐ पातु मे पादयुगलं ब्रह्मकारणम् । ॐ स्य ॐ पातु मे लिङ्गं सजलं षड्दलैर्युतम् ॥८॥
ॐ धी ॐ पातु मे नित्यं प्रकृतिं शब्दकारणम् । ॐ म ॐ पातु मे नित्यं मनो ब्रह्मस्वरूपिणीम् ॥९॥
ॐ हि ॐ पातु मे बुद्धिं परब्रह्ममयं सदा । ॐ धि ॐ पातु मे नित्यमहङ्कारं यथा तथा ॥१०॥
ॐ यो ॐ पातु मे नित्यं पृथिवीं पार्थिवं वपुः । ॐ यो ॐ पातु मे नित्यं जलं सर्वत्र सर्वदा ॥११॥
ॐ नः ॐ पातु मे नित्यं तेजः पुञ्जं यथा तथा । ॐ प्र ॐ पातु मे नित्यमनिलं देह कारणम् ॥१२॥
ॐ चो ॐ पातु मे नित्यमाकाशं शशि सन्निभम् । ॐ द ॐ पातु मे जिह्वां जप यज्ञस्य कारणम् ॥१३॥
ॐयात् ॐ पातु मे चित्तं शिवज्ञानमयं सदा । ॐ तत्वानि पातु मे नित्यं गायत्री परदेवता ॥१४॥
ॐ भू र्भुवः स्वः पातु मे नित्यं ब्रह्माणी जठरं क्षुधा । ॐत्वष्टा मे सततं पातु ब्रह्माणी भूर्भुवः स्वरः ॥१५॥

विनियोग :- ॐ अस्याः श्रीगायत्र्याः श्रीपरब्रह्म ऋषिः । ऋग्-यजुः-सामाथर्वांश्छन्दांसि । श्रीगायत्री ब्रह्माणी देवता । धर्मार्थकाम मोक्षार्थे जपे विनियोगः ।

ॐ भू र्भुवः स्वः तत्-सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ।

॥ फल श्रुति ॥

काम क्रोधादिकं सर्वस्मरणाद् याति साम्यताम् । इदं कवचमज्ञात्वा गायत्रीं प्रजपेद् यदि ।
लक्षादि जपेनैव न सिद्धिः जायते प्रिये ॥
गायत्री वाचनात् सर्वं स्मरणं सिद्ध्यति ध्रुवम् । पठित्वा कवचं विप्रो गायत्रीं सकृदुच्चरेत् ॥
सर्वपापविनिर्मुक्तो जीवन्मुक्तो भवेद् द्विजः । इदं कवचमज्ञात्वा कवचान्यं पठेत् तु यः ।
सर्वं तस्य वृथा देवि! त्रैलोक्य - मङ्गलादिकम् ॥
गायत्री कवचं यस्य जिह्वायां विद्यते सदा । तदाऽमृतमयी जिह्वा पवित्रा जप पूजने ॥
इदं कवचमज्ञात्वा ब्रह्मविद्यां जपेद् यदि । व्यर्थं भवति चार्वङ्गि! तज्जपं वन रोदनम् ॥
ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः । महानि पातकान्येव स्मरणान्नाशमाप्नुयुः ॥

॥ इति श्री मंत्रात्मक गायत्री कवचं समाप्तम् ॥

॥ अथ गायत्री पञ्जर स्तोत्रम् ॥

नारदजी ने जिस ब्रह्म स्वरूप का दर्शन किया था उसका वर्णन श्लोक १ से ४ तक तक है।

भगवन्तं देवदेवं ब्रह्माणं परमेष्ठिनम् । विधातारं विश्वसृजं पद्मयोनिं प्रजापतिम् ॥१॥
शुद्धस्फटिक संकाशं महेन्द्रशिखरोपमम् । बद्धपिङ्गजटाजूटा तडित्कनककुण्डलम् ॥२॥
शरच्चन्द्राभवदनं स्फुरदिन्दीवरेक्षणम् । हिरणमयं विश्वरूपमुपवीताजिनावृतम् ॥३॥
मौक्तिकाभाक्ष - वलयस्तन्त्रीलय समन्वितः । कर्पूरोद्धूलिततनुः स्त्रष्टुर्नयनवर्द्धनम् ॥४॥
विनयेनोपसङ्गम्य शिरसा प्रणिपत्य च । नारदः परिपप्रच्छ देवर्षिगणमध्यगः ॥५॥

॥ नारद उवाचः ॥

भगवन्देवदेवेश सर्वज्ञ करुणानिधे । श्रोतुमिच्छामि प्रश्नेन भोगमोक्षैकसाधनम् ॥६॥
ऐश्वर्यस्य समग्रस्य फलदं द्वन्द्ववर्जितम् । ब्रह्महत्यादि पापघ्नं पापाद्यरिभयापहम् ॥७॥
यदेकं निष्कलं सूक्ष्मं निरञ्जनमनामयम् । यत्ते प्रियतमं लोके तन्मे ब्रूहि पितर्मम् ॥८॥

॥ ब्रह्मोवाचः ॥

विनियोग एवं ध्यान श्लोक ४२ से ५१ तक है'

शृणु नारद वक्ष्यामि ब्रह्ममूलं सनातनम् । सृष्ट्यादौ मन्मुखे क्षिप्तं देवदेवेन विष्णुना ॥९॥
प्रपञ्चबीजमित्याहुरुत्पत्तिस्थिति हेतुकम् । पुरा मया तु कथितं कश्यपाय सुधीमते ॥१०॥
सावित्रीपञ्जरं नाम रहस्यं निगमत्रये । ऋष्यादिकं च दिग्वर्णं साङ्गावरणकं क्रमात् ॥११॥
वाहनायुध मन्त्रास्त्रं मूर्तिध्यान समन्वितम् । स्तोत्रं शृणु प्रवक्ष्यामि तव स्नेहाश्च नारद ॥१२॥
ब्रह्मनिष्ठाय देयं स्याददेयं यस्य कस्यचित् । आचम्य नियतः पश्चादात्मध्यानपुरः सरम् ॥१३॥
ओमित्यादौ विचिंत्याथ व्योम हेमाब्ज संस्थितम् । धर्मकन्दगतज्ञानमैश्वर्याष्टदलान्वितम् ॥१४॥
वैराग्य कर्णिकासीनां प्रणवग्रहमध्यगाम् । ब्रह्मवेदी समायुक्तां चैतन्यपुरमध्यगाम् ॥१५॥
तत्त्वहसंसमाकीर्णां शब्दपीठे सुसंस्थिताम् । नादबिन्दुकलातीतां गोपुरैरूपशोभिताम् ॥१६॥
विद्याविद्यामृतत्वादि प्रकारैरभि संवृताम् । निगमार्गलसंच्छन्नां निर्गुणद्वारवाटिकाम् ॥१७॥
चतुर्वर्ग फलोपेतां महाकल्प वनैर्वृताम् । सान्द्रानंद सुधासिन्धु निगम द्वारवाटिकाम् ॥१८॥
ध्यानधारण योगादितृणगुल्मलतावृताम् । सदसच्चित्स्वरूपाख्य मृगपक्षिसमाकुलाम् ॥१९॥
विद्याविद्याविचारत्वाल्लोकालोका चलावृताम् । अविकार समाश्लिष्ट निजध्यान गुणावृताम् ॥२०॥
पञ्चीकरण पञ्चोत्थभूततत्व निवेदिताम् । वेदोपनिषदर्थाख्य देवर्षिगण सेविताम् ॥२१॥
इतिहासग्रहगणैः सदारैरभिवन्दिताम् । गाथाप्सरोभिर्यक्षश्च गणकिन्नर सेविताम् ॥२२॥
नारसिंह पुराणाख्यैः पुरुषैः कल्पचारणैः । कृतगानविनोदादि कथालापनतत्पराम् ॥२३॥
तदित्यवाङ्मनोगम्य तेजोरूपधरां पराम् । जगतः प्रसवित्रीं तां सवितुः सृष्टिकारिणीम् ॥२४॥

वरेण्यमित्यन्नमयीं पुरुषार्थफलप्रदाम् । अविद्यावर्णवर्ज्यां च तेजोवद्गर्भसंज्ञिकाम् ॥२५॥
देवस्य सच्चिदानन्दपरब्रह्म रसात्मिकाम् । धीमह्यहं स वै तद्वद् ब्रह्माद्वैतस्वरूपिणीम् ॥२६॥
धियो यो नस्तु सविता प्रचोदयादुपासिताम् । परोसौ सविता साक्षादेनोनिर्हरणाय च ॥२७॥
परोरजस इत्यादि परंब्रह्म सनातनम् । आपोज्योतिरिति द्वाभ्यां पाञ्चभौतिकसंज्ञकम् ॥२८॥
रसोकतं ब्रह्मपदैस्तां नित्यां तपिनीं पराम् । भूर्भुवः सुररित्येतैर्निगमत्व प्रकाशिकाम् ॥२९॥
महर्जनस्तपः सत्यलोकोपरि सुसंस्थिताम् । तादृगस्या विराड्रूपरहस्यं प्रवदाम्यहम् ॥३०॥
व्योमकेशालकाकाशद्यो किरीटविराजिताम् । मेघभ्रुकुटिमाक्रान्तविधि विष्णुशिवार्चिताम् ॥३१॥
गुरुभार्गवकर्णान्तां सोमसूर्याग्निलोचनाम् । इडापिङ्गलसूक्ष्माभ्यां वामनासापुटान्विताम् ॥३२॥
संध्याद्विरोष्टपुटितां लसद्वाग्भूपजिह्विकाम् । सन्ध्यासौद्युमणेः कण्ठलसद्बाहु समन्विताम् ॥३३॥
पर्जन्यहृदयासक्त वसुसुस्तनमण्डलाम् । आकाशोदर वित्रस्तनाभ्यवान्तरदेशिकाम् ॥३४॥
प्रजापत्याख्यजघनां कटीन्द्राणीति संज्ञिकाम् । ऊरूमलयमेरुभ्यां शोभमानाऽसुरद्विषाम् ॥३५॥
जानुनी जह्नुकुशिक वैश्वदेवसदाभुजाम् । अयनद्वयजङ्घाद्य सुराद्यपितृसंज्ञिकाम् ॥३६॥
पदांघ्रिनखरोमाणि भूतलद्रुम लांछिताम् । ग्रहराश्यर्क्षदेवर्षिमूर्तिं च परसंज्ञिकाम् ॥३७॥
तिथिमासर्तु वर्षाख्यसुकेतु निमिषात्मिकाम् । अहोरात्रार्द्धमासाख्यां सूर्यचन्द्रमसात्मिकाम् ॥३८॥
मायाकल्पित वैचित्र्यसंध्याच्छादनसम्वृताम् । ज्वलत्कालानलप्रख्यां तडित्कोटिसमप्रभाम् ॥३९॥
कोटिसूर्यप्रतीकाशां चन्द्रकोटिसुशीतलाम् । सुधामण्डलमध्यस्थां सान्द्रानन्दाऽमृतात्मिकाम् ॥४०॥
वागतीतां मनोरम्यां वरदां वेदमातरम् । चराचरमयीं नित्यां ब्रह्माक्षरसमन्विताम् ॥४१॥
ध्यात्वा स्वात्मनिभेदेन ब्रह्मपञ्जरमारभे । पञ्जरस्य ऋषिश्चाहं छन्दो विकृतिरुच्यते ॥४२॥
देवता च परो हंसः परब्रह्माधिदेवता । प्रणवो बीजशक्तिः स्यादोंकीलकमुदाहृतम् ॥४३॥
तत्तत्वं धीमहि क्षेत्रं धियोऽस्त्रं यत् परं पदम् । मन्त्रमापोज्योतरिति योनिर्हंसः सवेधकम् ॥४४॥
विनियोगस्तु सिद्ध्यर्थं पुरुषार्थचतुष्टये । ततस्तैरङ्गषट्कं स्यात्तैरेव व्यापकत्रयम् ॥४५॥
पूर्वोक्तदेवतां ध्यायेत्साकारगुण संयुताम् । पञ्चवक्त्रां दशभुजां त्रिपञ्चनयनैर्युताम् ॥४६॥
मुक्ताविद्रुमसौवर्णां सितशुभ्रसमाननाम् । वाणीं परां रमां मायां चामरैर्दर्पणैर्युताम् ॥४७॥
षडङ्गदेवतामन्त्रैरूपाद्यवयवात्मिकाम् । मृगेन्द्रवृष पक्षीन्द्रमृगहंसासनस्थिताम् ॥४८॥
ऊर्ध्वेन्दुबद्धमुकुटकिरीट मणिकुण्डलाम् । रत्नताटङ्कमाङ्गल्यपरग्रैवेयनूपुराम् ॥४९॥
अंगुलीयककेयूर कङ्कणौघैरलंकृताम् । दिव्यस्त्रग्वस्त्र संछन्नरविमण्डलमध्यगाम् ॥५०॥
वराभयाब्जयुगलां शङ्खचक्रगदाऽकुशाम् । शुभ्रं कपालं दधतीं वहन्तीमक्षमालिकाम् ॥५१॥
गायत्रीं वरदां देवीं सावित्रीं वेदमातरम् । आदित्यपथगां नित्यां स्मरेद्ब्रह्मस्वरूपिणीम् ॥५२॥
विचित्रमन्त्रजननीं स्मरेद्विद्यां सरस्वतीम् । त्रिपदाऋषिड्मयी पूर्वामुखी ब्रह्मास्त्रसंज्ञिका ॥५३॥

चतुर्विंशतितत्त्वाख्या पातु प्राचीं दिशं मम। चतुष्पाद यजुर्ब्रह्मदण्डाख्या पातु दक्षिणाम् ॥५४॥
षट्त्रिंशत्तत्त्वयुक्ता सा पातु मे दक्षिणां दिशम्। प्रत्यङ्मुखी पञ्चपदी पञ्चाशत्तत्त्वरूपिणी ॥५५॥
पातु प्रतीचीमनिशं सामब्रह्मशिरोऽङ्किता। सौम्यां ब्रह्मस्वरूपाख्या साथर्वाङ्गिरसात्मिका ॥५६॥
उदीचीं षट्पदा पातु चतुष्षष्टिकलात्मिका। पञ्चाशत्तत्त्वरचिता भवपादाश ताक्षरी ॥५७॥
व्योमाख्या पातु मे चोर्ध्वां दिशं वेदाङ्गसंस्थिता। विद्युन्निभा ब्रह्मसंज्ञा मृगारूढा चतुर्भुजा ॥५८॥
चापेषुचर्मासिधरा पातु मे पावकीं दिशम्। ब्राह्मीकुमारी गायत्री रक्ताङ्गी हंसवाहिनी ॥५९॥
बिभ्रत्कमण्डल्वक्षस्त्रक्स्नुवान्मे पातु नैर्ऋतीम्। चतुर्भुजा वेदमाता शुक्लाङ्गी वृषवाहिनी ॥६०॥
वराभयकपालाक्षस्त्रग्विणी पातु वारुणीम्। श्यामा सरस्वती वृद्धा वैष्णवी गरुडासना ॥६१॥
शङ्खार्यब्जाभयकरा पातु शैवीं दिशं मम। चतुर्भुजा वेदमाता गौराङ्गी सिंहवाहना ॥६२॥
वराभयाब्जयुगुलैर्भुजैः पात्वपरां दिशम्। तत्तत्पार्श्वस्थिता स्वस्ववाहनायुधभूषणा ॥६३॥
स्वस्वदिक्षुस्थिताः पान्तु ग्रहशक्त्यङ्गदेवताः। मन्त्राधिदेवता रूपा मुद्राधिष्ठानदेवताः ॥६४॥
व्यापकत्वेन पात्वस्मानापादतलमस्तकम्। तत्पदं मे शिरः पातु भालं मे सवितुः पदम् ॥६५॥
वरेण्यं मे दृशौ पातु श्रुती भर्गः सदा मम। घ्राणं देवस्य मे पातु पातु धीमहि मे मुखम् ॥६६॥
जिह्वां मम धियः पातु कण्ठे मे पातु यः पदम्। नः पदं पातु मे स्कंधौ भुजौ पातु प्रचोदयात् ॥६७॥
करौ मे च पराः पातु पादौ मे रजसोऽवतु। ॐ मे नाभिं सदा पातु कटिं मे पातु मे सदा ॥६८॥
ओमापः सक्थिनी पातु गुह्यं ज्योतिः सदा मम। ऊरू मम रसः पातु जानुनी अमृतं मम ॥६९॥
जंघे ब्रह्मपदं पातु गुल्फौ भूः पातु मे सदा। पादौ मम भुवः पातु सुवः पात्वखिलं वपुः ॥७०॥
रोमाणि मे महः पातु रोमकं पातु मे जनः। प्राणश्च धातुस्तत्त्वानि तदीशः पातु मे तपः ॥७१॥
सत्यं पातु ममायूंषि हंसो वृद्धिं च पातु मे। शुचिषत्पातु मे शुक्रं वसु पातु श्रियं मम ॥७२॥
मतिं पात्वन्तरिक्षे सद्धोता दानं च पातु मे। वेदिषत्पातु मे विद्यामतिथिः पातु मे गृहम् ॥७३॥
धर्मं दुरोणसत्पातु नृषत्पातु सुतान्मम। वरसत्पातु मे मायामृतसत्पातु मे सुतान् ॥७४॥
व्योमसत्पातु मे बन्धून् भ्रातृनब्जश्च पातु मे। पशून्मे पातु गोजाश्च ऋतजाः पातु मे भुवम् ॥७५॥
सर्वं मे अद्रिजा पातु यानं मे पातवृतं सदा। अनुक्तमथ यत्स्थानं शरीरन्तर्बहिश्च यत् ॥७६॥
तत्सर्वं पातु मे नित्यं हंसः सोऽहमहर्निशम्।

॥ माहात्म्यः ॥

इदं तु कथितं सम्यङ् मया ते ब्रह्मपञ्जरम् ॥७७॥
सन्ध्ययोः प्रत्यहं भक्त्या जपकाले विशेषतः। धारयेद् द्विजवर्यो यः श्रावयेद्वा समाहितः ॥७८॥
स विष्णुः स शिवः सोहं सोऽक्षरः स विराट् स्वराट्। शताक्षरात्मकं देव्यानामाष्टाविंशतिः शतम् ॥७९॥
शृणु वक्ष्यामि तत्सर्वमतिगुह्यं सनातनम्। भूतिदा भुवना वाणी वसुधा सुमना मही ॥८०॥
हरिणी जननी नन्दा सविसर्गा तपस्विनी। पयस्विनी सती त्यागा चैन्दवी सत्यवीरसा ॥८१॥

विश्वा तुर्या परा रेच्या निर्घृणी यमिनी भवा । गोवेद्या च जरिष्ठा च स्कन्दिनी धीर्मतिर्हिमा ॥८२॥
भीषणा योगिनी यक्षी नदी प्रज्ञा च चोदिनी । धनिनी यामिनी पद्मा रोहिणी रमणी ऋषिः ॥८३॥
सेनामुखी सामयी च वकुला दोषवर्जिता । सर्वकामदुघा सोमोद्भावाहङ्कारवर्जिता ॥८४॥
द्विपदा च चतुष्पदा त्रिपदा चैकषट्पदा । अष्टापदी नवपदी सा सहस्राक्षरात्मिका ॥८५॥
इदं यः परमं गुह्यं सावित्रीमन्त्रपञ्जरम् । नामाष्टविंशतिशतं शृणुयाच्छावयेत्पठेत् ॥८६॥
मर्त्यानाममृतत्वाय भीतानामभयाय च । मोक्षाय च मुमुक्षूणां श्रीकामानां श्रिये सदा ॥८७॥
विजयाय युयुत्सूनां व्याधितानामरोगकृत् । वश्याय वश्यकामानां विद्यायैवेदकामिनाम् ॥८८॥
द्रविणाय दरिद्राणां पापिनां पापशान्तये । वादिनां वादिविजये कवीनां कविताप्रदम् ॥८९॥
अन्नाय क्षुधितानां च स्वर्गायनाममिच्छताम् । पशुभ्यः पशुकामानां पुत्रेभ्यः पुत्रकांक्षिणाम् ॥९०॥
क्लेशिनां शोकशान्त्यर्थं नृणां शत्रुभयाय च । राजवश्याय द्रष्टव्यं पञ्जरं नृपसेविनाम् ॥९१॥
भक्त्यर्थं विष्णुभक्तानां विष्णौ सर्वान्तरात्मनि । नायकं विधिसृष्टानां शान्तये भवति ध्रुवम् ॥९२॥
निः स्पृहाणां नृणां मुक्तिः शाश्वती भवति ध्रुवम् । जप्यं त्रिवर्णसंयुक्तं गृहस्थेन विशेषतः ॥९३॥
मुनीनां ज्ञानसिद्ध्यर्थं यतीनां मोक्षसिद्धये । उद्यन्तं चन्द्रकिरणमुपस्थाय कृताञ्जलिः ॥९४॥
कानने वा स्वभवने तिष्ठञ्छुद्धो जपेदिदम् । सर्वान्कामानवाप्नोति तथैव शिवसन्निधौ ॥९५॥
मम प्रीतिकरं दिव्यं विष्णुभक्तिविवर्द्धनम् । ज्वरार्त्तानां कुशाग्रेण मार्जयेत्कुष्ठरोगिणाम् ॥९६॥
अङ्गमङ्गं यथालिङ्गं कवचेन तु साधकः । मण्डलेन विशुद्ध्येत् सर्वरोगैनै संशयः ॥९७॥
मृतप्रजा च या नारी जन्मवन्ध्या तथैव च । कन्यादिवन्ध्या या नारी तासामङ्गं प्रमार्जयेत् ॥९८॥
पुत्रानरोगिणस्तास्तु लभन्ते दीर्घजीविनः । तास्ताः संवत्सरादर्वाग्गर्भन्तु दधिरे पुनः ॥९९॥
पतिविद्वेषिणी या स्त्री अङ्गं तस्याः प्रमार्जयेत् । तमेव भजते सा स्त्री पतिं कामवश नयेत् ॥१००॥
अश्वत्थे राजवश्यार्थं बिल्वमूले स्वरूपभाक् । पलाशमूले विद्यार्थी तेजसाभिमुखो रवौ ॥१०१॥
कन्यार्थी चण्डिकागेहे जपेच्छत्रुभयाय च । श्रीकामो विष्णुगेहे च उद्याने श्रीवशी भवेत् ॥१०२॥
आरोग्यार्थे स्वगेहे च मोक्षार्थी शैलमस्तके । सर्वकामो विष्णुगेहे मोक्षार्थी यत्र कुत्रचित् ॥१०३॥
जपारम्भे तु हृदयं जपान्ते कवचं पठेत् । किमत्र बहुनोक्तेन शृणु नारद तत्त्वतः ।
यं यं चिन्तयते नित्यं तं तं प्राप्नोति निश्चितम् ॥१०४॥

॥ इति श्रीमद्वसिष्ठ संहितायां ब्रह्मनारदसंवादे श्रीमद्गायत्रीपञ्जरस्तोत्रं समाप्तम् ॥

॥ श्री गायत्री हृदयम् ॥

प्राप्त गायत्री हृदय स्तोत्र हमें अधूरा लगता है। गायत्री उपनिषद् के अन्त फलश्रुति में उपनिषद् को ही हृदय बताया है, अत: उपनिषद् का पाठ अवश्य करें।

विनियोग:- **ॐ अस्य श्रीगायत्री हृदयस्य श्री नारायण ऋषि:। गायत्री छन्द:। श्रीपरमेश्वरी देवता। श्रीपरमेश्वरी देवता प्रीत्यर्थे पाठे विनियोग:।**

ऋष्यादि न्यास:- **श्री नारायण ऋषये नम: शिरसि। गायत्री छन्दसे नम: मुखे। श्रीपरमेश्वरी देवतायै नम: हृदि श्रीपरमेश्वरी देवता प्रीत्यर्थे पाठे विनियोगाय नम: सर्वाङ्गे।**

अंगन्यास :- नाम के बाद **नम:** बोलकर उच्चारण कर न्यास करें। यथा - **द्यौ: नम: मूर्ध्नि। अश्विनौ नम: दन्तपंक्तौ। उभयो: सन्ध्यो: नम: ओष्ठौ। अग्नि: नम: मुखे। सरस्वती जिह्वायां। वृहस्पति: ग्रीवायां। अष्टौ वसव: स्तनयो:। मरुत: बाह्वो:। पर्जन्य: हृदये। आकाश: उदरे। अन्तरिक्षं नाभौ। इन्द्राग्नी कट्यो:। विज्ञान घन: प्रजापति: जघने। कैलास-मलय: ऊरौ। विश्वेदेवा: जान्वो:। कौशिक: जङ्घयो:। गुह्य: अयने। पितर: ऊरौ। पृथिवी पादयो:। वनस्पतय: अंगुलिषु। ऋषय: रोमसु। मुहूर्तानि नखेषु। ग्रहा: अस्थिषु। ऋतव: असृङ् -मांसयो:। सम्वत्सरा: निमिषे। आदित्यश्चन्द्रमा: अहोरात्रयो:। प्रवरां दिव्यां गायत्रीं सहस्त्रनेत्रां शरणमहं प्रपद्ये।**

ॐ तत्-सवितुर्वरेण्याय नम:। ॐ तत्-पूर्वा जयाय नम:। तत्-प्रातरादित्य-प्रतिष्ठायै नम:। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायमधीयानो दिवसकृतं पापं नाशयति। सायं प्रातरधीयानोऽपापो भवति। सर्वतीर्थेषु स्नातो भवति। सर्वैर्देवैर्ज्ञातो भवति। अवाच्य-वचनात् पूतो भवति। अभक्ष्य भक्षणात् पूतो भवति। अभोज्य भोजनात् पूतो भवति। अचोष्य चोषणात् पूतो भवति। असाध्य साधनात् पूतो भवति। दुष्प्रतिग्रह शतसहस्त्रात् पूतो भवति। सर्वप्रतिग्रहात् पूतो भवति। पंक्ति दूषणात् पूतो भवति। अनृतवचनात् पूतो भवति। अथाब्रह्मचारी ब्रह्मचारी भवति।

अनेन हृदयेनाधीतेन क्रतुसहस्त्रेणेष्टं भवति। षष्टिशत-सहस्त्र-गायत्र्या जप्यानि फलानि भवन्ति। अष्टौ ब्राह्मणान् सम्यक् ग्राहयेत्। तस्य सिद्धिर्भवति। य इदं नित्यमधीयानो ब्राह्मण: प्रात: शुचि: सर्वपापै: प्रमुच्यते। इति ब्रह्मलोके महीयते। इत्याह भगवान् श्रीनारायण:।

॥ इति श्री गायत्री हृदय स्तोत्रम् सम्पूर्णम् ॥

॥ गायत्री स्तवराज: ॥

इस स्तव में श्लोक ४, ५, ८, १०, ११, २५, २६ में अन्य मंत्रों के प्रयोग हैं।

विनियोग:- **ॐ अस्य श्री गायत्री स्तवराज मन्त्रस्य श्रीविश्वामित्र: ऋषि:। सकल जननी चतुष्पदा गायत्री परमात्मा देवता। सर्वोत्कृष्टं परम धाम तत्-सवितुर्वरेण्यं बीजं। भर्गो देवस्य धीमहि शक्ति:। धियो यो न: प्रचोदयात् कीलकं। ॐ भू: ॐ भुव ॐ स्व: ॐ मह: ॐ जन: ॐ तप: ॐ सत्यं ॐ तत्-सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॐ धियो यो न: प्रचोदयात् ॐ आपो ज्योती रसोऽमृतं व्यापकं। मम धर्मार्थ काममोक्षार्थे जपे विनियोग:।**

ऋष्यादि न्यासः– श्रीविश्वामित्र ऋषये नमः शिरसि। सकल जननी चतुष्पदा गायत्री परमात्मा देवतायै नमः हृदि। सर्वोत्कृष्टं परम धाम तत्–सवितुर्वरेण्यं बीजाय नमः लिङ्गे। भर्गो देवस्य धीमहि शक्तये नमः नाभौ। धियो यो नः प्रचोदयात् कीलकाय नमः पादयोः। ॐ भूः ॐ भुव ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्–सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॐ धियो यो नः प्रचोदयात् ॐ आपो ज्योती रसोऽमृतं व्यापकाय नमः सर्वाङ्गे। मम धर्मार्थ काममोक्षार्थे जपे विनियोगाय नमः अञ्जलौ।

॥ध्यानम्॥

गायत्रीं वेदधात्रीं शतमखफलदां वेदशास्त्रैक वेद्याम्।
चिच्छक्तिं ब्रह्मविद्यां परमशिवपदां श्रीपदं वै करोति।
सर्वोत्कृष्टं पदं तत्सवितुरनु पदान्ते वरेण्यं शरण्यम्,
भर्गो देवस्य धीमहि धियो यो नः प्रचोदयादित्यौर्वतेजः ॥१॥
साम्राज्यवीजं प्रणव त्रिपादं सव्यापसव्यं प्रजपेत् सहस्रकं।
संपूर्ण कामं प्रणवं विभूतिं तथा भवेद् वाक्यविचित्रवाणी ॥२॥
शुभं शिवं शोभनमस्तु मह्यं सौभाग्यभोगोत्सवमस्तु नित्यं।
प्रकाशविद्या त्रयशास्त्रसर्वं भजेन्महामन्त्रफलं प्रिये! वै ॥३॥

ब्रह्मास्त्रं ब्रह्मदण्डंशिरसि शिखिमहद्ब्रह्मशीर्षं नमोऽन्तकं। सूक्तंपारायणोक्तं प्रणवमथ महावाक्य सिद्धान्तमूलम्।
सूर्यं त्रीणि द्वितीयं प्रथममनु महावेद वेदान्तसूक्तं। नित्यं स्मृत्यनुसारं नियमित चरितं मूलमंत्रं नमोऽन्तम् ॥४॥
अस्त्रं शस्त्रहतं त्वघोरसहितं दण्डेन वाजीहतम्, आदित्यादिहतं शिरोऽन्तसहितं पापक्षयार्थं परम्।
तुर्यान्त्यादि विलोममंत्र पठनं बीजं शिखान्तोर्ध्वकम्, नित्यं कालनियम्य विप्रविदुषां किं दुष्कृतं भूसुरान् ॥५॥
नित्यं मुक्तिप्रदं नियम्य पवनं निर्घोषशक्तित्रयम्, सम्यग्ज्ञान गुरूपदेश विधिवद् देवीं शिखां तामपि।
षष्ट्यैकोत्तर संख्ययानुगत सौषुम्णादि मार्गत्रयीम्, ध्यायेन्नित्य समस्त वेदजननीं देवीं त्रिसंध्यामयीम् ॥६॥
गायत्रीं सकलागमाथ विदुषां सौरस्य बीजेश्वरीम्, सर्वाम्नाय समस्तमंत्रजननीं सर्वज्ञधामेश्वरीम्।
ब्रह्मादि त्रयसम्पुटार्थ करणीं संसार पारायणीम्, सन्ध्यां सर्वसमानतन्त्र परया ब्रह्मानु–सन्धायिनीम् ॥७॥
एक द्वि त्रि चतुः समानगणना वर्णाष्टकं पादयोः, पादादा प्रणवादि मन्त्रपठने मन्त्रत्रयी सम्पुटाम्।
सन्ध्यायां द्विपदं पठेत् परतरं सायं तुरीयं युतम्, नित्यानित्यमनन्त कोटिफलदं प्रातं नमस्कुर्महे ॥८॥
ओजोऽसीति सहोस्यवो बलमसि भ्राजोऽसि तेजस्विनी, वर्चस्वी सवितानि सोमममृतं रूपं धरं धीमहि।
देवानां द्विजवर्यतां मुनिगणे मुक्तार्थिनां शान्तिनां, ओमित्येकमृचं पठन्ति यमिनो यं यं स्मरेत् प्राप्नुयात् ॥९॥
ओमित्येकमज–स्वरूपममलं तत्सप्तधा भादितम्, तारं तन्त्रसमन्वितं परतरे पादत्रयं गर्भितम्।
आपो ज्योति रसोऽमृतं जनमहः सत्यं तपः स्वर्भुवः, भूयो भूय नमामि भूर्भुवः स्वरोमेतैर्महामंत्रकम् ॥१०॥
आदौ बिन्दुमनुस्मरन् परतरे बालात्रिवर्णोच्चरन्, व्याहृत्यादि सबिन्दुयुक्त त्रिपदातारत्रयं तुर्यकम्।
आरोहादवरोहतः क्रमगता श्रीकुण्डलीत्थं स्थिता, देवी मानस पङ्कजे त्रिनयना पञ्चानना पातु माम् ॥११॥
सर्वे सर्ववशे समस्त समये सत्यात्मिके सात्विके, सावित्री सहितात्मके शशियुते सांख्यायन गोत्रजे!।
सन्ध्या त्रीण्युपकल्प्य संग्रहविधिः सन्ध्याभिधा नामके, गायत्री प्रणवादि मन्त्रगुरुणा सम्प्राप्य तस्मै नमः ॥१२॥

क्षेमं दिव्यमनोरथाः परतरे चेतः समाधीयताम् , ज्ञानं नित्य वरेण्यमेतदमलं देवस्य भर्गो धियन् ।
मोक्ष श्रीर्विजयार्थिनोऽथ सवितुः श्रेष्ठं विधिस्तत्पदम् , प्रज्ञामेध प्रचोदयात् प्रतिदिनं यो नः पदं पातु माम् ॥१३॥

सत्यं तत्सवितुर्वरेण्य विरलं विश्वादि मायात्मकम् , सर्वाद्यं प्रतिपाद पादरमया तारं तथा मन्मथम् ।
तुर्याऽन्य त्रितयं द्वितीयमपरं संयोग सव्याहृतिम् , सर्वाम्नाय मनोन्मनी मनसिजा ध्यायामि देवीं पराम् ॥१४॥

आदौ गायत्रि मन्त्रं गुरुकृत नियमं धर्मकर्मानुकूलम्,
सर्वाद्यं सारभूतं सकल मनुमयं देवतानामगम्यम् ।
देवानां पूर्वदेव द्विजकुल मुनिभिः सिद्ध विद्याधराद्यैः,
को वा वक्तुं समर्थस्तव मनु महिमा बीज राजादिमूलं ॥१५॥

गायत्रीं त्रिपदां त्रिबीजसहितां त्रिव्याहृतिं त्रैपदाम्, त्रिब्रह्म त्रिगुणां त्रिकालनियमां वेदत्रयीं तां पराम् ।
सांख्यादित्रयरूपिणीं त्रिनयनां मातृत्रयीं तत्पराम्, त्रैलोक्य त्रिदश त्रिकोटि सहितां सन्ध्यां त्रयीं तां नुमः ॥१६॥

ओमित्येतत् त्रिमात्रा त्रिभुवन करणं त्रिस्वरं वह्निरूपं, त्रीणि त्रीणि त्रिपादं त्रिगुणगुणमयं त्रैपुरान्तं त्रिसूक्तं ।
तत्वानां पूर्वशक्तिं द्वितयगुरुपदं पीठयन्त्रात्मकं तम, तस्मादेतत् त्रिपादं त्रिपदमनुसरं त्राहि मां भो नमस्ते ॥१७॥

स्वस्ति श्रद्धाति मेधा मधुमति मधुरः संशयः प्रज्ञकान्तिः, विद्या बुद्धिर्बलं श्रीरतनुधनपतिः सौम्यवाक्यानुवृत्तिः ।
मेधा प्रज्ञा प्रतिष्ठा मृदुपतिमधुरा पूर्णविद्याप्रपूर्णम्, प्राप्तं प्रत्यूषचिन्त्यं प्रणवपरवशात् प्राणिनां नित्यकर्मम् ॥१८॥

पञ्चाशद्वर्णमध्ये प्रणवपरयुते मन्त्रमाद्यं नमोऽन्तम्, सर्वं सव्यापसाव्यं शतगुणमभितो वर्ममष्टोत्तरं ते ।
एवं नित्यं प्रजप्तं त्रिभुवनसहितं तुर्यमन्त्रं त्रिपादम्, ज्ञानं विज्ञानगम्यं गगनसुसदृशं ध्यायते यः स मुक्तः ॥१९॥

आदिक्षान्तसविन्दुयुक्तसहितं मेरुं क्षकारात्मकम्, व्यस्ताव्यस्तसमस्तवर्ग सहितं पूर्णं शताष्टोत्तरम् ।
गायत्रीं जपतां त्रिकाल सहितां नित्यं सनैमित्तिकम्, चैवं जाप्यफलं शिवेन कथितं सद्भोगमोक्ष प्रदम् ॥२०॥

ससव्याहृतिसप्ततारविकृतिः सत्यं वरेण्यं धृतिः, सर्वं तत्सवितुश्च धीमहि महाभर्गस्य देवं भजे ।
धाम्नो धामधर्माधिधारण महान् धीमत्पदं ध्यायते, ॐ तत्सर्वमनुप्रपूर्ण दशकं पादत्रयं केवलम् ॥२१॥

विज्ञानं विलसद्विवेकवचसः प्रज्ञानुसन्धारिणीम्, श्रद्धामेध्ययशः शिरः सुमनसः स्वस्तिश्रियः स्वां सदा ।
आयुष्यं धनधान्यलक्ष्मिमतुलां देवीं कटाक्षं परम् । तत्काले सकलार्थसाधनमहान् मुक्तिर्महत्वं पदम् ॥२२॥

पृथ्वी गन्धार्चनायां नभसि कुसुमता वायुर्धूप प्रकर्षो, वह्निर्दीपप्रकाशो जलममृतमयं नित्यसङ्कल्पपूजा ।
एतत् सर्वं निवेद्य सुख वसति हृदि सर्वदा दम्पतीनाम्, त्वं सर्वज्ञ! शिवं कुरुष्व ममता नाहं त्वया ज्ञेयसि ॥२३॥

सौम्यं सौभाग्यहे तु सकलसुखकरं सर्वसौख्यं समस्तं, सत्यं सद्भोगनित्यं सुखजनसुहृदं सुन्दरं श्रीसमस्तं ।
सौमङ्गल्यं समग्रं सकलशुभकरं स्वस्तिवाचं समस्तं, सर्वाद्यं सद्विवेकं त्रिपदपदयुगं प्राप्तमध्या समस्तं ॥२४॥

गायत्री पदपञ्च पञ्चप्रणवद्वन्द्वं त्रिधा सम्पुटम्, सृष्ट्यादि क्रममन्त्रजाप्य दशकं देवी पदं क्षुत्त्रयम् ।
मन्त्रादिस्थितकेषु सम्पुटमिदं श्रीमातृकावेष्टितं, वर्णान्त्यादिविलोममन्त्र जपनं संहारसम्मोहनम् ॥२५॥

भूराद्यं भूर्भुव स्वस्त्रिपदपदयुतं त्र्यक्षमाद्यन्तयोज्यम्, सृष्टिस्थित्यन्तकार्यं क्रमशिखि सकलं सर्वमन्त्रं प्रशस्तम् ।
सर्वाङ्गं मातृकाणां मनुमयवपुषं मन्त्रयोगं प्रयुक्तं, संहारं क्षादिवर्णं वसुशतगणनं मन्त्रराजं नमामि ॥२६॥

वैश्वामित्र मुदाहृतं हितकरं सर्वार्थसिद्धिप्रदम्, स्तोत्राणां परमं प्रभातसमये पारायणं नित्यशः ।
वेदानां विधिवादमन्त्रसकलं सिद्धिप्रदं सम्पदाम्, सम्प्राप्नोत्यपरत्र सर्वसुखदामायुष्यमारोग्यताम् ॥२७॥

॥ श्रीविश्वामित्र कृतो श्रीगायत्रीस्तवराजः शुभं भूयात् ॥

॥ श्री गायत्री उपनिषद् ॥

नमस्कृत्य भगवान् याज्ञवल्क्यः स्वयं परिपृच्छति- त्वं ब्रूहि भगवन्! गायत्र्या उत्पत्तिं श्रोतुमिच्छामि।

ब्रह्मोवाच-प्रणवेन व्याहृतयः प्रवर्तन्ते। तमसस्तु परं ज्योतिः कः पुरुषः स्वयम्भूर्विष्णुरिति हताः स्वांगुल्याः मथयेत्। मथ्यमानात् फेनो भवति। फेनाद् बुद्बुदो भवति। बुद्बुदादण्डो भवति। अण्डवानात्मा भवति। आत्मनः आकाशो भवति। आकाशाद् वायुर्भवति। वायोरग्निर्भवति। अग्नेरोङ्कारो भवति।

ॐकाराद् व्याहृतिर्भवति। व्याहृत्या गायत्री भवति। गायत्र्याः सावित्री भवति। सावित्र्याः सरस्वती भवति। सरस्वत्या वेदा भवन्ति। वेदेभ्यो ब्रह्मा भवति। ब्रह्मणो लोकाः भवन्ति। तस्माल्लोकाः प्रवर्तन्ते चत्वारो वेदाः साङ्गाः सोपनिषदः सेतिहासास्ते सर्वे गायत्र्याः प्रवर्तन्ते।

यथाग्निर्देवानां, ब्राह्मणो मनुष्याणां, मेरुः शिखरिणां, गंगा नदीनां वसन्त ऋतूनां, ब्रह्मा प्रजापतीनामेवासौ मुख्यः गायत्र्या गायत्री छन्दो भवति।

किं भूः? किं भुवः? किं स्वः? किं महः? किं जनः? किं तपः? किं सत्यं? किं तत्? किं सवितुः? किं वरेण्यं? किं भर्गः? किं देवस्य? किं धीमहि? किं धियः? किं यः ? किं नः? किं प्रचोदयात्?

भूरिति भूर्लोकः। भुवरित्यन्तरिक्ष लोकः। स्वरिति स्वर्लोकः। महरिति महर्लोकः। जन इति जनो लोकः। तप इति तपोलोकः। सत्यमिति सत्यलोकः।

ॐ भूर्भुवः स्वरोमिति त्रैलोक्यम्। तदसौ तेजः, यत् तेजसोऽग्निर्देवता। सवितुरित्यादित्यस्य। वरेण्यमित्यन्न मन्नमेव प्रजापतिः। भर्ग इत्यापो वै भर्गः, एतास्तत्-सर्वा देवताः। देवस्येन्द्रो वै देवयद् दिवं तदिन्द्रस्तस्मात् सर्वकृत् पुरुषो नाम विष्णुः। धीमहि किमध्यात्मं तत् परमं पदमित्यध्यात्मं। येन इति पृथिवी वै यो नः प्रचोदयात्।

काम इमाँल्लोकान् प्रच्यवन् यो नृशंस्योस्तोष्यस्तत् परमो धर्मः। इत्येषा गायत्री किं गोत्रा? कत्यक्षरा? कतिपदा? कतिकुक्षिः? कतिशीर्षाणि?

सांख्यायन सगोत्रा गायत्री। चतुर्विंशत्यक्षरा। त्रिपदा। षटकुक्षिः सावित्री।

कऽस्यास्त्रयः पादा भवन्ति? काऽस्याः कुक्षिः? कानि पञ्चशीर्षाणि?

ऋग्वेदोऽस्याः प्रथमः पादो भवति, यजुर्वेदो द्वितीयः, सामवेदस्तृतीयः। पूर्वा दिक् प्रथमा कुक्षिर्भवति, दक्षिणा द्वितीया, पश्चिमा तृतीया, उदीची चतुर्थी, ऊर्ध्वा पञ्चमी, अधरा षष्ठी कुक्षिः। व्याकरणमस्याः प्रथमं शीर्षं भवति, शिक्षा द्वितीयं, कल्पस्तृतीयं, निरुक्तं चतुर्थं, ज्योतिषमयनं पञ्चमं। किं लक्षणं? किमु चेष्टितं? किमुदाहृतं? किमक्षरं?

दैवत्यं लक्षणं। मीमांसा अथर्ववेदो विचेष्टितं। छन्दोविधिरित्युदाहृतं। को वर्णः? कः स्वरः।

श्वेतो वर्णः। षट्स्वराणि। इमान्यक्षराणि दैवतानि भवन्ति। पूर्वा भवति गायत्री, मध्यमा सावित्री, पश्चिमा सन्ध्या सरस्वती।

प्रातः संध्या रक्ता, रक्तपद्मासनास्था, रक्ताम्बरधरा, रक्तवर्णा, रक्तगंधानुलेपना, चतुर्मुखा, अष्टभुजा, द्विनेत्रा, दण्डाक्षमाला कमण्डलु स्त्रुकस्त्रुव धारिणी, सर्वाभरण भूषिता, कौमारी ब्राह्मी हंस वाहिनी, ऋग्वेद सहिता ब्रह्म दैवत्या, त्रिपदा गायत्री, षटकुक्षिः, पञ्चशीर्षा, अग्निमुखा, रुद्र शिव विष्णु हृदया, ब्रह्मकवचा, सांख्यायन

सगोत्रा, भूर्लोक व्यापिनी, अग्निस्तत्वम्, उदात्तानुदात्तस्वरित स्वर मकारः आत्मज्ञाने विनियोगः।

इत्येषा गायत्री मध्याह्न संध्या श्वेता, श्वेत पद्मासनस्था, श्वेताम्बरधरा, श्वेतगन्धानुलेपना पञ्चमुखी, दशभुजा, त्रिनेत्रा, शूलाक्षमाला कमण्डलुकपालधारिणी, सर्वाभरणभूषिता सावित्री युवती माहेश्वरी, वृषभवाहिनी, यजुर्वेदसहिता, रुद्रदैवत्या त्रिपदा सावित्री, षट्कुक्षिः, पञ्चशीर्षा, अग्निमुखा, रुद्रशिखा, ब्रह्मकवचा, काश्यप सगोत्रा स्वर्लोकव्यापिनी, सूर्यस्तत्वं, उदात्तानुदात्त-स्वरितमकारः, कृष्णवर्णो मोक्षज्ञाने विनियोगः।

इत्येषा सरस्वती रक्ता गायत्री, श्वेता सावित्री, कृष्णवर्णा सरस्वती, प्रणवो नित्य युक्तश्च व्याहृतिषु च सप्तसु सर्वेषामेव पापानां सङ्करे समुपस्थिते। दशशतं समभ्यर्च्य गायत्री पावनी महत्। प्रह्लादोऽत्रिर्वशिष्ठश्च शुकः कण्वः पराशरः। विश्वामित्रो महातेजाः कपिलः शौनको महान्। याज्ञवल्क्यो भरद्वाजो जमदग्निस्तपो निधिः। गौतमो मुद्गलः श्रेष्ठो वेदव्यासश्च लोमशः। अगस्त्यः कौशिको वत्सः पुलस्त्यो माण्डुकस्तथा। दुर्वासास्तपसा श्रेष्ठो नारद कश्यपस्तथा। उक्तात्युक्ता तथा मध्या प्रतिष्ठान्यास पूर्विकाः।

गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च। त्रिष्टुप् च जगती चैव तथाति जगती मता। शक्करी सति पूर्वास्यादष्ट्यत्यष्टी तथैव च। धृतिश्चाति धृतिश्चैव प्रकृतिः कृतिराकृतिः। विकृतिः संकृतिश्चैव तथाति कृतिरुत्कृतिः। इत्येताश्छन्दसां संज्ञाः क्रमशो वच्मि साम्प्रतम्। भूरिति छन्दो भुवरिति छन्दः स्वरितिच्छन्दो भूर्भुवः स्वरोमिति दैवी गायत्री। इत्येतानिच्छन्दांसि प्रथममाग्नेयं, द्वितीयं प्राजापत्यं, तृतीयं सौम्यं, चतुर्थमैशानं, पञ्चममादित्यं, षष्ठं बार्हस्पत्यं, सप्तमं पितृदैवत्यं, अष्टमं भगदैवत्यं नवममार्यम्णं, दशमं सावित्रं, एकादशं त्वाष्ट्रं, द्वादशं पौष्णं, त्रयोदशमैन्द्राग्नं, चतुर्दशं वायव्यं, पञ्चदशं वामदैवत्यं, षोडशं मैत्रावरुणं, सप्तदशं भ्रातृव्यमष्टदशं, वैश्वदेव्यं, एकोनविंशं वैष्णवं, विंशं वासवं, एकविंशं रौद्रं, द्वाविंशमाश्विनं, त्रयोविंशं चतुर्विंशं ब्राह्मं, दीर्घान् स्वरेण संयुक्तान् विन्दुनाद समन्वितान्।

व्यापकान् विन्यसेत् पश्चाद् दश पंक्त्याक्षराणि च। द्रुवुंपुस इति प्रत्यक्ष बीजानि।

प्रह्लादिनी प्रभा सत्या विश्वा भद्रा विलासिनी। प्रभावती जया कान्ता शान्ता पद्मा सरस्वती। विद्रुमस्फटिकाकारं पद्मराग समप्रभम्। इन्द्रनीलमणि प्रख्यं मौक्तिकं कुंकुम प्रभम्। अजनाभं च गाङ्गेयं वैदूर्यं चन्द्रसन्निभम्। हारिद्रं कृष्णदुग्धाभं रविकान्तिसमं भवम्। शुकपिच्छ समाकारं क्रमेण परिकल्पयेत्।

पृथिव्यापस्तथा तेजो वायुराकाश एव च। गन्धो रसश्च रूपं च शब्दः स्पर्शस्तथैव च। घ्राणं जिह्वा च चक्षुश्च त्वक् छोत्रं च तथापरं। उपस्थपायु पादादि पाणिर्वागपि च क्रमात्। मनो बुद्धिरहङ्कारमव्यक्तं च यथा क्रमम्। सुमुखं सम्पुटं चैव विततं विस्तृतं तथा। एकमुखं द्विमुखं च त्रिमुखं च चतुर्मुखं। पञ्चमुखं षणमुखं चाधोमुखं चैव व्यापकं। आञ्जलिकं ततः प्रोक्तं मुद्रितं तु त्रयोदशं। शकटं यमपाशं च ग्रंथितं सम्मुखोन्मुखं। प्रलम्बं मुष्टिकं चैव मत्स्यः कूर्मो वराहकं। सहाक्रान्तं महाक्रान्तं मुद्गरं पल्लव तथा। एता मुद्राश्चतुर्विंशद् गायत्र्याः सुप्रतिष्ठिताः।

ॐ मूर्ध्नि सङ्घाते ब्रह्मा, विष्णुर्ललाटे, रुद्रो भ्रूमध्ये, चक्षुषोश्चन्द्रादित्यौ, कर्णयोः शुक्र-बृहस्पति, नासिके वायुदैवत्यं, प्रभातं दोषा उभे सन्ध्ये मुखमग्निर्जिह्वा सरस्वती, ग्रीवा स्वाध्यायास्तनयोर्वसवः, बाह्वोर्मरुतः, हृदयं पर्जन्यं, आकाशमपरं नाभिरन्तरिक्षं, कटिरिन्द्रियाणि, जघनं प्राजापत्यं, कैलास मलयौ ऊरू, विश्वेदेवा जानुभ्यां, जान्वोः कुशिकौ, जङ्घयोरयन द्वयं, सुराः पितरः पादौ, पृथिवी वनस्पतिः गुल्फौ रोमाणि, मुहूर्तास्ते विग्रहाः केतुमासा ऋतवः, सन्ध्याकाल त्रयमाच्छादनं सम्वत्सरो निमिषः। अहोरात्रा-वादित्य चन्द्रमसौ सहस्र परमां देवीं शतमध्यां दशापरां। सहस्रनेत्रां देवीं गायत्रीं शरणमहं प्रपद्ये।

तत्-सवितुर्वरदाय नमः। तत्-प्रातरादित्याय नमः। सायमधीयानो दिवसकृतं पापं नाशयति। प्रातरधीयानो रात्रिकृतं पापं नाशयति। तत्-सायं-प्रातः प्रयुञ्जानोऽपापो भवति।

य इदं गायत्री हृदयं ब्राह्मणः प्रयतः पठेत्, चत्वारो वेदा अधीता भवति, सर्वेषु तीर्थेषु स्नातो भवति, सर्वैर्देवैर्ज्ञातो भवति, सर्वप्रति प्रत्यूहात् पूतो भवति, अलेह्य लेहात् पूतो भवति, अचोष्य-चोषात् पूतो भवति, सुरापानात् पूतो भवति, सुवर्णस्तेयात् पूतो भवति, पंक्तिभेदनात् पूतो भवति, पतित सम्भाषणात् पूतो भवति, अनृत वचनात् पूतो भवति, गुरुतल्प गमनात् पूतो भवति, अगम्या गमनात् पूतो भवति, वृषली गमनात् पूतो भवति, ब्रह्महत्यायाः पूतो भवति, भ्रूणहत्यायाः पूतो भवति, वीरहत्यायाः पूतो भवति, अ-ब्रह्मचारी सुब्रह्मचारी भवति।

अनेन हृदयाधीतेन क्रतु शतेनेष्टं भवति, षष्टिसहस्त्रं गायत्रीपा भवन्ति। अष्टब्राह्मणान् ग्राहयेत् अर्थसिद्धिर्भवति। य इदं गायत्री हृदयं ब्राह्मणः प्रयतः पठेत्। सर्वं पापैः प्रमुच्यते ब्रह्मलोके महीयते।

॥ इति श्री गायत्री उपनिषद् सम्पूर्णम् ॥

॥ श्रीगायत्री अष्टोत्तर सहस्त्रनाम स्तोत्रम्॥

विनियोगः - ॐ अस्य श्रीगायत्री अष्टोत्तर सहस्त्रनाम स्तोत्रस्य श्री ब्रह्मा ऋषिः। अनुष्टुप्छन्दः। श्रीदेवी गायत्री देवता। हलो बीजानि। स्वराः शक्तयः। सर्वाभीष्ट सिद्ध्यर्थे पाठे विनियोगः।

ऋष्यादिन्यासः - श्रीब्रह्मा ऋषये नमः शिरसि। अनुष्टुप्छन्दसे नमः मुखे। श्रीदेवी गायत्र्यै नमः हृदि। हल्भ्यो बीजेभ्यो नमः गुह्ये। स्वरेभ्यः शक्तिभ्यः नमः पादयोः। सर्वाभीष्ट सिद्ध्यर्थे पाठे विनियोगायः नमः सर्वाङ्गे।

षडङ्गन्यासः - आं, ईं, ऊं, ऐं, औं, अः मातृकाक्षरोंः से हृदयादिन्यास करें।

॥ ध्यानम् ॥

रक्त श्वेत हिरण्य नील धवलैर्युक्तां त्रिनेत्रोज्ज्वलाम्,
रक्तां रक्त नवस्त्रजं मणिगणैर्युक्तां कुमारीमिमाम्।
गायत्रीं कमलासनां करतलव्यानद्ध कुण्डाम्बुजाम्,
पद्माक्षीं च वरस्त्रजं च दधतीं हंसाधिरूढां भजे ॥

॥ श्रीनारद उवाच ॥

भगवन्! सर्वधर्मज्ञ! सर्वशास्त्र विशारद! श्रुतिस्मृति पुराणानां रहस्यं त्वन्मुखाच्छ्रुतम् ॥१॥
सर्वपापहरं देव! येन विद्या प्रवर्तते। केन वा ब्रह्मविज्ञानं किं नु वा मोक्ष साधनम् ॥२॥
ब्राह्मणानां गतिः केन केन वा मृत्युनाशनम्। ऐहिकामुष्मिक फलं केन वा पद्मलोचन ॥३॥
वक्तुमर्हस्यशेषेण सर्वं निखिलमादितः।

॥ नारायण उवाच ॥

साधु साधु महाप्राज्ञ! सम्यक् पृष्टं त्वयानघ ॥४॥
शृणु वक्ष्यामि! यत्नेन गायत्र्यष्ट सहस्त्रकम्। नाम्नां शुभानां दिव्यानां सर्वपाप विनाशनम् ॥५॥

॥ अथ स्तोत्रम् ॥

अचिन्त्य लक्षणाव्यक्ताप्यर्थ मातृमहेश्वरी। अमृतार्णव मध्यस्थाप्यजिता चापराजिता ॥१॥
अणिमादि गुणाधाराप्यर्कमण्डल संस्थिता। अजराजापराधर्मा अक्षसूत्र धराधरा ॥२॥

अकारादि क्षकारान्ताप्यरि षड्वर्ग भेदिनी । अञ्जनाद्रि प्रतीकाशाप्यञ्जनाद्रि निवासिनी ॥३॥
अदितिश्चाजपाविद्याप्यरविन्द निभेक्षणा । अन्तर्बहिः स्थिताविद्या ध्वंसिनी चान्तरात्मिका ॥४॥
अजा चाजमुखावासाप्यरविन्द निभानना । अर्धमात्रार्थ दानज्ञाप्यरि - मण्डलमर्दिनी ॥५॥
असुरघ्नी ह्यमावास्याप्यलक्ष्मी घ्न्यन्त्यजार्चिता । आदिलक्ष्मीश्चादि शक्तिराकृतिश्चायतानना ॥६॥
आदित्य पदवीचाराप्यादित्य परिसेविता । आचार्याऽऽवर्तनाऽऽचाराप्यादि मूर्ति निवासिनी ॥७॥
आग्नेयी चामरी चाद्या चाराध्या चासनस्थिता । आधार-निलयाऽऽधारा चाकाशान्त निवासिनी ॥८॥
आद्याक्षर समायुक्ता चान्तराकाश रूपिणी । आदित्य मण्डलगता चान्तरध्वान्त नाशिनी ॥९॥
इन्दिरा चेष्टदा चेष्टा चेन्दीवर निभेक्षणा । इरावती चेन्द्रपदा चेन्द्राणी चेन्दुरूपिणी ॥१०॥
इक्षुकोदण्डसंयुक्ता चेषुसन्धानकारिणी । इन्द्रनील समाकारा चेडा पिङ्गलरूपिणी ॥११॥
इन्द्राक्षी चेश्वरी देवी चेहा त्रयविवर्जिता । उमा चोषा ह्युडुनिभा उर्वारुक फलानना ॥१२॥
उडुप्रभा चोडुमती ह्युडुपा ह्युडुमध्यगा । ऊर्ध्वं चाप्यूर्ध्वकेशी चाप्यूर्ध्वाधो गतिभेदिनी ॥१३॥
ऊर्ध्वबाहुप्रिया चोर्मिमाला वाग्ग्रंथदामिनी । ऋतं चर्षिर्ऋतुमती ऋषिदेव नमस्कृता ॥१४॥
ऋग्वेदा ऋणहर्त्री च ऋषिमण्डल चारिणी । ऋद्धिदा ऋजु मार्गस्था ऋजुधर्मा ऋतुप्रदा ॥१५॥
ऋग्वेदनिलया ऋज्वी लुप्तधर्म प्रवर्तिनी । लूतारिव सम्भूता लूतादि विषहारिणी ॥१६॥
एकाक्षरा चैकमात्रा चैका चैकैक निष्ठिता । ऐन्द्री ह्यैरावतारूढा चैहिकामुष्मिकप्रदा ॥१७॥
ओंकारा ह्योषधी चोता चोतप्रोत निवासिनी । और्वा ह्यौषध - सम्पन्ना औपासन फलप्रदा ॥१८॥
अण्डमध्यस्थिता देवी चा:कार मनुरूपिणी । कात्यायनी कालरात्रिः कामाक्षी कामसुन्दरी ॥१९॥
कमला कामिनी कान्ता कामदा कालकण्ठिनी । करिकुम्भस्तनभरा करवीर सुवासिनी ॥२०॥
कल्याणी कुण्डलवती कुरुक्षेत्र - निवासिनी । कुरुविन्द -दलाकारा कुण्डली कुमुदालया ॥२१॥
कालजिह्वा करालास्या कालिका कालरूपिणी । कमनीयगुणा कान्तिः कलाधारा कुमुद्वती ॥२२॥
कौशिकी कमलाकारा कामचार प्रभञ्जिनी । कौमारी करुणापाङ्गी ककुबन्ता करिप्रिया ॥२३॥
केशरी केशवनुता कदम्ब कुसुमप्रिया । कालिन्दी कालिका काञ्वी कलशोद्भव - संस्तुता ॥२४॥
काममाता क्रतुमती कामरूपा कृपावती । कुम ारी कुण्डनिलया किराती कीरवाहना ॥२५॥
कैकेयी कोकिलालापा केतकी - कुसुमप्रिया । कमण्डलुधरा काली कर्मनिर्मूलकारिणी ॥२६॥
कलहंसगतिः कक्षा कृतकौतुक मंगला । कस्तूरी तिलका कम्प्रा करीन्द्रगमना कुहूः ॥२७॥
कर्पूर लेपना कृष्णा कपिला कुहराश्रया । कूटस्था कुधरा कम्रा कुक्षिस्थाऽखिल विष्टपा ॥२८॥
खड्ग खेटकरा खर्वा खेचरी खगवाहना । खड्वाङ्गधारिणी ख्याता खगराजोपरिस्थिता ॥२९॥
खलघ्नी खण्डितजरा खण्डाख्यान प्रदायिनी । खण्डेन्दुतिलका गंगा गणेशगुह - पूजिता ॥३०॥
गायत्री गोमती गीता गान्धारी गानलोलुपा । गौतमी गामिनी गाधा गन्धर्वाप्सर सेविता ॥३१॥

गोविन्द - चरणाक्रान्ता गुणत्रय विभाविता। गन्धर्वी गह्वरी गोत्रा गिरीशा गहना गमी ॥३२॥
गुहावासा गुणावती गुरुपाप प्रणाशिनी। गुर्वी गुरुवती गुह्या गोप्तव्या गुणदायिनी ॥३३॥
गिरिजा गुह्यमातङ्गी गरुड़ध्वज - वल्लभा। गर्वापहारिणी गोदा गोकुलस्था गदाधरा ॥३४॥
गोकर्ण निलयासक्ता गुह्यमण्डलवर्तिनी। धर्मदा घनदा घण्टा घोर दानव मर्दिनी ॥३५॥
घृणिमन्त्रमयी घोषा घनसम्पात दायिनी। घण्टारवप्रिया घ्राणा घृणिसन्तुष्ट कारिणी ॥३६॥
घनारि मण्डला घूर्णा घृताची घनवेगिनी। ज्ञानधातुमयी चर्चा चर्चिता चारुहासिनी ॥३७॥
चटुला चण्डिका चित्रा चित्रमाल्यविभूषिता। चतुर्भुजा चारुदन्ता चातुरी चरितप्रदा ॥३८॥
चूलिका चित्रवस्त्रान्ता चन्द्रमः कर्णकुण्डला। चन्द्रहासा चारुदात्री चकोरी चन्द्रहासिनी ॥३९॥
चन्द्रिका चन्द्रधात्री च चौरीचौरा च चण्डिका। चञ्चद्-वाग्वादिनी चन्द्रचूडा चोरविनाशिनी ॥४०॥
चारुचन्दन लिप्ताङ्गी चञ्चच्चामर - वीजिता। चारुमध्या चारुगतिश्चन्दिला चन्द्ररूपिणी ॥४१॥
चारुहोमप्रिया चार्वाचरिता चक्रबाहुका। चन्द्रमण्डलमध्यस्था चन्द्रमण्डलदर्पणा ॥४२॥
चक्रवाकस्तनी चेष्टा चित्रा चारुविलासिनी। चित्स्वरूपा चन्द्रवती चन्द्रमाश्चन्दनप्रिया ॥४३॥
चोदयित्री चिरप्रज्ञा चातका चारुहेतकी। छत्रयाता छत्रधरा छाया छन्दः परिच्छदा ॥४४॥
छायादेवी छिद्रनखा छन्नेन्द्रिय विसर्पिणी। छन्दोऽनुष्टुप् प्रतिष्ठान्ता छिद्रोपद्रवभेदिनी ॥४५॥
छेदा छत्रेश्वरी छिन्ना छुरिका छेदनप्रिया। जननी जन्मरहिता जातवेदा जगन्मयी ॥४६॥
जाह्नवी जटिला जेत्री जरामरणवर्जिता। जम्बूद्वीपवती ज्वाला जयन्ती जलशालिनी ॥४७॥
जितेन्द्रिया जितक्रोधा जितामृता जगत्प्रिया। जातरूपामयी जिह्वा जानकी जगती जरा ॥४८॥
जनित्री जह्नुतनया जगत्त्रयहितैषिणी। ज्वालामुखी जपवती ज्वरघ्नी जितविष्टया ॥४९॥
जिताक्रान्तमयी ज्वाला जाग्रती ज्वरदेवता। ज्वलन्ती जलदा ज्येष्ठा ज्याघोषास्फोट-दिङ्मुखी ॥५०॥
जम्भिनी जृम्भणा जृम्भा ज्वलन्माणिक्य कुण्डला। झिंझिका झणनिर्घोषा झंझा मारुत योगिनी ॥५१॥
झल्लरी वाद्यकुशला अरूपा अभुजा स्मृता। टङ्कबाणसमायुक्ता टङ्किनी टङ्कभेदिनी ॥५२॥
टङ्कोगण कृताघोषा टङ्कनीय महोरसा। टङ्कारकारिणी देवी ठठशब्दनिनादिनी ॥५३॥
डामरी डाकिनी डिम्भा डुण्डुमारैक निर्जिता। डामरीतन्त्र मार्गस्था डमड्डमरुनादिनी ॥५४॥
डिण्डीरवसहा डिम्भल सत्क्रीडा परायणा। ढुण्ढिविघ्नेश जननी ढक्काहस्ता ढिलिव्रजा ॥५५॥
नित्यज्ञाना निरुपमा निर्गुणा नर्मदानदी। त्रिगुणा त्रिपदा तन्त्री तुलसी तरुणातरुः ॥५६॥
त्रिविक्रम पदाक्रान्ता तुरीयपदगामिनी। तरुणादित्य सङ्काशा तामसी तुहिना तुरा ॥५७॥
त्रिकालज्ञान सम्पन्ना त्रिवेणी च त्रिलोचना। त्रिशक्तिस्त्रिपुरा तुङ्गा तुरङ्गवदना तथा ॥५८॥
तिमिङ्गिलगिला तीव्रा त्रिस्त्रोता तामसादिनी। तन्त्रमन्त्रविशेषज्ञा तनुमध्या त्रिविष्टपा ॥५९॥
त्रिसन्ध्या त्रिस्तनी तोषासंस्था तालप्रतापिनी। ताटङ्किनी तुषाराभा तुहिनाचल वासिनी ॥६०॥

तन्तुजालसमायुक्ता तारहारावलिप्रिया । तिलहोमप्रिया तीर्था तमालकुसुमाकृतिः ॥६१॥
तारका त्रियुता तन्वी त्रिशंकुपरिवारिता । तलोदरी तिलाभूषा ताटङ्कप्रिय वाहिनी ॥६२॥
त्रिजटा तित्तिरी तृष्णा त्रिविधा तरुणाकृतिः । तप्तकांचनसङ्काशा तप्तकांचनभूषणा ॥६३॥
त्रैयम्बका त्रिवर्गा च त्रिकालज्ञानदायिनी । तर्पणा तृप्तिदा तृप्ता तामसी तुम्बुरु स्तुता ॥६४॥
ताक्ष्र्यस्था त्रिगुणाकारा त्रिभङ्गी तनुवल्लरिः । थात्कारी थारवा थान्ता दोहिनी दीनवत्सला ॥६५॥
दानवान्तकरी दुर्गा दुर्गासुर - निबर्हिणी । देवरीतिर्दिवा रात्रिर्द्रौपदी दुन्दुभिस्वना ॥६६॥
देवयानी दुरावासा दारिद्र्योद्भेदिनी दिवा । दामोदरप्रिया दीप्ता दिग्वासा दिगविमोहिनी ॥६७॥
दण्डकारण्य निलया दण्डिनी देवपूजिता । देववन्द्या दिविषदा द्वेषिणी दानवाकृतिः ॥६८॥
दीनानाथस्तुता दीक्षा दैवतादिस्वरूपिणी । धात्री धनुर्धरा धेनुर्धारिणी धर्मचारिणी ॥६९॥
धुरन्धरा धराधारा धनदा धान्यदोहिनी । धर्मशीला धनाध्यक्षा धनुर्वेद विशारदा ॥७०॥
धृतिर्धन्या धृतपदा धर्मराजप्रिया ध्रुवा । धूमावती धूमकेशी धर्मशास्त्रप्रकाशिनी ॥७१॥
नन्दा नन्दप्रिया निद्रा नृनुता नन्दनात्मिका । नर्मदा नलिनी नीला नीलकण्ठसमाश्रया ॥७२॥
नारायणप्रिया नित्या निर्मला निर्गुणा निधिः । निराधारा निरुपमा नित्यशुद्धा निरञ्जना ॥७३॥
नादविन्दु कलातीता नादविन्दुकलात्मिका । नृसिंहिनी नगधरा नृपनागविभूषिता ॥७४॥
नरकक्लेश शमिनी नारायणपदोद्भवा । निरवद्या निराकारा नारदप्रियकारिणी ॥७५॥
नानाज्योतिः समाख्याता निधिदा निर्मलात्मिका । नवसूत्रधरा नीतिर्निरुपद्रव कारिणी ॥७६॥
नन्दजा नवरत्नाढ्या नैमिषारण्यवासिनी । नवनीतप्रिया नारी नीलजीमूतनिःस्वना ॥७७॥
निमेषिणी नदीरूपा नीलग्रीवा निशीश्वरी । नामावलिर्निशुम्भघ्नी नागलोकनिवासिनी ॥७८॥
नवजाम्बूनदप्रख्या नागलोकाधिदेवता । नूपुराक्रान्त - चरणा नरचित्त प्रमोदिनी ॥७९॥
निमग्नारक्तनयना निर्घातसम-निस्वना । नन्दनोद्यान निलया निर्व्यूहोपरिचारिणी ॥८०॥
पार्वती परमोदारा परब्रह्मात्मिका परा । पञ्चकोश विनिर्मुक्ता पञ्चपातक नाशिनी ॥८१॥
परचित्तविधानज्ञा पञ्चिका पञ्चरूपिणी । पूर्णिमा परमा प्रीतिः परतेजः - प्रकाशिनी ॥८२॥
पुराणी पौरुषी पुण्या पुण्डरीक - निभेक्षणा । पातालतल - निर्मग्ना प्रीता प्रीतिविवर्धिनी ॥८३॥
पावनी पादसहिता पेशला पवनाशिनी । प्रज्ञापतिः परिश्रान्ता पर्वतस्तनमण्डला ॥८४॥
पद्मप्रिया पद्मसंस्था पद्माक्षी पद्मसम्भवा । पद्मपत्रा पद्मपदा पद्मिनी प्रियभाषिणी ॥८५॥
पशुपाश - विनिर्मुक्ता पुरन्ध्री पुरवासिनी । पुष्कला पुरुषा पर्वा पारिजातसुमप्रिया ॥८६॥
पवित्रा पवित्राङ्गी पुष्पहास - परायणा । प्रज्ञावतीसुता पौत्री पुत्रपूज्या पयस्विनी ॥८७॥
पट्टिपाशधरा पंक्तिः पितृलोक - प्रदायिनी । पुराणी पुण्यशीला च प्रणतार्ति विनाशिनी ॥८८॥
प्रद्युम्न जननी पुष्टा पितामह परिग्रहा । पुण्डरीक - पुरावासा पुण्डरीक - समानना ॥८९॥
पृथुजङ्घा पृथुभुजा पृथुपादा पृथूदरी । प्रवालशोभा पिङ्गाक्षी पीतवासाः प्रचापला ॥९०॥

प्रसवा पुष्टिदा पुण्या प्रतिष्ठा प्रणवागतिः। पञ्चवर्णा पञ्चवाणी पञ्चिका पञ्जरस्थिता ॥९१॥
परमाया परज्योतिः परप्रीतिः परागतिः। पराकाष्ठा परेशानी पाविनी पावकद्युतिः ॥९२॥
पुण्यभद्रा परिच्छेद्या पुष्पहासा पृथूदरी। पीताङ्गी पीतवसना पीतशय्या पिशाचिनी ॥९३॥
प्रीतक्रिया पिशाचघ्नी पाटलाक्षी पटुक्रिया। पञ्चभक्ष - प्रियाचारा पूतना - प्राणघातिनी ॥९४॥
पुन्नागवन - मध्यस्था पुण्यतीर्थनिषेविता। पञ्चाङ्गी च पराशक्तिः परमाह्लादकारिणी ॥९५॥
पुष्पकाण्डस्थिता पूषा पोषिताखिल विष्टपा। पानप्रिया पञ्चशिखा पन्नगोपरि शायिनी ॥९६॥
पञ्चमात्रात्मिका पृथ्वी पथिका पृथुदोहिनी। पुराणन्यायमीमांसा पाटली पुष्पगंधिनी ॥९७॥
पुण्यप्रजा पारदात्री परमार्गैक गोचरा। प्रवालशोभा पूर्णाशा प्रणवा पल्लवोदरी ॥९८॥
फलिनी फलदा फल्गुः फूत्कारी फलकाकृतिः। फणीन्द्रभोगशयना फणिमण्डलमण्डिता ॥९९॥
बालबाला बहुमता बालातप निभांशुका। बलभद्रप्रिया वन्द्या वडवा बुद्धिसंस्तुता ॥१००॥
बन्दीदेवी बिलवती बडिशघ्नी बलिप्रिया। बान्धवी बोधिता बुद्धिर्बन्धूक कुसुमप्रिया ॥१०१॥
बालभानु प्रभाकारा ब्राह्मी ब्राह्मण देवता। बृहस्पतिस्तुता वृन्दा वृन्दावन विहारिणी ॥१०२॥
बालाकिनी बिलाहारा बिलवासा बहूदका। बहुनेत्रा बहुपदा बहुकर्णावतंसिका ॥१०३॥
बहुबाहुयुता बीजरूपिणी बहुरूपिणी। बिन्दुनाद कलातीता बिन्दुनादस्वरूपिणी ॥१०४॥
बद्धगोधांगुलि त्राणा बदर्याश्रमवासिनी। बृन्दारका बृहत्स्कंधा बृहती बाणपातिनी ॥१०५॥
बृन्दाध्यक्षा बहुनुता बनिता बहुविक्रमा। बद्धपद्मासनासीना बिल्वपत्र तलस्थिता ॥१०६॥
बोधिद्रुम निजावासा बडिस्था बिन्दुदर्पणा। बाला बाणासनवती बडवानल वेगिनी ॥१०७॥
ब्रह्माण्ड बहिरन्तःस्था ब्रह्मकङ्कणसूत्रिणी। भवानी भीषणवती भाविनी भयहारिणी ॥१०८॥
भद्रकाली भुजङ्गाक्षी भारती भारताशया। भैरवी भीषणाकारा भूतिदा भूतिमालिनी ॥१०९॥
भामिनी भोगनिरता भद्रदा भूरिविक्रमा। भूतवासा भृगुलता भार्गवी भूसुरार्चिता ॥११०॥
भागीरथी भोगवती भवनस्था भिषग्वरा। भाविनी भोगिनी भाषा भवानी भूरिदक्षिणा ॥१११॥
भर्गात्मिका भीमवती - भवबन्ध विमोचिनी। भजनीया भूतधात्री रञ्जिता भुवनेश्वरी ॥११२॥
भुजङ्गवलया भीमा भेरुण्डा भागधेयिनी। माता माया मधुमती मधुजिह्वा मधुप्रिया ॥११३॥
महादेवी महाभागा मालिनी मीनलोचना। मायातीता मधुमती मधुमांसा मधुद्रवा ॥११४॥
मानवी मधुसम्भूता मिथिलापुर - वासिनी। मधुकैटभसंहर्त्री मेदिनी मेघमालिनी ॥११५॥
मन्दोदरी महामाया मैथिली मसृणप्रिया। महालक्ष्मीर्महाकाली महाकन्या महेश्वरी ॥११६॥
माहेन्द्री मेरुतनया मन्दारकुसुमार्चिता। मञ्जु-मञ्जीर-चरणा मोक्षदा मञ्जुभाषिणी ॥११७॥
मधुरद्राविणी मुद्रा मलया मलयान्विता। मेधा मरकतश्यामा मागधी मेनकात्मजा ॥११८॥
महामारी महावीरा महाश्यामा मनुस्तुता। मातृका मिहिराभासा मुकुन्दपदविक्रमा ॥११९॥

मूलाधार स्थिता मुग्धा मणिपूरकवासिनी । मृगाक्षी महिषारूढ़ा महिषासुरमर्दिनी ॥१२०॥
योगासना योगगम्या योगा यौवनकाश्रया । यौवनी युद्धमध्यस्था यमुना युगधारिणी ॥१२१॥
यक्षिणी योगयुक्ता च यक्षराजप्रसूतिनी । यात्रा यानविधानज्ञा यदुवंशसमुद्भवा ॥१२२॥
यकारादि हकारान्ता याजुषी यज्ञरूपिणी । यामिनी योगनिरता यातुधान भयङ्करी ॥१२३॥
रुक्मिणी रमणी रामा रेवती रेणुका रतिः । रौद्री रौद्रप्रियाकारा राममाता रतिप्रिया ॥१२४॥
रोहिणी राज्यदा रेवा रमा राजीवलोचना । राकेशी रूपसम्पन्ना रत्नसिंहासनस्थिता ॥१२५॥
रक्तमाल्याम्बरधरा रक्तगन्धानुलेपना । राजहंस समारूढ़ा रम्भा रक्तबलिप्रिया ॥१२६॥
रमणीय युगाधारा राजिताखिल भूतला । रुरुचर्म परीधाना रथिनी रत्नमालिका ॥१२७॥
रोगेशी रोगशमनी राविणी रोमहर्षिणी । रामचन्द्र पदाक्रान्ता रावणच्छेदकारिणी ॥१२८॥
रत्नवस्त्रपरिच्छन्ना रथस्था रुक्मभूषणा । लज्जाधिदेवता लोला ललिता लिङ्गधारिणी ॥१२९॥
लक्ष्मीर्लोला लुप्तविषा लोकिनी लोकविश्रुता । लज्जालम्बोदरी देवी ललना लोकधारिणी ॥१३०॥
वरदा वन्दिता विद्या वैष्णवी विमलाकृतिः । वाराही विरजा वर्षा वरलक्ष्मीविलासिनी ॥१३१॥
विनता व्योममध्यस्था वारिजासन-संस्थिता । वारुणी वेणु सम्भूता वीतिहोत्रा विरूपिणी ॥१३२॥
वायुमण्डल मध्यस्था विष्णुरूपा विधिप्रिया । विष्णुपत्नी विष्णुमती विशालाक्षी वसुन्धरा ॥१३३॥
वामदेवप्रिया वेला वज्रिणी वसुदोहिनी । वेदाक्षर - परीताङ्गी वाजपेयफलप्रदा ॥१३४॥
वासवी वामजननी वैकुण्ठ - निलया वरा । व्यासप्रिया वर्मधरा वाल्मीकि परिसेविता ॥१३५॥
शाकम्भरी शिवा शान्ता शारदा शरणागतिः । शातोदरी शुभाचारा शुम्भासुर - विमर्दिनी ॥१३६॥
शोभावती शिवाकारा शङ्करार्द्धशरीरिणी । शोणा शुभाशया शुभ्रा शिरःसंधान कारिणी ॥१३७॥
शरावती शरानन्दा शरज्ज्योत्स्ना शुभानना । शरभा शूलिनी शुद्धा शबरी शुक्रवाहना ॥१३८॥
श्रीमती श्रीधरानन्दा श्रवणानन्ददायिनी । शर्वाणी शर्वरीवन्द्या षड्भाषा षड्ऋतुप्रिया ॥१३९॥
षडाधारस्थिता देवी षण्मुखप्रियकारिणी । षडङ्गरूप सुमति सुरासुर नमस्कृता ॥१४०॥
सरस्वती सदाधारा सर्वमङ्गलकारिणी । समागानप्रिया सूक्ष्मा सावित्री सामसम्भवा ॥१४१॥
सर्वावासा सदानन्दा सुस्तनी सागराम्बरा । सर्वैश्वर्यप्रिया सिद्धिः साधुबन्धु - पराक्रमा ॥१४२॥
सप्तर्षि मण्डलगता सोममण्डलवासिनी । सर्वज्ञा सान्द्रकरुणा समानाधिक वर्जिता ॥१४३॥
सर्वोत्तुङ्गा सङ्गहीना सद्गुणा सकलेष्टदा । सरघा सूर्यतनया सुकेशी सोमसंहतिः ॥१४४॥
हिरण्यवर्णा हरिणी ह्रींकारी हंसवाहिनी । क्षौमवस्त्रपरीताङ्गी क्षीराब्धितनया क्षमा ॥१४५॥
गायत्री चैव सावित्री पार्वती च सरस्वती । वेदगर्भा वरारोहा श्रीगायत्री पराऽम्बिका ॥१४६॥

॥ फलश्रुति ॥

इति साहस्त्रकम् नाम्ना गायत्र्याश्चैव नारद! पुण्यदं सर्वपापघ्नं महासम्पत्तिदायकम् ॥१॥
एवं नामानि गायत्र्यास्तोषोत्पत्ति कराणि हि। अष्टम्यां च विशेषेण पठितव्यं द्विजैः सह ॥२॥
जपं कृत्वा होमपूजा ध्यानं कृत्वा विशेषतः। यस्मै कस्मै न दातव्यं गायत्र्यास्तु विशेषतः ॥३॥
सुभक्ताय सुशिष्याय वक्तव्यं भूसुराय वै। भ्रष्टेभ्यः साधकेभ्यश्च बान्धवेभ्यो न दर्शयेत् ॥४॥
यद्गृहे लिखितं शास्त्रं भयं तस्य न कस्यचित्। चञ्चलाऽपि स्थिरा भूत्वा कमला तत्र तिष्ठति ॥५॥
इदं रहस्यं परम गुह्याद् गुह्यतरं महत्। पुण्यप्रदं मनुष्याणां दरिद्राणां निधिप्रदम् ॥६॥
मोक्षप्रदं मुमुक्षूणां कामिनां सर्वकामदम्। रोगाद् वै मुच्यते रोगी बद्धो मुच्येत् बन्धनात् ॥७॥
ब्रह्महत्या सुरापानं सुवर्णस्तेयिनो नराः। गुरुतल्पगतो वापि पातकान्मुच्यते सकृत् ॥८॥
असत्प्रतिग्रहाच्चैवाभक्ष्यभक्षाद् विशेषतः। पाखण्डानृत मुख्येभ्यः पठनादेव मुच्यते ॥९॥
इदं रहस्यममलं मयोक्तं पद्मजोद्भव! ब्रह्मसायुज्यदं नृणां सत्यं सत्यं न संशयः ॥१०॥

॥ इति श्रीगायत्री अष्टोत्तरसहस्रनाम स्तोत्रम् सम्पूर्णम् ॥

॥ इति गायत्री तंत्रम् ॥

॥ श्री चक्रपूजार्चने पात्रा-सादनादि प्रयोग:॥

॥ सुधाकुम्भ स्थापनम् ॥

तान्त्रिक यन्त्रार्चन आवरण पूजा से पहले सुधा मांसादि द्रव्यों का शोधन करना जरुरी है। अत: प्रथम सुधा कुंभ का पूजन स्थापन कर सुधा (प्रथम तत्व) का शोधन करें।

अपने वामभाग में त्रिकोण, षट्कोण, वृत्त, चतुरस्र मण्डल बनाकर शङ्खमुद्रा दिखायें। इष्ट मन्त्र के तीन विभाग करें उनको कूट कहते हैं।

जैसे बटुक मंत्र में- **१. ह्रीं बटुकाय २. आपदुद्धारणाय ३. कुरु कुरु बटुकाय ह्रीं।**

त्रिकोण के तीनों कोणों में त्रिपुर सुन्दरी के तीनों कूटों से पूजन करें। त्रिकोण में माया बीज '**ह्रीं**' से पूजन करें।

षट्कोण में अधोमुख एवं उर्ध्वमुख दो त्रिकोण बनते हैं। इनमें मन्त्र के त्रिकूटों से प्रथम बार दक्षिणावर्त से एवं द्वितीय आवृत्ति वामावर्त से करने पर षट्कोणों का पूजन होता है। **पुनः अग्निकोणे हृदयशक्तिं पूजयामि। ईशान्ये शिरः शक्तिं पूजयामि। वायव्ये शिखाशक्तिं पूजयामि। नैर्ऋत्ये कवचशक्तिं पूजयामि। त्रिकोणमध्ये नेत्रशक्तिं पूजयामि। द्वारे अस्त्रशक्तिं पूजयामि।** इस प्रकार षट्कोण का पूजन कर वृत्त की '**अं आं इं ईं.........हं लं क्षं**' इत्यादि मातृकावर्णों से पूजन करें।

चतुरस्र के चारों द्वारों में पूजन करें - पूर्वे - **ओड्यान पीठाय नमः**। दक्षिणे -**जालंधर पीठाय नमः**। पश्चिमे - **पूर्णगिरि पीठाय नमः**। उत्तरे - **कामरूप पीठाय नमः**।

इस प्रकार मण्डल की पूजा करें। '**ॐ ह्रीं आधारशक्त्यै नमः**' से आधार पात्र का प्रक्षालन कर मण्डल पर रख कर पूजन करें। एवं अग्नि की दश कलाओं का पूजन उस पर करें।

ॐ अर्थप्रद दशकलात्मने वह्निमण्डलाय नमः। वह्निकलां पूजयेत् - **यं धूम्रार्चिषे नमः, रं उष्मायै नमः, लं ज्वलिन्यै नमः, वं ज्वालिन्यै नमः, शं विस्फुलिंगिन्यै नमः, षं सुश्रियै नमः, सं सुरूपायै नमः, हं कपिलायै नमः, लं हव्यवाहायै नमः, क्षं कव्यवाहायै नमः।**

तदनन्तर कलश को '**फट्**' मंत्र से धोकर, '**नमः**' से आधार पर स्थापित करें। कलश पात्र में सूर्य की कलाओं का पूजन करें।

ॐ धर्मप्रद द्वादशकलाय अर्कमण्डलकलात्मने नमः, ॐ कं भं तपिन्यै नमः, ॐ खं बं तापिन्यै नमः, गं फं धूम्रायै नमः, घं पं मरीच्यै नमः, ङं नं ज्वालिन्यै नमः, चं धं रुच्यै नमः, छं दं सुषुम्नायै नमः, जं थं भोगदायै नमः, झं तं विश्वायै नमः, ञं णं बोधिन्यै नमः, टं ढं धारिण्यै नमः, ठं डं क्षमायै नमः।

कारण अर्थात् सुधा पात्र अलग हो तो उसका भी उपरोक्त विधि से मण्डल बनायें, आधारपात्र स्थापन करें, कलश पूजन करें, उसके बाद सुधा के संस्कार कर फिर '**अं आं.........लं क्षं**' मातृका वर्ण बोलते हुये पात्र में सुधा ड़ालें। अथवा इसी पात्र में सुधा के संस्कार करें।

यथा - **ॐ कामप्रद षोडशकलात्मने सोममण्डलाय नमः। चन्द्रमा की कलाओं का पूजन करें-**

ॐ अं अमृतायै नमः। आं मानदायै नमः। इं पूषायै नमः। ईं तुष्ट्यै नमः। उं पुष्ट्यै नमः। ऊं रत्यै नमः। ऋं धृत्यै नमः। ॠं शशिन्यै नमः। लृं चन्द्रिकायै नमः। लॄं कान्त्यै नमः। एं ज्योत्स्नायै नमः। ऐं श्रियै नमः। ओं प्रीत्यै नमः, औं अङ्गदायै नमः। अं पूर्णायै नमः। अः पूर्णामृतायै नमः। इसके बाद सुधा के संस्कार करें।

(१) '**ॐ वौषट्**' मन्त्र पढकर देखें (२) ''**फट्**'' मन्त्र से रक्षा करें (३) '**हुँ**' से अवगुण करें(४)'**वषट्**' से शुद्ध करें (५) '**स्वाहा**' से पूजन करें।

सुधा गायत्री का दश बार जप करें।

ॐ सुधा देव्यै च विद्महे कामेश्वर्य्यै च धीमहि। तन्नो रक्ताक्षिः प्रचोदयात्॥

॥सुधायाः शापविमोचनम्॥

एवमेव परंब्रह्म स्थूल सूक्ष्ममयं ध्रुवम्। कवचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम्॥
सूर्यमण्डल संभूते वरुणालयसंभवे। आस्यबीजमये देवि शुक्रशापाद्विमुच्यताम्॥
वेदानां प्रणवोबीजं ब्रह्मानन्दमयं यदि। तेन सत्येन मे देवि ब्रह्महत्या व्यपोहतु॥

पात्र को आच्छादित करके उपरोक्त मन्त्रों को पढ़ें -

ॐ सां सीं सूं सैं सौं सः शुक्रशाप विमोचिकायै सुरादेव्यै नमः। इति द्वादशा जपेत्॥१॥ **ॐ व्रां व्रीं व्रूं व्रैं व्रौं व्रः ब्रह्मशाप विमोचिकायै सुरादेव्यै नमः।** इति दशधा जपेत्॥२॥ **ॐ ह्रीं श्रीं क्रां क्रीं क्रूं क्रैं क्रौं क्रः सुधाकृष्णशापं विमोचय विमोचय श्रावय श्रावय स्वाहा।** इति दशधा जपेत्॥३॥ **ॐ रां रीं रुं रैं रौं रः रुद्रशापविमोचिकायै सुरादैव्यै नमः।** इति दशधा जपेत्॥४॥ **ॐ ह्रीं क्रीं परमस्वामिनी परमाकाश शून्यवाहिनी चन्द्रसूर्याग्नि भक्षिणि त्वं पात्रं विश विश स्वाहा।** इति घटोपरि दशधा जपेत्॥५॥ **ॐ ऐं ह्रीं श्रीं महेश्वराय विद्महे सुधादेव्यै च धीमहि। तन्नोऽर्द्धनारीश्वरः प्रचोदयात्।** इति दशधा जपेत्॥६॥

इसके बाद पात्र पर दश दोष निवारण हेतु ''अक्षत्'' फेंके।

दोष निवारण हेतु चाण्डालिनियों के बीजाक्षरों में अलग-अलग तंत्रों में मतभेद है। कहीं ''**ॐ ह्रीं श्रीं हसखफ्रें**'' है तो कहीं ''**ॐ ऐं ह्रीं श्रीं ह त् क्ष् ल् व् फ्रें** '' इत्यादि बीज मन्त्र है। कहीं तपनीय वध चाण्डालिनी की जगह बुध चाण्डालिनी है, निर्दय चाण्डालिनी की जगह निर्दोष चाण्डालिनी का प्रयोग है तो सर्वजन दृष्टि दोष निवारण हेतु - **पशुपाश चाण्डालिनी** का उल्लेख है। (तन्त्रों में अज्ञानी व निंदक को पशु संज्ञा दी गई है)

ॐ ऐं ह्रीं श्रीं पथिक देवताभ्यो हुं फट् स्वाहा ॥१॥ ॐ ऐं ह्रीं श्रीं फ्रें यं रं लं आं आस्फालिनी ग्रामचाण्डालिनी हुं फट् स्वाहा॥२॥ ॐ ऐं ह्रीं श्रीं ह्रौं ह्रां संगम स्पर्श चाण्डालिनी हुं फट् स्वाहा ॥३॥ ॐ ऐं ह्रीं श्रीं फ्रें घं ङं लं क्षं दृष्टिचाण्डालिनी हुं फट् स्वाहा ॥४॥ ॐ ऐं ह्रीं श्रीं ग्लौं ग्लां क्रोधचाण्डालिनी हुं फट् स्वाहा ॥५॥ ॐ ऐं ह्रीं श्रीं अं सृष्टिचाण्डालिनी हुं फट् स्वाहा ॥६॥ ॐ ऐं ह्रीं श्रीं आं क्रों घटचाण्डालिनी हुं फट् स्वाहा ॥७॥ ॐ ऐं ह्रीं श्रीं चं छं तपनीयवधचाण्डालिनी हुं फट् स्वाहा ॥८॥ ॐ ऐं ह्रीं श्रीं क्षं आं क्रों क्लीं निर्दयचाण्डालिनी हुं फट् स्वाहा ॥९॥ ॐ ऐं ह्रीं श्रीं स्त्रूं छं स्त्रौं खेदय खेदय सर्वजन दृष्टिस्पर्श दोषाय हुँ फट् स्वाहा ॥१०॥ ॐ हंसः शुचिषद्व- सुरंतरिक्षसद्धौता वेदिपदतिथिर्दुरोणसत्। नृषद्वरसदृत-सद्व्योम सदब्जागोजा-ऋतजा अद्रिजा ऋतंबृहत् ॥११॥

इस मन्त्र को ३ बार द्रव्य पर पढ़ें। गंध पुष्पाक्षत छोड़ें तथा दोष रहित इस सुधाद्रव्य के मध्य में **आनन्दभैरव व आनन्दभैरवी** का ध्यान करें।

ॐ सूर्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलम् । अष्टादशभुजं देवं पञ्चवक्त्रं त्रिलोचनम् ॥१॥
अमृतार्णवमध्यस्थं ब्रह्मपद्मोपरिस्थितम् । वृषारूढं नीलकण्ठं सर्वाभरणभूषितम् ॥२॥
कपालखट्वाङ्गधरं घण्टाडमरुवादिनम् । पाशाङ्कुशधरं देवं गदामुशलधारिणम् ॥३॥
खडगखेटक पट्टीशं मुद्गरं शूलदण्डधृक् । विचित्र खेटकं मुण्डं वरदाभयधारिणम् ॥४॥
लोहितं देवदेवेशं भावयेत् साधकोत्तमः ॥५॥

आनन्दभैरव का तीन बार पूजन करें – **ॐ ऐं ह्रीं श्रीं वं ह स क्ष म ल व र यूं आनन्दभैरवाय वौषट् । इति मन्त्रेण संपूज्य॥**

तदनन्तर आनन्दभैरवी का ध्यान करें। यथा –

भावयेच्च सुधां देवीं चन्द्रकोटियुतप्रभाम् । हेमकुंदेंदुधवलां पञ्चवक्त्रां त्रिलोचनाम् ॥१॥
अष्टदशभुजैर्युक्तां सर्वानन्दकरोद्यताम् । प्रहसंतीं विशालाक्षीं देवदेवस्य सम्मुखीम् ॥२॥

इतिध्यात्वा। **ॐ ऐं ह्रीं श्रीं हसक्षमलवरयीं आनन्दभैरवीं सुधादेव्यै वौषट् ।** इत्यानन्दभैरवीं संपूजयेत्॥

ततः स्थालीमध्ये किंचिद्द्रव्यंगृहीत्वाद्रव्य मध्ये शक्तिचक्रं विलिख्य तदभावे त्रिकोणदक्षावर्तेन विलिख्य। उर्ध्वरेखायाम् अं आं.......अं अः । दक्षिणरेखायाम् – **कं खं......णं तं।** उत्तररेखायाम् – **थं दं......सं हं।** दक्षिणपार्श्वे – **ॐ लं नमः।** वामपार्श्वे – **ॐ क्षं नमः।** त्रिकोणमध्ये – **ईं (कामकलां) विलिख्य।**

इसके बाद उन दोनों का संयोगीवस्था का ध्यान करें और यह समझें कि उनके दिव्य स्राव से यह द्रव्य अमृतमय हो गया है।

ॐ ऐं ह्रीं श्रीं प्लूं स्त्रौं जूं सः अमृते अमृतोद्भव अमृतवर्षिणि अमृतं स्त्रावय स्त्रावय स्वाहा शुक्रादिशापात् सुरां मोचय मोचय मोचिकायै नमः।

ॐ मधुवाता ऋतायते मधुक्षरिन्ति सिन्धवः। इत्यादि तीन ऋचाओं से पूजन करें। गङ्गादि तीर्थों का आवाहन करें।

ॐ ह्रीं ॐ जूं सः का २२ बार जप करें। ८ बार मूल मन्त्र का जप करें। सुधामन्त्र से अभिमन्त्रित करें यथा –

पावमानः परानन्द पावमानः परो रसः । पावमानं परं ज्ञानं तेन ते पावयाम्यहम् ॥

पश्चात् धेनुमुद्रा से अमृतीकरण करें, मत्स्यमुद्रा से आच्छादन करें। कवच मन्त्र **'हुँ'** से अवगुंठन, अस्त्र से रक्षा, च्छटिका मुद्राभिदर्श, दिग्बंधनं कृत्वा।

कलश का ध्यान करें –

देवदानव संवादे मथ्यमाने महोदधौ। उत्पन्नोऽसि महाकुंभ विष्णुनाविधृतः करे॥१॥ त्वत्तोये सर्वदेवाः स्युः सर्ववेदाः समाश्रिताः। त्वयि तिष्ठन्ति भूतानि त्वयिप्राणाः प्रतिष्ठिताः॥२॥ शिवस्त्वं च घटोऽसि त्वं विष्णुस्त्वं च प्रजापतिः। आदित्याद्या ग्रहाःसर्वे विश्वेदवाः सपैतृकाः॥३॥ त्वयि तिष्ठंति कलशे यतः कामफलप्रदाः। त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भवे॥४॥ त्वदावलोकनमात्रेण भुक्तिमुक्तिफलं महत्। सान्निध्यं कुरु भो कुंभ प्रसन्नो भव सर्वदा॥५॥

इसके बाद "**घटसूक्त**" का पाठ कर प्रार्थना करें –

समुद्रे मथ्यमाने तु क्षीरोदे सागरोत्तमे । तत्रोत्पन्नां सुरां ध्यायेत् कन्यकारूपधारिणीम् ॥१॥

अष्टादशभुजां देवीं रक्तान्तायत-लोचनाम् । आपीनवर्णां स्वर्गाभां बहुरूपां परां सुराम् ॥२॥
सा सर्वे संस्तुताः सर्व देवानामभयंकरि । या सुरा सा रमादेवी यो गंधः स जर्नादनः ॥३॥
यो वर्णः स भवेद् ब्रह्मा यो मदः स महेश्वरः । स्वादे तु संस्थितः सोमः शब्दसंस्थो हुतासनः ॥४॥
इच्छायां मन्मथो देवः पाताले तु च भैरवः । घटो ब्रह्माः रसोविष्णुर्विद्रवो रुद्र एव च ॥५॥
हुंकारः ईश्वरो प्रोक्तो व्योमादेस्तु सदाशिवः । घटमूले स्थितो ब्रह्मा घटमध्ये तु माधवः ॥६॥
घटकण्ठे नीलकण्ठो घटाग्रे सर्वदेवताः । लध्वी हि वारुणी देवी महामांसचरुप्रिया ॥७॥
सर्वविद्या तु या देवी सुरो देवि नमोऽस्तुते । अनेन घट सूक्तेन द्रव्यशुद्धि प्रजायतेः ॥८॥

इसके बाद कलश की प्राणप्रतिष्ठा करें। हाथ से कलश को आच्छादित करें। **ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः सोहं श्रीमद्त्रिपुरसुन्दर्यास्याधार सहितस्य कलशेऽस्मिन् अग्निसूर्यसोमकलानां प्राणा इह प्राणाः।**

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः सोहं श्री बटुकभैरव कलशेऽस्मिन् जीव इह स्थितः।

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः सोहं श्री बटुकभैरव कलशेऽस्मिन् सर्वेन्द्रियाणिवाङ्मनस्त्वक्-चक्षुर्जिह्वा- श्रोत्र- घ्राण - प्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा॥ इति प्राण प्रतिष्ठा॥ गंधादिभिः कलशं संपूजयेत्।

कलश में पाँच रत्नों की पूजा करें - (पूर्वे) **ग्लूं गगन रत्नाय नमः।** (दक्षिणे) **स्लूं स्वर्ग रत्नाय नमः** (पश्चिमे) **प्लूं पाताल रत्नाय नमः।** (उत्तरे) **म्लूं मर्त्यरत्नाय नमः।** (मध्ये) **न्लूं नागरत्नाय नमः।**

कलश बलिः- रक्तचन्दन सिन्दूर कुंकुम से कलश के पास त्रिकोण वृत्त चतुरस्र मंडल बनाये। '' **सर्वपथिक देवेभ्यो नमः** '' से गंधार्चन करे। मत्स्य मुद्रा से बलि रखें। बांये हाथ से ३ बार कलश पर घुमावे एवं बलि को बाहर विर्सजित करे।

॥ शुद्धि स्थापन विधिः (द्वितीय तत्त्वं मासं)॥

कुम्भस्य वामतः शुद्धिं संस्थाप्य। अग्नि मण्डलाय नमः। ॐ धर्मप्रद द्वादश कलात्मने शुद्धिपात्राय नमः। कामप्रद षोडश सोमकलात्मने नमः। धेनुमुद्रा दिखावें।

ॐ उद्बुध्यस्व पशो त्वं हि न पशुस्त्वं शिवोऽसि भोः। शिवोकृत्यमिदं पिण्डंयतस्त्वं शिवतां व्रज॥

ॐ पशु पाशाय विद्महे शिरश्छेदाय धीमहि। तन्नो छागः (मांस) प्रचोदयात्॥ यह पशु गायत्री मंत्र तीन बार कहें।

॥ अथ पात्रासादन प्रयोगः॥

शङ्खस्थापनम् :- कुंभ के समीप त्रिकोण वृत्त चतुरस्र मण्डल बनाकर **ॐ आधारशक्तये नमः** से पूजन करें। इस पर त्रिपदी स्थापन करें। **ॐ धर्मप्रद दशकलात्मने वह्निमण्ड़लाय नमः** से उसका पूजन करें। शङ्ख का प्रक्षालन करके उस पर रखें एवं **ॐ अर्थप्रद द्वादशकलात्मने सूर्यमण्ड़लाय नमः** से पूजन करें।

तीर्थमण्ड़लों का आवाहन कर शुद्धजल से पूरण कर जल में **ॐ कामप्रद षोड़शकलात्मने सोममण्डलाय नमः** से पूजन करें।

शङ्ख का पूजन करें -

शङ्खादौ चन्द्रदैवत्यं कुक्षौ वरुणदेवता। पृष्ठे प्रजापतिश्चैवमग्रे गङ्गा सरस्वती ॥
त्रैलोक्ये यानि तीर्थानि वासुदेवस्यचाज्ञया। शङ्खे तिष्ठति विप्रेन्द्र तस्माच्छंखं प्रपूजयेत् ॥

प्रार्थना करें–

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे। निर्मितः सर्वदेवैश्च पाञ्चजन्य नमोऽस्तु ते ॥

ॐ पाञ्चजन्याय विद्महे पावमानाय धीमहि। तन्न शङ्खः प्रचोदयात् ॥

घण्टास्थापनम् – देव दक्षिणतः घण्टां संस्थाप्यः, नादं कृत्वा, पूजयेत – ॐ भूर्भुवः स्वः गरुडाय नमः। ॐ जगद्ध्वने मन्त्रमातः स्वाहा। गरुड मुद्रा दिखावें।

दीपस्थापनम् – देवस्य दक्षिणभागे घृतदीपं वामे तैलदीपं स्थापयेत्। सुदर्शन मन्त्र से घृतदीप का पूजन करें। ॐ रां रीं रूं रैं रौं रः सुदर्शनायास्त्राय फट् स्वाहा। तेलदीप की "ॐ श्लीं पशु हुं फट् स्वाहा"। इस पाशुपत मन्त्र से पूजन करें।

दीपशिखा का स्पर्श करें – **ॐ अघोराय घोरतमाय महारौद्राय वीरभद्राय ज्वालामालिने सर्वदुष्टप्राणोपसंहर्त्रे हुं फट स्वाहा।**

"**ॐ मार्तण्ड भैरवाय नमः**" से नमस्कार करें तेज को अपनी आत्मा से समीभूत कर चित्त का शोधन करें।

"**हुं फट् स्वाहा**" से मुख एवं **ॐ रक्ष रक्ष हुं फट् स्वाहा हृदये** से हृदय पर हाथ रख कर रक्षा करें।

हाथ में अक्षत पुष्प लेवें उन्हें सूंघकर मर्दन करके ईशान दिशा में दूर फेंके –

-ॐ ते सर्वे विलयं यांतु ये मां हिंसन्ति हिंसकाः। मृत्युरोगभयक्लेशाः पतन्तु रिपुमस्तके ॥

हस्त प्रक्षालन करें।

विशेषार्घ्यस्थापनम् – अपने एवं श्रीचक्र (देवयन्त्र) के बीच में सुधाकुंभ कलश की पूर्व विधि के समान विशेषार्घ का स्थापन करें।

वामे शङ्ख प्रतिष्ठाय मध्ये चार्घ्यं प्रकल्पयेत्। दक्षिणे प्रोक्षणीपात्र मर्घ्यत्रय विकल्पने। दृष्ट्वार्घ्यपात्रं देवेशि ब्रह्माद्या देवताः सदाः। नृत्यंति सर्वयोगिन्यः प्रीताः सिद्धि ददत्यपि॥

विशेषार्घ में सुधाकुंभ से सुधा का पूरण कर निम्न मन्त्रों से अभिमन्त्रित करें –

ऐं क्लीं सौः ब्रह्माण्डखण्डसम्भूतमशेषरस संभवम्। आपूरितं महापात्रं पीयूष रसमावह ॥१॥
ऐं अखण्डैक रसानन्द कलेवर सुधात्मनि। स्वच्छंदस्फुरणा मन्त्रा निधेहिकुलरूपिणि ॥२॥
क्लीं अकुलस्थामृताकारे शुद्धज्ञान करे परे। अमृत्वं निधेह्यस्मिन् वस्तूनि क्लिन्नरूपिणी ॥३॥
सौः तद्रूपिण्यैकरस्यत्वं कृत्वाह्येतद स्वरूपिणी। भूत्वा परामृताकारं मयि विस्फुरणं कुरु ॥४॥

देवता के दक्षिण में प्रोक्षणीपात्र रखें। विशेषार्घ के वाम भाग में –

श्रीपात्र ॥१॥ गुरुपात्र ॥२॥ भैरवपात्र ॥३॥ शक्तिपात्र ॥४॥ योगिनीपात्र ॥५॥ भोगपात्र ॥६॥ वीरपात्र ॥७॥ आत्मपात्र ॥८॥ बलिपात्र ॥९॥ की स्थापना करें।

दक्षिण में पाद्य, अर्घ्य, आचमन एवं मधुपर्कादि चार पात्रों की स्थापना करें। अशक्ति में गुरु पात्र, वीरपात्र, आत्मपात्र,

बलिपात्र एवं भोगपात्र की स्थापना करें। तथा पाद्यादि अन्य उपचार हेतु एक पात्र की स्थापना करें।

पात्रों का उपयोग यन्त्रार्चन में अलग-अलग देवों के अर्चन हेतु होता है। श्रीपात्र से प्रधान देवों का, गुरुपात्र से गुरुमण्डल का एवं गुरु के हेतु, भैरवपात्र में अष्टभैरवों का, शक्तिपात्र से प्रधानदेव की शक्तियों का तथा पूजन समय में आपके सहभाग में मैथुन शोधन हेतु अपनी संगिनी शक्ति हेतु, योगिनीपात्र से योगनियों का, भोगपात्र एवं वीरपात्र से यन्त्र के परिधि देवता व इन्द्रादि लोकपालों का तथा आत्मपात्र से स्वयं का तथा बलिपात्र से बलिदेवताओं का तर्पण एवं प्रसाद ग्रहण होता है।

माँसशोधनम् - **ॐ पशुपाशाय विद्महे शिरश्छेदाय धीमहि। तन्नो माँस प्रचोदयात् ॥** इसका १० बार जप करें।

मीनशोधनम् - **ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनम् । उर्वारुकमिवबंधनान्मृत्योर्मुक्षीय मामृतात् ॥**

मुद्राशोधनम् - (मुद्रा अर्थात् चर्वण वस्तु नमकीन इत्यादि) **ॐ गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति । गर्भं ते अश्विनौ धत्तां वर्धेतां पुष्करस्त्रजौ ॥**

ॐ प्लूं ज्लूं ग्लूं स्वाहा। इति मन्त्रेण मांसमीनमुद्राः शोधयेत्।

पुनः घटस्थापन कर देवि का आवाहन कर पाद्यादि अर्घ्य मधुपर्क प्रदान करे। जयन्ति मंगला काली इत्यादि शक्तियों का आवाहन करें। अष्टदल के अग्रभाग में रोचन आभावाली रुद्रचण्डा, अरुणप्रभा प्रचण्डा, कृष्णवर्णा चण्डोग्रा, श्यामवर्णा चण्डनायिका, शुक्लाभा चण्डरूपा, धूम्रवर्णा चण्डवती, पाण्डुवर्णा अतिचण्डा, पीतवर्णा चण्डिका का आवाहन कर मध्य में अग्निवर्णा उग्र चण्डा का पूजन करे। यंत्र वा भद्रपीठ के पूर्वादि अष्टदिशाओं ६४ योगनियों का पूजन करे। ब्राह्मी माहेश्वरी कौमारी इत्यादि अष्टशक्तियों का अर्चन पूर्वादि दिशाओं में करे। जयन्त्यादि शक्तियों का पूजन करे। देवी के दक्षिणप्रांत व पश्चिम प्रांत में देवियों का इस प्रकार पूजन करे।

दक्षिणप्रांतेषु देव्याः स्वाहां चैव स्वधां ततः। अम्बिकां चर्चिकां चैव तथा कात्यायनीमपि। रक्तदन्तिकां च सर्वादिमङ्गलां च ततः परं। शाकम्भरीं भ्रामरीं च शिवदूतीं ततः परं। महाकालीं च गौरीं च तर्जनीं भाविनीं तथा! महामोहां च प्रयजेत् तथा चैव भयङ्करीं। ततः पश्चिमप्रान्तेषु भीमां पद्मां शचीं तथा। मेधां चैव महामायां सावित्रीं विजयां जयां। देवसेनां धृतिं चैव पुष्टिं धृतिं च भ्रामरीं। महामायां महादेवीं महामेधां तथैव च। कामेश्वरीमुत्तरस्यां

कामदामपि चार्चयेत्। भ्रामरीं कालरात्रिं च महारात्रिं तथैव च। चक्रेश्वरीं ततश्चैव पूजयेद् भगमालिनीं। धूम्रां भीमां च शान्तां च विदारीं च महाऽम्बिकां। लक्ष्मीं चव सुपर्णां च महोग्रोमां तथादरात्। कुलदेवीं त्र्यक्षरेण मन्त्रेण च समर्चयेत्।

पूर्वादि चार दिशाओं में २-२ वटुक व अष्टदिशाओं में अष्टभैरव, मन्दिर, नंदी, सिंह मणिभद्र पूर्णभद्र इत्यादि की पूजा करे।

वटुकान पूजयेद् द्वारे द्वौ द्वौ कृत्वा विभागतः। सिद्धाख्यं चैव सन्देहं कालपुत्राख्यमेव च। क्रियाकुलनिभं चैव मन्त्रांगं देवि! पुत्रकं। मन्देरेणैव बीजेन सतारेण प्रपूजयेत्। भैरवानसिताङ्गादीन् क्षेत्रेशांश्च यजेत् क्रमात्। हेतुकं त्रिपुराङ्गं च अग्निजिह्वं तथैव च। कालास्यं च करालास्यमेकपादं च भीमकं। अनुग्रहं चोर्ध्वभागे अधश्च नासिकेश्वरं। नारसिंहेन बीजेन सतारं हृदयान्तकं। बहिः पीठे चार्चयेद् वै तेन बीजेन साधकः। जम्भकं मणिभद्रं च पूर्णभद्रं तथैव च। विरूपं च विरूपाक्षं चित्रकुण्डलमित्यपि। चित्राक्षं चित्ररूपं च केलिमालिनमेव च। वरेन्द्रं नन्दिनं सिंहं ग्रहान् लोकपतीन् यजेत्। आदित्यादिग्रहा ये च ये ग्रहाः क्रूरकर्मणः। तिथयो वासराः सर्वे तेषां हि सन्निधौ स्थिताः। ते पूजार्थमिहायान्तु पूजयिष्यामि तानहं। क्रूरकर्मण इति छान्दसत्वात् ह्रस्वः।

अस्त्रपूजा - प्रत्येक अस्त्र का स्व स्व बीज से पूजन करे। यथा- **खं खड्गाय नमः चं चक्राय नमः**........इत्यादि।

पंचवाण - **पञ्चतत्व स्वरूपाय पंचवाणायवै नमः।**

धनुष - **धृतं कृष्णेन रक्षार्थं संहारार्थं हरेण च। त्रयीमूर्ति च सगरं धनुरस्त्रं नमाम्यहम्॥** मंत्र - **रामकृष्णाभ्यां धनुषे स्वाहा। जयादि शराय स्वाहा।**

घण्टा - **ॐ चं चन्द्रघण्टाय नमः।**

महापाश (नागराज)- **नागराज महापाश! अनन्त वरणाय च। निर्मितो विष्णुना यस्मादतः पाहि नमः स्वधा। चण्डिकायाः प्रदत्ताऽसि सर्वानुवाल वर्हिणी॥**

छुरिका - **ॐ छुरिके रक्ष मां नित्यं शांति कुरु नमोस्तुते। छुरिकायै स्वाहा॥** शिव विष्णु वनिताः (गरुड़) की पूजा करे। मंत्र जप करे दशांश होम करे। प्रसादन करे। **यन्मयोपहृतं किंचित् पुष्पगन्धानुलेपनैः। तत् सर्वमुपयुञ्जीत प्रसीद वरद भव॥ पुष्टिं प्रज्ञां धृतिं मेधामारारोग्यं भूतिमेव च॥**

॥ अथ षोडशोपचार मन्त्राः॥

प्रसीद जगतां मातः! संसारार्णवतारिणि! मया निवेदितं भक्त्या आसनं सफलं कुरु ॥१॥ आसनपरिमाणं तु मातृकाभेदतन्त्रे, पञ्चमपटलेचतुरंगुल विस्तारं रौप्यनिर्माणपीठकं। अलङ्कारं यथायोग्यं पुरुषस्तु निवेदयेत्। मूलप्रकृतिरूपेण सूयते सचराचरं। पूजामहं विधास्यामि स्वागतं ते महेश्वरि ॥२॥ दुर्गन्धि परमामोदं परं वागीश्वरेश्वरी। पाद्यमेतन्मया दत्तं प्रसीद भुवनेश्वरि ॥३॥ दूर्वातण्डुलसम्मिश्रं कर्पूरागुरुपूरितं। अर्घ्यं दत्तमिदं गृह्ण मत्तस्त्रिभुवनार्चिते ॥४॥ आपो नारायणः साक्षादप्सु सर्वं चराचरं। निवेदयामि ते देवि! अद्भिराचमनीयकं ॥५॥ वाजिमेधफलावाप्त्यै मया दत्तं वरानने! मधुपर्कं प्रतीच्छस्व मातर्मे भुवनेश्वरि ॥६॥

पुनराचमनीयमप्याचमनीयमन्त्रेण वा दद्यात् ॥७॥

शङ्खस्थमुदकं पुण्यं सुगन्धि सुमनोहरं। निवेदितं मया देवि! स्नानीयं प्रतिगृह्यतां ॥८॥
त्वं देवि! परमेशानि! परब्रह्मस्वरूपिणि! गृह्ण वस्त्रमिदं देवि! यज्ञसूत्रमिदं शुभे ॥९॥
ज्योतिषां ज्योतिरेकस्त्वमनादि निधनं न ते। मया दत्तमलङ्कारमलंकुरु नमोऽस्तु ते ॥१०॥
सुगन्धिं दुर्गभं नान्यं कुमुदोत्पलमालिनं। सितपीतारुणादानं गृह्ण पुष्पं वरानने ॥११॥
धूपं गुग्गुलसंयुक्तं चन्दनागुरुचर्चितं। दशाष्टाङ्गसमुद्भूतं गृहाण परमेश्वरि ॥१२॥
परं ज्योतिः परब्रह्म जगेदकं सनातनि! भूतये मम देवेशि! दीपोऽयं प्रतिगृह्यतां ॥१३॥
यद्दत्तं परया भक्त्या फलमूलादिकं मया। गृहाण परमेशानि! नैवेद्यं सुमनोहरं ॥१४॥

मातृकाभेदतन्त्रेनैवेद्यं विविधं रम्यं नानाफलसमन्वितं। शर्करासंयुतं कृत्वा पायसं च निवेदयेत्।

मत्स्यसूक्ते अशेषजगदाधारभूते! त्रैलोक्यवन्दिते! प्रदक्षिणमहं वन्दे विद्वत्सु पादपङ्कजं ॥१५॥
धान्यमुद्गकलायस्य रजोवस्य तिलस्य च। प्रकटानेकफलयुग्रचनां निवेदयेत् ॥१६॥

प्राण् प्राणान् रक्ष यशो रक्ष पुत्रदारधनानि च। सर्वरक्षाकरी यस्मात् त्वं देवि! भुवनत्रये। बलिदान व द्रव्य दान करे। प्रार्थना करे-

॥ अथ स्तुतिः ॥

॥ नारद उवाच ॥

ॐ भगवति! भयोच्छेदेकात्यायनि च कामदे! कौशिकि त्वं महेशानि, कालिके त्वां नमाम्यहम् ॥१॥
प्रचण्डे, पुत्रदे, देवि, सुप्रीते, सुरनायिके! कुलद्योतिकरे, चोग्रे, पार्वति! त्वं प्रसीद मे ॥२॥
दुर्गोत्तारिणि, दुर्गे, त्वं सर्वाशुभनिवारिणि! सर्वे, सर्वार्थदे, देवि, भव त्वं वरदा मम ॥३॥
चण्डोग्रे, वरदे, देवि, प्रचण्डे, विजयप्रदे! धर्मार्थकामदे, देवि, कात्यायनि! नमोऽस्तु ते ॥४॥
जमान्तरसहस्त्रेषु तिर्यग्योनिगतस्य च। अघं संहर मे देवि! ज्ञानतोऽज्ञानतः कृतम् ॥५॥
शान्तिपुष्टिप्रदे, देवि, मातस्त्रैलोक्यतारिणि! नमस्यामि जगद्धात्रि! त्वामहं विल्वभाविनि ॥६॥
नमस्तेऽस्तु शिवे, देवि, सर्वव्यापिनि, शाङ्करि! निजधर्मादिकं काम्यं कल्याणं च प्रदेहि मे ॥७॥
सर्वेषां नाथभूताऽसि त्वमेवैकाकिनी यतः। तस्मान्नमामि देवेशि! प्रसन्ना वरदा भव ॥८॥
इयं सर्वेश्वरीपूजा यन्मया देवि! ते कृता। पूर्णा भवतु सा सर्वा त्वत्प्रसादान्महेश्वरि ॥९॥
जातस्य यजमानस्य गर्भस्थस्य च देहिनः। मा भूत् तत्र कुले जन्म यत्र देवी न चण्डिका ॥१०॥

अर्द्धरात्रि को अष्टमी व नवमी में पूजा करे। शिव का पूजन बलि बाहर जाकर करे। रात्रि में रक्तपुष्प अष्टपुष्पों से पूजन करे। १००० पुष्पार्चन करे। नृत्यमीत मंगलगान करे।

॥ नवमी कृत्य ॥

नवमी को पूर्व कृत्य करे दशांश होमादि विधान करे। सायं ब्राह्मण, कुमारी भोजन कराये यथा शक्ति गाय, सुवर्ण, फल, वस्त्रादि का दान करे। अपने बंधु बोधय सहित भोजन करे। शिवभक्तों का आदर सम्मान करे।

॥ दशमी कृत्य ॥

दशमी को पूर्ववत् निवृत होवे। अवनीकृतजानु करके उपहार प्रदान करे-

ॐ कालि कालि महाकालि कालिके पापनाशनि काली कराल निष्क्रान्ते, कालिके त्वां नमोऽस्तु ते। सिंहवाहिनि चामुण्डे पिनाक धनुवल्लभे! उपहारं गृहीत्वैवं प्रसीद परमेश्वरि।

देव निसर्जन कर प्रतिमा को नगर परिक्रमा करते हुये नदी सरोवर पर ले जायें। प्रतिमा को रथ से उतार कर जल में स्थापित करें।

ॐ उत्तिष्ठ देवि चामुण्डे शुभां पूजां प्रगृह्य च। व्रज त्वं स्त्रोतसि जले वृद्धौ च स्थीयतामिह। निर्माल्यधारिणी पूज्या चाण्डाली गंधचंदनैः। समर्पयित्वा मंत्रेण मंत्रमेतदुदीरयेत्। निमज्याम्मसि संपूज्या परिकालार्चिते जले। पुत्रायुर्धन वृद्धयर्थं स्थापितासि जले मया॥ यजमान स्वयं चण्डिका को जल में प्रवेश कराये। चण्डिका को न देखे न जल में नग्न प्रवेश कराये। **न वीक्षे त महेशानीं च नग्नां प्रेषयेज्जले। दशम्यां श्रवणाप्राप्ते अप्सु निक्षिप्य दारकः। अलाभे केवलायां तु न निशायां कथञ्चन। पूजोपहार द्रव्याणि आचार्याय निवेदेयेत्। तदर्द्धं च विधिज्ञाय तदर्द्धं चैव ब्राह्मणे। तच्छेषं ऋत्वजे दद्यात् परितोष च।** आचार्य ब्राह्मण ऋत्वजों को यथा विभाग दक्षिणा देवें। **पूजालयं न वीक्षेत गृहस्थः स्वं कदाचन। अप्सुनिक्षिप्य देवेशीं ब्राह्मणायोपपादयेत्। देवी स्थितगृहेणापि यो गृहं कारयेत् सुधीः। तस्य लक्ष्मीर्बलं चायुः सर्वं नश्यति तत्क्षणात्।**

॥ इति प्राणतोषिण्यां दुर्गोत्सव प्रकरण संपूर्णम् ॥

॥ अथ अश्व गज पूजन प्रयोगः॥

प्रतिपदा से लेकर नवरात्र पर्यन्त गजाश्वों का पूजन करे। वस्त्रादि अलंकारों से सुसज्जित कर गंधादि से पूजन करे। एक पिण्ड प्रतिदिन पायसान्न, घृत, गुड़, शहद एवं सुरायुक्त बनाकर गजाश्वों खिलावें। स्वाति नक्षत्र में उच्चैःश्रवा हय आया हैं। त्वाष्ट्र में गजाश्वों की पूजा नहीं करे। नवरात्र पर्यन्त उनकी सवारी नहीं करे न उनका ताड़न करे। धूपदीप नैवेद्यादि से पूजन करे।

अश्वनामानिः- १. उच्चैःश्रवा, २. मेघपुष्पक ३. क्षेमकृद् ४. बाजीराजहंस, ५. सर्वसौख्यप्रद बाजीमकरालय ६. सुलोचन ७. सुभ्रुवाह ८. कालकेश ९. सिद्धिदायक।

गज नामानिः- १. ऐरावत २. पुण्डरीक ३. कुमुद ४. वामन ५. प्रतीक ६. अंजन ७. सर्वभौम ८. विजय ९. पुष्पदंत

अष्टवसुनामानिः- १. भव २. ध्रुव ३. सोम ४. विष्णु ५. अनिल ६. अनल ७. प्रत्यूष ८. प्रभव।

॥ अश्वपूजन मंत्राः ॥

गन्धर्वकुल जातस्त्वं, मा भूयो कुलनाशकः। सत्यवाक्येन सोमस्य, ब्रह्मणो वरुणस्य च ॥१॥
प्रसादाच्च हुताशस्य, वर्गय त्वं तुरङ्गम! तेजसा चैव सूयस्य, ऋषीणां तपसा तथा ॥२॥
रूद्रस्य ब्रह्मवीर्येण, वायोश्चैव बलेन च। स्मर त्वं राजपुत्रस्त्वं, कौस्तुभं च मणिस्त्वरः ॥३॥
निर्हन्तो यदि चाछिन्नो, युद्धं याति तुरङ्गमः। रिपून् विजित्य समरे, सहभर्ता सुखी भव ॥४॥

॥ गजपूजन मंत्राः ॥

पान्तु त्वां वसवो रुद्रा, आदित्याश्च मरूद्गणाः । भर्तारं रक्ष नागेन्द्र! स्वामिनं प्रतिपालय ॥१॥
अवाप्नुहि जयं युद्धे, गमने स्वस्तिमान् भव । वस्त्रैर्नानाविधैश्चैव, पुष्पैर्गन्धैर्मनोहरैः ॥२॥
प्रथमो मत्स्यरूपी स्याद्, द्वितीयः कूर्मनायकः । तृतीयो यज्ञवाराहश्चतुर्थो नृहरिस्मृतः ॥३॥
वामनः पञ्चमः प्रोक्तो, षष्ठो भार्गवसंज्ञकः । सप्तमो जानकीनाथो, देवकी नन्दनोऽष्टमः ॥४॥
नारायणस्तु नवमो, नवनारायणा स्मृताः ॥५॥

॥ शमी पूजन प्रयोगः ॥

राजा सजधज कर शमी पूजन हेतु नगर के बाहर जब कुछ तारे उदय हों उस समय के **विजय नाम** योग में प्रस्थान करे। शमीवृक्ष के पास भूमि शुद्धकर श्वेत वस्त्र पर चावलों से अष्टदल बनाकर उस पर कुंभ स्थापित करे।

संकल्प करे- **अद्येत्यादि यात्रायां विजय सिद्ध्यर्थं गणेशमातृका वास्तु दिग्पाल पूजन, मार्गदेवता पूजन, शमीपूजन, अपराजिता पूजनञ्च करिष्ये।**

ॐ अपराजितायै नमः। दक्षिणे ॐ क्रियायै नमः। वामे उमायै नमः। इसके बाद शमीपूजन कर प्रार्थना करे।

अपराजिते! नमस्तेऽस्तु, नमस्ते विजये जये! जगन्मातः सुरेशानि! कुण्डलद्योतितानने! ॥१॥
त्वं चापराजिते देवि! शमीवृक्षस्थिते जये! राज्यं मे देहि विश्वेशि! शत्रूणां च पराजयम् ॥२॥
अमङ्गलानां शमनीं, दुःकृतस्य च शमनीम् । दुःस्वप्नशमनीं धन्यां, प्रपद्येऽहं शमीं शमाम् ॥३॥
शमी शमयते रोगान्, शमी शमयते रिपून् । शमी शमयते पापं, शमी सर्वार्थसाधिनी ॥४॥
अर्जुनस्य धनुर्धात्री, रामस्य शोकनाशिनी। लक्ष्मणप्राणदात्री च, सीताशोकशमङ्करी ॥५॥
अपराजिते! नमस्तेऽस्तु, जयदे! कामदायिनी । यात्रामहं करिष्यामि, सिद्धिं सर्वत्र मे कुरु ॥६॥
मन्त्रैर्वेदमयैश्चैव, पूजयेच्च शमीस्थिताम् । अपराजितां भद्ररूपां, विजयार्थप्रदां शिवाम् ॥७॥
क्रमेणेन्द्रस्य ककुभिः, विन्यसेत् तु पदं क्रमात्। रिपोः प्रतिकृतिं कृत्वा, पांशुना तलरूपिणीम् ॥८॥
शरेण शरपुङ्खेण, बिद्धेद् हृदयमर्मणि । दिशां विजयमन्त्राश्च, असिरूपा द्विजातिभिः ॥९॥
पाठनीयास्ततो गेहं, गच्छेच्चैव पुरोधसा । माङ्गल्यमभिषेकं च , गुणप्राशनमेव च ॥१०॥
स्वस्तिवाच्या द्विजाश्चैव, बन्दीभ्योऽभयदक्षिणां । देयाधिक्यं च रजतं, वस्त्रादिनवभूषणम् ॥११॥
परिधयं स्वयं चैव, पत्नीभ्यो देयमेव च। पुत्रादिभ्यो स्नुषादिभ्यो, मन्त्रिभ्यो देयमेव च ॥१२।
अदेयमपि तत्काले, देयं श्रद्धा पुरःसरम् । सम्भाव्य पौरान् भृत्यांश्च, तेषामुत्सर्जनं ततः ॥१३॥
ततः पुरोधसा साकं, स्वयं गच्छेच्छमीं पुनः । वामदक्षिण पार्श्वेभ्यो, गृहीत्वा मृत्तिकां ततः ॥१४॥
श्रीधरं च हिरण्यं च, पट्टकूलं समर्पयेत् । गुरुं सम्पूज्य सस्त्रीकं, ततो गच्छेद् गृहं प्रति ॥१५॥

दुग्ध व जलधारा देवे। **आसिंचिता मयादेवि सदाशांति प्रयच्छ मे।** आचार्य अभिषेक कर मांगल्य एवं आशीष प्रदान करे।

॥ खंजनदर्शन तथा शुभाशुभ फलानि ॥

दशमी को अपराह्न समय खंजन पक्षी का दर्शन हो तो उसे नमस्कार करे। प्रार्थना करें -

वासुदेव स्वरूपेण सर्वकामफलप्रद । पृथिव्यामवतीर्णोऽसि खञ्जरीट नमोस्तुते ॥
खञ्जनाय नमस्तुभ्यं सर्वाभीष्ट प्रदाय च । नीलकण्ठाय भद्राय भद्ररूपाय ते नमः ॥
भद्र त्वं देहि मे भद्रमाशां पूरय पूरक । स्वस्तिकोऽसि कुरु खञ्जरीट नमोऽस्तुते ॥
नारायण स्वरूपाथ संवत्सर सुखप्रद । नीलकण्ठ महादेव खञ्जरीट नमोऽस्तु ते ॥
देवदानव यक्षाणां नराणां पुष्टिवर्धनम् । दर्शनं तव भद्रस्य विष्णुरूप नमोस्तुते ॥

॥ शुभाऽशुभफलम् ॥

जल प्रासाद शिखरे पर्वते च जलान्ति के । दृष्टे शुभं भवेत् कीर्तिगोष्ठेषु धनवर्द्धनम् ॥
अब्जेषु नृपतिर्भूयान् तथा देवालयेषु च। तड़ागतीरे धनवान श्मशाने मरणं भवेत् ॥
कृष्णग्रीवो नीलकण्ठ श्वेतकण्ठो जनार्दनः । पीते तु पार्वती देवी धुन्वत् पक्षे तु वीक्षणम् ॥
व्याधिर्भवति देवेशि स्थिरे संपत्तिकारकं । भक्तं भुञ्जन् भवेद् रोगी श्रियं दृष्ट्वा च वासवः ॥
सुमानः कीर्तनादेव आयुषस्तु क्षयो भवेत्। तस्मात्तु खंजनं नाम कीर्तयेदविचारयन् ॥

॥ कलश एवं मूर्तिविर्सजन विधिः ॥

देवी घट में प्रधान देवता का मूलतत्व विराजमान माने घट के पास जाकर श्वांस ऊपर खींचे तथा भावना करे कि प्रधान देवता कुंभ में से अब मेरे हृदय में आकर बैठ गये हैं। मृण्मयी प्रतिमा कलश को उठाकर प्रार्थना करे।

उत्तिष्ठ देवि चण्डेशि शुभां पूजां प्रगृह्य च । कुरुष्व मम कल्याणमष्टभि शक्तिभिः सह ॥
दुर्गे देवि जगन्मातः स्थानं गच्छ पूजिते। संवत्सर व्यतीते तु पुनरागमनाय वै ॥
इमां पूजां मयादेवि यथा शक्त्युपपादितम्। रक्षार्थं त्वं समादाय व्रज स्वस्थानमुत्तमम् ॥

स्वर्णमयी प्रतिमा आचार्य को दान करे।

त्र्यैलोक्य मातर्देवि त्वं सर्वभूतदयान्विते। दानेनानेन संतुष्टा सुप्रीता वरदा भव॥

कलश या मृण्मय प्रतिमा को जल में विर्सजन कर प्रार्थना करे कि हमारे पाप रोग दोष को लेकर देवी समुद्र में चली गई हैं हमें शुभाशीष प्रदान करे।

गच्छगच्छ परं स्थानं स्वस्थानं देविचण्डिके। व्रज स्त्रोतोजलं वृद्ध्यै स्थीयतां च जले त्विह ॥

॥ दक्षिण भारत मते नवदुर्गा भेदरूपाणि ॥

दक्षिण भारत में ब्राह्म्यादि नवदुर्गा की स्थूल रूप से उपासना करते हैं तथा दुर्गा के अन्य नवस्वरूपों की विशेष उपासना करते हैं।

प्रथमा वनदुर्गेति द्वितीया शूलिनीमता। तृतीया जातवेदा च चतुर्थी शांतिरिष्यति॥ पञ्चमी शबरी चैव षष्ठी ज्वालेति गीयते। सप्तमी लवणा चेति अष्टभ्यां आसुरी मता॥ नवमी दुर्गा दुर्गेति नवदुर्गा प्रकीर्तिताः॥

॥ १. वनदुर्गा ॥

वनदुर्गा की उपासना से व्याघ्र, सिंह, सर्प, वृश्चक हाथी वराह इत्यादि हिंसक पशुओं का भय नहीं रहता हैं। वे ही विंध्यवासिनी हैं, भक्तों को अभय प्रदान कर मंगलप्रदान करती हैं। इसका एक सिद्धस्थान चित्रकूट में हैं। धन धान्य वृद्धि हेतु निम्न मंत्र का जप करे।

१. ॐ हूं क्रौं महाभयपरिपन्थिनि वनविहारिणि दुर्गे देवि धन,धान्यं रक्ष रक्ष स्वाहा॥

२. शारदातिलक, मंत्ररत्न, मञ्जूषा, प्रपञ्चसार तंत्र, श्रीविद्यार्णवतंत्र में अन्य मंत्र दिया गया हैं।

मन्त्रः- **उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुपस्थितं यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा।**

विनियोगः- **अस्य श्री वन दुर्गा मंत्रस्य आरण्यक ऋषिः, अनुष्टुप् छंदः, सर्वदुर्गतिमोचनी श्री वनदुर्गा देवता, दुं बीजं, स्वाहा शक्तिं, सर्वदुर्गति मोचनार्थे जपे विनियोगः।**

षडङ्गन्यासः- **उत्तिष्ठ पुरुषि हृदयाय नमः। किं स्वपिषि शिरसे स्वाहा। भयं मे समुपस्थितं शिखायै वषट्। यदि शक्यमशक्यं वा कवचाय हुं। तन्मे भगवति नेत्रत्रयाय वौषट्। शमय स्वाहा अस्त्राय फट्।**

वर्णन्यासः- प्रत्येक वर्ण के आगे नमः लगाकर न्यास करे। **ॐ उं नमः दक्षपादांगुलिमूले। त्तिं दक्ष गुल्फे। ष्ठं दक्षजानुनि। पुं दक्षऊरुमूले। रुं वामपादांगुलिमूले। षिं वामगुल्फे। किं वामजानुनि। स्वं उरुमूले। पिं गुदे। षिं लिङ्गे। भं मूलाधारे। यं उदरे। में दक्ष पार्श्वे। सं वामपार्श्वे। मुं हृदि। पं दक्षस्तने। स्थिं वामस्तने। तं कण्ठे। यं दक्षकरांगुलिमूले। दिं दक्षमणिबन्धे। शं कर्पूरे। क्यं बाहुमूले। मं वामकरांगुलिमूले। शं मणिबन्धे। क्यं कपूरे। वां बाहुमूले। तं मुखे। न्मे दक्षनासापुटे। भं वामनासापुटे। गं दक्षगण्डे। वं वामगण्डे। तिं दक्षनेत्रे। शं वामनेत्रे। मं दक्षकर्णे। यं वामकर्णे। स्वां भ्रूमध्ये। हां नमः शिरसि।**

श्री विद्यार्णव तंत्र में ध्यान इस तरह हैं:-

विद्युद्दामप्रभाभां कनकसरसिजे संस्थितां सत्रिनेत्रां, हस्ताम्भोजैर्वहन्तीमरिदर वरदाभीति संज्ञाः क्रमेण। स्वर्णोद्यत्कान्तिवस्त्रां शशिकलित लसद्रत्नचूडां प्रसन्नां, पार्श्वोद्यत्सन्मृगेन्द्रां हृदि वनवसति दावदुर्गां स्मरेहम्॥

इनके अलावा ४ प्रकार के अन्य ध्यान हैं प्रथम ध्यान साधना कर्म हेतु, दूसरा रक्षा हेतु, तीसरा आपदनिवारण एवं चौथा ध्यान तामस प्रयोग हेतु हैं। ध्यान मंत्र दुर्गाकल्पतरु से कुछ भिन्न हैं।

हेमप्रख्यामिन्दु खण्डात्तमौलिं शङ्खारीष्टाभीति हस्तां त्रिनेत्राम्।
हेमाब्जस्थां पीतवस्त्रां प्रसन्नां देवीं दुर्गां दिव्यरूपां नमामि॥१॥

अरिशङ्ख कृपाण खेटबाणान् सधनुः शूलक तर्जनीर्दधाना।
भवतां महिषोत्तमाङ्ग संस्था नवदूर्वा सदृशी श्रियेऽस्तु दुर्गा ॥२॥
चक्रदर खड्ग खेटक शरकार्मुक शूल संज्ञक कपालैः
ऋष्टिमूसलकुन्त नन्दक वलय गदा भिन्दिपाल शक्त्याख्यै।
उद्यद्विकृति भुजाढ्या महिषके सजल जलद सङ्काशा
सिंहस्था वाऽग्नि निभा पद्मस्था वाथ मरकत श्यामा ॥३॥
व्याघ्र त्वक् परिधाना सर्वाभरणान्विता त्रिनेत्रा च
अहिकलित नीलकुन्तल विलसत् किरीट शशिकला।
सर्पमयवलय नूपुरकाञ्ची केयूरहार संभिन्ना
सुरदितिजाभय भयदा ध्येया कात्यायनी प्रयोग विधौ॥

॥ आवरण पूजा प्रयोगः ॥

(१) मूल बिन्दु में देवी का ध्यान पूजन करे। (२) षट्कोण में हृदयादि षडङ्गन्यास पूजा करे। (३) अष्टदल की कर्णिका(नीचे का भाग) में प्रत्येक नाम के आगे ''ॐ'' तथा पश्चात् 'नमः' लगाकर आवाहन पूजा करें।

यथा - ॐ आर्यायै नमः। दुर्गायै। भद्रायै। भद्रकाल्यै। अंबिकायै। क्षेम्यायै। वेदगर्भायै, क्षेमङ्कर्यै। (४) अष्टदलपत्रों के मध्यभाग में ॐ चक्रायनमः। शङ्खाय। खड्गाय। खेटकाय। वाणाय। चापाय। शूलाय। ॐ कपालाय नमः। (५) अष्टदलों के पत्राग भाग में ब्राह्मी, वैष्णवी, कौमारी, नारसिंही, वाराही, महालक्ष्मी, चामुण्डा, माहेश्वरी का पूजन करे। (६) भूपूर(चतुरस्त्र) में इन्द्रादि लोकपालों व उनके आयुधों का पूजन करें।

॥ अथ प्रयोग विधानम् ॥

॥ ध्यानम् ॥

श्रिये च दुर्गां महिषोत्तमाङ्गस्थितां च दूर्वादलरुग् (भां) वहन्तीम् ।
सचक्रशङ्खासिस खेटबाणचापान् भुजैस्तर्जनिकां वहन्तीम् (त्रिशूलम्) ॥१॥
शङ्ख चक्र कृपाण खेटक बाणधनूंषि शूलवत् । पुंस्कपालसऋष्टिकान् मुसलकुन्तनन्दकान् ॥२॥
सत्करैर्वलय सद्गदा भिण्डिपालकशक्तिकान्। बिभ्रतीं जलदद्युति महिषोत्तमाङ्गनिषेदुषीम् ॥३॥
पावकोल्लसितद्युति हृदि भीमसिंह (समा) गताम्। श्यामलां कमलस्थितां नयनत्रयोल्लसितां शुभाम् ॥३॥
व्याघ्रचर्म सदंशु कामहिबद्ध कुन्तल शोभिताम्। चन्द्रशोभितशेखरां सुरदानवाभयभीतिदाम् ॥४॥

॥ प्रयोगः ॥

प्रजपेत् प्रत्यहं मन्त्री स्वरक्षायै शतं ह्यथ। सहस्त्रं वा तदन्ते च प्रयोगान् कर्तुमर्हति ॥५॥ यद्यदुद्दिश्य च मनुं सहस्त्रं वायुतं जपेत्। अचिराल्लभते तत्तदसाध्यमपि साधकः ॥६॥ प्रातः स्नायी न्यासपूर्वं स्मरन् देवीमनन्यधीः। नित्यं सहस्त्रं प्रजपेन्मन्त्रं साधकसत्तमः ॥७॥ ज्वरसर्पग्रहोत्थांश्च दोषान् प्रशमयेत्सुधीः। हुनेदारण्यकतिलै राजिकाभिश्च वा हुनेत् ॥८॥ अपामार्गसमिद्भिश्च नाशयेत् सकलामयान्। अपस्मारादिकान् मन्त्री नात्र कार्या विचारणा ॥९॥ न्यग्रोधोत्थसमिद्भिर्वा सशुङ्गाभिहुनेत्सुधीः। अयुतं सर्वसम्पत्त्यै सर्वापन्मुक्तयेऽपि च ॥१०॥ ग्रहादिशान्त्यै च तया ह्यभिचारादिशान्तये। अर्कवृक्षसमुद्भूतैर्जुहुयाच्च समिद्वरैः ॥११॥ आरभ्य रविवारं च तद्द्वयं प्रत्यहं सुधीः।

दशाहतो वाञ्छितार्थसिद्धिर्भवति नान्यथा ॥१२॥

त्र्यहं वा सप्तरात्रं वा चेध्मैः सारसमुद्भवैः। एकैकं शकलं मन्त्री हुनेद्वाञ्छितसिद्धये ॥१३॥ त्रिंशच्छरान् शिताग्रांश्च निधाय जुहुयादबुधः। कटुतैलैः सहस्रं वा ह्ययुतं तदनन्तरम ॥१४॥ सम्पाततैलेन शरान् समभ्युक्ष्य यथाविधि। पूर्ववत् प्रजपेन्मन्त्रं ताञ्शरान् अथ भूषतिः ॥१५॥ शुद्धाचारश्च धीरश्च धन्वी संयतमानसः। गृहीत्वा परसेनाया मध्ये गच्छेदभीः क्षिपेत् ॥१६॥ सा धावति दिशः सर्वाः सम्भ्रान्ता विह्वला तदा। स आगत्य पुनर्भूयो गुरुं धान्यैर्धनैरपि ॥१७॥ वस्त्रालङ्करणैश्चैव तोषयेज्जयदायिनम्। अष्टाधिकशतेनाथ सञ्जप्तं शवभस्म च ॥१८॥ निक्षिपेद्यस्य शिरसि स विद्विष्टो भवेज्जनैः। देशाद् देशान्तरं चैव काकवद् भ्रमते सदा ॥१९॥ कारस्करद्रुमोत्थैश्च पत्रैर्वायुनिपातितैः। सहस्रं जुहुयात् पादरजोभिः सह वैरिणः ॥२०॥ उच्चाटोऽस्य भवेत् सद्यो, विषवृक्षसमुद्भवैः। पुष्पैर्हुनेन् सहस्रं च सेनां संस्तम्भयेत्बुधः ॥२१॥ तावद्भिस्तस्य पत्रैश्च मन्त्री सेनां निवर्त्तयेत्। विषवृक्षसमुद्भूतां शत्रोः प्रतिकृतिं शुभाम् ॥२२॥

कृत्वा प्रतिष्ठितप्राणां खण्डं खण्डं कृतैर्निशि। कृष्णपक्षचतुर्दश्यां काकोलूकवसाप्लुतैः ॥२३॥ तद्गात्रैर्विपिने होमः कर्त्तव्योऽष्टसहस्रकम्। चतुर्दशीत्रयादेवं नाशमेति रिपुर्ध्रुवम् ॥२४॥ उलूकवायसपक्षैः सवसारक्तसंयुतैः। होमाद्रिपुर्नाशमेति ह्युन्मत्तसमिधं तथा ॥२५॥ होमान्मत्तो रिपुर्नूनं भवत्येव सहस्रतः। वैरिणः प्रतिमां कृत्वा सम्यक् संस्थापितानिलाम् ॥२६॥ विषत्रिकटुकालिप्तां सम्यगुष्णे जले क्षिपेत्। प्रजपेच्च मनुं सद्यो ज्वराक्रान्तो भवेद्रिपुः ॥२७॥ दुग्धाभिषेकतः शान्तिर्भवत्यस्य न संशयः। प्रतिमां विषवृक्षोत्थां निःक्षिपेदुष्णवारिणि ॥२८॥ उन्मादश्च रिपोः सद्यः पूर्ववच्छान्तिरीरिता। सूर्यबिम्बेऽन्तरारक्तां शूलतर्जनिकाकराम् ॥२९॥ ध्यात्वायुतं प्रजप्याथ मारयेद्रिपुसञ्चयम्। असिखेटकरार्कस्था क्रुद्धा सा वनवासिनी ॥३०॥ संस्मृता मन्त्रजापे तु शमयेच्छत्रुसञ्चयम्। शरधनुष्करां सिंहस्थितां पावकसन्निभाम् ॥३१॥ संस्मृत्य मन्त्रं प्रजपन् क्षिप्रमुच्चाटयेदरीन्। कारस्करद्रुसमिधामयुतं जुहुयात्सुधीः ॥३२॥

रोगिणः करिणः सर्वे जायन्ते ह्यचिरात्सदा। विषवृक्षोत्थितैः पत्रैरमी नाशं प्रयान्ति च ॥३३॥ तद्वृक्षसुमनोभिः स्यादुच्चाटः करिणां ध्रुवम्। राजवृक्षसमिद्भिर्वा रोगा नश्यन्ति दन्तिनाम् ॥३४॥ विषवृक्षप्रसूनैश्च त्रिमध्वक्तैस्तु मानवः (वारणः) वशीभवेत्तथा शीघ्रं पत्रैरानित्यशोभितैः (कोद्भवैः) ॥३५॥ त्रिस्वाधुयुक्तैः करिणो ह्यतिमत्ता भवन्ति च। अभ्यङ्गः पञ्चगव्येन लोके रक्षाकरः परः ॥३६॥ करिणां मनुजप्तोऽयं प्रोक्तो मन्त्रविदुत्तमैः। सर्पिस्तिलानित्यकैस्तु राजिकापञ्चगव्यकैः ॥३७॥ दुग्धतण्डुलकैश्चैव प्रत्येकं च सहस्रतः। जुहुयादिभसङ्घानां वृद्धिर्भवति नान्यथा ॥३८॥

महान्तं विष (द्विज) वृक्षं च छित्वा निर्भिद्य पञ्चधा। दिक्क्रमेणैव पञ्चैवमायुधानि प्रकल्पयेत् ॥३९॥ सम्यक् शिल्पविदा शङ्खो नन्दकश्चक्रशार्ङ्गकौ। कौमोदकीति क्रमेण प्रोक्तमायुधपञ्चकम् ॥४०॥ निक्षिप्य पञ्चगव्येतु जपेन्मन्त्रसहस्रकम्। तावच्चाज्येन जुहुयात् सम्पातं तत्र पातयेत् ॥४१॥ भूयश्च पूर्वसंख्याकं जपं कुर्याद्विचक्षणः। विदध्यादायुधान् पञ्च पञ्चगव्यप्रपूरितान् ॥४२॥ मध्यायुधे स्वा(मध्यावटेष्वा) युधानि निक्षिपेत् (तत्र तत्र च) - बलिं हरेत्समीकृत्य तन्मंत्रैर्मन्त्रिणा तथा ॥४३॥ कार्या रक्षा राष्ट्रपुरग्रामाणामेवमेव च। यत्रैयं विहिता रक्षा लक्ष्मीः) तत्र च वर्धते ॥४४॥ धनधान्यसमृद्धिः स्याद्रिपुचौरभयं नच। पद्मैर्नृपं वशीकुर्यात् तत्पत्नीरुत्पलैरपि ॥४५॥ ब्राह्मणान् कुमुदैर्हुत्वा कह्लारैर्विश एव च। शूद्रांल्लवण होमेन ग्रामं जातिप्रसूनकैः ॥४६॥

चक्रशङ्खगदाम्भोजहस्तं सञ्चिन्तयेच्छुभम्। रविबिम्बे मुकुन्दं च मनुं व्यत्यस्तलिङ्गकम् ॥४७॥ प्रजपेच्चाथ पुरुषभगवत्पदयोरथ। सर्वसिद्धिकरः प्रोक्ताः प्रकारोऽयं सुमन्त्रिभिः ॥४८॥ साध्यनामाक्षरैः सम्यग्विदर्भितंमनुं

लिखेत्। यन्त्रे (पत्रे) ततः कुलालस्य करलग्नं प्रगृह्य मृत ॥४९॥ तया कृता या प्रतिमा तस्याश्च हृदि संन्यसेत्। संस्थाप्य स्वाभिमुख्ये तां सप्ताहं प्रजपेन्मनुम् ॥५०॥ सन्ध्यात्रये शतं चाष्टाधिकं वश्यो भवेत्तु सः। व्रीहीन् हुनेदष्टशतं प्रत्यहं वत्सराद्भवेत् ॥५१॥ व्रीहिमान् गोपयोभिश्च पशुमान् भवति ध्रुवम्। घृतहोमान्मन्त्रिणः स्यात् काञ्चनाप्तिर्महीयसी ॥५२॥ दध्ना सर्वसमृद्धिः स्यादन्नैरन्नसमृद्धियुक्। मधुहोमेन रत्नानां निधिर्भवति नान्यथा ॥५३॥ दूर्वाहोमेन दीर्घायुर्मन्त्री भवति निश्चितम्। श्वेतगुञ्जाः समानीय कुडवप्रमिताः शुभाः ॥५४॥ एतन्मन्त्रसुजप्ताश्च विकिरेच्छत्रुसैन्यके। स्वयं मन्त्री सुगुप्तः सन् तेनासौ वैरिणश्चम् ॥५५॥ ज्वरादिकैर्महारोगैः पीडिता स्यान्मृताचिरात्। सेनाधिपतिमुख्यानां परस्परविरोधतः ॥५६॥ एतदुपद्रवैर्नानाविधनाशं प्रयाति च .....॥

तारे शक्तिं ससाध्यां लिखतु रविदले मध्यतः पत्रमूले मर्दिन्या वर्णयुग्मं दलमनु विलिखेद्वह्निशो मूलवर्णान्। अन्त्ये प्र (चा) न्त्येकबीजं बहिरथ लिपिभिर्भूपुरद्वन्द्वसंस्थं दुर्गाया यन्त्रमेतद्युवतितनयदं सर्व रक्षाकरं स्यात् ॥५७॥ सर्वसंपत्करं नृणां सर्वसौभाग्यपुष्टिदम्। राज्यलक्ष्मीविहीनानां भूपतीनां च राज्यदम् ॥५८॥ आमयग्रस्तनृणां च रोगशान्तिकरं परम्। जपहोमाज्यसम्पातसाधितं मन्त्रमुत्तमम् ॥५९॥

रक्षा प्रयोग हेतु यदि यंत्र प्रयोग करना हो तो मध्य में '' ॐ '' ह्रीं पश्चात् साध्यनाम लिखे। बाहर १२ कमल का दल बनायें। १२ कमलों के नीचे के भाग (केसरों) में महिषमर्दिनि के अष्टाक्षर मंत्र के २-२ वर्ण एक दल में लिखे तो मंत्र की ३ आवृत्ति होगी। इसके बाहर २ वृत्त बनायें। दोनों वृत्तों के बीच की वीथिका में अं आं .... शं षं सं हं लं क्षं मातृका वर्ण लिखे। दो चतुरस्र से अष्टकोण चित्र....... बनाये।

अष्टदलकमलों मे दुर्गा का ध्यान करे व मंत्र जप करे। ॐ ह्रीं दुं दुर्गायै नमः। इसका बीज मंत्र दुः अथवा दुं हैं। एकाक्षरी मंत्र के कश्यपऋषि, गायत्री छन्दः दुर्गा देवता हैं।

दूर्वाश्यामां त्रिनेत्रां शूलवाणचक्र शङ्खखङ्ग खेट धनुः कपालानि। दक्षिणाधः करक्रमेण धारयन्तीं ध्यायेत्।

॥ अथ वनदुर्गा स्तोत्रम् ॥

यत्कर्मधर्मनिलयं प्रवदन्ति तज्ज्ञाः जज्ञादिपुण्यमखिलं सकलं त्वयैव।
त्वं चेतना यत इति प्रविचार्य चित्ते नित्यं त्वदीयचरणौ शरणं प्रपद्ये ॥१॥
पाथोऽधिनाथतनयापतिरेष शेषपर्यङ्कलालितवपुः पुरुषः पुराणः।
त्वन्मोहपाशविवशो जगदम्ब सोऽपि व्याघूर्णमाननयनः शयनं चकार ॥२॥
तत्कौतुकं जननि यस्य जनार्दनस्य कर्णप्रसूतमलजौ मधुकैटभाख्यौ।
तस्यापि यौ न भवतः सुलभौ निहन्तुं त्वन्माया कवलितौ विलयं गतौ तौ ॥३॥
यन्माहिषं वपुरपूर्वबलोपपन्नं यन्नाक नायकपराक्रम जित्वरं च।
यल्लोकशोकजनन व्रतबद्धहार्दं तल्लीलयैव दलितं गिरिजे भवत्या ॥४॥
यो धूम्रलोचन इति प्रथितः पृथिव्यां भस्मीबभूव स रणे तव हुंकृतेन।
सर्वासुरक्षयकरे गिरिराजकन्ये मन्ये स्वमन्युदहने कृत एष होमः ॥५॥
केषामपि त्रिदश नायक पूर्वकाणां हन्तुं न जातु सुलभाविति चण्डमुण्डौ।

तौ दुर्मदौ सपदि चाम्बरतुल्य मूर्तेर्मातस्तवासि कुलिशात् पतितौ विशीर्णौं ॥६॥
दौत्येन ते शिव इति प्रथित प्रभावो देवोऽपि दानवपतेः सदनं जगाम ।
भूयोऽपि तस्य चरितं प्रथयां चकार सा त्वं प्रसीद शिवदूति विजृम्भितेन ॥७॥
चित्रं तदेत दरैरपि ये न जेयाः शस्त्राभि घात पतिताद्रुधिरादपर्णे ।
भूमौ बभूवुरमिताः प्रतिरक्त बीजास्तेऽपि त्वयैव गगने गिलिताः समस्ताः ॥८॥
आश्चर्यमेतदतुलं यदभूत् सुरारी त्रैलोक्य वैभव विलुण्ठनहृष्टपाणी ।
शस्त्रैर्निहत्य भुवि शुम्भ निशुम्भसंज्ञौ नीतौ त्वया जननि तावपि नाकलोकम् ॥९॥
त्वत्तेजसि प्रलयकाल हुताशनेऽस्मिंस्तस्मिन् प्रयान्ति विलयं भुवनानि सद्यः ।
तस्मिन्निपत्य शलभा इव दानवेन्द्रा भस्मीभवन्ति हि भवानि किमत्र चित्रम् ॥१०॥
तत्किं गृणामि भवतीं भवतीव्रतापनिर्वापण प्रणयिनीं प्रणमज्जनेषु ।
तत्किं गृणामि भवतीं भवतीव्रतापसम्वर्द्धन प्रणयिनीं विपदि स्थितेषु ॥११॥
वामे करे तदितरे च तथोपरिष्टात् पात्रं सुधारसयुतं वरमातुलुङ्गम् ।
खेटं गदां च दधतीं भवतीं भवानि ध्यायन्ति येऽरुणनिभां कृतिनस्त एव ॥१२॥
यद्वारुणात् परमिदं यदि मानवस्ते बीजं स्मरेदनुदिनं दहनाधिरूढम् ।
मायाङ्कितं तिलकितं तरुणेन्दुबिन्दु नादैरमन्दमिह राज्यमसौ भुनक्ति ॥१३॥
आवाहनं यजनवर्णनमग्निहोत्रं कर्मार्पणं तव विसर्जनमत्र देवि ।
मोहान्मया कृतमिदं सकलापराधं मातः क्षमस्व वरदे बहिरन्तरस्थे ॥१४॥
अन्तः स्थिताप्यखिलजन्तुषु जन्तुरूपा विद्योतसे बहिरिवाखिलविश्वरूपा ।
का भूरिशब्दरचना वचनाधिका सा दीनं जनं जननि मामव निष्प्रपञ्चम् ॥१५॥
एतत् पठेदनुदिनं दनुजान्तकारि चण्डीचरित्रमतुलं भुवि यस्त्रिकालम् ।
श्रीमान् सुखी स विजयी सुभगः कृती स्यात् त्यागी चिरन्तनवपुः कविचक्रवर्ती ॥१६॥
श्री सिद्धनाथा परनामधेयः श्रीशम्भुनाथो भुवनैकनाथः ।
तस्य प्रसादात् सकलागम श्रीः पृथ्वीधरस्तोत्रमिदं चकार ॥१७॥

॥ श्री वनदुर्गा गायत्रीकवचस्तोत्रम् ॥

ॐ हसौं ॐ भूर्भुवः स्वः ॐ ह्रीं तत्सवितुर ह्रीं वरेण्यं ह्रीं भर्गो देवस्य क्लीं धीमहि क्लीं धियो यो नः क्लीं प्रचोदयात्मिके ह्रीं प्रणव शिरसात्मिके हूं फट् स्वाहा ॐ हसौं ॐ नमः।

ॐ सहनाववतु ॐ सहनौ भुनक्तु ॐ सहवीर्यं करवावहै। ॐ तेजस्विनावधीतमस्तु ॐ मां विद्विषावहै ॥ॐ शांतिः शांतिः शांतिः ॥

विनियोग :- ॐ अस्य श्री वनदुर्गा गायत्री महाविद्यामालामंत्रस्य ॐ किरात रूपधर ईश्वर ऋषिः। ॐ

अनुष्टुप् छंदः। ॐ अंतर्यामी नारायणः किरातरूपधरेश्वरी वनदुर्गा गायत्रीर्देवता। ॐ स्वाहा शक्तिः। ॐ हुं बीजं। ॐ क्लीं कीलकं। ॐ श्री वनदुर्गा गायत्री प्रीत्यर्थ मा वशयज्ञा वनदुर्गा गायत्री महामन्त्र पारायणे मम धर्मार्थ काम मोक्षार्थे जपे विनियोगः।

न्यास :- ॐ हंसिनी ह्रां अंगुष्ठाभ्यां नमः। ॐ हंसिनी ह्रां हृदयाय नमः। ॐ शंखिनी ह्रीं तर्जनीभ्यां नमः। ॐ शंखिनी ह्रीं शिरसे स्वाहा। ॐ चक्रिणी ह्रूं मध्यमाभ्यां नमः। ॐ चक्रिणी ह्रूं शिखायै वषट्। ॐ गादिनी ह्रैं अनामिकाभ्यां नमः । ॐ गदिनी ह्रैं कवचाय हूम्। ॐ शूलिनी ह्रौं कनिष्ठिकाभ्यां नमः। ॐ शूलिनी ह्रौं नेत्रत्रयाय वौषट्। ॐ चापिनी ह्रः करतलकरपृष्ठाभ्यां नमः। ॐ चापिनी ह्रः अस्त्राय फट्। ॐ भूः र्भुवः स्वः ॐ ह्रीं ॐ तत् सवितुर ह्रीं वरेण्यं ॐ ह्रीं भर्गो देवस्य क्लीं धीमहि ॐ ह्रीं धियो योनः क्लीं प्रचोदयादात्मिके ह्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ ह्रीं परोरजसे सावदों ॐ ह्रीं आपो ज्योति रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्। ॐ सत्यं ॐ।

॥ ध्यानम् ॥

सिंहादुत्थाय कोषाद् दड़ऽदड़ दड़ंधावमाना भवानी ।
दैत्यानां दिव्य शस्त्रैस्त तड तड तडं त्रोटयन्ती शिरांसि ॥
तेषां रक्तं पिवन्ती घुघट घट घटं तोषयन्ती पिशाचा,
त्यक्त्वादहं हसन्ती रवरवड रवडरवडं शांभवी मां पुनातु ॥५॥

ॐ क्लीं ह्रीं क्लीं ॐ अरि शंख कृपाण खेट बाणान् सुधनुः पाश मयांबुजं दधाना। भजतां महिषोत्तमांग - संस्था वनदुर्गा सदृशी श्रियोस्तु दुर्गा। ॐ क्लीं ह्रीं क्लीं ॐ नमः ॥१॥

अरि शंख गदा बाणं खेटकं परशुं तथा। अम्बुजं पाश हस्ताभ्यां देवी दुर्गामहं भजे ।
ॐ क्लीं ह्रीं क्लीं ॐ हेमप्रख्यामिंदुखंडां तमौलिंशंखारिष्टाऽभीतिहस्तां त्रिनेत्राम् ।
हेमाब्जस्थां पीतवर्णां प्रसन्नां देवीं दुर्गां दिव्य रूपां नमामि। ॐ क्लीं ह्रीं क्लीं ॐ नमः॥

ॐ सहना भवतु ॐ सहनौभुनक्तु ॐ सहवीर्यं करवावहै। ॐ तेजस्विना वधी तमस्तु ॐ मा विद्विया वहै ॐ शांतिः शांतिः शांतिः।

ॐ क्लीं लं पृथिव्यात्मकं वनदुर्गा देवी गायत्र्यै गंधं कल्पयामि। ॐ हं आकाशात्मकं वनदुर्गा देवी गायत्र्यै पुष्पं कल्पयामि। ॐ यं वाय्वात्मकं वनदुर्गा देवी गायत्र्यै धूपं कल्पयामि। ॐ रं अग्न्यात्मकं वनदुर्गा देवी गायत्र्यै दीपं कल्पयामि। ॐ वं अमृतात्मकं वनदुर्गा देवी गायत्र्यै अमृत नैवेद्यं कल्पयामि। ॐ सं सौमात्मकं वनदुर्गा देवी गायत्र्यै ताम्बूलं कल्पयामि।

ॐ ऐं ह्रीं श्रीं उतिष्ठ पुरुषि किं स्वपिषि भयं च समुपस्थितं यदि शक्यमशवयं वातन्मे भगवति शमय शमय श्रीं ह्रीं ऐं स्वाहा। ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गा देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा ॥१॥

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॥१॥ ॐ क्लीं ऐं ह्रीं श्रीं क्लीं ॐ हेतुकं पूर्व पीठे तु क्लीं आग्नेय्यां त्रिपुरां तकं। क्लीं दक्षिणे चाग्नि वैतालं क्लीं नैऋत्यां यम जिह्वकम्। ॐ क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गा देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा ॥२॥

ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः ॥२॥ ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॥१॥ ॐ क्लीं ऐं ह्रीं श्रीं क्लीं ॐ कालाख्यं वारुणे पीठे क्लीं वायव्यां करालिनम्।

क्लीं उत्तरे एकपादं तु क्लीं ईशान्यां भीमरूपिणम्। ॐ क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूं फट् स्वाहा ॥३॥ ओं सत्यं ओं तपः ओं जनः ओं महः ओं स्वः ओं भुवः ओं भूः ॥२॥

ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं जनः ओं तपः ओं सत्यम् ॥१॥ ॐ क्लीं ऐं ह्रीं श्रीं क्लीं ॐ आकाशे तु निरालं बं क्लीं पाताले बडवानलम्। क्लीं यथा ग्रामे तथारण्ये तथा क्षेत्रे क्लीं रक्ष मां बटुक स्तथा। ओं क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा ॥४॥ ओं सत्यं ओं तपः ओं जनः ओं महः ओं स्वः ओं भुवः ओं भूः ॥२॥

ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यम् ॥१॥ ओं क्लीं ऐं ह्रीं श्रीं क्लीं ओं सर्वमंगल मांगल्ये ऐं ह्रीं शिवे सर्वार्थ साधिके। श्रीं शरण्ये त्र्यंबके गौरी क्लीं नारायणि नमोस्तुते। ह्रीं ओं ऐं शरणागत दीनार्त ह्रीं परित्राण परायणे। श्रीं सर्वस्यार्ति हरेदेवी क्लीं नारायणि नमोस्तुते ह्रीं ओं ॥५॥ ओं क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ओं सत्यं ओं तपः ओं जनः ओं महः ओं स्वः ओं भुवः ओं भूः ॥२॥

ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यम् ॥१॥ ओं क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ओं सत्यं ओं तपः ओं जनः ओं महः ओं स्वः ओं भुवः ओं भूः ॥२॥

ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यम् ॥१॥ ॐ क्लीं ॐ ब्रह्माण्यै ओं क्लीं ॐ नमः। ॐ क्लीं ॐ वारुणीखल्विन्यै ॐ क्लीं ॐ नमः। ॐ क्लीं ॐ माहेश्वर्यै ॐ क्लीं ॐ नमः। ॐ क्लीं ओं कुलवासिन्यै ओं क्लीं ओं नमः। ॐ क्लीं ओं कुमारिण्यै ओं क्लीं ओं नमः। ॐ क्लीं ओं जयंतिपुरत्नाहि वारात्यै ॐ क्लीं ॐ नमः। ॐ क्लीं ॐ अष्टमहाकालि माहेश्वर्यै ॐ क्लीं ॐ नमः। ॐ क्लीं ॐ चित्रकूट इंद्राण्यै ॐ क्लीं ॐ नमः। ॐ क्लीं ॐ त्रिपुरहर ब्रह्मचारिण्यै ॐ क्लीं ॐ नमः। ॐ क्लीं ॐ एकवृक्ष शुषिण्यै महालक्ष्म्यै ॐ क्लीं ॐ नमः। ॐ क्लीं त्रिपुरहर ब्रह्मांड नायकायै ॐ क्लीं ॐ नमः। ॐ क्लीं ॐ क्षं क्षं त्रैलोक्य वशंकराणि हं क्षं बीजाक्षराणि ॐ क्षं हं क्षं क्षं क्लीं ओं नमः। ॐ क्लीं शांभवी मे शुभं कुरु कुरु ओं क्लीं हूँ फट् स्वाहा। ॐ क्लीं ऐं ह्रीं श्रीं क्लीं ॐ वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः ॥२॥ ॥६॥

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम्। ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ क्लीं ह्रीं श्रीं सकल नरमुख भ्रमरी ॐ क्लीं ओं नमः। ॐ ह्रीं क्लीं ॐ सकल राजमुख भ्रमरी ॐ क्लीं ॐ नमः। ॐ क्रौं सौं क्लीं ॐ सकल- देवता मुखभ्रमरी ॐ क्लीं ओं नमः। ॐ ह्रीं क्लीं क्लीं ॐ सकलकामिनी मुखभ्रमरी ॐ क्लीं ओं नमः। ॐ क्लीं ईं सौं ओं सकल देशमुखभ्रमरी ॐ क्लीं ओं नमः। ॐ क्लीं ॐ त्रैलोक्यचित्त भ्रमरी ॐ क्लीं ओं नमः। ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गा देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः। ॥२॥ ॥७॥

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॥१॥ ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ क्षां क्षीं क्षूं क्षै क्षौ क्षः उग्रभैरवादि सर्व भूत पिशाचादि चित्त भ्रमरी ॐ क्लीं श्रीं ह्रीं ऐं क्लीं ॐ वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः ॥२॥ ॥८॥

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॥१॥ ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां

देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ क्लीं हुं क्षुं हुं क्लीं राजमंत्र क्लीं राजयंत्र क्लीं राजतंत्र भ्रमरी। ॐ क्लीं हुँ क्षुं हुँ क्लीं सिद्धमंत्रं क्लीं सिद्धयंत्रं क्लीं सिद्धितंत्रं भ्रमरी ॐ क्लीं हुं क्षुं हुं क्लीं साध्य मंत्र क्लीं साध्य यंत्र क्लीं साध्य तंत्रं भ्रमरी। ॐ क्लीं सकल सुरासुर सर्वमंत्र भ्रमरी क्लीं सर्व यंत्र भ्रमरी क्लीं सर्व तंत्र भ्रमरी। ॐ क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॥१॥ ॐ सत्यं, ॐ तपः, ॐ जनः, ॐ महः, ॐ स्वः, ॐ भुवः ॐ भूः ॥२॥ ॥९॥

ॐ भूः, ॐ भुवः, ॐ स्वः, ॐ महः, ॐ जनः, ॐ तपः, ॐ सत्यम् ॥१॥ ॐ सत्यं, ॐ तपः, ॐ जनः, ॐ महः, ॐ स्वः, ॐ भुवः ॐ भूः ॥२॥ ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ क्लीं सर्वं संक्षोभिणीं क्लीं सर्व क्लेदिनीं क्लीं सकल मनोन्मादिनीम्। ॐ आं ह्रीं क्रों परमकल्याणीं ॐ क्लीं महायोगिनीं। ॐ क्लीं महाविद्यां प्रवक्ष्यामि क्लीं महादेवैन निर्मिताम्। क्लीं चिंतितां किरातरूपेण क्लीं मातृणां हृदयनंदिनीम्। ॐ क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ सत्यं ॐ तपः ॐ जनःॐ महः ॐ स्वः ॐ भुवः ॐ भूः ॥२॥ ॥१०॥

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः ॥१॥ ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ क्लीं उत्तमा सर्व विद्यानां क्लीं सर्वभूत शंकरी। ॐ क्लीं सर्व पापक्षय करीम् क्लीं सर्वशत्रु निवारिणी ॥१॥ ॐ क्लीं कुलकरीं। क्लीं गोत्रकरीं। क्लीं धनकरीं। क्लीं धान्यकरीं। क्लीं बलकरीं। क्लीं यशस्करीं। क्लीं विद्याकरीं। क्लीं उत्साह बल वर्धिनीं । क्लीं सर्व भूतानां विजृंभिणीं। क्लीं सर्वभूतानां स्तंभिनीं। क्लीं सर्वभूतानां मोहिनीं। क्लीं सर्व भूतानां द्राविणीं। क्लीं सर्वभूतानां सर्वभूतानां आकर्षिणीं। क्लीं सर्व मंत्र प्रभंजिनीम्। क्लीं सर्व विद्या प्रभेदिनीम्। ॐ क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः ॥२॥ ॥११॥

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम्। ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ एकाहिक ज्वर, द्वयाहिक ज्वर, त्र्याहिक ज्वर, चातुर्थिक ज्वर, अर्धमासिक, षाणमासिक, सांवत्सरिक, वातिक, पैतृक, श्लैष्मिक, सान्निपाति ज्वर, सतत ज्वर, शीत ज्वर, उष्णिक ज्वर, विषम ज्वर, ताप ज्वर, क्लीं सर्व ज्वर, गंडमाला भू[illegible]गाणां त्रासिनीं। क्लीं सर्पाणां त्रासिनीं, क्लीं सर्व त्रासिनीं, क्लीं शिरः शूल, अस्थि शूल, पक्ष शूल, गुदशूल, गुल्म शूल, लिंग शूल, योनिशूल, पादशूल, सर्वांगशूल, विस्फोटक प्रभेदिनीं। ॐ क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हुँ फट् स्वाहा। ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः ॥२॥ ॥१२॥

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ।२॥ ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ क्लीं आत्मरक्षा। क्लीं परोक्ष रक्षा। क्लीं अग्निरक्षा। क्लीं अधोरक्षा। क्लीं वायु रक्षा। क्लीं उदक् रक्षा। क्लीं महान्धकारोल्का विद्युदनिल चौर शस्त्रास्त्रेभ्यो रक्षमां रक्षामां रक्षमाम्। ॐ क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः ॥२॥ ॥१३॥

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॥१॥ ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ क्लीं महादेवस्य तेजसा भयंकरीष्ट देवतां बंधयामि। ॐ क्लीं पथानुगत चौरा द्रक्षते बंधकस्य क्लीं कंटकं बंधयामि। ॐ क्लीं महागणेन पंचशीर्षेण पाणिना, ॐ क्लीं

महादेवस्य तेजसा क्लीं सर्वशूलान् कहल पिंगलेन बंधयामि। क्लीं कंठ मयूर रुद्रांगीं क्लीं लृं लृं क्लीं मातंगी क्लीं अं आं क्लीं मातंगी क्लीं एं ऐं क्लीं मातंगी क्लीं इं ईं क्लीं मातंगी क्लीं ओं औं क्लीं मातंगी ॐ क्लीं उं ऊं क्लीं मातंगी क्लीं अं अः क्लीं मातंगी क्लीं ऋं ॠं क्लीं मातंगी क्लीं हिलि हिलि यमदंडं। क्लीं स्वर स्वर ब्रह्म दंडं। क्लीं नित्यापलादिनीं क्लीं विस्वर विस्वर रुद्रदंडं। क्लीं हंसिनी क्लीं प्रज्वल प्रज्वल वायुदंडं क्लीं शंखिनी क्लीं प्रहर प्रहर इंद्रदण्डं क्लीं चक्रिणी क्लीं यक्षभक्ष निर्ऋति दंडं। क्लीं गदिनी क्लीं शूलिनी क्लीं पाशादि धारिणीं ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। । ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः ॥२॥ ॥१४॥

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॥१॥ ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ क्लीं आयुर्विद्यां च सौभाग्य धनं धान्यं तथैव च। सदाशिवं पुत्रवृद्धिं देहि मे चण्डिके शुभे। ॐ क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। । ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः ॥२॥ ॥१५॥

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॥१॥ ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ क्लीं शिरोरक्षतु ब्रह्माणी क्लीं मुखे माहेश्वरी तथा। क्लीं कंठे रक्षतु वाराही क्लीं राचीभुजौतु रक्षतु। क्लीं हृदि रक्षतु चामुंडा क्लीं कुक्षौ रक्षतु वारुणी। क्लीं पादौ रक्षतु वैष्णवी क्लीं पृष्ठ देशे धनुर्धरी। क्लीं यथा ग्रामे तथा क्षेत्रे तथाऽरण्ये। क्लीं वनदुर्गां देवीं गायत्रीं रक्षस्व मां पदे पदे। ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः ॥२॥ ॥१६॥

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॥१॥ ॐ क्लीं ब्राह्मी क्लीं इंद्राणी क्लीं नारसिंही ॐ क्लीं माहेश्वरी क्लीं चामुंडा क्लीं महालक्ष्मी ॐ क्ली कौमारी क्लीं सिद्धचामुण्डेश्वरी क्लीं सर्वदा ॐ क्लीं वैष्णवी क्लीं गणश्वरी क्लीं सर्वत्रस्थिता ॐ क्लीं वाराही क्लीं क्षेत्रपाली क्लीं रक्षमां रक्षमां रक्षमां ॐ क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः। ॥२॥ ॥१७॥

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॥१॥ ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ क्लीं मातर्मे मधु कैटभघ्नि महिषघ्नि प्राणापहाराऽमे क्लीं हेल निर्मित धूम्रलोचन वधे हे चंड मुण्डार्दिनि। क्लीं निःशेषी कृत रक्तबीज दनुजेनित्ये निशुंभापहै क्लीं शुंभध्वंसिनी संहराशु दुरितं दुर्गे नमस्तेऽम्बिके। ॐ क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूं फट् स्वाहा। ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः। ॥२॥ ॥१८॥

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॥१॥ ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ क्लीं छायायै स्वाहा। ॐ क्लीं चतुरायै स्वाहा। ॐ क्लीं झिलि स्वाहा। ॐ क्लीं झिलिझिलि स्वाहा। ॐ क्लीं हिलि स्वाहा। ॐ क्लीं हिलि हिलि स्वाहा। ॐ क्लीं पिलि स्वाहा। ॐ क्लीं पिलि पिलि स्वाहा। ॐ क्लीं हर स्वाहा। ॐ क्लीं हर हर स्वाहा। ॐ क्लीं गंधर्वाय स्वाहा। ॐ क्लीं गंधर्वाधिपतये नमः। ॐ क्लीं यक्षाय स्वाहा। ॐ क्लीं यक्षाधिपतये स्वाहा। ॐ क्लीं रक्षसे स्वाहा। ॐ क्लीं रक्षोधिपतये स्वाहा। ॐ क्लीं भूः स्वाहा। ॐ क्लीं भुवः स्वाहा। ॐ क्लीं स्वः स्वाहा। ॐ क्लीं महः स्वाहा। ॐ क्लीं जनः स्वाहा। ॐ क्लीं तपः स्वाहा। ॐ क्लीं सत्यं स्वाहा। ॐ क्लीं भूर्भुवः स्वः स्वाहा। ॐ क्लींभूत प्रेत पिशाचोल्कामुखी स्वाहा। ॐ क्लीं रुद्रमुखी स्वाहा। ॐ क्लीं रुद्रजटी स्वाहा। ॐ क्लीं ब्रह्म विष्णु

रुद्र तेजसे स्वाहा। ॐ क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गां देवीं गायत्रीं प्रवण शिरसात्मिके हूं फट् स्वाहा ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः। ॥२॥ ॥१९॥

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॥१॥ ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ क्लीं भ्रां भ्रीं भ्रूं क्लीं भैरविभद्रे सर्वनृपाणां सर्व राजकार्य कर्त सर्वजनानां भ्रामय भ्रामय कीलय कीलय ॐ क्लीं भ्रूं भ्रीं भ्रां ॐ क्लीं श्रीं ह्रीं ऐं क्लीं भैरविभद्रे भवानि वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः। ॥२॥ ॥२०॥

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॥१॥ ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ क्लीं भ्रां भ्रीं भ्रूं क्लीं भैरविभद्रे सर्वनृषाणां सर्वराजकार्य कृतं सर्वजनानां भ्रामय भ्रामय कीलय कीलय ॐ क्लीं भ्रूं भ्रीं भ्रां क्लीं श्रीं ह्रीं ऐं क्लीं भैरविभद्रे भवानि वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः। ॥२॥ ॥२१॥

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॥१॥ ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ क्लीं या इमा भूत पिशाच राक्षस नवग्रह भूत वैताल शाकिनी डाकिन्यः कूष्माण्डः वासवः चत्वारि राजपुरुषाः राजकार्यकर्त्ता राजपुरुषः कलह पुरुषः क्लीं सर्वान् बंधयामि। ॐ क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः। ॥२२॥

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॥१॥ ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां देवीं गायत्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा॥३॥ ॐ सर्वदुष्टानां वातेषां क्लीं सर्व दिशि बंधयामि। क्लीं दुर्दिशो बंधयामि। क्लीं हस्तो बंधयामि। क्लीं चक्षुषी बंधयामि। क्लीं श्रोत्रे बंधयामि। क्लीं जिह्वां बंधयामि। क्लीं घ्राणं बंधयामि। क्लीं बुद्धिं बंधयामि। क्लीं गतिं बंधयामि। क्लीं मतिं बंधयामि। क्लीं अंतरिक्षं बंधयामि। क्लीं आकाशं बंधयामि। क्लीं पातालं बंधयामि। क्लीं यममुखेन पंच योजन विस्तीर्णं बंधयामि। क्लीं रुद्रो बध्नातु। क्लीं रुद्रमंडलं रुद्रं सपरिवारं देवता प्रत्यधि देवता सहितं क्लीं रुद्रमंडलं बंधयामि। क्लीं रुद्र मंडलं प्रत्येकं बंधय बंधय सपरिवारकं सर्वं तो मां रक्ष रक्ष मम सर्वोपद्रवं नाशय नाशय ॐ ह्रां ह्रीं हूं श्रीं क्लीं क्लां ब्लूं आं ह्रीं क्रीं हूँ फट् स्वाहा। ॐ ब्रह्मद्विषो जहि ॐ अव ब्रह्म द्विषो जहि। ॐ त्र्यंबकं यजाम हे सुगधिं पुष्टि बर्धन उर्वारुक मिव बन्धनान्मृत्यो र्मुक्षीय मामृतात्। ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः ॥२३॥

॥ इति वन दुर्गा कवच स्तोत्रम् ॥

॥ २. अथ शूलिनी दुर्गा प्रयोगः ॥

उक्तं च शारदातिलके।

पंचदशाक्षर मंत्र – **ॐ ज्वल ज्वल शूलिनि दुष्टग्रहान् हुँ फट् स्वाहा।**

अष्टदशाक्षर मंत्र – **ज्वल ज्वल शूलिनि शूलिनि दुष्टग्रहान. हुं फट स्वाहा।**

विंशाक्षर मंत्र– **ॐ ऐं ह्री श्रीं दुं ज्वल ज्वल शूलिनि दुष्टग्रहान् हुं फट् स्वाहा।**

त्रिंशाक्षर मंत्र – **श्रीशूलिनि वरदे देवसिद्ध सुपूजिते नन्दिनि रक्ष रक्ष महायोगेश्वरी हुं फट् ।**

॥ अस्य विधानम् ॥

विनियोग :– **ॐ अस्य श्रीशूलिनीदुर्गामंत्रस्य दीर्घतमा ऋषिः । ककुप् छंदः । शूलिनीदुर्गा देवता । सर्वेष्टसिद्धये जपे विनियोगः ।**

ऋष्यादिन्यास :– **ॐ दीर्घतमा ऋषये नमः शिरसि ॥१॥ ककुप्छंदसे नमः मुखे ॥२॥ शूलिनीदुर्गादेवतायै नमः हृदि ॥३॥ विनियोगाय नमः सर्वांङ्गे ॥४॥ इति ऋष्यादिन्यासः ।**

करन्यास :– **ॐ शूलिनि दुर्गे हुं फट् अंगुष्ठाभ्यां नमः ॥१॥ ॐ शूलिनि वरदे हुं फट् तर्जनीभ्यां स्वाहा ॥२॥ ॐ शूलिनि विंध्यवासिनी हुं फट् मध्यमाभ्यां वषट् ॥३॥ ॐ शूलिन्यसुरमर्दिनि युद्धप्रिये त्रासय हुं फट् अनामिकाभ्यां हुं ॥४॥ ॐ शूलिनि देवसिद्धि सुपूजिते नंदिनि रक्षरक्ष महायोगेश्वरि हुँ फट् कनिष्ठिकाभ्यां फट् ॥५॥** इति करन्यासः ।

हृदयादिन्यास :– **ॐ शूलिनि दुर्गे हुँ फट् हृदयाय नमः ॥१॥ ॐ शूलिनि वरदे हुं फट् शिरसे स्वाहा ॥२॥ ॐ शूलिनि विंध्यवासिनि हुँ फट् शिखायै वषट् ॥३॥ ॐ शूलिन्यसुरमर्दिनि युद्धप्रिये त्रासय हुं फट् कवचाय हुम् ॥४॥ ॐ शूलिनि देवसिद्धिसुपूजिते नंदिनि रक्ष रक्ष महायोगेश्वरि हुं फट् अस्त्राय फट् ॥५॥ इति हृदयादिपंचांगन्यासः** । एवं न्यासं कृत्वा ध्यायेत् ।

॥ ध्यानम् ॥

अध्यारूढां मृगेन्द्रं सजलजलधरश्यामलां पद्महस्तैः
शूलं बाणंकृपाणंत्वरिजलज गदाचाप पाशान्वहंतीम् ।
चंद्रोत्तंसां त्रिनेत्रां चतसृभिरसिमत्खेटकं बिभ्रतीभिः
कन्याभिः सेव्यमानां प्रतिभटभयदां शूलिनीं भावयामि ॥१॥

इति ध्यात्वा मानसोपचारैः संपूजयेत् । ततः पीठादौ रचिते सर्वतोभद्रमंडले मंडूकादि पीठदेवताः दुर्गाः पद्धतिमार्गेण संस्थाप्य नवपीठशक्तीः पूजयेत् । पूर्वादिक्रमेण –

ॐ प्रभायै नमः ॐ मायायै नमः ॐ जयायै नमः ॐ सूक्ष्मायै नमः ॐ विशुद्धायै नमः । ॐ नंदिन्यै नमः ॐ सुप्रभायै नमः ॐ विजयायै नमः मध्ये **ॐ सर्वसिद्धिदायै नमः**। इति पूजयेत् ततः स्वर्णादि निर्मितं यंत्रं मूर्ति वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छ वस्त्रेण संशोष्य।

त्रिकोण मध्य में देवी का आवाहन कर समीप में सिंह का पूजन करें।

"ॐ वज्रनखदंष्ट्रायुधाय महासिंहासनाय हुं फट् नमः" इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य देव्या आज्ञां गृहीत्वा आवरणपूजां कुर्यात् । तद्यथा पुष्पांजलिमादाय मूलमुच्चार्य -

ॐ संविन्मये परे देवि परामृतरसप्रिये । अनुज्ञां देहि मे दुर्गे परिवारार्चनाय ते ।

इति पठित्वा पुष्पांजलिं च दद्यात् । इत्याज्ञां गृहीत्वा आवरणपूजां कुर्य्यात् । तथा च षट्कोणकेसरेषु आग्नेयादिचतुष्कोणेषु मध्ये दिक्षु च ।

॥ श्री शूलिनी दुर्गा यन्त्रम् ॥

प्रथमावरणम्- (षट्कोणे)- ॐ शूलिनि दुर्गे हुं फट् हृदयाय नमः हृदयश्रीपादुकां पूजयामि तर्पयामि नमः इति सर्वत्र ॥१॥ **ॐ शूलिनि वरदे हुं फट् शिरसे स्वाहा शिरःश्रीपा०** ॥२॥ **ॐ शूलिनि विंध्यवासिनि हुंफट् शिखायै वषट् शिखाश्रीपा०** ॥३॥ **ॐ शूलिन्यसुरमर्दिनि युद्धप्रिये त्रासय हुं फट् कवचाय हुं कवचश्रीपा०** ॥४॥ **ॐ शूलिनि देवसिद्धसुपूजिते नंदिनि रक्ष रक्ष महायोगेश्वरि हुं फट् अस्त्राय फट्** ॥५॥ इति पंचांगानि पूजयेत्।

ततः पुष्पांजलिमादाय **'मूलमुच्चार्य्य- अभीष्ट सिद्धिं मे देहि शरणागतवत्सले । भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्'** इति पठित्वा पुष्पांजलिं च दत्त्वा विशेषार्घ्याद्बिंदुं निक्षिप्य **पूजितास्तर्पिताः संतु** इति वदेत्। इति प्रथमावरणम् ॥१॥

ततः पूज्यपूजकयोरंतराले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण ।

द्वितीयावरणम्- (अष्टदले)- ॐ दुर्गायै नमः दुर्गाश्रीपा० ॥१॥ **ॐ वरदायै नमः । वरदाश्रीपा०** ॥२॥ **विंध्यवासिन्यै नमः । विंध्यवासिनी श्रीपा०** ॥३॥ **ॐ असुरमर्दिन्यै नमः । असुरमर्दिनीश्रीपा०** ॥४॥ **ॐ युद्धप्रियायै नमः। युद्धप्रियाश्रीपा०** ॥५॥ **ॐ देवसिद्धपूजितायै नमः । देवसिद्धपूजिताश्रीपा०** ॥६॥ **ॐ नंदिन्यै नमः । नंदिनीश्रीपा०** ॥७॥ **ॐ महायोगेश्वर्य्यै नमः महायोगेश्वरीश्रीपा०** ॥८॥ इत्यष्टौ शक्तीः पूजयित्वा पुष्पांजलिं च दद्यात्। इति द्वितीयावरणम् ॥२॥

तृतीयावरणम् :-(अष्टदलाग्रे)- ततः पत्राग्रेषु तदस्त्राणि पूजयेत् । **तद्यथा चक्राय नमः** ॥१॥ **ॐ शंखाय नमः** ॥२॥ **ॐ खड्गाय नमः ।** ॥३॥ **ॐ गदायै नमः ।** ॥४॥ **ॐ चापाय नमः ।** ॥५॥ **ॐ त्रिशूलाय नमः** ॥६॥ **ॐ बाणेभ्यो नमः** ॥७॥ **ॐ पाशाय नमः।** ॥८॥ इत्यष्टास्त्राणि पूजयित्वा पुष्पांजलिं च दद्यात् । इति तृतीयावरणम् ॥३॥

ततो भूपुरे- इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च पूजयित्वा पुष्पांजलिं च दद्यात् । इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्य्यात् । **अस्य पुरश्चरणं पंचदशलक्षजपः सर्पिषान्नेन दशांशतो होमः तद्दशांशेन तर्पणं मार्जनं ब्राह्मण भोजनं च कुर्य्यात्। एवं कृते मंत्रः सिद्धो भवति । सिद्धे च मंत्रे मंत्री प्रयोगान्साधयेत्।**

तथा च-

मनुमेनं जपेन्मंत्री वर्णलक्षं विचक्षणः । सर्पिषान्नेन वा होमस्तद्दशांशमितो भवेत् ॥१॥
इत्थं जपादिभिः सिद्धं कुर्य्यात्कर्म निजेप्सितम् । अष्टोत्तरसहस्त्रं यस्तिलैस्त्रिमधुरप्लुतैः ।
नित्यं प्रजुहुयात्तस्य शक्तिः स्यादतिमानुषी ॥२॥
अष्टोत्तरशतं नित्यं सर्पिषा जुहुयान्नरः । वांछितं वत्सरादर्वाक् प्राप्नोति महतीं श्रियम् ॥३॥
पूर्वं होमो भवेन्नृणां सर्ववांछितसिद्धिदः । छुरिकाद्यानि शस्त्राणि जप्तानि मनुनामुना ॥४॥
संसिक्ताज्यविलिप्तानि वितरंति जयश्रियम् । अश्वत्थार्कसमिद्भिर्वा तिलैर्वा मधुरोक्षितैः ॥५॥
होमो वै दिशति क्षिप्रमीप्सितान्मंत्रिणो वरान् । उद्यदायुधहस्तां तां देवीं कालघनप्रभाम् ॥६॥
ध्यात्वात्मानं जपेन्मंत्रं स्पृष्ट्वा तं मुंचति ग्रहः । सर्पाखुवृश्चिकादीनां विषमाशु विनाशयेत् ॥७॥
मनुनानेन विधिवन्मंत्रविद्देवताधिया । मंत्रेणानेन संजप्तान्बाणानादाय योधकः ॥८॥
विमुंचेत्प्रतिसेनायां सा द्रुतं विद्रुता भवेत् । शूलपाशधरां देवीं ध्यात्वात्मानमनाकुलः ॥९॥
प्रविशेद्युद्धदेशं यो जित्वायाति स निर्व्रणः । जुहुयात्तिलसिद्धार्थैर्लक्षमेकं यथाविधि ॥१०॥
नामयुक्तं जपेन्मंत्रं वश्यासौ मतिमेष्यति । गुटिकां गोमयोत्पन्नां हुत्वाष्टशतसंख्यया ॥११॥
सप्ताहात्कुरुते मंत्री विद्वेषं स्निग्धयोर्मिथः । गृहीत्वा गोमयं व्योम्नि त्रिसहस्त्रं जपेत्पुनः ॥१२॥
गमिष्यति द्वारदेशे निखातं स्तंभकृद्भवेत् । बहुनोक्तेन किं सर्वं साधयेन्मनुनाऽमुना ॥१३॥

॥ अथ शूलिनीदुर्गा महामन्त्रः ॥

विनियोग :- ॐ अस्य श्रीशूलिनीदुर्गामहामन्त्रस्य ब्रह्मा ऋषिः, गायत्रीच्छन्दः, श्रीशूलिनी दुर्गा परमेश्वरी देवता, हुं बीजं, मं शक्तिः, स्वाहा कीलकं, मम शूलिनीदुर्गासप्रादसिद्ध्यर्थे जपे विनियोगः ।

करन्यास :- ॐ श्रीशूलिनि वरदे देवसिद्धसुपूजिते नन्दी रक्ष रक्ष, महायोगेश्वरी हुंफट् ह्रां अङ्गुष्ठाभ्यां नमः । ॐ श्रीशूलिनि वरदे देवसिद्धसुपूजिते नन्दी रक्ष रक्ष, महायोगेश्वरी हुंफट् ह्रीं तर्जनीभ्यां नमः । ॐ श्रीशूलिनि युद्धप्रिये देवसिद्धसुपूजिते नन्दी रक्ष रक्ष, महायोगेश्वरी हुंफट् ह्रूं मध्यमाभ्यां नमः । ॐ श्रीशूलिनि महिषासुरमर्दिनि देवसिद्धसुपूजिते नन्दी रक्ष रक्ष, महायोगेश्वरी हुंफट् ह्रैं अनामिकाभ्यां नमः । ॐ श्रीशूलिनि विन्ध्यवासिनि यन्त्रमन्त्रतन्त्राकर्षिणि देवसिद्धसुपूजिते नन्दी रक्ष रक्ष, महायोगेश्वरी हु ंफट् ह्रौं कनिष्ठिकाभ्यां नमः । ॐ श्रीशूलिनि सर्वसिद्धिप्रदायिनि देवसिद्धसुपूजिते नन्दी रक्ष रक्ष महायोगेश्वरी हुं फट् ह्रः करतलकरपृष्ठाभ्यां नमः ।

हृदयादिन्यास :- ॐ श्रीशूलिनि वरदे देव सिद्धसुपूजिते नन्दी रक्ष रक्ष, महायोगेश्वरी हुंफट् ह्रां हृदयाय नमः । ॐ श्रीशूलिनि वरदे देवसिद्धसुपूजिते नन्दी रक्ष रक्ष, महायोगेश्वरी हुं फट् ह्रीं शिरसे स्वाहा । ॐ श्रीशूलिनि युद्धप्रिये देवसिद्धसुपूजिते नन्दी रक्ष रक्ष, महायोगेश्वरी हुंफट् ह्रूं शिखायै वषट् । ॐ त्रिशूलिनि महिषासुरमर्दिनि देवसिद्धसुपूजिते नन्दी रक्ष रक्ष, महायोगेश्वरी हुं फट् ह्रौं कवचाय हुं । ॐ श्रीशूलिनि विन्ध्यवासिनि यन्त्र मंत्र तन्त्राकर्षिणि देवसिद्ध- सूपुजिते नन्दी रक्ष रक्ष, महायोगेश्वरी हुं फट् ह्रौं नेत्रत्रयाय वौषट् । ॐ श्रीशूलिनि सर्वसिद्धप्रदायिनि देवसिद्धसुपूजिते नन्दी रक्ष रक्ष महायोगेश्वरी हुंफट् ह्रः अस्त्राय फट् ।

॥ अथ ध्यानम् ॥

बिभ्राणा शूलबाणास्यभयवर गदाचाप पाशान्कराग्रैर्मेघश्यामा
किरीटोल्लासितशशिकलाभूषणा भीषणास्या ।
सिंहस्कन्धाधिरूढा चतसृभिरचितं खेटकं बिभ्रतीभिः
कन्याभिर्भिन्नदैत्या भवतु भवभयध्वंसिनी शूलिनी नः ॥१॥

संहारमुद्रां प्रदर्श्य योनिमुद्रां प्रणमेत् मूलमिति पञ्चपूजा ।

अथ मन्त्रः - ॐ ऐं ह्रीं श्रीं दुं ज्वल ज्वल शूलिनि दुष्टग्रहान् हुंफट् स्वाहा । अथ शूलिनीदुर्गामूलमन्त्रस्य षडङ्गं कृत्वा मूलं जपित्वाऽनन्तरं मालामन्त्रं पठेत् ।

॥ अथ मालामन्त्रः ॥

ॐ नमो भगवति कङ्कालरात्रि दुं दुर्गे शुं शूलिनि बं बटुकभैरवि अर्धरात्र विलासिनि प्रतापकेलिनि महाज्ञानधारिणि सर्वभूतप्रेत पिशाच- मद भीषमाकर्षय-२ आवेशय आवेशय, केलय केलय, भाषय भाषय , महाबटुकभैरवी हुँ फट् स्वाहा ॥१॥

ॐ नमो भगवति भद्रकालि कासकूटमोहिनि ऐं ह्रीं श्रीं इष्टकामार्थसिद्धिप्रदायिनि सकलज्ञापिनि संक्रामिणि ब्राह्मी माहेश्वरी कौमारी वैष्णवी वाराही इन्द्राणी चामुण्डा भैरवेश्वरी आकर्षय २ आवेशय २ केलय २ भाषय २ ऐं ह्रीं श्रीं हन हन सप्तमातृके हुंफट् स्वाहा ॥२॥

ॐ नमो भगवति ह्रीं ज्वल २ शूलिनि संहारकालि अष्टभुजे शालिनि एहि २ आगच्छ २ आवेशय २ केलय २ भाषय २ बन्धय २ घातय २ छिन्धि २ रारारारा ग्राहय २ सकलग्रहान् संहारय २ भूतग्रहप्रेतग्रह पिशाचग्रह ब्रह्मराक्षसग्रह, डाकिनीग्रह, शाकिनीग्रह, काकिनीग्रह, राकिनीग्रह हाकिनीग्रह, याकिनीग्रह, काल- निग्रह महाकालनिग्रहा, वेशग्रहानावेशग्रह, स्वप्नग्रह, भोगग्रहापस्मारग्रह, नित्यग्रह, सर्वग्रहान् संहारय २ उच्चाटय २ नाशय २ मारय २ शोषय २ दह २ पच २ भक्षय २ खण्डय २ खड्गेन छिन्धि २ शूलेन ताडय २ पाशेन बन्धय २ अनलेन दह २ ह्रीं दुर्गे बटुकभैरवि सकलग्रहसंहारकारिणि भूतज्वर, प्रेतज्वर , पिशाचज्वर, राक्षसज्वर, पित्तज्वर, वातज्वर, श्लैष्मिकज्वर, सन्निपातज्वरैकाहिकज्वर, द्याह्रिकज्वर, त्र्याहिकज्वर, चातुर्थिकज्वर पक्षज्वर, मासज्वर, त्रिमासज्वर, षणमासज्वर, सांवत्सरिकज्वर, सर्वज्वरान् भञ्जय २ कटिशूल कुक्षिशूलाङ्गशूल, पार्श्वशूल, पृष्ठशूल, शिरःशूलाहिसर्वरोगान् संहारय २ ह्रीं दुर्गे परमन्त्रपरयन्त्रपरतन्त्र विद्यास्तम्भिनि स्वमन्त्र स्वयन्त्र स्व-तन्त्र विद्याविवर्धिनि ॐ ह्रां ह्रीं ह्रूं हुं फट् स्वाहा ॥३॥

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देवि सर्वकामफलप्रदा ॥ इति जपं निवेद्य उत्तरन्यासं कृत्वा यथाशक्त्या प्रजप्य स्तुवीत्।

॥ श्रीशूलिनीदुर्गा सुमुखीकरण स्तोत्रम् ॥

श्रीशूलिनी दुर्गा के सुमुखीकरण स्तोत्र के नित्यपाठ से सभी बाधायें दूर होकर अभीष्ट कार्य पूर्ण होते हैं। पहले **ॐ सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं फट् स्वाहा।** मन्त्र को तीन बार पढ़ें फिर भगवान गणेश, क्षेत्रपाल बटुक योगिनी को विधिवत् बलि देकर सुमुखीकरण स्तोत्र का पठन करें।

विनियोग :- ॐ अस्य श्रीसुमुखीकरण स्तोत्रमन्त्रस्य दीर्घतमा ऋषिः। ककुप् छन्दः। शूलिनी देवता। तत्प्रसादसिद्ध्यर्थे जपे विनियोगः।

ऋष्यादिन्यास :- श्रीदीर्घतमा ऋषये नमः शिरसि। ककुप्छन्दसे नमः मुखे। शूलिनी देवतायै नमः हृदि। तत्प्रसादसिद्ध्यर्थे जपे विनियोगाय नमः सर्वाङ्गे।

॥ ध्यानम् ॥

ॐ ध्यायेद्धेम सहोपलासन परेकन्या जनालंकृते। पञ्चब्रह्म मुखामरैर्मुनिगणैः सेव्ये जगन्मंगले। आसीनां स्मितभाषणां शिवसखीं कल्याण वेषोज्ज्वलाम्। भक्ताभीष्टवर प्रदान निरतां विश्वात्मिकां शूलिनीम्॥

इस मंत्र का उच्चारण कर वाग्भव कूट **''ऐं''** का जप करना चाहिये। **ॐ ह्रीं श्रीं क्लीं ऐं** इस मंत्र का जप कर कामराजकूट (क्लीं) का जप करने से त्रिभुवन को क्षुब्ध किया जा सकता हैं। स्वप्नावती मंत्र के पहले **'' ॐ ऐं श्रीं क्लीं ह्रीं''** का जपकर कार्य करे। **ॐ ऐं क्लीं श्रीं ह्रीं** इस मंत्र का जप कर मधुमती मंत्र का जप करे। **''हंसः ॐ ह्रीं श्रीं हूं हंसः''** इस मंत्र का जप कर शक्तिकूट (**सौंः**) का जप करे। इस सारे मंत्र का नाम दीपनी विद्या हैं। यह मंत्र समस्त विद्या का प्राण स्वरूप हैं अतः इस मंत्र का केवल जप नहीं करे, उक्त मंत्र को समस्त मंत्रों के साथ योग कर जप करे। मंत्र जप के आदि अंत में सात बार जप करे। कामराजकूट, वाग्भवकूट और शक्तिकूट **क्लीं, ऐं, सौंः** इनके भी दीपनीमंत्र जो प्रारंभ में बताये हैं उनका जप करे। **''योगिनी हृदय''** में स्वर व्यञ्जन भेद से उक्त विद्या के सैंतीस प्रकार बताये हैं। यह पंचाक्षरी दीपनी मंत्र सर्व प्रचलित हैं। त्रिकूटा, अष्टकूटा, नवकूटा, द्वादश कूट हेतु श्रीविद्या क्रम हेतु मुण्डमालातंत्र, रुद्रयामल अथवा श्रीविद्यार्णव तंत्र उत्तरभाग में अवलोकन करें।

अन्य विशेष **विवरण देवी खण्ड पुस्तक के द्वितीय खण्ड (उत्तरार्द्ध भाग) में अवलोकन करें।**

॥ इति दीपनी विद्या प्रयोगः ॥

॥ अथ जगद्धात्री दुर्गा मंत्रः॥

एकाक्षर मंत्र :- दुँ

त्र्यक्षर मंत्राः- ह्रीं दुं फट्। श्रीं दुं फट्। ऐं दुं फट्। ॐ दुं फट्। क्लीं दुं फट्।

चतुरक्षर मंत्रः- हूं दुं स्वाहा। तंत्रसार में ऋषि नारद, छंद गायत्री, देवता जगद्धात्री दुर्गादेवी बताया हैं। ध्यानादि अष्टाक्षर दुर्गामंत्र की तरह हैं।

॥ अथ वृषारूढा दुर्गामंत्र प्रयोगः॥

चतुर्दशाक्षर मंत्रः- ॐ ॐ ह्रीं क्रों ॐ एहि परमेश्वरी स्वाहा।

एकविंशाक्षर मंत्रः- ॐ ह्रीं नमो भगवति माहेश्वरि एहि परमेश्वरि स्वाहा।

चतुर्दशार मंत्र के न्यास हेतु **ॐ ॐ। ह्रीं। क्रों। ॐ एहि। परमेश्वरि। स्वाहा।** इन छः विभाग से न्यास करे।

॥ ध्यानम् (मेरुतंत्रे) ॥

वृषारूढां भालचन्द्रां त्रिनेत्रां शशिसन्निभाम्। दधतीं शूल डमरुं महाहिवलयां भजे।

घृताक्त विल्व पत्रों से होम करे। ऋष्यादि अश्वरूढा व वृषारूढा दोनों के एक ही हैं।

॥ अथ अश्वारुढा दुर्गा मन्त्राः॥

दशाक्षर मंत्रः- ॐ एहि परमेश्वरि स्वाहा इस मंत्र के ऋषि ब्रह्मा, छन्द विराट् देवता अश्वारूढ़ा हैं।

न्यास हेतु **ॐ। ॐ। ॐ। एहि। परमेश्वरि। स्वाहा।** से न्यास करे।

॥ ध्यानम् ॥

अश्वारूढां चन्द्रभालां त्र्यक्षां पाशेन साध्यकम्। बध्वानयन्तीं वामेन दक्षे कनक वेत्रिकाम्॥

ॐ के बाद ह्रीं लगाने से **एकादशाक्षरी मंत्र** हो जाता हैं।

त्रयोदशाक्षर मंत्रः- ॐ आं ह्रीं क्रों एहि परमेश्वरि स्वाहा।

रक्तामश्वाधिरूढां शशिधर शकलाबद्धमौलिं त्रिनेत्राम्, पाशेनबध्य साध्यां स्मरशर विवशांदक्षिणेनानयन्तीम्।
हस्तेनान्येन वेत्रं वरकनकमयं धारयन्तीं मनोज्ञाम्, देवीं ध्यायेदजस्त्रं कुचभरनमितां दिव्यहाराभिरामाम्॥

॥ अथ विशालाक्षी दुर्गा मंत्रः॥

अष्टाक्षर मंत्रः- ॐ ह्रीं विशालाक्ष्यै नमः।

विनियोगः- **अस्य मंत्रस्य सदाशिव ऋषिः, पंक्तिच्छंदः, विशालाक्षी देवता, ॐ बीजं, ह्रीं शक्तिः, चतुर्वर्गलाभार्थे जपे विनियोग।**

षडङ्गन्यास- **ॐ ह्रां, ॐ ह्रीं, ॐ ह्रूं, ॐ ह्रैं, ॐ ह्रौं, ॐ ह्रः,** से न्यास करें।

॥ ध्यानम् ॥

ध्यायेद् देवीं विशालाक्षीं तप्तजाम्बूनदप्रभां, द्विभुजामम्बिकां चण्डीं खड्ग खेटक धारिणीम्।

नानालङ्कार सुभगां रक्ताम्बरधरां शुभां, सदाषोडशवर्षीयां प्रसन्नास्यां त्रिलोचनाम् ॥
मुण्डमालावतीरम्यां पीनोन्नत पयोधरां, शवोपरि महादेवीं जटामुकुट मण्डिताम् ।
शत्रुक्षयकरीं देवीं सधकाभीष्ट दायिकां, सर्वसौभाग्य जननीं महासम्पत्प्रदां स्मरेत् ॥

सप्तशती के मंत्र "**नंदगोपगृहे..........विंध्याचल निवासिनी** " के अनुसार आप ही "**नन्दजा**" हैं। स्कंद पुराणान्तर्गत "**विंध्य पुराणखण्ड** " में विंध्यवासिनी महालक्ष्मी का "**विशालाक्षी**" रूप में यंत्रार्चन स्तोत्र दिये है। अन्य ग्रंथो के अनुसार आप ही "**शूलिनी देवी** " है। **आपही कात्यायनी है**। महाकाली महालक्ष्मी महासरस्वती रूप में आपका अर्चन विंध्यक्षेत्र में होता है।

यंत्रार्चन विंध्यवासिनी प्रयोग में देखें।

॥ कौशिकी ध्यानम् ॥

साकौशिकीति विख्याता चारुरूपा मनोहरा। शूलं वज्रं च वाणं च खड्गं शक्तिं तथैव च ॥१॥
दक्षिणैः पाणिभिर्देवी गृहीत्वा तु विराजिता । गदां घण्टां च चापं च चर्म शंखं तथैव च ॥२॥
उर्ध्वादिक्रमतो देवी दधती वामपाणिभिः। वज्रेणेत्यस्य स्थाने चक्रेणेत्यपिपाठः॥ कौशिक्याश्चक्रस्याभावात् ॥३॥
सिंहस्योपरितिष्ठन्ती व्याघ्र चर्मणि कौशिकी । विभ्रती रूपमतुलं स सुरासुरमोंहनम् ॥४॥

कौशिकी का प्रयोग प्रत्यंगिरा के समान प्रभावी है वे ही काली स्वरूप अंबिका हैं।

॥ शिवदूती ध्यानम् ॥

शिवदूतीति साख्याता चण्डी फेरुशतैवृता । चतुर्भुजां महाकायां सिन्दूर सदृश द्युतिम् ॥१॥
रक्तदन्तां मुण्डमालां जटाजूटार्ध चन्द्रधृक् । नागकुण्डल-हाराभ्यां शोभितं नखरोज्वलम् ॥२॥
व्याघ्रचर्मपरीधानं दक्षिणे चैव शूलधृक् । वामे पाशं तथा चर्म बिभ्रदूर्ध्वाधरक्रमात् ॥३॥
स्थूलवक्त्रं व पीनौष्ठं भृंगमूर्तिं - भयंकरम् । निक्षिप्य दक्षिणं पादं संतिष्ठत्कुणपोपरि ॥४॥
वामपादं शृगालस्य पृष्ठे फेरु- शतैवृतम् । तादृशं शिवदूत्यास्तु मूर्द्धिन ध्यायेद्विभूतये ॥५॥

मंत्र तंत्र अनुष्ठान में शिवा बलि की श्मशान वा निर्जन स्थान में देने की व्यवस्था कही हैं अतः शिवा का आवाहन समय ध्यान करना चाहिये।

॥ ब्राह्मयादि अष्टमातृका ध्यानम् ॥

देवी के प्रयोगों में आवरण पूजा समय यंत्र मध्य में ब्राह्मयादि अष्टमातृकाओं का अवश्य आता हैं अतः उनका ध्यान भी आवश्यक हैं। (विष्णुधर्मोत्तरे)-

तत्रब्राह्मी चतुर्वक्त्रा षड्भुजा हंसवाहना, पिङ्गाभाभूषणोपेता मृगचर्मोत्तरीयका ।
वरं सूत्रं स्त्रुचं धत्ते दक्षबाहुत्रये क्रमात्, वामेतु पुस्तकं कुण्डी ब्रिभती चाभयप्रदा ॥१॥

माहेश्वरी वृषारुढा पञ्चवक्त्रा त्रिलोचना, बालेन्दुभृज्जटाजूटा शुक्ला सर्ववरप्रदा ।
षड्भुजा वरदा दक्षे सूत्रं डमरुकं तथा, शूलं घण्टाभये वामे सैव धत्ते महाभुजा ॥२॥
कौमारी रक्तवर्णा स्यात् षड्वक्त्रा सार्क- लोचना, रविबाहु र्मयूरस्था वरदा शक्तिधारिणी ।
पताकां बिभ्रती दण्डं पानं वाणं च दक्षिणे, वामे चापमधो घंटां कमलं कुक्कुटं त्वधः ॥
परशुं बिभ्रती तीक्ष्णं तदधस्त्वभयान्विता ॥३॥
बाहुभिर्गरुडारूढा शंख चक्र गदासिनी, शार्ङ्गं वाणधरा जाता वैष्णवी रूपशालिनी ॥४॥
कृष्णवर्णास्तु वाराही शूकरास्या महोदरी, वरदा दण्डिनी खड्ग विभ्रती दक्षिणे सदा ।
खेटपाशाभया वामे सैव चाथ लसद्भुजा ॥५॥
विक्षिपन्ती सटाक्षेपैर्ग्रह नक्षत्र तारकाः । नखिनी हृदयज्जाता नारसिंही सुदारुणा ॥६॥
ऐन्द्री दृकसौम्या हेमाभां गजसंस्थिता । वरदा सूत्रिणी वज्रं बिभ्रत्यूर्ध्वे तु दक्षिणे ।
वामेतु कलशं पात्रं त्वभयं दक्षिणे करे ॥७॥

चामुण्डा का ध्यान महादुर्गावत् करे ।

॥ अथ देवीराजोपचार पूजा प्रयोगः॥

॥ अथ महादुर्गा यंत्र देवता स्थापनम् ॥

अपने हृदय कमल में इष्ट देवता का ध्यान करें हाथ में पुष्पाक्षत् लीजिये, फिर बाँयी नासिका से उन पुष्पों पर श्वांस छोड़े भावना करें कि इष्ट देवता, हृदय कमल से बाहर आकर साकार सगुण पूजा ग्रहण करेंगें, फिर उन पुष्पों को यंत्र मध्ये बिन्दु में स्थापित करें। सर्वत्र नाम के आगे बाद **''नमः''** का उच्चारण करें।

१. बिन्दुमध्ये- **ऐं. ह्रीं क्लीं चामुण्डायै विच्चे श्री महाकाली महालक्ष्मी महासरस्वती स्वरुपिणी श्री त्रिगुणात्मिका स्वरूपायै श्री महादुर्गा देवतायै नमः।**

फिर गुरुमण्डल का ध्यान करें- **२. श्री नाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवम्। सिद्धौघं वटुकत्रयं पदयुगं दूति क्रमं मण्डलम् ॥१॥ वीरानऽष्ट चतुष्कषष्टि नवकम् वीरावलि पंचकम्। श्रीमन् मालिनी मंत्रराज सहितं वन्दे श्री गुरु मण्डलम् ॥२॥** इसके बाद दिव्यौघ, सिद्धौध, मनवौघ गुंरु तथा गुरु चतुष्टय का आवाहन करे। **''श्री कुलस्वस्वरूप मानने से''**

३. **''काली समष्टिमानने से''** कलिका के दिव्योघ सिद्धौघादि गुरु पूजन करें। यथा **दिव्यौघ- ॐ महादेव्याम्बामयी श्री। ॐ महादेवानंदमयी.। ॐ त्रिपुराम्बामयी। ॐ त्रिपुर भैरवानंदनाथमयी। आवा. स्था.।**

४. सिद्धौघ गुरु- **ॐ ब्रह्मानन्दनाथमयी ॐ पूर्णदेवानन्दनाथमयी आ. स्था.। ॐ चलचित्तानंदनाथमयी आ. स्था.। ॐ लोलानंदनाथमयी.। ॐ कुमारानन्दनाथमयी.। ॐ क्रोधानन्दनाथमयी.। ॐ वरदानन्दनाथमयी.। ॐ स्मरद्वियानंदनाथमयी.। ॐ मायाम्बानन्दनाथमयी.। ॐ मायावत्यानन्दनाथमयी.। आ. स्था.।**

५. मानवौघगुरु- **ॐ विमलानन्दनाथ मयी. आ. स्था.। ॐ कुशलासानन्दनाथ मयी.। ॐ भीम सेनानंदनाथमयी.। ॐ सुधाकरा नंदनाथमयी। ॐ मीनानन्दनाथमयी.। ॐ गोरक्षानन्दनाथमयी.। ॐ भोजदेवानन्दनाथ मयी.। ॐ प्रजापत्यानन्दनाथमयी.। ॐ मूलदेवानंदनाथमयी.। ॐ रन्तिदेवानन्दनाथ मयी.।**

विघ्नेश्वरानन्दनाथ मयी.। हुताशनानन्दनाथमयी.। समरानन्दनाथमयी.। संतोषानन्दनाथ मयी.। आ. स्था.।

६. गों गुरवेनमः परमगुरवेनमः परात्पर गुरवेनमः परमेष्ठि गुरवेनमः।

७. महादुर्गा की षडङ्ग पूजा करे। ऐं हृदयाय.। ह्रीं शिरसे.। क्लीं शिखायै.। चामुण्डायै कवचाय.। विच्चे- नेत्रत्रयाय.। मूलमंत्रेन् अस्त्राय फट्। आ. स्था.।

८. त्रिकोणे- स्वाग्रादि प्रादक्षिण्येन क्रमेण- स्वरया सह विधात्रे. श्रियासह विष्णेवे.। उमया सह शिवाय.। दक्षिणे हुं सिंहाय.। वामे हुं महिषाय.। आ. स्था.॥

९. षटकोणे - ऐं नंदजायै नमः अग्निकोणे। ह्रीं रक्त दंतिकायै नमः ईशाने। क्लीं शाकम्भर्यै नमः निर्ऋत्ये कोणे। दुं दुर्गायै नमः वायव्ये। हुं भीमायै नमः पूर्वे। ह्रीं भ्रामर्यै नमः पश्चिमे (स्वग्रे)। आ. स्था.।

१०. अष्टदले - पूर्वादिक्रमेण- ऐं ब्राह्मै.। ह्रीं माहेश्वर्यै.। क्लीं कौमार्यै। ह्रीं वैष्णव्यै.। हुं वाराह्यै.। क्ष्यौं नारसिंह्यै.। लं ऐन्द्रयै.। स्फ्रें चामुण्डायै नमः ।

११. अष्टदले पत्राग्रे- पूर्वादिक्रमेण- असिताङ्ग भैरवाय नमः। रुरुभैरवाय.। चण्डभैरवाय। क्रोध भैरवाय.। उन्मत्त भैरवाय.। कपालि भैरवाय.। भीषण भैरवाय.। संहार भैरवाय नमः। संहार भैरव। आ. स्था.।

ततश्चतुर्विंशतिदले- १२. पूर्वादिक्रमेण- विं विष्णुमायायै नमः। चें चेतनायै.। बुं बुद्ध्यै.। निं निद्रांयै.। क्षुंक्षुधायै.। छां छायायै.। शं शक्त्यै.। तृं तृष्णायै.। क्षां क्षान्त्यै.। जा. जात्यै.। लं लज्जायै.। शां शान्त्यै.। श्रं श्रद्धायै.। कां कान्त्यै.। लं लक्ष्म्यै.। धृं धृत्यै.। वृं वृत्त्यै.। श्रुं श्रुत्यै.। स्मृं स्मृत्यै.। दं दयायै.। तुं तुष्ट्यै.। पुं. पुष्ट्यै.। मां मातृभ्यो.। भ्रां भ्रान्त्यै नमः भ्रान्ति। आ. स्था.।

१३. भूपूरे कोण चतुष्टये- गं गणपतये. अग्निये। क्षं क्षेत्रपालाय. नैर्ऋत्ये। वं वटुकाय. वाय्यव्ये। यां योगिन्यै. ईशाने। आ. स्था.।

१४. भूपूरे पूर्वादि क्रमेण- इन्द्राय.। अग्नये.। यमाय.। निर्ऋतये.। वरुणाय। वायवे.। सोमाय। ईशानाय। ब्रह्मणे.। अनंताय.। आ. स्था.।

१५. तद्वहिः- वज्राय.। शक्तये.। दण्डाय.। खड्गाय.। पाशाय.। अंकुशाय। गदायै.। त्रिशूलायै.। पद्माय.। चक्राय.। आ. स्था.।

१६. तद्वहिः- पूर्वे वज्रहस्तायै गजारुढायै कादंबरीदेव्यै.। आग्नये- शक्ति हस्तायै अजवाहनायै उल्का देव्यै. । दक्षिणे- दण्डहस्तायै महिषारूढायै कराली देव्यै.। नैर्ऋते- खड्गहस्तायै शववाहनायै रक्ताक्षीदेव्यै.। पश्चिमे- पाशहस्तायै मकरवाहनायै श्वेताक्षीदेव्यै.। वायवे- अंकुश हस्तायै मृगवाहनायै हरिताक्षीदेव्यै। उत्तरे- गदाहस्तायैसिंहारूढायै यक्षिणीदेव्यै.। ईशाने- शूलहस्तायै वृषभवाहनायै कालीदेव्यै.। उर्ध्व- पद्महस्तायै हंसवाहनायै सुर जेष्ठा देव्यै। अधः चक्र हस्तायै सर्पवाहनायै सर्पराज्ञी देव्यै नमः। आ. स्था.।

ॐ यंत्रस्थदेवताभ्यो नमः। यथाशक्त्या पूजनं कुर्यात्॥ आगच्छवरदे देवि दैत्यदर्प निषूदिनि। पूजां गृहाण सुमुखि नमस्ते शंकर प्रिये॥ श्री महाकाली महालक्ष्मी महासरस्वती स्वरूपिणी दुर्गे देवते आवाहिता भव स्थापिता भव। सन्निहिता भव। सन्निरुद्धा भव। समुखीकृताभव। षडङ्गन्यासेनसकलीकृताभव। अवगुंठिता भव। परमीकृताभव। अमृताकृताभव। ॐ मनोजूति...। ॐ भू भुर्वः स्वः श्री महाकाली महालक्ष्मी महासरस्वती स्वरूपिणि सुप्रतिष्ठिता वरदा भव। ततः श्री सूक्तेन देवीन्यास कृत्वा षोडशोपचारैः पूजयेत्।

॥ अथ देवीराजोपचार पूजा प्रयोगः॥

देवीपूजा की आद्य शंकराचार्यजी ने अच्छी प्रस्तुति की है उसी का समावेश यहाँ किया है। देवी का ध्यान, आवाहन करें-

ध्यानम्- खड्गं चक्र- (१) अक्षस्त्रक्-(२) घंटाशूल- (३) विद्युद्दाम-(४) इति ध्यान मंत्रेण आवाहनं कुर्यात्॥

आवाहनं- कनकमय वितर्दिशोभमानं, दिशि दिशि पूर्ण सुवर्ण कुंभ युक्तम्।
मयि कृपयाऽऽशु समर्चनं गृहीतुं, मणिमय मण्डप मध्यमेहि मातः!॥

(प्रथम दिन मण्डप पर देवता स्थापन बाद दूसरे दिन पूजन में आवाहन नहीं करें प्रबोधन करें।)

प्रबोधनं- उषसि मागध मङ्गल गायनैः, झटिति जागृहि जागृहि जागृहि।
अति कृपार्द्र कटाक्ष निरीक्षणैः, जगदिदं जगदंब! सुखीकुरु॥

मंदिर समर्पणं- तपनीय मयी सुतूलिका, कमनीया मृदुलोत्तरच्छदा।
नवरत्न विभूषितामया, शिविकेयं जगदंब! तेऽर्पिता॥

शिविका समर्पणं- कनक कलश शोभमानशीर्षम्, जलधर चुम्बि समुल्लसत् पताकम्।
भगवति! तव सन्निवास हेतोः, मणिमय मंदिर मे तदर्पयामि।

आसनं- कनकमय वितर्द्धि स्थापिते तूलिकाढ्ये, विविध कुसुम कीर्णे कोटिबालार्क वर्णे।
भगवति! रमणीये रत्न सिंहासनेऽस्मिन्, उपविश पद युग्मं हेमपीठे निधेहि॥

पाद्यं(पाद्य पात्रात्)- दूर्वया सरसिजान्वित विष्णुक्रान्तया च सहितं कुसुमाढ्यम्।
पद्म युग सदृशे पद युग्मेः, पाद्यमेतदुररी कुरु मातः।

अर्घं (अर्घपात्रात्) गंध पुष्प यव सर्षप दुर्वा, संयुतं तिल कुशाक्षत मिश्रम्।
हेमपात्र निहितं सहरत्नैः, अर्घ्य मेतदुररी कुरु मातः।

आचमनीयम् (आचमनी पात्रात्)-
जलजद्युतिना करेण जातीफल, कङ्कोल-लवङ्ग गंध युक्तैः।
अमृतैरमृतैरिवाति शीतैः भगवत्याचमनं विधीयताम्॥

मधुपर्क-(मधुपर्कपात्रात्)
निहितं कनकस्य संपुटे, पिहितं रत्न पिधानकेन यत्।
तदिदं जगदंब! तेऽर्पितं, मधुपर्क जननि! प्रगृह्यताम्॥

आचमनीयम्- तोयेनाचमनं विधेहि शुचिना गांगेन मत्याकल्पितं।
साष्टांगं प्रणिपातमंब, कमले दृष्टया कृतार्थी कुरु॥

पयस्नानम्- स्वर्धेनुजातं बलवीर्य - वर्धनं, दिव्यामृतात्यन्तर सप्रदं सितम्।
श्रीचंडिके दुग्ध समुद्र - संभवे, गृहाण दुग्धं मनसा मयाऽर्पितम्॥

दधिस्नानं- क्षीरोद्भवं स्वादु सुधामयं च, श्री चन्द्रकांति सदृशं सुशोभनम्।
श्रीचण्डिके शुंभनिशुंभनाशिनि, स्नानार्थमंगी कुरु तेऽर्पितं दधि।

घृतस्नानं- श्री क्षीरजोद् भूतमिदं मनोज्ञं प्रदीप्तवह्नि द्युति पावितं च।
श्रीचण्डिके दैत्यविनाश दक्षे, हैयंगवीनं परिगृह्यतां च॥

मधुस्नानं- माधुर्यमिश्रं मधुमक्षिकागणै, र्वृक्षालिरम्ये मधुकानने चित्तम्।
श्रीचंडिके शंकर प्राणवल्लभे, स्नानार्थमंगी कुरु तेऽर्पितं मधु॥

शर्करा स्नानं- पूर्णेक्षुकांभोधि समुद्भवामिमां माणिक्य मुक्ता फलदाममंजुलाम्।
श्रीचण्डिके चंड विनाशकारिणि स्नानार्थमंगीकुरु शर्करां शुभाम्॥

सुगंधितद्रव्य स्नानं- एतच्चम्पक तैलमम्ब विविधैः पुष्पैर्मुहुर्वासितम्।
न्यस्तं रत्नमये सुवर्णचषके भृङ्गैर्भ्रमद्भिर्वृतम्।
सानन्दं सुरसुन्दरीभिरमितो हस्तैर्धृतं ते मया केशेषु भ्रमरप्रभेषु सकलेष्वङ्गेषु चालिप्यत॥

उद्वर्तनं- मातः! कुंकुम पङ्क निर्मित मिदं देहे तवोद्वर्तनम्। भक्त्याऽहं कलयामि हेम रजसा सम्मिश्रितं केसरैः। केशानामलकैर्विशोध्य विशदान् कस्तूरिकोदञ्चितैः,
स्नानं ते नवरत्न कुम्भसहितैः संवासितोष्णोदकै॥

पंचामृत स्नानं- दधि दुग्ध घृतै स माक्षिकैः सितया शर्करया समन्वितैः।
स्नपयामि तवाहमादरात् जननि! त्वां पुनरुष्ण वारिभिः॥

तीर्थजल- एलोशीर-सुवासितैः सकुसुमैर्गङ्गादि तीर्थोदकैः, माणिक्यामल मौक्तिकामृत युतैः स्वच्छैः सुवर्णोदकैः। मन्त्रान् वैदिक तांत्रिकान् परिपठन् सानंदमत्यादरात्,
स्नानं ते परिकल्पयामि जननि! स्नेहात् त्वमङ्गी कुरु॥

श्री महालक्ष्माद्यावाहित देवताभ्यो नमः "मूल मंत्रेण पंचोपचारैः संपूज्य। उत्तरे निर्माल्यं विसृज्य पुनः संपूज्य अभिषेकं कुर्यात्।"

अभिषेक के लिये पात्र में जल, गंध, पुष्प, दुग्ध, सुगंधित द्रव्य आदि डाले। देवीसूक्त, श्रीसूक्त, शक्रादयस्तुति, देव्यथर्वशीर्ष कनकधारा आदि स्तोत्र का पाठ करे।

शुद्धोदक स्नानं- उद्गंधैरगरुद्भवैः सुरभिणा कस्तूरिका वारिणा, स्फूर्जत्सौरभ यक्ष कर्दम जलैः काश्मीर नीलैरपि पुष्पांभोभिरशेष तीर्थ सलिलैः कर्पूरवासोभरैः।
स्नानं ते परिकल्पयामि कमले भक्त्या तदंगीकुरु।

वस्त्रं- बालार्कद्युति दाडिमीय कुसुम प्रस्पर्धि सर्वोत्तमम्, मातस्तवं परिधेहि दिव्यवसनं भक्त्या मया कल्पितम्। मुक्ताभिर्ग्रथितं सुकञ्चुकमिदं स्वीकृत्य पीतप्रभम् तप्तस्वर्ण समान वर्णमतुलं प्रावर्णमङ्गी कुरु॥

आचमनीयं- भूपाल दिक्पाल किरीट रत्नमरीचिनी राजित पाद पीठे।
देवैः समाराधित पादपद्मे श्रीचंडिके स्वाचमनं गृहाण॥

पादुका समर्पणं- नवरत्न मये मयाऽर्पिते, कमनीये तपनीय पादुके।
सविलासमिदं पद द्वयम्, कृपया देवि! तयोर्निधीयताम्॥

केश प्रसाधनं- बहुभिरगुरु धूपैः सादरं धूपयित्वा, भगवति! तवकेशान् कङ्कतैर्मार्जयित्वा। सुरभिभिर विन्दैश्चम्पकैश्चार्चयित्वा, झटिति कनक सूत्रैर्जूटयन् वेष्टयामि॥

सुरमा कज्जलं- सौवीराञ्जनमिदमम्ब चक्षुषोस्ते, विन्यस्तं कनकशलाकया मयायत्। तन्न्यूनं मलिनमपि त्वदक्षि सङ्गात् ब्रह्मेन्द्राद्यभिलषणीयता मुपेयात्॥

कज्जलं सं- चांपये कर्पूरक चन्दनादिकै, र्नानाविधै गंध चयैः सुवासितम्। नैत्रांजनार्थाय हरिन्मणिप्रभं श्रीचंडिके स्वीकुरु कज्जलं शुभम्॥

गंध सं.- प्रत्यंगं परिमार्जयामि शुचिना वस्त्रेण संप्रोञ्छनं कुर्वे केशकलाप मायततरं धूपोत्तमैर्धूपितम्। काश्मीरेगरु द्रवर्मलयजैः संघर्ष्य संपादितं, भक्त त्राणपरे श्रीकृष्ण गृहिणि श्री चंदनं गृह्यताम्।

अनुलेपनं (कुमकुम) मातः भालतले तवाति विमले काश्मीर कस्तूरिका, कर्पूरागरुभिः करोमि तिलकं देहेऽङ्गरागं ततः। वक्षोजादिषु यक्षकर्दम रसं सिक्त्वा च पुष्प द्रवम्, पादौ चंदन लेपनादिभरहं सम्पूजयामि क्रमात्॥

अक्षतम्- रत्नाक्षतैस्त्वांपरि पूजयामि, मुक्ता फलैर्वारुचिरार विन्दैः। अखण्डितैर्देवि यवादिभिर्वा काश्मीर पङ्काङ्कित तण्डुलैर्वा॥

आभूषणं सं- मञ्जीरे पदयोर्निधाय रुचिरां विन्यस्यकाञ्ची कटौ, मुक्ताहारमुरोजयोरनुपमां नक्षत्र मालां गले। केयूराणि भुजेषु रत्नवलय श्रेणीं करेषु क्रमात् ताटंके तव कर्णयो र्विनिदधे शीर्षे च चूडामणिम्॥ धम्मिले तवदेवि हेमकुसुमान्याधाय भाल स्थले, मुक्ता राजि विराजमान तिलकं नासापुटे मौक्तिकम्॥ मातः मौक्तिक जालिकां च कुचयोः सर्वांगुलीषूर्मिकाः, कट्यां काञ्चन किङ्किणी र्विनिदधे रत्नावतंसं श्रुतौ॥

परिमल द्रव्यं- जननि चम्पक तैलमिदं पुरो मृगमदोप युतं पटवासकम्। सुरभि गंधमिदं च चतुः समम्, सपदि सर्वमिद प्रतिगृह्यताम्।

सिन्दूरं- सीमन्ते ते भगवति मयासादरं यस्तमेतत्, सिन्दूरं मे हृदय कमले हर्ष वर्ष तनोतु। बालादित्य द्युतिरिव सदालोहिता यस्य कान्तिः, अन्तर्ध्वान्तं हरति सकलं चेतसा चिन्तयैव॥

पुष्पं स.- मंदारकुन्द करवीर लवङ्गपुष्पैः त्वांदेवि सन्ततमहं परिपूजयामि जाती जपा वकुल चम्पक केतकादि, नाना विधानि कुसुमानि चतेऽर्पयामि। मालती वकुलहेम पुष्पिका, कोविदार करवीरकैतकैः। कर्णिकार गिरि कर्णिकादिभिः पूजयामि जगदंब ते वपुः।

परिजात- शतपत्र पाटलै, मल्लिका वकुल चम्पकादिभिः। अम्बुजैः सुकमलैश्च सादरम्, पूजयामि जगदंब ते वपुः॥

पुष्प माला सं. पुष्पौघैर्द्योतयन्तैः सततपरिचलत्कान्ति कल्लोल जालैः। कुर्वाणा मज्जदन्तः करण विमलतां शोभितेव त्रिवेणी॥ मुक्ताभिः पद्मरागैर्मरकतमणि निर्मिता दीप्यमानैर्नित्यं। हारत्रयीत्वं भगवति कमले गृह्यतां कंठमध्ये॥

॥ अथांग पूजा ॥

गंध, अक्षत, पुष्प चर्चितकर एकीकृत करे एवं अंग पूजा करे- **ह्रीं दुर्गायै नमः पादौ पूजयामि। ह्रीं मंगलायै नमः गुल्फौ पूजयामि। ह्रीं भगवत्यै नमः जंघे पूज.। ह्रीं कौमार्यै नमः जानुनी पू.। ह्रीं वागीश्वर्यै नमः उरौ पूज.। ह्रीं वरदायै नमः कटीम् पूज.। ह्रीं पद्माकरवासिन्यै नमः स्तनौ पूज.। ह्रीं महिषार्दिन्यै नमः कंठं पूज.। ह्रीं उमासुतायै नमः स्कंधौ पूज.। ह्रीं इन्द्राण्यै नमः भुजौ पूज.। ह्रीं गौर्यै नमः हस्तौ पूज.। ह्रीं मौहवत्यै नमः मुखं पूजयामि। ह्रीं शिवायै नमः कर्णौ पूज.। ह्रीं अन्न पूर्णायै नमः नेत्रे पूज.। ह्रीं कमलायै नमः ललाटं पूज.। ह्रीं महालक्ष्म्यै नमः सर्वागं पूजयामि॥**

॥ अथ आवरण पूजा पश्चादग्रे पूजा विधानम् ॥

(यंत्र पर पूजन तर्पण किया हो तो यंत्र को शुद्ध कर, पञ्चोपचार पूजन करें मण्डल पर रखें) तदग्रे -

श्वेतचूर्णम् - **मंदार मल्ली करवीर संभवं, कर्पूरपाटीर सुवासितं सितम्।**
श्री श्वेत चूर्णं विधिना समर्पितं, प्रीत्या त्वमंगीकुरु विष्णुवल्लभे॥

रक्तचूर्णम् - **प्रत्युष कालार्क मयूख सन्निभं, जातिफलैलागरुणा सुवासितम्।**
श्री रक्तचूर्णं मनसा मयाऽर्पितं प्रीत्या त्वमंगीकुरु विष्णुवल्लभे॥

हरिद्रा समर्पयामि - **हरिद्रुमोत्थामति पीतवर्णां सुवासितां चन्दन पारिजातैः।**
अनन्यभावेन समर्पितांते मातर्हरिद्रामुररी कुरुष्व॥

धूपं दर्शयामि - **लाक्षा सम्मिलितैः सिताभ्रसहितैः, श्रीवास सम्मिश्रितै कर्पूरा कलितैः सितामधुयुतैर्गो सर्पिषाऽऽलोडितैः॥ श्री खण्डागरु गुग्गुल प्रभृतिर्नाना विधैर्वस्तुभिः।**
धूपं ते परिकल्पयामि, जननि स्नेहात् त्वमङ्गी कुरु॥

नीराजनं दर्शयामि- **रत्नालंकृत हेमपात्र निहितैर्गो सर्पिषाऽऽलोडितैः। दीपै दीर्ध तरान्धकार - भिदुरैर्बालार्क कोटिप्रभैः॥ आताम्र ज्वलदुज्ज्वल प्रविलसद् रत्नप्रदीपैस्तथा।**
मातः त्वामहमादरादनु - [illegible]नं नीराजयाम्युच्चकैः॥

॥ अथ नैवेद्य निवेदन विधि ॥

अपने दक्षिण व देवी के अग्रभाग में जल या गंध से चतुरस्त्र बनायें उस पर नैवेद्य पात्र रखें। **'ह्रीं नमः'** कहकर सामान्यर्घ जल से प्रोक्षण करे। मूलमंत्र पढ़कर देखिये, दाहिने हाथ को अधोमुख करें उसके पृष्ठ पर बाँया हाथ रखकर नैवेद्य को आच्छादित करें और वायु बीज **'यं'** सोलह बार जपे एवं अग्नि बीज **'रं'** सोलह बार जपे इससे शुद्धि-अशुद्धि दोष नष्ट होता है। तदन्तर बाँये हाथ को अधोमुख करें उसके पृष्ठ पर दक्षिण हाथ रखें नैवेद्य की ओर हाथ रखें अमृत बीज **'वं'** का सोलह बार जप कर नैवेद्य के अमृतमय होने की भावना करें। धेनुमुद्रा दिखावें आठ बार मूल मंत्र जाप करके गंध पुष्प चढ़ावें, बाँये अँगुठे से नैवेद्य पात्र का स्पर्श करें। दाहिने हाथ में जल पात्र लेवें।

मंत्र -

चतुर्विधानं सघृत सुवर्णपात्रे मया देविसमर्पितं तत्।
संवीज्यमाना ऽमरवृन्दकैस्त्वं जुषस्व मातर्दयया ऽवलोकम्॥

श्रीमन्महाकाली महालक्ष्मी महासरस्वतीभ्यो नमः नैवेद्यं समर्पयामि (यह पढ़कर देवी के दक्षिण भाग में जल

छोड़ें)बाँयें हाथ की अनामिका मूल और अंगुष्ठ से नैवेद्य मुद्रा दिखायें, पात्र में पुष्प, तुलसी मञ्जरी या शमीपत्र छोड़ें।

॥भगवति! निवेदितानि हवींषि जुषाण॥

ग्रासमुद्रा दिखावें। बाँयें हाथ को पद्माकार करें एवं दाहिने हाथ से मुद्रा दिखायें।

(कनिष्ठिका, अनामिका व अँगुष्ठ के संयोग से) - '**ह्रीं प्राणाय स्वाहाः**' (तर्जनी, मध्यमा व अँगुष्ठ के संयोग से) - '**ह्रीं अपानाय स्वाहाः**' (तर्जनी, अनामिका, मध्यमा व अंगुष्ठ के संयोग से) - '**ह्रीं व्यानाय स्वाहाः**' (अनामिका, मध्यमा व अंगुष्ठ के संयोग से) - '**ह्रीं उदानाय स्वाहाः**' (सर्वांगुलिभिः) - **ह्रीं समानाय स्वाहाः**

भावना करे देवी प्रसाद ग्रहण कर रही है। ततो '**जलं दद्यात्**'। प्रार्थना -

नमस्ते देवदेवेशि सर्वतृप्ति करं परम् । अखण्डानन्द सम्पूर्णे गृहाण जलमुत्तमम् ॥

श्रीमन्महाकाली महालक्ष्मी महासरस्वतीभ्यो नमः जलं समर्पयामि। अन्तः पट करें। **ब्रह्मेशाद्यैः सरसमभितः सूपविष्टैः समन्तात् सिंजद्वाल, व्यञ्जन निकरैर्वीज्यमाना सखीभिः। नर्मक्रीड़ा प्रहसन परान् पंक्ति भोक्तृन् हसन्ती, भुंक्ते पात्रे कनकघटिते षड्रसान देव देवी ॥१॥ शाली भक्तं सुपक्वं शिशिरकरसितं पायसापूपसूपं लेह्यं पेयं च चोष्यं, सितममृतफलं घारिकाद्यं सुखाद्यम्॥ आज्यं प्राज्यं सुभोज्यं नयन रुचि करं राजिकैलामरीचैः। स्वादीय शाकराजी परिकर ममृताहारजोषं जुषस्व ॥२॥**

अन्तर्पट करें, तदन्तर आचमनीय पात्र से आचमन करायें। सात बार मूल मन्त्र जपे, **श्रीमन्महाकाली महालक्ष्मी महासरस्वतीभ्यो मध्ये पानीयं समर्पयामि।** (भावना करें देवी अपने परिवार मण्डल सहित नैवेद्य ग्रहण कर रही है। मूल मंत्र का जाप करें।)

प्रार्थना - **सापूप सूप दधिदुग्धसिता घृतानि, सुस्वादु भक्ष्य परमान्न पुरः सराणि । शाकोल्लसन्मरि च जीरक वाल्हिकानि, भक्ष्याणि भक्ष्य जगदम्ब मयाऽर्पितानि ॥**

दुग्धं निवेदनम् - **क्षीर मेतदिदमुत्तमोत्तमं प्राज्यमाज्यमिदमुत्तमम मधु । मातरेतदमृतोपमं पयः, सम्भ्रमेण परिपीयतां मुहुः ॥**

आचमनीयम् - **गङ्गोत्तरी वेग समुद्भवेन सुशीतलेनाति मनोहरेण । त्वं पद्म पत्राक्षि मयाऽर्पितेन शंखोदकेनाचमनं कुरुष्वं ॥**

पाणिमुखप्रक्षालनं- **उष्णोदकैः पाणि युगं मुखं च, प्रक्षाल्य मातः कलधौतपात्रे । कर्पूर मिश्रेण स कुंकुमेन, हस्तौ समुद्र्तय चन्दनेन ॥**

फलानि सम- **जम्बाम्र रंम्भाफल संयुतानि, द्राक्षाफल क्षौद्रसमन्वितानि । सनारिकेलानि सदाडिमानि, फलानि ते देवि समर्पयामि ॥ कूष्माण्ड कोशातकि संयुतानि, जम्बीर नारिङ्ग समन्वितानि । स बीजपूराणि स बादराणि, फलानि ते देवि समर्पयामि ॥**

ताम्बूलं सम.- **कर्पूरेण युतैर्लवङ्ग सहितैस्तकंकोल चूर्णान्वितैः, सुस्वादु क्रमुकैः सगौर खदिरैः सुस्निग्ध जाती फलैः। मातः कैत कपत्र पाण्डुरुचिभिस्ताम्बूल वल्लीदलैः, सानन्दं मुख मण्डनार्थमतुलं ताम्बूलमङ्गीकुरु॥ एलालवङ्गादि समन्वितानि कंकोल कर्पूर विमिश्रितानि। ताम्बूलं वल्लीदल संयुतानि पूगानि ते देवि समर्पयामि ॥**

दक्षिणा सम.- अथ बहुमणिमिश्रैमौक्तिकैस्त्वां विकीर्य्, त्रिभुवन कमनीयैः पूजयित्वा च वस्त्रैः।
मिलित विविध मुक्तै र्दिव्य लावण्य युक्ताम्, जननि कनक वृष्टिं दक्षिणां ते ऽर्पयामि॥

आरार्तिकं- महतिकनकपात्रे स्थापयित्वा विशालान् डमरु सदृशरूपान् पक्व गोधूम् दीपान् ।
बहुधृतमय तेषुन्यस्त दीपान् प्रकृष्टान्, भुवनजननि कुर्वे नित्यमारार्तिकं ते॥
सविनयमथ दत्वा जानुयुग्मं धरण्याम्, सपदि शिरसि धृत्वा पात्रमारार्तिकस्य ।
मुखकमल समीपे तेऽम्ब सार्थ त्रिवारम्, भ्रमयति मयि भूयात् ते कृपार्द्रः कटाक्षः ॥

प्रदक्षिणा - पदे पदे या परिपूजकेभ्यः, भू सद्योऽश्व मेधादिफलं ददाति ।
तां सर्व पाप क्षय हेतु भूतां प्रदक्षिणां ते परितः करोमि ॥

विशेषार्घ - कलिङ्गकोशातक संयुतानि, जंबीर नारिंग समन्वितानि ।
सुनारिकेलानि सदाडिमानि, फलानि ते देवि समर्पयामि ॥

छत्रं समर्पयामि - मातः काञ्चन दण्ड मण्डित मिदं पूर्णेन्दु बिम्ब प्रभं नानारत्न विशोभि हेमकलशं लोकत्रयाह्लादकम् । भास्वन मौक्तिक जालिका परिवृतं प्रीत्यात्महस्ते धृतम्, छत्रं ते परिकल्पयामि शिरसि त्वष्ट्रा स्वयं निर्मितम् ॥

चामरंसमर्पयामि- शरदिन्दु मरीचि गौरवर्णैः, मणिमुक्ता विलसत् सुवर्ण दण्डैः ।
जगदम्ब विचित्र चामरैस्त्वाम्, अहमानन्दभरेण वीजयामि॥

दर्पणं समर्पयामि- मार्तण्डमण्डल निभो जगदंब योऽयम् भक्त्यामया मणिमयो मुकुरोऽर्पितस्ते ।
पूर्णेन्दु बिम्ब रुचिरं वदनं स्वकीयम् अस्मिन् विलोक्य विलोल विलोचने त्वम् ॥

अश्व समर्पयामि - प्रियगतिरति तुङ्गो रत्न पल्याण युक्तः, कनकमय विभूषः स्निग्ध गंभीर घोषः ।
भगवति कलितोय वाहनार्थं मयाते, तुरङ्ग शतसमेतो वायु वेगस्तुरङ्गः ॥

गज समर्पयामि - मधुकर वृत्तकुंभो न्यस्त सिन्दूर रेणुः, कनक कलित घण्टा किङ्किणी शोभि कण्ठः।
श्रवण युगल चञ्चच्चामरो मेघतुल्यो, जननि तव मुदे स्यान्मत्त मातङ्ग एषः ॥

रथ समर्पयामि - द्रुतम तुरगैर्विराजमानम्, मणिमय चक्र चतुष्टयेन युक्तमू ।
कनकमयममुं वितानवन्तम्, भगवति तेहि रथं समर्पयामिं ।

सैन्य नमः - हयगज रथपत्ति शोभमानं दिशिदिशि दुन्दुभि मेघनाद युक्तम् ।
अभिनव चतुरङ्ग सैन्यमेतत्, भगवति भक्ति - भरेण तेऽर्पयामि ॥

दुर्ग समर्पयामि - परिखी कृत सप्तसागरम्, बहु सम्पत् सहितं मयाम्ब ते विपुलम् ।
प्रबलं धरणी तलाभिधम् दृढ दुर्गमिदं निखिलं समर्पयामि ।

व्यञ्जन समर्पयामि -शतपत्र युतैः स्वभावशीतैः, अति सौरम्य युतैः परागपीतैः ।
भ्रमरी मुखरी कृतैरनन्तैः, व्यञ्जनैस्त्वां जगदंब वीजयामि ॥

नृत्यं समर्पयामि - भ्रमर विलुलित लोलकुन्तलाली, विगलतिमाल्य विकीर्ण रङ्गभूमिः ।
इयमति रुचिरा नटीनटन्ती, तव हृदये मुदमातनोतु मातः ॥१॥

रुचिर कुच तटीनां नाद्यकाले नटीनां प्रतिगृहमथ ते च प्रत्यहं प्रादुरासीत् ।
धिमिकि धिमिकि धिद्धि धिद्धि धिद्धीति धिद्धि, थिमिकि
थिमिकि तत्तत् थैपी थैपीति शब्द ॥२॥
डमरु डिण्डिम जर्झर झल्लरी, मृदुरवार्द्र घटार्द्र घटादय ।
झटिति झांकृत झांकृत झांकृतैः, बहुदयं हृदयं सुखयन्तु ते ॥३॥

इसके बाद ताम्रपात्र में दधि, लवण, सर्षप, दूर्वा, अक्षत् छोडें, देवी पर दृष्टिदोष का उत्तारन करें।

दृष्ट्या प्रदृष्ट्या खलुदृष्ट दोषान् संहर्तुमारात्मप्रथित प्रकाशा ।
जनो भवेदिन्द्रपदाय यौग्यस्तस्यै तवेदं लवणाक्षिदोषम् ॥

स्तुति- तव देवि गुणानुवर्णने चतुरानो चतुराननादयः ।
तदि हैक मुखेष जन्तुषु स्तवनं कस्तव कर्तुमीश्वरः ॥

प्रदक्षिणा- पदे पदे या परिपूजकेभ्यः सद्योऽश्व मेधादिफलं ददाति ।
तां सर्व पापं क्षय हेतुभृताम्, प्रदक्षिणां ते परितः करोमि ॥

प्रणाम सम. - रक्तोत्पला रक्ततल प्रभाभ्याम्, ध्वजोर्ध्व रेखा कुलिशाङ्किताभ्याम् ।
अशेष वृन्दारक वन्दिताभ्याम्, नमोभवानी पदपङ्कजाभ्याम् ॥

पुष्पाञ्जलि - चरण नलिन युग्मं पङ्कजैपूजयित्वा कनक कमल मालां कण्ठदेशेऽर्पयित्वा ।
शिरसि विनिहितोऽयं रत्नपुष्पाञ्जलिस्ते हृदयकमले मध्ये देवि हर्ष तनोतु ॥

भवन समर्पयामि - अथ मणिमय मञ्चकाभिरामे कनकमय वितान राजमाने ।
प्रसरदगरु धूपधूपितेऽस्मिन् भगवति भवने अस्तु ते निवासः ॥

पर्यङ्क समर्पयामि - एतस्मिन् मणिखचिते सुवर्णपीठे, त्रैलाक्याभय वरदो निधाय पादौ ।
विस्तीर्णे मृदुल तरोत्तरच्छदेऽस्मिन् पर्यङ्के कनकमये निषीद मातः ॥

अलक्तकं - तवदेवि सरोज चिह्नयोः पदयोर्निर्जित पद्मरागयोः ।
अति रक्त तरैरलक्तकैः पुनरुक्तां रचयामि रक्ताम् ॥

गण्डूष - अथमातरुशीरवासितं निजताम्बूल रसेन रंजितम् ।
तपनीय मये हि पट्टके, मुख गण्डूष जलं विधीयताम् ॥

सायंकालीन शयन प्रार्थना करें।

शयन प्रार्थना - क्षणमथ जगदम्ब जगदम्ब मञ्चकेऽस्मिन् मृदुत्तर तूलिकया विराजमाने ।
अति रहसि मुदा शिवेन सार्द्धम् सुख शयनं कुरु मां हृदिस्मरन्ती ॥

॥ ध्यानम् ॥

मुक्ताकुन्देन्दु गौरां मणिमय मुकुटां रत्नताटङ्क युक्ताम् ।
अक्षस्त्रक् पुष्प हस्तामभय वर करां चन्द्र चूडां त्रिनेत्राम् ।
नानालङ्कार युक्तां सुर मुकुटमणि मणिद्योतित स्वर्ण पीठाम् ।
सानन्दां सुप्रसन्नां त्रिभुवन जननीं चेतसा चिन्तयामि ।

॥ क्षमाप्रार्थना ॥

एषा भक्त्या तव विरचिता या मया देवि पूजा स्वीकृत्यैना सपदि सकलान् मेऽपराधान क्षमस्व ।
न्यूनं यत्तत् तव करुणया पूर्णतामेतु सद्यः सानन्दं मे हृदय पटले तेऽस्तु नित्यं निवासः ॥

॥ इति देवि राजोपचार पूजनम् ॥

॥ अथ दुर्गा दीपदान प्रयोगः॥

(नागोजीभट्ट मतेन्) चार अंगुल ऊंची एवं सौलह अंगुल चौड़ी चतुरस्त्र वेदी बनायें। विशेष प्रयोग हेतु सोलहमाषे की देवी की मूर्ति बनाये उसे कलश पर स्थापित करे। देवी के आगे चतुरस्त्र वेदी पर घटार्गल यंत्र या षट्कोण यंत्र पर दीप पात्र रखे। तेरह पात्रों में तेरहमुख वाले १३ दीप रखे यह उत्तम पक्ष है। एक पात्र में १३ दीपक रखें यह मध्यम पक्ष है। एक ही पात्र, एक ही में दीप में १३ वर्तिका से पूजन करे यह अधः पक्ष हैं। एक-एक दीप पात्र में ११-११ वर्त्तिका रखे तो १३ दीपपात्रों में कुल १४३ वर्तिका हुई। सर्वारिष्ट निवारण हेतु एवं दुर्गादेवता की प्रसन्नता हेतु दीपदान का संकल्प करे। प्रधान देवता की पूजन पश्चात् दुर्गासप्तशती का पाठ प्रारंभ करे। १३ दीपक एक साथ जलावे यह उत्तम पक्ष हैं। एक -एक अध्याय पर एक एक दीप जलाकर दीप पूजा करे यह मध्यम पक्ष है। प्रथम दीप में दुर्गासप्तशती के प्रथम अध्याय के देवता का आवाहन पूजन करे। दुर्गा के नव मंत्रों से पुष्पाक्षत समर्पण करे।

विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् । निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥१॥
एवं स्तुता तदा देवी तामसी तत्र वेधसा । विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ ॥२॥
स्तुतासुरैः पूर्वमभीष्ट संश्रयात्तथासुरेन्द्रेणदिनेषु सेविता
करोतु सा नः शुभहेतुरीश्वरीशुभानि भद्राण्यभिहन्तु चापदः॥३॥
या साम्प्रतंचौद्धतदैत्यतापितैरस्माभिरीशाच सुरैर्नमस्यते ।
याचस्मृता तत्क्षणमेव हन्ति नः सर्वापदो भक्तिविनम्रमूर्तिभिः॥४॥
सर्वाबाधा प्रशमनं त्रैलोक्यस्याखिलेश्वरि । एवमेव त्वया कार्यमस्मद्वैरि विनाशनम् ॥५॥
सर्वमङ्गलमांगल्ये शिवे सर्वार्थसाधिके ।शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तुते ॥६॥
सृष्टिस्थिति विनाशानां शक्तिभूते सनातनि । गुणाश्रये गुणमये नारायणि नमोऽस्तुते ॥७॥
शरणागत दीनार्तपरित्राण परायणे । सर्वस्यार्ति हरे देवि नारायणि नमोऽस्तुते ॥८॥
सर्वस्वरूपे सर्वेशे सर्वशक्ति समन्विते । भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तुते ॥९॥

शत्रुनाश हेतु- **सर्वाबाधाप्रशमनं अथवा एवमुक्त्वा समुत्पत्य साऽऽरूढा तं महासुरम्। पादेनाक्रम्य कण्ठे च शूलेनैनमताडयत्॥** मंत्र भी पढ़े।

विशेष अनुग्रह हेतु, धनप्राप्ति हेतु बिल्वदल, वश्यकाम हेतु करवीर पुष्प, पुत्रप्राप्ति हेतु जपाकुसुम, पुष्टि के लिये तुलसीदल (परन्तु दुर्गा के तुलसी अर्पण नहीं होती हैं तुलसीदल का अर्थ मंजरीदल समझना चाहियें) महाकार्य हेतु कमल का पुष्प अर्पण करते हुये नवश्लोक पढ़े प्रति श्लोक एक पुष्प अर्पण करे। नवश्लोकों से पुष्पार्चन करने के पश्चात् प्रथम अध्याय का पाठ प्रारम्भ करे। अध्याय समाप्ति पर पुष्प, धूप, दीप पायस नैवेद्य ताम्बूल अर्पण कर नीराजन करे।

एक ब्राह्मण, कुमारी व सुवासिनी को भोजन कराये या समयान्तरेण भोजयिष्ये का संकल्प करे। इस तरह प्रति अध्याय एक एक दीपक की नौ श्लोकों से पुष्पार्चन कर उस अध्याय के देवता का (अध्याय पहले जो ध्यान मंत्र हैं उसका ध्यान मंत्र से) पूजन करे। अध्याय समाप्ति पश्चात् पुनः दीपक का गंधाक्षत पुष्प धूप दीप नैवेद्य अर्पण कर नीराजन करे पश्चात् ब्राह्मण, कुमारी, सुवासिनी भोजन का संकल्प करे। इस तरह प्रति अध्याय करे। अंत में महाप्रसादादि अर्पण कर प्रधान देवता की पूजा पूर्वाह्न में समाप्त कर अपराह्न में विसर्जन करे। यह प्रयोग ११, २४ या ५० दिन करे। प्रयोग करते समय तदंग देवता का प्रति अध्याय तर्पण करते रहे तो श्रेष्ठ हैं।

॥ इति दुर्गादीपदान प्रयोगः ॥

॥ कामनानुसार दुर्गा पाठ के द्वादश क्रमभेद ॥

दुर्गा सप्तशती में तीन चरित्र है, इनको अलग-अलग क्रम से करने पर अलग-अलग कामना फल विशेष रूप से मिलता है। जो निम्न प्रकार हैं- (तंत्र ग्रंथ एवं निर्णय सिन्धु)

१. **महाविद्या क्रम** - प्रथम, मध्यम, उत्तर चरित्र - सर्वकामना हेतु।

२. **महातंत्री** - उत्तर, प्रथम, मध्यम चरित्र - शत्रुनाश, लक्ष्मी प्राप्ति हेतु।

३. **चण्डी** - उत्तर, मध्यम, प्रथम चरित्र - शत्रुनाश।

४. **महाचण्डी** - उत्तर, प्रथम, मध्यम चरित्र - शत्रुनाश, लक्ष्मी प्राप्ति हेतु।

५. **सप्तशती** - मध्यम, प्रथम, उत्तर चरित्र - लक्ष्मी व ज्ञान प्राप्ति एवं उत्कीलन।

६. **मृतसंजीवनी** - मध्यम, उत्तर, प्रथम चरित्र - आरोग्य लाभ।

७. **रूप दीपिका** - प्रथम, उत्तर, मध्यम चरित्र - विजय व आरोग्य । (**रूपं देहि जयं देहि** से संपुटित)

८. **निकुंभला** - मध्यम, प्रथम, उत्तर चरित्र - रक्षा हेतुः, विजय हेतु। (**शूलेन पाहि नो देवि** से संपुटित)

९. **योगिनी** - बालोपद्रव शमन। (प्रत्येक चरित्र से पहले सम्बधित योगनियों का पाठ एवं प्रत्येक मंत्र को व शं. षं. से सम्पुट)

१०. **विलोम (संहार क्रम)** - ७०१ वें श्लोक से प्रथम श्लोक तक विलोम क्रम से।

११. **अक्षरशः विलोम पाठ** - १३ वें अध्याय से प्रथम अध्याय तक काशी के पुराने विद्वानों के पास मिल सकती है व १०० - १२० वर्ष पहिले के छापी हुई है।

इसी तरह प्रत्येक चरित्र के पहिले भैरव नामावलि पाठ का विधान भी मिलता है। गढ़वाल क्षेत्र व अन्य सम्प्रदायों में हर अध्याय पहले भैरव नामावलि का पाठ करने का क्रम भी मिलता है।

कई विद्वान कहते है कि सप्तशती के बाहर के मंत्र का संपुट नहीं लग सकता, परन्तु योगिनी क्रम से यह साफ जाहिर है कि अन्य मंत्रों के संपुट लग सकते हैं।

स्वयं दतिया के स्वामीजी ने चीन के आक्रमण के समय बगलामुखी के संपुट से सहस्त्र चण्डी पाठ का आयोजन किया था।

दुर्गा सप्तशती के सभी दशमहाविद्याओं के मंत्र, गायत्री मंत्र, मृत्युञ्जय मंत्र, भागवत के मंत्रों का, वैदिक मंत्रों का व

अन्य कई मंत्रो का संपुट लगाया जा सकता है। दुर्गार्चनसृतिः, अनुष्ठान प्रकाश में दुर्गा के बाहर के मंत्रों के संपुट के विषय में लिखा हैं।

मेरे व्यक्तिगत अनुभव में सप्तशती क्रम (२, १, ३ चरित्रों के पाठ) से अधिक सफलता मिलती है। क्योंकि इस क्रम में पाठ का उत्कीलन भी हो जाता है।

स्वयं रावण भी निकुंभला का उपासक था वह भी सप्तशतीक्रम से पाठ "शूलेन पाहिनो पाहि" का संपुट लगाता था।

॥ १२. अथ सार्द्ध नवचण्डी प्रयोगः॥

नवसार्धं जपेद्यस्तु मुच्येत्प्राणान्तकाद्भयात् । राज्यं श्रीः सर्वसम्पत्तिः सर्वान् कामानवाप्नुयात् ॥१॥
प्रयोगोऽयं महागुह्यो देवानामपि दुर्लभः । तत्तेऽहं संप्रवक्ष्यामि सावधानाऽवधारय ॥२॥
मधुकैटभनाशं च महिषासुरघातनम् । शक्रादिस्तुतिरेवातोदेवीसूक्तं पुनस्तथा ॥३॥
नारायणी स्तुतिश्चैव फलानुकीर्तनं तथा । ततो वरप्रदानं तु ह्यर्ध पाठोऽय मुच्यते ॥४॥
अर्ध पाठस्त्वयं प्राक्तः सर्वकामफलप्रदः । अर्ध पाठेन रहितं नवपाठ फलं नहि ॥५॥

अत्रार्ध पाठे पंचमाध्याये देवा ऊचुः नमो देव्यै इत्यारभ्य ऋषिरुवाचेति पर्यन्तमिति। ब्राह्मणास्त्वत्रैकादश। तेषुनव ब्राह्मणाः पूर्ण त्रयोदशाध्याय पाठ कर्त्तारः एकोर्ध पाठ कर्ता। एकोयजुर्वेदीय षडंगाध्याय पाठकः एवमेकादश ब्राह्मणाः प्रयोग कर्त्तारः इति॥

अर्थात् दुर्गा अनुष्ठान में एकादश ब्राह्मणों का वरण करें तो नव ब्राह्मण दुर्गासप्तशती के सभी तेरह अध्यायों का पठन कर रहस्यादि पाठ करें एक ब्राह्मण यजुर्वेदीय रुद्राष्टाध्यायी का पाठ करें, एक ब्राह्मण दुर्गासप्तशती का अर्द्ध पाठ करें। अर्द्ध पाठ हेतु **कवच, अर्गला, कीलक, नवार्ण जप प्रथम चरित्र, मध्यम चरित्र के बाद पञ्चम अध्याय के देवाउचुः से प्रारंभ कर नमस्तस्यै स्तुति - या साम्प्रतम् चोद्धत्........** । तक करने के बाद **एकादश अध्याय** पूर्ण, **त्रयोदश अध्याय** से -**देव्युवाच .... सावर्णि भविता मनुः**। पर्यन्त (वर प्रदान स्तोत्र) पढ़ें। पुनः नवार्णमंत्र जप रहस्यादि कर पठन करें।

॥ दुर्गापाठे पाठवृद्धिक्रम विचार॥

वृद्धि पाठ क्रम ५ दिन का प्रयोग होता हैं। यह क्रम बिना संपुट क्रम के ही सुलभ हैं। पहले दिन एक, दूसरे दिन दो, तीसरे दिन तीन, चौथे दिन चार पाठ करने से १० पाठ चार दिन में प्रति ब्राह्मण द्वारा करने पर १० ब्राह्मणों द्वारा शतचण्डी विधान हुआ। एक मूल पाठ के साथ में १० माला नवार्ण की अलग से जपने का विधान हैं। ५ वें दिन दशांश होम करके कुमारी ब्राह्मणभोजन करायें।

॥ दुर्गा पाठे संपुट पाठ विधिः॥

पाठ मंत्र से आगे पीछे कामना मंत्र लगाने को संपुटीकरण कहते हैं। संपुट पाठ ३ प्रकार के होते हैं। **१. उदय संपुट २. अस्त संपुट ३. अर्द्धसंपुट।**

१. "**उदय संपुट**" में कामना मंत्र सप्तशतीपाठ मंत्र के आदि व अंत में लगाया जाता हैं।

२. "**अस्तसंपुट**" बीजमंत्र या कामना मंत्र पाठ के आदि में पढे फिर दुर्गापाठ मंत्र पढे पश्चात् अंत में कामना मंत्र विलोम

रूप से उच्चारण करे। यथा- **हौं जूंसः 'ऐं मार्कण्डेय उवाच' सः जूं हौं। ॐ भूर्भुवः स्वः तत्सवितुरेवण्यम्......प्रचोदयात् ''ऐं मार्कण्डेय उवाच'' द्यादचोप्र नः यो योधि...... स्वः भुवःभूः ॐ।**

३. ''**अर्द्ध संपुट**'' कामनामंत्र दुर्गापाठ मंत्र के आदि या अंत में केवल एक बार पढें। इसका फल न्यून हैं परन्तु विपरीत प्रभाव नहीं होता हैं।

४. तंत्र मार्ग के अनुसार व्याहृति व बीजाक्षर का संपुट प्रारंभ में लोम तथा कामना मंत्र इष्ट के बाद विलोम क्रम से होता है तथा इनकी आहुति भी एक ही होती है।

५. भिन्नपाद प्रयोग - मंत्र के चरण भेद मध्य में बीजमंत्र या अन्य मंत्र के संयोजन से मंत्र उपासना या दुर्गा उपासना कि जा सकती है। इस पद्धति से प्रयोग विधि स्वतंत्र पुस्तक में प्रकाशित की जायेगी।

॥ संपुटित पाठ होमे आहुति संख्या विचारः॥

संपुटित पाठ होम में किसी आचार्य का मत हैं ''**संपुटे हवनं नास्ति**'' के अनुसार ७०० होम आहुति होगी तो किसी आचार्य के अनुसार संपुट होम आहुति संख्या २१०० होगी। आचार्य मतों का अवलोकन करने के पश्चात मेरे स्वमत का अवलोकन अवश्य करे। मूल पाठ के साथ अलग से १० माला नवार्ण की पृथक् करे।

मार्कण्डेय पुराणोक्तं दशकृत्वः सुचेतसः। नवार्ण चण्डिका मंत्रं जपेयुश्चायुत पृथक्॥

अथ दुर्गा के १० पाठ के साथ पाठ का दशांश व मंत्र जाप का दशांश होम पृथक् पृथक् करे।

संपुट होम विषये दुर्गाकल्पद्रुमे प्रयोगसंग्रहोक्त कदाचित् संपुटैयुरक्त पठेत् सप्तशती स्तवम्। ससंपुटं पठेद्धोमे हुनेत् सप्तशताहुतीः॥ अथ संपुटित पाठ होमेऽपि आहुती संख्यां सप्तशतवत्याह।

कर्मठगुरु (प्र.सा.)- **सम्पुटे हवनं नास्ति प्रत्यहेऽपि तथैव च। नानार्थसिद्धिवैकल्पे होमन्तु विपुलं चरेत्।।**

अर्थात् संपुट का हवन नहीं करे परन्तु ऐसा बहुधा करते तो हैं। परन्तु **दुर्गाकल्पतरु** एवं **अनुष्ठान प्रकाश** में आहुति संख्या **२१००** स्पष्ट लिखी गई हैं। यथा-

होमकाले बीजसंयोगो दुर्गा मंत्रेण पृथक् हुनेत्। कामना बीज संयोगो दुर्गामंत्रेण संहुनेत् ॥१॥
दुर्गास्तवन मंत्राणां संख्यां सप्तशतं भवेत्। कामना मंत्र संख्या च शतं चैव चतुर्दश ॥२॥
मध्ये मंत्रान् सप्तशतं होमकाले तु योजयेत्। पाठे मंत्रं पुटं वाच्यं होम मंत्राः पृथक् पृथक् ॥३॥
होमसंख्या च मंत्राणां शतं वै चैकविंशतिः। पाठे बीज पुटं वाच्यं होमे बीज पुटं हुनेत् ॥४॥

स्वमतानुसारेणः- दुर्गापाठ मंत्र को अगर किसी **ऐं ह्रीं, श्रीं,** या किसी बीज मंत्र से पुटित किया जाता हैं तो पुटित कामना मंत्र के अलग होम की आवश्यकता नहीं हैं। बीज मंत्र एकाक्षरी हो या ५-७ बीजाक्षर होवे तो एक ही आहुति होगी। अत: ७०० आहुति देवे। **अस्त संपुट** में एक ही आहुति होगी क्यों कि इसमें अंत में **कामना मंत्र** या **बीजाक्षर** विलोम होगा। व्याहृति व बीजाक्षरों का संपुट मंत्र के आदि व अंत में लोम विलोम ही लगता है अत: विलोमाक्षर पृथक् होम नहीं करने पर केवल ७०० आहुति देवे। मारणादि मंत्रों में लोम कामना मंत्र फिर दुर्गा मंत्र फिर विलोमाक्षर कामना मंत्र की आहुति देने पर २१०० आहुति देवे।

प्राय: **उदय संपुट** पाठ ही करते हैं अर्थात् दुर्गा मंत्र के आदि-अंत में कामना मंत्र लोम ही लगाते हैं अत: २१०० आहुति देवे।

॥ कामना सिद्धि परत्वेन संपुटा मंत्राः॥

कामनासिद्धि सप्तशती के श्लोक, गायत्री, दशमहाविद्या, बटुक, मृत्युञ्जय, दधिवामन, नृसिंह व पंचओंकार देवताओं के मंत्र तथा पुराणोक्त मंत्रों के संपुट से तत्कामना सिद्धि प्राप्त होती है।

सप्तव्याहृतिपूर्वकं श्लोकं कृत्वा महास्तोत्रं जपेन्मन्त्रसिद्धिः ॥१॥ अन्यच्च : **सव्याहृतिकां गायत्रीमादावन्ते वा कृत्वा श्लोकं जपेत् तदा महाफलम्** ॥२॥ अन्यच्च : **प्रतिश्लोकं व्याहृतित्रययुतां गायत्रीं जपेत् तदा महाफलम्** ॥३॥ अनयच्च : **प्रतिश्लोकमादावन्ते ''जातवेदसे सुनवास सोममरातीयतो निदहाति वेदः। स नः पर्षदतिदुर्गाणि विश्वानावेव सिन्धुं दुरितान्यग्निः'' इति ऋचं जपेत्। सर्वकामसिद्धि** ॥४॥

अन्यच्च : **ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। जातवेदसे सुनवास सोममरातीयतो निदहाति वेदः। स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः। ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्धनम्। ऊर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्। इति शताक्षरत्र्यम्बकमन्त्रेण सम्पुटीकृत्य मन्त्रं पठेत्। रोगारिक्षयमृत्यून्मूलनं सर्वापद्विनिवारणमभीप्सितप्राप्तिः** ॥५॥

अन्यच्च : प्रतिश्लोकं **शरणागतदीनार्तपरित्राणपरायणे। सर्वस्यार्त्तिहरे देवि नारायणि नमोस्तु ते।** इति श्लोकं पठेत्। सर्वकार्यसिद्धिः ॥६॥ अन्यच्च : प्रतिश्लोकं **करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहन्तु चापदः। इत्यर्धं पठेत् सर्वकामाप्तिः** ॥७॥ अन्यच्च : प्रतिश्लोकम्। **एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः। सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः।** इत्याद्यन्तं पठेत् स्वाभीष्टवरप्राप्तिः ॥८॥ अन्यच्च : **दुर्गे स्मृता हरसि भीतिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि। दारिद्र्यदुःखभयहारिणी का त्वदन्या सर्वोपकारकरणाय सदार्द्रचिता।** इति श्लोकं प्रति श्लोकाद्यन्तं पठेत्। **सर्वापत्तिनिवारणं स्यात्** ॥९॥ अन्यच्च : **ॐ कांसोस्मि तां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्। पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम्।** इति ऋचं प्रतिश्लोकाद्यन्तं पठेत्। **लक्ष्मीप्राप्तिः** ॥१०॥

अन्यच्च : **ॐ मनृणा इत्यादि ऋचं** प्रतिश्लोकाद्यन्तं पठेत्। **ऋणपरिहारः** ॥११॥ अन्यच्च : **ॐ शब्दात्मिका सुविमलर्ग्यजुषां निधानमुद्गीथरम्य पदपाठवतां च साम्नाम्। देवि त्रयी भगवती भवभावनाय वार्ता च सर्वजगतां परमार्तिहन्त्री।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत्। **सुखप्राप्तौ दारिद्रदुःखभयमोचने च** ॥१२॥ अन्यच्च : **सर्वबाधाविनिर्मुक्तो धनधान्यसुतान्वितः। मनुष्यो मत्प्रसादेन भविष्यति न संशयः।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत्। **धनधान्यसुखप्राप्तिः** ॥१३॥ अन्यच्च : **या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत्। **मनउत्सवप्राप्तिः** ॥१४॥

अन्यच्च : **ॐ धर्म्याणि देवि सकलानि सदैव कर्माण्यत्यादृतः प्रतिदिनं सुकृती करोति। स्वर्गं प्रयाति च ततो भवतीप्रसादाल्लोकत्रयेपि फलदा ननु देवि तेन।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत्। **सकलकर्मसुकृतप्राप्तिः** ॥१५॥ अनयच्च : **ॐ त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा। विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत्। **सर्वकार्यसिद्धिः**॥१६॥ अन्यच्च : **ॐ देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोखिलस्य। प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत्। **सर्वापन्निवृत्तिः। सर्वकामाप्तिश्च। एषु प्रयोगेषु प्रतिश्लोकं। दीपाग्रे नमस्कारकरणे अतिशीघ्रं सिद्धिः** ॥१७॥ अन्यच्च : **ॐ रोगानशेषानपहन्सि तुष्टा रुष्टा तु कामान्सकलानभीष्टान्। त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत्। **सकलरोगनाशः स्यात्** ॥१८॥ अन्यच्च : **उपसर्गानशेषांस्तु महामारीसमुद्भवान्। तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत्। **सर्वबाधानाशः स्यात्** ॥१९॥ अन्यच्च : **मेधासि देवि**

विदिताखिलशास्त्रसारा दुर्गासि दुर्गभवसागरनौरसङ्गा। श्रीः कैटभारिहृदयैककृताधिवासा गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा। इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत्। **वाक्सिद्धिः** ॥२०॥

अन्यच्च **स्तवने : ॐ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके। शरण्ये त्र्यम्बके गौरि नारायणि नमोस्तु ते।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत् ॥२१॥ अन्यच्च : **(भयमोचने) ॐ ज्वालाकरालमत्युग्रमशेषासुरसूदनम्। त्रिशूलं पातु नो भीतेर्भद्रकालि नमोस्तु ते।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत् ॥२२॥

अन्यच्च : **दुः स्वप्नपीडापरिहारे शान्तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने। ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत् ॥२३॥ अन्यच्च : **(परप्रयोगशमने) ततो निशुंभं सम्प्राप्य चेतनामात्तकार्मुकः। आजघान शरैर्देवीं कालीं केसरिणं तथा।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत् ॥२४॥

अन्यच्च : **(अपद्वेषनाशने) तयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः। भवतां नाशयिष्यामि तत्क्षणात्परमापदः।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत् ॥२५॥ अन्यच्च : **(मारणार्थे) ॐ एवमुक्त्वा समुत्पत्त्य सारूढा तं महाऽसुरम्। पादेनाक्रम्य कण्ठे च शूलेनैनमताडयत्।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत् ॥२६॥ अन्यच्च : **(शत्रुपरिहारे) त्रैलोक्यमेतदखिलं रिपुनाशनेन त्रातं त्वया समरमूर्धनि तेपि हत्वा। नीता दिवं रिपुगणा भयमप्यपास्तमस्माकमुन्मदसुरारिभवं नमस्ते।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत् ॥२७॥ अन्यच्च : **(शत्रुपराभवार्थे) ॐ या देवीसर्वभूतेषु क्षान्तिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः** ॥२८॥ अन्यच्च : **सर्वाबाधासु घोरासु वेदनाभ्यर्दितोऽपिवा (सर्वबाधानाशने) स्मरन्ममेतच्चरितं नरो मुच्येत सङ्कटात्।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत् ॥२९॥

अन्यच्च : **(विषमचित्तशमने) पुनरप्यतिरौद्रेण रूपेण पृथिवीतले। अवतीर्य हनिष्यामि वैप्रचित्तांस्तु दानवान्।** इति श्लोकं प्रतिश्लोकाद्यान्तं पठेत् ॥३०॥ अन्यच्च : **ॐ ज्ञानिनामपि चेतांसि देवी भगवती हि सा। बलादाकृष्य मोहाय महामाया प्रयच्छति।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत्त्ववश्यं मोहनं च इत्यनुभवसिद्धम् ॥३१॥ अन्यच्च : **ॐ रक्तचामुण्डे तुरु तुरु अमुकं मे वशमानय स्वाहा। अनेन प्रत्यध्यायमाद्यन्तयोः पूजा सर्वान्ते अयुतं जपाः अयुतमन्त्रैश्च होमयेत् कटुतैलेन रक्तचन्दनराजिकासहस्राहुतिमन्त्रेण राजानं वशमानयेत्। मधुनाशोक पुष्पैश्च रात्रौ हुत्वा तु पूर्ववत्। चक्रवर्ती भवेद्वश्यश्चण्डीमन्त्रप्रभावतः। अन्ते शतं ब्राह्मणाः कुमार्यश्च भोजनीयाः** ॥३२॥ अन्यच्च : **(राजवश्ये) तत्किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि। ममास्य च भवत्येषा विवेकान्धस्य मूढता।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत् ॥३३॥

अन्यच्च : **(दुर्जनमोहने) ॐ सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता। मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत् ॥३४॥ अन्यच्च : **(वैरिमोहने)ॐ सैषा प्रसन्ना वरदा नृणां भवति मुक्तये। सा विद्या परमा मुक्तेर्हेतुभूता सनातनी।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत् ॥३५॥ अन्यच्च : **ॐ मम वैरिवशं यातः कान्भोगानुपलप्स्यते। ये ममानुगता नित्यं प्रसादधनभोजनैः।** इति श्लोक प्रतिश्लोकंसम्पुटिते श्लोकोक्तं फलम् ॥३६॥ अन्यच्च : **ॐ इत्युक्ता सा तदा देवी गम्भीरान्तः स्मिता जगौ। दुर्गा भगवती भद्रा ययेदंधार्यते जगत्। इति प्रतिश्लोकपाठे विद्याप्राप्तिः वाग्वैकृतनाशश्च** ॥३७॥ अन्यच्च : **(मनोप्सितप्राप्त्यै गतप्रयोगप्राप्त्यै च।) परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चण्डिका। इत्यर्धं पठेत्** ॥३८॥ अन्यच्च : **(देवीसन्तोषप्राप्त्यै) स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन्। तौ तस्मिन्पुलिने देव्याः कृत्वा मूर्तिं महीमयीम्।** इति पठेत् ॥३९॥

अन्यच्च : **प्रतिमन्त्रं प्रणवम् (ॐ) पुटितं जपेत् शीघ्रतर कार्यसिद्धिः अत्र त्रिमध्वाक्तकमलैर्होमः। अत्र विप्रतीर्थतोयैर्वा ब्राह्मणभोजनान्ते मार्जनं कुर्यात्** ॥४०॥ अन्यच्च : **माया (ह्रीं) श्री (श्रीं) (क्लीं) पुटिते**

सर्वेष्ट सिद्धिः ॥४१॥ अन्यच्च : प्रतिश्लोकं कामबीज (क्लीं) सम्पुटितस्यैकचत्वारिंशद्दिनानि त्रिरावृतौ पुत्रप्राप्तिः एकविंशतिदिनपर्यन्तमुक्तरीत्या प्रत्यहं पञ्चावृत्त्या वशीकरणम्। आकर्षणार्थे द्विचत्वारिंशद्दिनपर्यन्तं कामपुटितस्य दशावृत्तिः ॥४२॥ अन्यच्च : माया बीज (ह्रीं) पुटितस्य फट् पल्लवसहिस्य त्रिसप्तदिनपर्यन्तं त्रयोदशावृत्तौ उच्चाटनसिद्धिः तादृशस्यैव चतुश्चत्वारिंशद्दिनपर्यन्तं सर्वोपद्रवनाशः स्यात् ॥४३॥ अन्यदेकोनपञ्चाशद्दिनपर्यन्तं प्रतिश्लोकम् (श्रीं) इति श्रीबीजसम्पुटितस्य पञ्चदशावृतौ लक्ष्मीप्राप्तिः सद्यो मोहनसिद्धिश्च ॥४४॥ अन्यत् प्रतिश्लोकम् (मैं) बीजसम्पुटितस्यशतावृत्त्या विद्याप्राप्तिः ॥४५॥

अन्यच्च : मायादौ कूर्चबीजेन सम्पुटितस्य एकादशवृत्तौ। सर्वोपद्रवनाशः स्यात् ॥४६॥ कार्यपरत्वेन सप्तशतीस्तोत्रान्तर्गतप्रति श्लोकप्रयोगेणाहः ॐ दुर्गे स्मृता हरसि भीतिमशेषजन्तोः स्वस्थैः स्मृतामतिमतीव शुभां ददासि। दारिद्र्यदुःखभयहारिणी का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता। अस्य केवलस्यापि श्लोकस्य कार्यानुसारेण लक्षमयुतं सहस्त्रं शतं वा जपाः सर्वापत्तिनिवारणं स्यात् ॥१॥ अन्यच्च : ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि। अत्रैव च निजं राज्यं हतशत्रुबलं बलात्। इति मन्त्रस्य लक्षजपे पुनः स्वराज्यप्राप्तिः ॥२॥

अन्यच्च : ॐ दुर्गे स्मृता हरसि भीतिमशेष जन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि। यदन्ति यच्च दूरके भयं विन्दति मामिह। पवमानवितज्जहि। दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता। इति कार्यानुसारेण लक्षमयुतं सहस्त्रं शतं वा जपः सर्वापत्तिनिवारणः त्यात् ॥३॥ अन्यच्च : ॐ भगवत्या कृतं सर्वं न किञ्चिदवशिष्यते। यदयं निहतः शत्रुरस्माकं महिषासुरः। यदि चापि वरो देयस्त्वयास्माकं महेश्वरि। संस्मृतासंस्मृता त्वं नो हिंसेथाः परमापदः। यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने। तस्य वित्तर्धिविभवैर्धन दारादिसम्पदाम्। वृद्धयेस्मत्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके। इति द्वादशोत्तरशताक्षरो मन्त्रः सर्वकामदः सर्वापन्निवारणश्च ॥४॥

अन्यच्च : ॐ देवि प्रपन्नार्तिहरे प्रसीद मातर्जगतोखिलस्य। प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य। इति श्लोकस्य यथाकार्यं लक्षायुतसहस्त्रशतान्यतमे जपे सर्वापन्निवृत्तिः सर्वकामाप्तिश्च। इति श्लोकेन दीपाग्रे केवलमेव नमस्कारकरणे अतिशीघ्रं सिद्धिः ॥५॥ अन्यच्च : ॐ इत्थं निशम्य देवानां वचांसि मधुसूदनः। चकार कोपं शम्भुश्च भ्रुकुटीकुटिलाननौ। इति श्लोकं त्रिंशत्सहस्त्रं जपेत्। सम्पत्समृद्धिर्भवति ॥६॥ अन्यच्च : ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः। नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्। इति मन्त्रेण मासं जपः दशांशेन क्षीरसंयुतैः कमलैर्होमो वा लक्ष्मीप्राप्तिः ॥७॥ अन्यच्च : ॐ रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान्सकलान भीष्टान्। त्वामाश्रितानां न विपन्नरणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति। इति लक्षं जपेत् रोगनाशः स्यात् ॥८॥

अन्यच्च : इत्युक्ता सा तदा देवी गम्भीरान्तः स्मिता जगौ। दुर्गा भगवती भद्रा ययेदं धार्यते जगत्। इति लक्षं जपेत् विद्याप्राप्तिः वाग्वैकृतनाशश्च ॥९॥ अन्यच्च : ॐ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत्। सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिव। इत्यनेन सदीपबलिदानं घण्टाबन्धनेन बालग्रहशान्तिः ॥१०॥ अन्यच्च : ॐ इत्थं यदायदा बाधा दानवोत्था भविष्यति। तदातदाऽवतीर्याहं करिष्याम्यरिसंक्षयम्। इति श्लोकस्य लक्षजपे महामारीशान्तिः ॥११॥ अन्यच्च : ॐ सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि। एवमेव त्वया कार्यमस्मद्वैरिविनाशनम्। इत्यस्य लक्षजपे श्लोकोक्तं फलं सर्वबाधाशमनं च ॥१२॥ अन्यच्च : ॐ एवमुक्त्वा समुपात्य सा रूढा तं महासुरम्। पादेनाक्रम्य कण्ठे च शूलनैनमताडयत्। इति लक्षं जपेत् मारणोक्तावृत्तिभिः फलसिद्धिः ॥१३॥ अन्यच्च : ॐ ज्ञानिनामपि चेतांसि देवी भगवती हि सा। बलादाकृष्य मोहाय महामाया प्रयच्छति। इति श्लोक जपमात्रेण सद्यो मोहनमित्यनुभव सिद्धम् ॥१४॥ इति। बालग्रह शांति एवं शत्रु से मैत्री हेतु – बालग्रहाभिभूतानां बालानां शांतिकारकम्।

संघातभेदे च नृणां मैत्रीकरणमुत्तमम् ॥१५॥ प्रेतदोषनाशार्थे – **दुर्वृत्तानामशेषाणां बलहानिकरं परम्। रक्षोभूतपिशाचानां पठनादेव नाशनम् ॥१६॥** मारण प्रयोग – **तीसरे अध्याय का चालीसवाँ श्लोक (एवमुक्त्वा ... ताडयत्)**

कामना सिद्धि हेतु दुर्गासप्तशती के कुछ मुख्य मंत्रों का संपुट हेतु उल्लेख हैं। दुर्गास्तोत्र के अलावा बाह्य मंत्रों को भी प्रयोग में लाया जा सकता हैं। गायत्री मंत्र, मृत्युंजय मंत्र, दशमहाविद्याओं के मंत्र, भैरवादि के मंत्रों का श्रीसूक्त की ऋचाओं का, श्रीमद्भागवत के कुछ श्लोक का भी संपुट लगाया जा सकता हैं कुछ प्रयोग मेरे स्वयं के अनुभूत हैं।

१. शत्रुस्तंभनेः– ॐ ह्लीं बगलामुखी सर्वदुष्टानां वाचं मुखं पदं स्तंभय जिह्वां कीलय बुद्धिं विनाशय ह्लीं ॐ स्वाहा।

२. लक्ष्मीप्राप्तिः– श्रीं ह्रीं ऐं भगवति बगले मे श्रियं देहि देहि स्वाहा।

३. रोगशत्रु एवं अभिचार दमन तथा लक्ष्मी प्राप्ति हेतुः– **श्रीं ह्रीं ऐं क्लीं श्री बगलानने ममरिपून् नाशय नाशय ममैश्वर्याणि देहि देहि शीघ्रं मनोवांछितं कार्यं साधय साधय ह्रीं श्रीं स्वाहा।** इस मंत्र का प्रयोग जहां कहीं राजकीय बाधा, ग्रहबाधा या प्रेतबाधा के कारण कोई व्यापार बंद की स्थिति में भी पहुँच गया हो वहां मैंने किया है लाभप्राप्त हुआ है सफलता मिली है।

४. सद्यलक्ष्मीप्राप्ति :– ततश्चाऽविरभूत् साक्षच्छ्री (साक्षात् श्री) रमा भगवत् परा। रञ्जयंती दिशः कान्त्याः विद्युत् सौदामिनी यथा ॥ इस मंत्र को बगलामुखी भक्तमंदार मंत्र से पुटित करने से जो मंत्र बनता हैं उससे संपुटित कर पाठ करने पर दयनीय स्थिति व असंभव स्थिति में भी द्रव्य लाभ होता हैं। ऐसा मेरा प्रयोगिक अनुभव हैं। मंत्रो यथा–

५. सर्वसिद्धि एवं लक्ष्मीप्राप्तिः– श्रीं ह्रीं ऐं भगवति बगले ततश्चाविरभूत् साक्षाच्छ्री रमा भगवत् परा। रञ्जयन्ती दिशः कान्त्याः विद्युत् सौदामिनी यथा मे श्रियं देहि देहि स्वाहा ॥ इस मंत्र से शत्रु, विघ्न, उपद्रव नष्ट होकर धन प्राप्ति होती हैं, ऐसा मेरा अनुभव हैं।

६. लक्ष्मीप्राप्ति व स्वर्णलाभ हेतुः– ॐ ऐं ह्रीं श्रीं आपदुद्धारणाय ह्रां ह्रीं ह्रूं अजामिल बद्धाय लोकेश्वराय स्वर्णाकर्षणभैरवाय मम दारिद्र्यं विद्वेषणाय महाभैरवाय नमः श्रीं ह्रीं ऐं।

॥ नित्यचण्डी विधानम् ॥

स्नान शुद्धि कर पूजागृह में प्रवेश करे। द्वार देहली का पूजन करे। स्थान की पूजा करे। चंदनादि से युक्त हो पवित्रीकरण कर गुरु का ध्यान करे। आसन पूजा कर गणपति स्मरण कर संकल्प करे। दिग्रक्षण करे। वरुण, दीप, गणेश, मातृका नवग्रहों का यथोपचार पूजन कर प्रधान देवता की पूजा कर दुर्गापाठ करे। दुर्गासप्तशति पाठ का संकल्प करे। कवच, अर्गला, कीलक कर रात्रि सूक्त का पाठ करे। नवार्ण जप के पहले कुञ्जिका स्तोत्र का पाठ करे। क्योंकि यह मंत्र जाग्रति हेतु हैं।

पश्चात् तीनों चरित्रों का पाठ कर नवार्ण मंत्र का जप करे, फिर देवी सूक्त व रहस्य त्रय का पाठकर क्षमा प्रार्थना कर जप पाठ फल भगवती के वाम हस्त में समर्पण करे। मासान्त में होमादि विधान करें। आर्षविधि में तो तीनों चरित्रों के पाठ के पहिले कवच, अर्गला, कीलक तथा तीनों रहस्य ये छः अंग कहे हैं। दुर्गापाठ के आदि अंत में नवार्ण जप करना चाहिये रात्रि सूक्त देवी सूक्त बाद के आचार्यों ने जोड़ा हैं। देव्यथर्वशीर्ष से देवी का स्नान अभिषेक करे, अथर्वशीर्ष का पाठ नूतन प्रतिमा की प्रतिष्ठा समय करे, प्रातःकाल उठते समय व शाम को करे। आजकल दुर्गापुस्तक में कई स्तोत्र जोड़ दिये हैं सो साधक उनको भी जरुरी समझ कर करते हैं। सप्तश्लोकी दुर्गा, १०८, ३० नामावलि व अन्यस्तोत्र तो

अधिकस्य अधिक फलं के आधार पर हैं। **बलिकर्म** वार, तिथि, पक्ष आधार पर करें। १०० पाठ होने के बाद हवन कर्म, कुमारी पूजन, बटुक पूजन करें।

॥ शतचण्डी, सहस्रचण्डीश्चलक्षचण्डी विधानम् ॥

शतचण्डी विधान व सहस्रचण्डी व लक्षचण्डी विधान हेतु पहले यजमान से हेमाद्रि संकल्प व पापघट दान तथा दशविध स्नान कराये। कुऐ या तीर्थ से वरुण योगिनी पूजन कर जल कलश यात्रा कराये मार्ग में भैरव बलि देवे। यज्ञहवन वेदी व पूजास्थल पर यज्ञमण्डप की द्वारशाखा के पास तथा १० दिशाओं में एवं देवतओं के भद्रमण्डलों के पास तथा प्रत्येक कुण्डों के पास कुंभ रखे। गणेशमातृका, वास्तु, योगिनीक्षेत्रपाल, नवग्रह एवं प्रधानवेदी अवश्य बनाये। यज्ञमण्डप एक-पांच व नवकुण्डों के परिमाप का बनाये। १०००० से अधिक मंत्र होम में वास्तु पूजन अवश्य करे। दुर्गापाठ पठन हेतु अन्य मण्डप बनाये, नित्य दशांश होम की व्यवस्था करे। पठन के ब्राह्मण एवं होम के लिये ऋत्वकों का वरण कर आचार्य ब्रह्मा का वरण करे। यज्ञीय विधान से द्वारपाल बलि देकर अग्निस्थापन कर होमकार्य प्रारंभ कराये। पूर्णाहुति पश्चात् कुमारी, वटुक, सुहासिनी व ब्राह्मण भोजन कराये यथा यथा विभाग दक्षिणा देकर आशीर्वाद ग्रहण करे। ब्राह्मण यजमान का अभिषेक करे, आशीर्वचन कहे व रक्षासूत्र बांधे आशिका प्रदान करें।

ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। अधस्ताद्दिशि वासुकिर्देवता कूमारूढः पद्महस्तो वास्तुकिः बध्नातु वासुकिमण्डलं वासुकिः सहपरिवारो देवताप्रत्यधिदेवता सहितं वासुकिमण्डलं प्रत्यक्षं बन्ध बन्ध मम सपरिवारकस्य सर्वतो मां रक्ष रक्ष अचलमचलमाक्रम्याक्रम्य महावज्रकवचायास्त्राय राजचौरसर्पसिंह० याघ्राग्नि मम सर्वोपद्रवनाशनाय। ॐ ह्रां ह्रीं ह्रूं श्रीं क्लीं क्लुं प्रों आं ह्रीं क्रौं हुंफट् स्वाहा ॥१०॥ ॐ नमो अस्तु सर्पेभ्यो० ॥१॥ वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः। रोहन्तु सर्वबीजान्यव ब्रह्मद्विषो जहि अव ब्रह्मद्विषो जहि ॥२॥

ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। अवान्तरस्यां दिशि विष्णुर्देवता गरुडारूढः श्यामवर्ण

श्चक्रहस्तो विष्णुर्बध्नातु विष्णुमण्डलं विष्णुः सहपरिवारो देवताप्रत्यधिदेवतासहितं विष्णुमण्डलं प्रत्यक्षं बन्ध बन्ध मम सपरिवार कस्य सर्वतो मां रक्ष रक्ष अचलमचलमाक्रम्याक्रम्य महावज्रकवचायास्त्राय राजचौरसर्पसिंह व्याघ्राग्निमम सर्वोपद्रवनाशनाय। ॐ ह्रां ह्रीं ह्रूं श्रीं क्लीं क्लुं प्रों आं ह्रीं क्रौं हुंफट् स्वाहा ॥११॥ ॐ इदं विष्णुर्विचक्रमे० ॥१॥ वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः। रोहन्तु सर्वबीजान्यव ब्रह्मद्विषो जहि अव ब्रह्मद्विषो जहि ॥२॥

ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रूद्राय। प्राच्यां दिशि इन्द्रः सहपरिवारो देवताप्रत्यधिदेवतास्तद्दिक्षु त्रिशूलको नाम राक्षसः शाकिनी डाकिनी काकिनी हाकिनी याकिनी राकिनी वैतालकामिनीग्रहान् बन्धयामि मम सपरिवारकस्य सर्वतो मां रक्ष रक्ष अचलमचलमाक्रम्याक्रम्य महावज्रकवचायास्त्राय राजचौरसर्पसिंहव्याघ्राग्निमम सर्वोपद्रवनाशनाय। ॐ ह्रां ह्रीं ह्रूं श्रीं क्लीं क्लुं प्रों आं ह्रीं क्रौं हुंफट् स्वाहा ॥१॥ ॐ वर्षन्तु ते० बीजान्यव ब्रह्मद्विषो जहि ॥२॥

ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। आग्नेय्यां दिशि अग्निः सहपरिवारो देवताप्रत्यधिदेवता स्तुद्दिक्षु मारीचको नाम राक्षसस्तस्य अष्टादशकोटि भूतप्रेत पिशाच ब्रह्मराक्षस शाकिनी डाकिनी काकिनी हाकिनी याकिनी वैताल कामिनी ग्रहान् बन्धयामि मम सहपरिवारकस्य सर्वतो मां रक्ष रक्ष अचलमचलमाक्रम्याक्रम्य महावज्रकवचायास्त्राय राजचौरसर्पसिंहव्याघ्राग्नि मम सर्वोपद्रवनाशनाय। ॐ ह्रां ह्रीं ह्रूं श्रीं क्लीं क्लुं प्रों आं ह्रीं क्रौं हुंफट् स्वाहा ॥२॥ ॐ वर्षन्तु ते० द्विषो जहि ॥२॥

ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। याम्यां दिशि यमः सहपरिवारो देवताप्रत्यधिदेवतास्तद्दिक्षु एकपिङ्गलको नाम राक्षसस्तस्य अष्टादशकोटिभूतप्रेतपिशाच ब्रह्मराक्षस शाकिनी डाकिनी काकिनी हाकिनी राकिनी याकिनी वैताल कामिनीग्रहान् बन्धयामि मम सपरिवारकस्य सर्वतो मां रक्ष रक्ष अचलमचलमाक्रम्याक्रम्य महा वज्रकवचायास्त्राय राजचौरसर्पसिंहव्याघ्राग्नि मम सर्वोपद्रवनाशनाय। ॐ ह्रां ह्रीं ह्रूं श्रीं क्लीं क्लुं प्रों आं ह्रीं क्रौं हुंफट् स्वाहा ॥१॥ ॐ वर्षन्तु ते० बीजान्यव ब्रह्मद्विषो जहि ॥२॥

ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। नैर्ऋत्यां दिशि निर्ऋतिःसह परिवारो देवताप्रत्यधिदेवता स्तुद्दिक्षु सत्यको नाम राक्षसस्तस्य अष्टादशकोटि भूतप्रेतपिशाच ब्रह्मराक्षस शाकिनी डाकिनी काकिनी हाकिनी राकिनी याकिनी वैताल कामिनी ग्रहान् बन्धयामि मम सपरिवारकस्य सर्वतो मां रक्ष रक्ष अचलमचलमाक्रम्याक्रम्य महा वज्रकवचायास्त्राय राजचौरसर्पसिंहव्याघ्राग्नि मम सर्वोपद्रवनाशनाय। ॐ ह्रां ह्रीं ह्रूं श्रीं क्लीं क्लुं प्रों आं ह्रीं क्रौं हुंफट् स्वाहा ॥४॥ ॐ वर्षन्तु ते० द्विषो जहि ॥२॥

ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। प्रतीच्यां दिशि वरुणः सहपरिवारो देवताप्रत्यधिदेवता स्तुद्दिक्षु लम्बको नाम राक्षसस्तस्याष्टादशकोटिभूत प्रेतपिशाच ब्रह्मराक्षस शाकिनी डाकिनी काकिनी हाकिनी राकिनी याकिनी वैताल कामिनी ग्रहान् बन्धयामि मम सपरिवारकस्य सर्वतो मां रक्ष रक्ष अचलमचलमाक्रम्याक्रम्य महावज्रकवचायास्त्राय राजचौरसर्पसिंहव्याघ्राग्नि मम सर्वोपद्रव नाशनाय। ॐ ह्रां ह्रीं ह्रूं श्रीं क्लीं क्लुं प्रों आं ह्रीं क्रौं हुंफट् स्वाहा ॥५॥ ॐ वर्षन्तु ते० द्विषो जहि ॥२॥

ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। वायव्यां दिशि वायुः सहपरिवारो देवताप्रत्यधिदेवता स्तुद्दिक्षु प्रलम्बको नाम राक्षसस्तस्याष्टादशकोटिभूत प्रेतपिशाच ब्रह्मराक्षस शाकिनी डाकिनी काकिनी हाकिनी राकिनी याकिनी वैताल कामिनी ग्रहान् बन्धयामि मम सपरिवारकस्य सर्वतो मां रक्ष रक्ष अचलमचलमाक्रम्याक्रम्य महावज्रकवचायास्त्राय राजचौरसर्पसिंहव्याघ्राग्नि मम सर्वोपद्रवनाशनाय। ॐ ह्रां ह्रीं ह्रूं श्रीं क्लीं क्लुं प्रों आं ह्रीं

क्रौं हुंफट् स्वाहा ॥६॥ ॐ वर्षन्तु ते० द्विषो जहि ॥२॥

ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। कौबेर्यां दिशि कुबेरः सहपरिवारो देवताप्रत्यधिदेवता स्तुद्दिक्षु अश्वालको नाम राक्षसस्तस्याष्टादशकोटिभूत प्रेतपिशाच ब्रह्मराक्षस शाकिनी डाकिनी काकिनी हाकिनी राकिनी याकिनी वैताल कामिनी ग्रहान् बन्धयामि मम सपरिवारकस्य सर्वतो मां रक्ष रक्ष अचलमचलमाक्रम्याक्रम्य महावज्रकवचायास्त्राय राजचौरसर्पसिंहव्याघ्राग्निमम सर्वोपद्रवनाशनाय। ॐ ह्रां ह्रीं ह्रूं श्रीं क्लीं क्लुं प्रों आं ह्रीं क्रौं हुंफट् स्वाहा ॥७॥ ॐ वर्षन्तु ते० द्विषो जहि ॥२॥

ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। ईशान्यां दिशि ईशानः सहपरिवारो देवताप्रत्यधिदेवता स्तुद्दिक्षु उन्मत्तको नाम राक्षसस्तस्याष्टादशकोटिभूत प्रेतपिशाच ब्रह्मराक्षस शाकिनी डाकिनी काकिनी हाकिनी राकिनी याकिनी वैताल कामिनी ग्रहान् बन्धयामि मम सपरिवारकस्य सर्वतो मां रक्ष रक्ष अचलमचलमाक्रम्याक्रम्य महावज्रकवचायास्त्राय राजचौरसर्पसिंहव्याघ्राग्नि मम सर्वोपद्रवनाशनाय। ॐ ह्रां ह्रीं ह्रूं श्रीं क्लीं क्लुं प्रों आं ह्रीं क्रौं हुंफट् स्वाहा ॥८॥ ॐ वर्षन्तु ते० द्विषो जहि ॥२॥

ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। उर्ध्वायां दिशि ब्रह्मा सहपरिवारो देवताप्रत्यधिदेवता स्तुद्दिक्षु आकाशवासी नाम राक्षसस्तस्याष्टादशकोटिभूत प्रेतपिशाच ब्रह्मराक्षस शाकिनी डाकिनी काकिनी हाकिनी राकिनी याकिनी वैताल कामिनी ग्रहान् बन्धयामि मम सपरिवारकस्य सर्वतो मां रक्ष रक्ष अचलमचलमाक्रम्याक्रम्य महा वज्रकवचायास्त्राय राजचौरसर्पसिंहव्याघ्राग्नि मम सर्वोपद्रवनाशनाय। ॐ ह्रां ह्रीं ह्रूं श्रीं क्लीं क्लुं प्रों आं ह्रीं क्रौं हुंफट् स्वाहा ॥९॥ ॐ वर्षन्तु ते० अवब्रह्मद्विषो जहि ॥२॥

ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। अधस्ताद्दिशि वासुकिः सहपरिवारो देवताप्रत्यधिदेवता स्तुद्दिक्षु पातालवासीनाम राक्षसस्तस्याष्टादशकोटिभूत प्रेतपिशाच ब्रह्मराक्षस शाकिनी डाकिनी काकिनी हाकिनी राकिनी याकिनी वैताल कामिनी ग्रहान् बन्धयामि मम सपरिवारकस्य सर्वतो मां रक्ष रक्ष अचलमचलमाक्रम्याक्रम्य महा वज्रकवचायास्त्राय राजचौरसर्पसिंहव्याघ्राग्नि मम सर्वोपद्रवनाशनाय। ॐ ह्रां ह्रीं ह्रूं श्रीं क्लीं क्लुं प्रों आं ह्रीं क्रौं हुंफट् स्वाहा ॥१०॥ ॐ वर्षन्तु ते०अवबह्म द्विषो जहि ॥२॥

ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। आवान्तरस्यां दिशि विष्णुः सहपरिवारो देवताप्रत्यधि देवतास्तुद्दिक्षुको महाभीमको नाम राक्षसस्तस्याष्टादशकोटिभूत प्रेतपिशाच ब्रह्मराक्षस शाकिनी डाकिनी काकिनी हाकिनी राकिनी याकिनी वैताल कामिनी ग्रहान् बन्धयामि मम सपरिवारकस्य सर्वतो मां रक्ष रक्ष अचलमचलमाक्रम्याक्रम्य महा वज्रकवचायास्त्राय राजचौरसर्पसिंहव्याघ्राग्नि मम सर्वोपद्रवनाशनाय। ॐ ह्रां ह्रीं ह्रूं श्रीं क्लीं क्लुं प्रों आं ह्रीं क्रौं हुंफट् स्वाहा ॥११॥ ॐ वर्षन्तु ते० अवब्रह्माद्विषो जहि ॥२॥

ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। प्राच्यां दिशि । ॐ नमो भगवते इन्द्राणिवज्रहस्ताभ्यां सपरिवारकस्य सर्वतो मां रक्ष रक्ष हुंजटी स्वाहा। अव ब्रह्मद्विषो जहि। ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। आग्नेय्यां दिशि। ॐ नमो भगवते अग्निज्वालहस्ताभ्यां मम सपरिवारकस्य सर्वतो मां रक्ष रक्ष हुंजटी स्वाहा। अव ब्रह्मद्विषो जहि। ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। याम्यां दिशि। ॐ नमो भगवते यमकालदण्डहस्ताभ्यां मम सपरिवारकस्य सर्वतो मां रक्ष रक्ष हुंजटी स्वाहा। अव ब्रह्मद्विषो जहि।

ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। नैर्ऋत्यां दिशि। ॐ नमो भगवते निर्ऋति खड्गकंकाल हस्ताभ्यां मम सपरिवारकस्य सर्वतो मां रक्ष रक्ष हुंजटी स्वाहा। अव ब्रह्मद्विषो जहि। ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। वारुण्यां दिशि। ॐ नमो भगवते वारु णिपाश हस्ताभ्यां मम सपरिवारकस्य सर्वतो मां

रक्ष रक्ष हुंजटी स्वाहा। अव ब्रह्मद्विषो जहि।

ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। वायव्यां दिशि। ॐ नमो भगवते वायविवेधहस्ताभ्यां मम सपरिवारकस्य सर्वतो मां रक्ष रक्ष हुंजटी स्वाहा। अव ब्रह्मद्विषो जहि। ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। कौबेर्यां दिशि। ॐ नमो भगवते कौबेरीगदांकुशहस्ताभ्यां मम सपरिवारकस्य सर्वतो मां रक्ष रक्ष हुंजटी स्वाहा। अव ब्रह्मद्विषो जहि। ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। ईशान्यां दिशि। ॐ नमो भगवते ईशानित्रिशूलडमरुहस्ताभ्यां मम सपरिवारकस्य सर्वतो मां रक्ष रक्ष हुंजटी स्वाहा। अव ब्रह्मद्विषो जहि।

ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। ऊर्ध्वायां दिशि। ॐ नमो भगवते ब्रह्माणि स्त्रुक्स्त्रुवक मण्डल्वक्षसूत्रांकुशहस्तैः मम सपरिवारकस्य सर्वतो मां रक्ष रक्ष हुंजटी स्वाहा। अव ब्रह्मद्विषो जहि॥ ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रूद्राय। ॐ नमो भगवते पातालवासिनि विषगलहस्ताभ्यां मम सपरिवारकस्य सर्वतो मां रक्ष रक्ष हुंजटी स्वाहा। अव ब्रह्मद्विषो जहि।

ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। अवान्तरस्यां दिशि। ॐ नमो भगवते श्रीमहालक्ष्मी पद्मारूढा पद्महस्ताभ्यां मम सपरिवारकस्य सर्वतो मां रक्ष रक्ष हुंजटी स्वाहा। अव ब्रह्मद्विषो जहि।

ॐ नमो भगवते रुद्राय नमः। ॐ नमो भगवते रुद्राय। शिरो रक्षतु ब्रह्माणी मुखं माहेश्वरी तथा। कण्ठं रक्षतु वाराही ऐन्द्री चैव भुजद्वयम् ॥१॥ चामुण्डा हृदयं रक्षेत्कुक्षिं रक्षेच्च वारुणी। वैष्णवी रक्ष पादौ मे पृष्ठदेशे धनुर्धरी ॥२॥ यथा ग्रामे तथा क्षेत्रे रक्षस्व मां पदे पदे। सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके। शरण्येत्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥३॥

ॐ ब्राह्मि माहेश्वरि कौमारि वैष्णवि वाराहि इन्द्राणि चामुण्डे सिद्धचामुण्डेश्वरि गणेश्वरि क्षेत्रपाल नारसिंहि महालक्ष्मि सर्वतो दुर्गे हुंफट् स्वाहा । ॐ ऐं ह्रीं श्रीं दुं हुंफट्। कनकवज्रवैडुर्यमुक्तालंकृतभूषणे एहि एहि आगच्छ आगच्छ मम कर्णे प्रविश्य भूतभविष्यवर्तमानकालज्ञान दूरदृष्टिदूरश्रवणं ब्रूहि ब्रूहि अग्निस्तम्भनशत्रुस्तम्भन शत्रुमुखस्तम्भन शत्रुगतिस्तम्भन शत्रुमतिस्तम्भन परेषांगति सर्वमतिशत्रूणां वाग्जृम्भणं स्तम्भनं कुरु कुरु शत्रुकार्यहानिकरि मम कार्यसिद्धिकरि शत्रूणामुद्योगविध्वंसकरि वीरचामुण्डि निहाटकहाटकधारिणी नगरीपुरीपट्टणआस्थान संमोहिनी असाध्यसाधिनी। ॐ ह्रीं श्रीं देवि हन हुंफट् स्वाहा॥१॥

ॐ आं ह्रीं सौं ऐं क्लीं हूं सौः ग्लौं श्रीं क्रौं एहि एहि भ्रमराम्बा हि सकलजगन्मोहनाय मोहनाय सकलाण्डजपिण्डजान् भ्रामय भ्रामय जरा प्रजावशंकरि संमोहय संमोहय महामाये अष्टादशपीठरूपिणि अमलवरयूं स्फुर स्फुर प्रस्फुर प्रस्फुर कोटिसूर्यप्रभाभासुरि चन्द्रजटी मां रक्ष रक्ष मम शत्रून् भस्मीकुरु भस्मीकुरु विश्वमोहिनी हुं क्लीं हुं हुंफट् स्वाहा॥२॥

ॐ नमो भगवते कामदेवाय इन्द्राय वसाबाणाय इन्द्र संदीपबाणाय क्लीं क्लीं संमोहनबाणाय ब्लूं ब्लूं संतापनबाणाय सःसः वशीकरणबाणाय कम्पित कम्पित हुंफट् स्वाहा। क्लीं नमो भगवते कामदेवाय श्रीं सर्वजनप्रियाय सर्वजनसंमोहनाय ज्वल ज्वल प्रज्वल प्रज्वल हन हन वद वद तप तप संमोहय संमोहय सर्व जनं मे वशं कुरु कुरु स्वाहा॥३॥

ॐ ह्रां श्रीं ष्णीं क्ष्म्रैं हूस्त्रौं सहस्त्राराय हुंफट् स्वाहा। ॐ नमो विष्णवे। ॐ नमो नारायणाय। ॐ जय जय गोपीजनवल्लभाय स्वाहा। सहस्त्रार ज्वालावर्त क्ष्म्रौं हन हन हुंफट् स्वाहा। ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य

धीमहि। धियो यो नः प्रचोदयात्। श्रीमन्नारायणस्य चरणौ शरणं प्रपद्ये। श्रीमते नारायणाय नमः। उग्रवीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम्। नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ॥४॥

भगवन् सर्वविजय सहस्त्राराय राजित। शरणं त्वां प्रपन्नोऽस्मि श्रीकरं श्रीसुदर्शनम् ॥५॥

अरुणी वारुणी चैव सविग्रहनिवारिणी। सर्वकर्मकरि। ॐ भूः स्वाहा। ॐ भुवः स्वाहा। ॐ स्वः स्वाहा। ॐ भूर्भुवः स्वः स्वाहा। अष्टौ ब्राह्मणान् सम्यक् ग्राहयित्वा। ततो महाविद्या सिध्यति। अशिक्षितं नोपयुञ्जीत। अहं न जाने न च पार्वतीश एकविंशतिवाराणि परिजाप्य शुचिर्भवेत् ॥६॥

पत्रं पुष्पं फलं दद्यात् स्त्रियो वा पुरुषोऽपि वा। अवश्यं वशमित्याहुरात्मना च परेण वा ॥७॥ महाविद्यावतां पुंसां मनः क्षेत्रं करोति यः। सप्तरात्रौ व्यतीतायां शत्रूणां तद्विनश्यति ॥८॥ ॐ कुबेर ते मुखं रौद्रं नन्दिमानन्दिमावह। ज्वरं मृत्युभयं घोरं विषं नाशय मे ज्वर ॥९॥

ॐ नमो भगवते रुद्राय हृदये अमृताभिवर्षाय मम ज्वररोगशांतिं कुरु कुरु स्वाहा। ॐ कालकाल महाकाल कालदण्ड नमोऽस्तु ते। कालदण्डनिपातेन भूम्यामन्तर्हितं ज्वरं हन्ति। लिखित्वा यस्तु पश्यति समुद्रस्योत्तरे तीरे मारीचो नाम राक्षसस्तस्य मूत्रपुरीषाभ्यां हुताशनं शमय शमय स्वाहा। हिमवत्युत्तरे पार्श्वे चपला नाम यक्षिणी। तस्या नूपुरशब्देन विशल्या भव गर्भिणी। जातवेदसे सुन वाम सोममरातीयतो निदहाति वेदः। स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः ॥१०॥ भास्कराय विद्महे महद्द्युतिकराय धीमहि। तन्नः सूर्यः प्रचोदयात् ॥१॥ ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। प्रतिकूलकारिणी नश्येत्। अनुकूलकारिणी अस्तु। महादेवी च विद्महे विष्णुपत्नी च धीमहि। तन्नो लक्ष्मीः प्रचोदयात् ॥२॥

ॐ ब्रूं ह्रीं श्रींब्रह्मकोशजी मां रक्ष रक्ष हुंजटी स्वाहा। पञ्चम्यां च नवम्यां च दशम्यां च विशेषतः। पठित्वा तु महाविद्यां श्रीकामः सर्वदा पठेत् ॥११॥

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्। श्रीर्मे भजतु। अलक्ष्मीर्मे नश्यतु॥१॥ यदन्ति यच्च दूरके भयं विन्दति मामिह। पवमानवितज्जहि। यदुत्थितं दुःखं भवति तत्सर्वं शमय शमय स्वाहा॥२॥ ॐ गायत्र्यै स्वाहा। ॐ सावित्र्यै स्वाहा। ॐ सरस्वत्यै स्वाहा। तत्पुरुषाय विद्महे सहस्त्राक्षाय धीमहि। तन्न इन्द्रः प्रचोदयात् ॥३॥ तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रःप्रचोदयात् ॥४॥ तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्तिः प्रचोदयात् ॥५॥ तत्पुरुषाय विद्महे चक्रतुण्डाय धीमहि। तन्नो नन्दिः प्रचोदयात् ॥६॥ तत्पुरुषाय विद्महे महासेनाय धीमहि। तन्नो षण्मुखः प्रचोदयात् ॥७॥ तत्पुरुषाय विद्महे सुवर्णपक्षाय धीमहि। तन्नो गरुडः प्रचोदयात् ॥८॥ वेदात्मनाय विद्महे हिरण्यगर्भाय धीमहि। तन्नो ब्रह्म प्रचोदयात् ॥९॥ नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात् ॥१०॥ मन्मथेशाय विद्महे कामदेवाय धीमहि। तन्नोऽनङ्गः प्रचोदयात् ॥११॥ वज्रनखाय विद्महे तीक्ष्णदंष्ट्राय धीमहि। तन्नो नारसिंहः प्रचोदयात् ॥१२॥

भास्कराय विद्महे महद्द्युतिकराय धीमहि। तन्नो आदित्यः प्रचोदयात् ॥१३॥ वैश्वानराय विद्महे लालीलाय धीमहि। तन्नो अग्निः प्रचोदयात् ॥१४॥ कात्यायनाय विद्महे कन्यकुमारि धीमहि। तन्नो दुर्गेः प्रचोदयात् ॥१५॥ सहस्त्रपरमा देवी शतमूला शतांकुरा। सर्वं हरतु मे पापं दूर्वा दुःस्वप्ननाशिनी ॥१२॥ काण्डात्काण्डात्प्ररो हन्ती०। अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुंधरे। शिरसा धारयिष्यामि रक्षस्व मां पदे पद ॥१३॥ अत्रिणा त्वा क्रिमे हन्मिकण्वेन जमदग्निना। विश्वावसोर्ब्रह्मणा हतः कृमीणाञ्छ राजा अप्येषाः ञ्छ स्थपतिर्हतः। अथो माताऽथो पिता अथो स्थूरा अथो क्षुद्राः अथो कृष्णाः अथो श्वेताः अथो आशातिका हताः श्वेताभिः सह सर्वे हताः आहरावद्य

श्रुतस्य हविषो यथा तत्सत्यं यदमुं यमस्य जम्भयोः आदधामि तथा हि तत्। खणफणम्रसि ब्रह्मणा त्वा शपामि। ब्रह्मणस्त्वा शपथेन शपामि। घोरेण त्वा भृगूणां चक्षुषा प्रेक्षे। रौद्रेण त्वाऽङ्गिरसा मनसा ध्यायामि। अघस्य त्वा धारया विध्यामि। अधरो मत्पद्यस्वासौ उत्तुद शिमिजा वरि तल्पेजे तल्प उत्तुद गिरीϑ रनुप्रवेशय मरीचीरुपसंनुद यावदितः पुरस्तादुदयाति सूर्यः तावदितोऽमुं नाशय योऽस्मान् द्वेष्टि यं च वयं द्विष्मः खट् फट् जहि छिन्धि भिन्धि हन्धि कट् इति वाचः क्रूराणि परिबाहिणीदं नमस्ते अस्तु मा मा हिϑ सीः द्विषन्तं मेऽभिनाशय तं मृत्यो मृत्यवे नय अरिष्टं रक्ष अरिष्टं भञ्ज भञ्ज स्वाहा।

ॐ ह्रीं कृष्णवाससे नारसिंहवदे महाभैरवि ज्वल ज्वल विद्युज्ज्वलज्वालाजिह्वे करालवदने प्रत्यङ्गिरे क्ष्म्रीं क्ष्म्यैं नमो नारायणाय घ्रिणुः सूर्यादित्यों सहस्त्रा हुंफट्। अव ब्रह्मद्विषोजहि। सर्पोलूक काक कङ्क कपोतादि वृश्चिकोग्रदंष्ट्राकरोग्रविषान्मे महाभूतप्रेतपिशाचब्रह्मराक्षस सकलकिल्विषादि महारोगविषान्निरोगविषं कुरु कुरु स्वाहा। अक्षिस्पन्दं च दुःस्वप्नं भुजस्पन्दं च दुर्मतिम्। दुश्चिह्नं दुर्गतिं रोगं भयं नाशय शांकरि ॥१४॥ महाविद्यां कृतवतो योस्माकं द्वेष्टि योऽरिष्टं स्मरति यावदेकविंशतिं कृत्वा तावदधिकं नाशय। ब्रह्मविद्यामिमां देवि नित्यं सेवेत यः सुधीः। ऐहिकामुष्मिकं सौख्यं सिद्ध्यत्येव न संशयः ॥१५॥ एनां विद्यां महाविद्यां यो दूषयति मानवः। सो ऽवश्यं नाशमाप्नोति षण्मासादचिरेण वै ॥१६॥ अग्रतः पृष्ठतः पार्श्वे ऊर्ध्वतो रक्ष मे सदा। चण्डघण्टा विरूपाक्षी त्वां भजे जगदीश्वरीम् ॥१७॥ एवंविधां महाविद्यां त्रिसन्ध्यं स्तौति मानवः। दृष्ट्वा जनैर्दुष्टजनाः सर्वमोहवशं गताः ॥१८॥ तामग्नि वर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम्। दुर्गां देवीं शरणमहं प्रपद्ये सुतरां दुःशमनायै नमः ॥१९॥ मातर्मे मधु कैटभघ्नि महिषप्राणापहारोद्यमे हेलानिर्मितधूम्रलोचनवधे हे चण्डमुण्डार्दिनि। निःशेषीकृतरक्तबीजदनुजे नित्ये निशुम्भापहे शुम्भध्वंसिनि संहराशु दुरितं दुर्गे नमस्तेऽम्बिके ॥२०॥ कालदण्डपरं मृत्युविजया बन्धयाम्यत्हम्। पञ्चयोजनविस्तीर्णं मृत्योश्च मुख मण्डलम्। तस्माद्रक्ष महाविद्ये भद्रकालि नमोऽस्तु ते ॥२१॥

अव ब्रह्मद्विषो जहि। वारिजलोचनसहपारीगतिं वारयासुरकरनिकरैः पूरितमेघद्रुगानां दापितागोपकन्यके सहोदरवतु। अव ब्रह्मद्विषो जहि। ॐ ह्रीं श्रीं क्लीं सिद्धलक्ष्मी स्वाहा। ॐ क्लीं ह्रीं श्रीं ॐ आवहन्ती वितन्वाना कुर्वाणा चीरमात्मनः। वासाϑ सि मम गावश्च अन्नपाने च सर्वदा। ततो मे श्रिय आनिरियाय श्रियं वयो जरितृभ्यो दधाति। श्रियं वसाना अमृतत्वमायन् भवन्ति सत्या समिथा मितद्रौ श्रिय एवैनं तच्छ्रियामादधाति संततमृचा वषट्कृत्यं संतत्यै संधीयते प्रजया पशुभिर्य एवं वेद। ॐ ह्रीं श्रीं क्लीं क्लूं प्रों हुंफट् स्वाहा। अव ब्रह्मद्विषो जहि ॐ सह नाववतु सह नौ भुनक्तु सहवीर्यं करवावहै तेजस्विनावधीतमस्तु मा विद्विषावहै। ॐ शान्तिः शान्तिः शान्तिः।

॥ श्रीनवदुर्गा स्तव ॥

कार्येण याऽनेकविधां श्रयन्ती, निवारयन्ती स्मरतां विपत्तीः।
अपूर्वकारुण्य रसार्द्र चित्ता, सा शैलपुत्री भवतु प्रसन्ना ॥१॥
स्वर्गोऽपवर्गो नरकोऽपि यत्र, विभाव्यते दृक्कलया विविक्तम्।
या चाऽद्वितीयाऽपि शिवद्वितीया, सा ब्रह्मचारिण्यवताद् भवेभ्यः ॥२॥
पादौ धरित्री कटिरन्तरिक्षं, यस्याः शिरो द्यौरुदिताऽऽगमेषु।

अन्यद्यथा योगमयोग दूरा, सा चन्द्रघण्टा घटयत्वभीष्टम् ॥३॥
स्वराड् विराड् संसृतिराड् अखण्डब्रह्माण्डभाण्डाकलनैकवीरा ।
सा पापविध्वंसनसद्म कूष्माण्डाऽव्याद् अपायादयदानशौण्डा ॥४॥
द्वैमातुरत्वे द्विरदाननस्य, षाणमातुरत्वे च कुमारकस्य ।
एकैव माता परमा मता या, सा स्कन्दमाता मुदमादधातु ॥५॥
कतस्य गोत्रादथवाऽपरस्मात्, किं वेतरस्मात् कथमेकिकैव ।
जातेति माताह्वयतां इता या, कात्यायनी सा ममतां हिनस्तु ॥६॥
कालोऽपि विश्रान्तिमुपैति यस्यां, काऽन्या कथा भौतिकविग्रहाणाम् ।
प्रपञ्च पञ्चीकरणैकधात्री, सा कालरात्री निहताद् भयानि ॥७॥
कालीकुलं श्रीकुलमप्यपारं, कृष्णाद्युपासा प्रवणं यतश्च ।
साऽनन्तविद्या विततावदाना, गौरी विदध्यादखिलान् पुमर्थान् ॥८॥
गृणन्ति यां वेदपुराणसांख्य, योगागमादेव महर्षयश्च ।
पुत्रान् प्रपौत्रान् सुधियः श्रियश्च, सा सिद्धिदा सिद्धिकरी ददातु ॥९॥

या चण्डी मधुकैटभप्रमथिनी या माहिषोन्मूलिनी,
या धूम्रेक्षेणचण्डमुण्ड दलिनी या रक्तबीजाशिनी ।
शक्तिः शुम्भनिशुम्भदैत्यदलिनी या सिद्धि लक्ष्मीः परा,
सा दुर्गा नवकोटि मूर्तिसहिताऽस्मान् पातु सर्वेश्वरी ॥१०॥

॥ अथ ब्रह्मांडमोहनाख्यं दुर्गाकवचम् ॥

ब्रह्मवैवर्तपुराणे ॥

॥ नारद उवाच ॥

भगवन्सर्वधर्मज्ञ सर्वज्ञानविशारद । ब्रह्मांडमोहनं नाम प्रकृतेः कवचं वद ॥ १ ॥

॥ नारायण उवाच ॥

शृणु वक्ष्यामि! हे वत्स कवचं च सुदुर्लभम् । श्रीकृष्णेनैव कथितं कृपया ब्रह्मणे पुरा ॥२॥
ब्रह्मणा कथितं पूर्वं धर्माय जाह्नवीतटे । धर्मेण दत्तं मह्यं च कृपया पुष्करे पुरा ॥३॥
त्रिपुरारिश्च यद्धृत्वा जघान त्रिपुरं पुरा । ममोच ब्रह्मा यद्धृत्वा मधुकैटभयोर्भयात् ॥४॥
संजहार रक्तबीजं यद्धृत्वा भद्रकालिका । यद्धृत्वा हि महेंद्रश्च संप्राप कमलालयाम् ॥५॥
यद्धृत्वा च महायोद्धा बाणः शत्रुभयंकरः । यद्धृत्वा शिवतुल्यश्च दुर्वासा ज्ञानिनां वरः ॥६॥
ॐ दुर्गेति चतुर्थ्यंतः स्वाहांतो मे शिरोऽवतु। मंत्रः षडक्षरोऽयं च भक्तानां कल्पपादपः ॥७॥
विचारो नास्ति वेदे च ग्रहणेऽस्य मनोर्मुने । मंत्रग्रहणमात्रेण विष्णुतुल्यो भवेन्नरः ॥८॥

मम वक्रं सदा पातु ॐ दुर्गायै नमोऽन्तकः । ॐ दुर्गे इति कंठं तु मंत्रः पातु सदा मम ॥९॥
ॐ ह्रीं श्रीमिति मन्त्रोऽयं स्कंधं पातु निरंतरम् । ह्रीं श्रीं क्लीमिति पृष्ठं च पातु मे सर्वतः सदा ॥१०॥
ह्रीं मे वक्षस्थले पातु हं सं श्रीमिति संततम् । ऐं श्रीं ह्रीं पातु सर्वांगं स्वप्ने जागरणे सदा ॥११॥
प्राच्यां मां पातु प्रकृतिः पातु वह्नौ च चंडिका । दक्षिणे भद्रकाली च नैर्ऋत्यां च महेश्वरी ॥१२॥
वारुण्यां पातु वाराही वायव्यां सर्वमंगला । उत्तरे वैष्णवी पातु तथैशान्यां शिवप्रिया ॥१३॥
जले स्थले चांतरिक्षे पातु मां जगदंबिका । इति ते कथितं वत्स कवचं च सुदुर्लभम् ॥१४॥
यस्मै कस्मै न दातव्यं प्रवक्तव्यं न कस्यचित् । गुरुमभ्यर्च्य विधिवद्वस्त्रालंकारचन्दनैः ॥१५॥
कवचं धारयेद्यस्तु सोऽपि विष्णुर्न संशयः । स्नाने च सर्वतीर्थानां पृथिव्याश्च प्रदक्षिणे ॥१६॥
यत्फलं लभते लोकस्तदेतद्धारणे मुने । पंचलक्षजपेनैव सिद्धमेतद्भवेद्ध्रुवम् ॥१७॥
लोके च सिद्धकवचो नावसीदति संकटे । न तस्य मृत्युर्भवति जले वह्नौ विषे ज्वरे ॥१८॥
जीवन्मुक्तो भवेत्सोऽपि सर्वसिद्धीश्वरीश्वरि । यदि स्यात्सिद्धकवचो विष्णुतुल्यो भवेद्ध्रुवम् ॥१९॥

॥ इति श्रीब्रह्मवैवर्ते प्रकृतिखंडांतर्गत दुर्गाकवचं समाप्तम् ॥

॥ अथ दुर्गाकवचम् ॥

कुब्जिकातंत्रे । ॥ ईश्वर उवाच ॥

शृणु देवि प्रवक्ष्यामि कवचं सर्वसिद्धिदम् । पठित्वा पाठयित्वा च नरो मुच्येत संकटात् ॥१॥
अज्ञात्वा कवचं देवि दुर्गामंत्रं च यो जपेत् । स नाप्नोति फलं तस्य परत्र नरकं व्रजेत् ॥२॥
उमा देवी शिरः पातु ललाटं शूलधारिणी । चक्षुषी खेचरी पातु कर्णौ चत्वरवासिनी ॥३॥
सुगंधा नासिके पातु वदनं सर्वधारिणी । जिह्वां च चंडिकादेवी ग्रीवां सौभद्रिका तथा ॥४॥
अशोकवासिनी चेतो द्वौबाहू वज्रधारिणी । हृदयं ललितादेवी उदरं सिंहवाहिनी ॥५॥
कटिं भगवती देवी द्वावूरू विंध्यवासिनी । महाबला च जंघे द्वे पादौ भूतलवासिनी ॥६॥
एवं स्थितासि देवि त्वं त्रैलोक्यरक्षणात्मिके । रक्ष मां सर्वगात्रेषु दुर्गे देवि नमोऽस्तुते ॥७॥

॥ इति कुब्जिकातंत्रोक्त दुर्गाकवचं समाप्तम् ॥

॥ अथ श्रीदुर्गा कवचम् ॥

(उक्तं च तत्रैवाष्टचत्वारिंशत्पटले) ॥ श्री भैरव उवाच ॥

अधुना देवि वक्ष्येऽहं कवचं मन्त्रगर्भकम् । दुर्गायाः सारसर्वस्वं कवचेश्वरसंज्ञकम् ॥१॥
परमार्थप्रदं नित्यं महापातकनाशनम् । योगिप्रियं योगगम्यं देवानामपि दुर्लभम् ॥२॥
विना दानेन मन्त्रस्य सिद्धिर्देवि कलौ भवेत् । धारणादस्य देवेशि शिवस्त्रैलोक्यनायकः ॥३॥
भैरवो भैरवेशानि विष्णुर्नारायणो बली। ब्रह्मा पार्वति लोकेशो विघ्नध्वंसी गजाननः ॥४॥

सेनानीश्च महासेनो जिष्णुर्लेखर्षभः प्रिये । सूर्यस्तमोपहो लोके चन्द्रोऽमृतनिधिस्तथा ॥५॥
बहुनोक्तेन किं देवि दुर्गाकवचधारणात् । मर्त्योऽप्यमरतां याति साधको मन्त्रसाधकः ॥६॥
कवचस्यास्य देवेशि ऋषिः प्रोक्तो महेश्वरः । छन्दोऽनुष्टुप् प्रिये दुर्गा देवताऽष्टाक्षरा स्मृता ॥७॥
चक्रिबीजं च बीजं स्यान्माया शक्तिरितीरिता ॥८॥
ॐ मे पातु शिरो दुर्गा ह्रीं मे पातु ललाटकम्। दुं नेत्रेऽष्टाक्षरा पातु चक्री पातु श्रुती मम ॥९॥
मठं गण्डौ च मे पातु देवेशी रक्त कुण्डला । वायुर्नासां सदा पातु रक्तबीजनिषूदिनी ॥१०॥
लवणं पातु मे चोष्ठौ चामुण्डा चण्डघातिनी। भेकीबीजं सदा पातु दन्तान्मे रक्तदन्तिका ॥११॥
ॐ ह्रीं श्रीं पातु मे कण्ठं नीलकण्ठाङ्कवासिनी। ॐ ऐं क्लीं पातु मे स्कन्धौ स्कन्दमाता महेश्वरी ॥१२॥
ॐ सौः क्लीं मे पातु बाहू देवेशी बगलामुखी। ऐं श्रीं ह्रीं पातु मे हस्तौ शिवाशतनिनादिनी ॥१३॥
सौः ऐं ह्रीं पातु मे वक्षो देवता विन्ध्यवासिनी। ॐ ह्रीं श्रीं क्लीं पातु कुक्षिं मम मातङ्गिनी परा ॥१४॥
श्रीं ह्रीं ऐं पातु मे पार्श्वौ हिमाचलनिवासिनी। ॐ स्त्रीं हूं ऐं पातु पृष्ठं मम दुर्गतिनाशिनी ॥१५॥
ॐ क्रीं हूं पातु मे नाभिं देवी नारायणी सदा। ॐ ऐं क्लीं सौः सदा पातु कटिं कात्यायनी मम ॥१६॥
ॐ ह्रीं श्रीं पातु शिश्नं मे देवी श्रीबगलामुखी । ऐं सोः क्लीं सौः पातु गुह्यं गुह्यकेश्वरपूजिता ॥१७॥
ॐ ह्रीं ऐं श्रीं हसौः पायादूरू मम मनोन्मना। ॐ जूं सः सौः पातु जानु जगदीश्वरपूजिता ॥१८॥
ॐ ऐं क्लीं पातु मे जङ्घे मेरुपर्वतवासिनी। ॐ ह्रीं श्रीं गीं सदा पातु गुल्फौ मम गणेश्वरी ॥१९॥
ॐ ह्रीं दुं पातु मे पादौ पार्वती षोडशाक्षरी। पूर्वे मां पातु ब्रह्माणी वह्नौ च वैष्णवी तथा ॥२०॥
दक्षिणे चण्डिका पातु नैर्ऋते नारसिंहिका। पश्चिमे पातु वाराही वायव्ये माऽपराजिता ॥२१॥
उत्तरे पातु कौमारी चैशान्यां शांभवी तथा। ऊर्ध्वं दुर्गा सदा पातु पात्वधस्ताच्छिवा सदा ॥२२॥
प्रभाते त्रिपुरा पातु निशीथे छिन्नमस्तका। निशान्ते भैरवी पातु सर्वदा भद्रकालिका ॥२३॥
अग्नेरम्बा च मां पातु जलान्भां जगदम्बिका। वायोर्मां पातु वाग्देवी वनाद्वनजलोचना ॥२४॥
सिंहात्सिंहासना पातु सर्पात्सर्पान्तकासना। रोगान्मां राजमातङ्गी भूताद्भूतेशवल्लभा ॥२५॥
यक्षेभ्यो यक्षिणी पातु रक्षेभ्यो राक्षसान्तका। भूतप्रेतपिशाचेभ्यः सुमुखी पातु मां सदा ॥२६॥
सर्वत्र सर्वदा पातु ॐ ह्रीं दुर्गा नवाक्षरा। इत्येवं कवचं गुह्यं दुर्गासर्वस्वमुत्तमम् ॥२७॥
मन्त्रगर्भं महेशानि कवचेश्वरसंज्ञकम् । वित्तदं पुण्यदं पुण्यं वर्म सिद्धिप्रदं कलौ ॥२८॥
वर्म सिद्धिप्रदं गोप्यं परापररहस्यकम् । श्रेयस्करं मनुमयं रोगनाशकरं परम् ॥२९॥
महापातककोटिघ्नं मानदं च यशस्करम् । अश्वमेघसहस्त्रस्य फलदं परमार्थदम् ॥३०॥
अत्यन्तगोप्यं देवेशि कवच मन्त्रसिद्धिदम्। पठनात्सिद्धिदं लोके धारणान्मुक्तिदं शिवे ॥३१॥
रवौ भूर्जे लिखेद्धीमान् कृत्वा कर्माह्निकं प्रिये। श्रीचक्राग्रेऽष्ट गन्धेन साधको मन्त्रसिद्धये ॥३२॥
लिखित्वा धारयेद्बाहौ गुटिकां पुण्यवर्धिनीम्। किं किं न साधयेल्लोके गुटिका वर्मणोऽचि रात् ॥३३॥
गुटिकां धारयेन्मूर्ध्नि राजानां वशमानयेत्। धनार्थी धारयेत् कण्ठे पुत्रार्थी कुक्षिमण्डले ॥३४॥
तामेवं धारयेन्मूर्ध्नि लिखित्वा भूर्जपत्रके। श्वेतसूत्रेण संवेष्ट्य लाक्षया परिवेष्टयेत् ॥३५॥

सुवर्णेनाथ संवेष्ट्य धारयेद्रक्तरज्जुना । गुटिका कामदादेवि देवानामपि दुर्लभा ॥३६॥
कवचस्यास्य गुटिकां धृत्वा मुक्तिप्रदायिनीम् । कवचस्यास्य देवेशि वर्णितुं नैव शक्यते ॥३७॥
महिमानं महादेवि जिह्वाकोटिशतैरपि । अदातव्यमिदं वर्म मन्त्रगर्भं रहस्यकम् ॥३८॥
अवक्तव्यं महापुण्यं सर्व सारस्वतप्रदम् । अदीक्षिताय नो दद्यात्कुचैलाय दुरात्मने ॥३९॥
अन्यशिष्टाय दुष्टाय निन्दकाय कुलार्थिनाम् । दीक्षिताय कुलीनाय गुरुभक्तिरताय च ॥४०॥
शान्ताय कुलसक्ताय शान्ताय कुलवासिने । इदं वर्म शिवे दद्यात्कुलभागी भवेन्नरः ॥४१॥
इदं रहस्यं परमं दुर्गाकवचमुत्तमम् । गुह्यं गोप्यतमं गोप्यं गोपनीयं स्वयोनिवत् ॥४२॥

॥ इति श्रीदुर्गाकवचम् समाप्तम् ।

॥ श्रीदुर्गा पञ्जर स्तोत्रम् ॥

विनियोगः- ॐ अस्य श्रीदुर्गा पञ्जर स्तोत्रस्य सूर्य ऋषिः, त्रिष्टुप् छन्दः, छाया देवता, श्रीदुर्गा पञ्जर स्तोत्र पाठे विनियोगः ।

॥ ध्यानम् ॥

ॐ हेम प्रख्यामिन्दु खण्डात्तमौलिं शंखाभीष्टा भीति हस्तां त्रिनेत्राम् ।
हेमाब्जस्थां पीन वस्त्रां प्रसन्नां देवीं दुर्गां दिव्यरूपां नमामि ।
अपराध शतं कृत्वा जगदम्बेति चोच्चरेत् ।
यां गतिं समवाप्नोति नतां ब्रह्मादयः सुराः ।
सापराधोऽस्मि शरणं प्राप्तस्त्वां जगदम्बिके ॥१॥

॥ मार्कण्डेय उवाच ॥

दुर्गे दुर्ग प्रदेशेषु दुर्वार रिपुमर्दिनी । मर्दयित्री रिपुश्रीणां रक्षां कुरु नमोऽस्तुते ॥१॥
पथि देवालये दुर्गे अरण्ये पर्वते जले । सर्वत्रोऽपगते दुर्गे दुर्गे रक्ष नमोऽस्तुते ॥२॥
दुःस्वप्ने दर्शने घोरे घोरे निष्पन्न बन्धने । महोत्पाते च नरके दुर्गेरक्ष नमोऽस्तुते ॥३॥
व्याघ्रोरग वराहानि निर्हादिजन संकटे । ब्र[illegible] विष्णु स्तुते दुर्गे दुर्गे रक्ष नमोऽस्तुते ॥४॥
खेचरा मातरः सर्वं भूचराश्चा तिरोहिताः । ये त्वां समाश्रिता स्तांस्त्वं दुर्गे रक्ष नमोऽस्तुते ॥५॥
कंसासुर पुरे घोरे कृष्ण रक्षण कारिणी । रक्ष रक्ष सदा दुर्गे दुर्गे रक्ष नमोऽस्तुते ॥६॥
अनिरुद्धस्य रुद्धस्य दुर्गे बाणपुरे पुरा । वरदे त्वं महाघोरे दुर्गे रक्ष नमोऽस्तुते ॥७॥
देव द्वारे नदी तीरे राजद्वारे च संकटे । पर्वता रोहणे दुर्गे दुर्गे रक्ष नमोऽस्तुते ॥८॥
दुर्गा पञ्जर मेतत्तु दुर्गा सार समाहितम् । पठनस्तारयेद् दुर्गा नात्र कार्या विचारण ॥९॥
रुद्रबाला महादेवी क्षमा च परमेश्वरी । अनन्ता विजया नित्या मातस्त्वम पराजिता ॥१०॥

॥ इति श्री मार्कण्डेय पुराणे देवी महात्म्ये रुद्रयामले देव्याः पञ्जर स्तोत्रम् ॥

॥ श्री चंडी हृदय स्तोत्रम् ॥

विनियोग :- ॐ अस्य श्री चण्डी हृदयमालामन्त्रस्य त्रिगुणात्मा ऋषिः। विराट् छंदः। श्री महाचण्डी देवता। ऐं बींजम्। ह्रीं शक्तिः। क्लीं कीलकं। सर्वाभीष्ट सिद्धये जपे विनियोगः।

हृदयादि न्यासः - ॐ ऐं नमः हृदयाय नमः। ॐ ह्रीं नमः शिरसे स्वाहा। ॐ क्लीं नमः शिखायै वषट्। ॐ चामुण्डायै नमः कवचाय हुं। ॐ विच्चे नमः नेत्रत्रयाय वौषट्। ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमोऽस्त्राय फट्।

॥ ब्रह्मोवाच ॥

अथातः संप्रवक्ष्यामि विस्तरेण यथातथम्। चण्डिका हृदयं गुह्यं शृणुष्वैकाग्रमानसः ॥ ॐ ह्रां ह्रीं हूँ ऐं स्त्रीं श्रीं ॐ नमो भगवति जयजय ज्वाला मालिनि। ॥ इति मंत्रः॥

॥ चामुण्डे चण्डिके ॥

त्रिदश मणि मुकुट कोटि निघृष्ट चरणारविन्दे। गायत्रि सावित्रि सरस्वति महासन्ध्ये महाबाण कृताभरणे॥ भैरव रूप धारिणि। प्रकट सुदंष्ट्रोग्रवदने। घोरे घोरासने नयनोज्वल ज्वाल सहस्त्र परिवृत्ते। महाट्टहास धवलीकृत दिगन्तरे। दिवाकर सहस्त्र परिवृत्ते। कामरूप धारिणि। महामणिद्योतित शशिप्रभा भासित सकलदिगन्तरे। सर्वायुध परिपूर्णे। कपाल हस्ते । गजगामिन्यौतरिण्ये। भूत वेताल परिवृत्ते प्रकम्पित चराचरे। मधुकैटभ महिषासुर धूम्रलोचन चण्ड मुण्ड रक्तबीज निशुम्भ शुम्भादि दैत्यनिष्कण्टिके कालरात्रि महामाये। शिवे नित्ये। त्रिभुवन धराधरे। वाम ज्येष्ठे वरदे रौद्र्यम्बिके। कालिकल विकारिणि। बल प्रमथिनि सर्वभूतदमनि। मनोन्मय्या धारिणि। ब्राह्मि माहेश्वरि कौमारि वैष्णवि। वाराहि नारसिंहीन्द्राणि। चामुण्डे। माहेन्द्रि शिवदूति महाकाली महालक्ष्मी महासरस्वतीतित्रिस्थिते। ॥ नाद मध्ये स्थिते। महोग्रविषो रगफणा मणि मुकुट रत्न ज्वालावलिते महाहिहार भूषित पाद बाहु कण्ठोत्तमांगे। माला कुले। नवरत्ननिधि कोशे। शब्द स्पर्श रूप रस गन्धाकाशवाक् पाणि पाद पायूपस्थ श्रोत्रत्वक् चक्षु जिह्वा। घ्राण मध्यस्थिते। चक्षुष्मति। महाविषोपविघ्ने। महाज्वालानले। महाभैरवस्तुते। सर्व सिद्धिप्रदे। निर्मले निष्कले नाभ्या धारादि संस्थिते। पर ज्योतिः स्वरूपे॥ सोम सूर्याग्नि मण्डल परिवृत्ते ऊद्ध्र्व विशुद्धान्तक प्रभे विनिगर्त ब्रह्म विष्णु रुद्र दैवते। परे अपरे। प्रभाभासित चराचरे। पंचविंशति तत्वावबोधिनि महाशून्यागमे। पतिबन्धु संस्थिते अधऊद्ध्र्व संस्थिते। भुक्ति मुक्तिप्रदे। निर्गुणे। ऋग्यजुः सामाथर्वणि पठिते। एह्येहि भगवति। स्थूल सूक्ष्मपरे हुँकार निरुपिते। परमकारुणिके। महाज्वालामणे महिषोपरिस्थिते गन्धर्व विद्या-धरार्च्यिते। भुजङ्गमहिमे। जृम्भिणि क्षौभिणि। वशीकरणि। जृम्भे। मोहे। क्षोभे। बीजपञ्चक मध्यस्थिते। महायोगिनि। महाज्वर क्षेत्र नायिके। यक्ष राक्षस महाज्वर क्षेत्र विषोप विघ्ने। गन्धर्व विद्याधराराधिते। ओंकार श्रीङ्कारहस्ते आंक्रींमग्नि पात्रे। द्रां शोषय शोषय। प्लुं प्लावय प्लावय। क्लीं ब्रीं सुकुमारय सुकुमारय। प्लुं शांतय शांतय। सीमुन्मादयोन्मादय ग्लौं मोहय मोहय। ह्रीं मां ह्रीं मावेशयावेशय। श्रीं प्रवेशय प्रवेशय। स्त्रीं कर्षय कर्षय। हुं हुं हुं फट् अतीतानागत वर्तमानान्दिशं विदिशम्। ऐं ह्रीं श्रीं श्रावय श्रावय। सर्वं प्रवेशय प्रवेशय। त्रैलोक्यंवशवर्ति। ऐं कांरवशीकुरुष्व। ऐं ह्रीं स्त्रीं द्रावय द्राबय। सर्वं प्रवेशय प्रवेशय। ऐंकारचित्तांवशं कुरु कुरु । ऐं ह्रीं श्रीं हां हीं हूं हैं हौं हः। ऐं ह्रीं श्रीं स्त्रां स्त्रीं स्त्रूं स्त्रैं स्त्रौं स्त्रः। मम सर्वकार्य्याणि साधय साधय हुं फट् स्वाहा। एक विंशति वारन्तु पठेदेवं जपेतु वा राजद्वारे स्मशाने च विदेशे शुत्रु मण्डले ॥१॥ भूताग्नि रणमध्ये च सर्वकार्याणि साधयेत्। चण्डिका हृदयं गुह्यं त्रिसन्ध्ये कीर्तयेद् द्विजः ॥२॥ सर्वकामप्रदं नृणां भुक्तिं मुक्तिं च विन्दन्ति।

॥ इति श्रीरुद्रयामले सप्तशती हृदयं सम्पूर्णम् ॥

॥ अथ दुर्गास्तवः ॥

उक्तं च हरिवंशे ।

॥ वैशम्पायन उवाच ॥

आर्यास्तवं प्रवक्ष्यामि यथोक्तमृषिभिः पुरा । नारायणीं नमस्यामि देवीं त्रिभुवनेश्वरीम् ॥१॥
त्वं हि सिद्धिर्धृतिर्मेधा श्रीर्विद्या सन्नतिर्मतिः । संध्या रात्रिः प्रभा निद्रा कालरात्रिस्तथैव च ॥२॥
आर्या कात्यायनी देवी कौशिकी ब्रह्मचारिणी । जननी सिद्धसेनानीरुग्रचारिमहातपाः ॥३॥
जया च विजया चैव पुष्टिश्च त्वं क्षमा दया । ज्येष्ठा यमस्य भगिनी नीलकौशेयवासिनी ॥४॥
बहुरूपा विरूपा च अनेकविधचारिणी । विरूपाक्षी विशालाक्षी भक्तानां परिरक्षिणी ॥५॥
पर्वताग्रेषु घोरेषु नदीषु च गृहेषु च । वासस्तव महादेवि वनेषूपवनेषु च ॥६॥
शबरैर्बर्बरैश्चैव पुलिंदैरभिपूजिता । मयूरपक्षध्वजिनी लोकान्क्रमसि सर्वशः ॥७॥
कुक्कुटैश्छागलैर्मेषैः सिंहैर्व्याघ्रैः समाकुला । घंटानिनादबहुला विश्रुता विंध्यवासिनी ॥८॥
शूलिनी पट्टिशयुता सूर्यचन्द्रपताकिनी । नवमी कृष्णपक्षस्य शुक्लस्यैकादशी तथा ॥९॥
भगिनी बलदेवस्य रजनी कलहप्रिया । आवासः सर्वभूतानां निष्ठा च परमा गतिः ॥१०॥
नंदगोपसुता चैव देवानां विजयावहा । चीरवासा सुवासाश्च रात्रिः संध्या त्वमेव च ॥११॥
प्रकीर्णकेशी मृत्युश्च तथा मांसौदनप्रिया । लक्ष्मीरलक्ष्मरूपेण दानवानां वधाय च ॥१२॥
सावित्री चैव वेदानां माता मंत्रगणस्य च । अंतर्वेदी च यज्ञानामृत्विजश्चैव दक्षिणा ॥१३॥
सिद्धिः सांयात्रिकाणां तु वेला त्वं सागरस्य च । यक्षाणां प्रथमा यक्षी नागानां सुरसेति च ॥१४॥
कन्यानां ब्रह्मचर्या त्वं सौभाग्यं प्रमदासु च । ब्रह्मचारिण्यथो दीक्षा शोभा च परमा तथा ॥१५॥
ज्योतिषां त्वं प्रभा देवि नक्षत्राणां च रोहिणी । राजद्वारेषु तीर्थेषु नदीनां संगमेषु च ॥१६॥
पूर्णा च पूर्णिमा चंद्रे कृत्तिवासा इति स्मृता । सरस्वती च वाल्मीकेः स्मृतिर्द्वैपायनस्य च ॥१७॥
कर्षकाणां च सीतेति भूतानां धरणिस्तथा । ऋषीणां धर्मबुद्धिस्तु देवानां मानसी तथा ॥१८॥
सुरादेवीति भूतेषु स्तूयसे त्वं स्वकर्मभिः । इन्द्रस्य चारुदृष्टिस्त्वं सहस्रनयनेति च ॥१९॥
तापसानां च देवि त्वमरणिश्चाग्निहोत्रिणाम् । क्षुधा च सर्वभूतानां तृप्तिस्त्वं दैवतेषु च ॥२०॥
स्वाहा तृप्तिर्धृतिर्मेधा वसूनां त्वं वसूमती । आशा च मानुषाणां तु तुष्टिश्च कृतकर्मणाम् ॥२१॥
दिशश्च विदिशश्चैव तथा ह्यग्निशिखा प्रभा । शकुनी पूतना च त्वं रेवती वसुदारुणा ॥२२॥
निद्रा च सर्वभूतानां मोहिनी क्षत्रिया तथा । विद्यानां ब्रह्मविद्या च त्वमोंकारो वषट् तथा ॥२३॥
नारीणां पार्वती च त्वं पौराणीमृषयो विदुः । अरुंधत्येकभर्त्रीणां प्रजापतिवचो यथा ॥२४॥
पर्यायनामभिर्दिव्यैरिंद्राणी चेति विश्रुता । त्वया व्याप्तमिदं सर्वं जगत्स्थावरजंगमम् ॥२५॥
संग्रामेषु च सर्वेषु अग्निप्रज्वलितेषु च । नदीतीरेषु चोरेषु कांतारेषु भयेषु च ।
प्रवासे राजबंधे च शत्रूणां च प्रदर्शने ॥२६॥

प्रयाणाद्येषु सर्वेषु त्वं हि रक्षा न संशयः । त्वयि मे हृदयं देवि त्वयि चित्तं मनस्त्वयि ॥२७॥
रक्ष मां सर्वपापेभ्यः प्रसादं कर्तुमर्हसि । इमं तव स्तवं दिव्यमिति व्यासप्रकल्पितम् ॥२८॥
यः पठेत्प्रातरुत्थाय शुचिः प्रयतमानसः । त्रिभिर्मासैः कांक्षितं च फलं वै संप्रयच्छसि ॥२९॥
षड्भिर्मासैर्वरिष्ठं तु वरमेकं प्रयच्छसि । अर्चिता नवभिर्मासैर्दिव्यं चक्षुः प्रयच्छसि ॥३०॥
संवत्सरेण सिद्धिं तु यथाकामं प्रयच्छसि । सत्यं ब्रह्म च दैवं च द्वैपायनवचो यथा ॥३१॥
नृणां बंधं वधं घोरं पुत्रनाशं धनक्षयम् । व्याधिं मृत्युभयं चैव पुजिता शमयिष्यसि ॥३२॥
भविष्यसि महाभागे वरदा कामरूपिणी । मोहयित्वा च तं कंसमेका त्वं भोक्ष्यसे जगत् ॥३३॥
अहमप्यात्मनो वृतिं विधास्ये गोषु गोपवत् । स्ववृद्ध्यर्थमहं चैव करिष्ये कंसगोपनम् ॥३४॥
एवं तु स समादिश्य गतोंऽतर्धानमीश्वरः । सा चापि तं नमस्कृत्य तथास्त्विवति विनिश्चिता ॥३५॥

॥ इति श्रीहरिवंशोक्तः श्रीआर्य्यास्तवः समाप्तः ॥

॥ श्री दुर्गास्तोत्रम् ॥

उक्तं च ब्रह्मवैवर्तपुराणे प्रकृतिखंडे अंतिमेऽध्याये ।

पुरा स्तुता सा गोलोके कृष्णेन परमात्मना । संपूज्य मधुमांसेन प्रीतेन रासमंडले ॥१॥
मधुकैटभयोर्युद्धे द्वितीये विष्णुना पुरा । तत्रैव काले सा दुर्गा ब्रह्मणः प्राणसंकटे ॥२॥
चतुर्थे संस्तुता देवी भक्ता च त्रिपुरारिणा । पुरा त्रिपुरयुद्धे च महाघोरतरे रणे ॥३॥
पंचमे संस्तुता देवी वृत्रासुरवधे तथा । शक्रेण सर्वैर्देवैश्च घोरे च प्राणसंकटे ॥४॥
तदा मुनींद्रैर्मुनिभिर्मानवैः सुरथादिभिः । संस्तुता पूजिता सा च कल्पे कल्पे परात्परा ॥५॥
स्तोत्रं च श्रूयतां ब्रह्मन्सर्वविघ्नविनाशनम् । सुखदं मोक्षदं सारं भवाब्धेः पारकारकम् ॥६॥

॥ श्रीकृष्ण उवाच ॥

त्वमेव सर्वजननी मूलप्रकृतिरीश्वरी । त्वमेवाद्या सृष्टिविधौ स्वेच्छया त्रिगुणात्मिका ॥७॥
कार्यार्थे सगुणा त्वं च वस्तुतो निर्गुणा स्वयम् । परब्रह्मस्वरूपा त्वं सत्या नित्यस्वरूपिणी ॥८॥
निजस्वरूपा परमा भक्तानुग्रहविग्रहा । सर्वस्वरूपा शर्वाणी सर्वाधारा परात्परा ॥९॥
सर्वज्ञा सर्वतोभद्रा सर्वमङ्गलमङ्गला । सर्वज्ञानप्रदा देवी सर्वज्ञा सर्वभाविनी ॥१०॥
त्वं स्वाहा देवदाने च पितृदाने स्वधा स्वयम् । दक्षिणा सर्वदाने च सर्वकर्मणि संततम् ॥११॥
निद्रा त्वं च दया त्वं च तृष्णा त्वं चात्मनश्च मे । तत्क्षांतिः शांतिरीशा च कांतिस्तुष्टिश्च शाश्वती ॥१२॥
श्रद्धा पुष्टिश्च तंद्रा च लज्जा शोभा प्रभा सदा । सतां संपत्स्वरूपा श्रीर्विपत्तिरसतामिह ॥१३॥
प्रीतिरूपा पुण्यवतां पापिनां कलहांकुरा । शश्वत्कर्ममयी शक्तिः सर्वदा सर्वजीविनाम् ॥१४॥
देवेभ्यः संपदां दात्री धातुर्धात्री कृपामयी । कुलायः सर्वदेवानां सर्वासुरविनाशिनी ॥१५॥
योगनिद्रा योगरूपा योगदात्री च योगिनाम् । माहेश्वरी च ब्रह्माणी विष्णुमाया च वैष्णवी ॥१६॥

भद्रदा भद्रकाली च सर्वलोकभयंकरी । ग्रामे ग्रामे ग्रामदेवी गृहदेवी गृहे गृहे ॥१७॥
महायुद्धे महामारी दुष्टसंहाररूपिणी । रक्षास्वरूपा शिष्टानां मातेव हितकारिणी ॥१८॥
ब्राह्मण्यरूपा विप्राणां तपस्या च तपस्विनाम् । विद्या विद्यावतां त्वं च बुद्धिर्बुद्धिमतां सती ॥१९॥
मेधा स्मृतिस्वरूपा च प्रतिभा प्रतिभावताम् । राज्ञां प्रतापरूपा च विशां वा विट्स्वरूपिणी ॥२०॥
इत्यात्मना कृतं स्तोत्रं दुर्गायाः स्वर्गकारणम् । पूजाकाले पठेद्यो हि सिद्धं तद्वाञ्छितं भवेत् ॥२१॥
वंध्या वा काकवंध्या वा मृतवत्सा च दुर्भगा । श्रुत्वा स्तोत्रं वर्षमेकं सुपुत्रं लभते ध्रुवम् ॥२२॥
कारागारे महाघोरे यो बद्धो दृढबंधने । श्रुत्वा स्तोत्रं मासमेकं बन्धनान्मुच्यते ध्रुवम् ॥२३॥
यक्ष्मग्रस्तो गलत्कुष्ठी महाशूली महाज्वरी । श्रुत्वा स्तोत्रं वर्षमेकं सद्यो रोगात्प्रमुच्यते ॥२४॥
राजद्वारे श्मशाने च महारण्ये रणस्थले । हिंस्रजंतुसमीपे तु श्रुत्वा स्तोत्रं प्रमुच्यते ॥२५॥
महादरिद्रो मूर्खश्च वर्षं स्तोत्रं पठेत्तु यः । विद्यावान्धनवांश्चैव स भवेन्नात्र संशयः ॥२६॥

॥ इति श्रीब्रह्मवैवर्तांतर्गतप्रकृतिखंडोक्तं दुर्गास्तोत्रं समाप्तम् ।

॥ श्रीदुर्गाष्टाक्षर स्तोत्रम् ॥

उक्तं च देवीरहस्यतन्त्रे पंचाशत्तमे पटले ।

॥ भैरव उवाच ॥

अधुना देवि वक्ष्यामि दुर्गास्तोत्रं मनोहरम् । मूलमन्त्रमयं दिव्यं सर्वसारस्वतप्रदम् ॥१॥
दुर्गार्तिशमनं पुण्यं साधकानां जयप्रदम् । दुर्गाया अंगभूतं तु स्तोत्रराजं परात्परम् ॥२॥

विनियोगः – ॐ अस्य श्रीदुर्गास्तोत्रराजस्य महेश्वर ऋषिः । अनुष्टुप्छन्दः । श्रीदुर्गाष्टाक्षरात्मिका देवता । दुं बीजम् । पराशक्तिः । नमः कीलकम् । धर्मार्थकाममोक्षार्थे दुर्गास्तोत्रपाठे विनियोगः ।

ऋष्यादिन्यास :– ॐ महेश्वर ऋषये नमः शिरसि । अनुष्टुप्छन्दसे नमो मुखे । श्रीदुर्गाष्टाक्षरात्मिका देवतायै नम हृदि । दुं बीजाय नमो नाभौ । ह्रीं शक्तये नमो गुह्ये । नमः कीलकाय नमः पादयोः । विनियोगाय नमः सर्वाङ्गे । इति ऋष्यादिन्यासः ।

ध्यानं कुर्यात्–

दूर्वानिभां त्रिनयनां विलसत्किरीटां शंखाब्जखड्गशर खेटकशूलचापान् ।
संतर्जनीं च दधतीं महिषासनस्थां दुर्गां नवारकुलपीठगतां भजेऽहम् ॥३॥

तारं हारं मंत्रमालां सुबीजं ध्यायेदंतर्यो बलं बालकांतः ।
तस्य स्मारंस्मारमंघ्रिद्वयीं द्राग्रंभा याति स्वर्गतः कामवश्या ॥४॥

मायां जपेद्यस्तव मंत्रमध्येदुर्गे सदादुर्गतिखेदखिन्नः ॥
भवेत्स भूमौ नृपमौलिमालामाणिक्य निर्घृष्ट पदारविंदः ॥५॥

चाक्रिकं यदि जपेत्तवांबिके चक्रमध्यगत ईश्वरेश्वरि ।

साधको भवति चक्रवर्तिनां नायको नयविलासकोविदः ॥६॥
चक्रिबीजमपरं स्मरेच्छिवे योऽरिवर्गविहिताहितव्यथः ।
आजिमंडलगतो जयेद्रिपून्वाजिवारणरथाश्रितो नरः ॥७॥
दूर्वाबीजं यो जपेत्प्रेतभूमौ सायं मायाभस्मनालिप्तकायः ।
गीर्वाणानां नायको देव मंत्री मुक्त्वा राज्यं प्राज्यमाद्यं करोति ॥८॥
वायव्यबीजं यदि साधको जपेत्प्रियाकुचद्वंद्वविमर्द्दनक्षमः ।
समस्तकांताजननेत्रवागुरा विलासहंसो भविता स पार्वति ॥९॥
विश्वं विश्वेश्वरि यदि जपेत्कामवेलाकलार्तो रात्रौ मात्राक्षरविलसितन्यास ईशानि मातः ।
तस्य स्मेराननसरसिजभ्राजमानांग लक्ष्मीर्वश्याऽवश्यं सुरपुरवधूमौलिमालोर्वशी स्यात् ॥१०॥
भूगेहांचितसत्रिवृत्तविलसन्नागारवृत्तां चितव्यग्रारोल्लासिता -
ऽग्निकोणविलसच्छ्री बिंदुपीठस्थिताम् ।
ध्यायेच्चेतसि शर्वपत्नि भवतीं
माध्वीरसाघूर्णितां यो मंत्री स भविष्यति स्मरसमः स्त्रीणां धरण्यां दिवि ॥११॥
दुर्गास्तवं मनुमयं मनुराजमौलिमाणिक्यमुत्तमशिवांगरहस्यभूतम् ।
प्रातः पठेद्यदि जपावसरेऽर्चनायां भूमौ भवेत्स नृपतिर्दिवि देवनाथः ॥१२॥
इति स्तोत्रं महापुण्यं पंचांगैकशिरोमणिम् । यः पठेदर्धरात्रे तु तस्य वश्यं जगत्त्रयम् ॥१३॥

॥ इति श्रीदेवीरहस्यतंत्रोक्तं श्रीदुर्गाष्टाक्षरस्तोत्रं समाप्तम् ॥

॥ अथ श्री गर्भचण्डी ॥

(गौड मतेन लघुचण्डी पाठक्रमः)

तंत्रसाधना के अनुसार बीजाक्षरों का संपुट लोम- विलोम लगता है

॥ गर्भकवचम् ॥

ॐ ऐं ह्रीं क्लीं नमः शूलेन पाहिनो देवि पाहि खड्गेन चाम्बिके । घण्टास्वनेन नः पाहि चापज्या निःस्वनेन च । मः न क्लीं ह्रीं ऐं ॐ ॥१॥ ॐ ऐं ह्रीं क्लीं नमः प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे । भ्रामेणनात्मशूलस्य उत्तरस्यां तथेश्वरि । मः न क्लीं ह्रीं ऐं ॐ ॥२॥ ॐ ऐं ह्रीं क्लीं नमः सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते । यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम् । मः न क्लीं ह्रीं ऐं ॐ ॥३॥ ॐ ऐं ह्रीं क्लीं नमः खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके । करपल्लव सङ्गीनि तैरस्मान् रक्ष सर्वतः । मः न क्लीं ह्रीं ऐं ॐ ॥४॥

॥ गर्भऽर्गला ॥

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः ॐ एतत् ते वदनं सौम्यं लोचनत्रय भूषितम् ।
पातु नः सर्वभूतेभ्यः कात्यायनि नमोस्तुते । मः न च्चेवि यैडामुंचा क्लीं ह्रीं ऐं ॐ ॥१॥

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः। ज्वालाकराल मृत्युग्रमशेषासुर सूदनम् ।
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तुते । मः न च्चेवि यैडामुंचा क्लीं ह्रीं ऐं ॐ ॥२॥
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ।
सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिव मः न च्चेवि यैडामुंचा क्लीं ह्रीं ऐं ॐ ॥३॥
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः असुरास्रग् वसापङ्कचर्चितस्ते करोज्वलः ।
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम्। मः न च्चेवि यैडामुंचा क्लीं ह्रीं ऐं ॐ ॥४॥

॥ गर्भशाप विमोचनमुत्कीलनं च ॥

मूलमन्त्र से विन्यास, ध्यान व मानसोपचार से पूजन करें। मूल मन्त्र - **ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे क्लीं ह्रीं ऐं ॐ नमः स्वाहा** का यथाशक्ति जाप करें समर्पण पश्चात् उत्कीलन करें यथा -

ॐ ह्रीं श्रीं क्लीं चण्डि सकलमन्त्राणां शापविमोचनं कुरु कुरु स्वाहा। तीन बार जपें। **ॐ श्रीं ह्रीं क्लीं चण्डि सप्तशतिके सर्वमन्त्राणां उत्कीलनं कुरु कुरु स्वाहा।** तीन बार जपें।

॥ गर्भरात्रि सूक्तम् ॥

ॐ ऐं ह्रीं क्लीं नमः ब्रह्मोवाच मः न क्लीं ह्रीं ऐं ॐ ॥१॥ ॐ ऐं ह्रीं क्लीं नमः त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका। सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता मः न क्लीं ह्रीं ऐं ॐ ॥२॥ ॐ ऐं ह्रीं क्लीं नमः अर्द्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः। त्वमेव सन्ध्या सावित्री त्वं देवि जननी परा॥ मः न क्लीं ह्रीं ऐं ॐ ॥३॥

॥ अथ गर्भचण्डी ॥

विनियोग :- **ॐ अस्य श्री गर्भचण्डीमाला मन्त्रस्य श्रीब्रह्मा विष्णु महेश्वरादि ऋषयः। गायत्र्युष्णिगनुष्टुप् छंदांसि। श्रीशक्तिस्वरूपिणी महाचण्डी देवता। ऐं बीजं। ह्रीं कीलकं। क्लीं शक्तिः। मम चतुर्विध पुरुषार्थ सिद्ध्यर्थे जपे विनियोगः।**

ऋष्यादिन्यास :- **ॐ अस्य श्री गर्भचण्डीमाला मन्त्रस्य श्रीब्रह्मा विष्णु महेश्वरादि ऋषिभ्यो नमः शिरसि। गायत्र्युष्णिगनुष्टुप् छंदोभ्यो नमः मुखे। श्रीशक्तिस्वरूपिणी महाचण्डी देवतायै नमः हृदि। ऐं बीजाय नमः गुह्ये। क्लीं शक्तये नमः पादयोः। ह्रीं कीलकाय नमः नाभौ। मम चतुर्विध पुरुषार्थ सिद्ध्यर्थे जपे विनियोगाय नमः सर्वाङ्गे।**

षडङ्गन्यास	करन्यास	अङ्गन्यास
ॐ ह्रां	अंगुष्ठाभ्यां नमः।	हृदयाय नमः।
ॐ ह्रीं	तर्जनीभ्यां नमः।	शिरसे स्वाहा ।
ॐ ह्रूं	मध्यमाभ्यां नमः।	शिखायै वषट्।
ॐ ह्रैं	अनामिकाभ्यां नमः	कवचाय हुम्।
ॐ ह्रौं	कनिष्ठिकाभ्यां नमः	नेत्रत्रयाय वौषट्।
ॐ ह्रः	करतलकरपृष्ठाभ्यां नमः	अस्त्राय फट्।

॥ ध्यानम् ॥

शुद्ध स्फटिक सङ्काशां रवि विम्बाननां शिवाम् । अनेक शक्तिसंयुक्तां सिंहपृष्ठे निषेदुषीम् ॥ अङ्कुशं चाक्षसूत्रं च पाशपुस्तक धारिणीम् । मुक्ताहार समायुक्तां चण्डीं ध्याये चतुर्भुजाम् ॥ सितेन दर्पणाब्जेन वस्त्रालंकार भूषितम् । जटाकलाप संयुक्तां सुस्तनीं चन्द्रशेखराम् ॥ कटकैः स्वर्ण रत्नाढ्यैर्महावलय शोभिताम् । कम्बुकण्ठीं सु ताम्रोष्ठीं सर्पनूपुरधारिणीम् ॥ केयूर मेखलाद्यैश्च द्योतयंतीं जगत्त्रयम् । एवं ध्याये महाचण्डीं सर्वकामार्थ सिद्धिदाम् ।

चतुष्टयमुद्रा प्रदर्शनम् :- १ पाश, २ अङ्कुश, ३ अक्षसूत्र, ४ पुस्तक मुद्राणि प्रदर्शयेत्।

॥ अथ पाठ:॥

ॐ ऐं ह्रीं क्लीं नमः ब्रह्मोवाच मः न क्लीं ह्रीं ऐं ॐ ॥१॥ ॐ ऐं ह्रीं क्लीं नमः यच्च किञ्चित् क्वचिद् वस्तु सदसद् वाखिलात्मिके। तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा। मः न क्लीं ह्रीं ऐं ॐ ॥२॥ ॐ श्रीं नमः सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः। तस्या नादेन घोरेण कृत्स्नमापूरितं नमः। मः न श्रीं ॐ ॥३॥ ॐ श्रीं नमः अर्द्धनिष्क्रान्त एवासौ युध्यमानो महाऽसुरः तया महाऽसिना देव्या शिरश्छित्वा निपातितः॥ मः न श्रीं ॐ ॥४॥ ॐ श्रीं नमः दुर्गे स्मृता हरसि भीतिमशेष जन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि। दारिद्र्य दुःख भय हारिणि का त्वदन्या सर्वोपकार करणाय सदाऽऽर्द्रचित्ता। मः न श्रीं ॐ ॥५॥ ॐ क्लीं नमः इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या। भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः। मः न क्लीं ॐ ॥६॥ ॐ क्लीं नमः इत्युक्तः सोऽभ्यधावत् तामसुरो धूम्रलोचनः। हुङ्कारेणैव तं भस्म सा चकाराम्बिका ततः। मः न क्लीं ॐ ॥७॥ ॐ क्लीं नमः भृकुटी कुटिलात् तस्याः ललाटफलकाद् द्रुतम्। काली कराल वदना विनिष्क्रान्ताऽसि पाशिनी। मः न क्लीं ॐ ॥८॥ ॐ क्लीं नमः ब्रह्मेश गुहविष्णूनां तथेन्द्रस्य च शक्तयः। शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः। मः न क्लीं ॐ ॥९॥ ॐ क्लीं नमः अट्टाट्टहासमशिवं शिवदूती चकार ह। तैः शब्दैरसुरास्त्रेसुः शुम्भः कोपं परं ययौ। मः न क्लीं ॐ ॥१०॥ ॐ क्लीं नमः एकैवाहं जगत्यत्र द्वितीया का ममापरा? पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः। मः न क्लीं ॐ ॥११॥ ॐ क्लीं नमः सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते। भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तु ते। मः न क्लीं ॐ ॥१२॥

ॐ क्लीं नमः देव्युवाच मः न क्लीं ॐ ॥१३॥ ॐ क्लीं नमः सर्वाबाधा विनिर्मुक्तो धनधान्य सुतान्वितः। मनुष्योमत् प्रसादेन भविष्यति न संशयः। मः न क्लींॐ ॥१४॥ ॐ क्लीं नमः यत् प्रार्थ्यते त्वया भूप त्वया च कुलनन्दन। मत्तस्तत् प्राप्यतां सर्वं परितुष्टा ददामि तत्। मः न क्लीं ॐ ॥१५॥

॥ जय जय श्रीमार्कण्डेय पुराणे सावर्णिके मन्वन्तरे देवी माहात्म्ये सत्याः सन्तु मनसः कामाः॥

॥ श्रीगर्भदेवी सूक्तम् ॥

ॐ क्लीं नमः नमो देव्यै महादेव्यै शिवायै सततं नमः। नमः प्रकृत्यै भद्रायै नियताः प्रणतः स्मताम्। मः न क्लीं ॐ ॥१॥ ॐ क्लीं नमः रौद्रायै नमो नित्यायै गौर्य्यै धात्र्यै नमो नमः। ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः। मः न क्लीं ॐ ॥२॥ ॐ क्लीं नमः कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कूर्म्यै नमो नमः। नैर्ऋते भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः। मः न क्लीं ॐ ॥३॥ ॐ क्लीं नमः दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै। ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः। मः न क्लीं ॐ ॥४॥ ॐ क्लीं नमः अति सौम्याति रौद्रायै नतास्तस्यै नमो नमः। नमो जगत् प्रतिष्ठायै देव्यै कृत्यै नमो नमः। मः न क्लीं ॐ ॥५॥

॥ गर्भरहस्य त्रयम् ॥

ॐ ह्रीं नमः गुरूपदेशविधिना पूजनीया प्रयत्नतः। मन्त्रोद्धार प्रयत्नेन ज्ञातव्या सा नृपात्मजः। मः न ह्रीं ॐ ॥१॥ ॐ श्रीं नमः प्रदक्षिणां नमस्कारान् कृत्वा मूर्ध्नि कृताञ्जलिः। क्षमापयेज्जगद्धात्रीं मुहुर्मुहुरतन्द्रितः। मः न श्रीं ॐ ॥२॥ ॐ क्लीं नमः जगन्मातुश्चण्डिकाया कीर्तिता कामधेनवः। मेधां प्रज्ञां तथा श्रद्धां धारणां कान्तिमेव च। मः न क्लीं ॐ ॥३॥

॥ गर्भ सूत्र त्रयम् ॥

ॐ ऐं नमः ब्रह्म सरस्वती सूक्तं लक्ष्मीसूक्तं जनार्दनम् ह्रीं ॐ ॥ इस मन्त्र के एक लाख जप करें तथा सिद्ध करें। श्रीं श्रीं श्रीं ॐ नमः।

॥ इति श्रीगर्भचण्डी सम्पूर्णम् ॥

॥ अथ रुद्रचंडी पाठः ॥

उक्तं च रुद्रयामले।

॥ श्रीशंकर उवाच ॥

चंडिकाहृदयं न्यस्य शरणं यः करोत्यपि।
अनंतफलमाप्नोति देवीचंडीप्रसादतः।
घोरचंडी महाचण्डी चंडमुडविखंडिनी ॥१॥
चतुर्वक्त्रा महावीर्य्या महादेवविभूषिता।
रक्तदंता वरारोहा महिषासुरमर्दिनी।
तारिणी जननी दुर्गा चंडिका चंडविक्रमा ॥२॥
गुह्यकाली जगद्धात्री चंडी च यामलोद्भवा। श्मशानवासिनी देवी घोरचंडी भयानका ॥३॥
शिवा घोरा रुद्रचंडी महेशी गणभूषिता। जाह्नवी परमा कृष्णा महात्रिपुरसुंदरी ॥४॥
श्रीविद्या परमाविद्या चंडिका वैरिमर्दिनी। दुर्गा दुर्गशिवा घोरा चंडहस्ता प्रचंडिका ॥५॥
माहेशी बगला देवी भैरवी चंडविक्रमा। प्रमथैर्भूषिता कृष्णा चामुंडा मुंडमर्दिनी ॥६॥
रणखंडा चंद्रघंटा रणे रामवरप्रदा। मारणी भद्रकाली च शिवा घोरा भयानका ॥७॥
विष्णुप्रिया महामाया नंदगोपगृहोद्भवा। मंगला जननी चंडी महाक्रुद्धा भयंकरी ॥८॥
विमला भैरवी निद्रा जातिरूपा मनोहरा। तृष्णा निद्रा क्षुधा माया शक्तिर्मायामनोहरा ॥९॥
तस्यै देव्यै नमो या वै सर्वरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१०॥
इमां चंडीं जगद्धात्रीं ब्राह्मणस्तु सदा पठेत्। नान्यस्तु संपठेद्देवि पठने ब्रह्महा भवेत् ॥११॥
यः शृणोति धरायां च मुच्यते सर्वपातकैः। ब्रह्महत्या च गोहत्या स्त्रीवधोद्भवपातकम् ॥१२॥
श्वश्रूगमनपापं च कन्यागमनपातकम्। तत्सर्वं पातकं दुर्गे मातुर्गमनपातकम् ॥१३॥

सुतस्त्रीगमनं चैव यद्यत्पापं प्रजायते । परदारकृतं पापं तत्क्षणादेव नश्यति ॥१४॥
जन्मजन्मांतरात्पापाद्गुरुहत्यादिपातकात् । मुच्यते मुच्यते देवि गुरुपत्नीसुसंगमात् ॥१५॥
मनसा वचसा पापं यत्पापं ब्रह्महिंसने । मिथ्याजन्यं च यत्पापं तत्पापं नश्यति क्षणात् ॥१६॥
श्रवणं पठनं चैव यः करोति धरातले । स धन्यश्च कृतार्थश्च राजा राजाधिपो भवेत् ॥१७॥
रविवारे यदा चंडीं पठेदागमसंमताम् । नवावृत्तिफलं तस्य जायते नात्र संशयः ॥१८॥
सोमवारे यदा चंडीं पठेद्यस्तु समाहितः । सहस्रावृत्तिपाठस्य फलं जानीहि सुव्रत ॥१९॥
कुजवारे जगद्धात्रीं पठेदागमसंमताम् । शतावृत्तिफलं तस्य बुधे लक्षफलं ध्रुवम् ॥२०॥
गुरौ यदि महामाये लक्षयुग्मफलं ध्रवम् । शुक्रे देवि जगद्धात्रि चंडीपाठेन शांकरी ॥२१॥
ज्ञेयं तुल्यफलं दुर्गे यदि चंडीसमाहितः । शनिवारे जगद्धात्रि कोट्यावृत्तिफलं ध्रुवम् ॥२२॥
अत एव महेशानि यो वै चंडीं समभ्यसेत् । स सद्यश्च कृतार्थः स्याद्राजराजाधिपो भवेत् ॥२३॥
आरोग्यं विजयं सौख्यं वस्त्ररत्नप्रवालकम् । पठनाच्छ्रवणाच्चैव जायते नात्र संशयः ॥२४॥
धनं धान्यं प्रवालं च वस्त्रं रत्नविभूषणम् । चंडीश्रवणमात्रेण कुर्यात्सर्वं महेश्वरी ॥२५॥
यः करिष्यत्यविज्ञाय रुद्रयामलचंडिकाम् । पापैरेतैः समायुक्तो रौरवं नरकं व्रजेत् ॥२६॥
अश्रद्धया च कुर्वंति ते च पातकिनो नराः । रौरवं नरकं कुंडं कृमिकुंडं मलस्य वै ॥२७॥
शुक्रस्य कुडं स्त्रीकुंडं यांति ते ह्यचिरेण वै । ततः पितृगणैः सार्धं विष्ठायां जायते कृमिः ॥२८॥
शृणु देवि महामाये चंडीपाठं करोति यः । गंगायां चैव यत्पुण्यं काश्यां विश्वेश्वराग्रतः ॥२९॥
प्रयागे मुंडने चैव हरिद्वारे हरेर्गृहे । तस्य पुण्यं भवेद्देवि सत्यं दुर्गे रमे शिवे ॥३०॥
त्रिगयायां त्रिकाश्यां वै यच्च पुण्यं समुत्थितम् । तच्च पुण्यं तच्च पुण्यं तच्च पुण्यं न संशयः ॥३१॥
भवानी च भवानी च भवानी चोच्यते बुधैः । भकारस्तु भकारस्तु भकारः केवलः शिवः ॥३२॥
वाणी चैव जगद्धात्री वरारोहे भकारकः । प्रेतवद्देवि विश्वेशि भकारः प्रेतवत्सदा ॥३३॥
आरोग्यं च जयं पुण्यं नातः सुखविवर्धनम् । धनं पुत्रजरारोग्यं कुष्ठं गलितनाशनम् ॥३४॥
अर्धांगरोगान्मुच्येत दद्रुरोगाच्च पार्वति । सत्यं सत्यं जगद्धात्रि महामाये शिवे शिवे ॥३५॥
चण्डे-चण्डि महारावे चण्डिका व्याधिनाशिनी । मन्दे दिने महेशानि विशेषफलदायिनी ॥३६॥
सर्वदुःखाद्विमुच्येत भक्तया चण्डीं शृणोति यः । ब्राह्मणो हितकारी च पठेन्नियतमानसः ॥३७॥
मङ्गलं मङ्गलं ज्ञेयं मङ्गलं जयमङ्गलम् । भवेद्धि पुत्रपौत्रैश्च कन्यादासादिभिर्युतः ॥३८॥
तत्त्वज्ञानेन निधन काले निर्वाणमाप्नुयात् । मणिदानोद्भवं पुण्यं तुलाहिरण्यके तथा ॥३९॥
चण्डीश्रवणमात्रेण पठनाद्ब्राह्मणोऽपि च । निर्वाणमेति देवेशि महास्वस्त्ययने हितः ॥४०॥
सर्वत्र विजयं याति श्रवणाद्ग्रहदोषतः । मुच्यते च जगद्धात्रि राजराजाधिपो भवेत् ॥४१॥

अन्यच्च-

महाचंडी शिवा घोरा महाभीमा भयानका । कांचनी कमला विद्या महारोगविमर्दिनी ॥४२॥

गुह्यचंडी घोरचंडी चंडी त्रैलोक्यदुर्लभा । देवानां दुर्लभा चंडी रुद्रयामलसंमता ॥४३॥
अप्रकाश्या महादेवी प्रिया रावणमर्दिनी । मत्स्यप्रिया मांसरता मत्स्यमांसबलिप्रिया ॥४४॥
मदमत्ता महानित्या भूतप्रमथसंगता । महाभागा महारामा धान्यदा धनरत्नदा ॥४५॥
वस्त्रदा मणिराज्यादिसदाविषयवर्धिनी । मुक्तिदा सर्वदा चंडी महाविपद्विनाशिनी ॥४६॥
इमां हि चंडीं पठते मनुष्यः शृणोति भक्त्या परमां शिवस्य ।
चण्डीं धरण्यामतिपुण्ययुक्तां स वै न गच्छेत्परमंदिरं किम् ॥४७॥
जप्यं मनोरथं दुर्गे तनोति धरणीतले । रुद्रचंडीप्रसादेन किं न सिध्यति भूतले ॥४८॥

मंत्र महार्णव पेज ३७१ से अन्यच्च –

रुद्रध्येया रुद्ररूपा रुद्राणी रुद्रवल्लभा । रुद्रशक्ती रुद्ररूपा रुद्राननसमन्विता ॥१॥
शिवचंडी महाचंडी शिवप्रेतगणान्विता । भैरवी परमाविद्या महाविद्या च षोडशी ॥२॥
सुंदरी परमा पूज्या महात्रिपुरसुंदरी । गुह्यकाली भद्रकाली महाकालविमर्दिनी ॥३॥
कृष्णा तृष्णास्वरूपा सा जगन्मोहनकारिणी अतिमात्रा महालज्जा सर्वमंगलदायिनी ॥४॥
घोरतंद्री भीमरूपा भीमा देवी मनोहरा । मंगला बगला सिद्धिदायिनी सर्वदा शिवा ॥५॥
स्मृतिरूपा कीर्तिरूपा योगीन्द्रैरपि सेविता । भयानका महादेवी भयदुःखविनाशिनी ॥६॥
चंडिका शक्तिहस्ता च कौमारी सर्वकामदा । वाराही च वराहास्या इन्द्राणी शक्रपूजिता ॥७॥
माहेश्वरी महेशस्य महेशगणभूषिता । चामुंडा नारसिंही च नृसिंहरिपुमर्दिनी ॥८॥
सर्वशत्रुप्रशमनी सर्वारोग्यप्रदायिनी । इति सत्यं महादेविसत्यं सत्यं वदाम्यहम् ॥९॥
नैवशोको नैवरोगो नैवदुःखं भयं तथा । आरोग्यं मंगलं नित्यं करोति शुभमंगलम् ॥१०॥
महेशानि वरारोहेब्रवीमि सदिदं वचः । अभक्ताय न दातव्यं मम प्राणाधिकं शुभम् ॥११॥
तव भक्त्या प्रशांताय शिवविष्णुप्रियाय च । दद्यात्कदाचिद्देवेशि सत्यं सत्यं महेश्वरि ॥१२॥
अनंतफलमाप्नोति शिवचंडीप्रसादतः । अश्वमेघं वाजपेयं राजसूयशतानि च ॥१३॥
तुष्टाश्च पितरो देवास्तथा च सर्वदेवताः । दुर्गेयं मृन्मयी ज्ञानं रुद्रयामलपुस्तकम् ॥१४॥
मन्त्रमक्षरसंज्ञानां करोत्यपि नराधमः । अत एव महेशानि किं वक्ष्ये तव सन्निधौ ॥१५॥
लंबोदराधिकश्चंडीपठनाच्छ्रवणात्तु यः । तत्त्वमस्यादिवाक्येन मुक्तिमाप्नोतिदुर्लभाम् ॥१६॥

॥ इति श्रीरुद्रयामले देवीश्वरसंवादे रुद्रचंडी समाप्ता ।

॥ अथ परशुरामकृत श्रीदुर्गा स्तोत्रम् ॥

॥ परशुराम उवाच ॥

श्रीकृष्णस्य च गोलोके परिपूर्णतमस्य च । आविर्भूता विग्रहतः परा सृष्ट्युन्मुखस्य च ॥१॥
सूर्यकोटिप्रभायुक्ता रत्नालंकारभूषिता । वह्निशुद्धांशुकाधाना सस्मिता सुमनोहरा ॥२॥
नवयौवनसंपन्ना सिंदूरबिंदुशोभिना । ललिता कवरीभारमालतीमाल्यमंडिता ॥३॥
अहोऽनिर्वचनीया त्वं चार्वीं मूर्तिं च बिभ्रती । मोक्षप्रदा मुमुक्षूणां जगत्कर्ता विधिः स्वयम् ॥४॥
मुमोह क्षणमात्रेण दृष्ट्वा त्वां सर्वमोहिनीम् । रासे संभूय सहसा सस्मिता राधिता पुरा ॥५॥
सद्भिः ख्याता तेन राधा मूलप्रकृतिरीश्वरी । कृष्णस्त्वां सहसाज्ञाय वीर्याधानं चकार ह ॥६॥
ततोऽडमंभसो जज्ञे यतो भूतो महाविराट् । यस्यैव लोमकूपेषु ब्रह्मांडान्यखिलानि च ॥७॥
तच्छृंगारश्रमेणैव त्वन्निश्वासो बभूव ह । ततस्त्वं पंचधाभूय पंचमूर्तीश्च बिभ्रती ॥८॥
प्राणाधिष्ठात्री या मूर्तिः कृष्णस्य परमात्मनः । कृष्णप्राणाधिकां राधां तां वदंति पुराविदः ॥९॥
वेदाधिष्ठात्री या मूर्तिर्वेदशास्त्रप्रसूरपि । तां सावित्रीं शुद्धरूपां प्रवदंति मनीषिणः ॥१०॥
ऐश्वर्याधिष्ठात्री मूर्तिर्या शांतिः शांतिस्वरूपिणी । लक्ष्मीं वदंति संतस्तां शुद्धसत्त्वस्वरूपिणीम् ॥११॥
रागाधिष्ठात्री या देवी शुक्लमूर्तिः सतां प्रसूः । सरस्वतीं तां शास्त्रज्ञाः प्रवदंति बुधा भुवि ॥१२॥
बुद्धिर्विद्या सर्वशक्तिर्ज्या मुक्तिरधिदेवता । सर्वमंगलरूपा त्वं सर्वमंगलकारिणी ॥१३॥
सर्वमंगलबीजस्य शिवस्य मंदिरेऽधुना । शिवे शिवस्वरूपा त्वं लक्ष्मीर्नारायणांतिके ॥१४॥
सरस्वती च सावित्री वेदसूर्ब्रह्मणः प्रिया । राधा रासेश्वरस्यैव परिपूर्णतमस्य च ॥१५॥
परमानंदरूपासि छाया चंद्रस्य रोहिणी । शची शक्रस्य कामस्य कामिनी रतिरीश्वरी ॥१६॥
वरुणानी जलेशस्य वायोः स्त्री प्राणवल्लभा । वह्नेः प्रिया या स्वाहा च कुबेरस्य च सुंदरी ॥१७॥
यमस्य च सुशीला वै नैर्ऋतस्य च कोटवी । ईशानस्य शशिकला शतरूपा मनोःप्रिया ॥१८॥
देवहूतिः कर्दमस्य वशिष्ठस्याप्यरुंधती । अदितिर्देवमाता या मुद्रागस्त्यमुनेः प्रिया ॥१९॥
अहल्या गौतमस्यापि सर्वाधारा वसुंधरा । गंगा च तुलसी चापि पृथिव्यां याः सरिद्वराः ॥२०॥
एताः सर्वाश्च या अन्याः सर्वास्त्वत्कलयांबिके । गृहलक्ष्मीर्गृहे नृणां राजलक्ष्मीश्च राजसु ॥२१॥
मानवौघगुरु – **ॐ मानवौघ गुरुभ्यो नमः।** पुष्पाञ्जलि देवें। **ॐ ऐं ह्रीं श्रीं क्रीं हूं ह्रीं विमलानन्दनाथमयी श्री पादुकां पूजयामि नमः तर्पयामि स्वाहा। कुशलानन्दनाथमयी.। भीमसुरानन्दनाथमयी.। सुधाकरानन्दनाथमयी.। मीनानन्दनाथमयी.। गोरक्षकानन्दनाथमयी.। भोजदेवानन्दनाथमयी.। प्रजापत्यानन्दनाथमयी.। मूलदेवानन्दनाथमयी.। रन्तिदेवानन्दनाथमयी.। विघ्नेश्वरानन्दनाथमयी.। हुताशनानन्दनाथमयी.। समरानन्दनाथमयी.। संतोषानन्दनाथमयी.।**

चतुर्थावरणम् – बिन्दु से बाँयीं ओर –

स्वगुरुक्रम – **ॐ ऐं ह्रीं श्रीं क्रीं हूं ह्रीं अमुक स्वगुरु सशक्तिं श्री पादुकां पूजयामि नमः तर्पयामि स्वाहा। परमगुरु सशक्तिं.। परात्परगुरु सशक्तिं.। परमेष्ठिगुरु सशक्तिं.।**

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सले। भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम् ॥

पुष्पाञ्जलि देवें। **पूजिताः तर्पिताः सन्तुः** से अर्घेन संतृप्त।

अथ पञ्चमावरणम् – **ॐ सर्वोप्सित फलप्रदायक चक्र स्वामिनि पञ्चमावरण देवताभ्यो नमः** कहकर पुष्पाञ्जिलि अर्पण करें। पाँचों त्रिकोणों में प्रत्येक के कोणों का अर्चन करें।

प्रथम त्रिकोणे – **ॐ ऐं ह्रीं श्रीं क्रीं हूं ह्रीं श्रीकालीदेवी नित्यमयी श्री पादुकां पूजयामि नमः तर्पयामि स्वाहा। श्रीकपालिनीदेवी नित्यमयी.। कुल्ला देवी नित्यमयी.।** द्वितीय त्रिकोणे – **कुरुकुल्लादेवी नित्यमयी.। विरोधिनीदेवी नित्यमयी.। विप्रचित्तादेवी नित्यमयी.।** तृतीय त्रिकोणे – **उग्रादेवी नित्यमयी.। उग्रप्रभादेवी नित्यमयी.। दीप्तादेवी नित्यमयी.।** चतुर्थ त्रिकोणे – **नीलादेवी नित्यमयी.। घनादेवी नित्यमयी.। बलाकादेवी नित्यमयी.।** पञ्चम त्रिकोणे – **मात्रादेवी नित्यमयी.। मुद्रादेवी नित्यमयी.। मितादेवी नित्यमयी.।**

ॐ अभिष्ट सिद्धिं मे देहि शरणागत वत्सले। भक्त्या समर्पये तुभ्यं पञ्चमावरणार्चनम् ॥

पुष्पाञ्जलि देवें। **पूजिताः तर्पिताः सन्तुः** से अर्घेन संतृप्त।

अथ षष्ठमावरणम् – अष्टदल के मूल में – **ॐ त्रैलोक्यमोहन चक्रस्वामिनि षष्ठमावरण देवताभ्यो नमः। पुष्पं समर्पयामि** प्रत्येक नामाक्षर के पहिले **ॐ ऐं ह्रीं श्रीं क्रीं हूं ह्रीं (सात बीजाक्षर)** लगावें तथा **श्रीपा. पू. नमः तर्प. स्वाहा** बोलकर तर्पण करें।

ॐ ऐं ह्रीं श्रीं क्रीं हूं ह्रीं ब्राह्मीदेवी मयी श्री पादुकां पूजयामि नमः तर्पयामि स्वाहा। नारायणीदेवी.। माहेश्वरीदेवी.। चामुण्डादेवी.। कौमारीदेवी.। अपराजितादेवी.। वाराहीदेवी.। नारसिंहीदेवी.।

ॐ अभिष्ट सिद्धिं मे देहि शरणागत वत्सले। भक्त्या समर्पये तुभ्यं षष्टमावरणार्चनम् ॥

पुष्पाञ्जलि देवें। **पूजिताः तर्पिताः सन्तुः** से अर्घेन संतृप्त।

अथ सप्तमावरणम् – (अष्टदल के मध्य में) –

ॐ सर्व संक्षोभण चक्र स्वामिनि सप्तमावरण देवताभ्यो नमः। पुष्पाञ्जली समर्पयामि। **ॐ ऐं ह्रीं श्रीं क्रीं हूं ह्रीं असिताङ्ग भैरवमयी श्री पादुकां पूजयामि नमः तर्पयामि स्वाहा। रुरुव भैरवमयी.। चण्ड भैरवमयी.। क्रोध भैरवमयी.। उन्मत्त भैरवमयी.। कपालि भैरवमयी.। भीषण भैरवमयी.। संहार भैरवमयी.।**

ॐ अभिष्ट सिद्धिं मे देहि शरणागत वत्सले। भक्त्या समर्पये तुभ्यं सप्तमावरणार्चनम् ॥

पुष्पाञ्जलि देवें। **पूजिताः तर्पिताः सन्तुः** से अर्धेन संतृप्त।

अथ अष्टमावरणम् – (अष्टदल के अग्रभाग में) – **ॐ सर्व सौभाग्य दायक चक्र स्वामिनि अष्टमावरण देवताभ्यो नमः।** इस प्रकार कहकर पुष्पाञ्जली प्रदान करें।

ॐ ऐं ह्रीं श्रीं क्रीं हूं ह्रीं हेतु वटुकानन्दनाथमयी श्रीपादुकां पूजयामि नमः तर्पयामि। त्रिपुरान्तकानन्दनाथवटुकमयी.। वेतालवटुकानन्दनाथमयी.। वह्निजिह्वानन्दनाथवटुकमयी.। कालानन्दनाथ वटुकमयी.। करालानन्दनाथवटुकमयी.। एकपादानन्दनाथवटुकमयी.। भीमानन्दनाथवटुकमयी.।

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सले। भक्त्या समर्पये तुभ्यं अष्टमावरणार्चनम् ॥

पुष्पाञ्जलि देवें। **पूजिताः तर्पिताः सन्तुः** से अर्धेन संतृप्त।

अथ नवमावरणम् – अष्टदल के बाहर – **ॐ सर्वार्थदायक चक्र स्वामिनि नवमावरण देवताभ्यो नमः।** पुष्पाञ्जिली प्रदान करें। नाम मंत्रों के आरंभ में **ॐ ऐं ह्रीं श्रीं क्लीं हूं फट् स्वाहा, अमुक योगिनि देवीमयी श्री पादुकां पूजयामि नमः तर्पयामि स्वाहा'** जोड़ें।

ॐ ऐं ह्रीं श्रीं क्लीं हूं फट् स्वाहा सिंह व्याघ्रमुखी योगिनि देवीमयी श्री पादुकां पूजयामि नमः तर्पयामि स्वाहा। सर्पमुखी योगिनी देवीमयी.। मृगमेषमुखी योगिनी देवीमयी.। गजवाजिमुखी योगिनी देवीमयी.। विडालमुखी योगिनी देवीमयी.। क्रोष्टामुखी योगिनी देवीमयी.। लंबोदरीमुखी योगिनी देवीमयी.। ह्रस्वजंघा तालजंघा प्रलम्बोणी.।

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सले। भक्त्या समर्पये तुभ्यं नवमावरणार्चनम् ॥

पुष्पाञ्जलि देवें। **पूजिताः तर्पिताः सन्तुः** कहकर अर्धेन संतृप्त।

अथ दशमावरणम् – भूपूर में पूर्वादिक्रमेण (**सर्व संक्षोभण चक्र स्वामिनि दशमावरणम् देवताभ्यो नमः** पुष्पांजलि देवें)

ॐ ऐं ह्रीं श्रीं क्रीं हूं ह्रीं वज्र सहिताय इन्द्रमयी देवी श्री पादुकां पूजयामि नमः तर्पयामि स्वाहा। शक्तिसहिताय अग्निमयी देवी.। दण्डसहिताय यममयी देवी.। खड्गसहिताय निर्ऋतिमयी देवी.। पाशसहिताय वरुणमयी देवी.। अङ्कुशसहिताय वायुमयी देवी.। गदासहिताय कुबेरमयी देवी.। त्रिशूलसहिताय ईशानमयी देवी.। पद्मसहिताय ब्रह्ममयी देवी.। चक्रसहिताय अनन्तमयी देवी पादुकां पूजयामि नमः तर्पयामि स्वाहा।

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सले। भक्त्या समर्पये तुभ्यं दशमावरणार्चनम् ॥

पुष्पाञ्जलि देवें। **ॐ सर्वरक्षाकर चक्रस्वामिने दशमावरण देवताभ्यो नमस्ते नमस्ते स्वाहा।** पूजिताः तर्पिताः **सन्तु** से जल छोड़ें।

सब देवताओं का पूजन तर्पण करने के बाद तीन पुष्पाञ्जलियाँ देवे।

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सले। भक्त्या समर्पये तुभ्यं अमुकावरणार्चनम् ॥

एकादशावरणम् – देवी के दाहिने भाग में धूम्रवर्ण महाकाल का ध्यान करे।

बिभ्रतं दण्ड खट्वाङ्गौ दंष्ट्रा भीममुखे शिशुम्। व्याघ्रचर्मावृत कटिं तुन्दिलं रक्तवाससम् ॥
त्रिनेत्रमूर्ध्वकेशं च मुण्डमाला विभूषितम्। जटाभार लसच्चन्द्रं खड्गमुग्र ज्वलन्निभम् ॥

निम्न मंत्र से पाद्यादि उपचारों से उनका पूजन करें। **हुं क्ष्रौं यां रां लां वां क्रों महाकाल भैरव सर्वविघ्नान् नाशय नाशय ह्रीं श्रीं फट् स्वाहा।**

तदनन्तर देवी के अस्त्रों का पूजन करें- देवी के वामभाग में ऊपर के हाथ में **''ॐ खड्गाय नमः''** और नीचे के हाथ में **''ॐ मुण्डाय नमः''**। देवी के दाहिने भाग के ऊपर के हाथ में **''ॐ अभयाय नमः''** और नीचे के हाथ में **''ॐ वराय नमः''** से पूजन करें।

द्वादशावरणम् - भूपुर के चारों द्वारों एवं ईशान में पूजन करें। यथा - **ॐ ऐं ह्रीं श्रीं क्रीं हूं ह्रीं बटुकानन्दनाथमयी श्री पा. पू.। योगिनी.। क्षेत्रपालानन्दनाथ.। गणनाथानन्दनाथ.। सर्वभूतानन्दनाथ.।**

पश्चात् धूप दीपादि से नैवेद्यादि पर्यन्त पूजन करे। आरती करे। पुष्पांजलि देवे। मूलमंत्र का जप कर देवि के अर्पण करें-

ॐ गुह्याति गुह्य गोप्त्री त्वं गृहाणास्मत् कृतं जपम्। सिद्धिर्भवतु मे देवि त्वत्प्रसादात् महेश्वरि॥ वीराचार कर्म वाले पंचमकारों का पूजन कर रात्रि में शिवाबलि कर्म करें। जप के बाद स्तव एवं कवच का पुनः पाठ करें। तब देवी के अङ्ग में आवरण देवताओं को विलीन कर संहार मुद्रा से **''श्री दक्षिण कालिके देवि! क्षमस्व**। इस मंत्र से हृदय में देवी का विर्सजन करता हुआ और पुष्प के सहित देवी का तेज अपने हृदय में स्थापित करें।

ईशान कोण में उच्छिष्ट चाण्डालिनी को नैवद्य प्रदान करें।

मंत्र- ॐ उत्तरे शिखरे देवि! भूम्यां पर्वतवासिनी। '' ब्रह्मयोनि समुत्पन्ने गच्छ देवि ममान्तरम्॥ अवशिष्ट प्रसाद ग्रहण करे। पादोदक पान कर निर्माल्य मस्तक पर धारण करे। यंत्र का चंदनादि वाम हस्त में लेकर दाहिने हाथ की कनिष्ठा से **''ह्रीं''** बीज लिखकर उसी अंगुलि से अपने लगावे।

मंत्र- ॐ यं यं स्पृशामि पादाभ्यां यो मां पश्यति चक्षुषा। स एव दासतां यातु राजानो दुष्ट दस्यवः॥ कहीं कहीं दासतां यातु के बाद **''स एव शक्र समोभवेत्''** भी पढा जाता हैं। दो लाख जप का पुरश्चरण कहा हैं।

जप का दशांश होम कनेर के फूलों से करे। जो साधक स्त्री के मदनावास (योनि)को देखते हुये १० हजार जप करता हैं वह बृहस्पति के समान होकर आयु एवं धनवृद्धि को प्राप्त करता हैं। नग्न होकर बालों को खुलाकर श्मशान में दश हजार जप करने से सभी कामनायें सिद्ध होती हैं। श्मशान में मुर्दे के हृदय पर बैठकर अपने वीर्य से युक्त एक हजार मदार (अर्क) के पुष्पों से देवी का पूजन भक्ति पूर्वक एक एक पुष्प अर्पण करते हुये करें तो पृथ्वीपति हो जाता हैं। रजस्वला स्त्री के भग को देखता हुआ दश हजार जप करे कवि होंवे। हविष्यान्न का सेवन करता हुआ जप करे तो विद्या, लक्ष्मी एवं यश को प्राप्त करें। यदि भैंसे एवं पशुओं के रक्त से कालिका का तर्पण करता है उसको शीघ्र सिद्धि प्राप्त होंवे। यदि मंत्रवित् शव पर बैठकर एक लाख जप करे तो समस्त अभीष्ट को प्राप्त करें। जो सदा काली की पूजा करता हैं ऐसा मानों कि उसने पूर्वभव में ब्रह्मा, विष्णु, शिव, गौरी, लक्ष्मी, गणपति और सूर्य की उपासना करली हैं।

॥ २. भद्रकाली ॥

इस विद्या की उपासना पश्चिमाम्नाय मत से की जाती हैं। यह वैरिभय-निवारण के लिये प्रशस्त हैं। इसके चतुर्दशाक्षरी मंत्र के आदि में संहारसूचक रौद्र बीज **(हौं)** है। इसके दों रूप मुख हैं। **१. विपरीतप्रत्यंगिरा**

२. षोडशभुजी दुर्गाभद्रकाली।

१. विपरीतप्रत्यंगिरा- यह संहारात्मिका है, शत्रुकृत अभिचार को वापस लौटाती हैं एवं शत्रु का नाश करती है।

इसका विस्तृत विधान पुस्तक में पृथक से दिया गया हैं। विपरितप्रत्यंगिरा भद्रकाली का दूसरा ध्यान १४ अक्षर मंत्र में दिया गया हैं।

२. षोडशभुजी दुर्गाभद्रकाली– इसका कालिका पुराण में ''**योगनिद्रा महामाया...**'' ध्यान दिया गया हैं। यह दुर्गा स्वारूपा विद्या हैं। अतः जयदुर्गा के मंत्र और विधान से छहों आम्नायों द्वारा इसकी उपासना होती हैं। **यही महिषासुर मर्दिनी** हैं। इसकी उपासना से षट् ऐश्वर्य की प्राप्ति होती हैं। इसीको **चण्डी काली** भी कहते हैं। चामुण्डा को भी चण्डी काली कहते हैं। कोई कोई **चण्डिका** को भी **चण्डीकाली** कहते हैं। परन्तु चण्डिका व चामुण्डा में भेद हैं। चण्डिका ''**स्वाहा**'' स्वरूप हैं तथा चामुण्डा– ''**विच्चे**'' स्वरूप हैं।

षोडशभुजा दुर्गाभद्रकाली– (कालिका पुराणे) का ध्यान–

**योगनिद्रा महामाया जगद्धात्री जगन्मयी । भुजैः षोडशभिर्युक्ता भद्रकालीति विश्रुता ॥
क्षीरोदस्योत्तरे तीरे विभ्रती विपुलां तनुम् । अतसीपुष्पवर्णाभा ज्वलत्-काञ्चन - कुण्डला ॥
जटाजूटमखण्डेन्दु मुकुटत्रय-भूषिता । नागहारेण सहिता स्वर्णहार विभूषिता ॥
शूलं खड्गं च शंङ्खं च चक्रं वाणं तथैव च । शक्तिं वज्रञ्च दण्डं च नित्यं दक्षिण बाहुभिः ॥
विभ्रतीं सततं देवी विकाशि नयनोज्ज्वला । खेटकं चर्मचापं च पाशं चांकुशमेव च ॥
घण्टां च परशुञ्चैव मुशलं वाणपाणिभिः । सिंहस्था नयनैः रक्तवर्णैस्त्रिभिरभिज्ज्वला ॥
शूलेन महिषं भित्वा तिष्ठन्ती परमेश्वरी । वामपादेन चाक्रम्य तत्र देवी जगन्मयी ॥**

१. अष्टाक्षर– क्रीं भद्रकाली क्रीं स्वाहा। पुरश्चरण २२ अक्षरात्मक दक्षिण कालिका मंत्रवत्।

२. दशाक्षर– ॐ फ्रें स्त्रीं हुं ह्रीं क्रों आं ह्स्ख्फ्रे क्लीं ह्रीं। विधान दक्षिणकालिकावत्।

**सिंहोपरिसमासीनं मसीपुञ्ज समप्रभां । भ्रुकुट्यराल वदनां त्रीक्षणं घोरदर्शनाम् ।
शार्दूलत्वक् परीधानां विष्वग् विस्तारिताननां, अत्यन्तशुष्क सर्वाङ्गीं ललज्जिह्वा करालिनीम् ॥
त्रेतागर्तस्थिता त्र्यग्रसमान - नयनां शिवां, नरमुण्डावलीहारां नादापूरित पुष्कराम् ।
ज्वलद्धुतवहाकार विस्त्रस्त - कचसञ्चयां, नरास्थिकृत सर्वाङ्गभूषणां जगदम्बिकाम् ॥
कोटि कोटि महाघोरयोगिनीगण मध्यगां, कालीं दशभुजां सृक्क गलदरुधिरचर्चिताम् ।
खड्गं त्रिशूलं विशिखं शक्तिं दक्षिणतः स्मरेत्, फलकं डमरुं चापं कपालं वामतोऽपि च ॥
व्यादाय वदनं घोरं दंष्ट्राभिः पूरितान्तरं, लेलिहान चलद् विद्युत् समान रसनं महत् ।
दानवासुर दैत्यानां कोटिमर्बुदमेव च । धारयित्वा च धृत्वा च सार्द्धं कट -कटा खैः ॥
प्रक्षिप्य तत्र बाहुभ्यां चर्वयन्तीं हसन्मुखीं । गिलन्तीं पूरयन्तीं च पाताल तुलितोदराम् ॥**

चतुर्दशाक्षर – (१) हौं कालि महाकालि किलि किलि फट् स्वाहा। कुछ विद्वानों का मत हैं कि इसकी पूजा पद्धति दक्षिण कालिका की पद्धति से करे।

**क्षुत्क्षामा कोटराक्षि मसिमलिनमुखी मुक्तकेशीं रुदन्ती, नाहं तृप्ता वदन्ती जगदखिलमिदं ग्रासमेकं करोमि।
हस्ताभ्यां धारयन्ती ज्वलदनलशिखा सन्निभं पाशयुग्मम्, दन्तैर्जम्बूफलाभैः परिहरतु भयं पातु मां भद्रकाली॥**

यह प्रबल संहारिणी शत्रु निग्रह कारिणी हैं। हिन्दी तंत्रसार में इसकी महिमा बताते हुये पुरश्चरण मात्र एक हजार जप का बताया हैं।

(२) हौं कालि महाकालि कालि कालि फट् स्वाहा। फेत्कारिणी तंत्रम् में उपरोक्त ध्यान में कुछ पाठान्तर हैं। यथा- ''**पाशयुग्मम्**'' की जगह ''**पाशमुग्रं**'' बताया हैं।(**३) ह्रौं कालि महाकालि किलि किले फट् स्वाहा।** (मंत्र महार्णवे)। (४) इसी मंत्र के आगे ''ॐ'' लगाने से पंद्रह अक्षर का मंत्र बनता हैं। परन्तु मंत्र महार्णव में इसे ही १४ अक्षर का लिख दिया हैं। फेत्कारिणी तंत्र में एक अन्य ध्यान दिया गया हैं जो **विपरीत प्रत्यंगिरा** प्रयोग में भी काम आता हैं।

टङ्कं कपालं डमरुं त्रिशूलं संबिभ्रती चन्द्रकलावतंसा।
पिङ्गोर्ध्वकेशीऽसित धूमनेत्रा भूयाद् विभूत्यै मम भद्रकाली॥

पाठान्तर भेद से- ''**धूमनेत्रा**'' की जगह ''**भीमदंष्ट्रा**'' भी हैं।

विंशाक्षर - क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं भद्रकाल्यै क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा। उक्त मंत्रों की पूजा दक्षिण काली के समान ही बताई है।

॥ ३. गुह्यकाली ॥

अनाख्यारूपा गुह्यकाली के विषय में महाकाल संहिता के गुह्यकाली खण्ड में गुह्यकाली के मंत्रों के १८ भेद बताये हैं। ब्रह्मा, वशिष्ठ, राम, कुबेर, यम, भरत, रावण, बालि, वासव, विष्णु तथा अन्य देव दानवों ने इसकी उपासना की हैं। गुह्यकाली के कई भेद हैं। यथा- **एकमुखी, तीनमुखी, पंचमुखी, दशमुखी, बीसमुखी, तीसमुखी, छत्तीसमुखी, साठमुखवाली, अस्सीमुखवाली, शतमुखी** इत्यादि कई भेद हैं। ***इनमें भरत व राम द्वारा उपासित दशमुखी देवी का षोडशाक्षरी मंत्र श्रेष्ठ हैं।*** उनके ५४ भुजायें हैं। दशवक्त्रा गुह्यकाली को **सिद्धि कराली** भी कहते हैं। महाकाल संहिता में इसका **ध्यान** दिया हैं।

यथा- उत्तुङ्ग तरङ्गोवाले रक्तवारिधि के बीच रक्तमांस से पूरित रक्त बालुका मय द्वीप हैं। जिसमें नौ करोड़ चामुण्डाएँ एवं एक करोड़ भैरव क्रीड़ा कर रहे हैं। उसमें १० हजार योजन विस्तृत मण्डल हैं। इसके बीच सौ योजन लम्बा चौड़ा श्मशान हैं उसमें नक्षत्रमण्डल तक पहुंचाने वाली आग की ज्वालाऐं उठ रही हैं। असँख्य योगनियाँ ताली बजा रही हैं। उसके ऊपर रत्नजड़ित सिंहासन हैं, उसके ऊपर भारी सिंहासन हैं। जिसे इन्द्रादि दिक्पालों ने धारण कर रखा है। इसके ऊपर तीसरा सिंहासन है इसको ब्रह्मा, विष्णु, रूद्र, ईश्वर एवं सदाशिवादि पञ्चमहाप्रेतों ने धारण कर रखा हैं। इस सिंहासन के ऊपर भयानक भैरव पीठ है। भैरव का शरीर कृष्णवर्ण एवं स्थूल है, पञ्चवक्त्र एवं चतुर्भुज रूप हैं। त्रिनेत्र हैं, खट्वाङ्ग, कर्तृका, कपाल एवं डमरु धारण किये हुये हैं। उनके दंष्ट्राग्र बड़े भीषण हैं, मुण्डमाला लटक रही हैं। इसके ऊपर शिवासन है जो पीलीजटा वाले हैं। उनके ऊपर अष्टदल कमल में भगवती विराजमान हैं। यह दशमुखी देवी २७ नेत्रवाली हैं। वाम, दक्षिण और सम्मुख वाले मुखों में दो-दो नेत्र हैं और शेष सातमुखों में ३-३ नेत्र हैं। उर्ध्वमुख का नाम दीपक है जिसके ''**सिंह का मुख**'' हैं जो श्वेतवर्ण और भयंकर है। इसके नीचे ''**शृगालमुख**'' है जो कृष्णवर्ण हैं एवं त्रिलोक को डराने वाला हैं। इसके वामभाग में ''**वानरमुख**'' हैं। इसके नीचे ''**मदोत्कट मनुष्य का मुख**'' हैं। दक्ष में ''**ऋक्षमुख**'' इसके वामभाग में ''**गरुड़ मुख**'' हैं। दक्षिण में ''**मकरमुख**'' इसके वाम भाग में ''**गजमुख**'' हैं जिससे मद निकल रहा हैं। दक्षिण में ''**हयमुख**'' है जो श्याम वर्ण हैं। इन मुखों की दंष्ट्राएं भीषण हैं और मुखों से दारुण शब्द और अटटाहास निकल रहे हैं। रुधिर का निस्सरण हो रहा हैं जिह्वाएं बाहर निकल रही हैं। भयङ्कर शब्द करने वाली, भ्रूभङ्गयुक्तमुखी पीलीजटा धारण किये भाल में अर्धचन्द्र भूषित २७ नरमुण्डों की नक्षत्रमाला तथा गले से गुल्फ

पर्यन्त लटकने वाली मुण्डमाला से सुशोभित कठोर पिङ्गलोत्तुङ्ग कुचयुगा, विशाल जघनाभोगा, अस्त्रों में गुंथे हुये अनेक शिरों की किङ्किणी से मण्डित ५४ भुजाओं वाली भुशुण्डी, धनुष, चक्र, घण्टा, बालप्रेत, शैल, नरक, काल, नकुल, सर्प, उन्मादवशिका, मुद्गर, अग्निकुण्ड, डमरु, डिण्डिम, भिन्दिपाल, मुशल, पाश, पट्टिश, माला, कर्त्री, असि, तर्जनी, अंकुश, दण्ड रत्नकुंभ, त्रिशूल, पञ्चपाशुपतवाण (१. शोषक २. मूर्द्दक ३. उन्माद ४. संहारक ५. मृत्युकारक) पुष्पमाला, गृध्र, कमण्डलु, मांसखण्ड, स्रुवा, वीजापुर, स्रुच, परशु, गदा, यष्टि, मुष्टि, कुणपशव इत्यादि आयुधों को अपने करों में धारण किये हुये हैं। आदि अनादि अनाख्या स्वरूपा नवयौवना पञ्चवक्त्र के मध्य में विराजमान परमेश्वरी का ध्यान करना चाहियें।

१. नवाक्षर - (१) क्रीं गुह्ये कालिके क्रीं स्वाहा। २. क्रीं गुह्य कालिके क्रीं स्वाहा।

२. दशाक्षर - क्रीं दक्षिणे कालिके क्रीं स्वाहा।

३. चतुर्दशाक्षर - (१) क्रौं हूं ह्रीं गुह्ये कालिके हूं हूं ह्रीं ह्रीं स्वाहा। (२) क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं गुह्ये कालिके स्वाहा।

४. पञ्चदशाक्षर - (१) क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणे कालिके स्वाहा। (२) हूं ह्रीं गुह्ये कालिके क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा। दशवक्त्रा गुह्यकाली का साधारण ध्यान इस प्रकार हैं।

ध्यायेन्नीलोत्पल श्यामामिन्द्र नील समद्युतिम्। धनाधनतनु द्योतां स्निग्ध दूर्वादलद्युतिम् ॥
ज्ञानरश्मिच्छटा - टोप ज्योतिमण्डल मध्यगाम्। दशवक्त्रां गुह्यकालीं सप्तविंशति लोचनाम् ॥

५. षोडशाक्षर - यह राम एवं भरतोपासिता विद्या भी कहीं गई हैं। इसका ध्यान पञ्चदशाक्षर मंत्रवत् हैं। प्रधान ध्यान गुह्यकाली का पूर्व में भाषा टीका में दिया गया हैं। **१. क्रीं हूं ह्रीं गुह्ये कालिके क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा। (विश्वसार तंत्रे) २. क्लीं हूं ह्रीं गुह्ये कालिके क्लीं क्लीं हूं हूं ह्रीं ह्रीं स्वाहा।** हिन्दी तंत्रसार में ''**क्रीं**'' की जगह ''**क्लीं**'' प्रयोग में लिया हैं। कामबीज को ''**क्लीं**'' कहते हैं परन्तु कोष के अनुसार ''**क्रीं**'' को भी काम बीज कहते हैं अतः मंत्रों में **क्रीं** की जगह **क्लीं** भी प्रयोग में आया हैं।

६. अष्टदशाक्षर :- ह्रीं क्रीं फ्रें हूं क्रों गुह्यकालि क्रीं छ्रीं ह्स्ख्फ्रे फ्रों छ्रीं क्रीं स्वाहा। महाकाल संहिता में ध्यान इस प्रकार हैं-

आपाद पद्मादारभ्याकण्ठं पाटल सन्निभा, मुखे दूर्वादलश्यामा जटाभार विराजिता ।
शवोपरि समासीना किञ्चिद् विस्तारिताननना, दशभिर्वदनैर्युक्ता त्रि त्रिचक्षुर्विराजितैः ॥
मुण्डकुण्डल संवीता सर्वेषु वदनेष्वपि, नरास्थि विहिनकल्पा कल्प कल्पक्षयङ्करा ।
सर्वत्र लंबित जटा सर्वत्रापदितारिणी, किञ्चिच्छुष्क गलोद्देशा किञ्चिदाकुञ्चिताननना ॥
पिचिण्डिला निम्ननाभिर्नाति पीनपयोधरा, स्थूलोरु जङ्घा विकटा सर्वाभरण भूषिता ।
अदीर्घ षोडशापीन दोर्मण्डल विराजिता, नीलाम्बर परीधाना नीलस्त्रग गन्धलेपना ॥
शिवापोतं च खट्वाङ्गं गदामंकुशमेव च, घण्टां नृमुण्डं वामेन दधती खर्पराभये ।
खड्गं त्रिशूलं चक्रं च नागपाशं ततः परं, जपमालां च डमरुं कर्त्रिकां वरमेव च ॥
धारयन्ती दक्षिणेनोपविष्टा कुणपोपरि, योगपट्ट समुन्नब्द्ध जानुमध्य कराम्बुजा ।
समस्त विग्रह व्यापि मुण्डमाला विराजिता, सर्वकामप्रदा देवी सर्वसिद्धि विधायिनी ॥

७. एक विंशाक्षर- क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं गुह्ये कालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा। ध्यान उपरोक्त तथा पूजा दक्षिण काली के समान। (महाकाली २० अक्षर मंत्र में गुह्यकाली ध्यान है)

८. द्वाविंशाक्षर - क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा। यहां दक्षिण काली व गुह्यकाली अभिन्न हैं अत: ध्यान गुह्यकाली का कर पूजा दक्षिणकालिका के २२ अक्षर मंत्रवत् करें। अथवा महाकाली यंत्रवत् करें।

॥ ४. महाकाली ॥

गुह्यकाली, भद्रकाली, श्मशान काली, महाकाली की पूजा एक ही प्रकार के यन्त्र से होती हैं। दक्षिण कालिका के यंत्र के समान पहले पाँच त्रिकोण, उसके बाहर तीन वृत्त फिर केशरयुक्त अष्टदल योनि मण्डल के मध्य में अंकित करें। इसके बाहर तीन रेखावाला भूपूर बनावे।

१. एकाक्षर- क्रीं

२. त्र्यक्षर - (१) ऐं क्रीं ह्रीं (२) क्रीं हूं ह्रीं (३) ॐ ह्रीं ह्रीं। उपासकों को यहां तृतीय मंत्र से समझना चाहिये कि भुवनेश्वरी बीज के साथ यदि कालिका का ध्यान किया जायेगा तो यह काली भुवनेश्वरी के समान फल देगी।

विनियोग:- **अस्य मंत्रस्य भैरवऋषिः, उष्णिक् छन्दः, महाकाली देवता, पुरुषार्थ चतुष्टय सिद्ध्यर्थे जपे विनियोगः। क्रां, क्रीं, क्रूं, क्रैं, क्रौं, क्रः से षडङ्गन्यास करे।** कङ्काल मालिनी तंत्र के अनुसार ध्यान इस प्रकार है।

हिमालयगिरेर्मध्ये नगरे भैरवस्य च, दिव्यस्थाने महापीठे मणिमण्डप - राजिते।
नारदाद्यैर्मुनि श्रेष्ठैः संसेवित पदाम्बुजां, नीलेन्दीवर वर्णिनी युग्मापीन तुङ्गस्तनीम् ॥
सुप्त श्रीहरिपीठ राजितवतीं भीमां त्रिनेत्रां शिवां, मुद्रा खड्गकरां वराभययुतां
चित्राम्बरीद्दीपिनीम्। वन्दे चञ्चल चन्द्रकान्त मणिभिर्मालां दधानां पराम्॥

३. त्रयोदशाक्षर - फ्रें फ्रें क्रों क्रों पशून् गृहाण हुं फट् स्वाहा। तंत्र में अज्ञानी दुराचारी को भी पशु संज्ञा से संबोधित किया जाता हैं।

४. चतुर्दशाक्षर - (१) ॐ क्षें क्षें क्रें क्रें पशुं गृहाण हुं फट् स्वाहा। "मेरुतंत्र" के अनुसार इसमें ऋषि न्यासादि की आवश्यकता नहीं हैं।

अस्य विधानम् - कालेघट को कृष्णजल से भरे उसमें कालिका का आवाहन कर ब्राह्मी आदि अष्टमातृकाओं एवं दूतियों का पूजन कर ध्यान करें-

पञ्चवक्त्रां महारौद्रीं प्रतिवक्त्रं त्रिलोचनां,
शक्ति शूल धनुर्बाण खेट खड्ग वराभयान्।
वाम दक्षभुजैर्देवी बिभ्राणां भोगि भूषणाम्॥

१४ लाख जप कर कुलाचार से पूजन करे पिचुमन्द समिधा से घृताक्त होम करे।

(२) ॐ फ्रें फ्रें हूं हूं पशुं गृहाण हुं फट् स्वाहा। फेंत्कारिणी तंत्र में उपरोक्त ध्यान के अलावा ४ चरण अधिक है। यथा -

अर्द्धचन्द्रां जटायुक्तां जिह्वाललन भीषणां, निर्मांस मेदुरामस्थिपञ्जरां मुण्डमालिनीम् । मत्तव्यालोपवीताङ्गी भूतवेतालवेष्टितां, मेदो - वसावलिप्ताङ्गी महाप्रेताधिरूढाम् ॥

होम पिचुमर्द, विभीतक एवं चित्रकाष्ठ की समिधा से करे।

(३) कालि कालि महाकालि चण्डयोगेश्वरि। यह मंत्र महाभय से मुक्ति देता हैं।

नीलवर्णा महाकालि त्रिमुख नवलोचना । पीतं तु दक्षिणं वक्त्रमुत्तरं पावकोपमम् ॥ बद्धपद्मासना देवी पनोन्नत पयोधरा । वामहस्तेकपालं च रक्तपूर्णं तु शोभने ॥ धारयन्ती त्रिशूलं च स शवं दक्षिणे करे । चक्रं च दक्षिणे हस्ते अंकुश मुद्गरं तथा ॥ वामे पाशं च खट्वाङ्गं मृतबालं च धारिणी ।

विंशाक्षरः- (१) क्लीं क्लीं क्लीं हूं हूं ह्रीं ह्रीं महाकालि क्लीं क्लीं क्लीं हूं हूं ह्रीं ह्रीं स्वाहा । हिन्दी तंत्रसार में ''**क्रीं**'' के बजाय यहां ''**क्लीं**'' बीज कहा हैं। भद्रकाली आदि देवताओं का पूजन ध्यान कर जप विधान दक्षिण कालिकावत् करे।

महामेघप्रभां देवीं कृष्णवस्त्रपिधायिनीम् । लोलजिह्वां घोरदंष्ट्रां कोटराक्षीं हसन्मुखीम् ॥ नागहार लतोपेतां चन्द्रार्द्धकृतशेखराम्। द्यां लिखन्तीं जटामेकां लेलिहाना शलं स्वयम् ॥ नाग यज्ञोपवीताङ्गीं नागशय्या निषेदुषीम् । पञ्चाशन्मुण्ड संयुक्तं - मालां महोदरीम् । सहस्त्रफण संयुक्तमनन्तं शिरसोपरि । चतुर्दिक्षु नागफण वेष्टितां गुह्यकालिकाम् ॥ तक्षक सर्पराजेन वामकङ्कणभूषिताम् । अनन्त नागराजेन कृत दक्षिण कङ्कणाम् ॥ नागेन रशनाहार कल्पितां रत्ननूपुराम् । वामे शिवस्वरूपं तत् कल्पितं वत्सरूपकम् ॥ द्विभुजां चिन्तयेद् देवी नाग यज्ञोपवीतिनीम् । नरदेह समाबद्ध कुण्डल श्रुति मण्डिताम् ॥ प्रसन्नवदनां सौम्यां नवरत्न विभूषिताम् । नारदाद्यैर्मुनि गणैः सेवितां शिवमोहिनीम् । अट्टाटहासां महाभीमां साधकाभीष्ट दायिनीम् ॥

(२) क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं महाकालि क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा। इसका जप पूजन दक्षिण कालीवत् ही हैं। विशेष बात यह हैं कि भूपूर में इन्द्रादिदेवों एवं उनके आयुधों के पूजन पश्चात् **पूर्वादि चार द्वारों विष्णु, शिव, सूर्य और गणेश की पूजा करे।** 'श्री विद्यार्णवतंत्र' में यन्त्रोद्धार इस प्रकार दिया हैं।

त्रिकोणं चैव षट्कोणं नवकोणं मनोहरम् । त्रिवृत्तं चाष्टपत्रं च सुकिञ्जल्क समन्वितम् ॥ भूपूर त्रितयारूढं योनिमण्डल मण्डितम् । त्रिपञ्चारमिदं चक्रं सर्वतंत्रेषु कीलितम् ॥

॥ ५. श्मशान काली ॥

१. सप्ताक्षर - क्लीं कालिकायै नमः ॥

२. दशाक्षर - क्रीं श्मशान कालिके क्रीं स्वाहा ॥

३. एकादशाक्षर - (१) ऐं श्रीं ह्रीं क्रीं कालिके ऐं श्रीं ह्रीं क्रीं ॥ (का. कल्पतरू) **(२) ऐं ह्रीं श्रीं क्लीं**

कालिके क्लीं श्रीं ह्रीं ऐं॥ (हि. तंत्र.)

विनियोगः– अस्य मंत्रस्य भृगुः ऋषिः, निवृतिश्छंदः, श्मशानकालिका देवता, ऐं बीजं, ह्रीं शक्तिः, क्रीं कीलकं चतुर्वर्ग सिद्धये जपे विनियोगः।

अंजनाद्रिनिभां देवीं श्मशानालय - वासिनीम् । रक्तेनेत्रां मुक्तकेशीं शुष्कमांसति भैरवाम् ॥
पिङ्गाक्षीं वामहस्तेन मद्यपूर्णं स मांसकम् । सद्यः कृत्त शिरो दक्षहस्तेन दधतीं शिवाम् ॥
स्मितवक्त्रां सदा चाममांसचर्वण तत्पराम् । नानाऽलङ्कार भूषाङ्गीं नग्नां मत्तां सदाऽऽसवैः ॥

४. चतुर्दशाक्षर - (१) ॐ हूं ह्रीं क्लीं श्मशान कालिके ॐ हूं ह्रीं क्लीं। (२) ॐ हूं ह्रीं क्लीं श्मशान कालिके क्लीं ह्रीं हूं ॐ फेत्कारिणी तंत्र के अनुसार मंत्र के ऋषि भैरव, छन्द त्रिष्टुप्, देवता श्मशान कालिका, क्रीं बीज, हूं शक्तिः, सकलसिद्धये विनियोग हैं। ३. क्रीं क्रीं क्रीं श्मशान कालिके क्रीं क्रीं क्रीं स्वाहा।

४. एक विंशत्यक्षर - (१) क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं श्मशान काल्यै क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा। (२) क्लीं क्लीं क्लीं हूं हूं ह्रीं ह्रीं श्मशान कालि क्लीं क्लीं क्लीं हूं हूं ह्रीं ह्रीं स्वाहा।

'हिन्दी तंत्रसार' में मंत्र के ऋष्यादि व ध्यान ११ अक्षर मंत्रवत् बताये हैं। पूजा यंत्र बनाने के लिये पहले अष्टदलपद्म बनाये उसके बाहर वृत्त एवं चारद्वार युक्त भूपूर बनाये। **अष्टदल** के प्रत्येक दल में, **क वर्ग, च वर्ग, ट वर्ग, त वर्ग, प वर्ग, य वर्ग, श वर्ग, लं क्षं** लिखे। भूपूर के चारों कोणों में **ऐं ह्रीं श्रीं क्लीं** ये चार बीज लिखे। (११ अक्षर मंत्र में विशेष)। **अष्टदल** में ब्राह्मी आदि अष्टमातृका एवं असितांगादि अष्टभैरवों का पूजन करे। इसके बाद 'भूपुर' में इन्द्रादि दश दिक्पालों की तथा उनके आयुधों का पूजन कर जप करे। इसकी पूजा बलिकर्म श्मशान में अधिक फलदायी है। गृहस्थ घर में पंच मकारों के साथ पूजन कर नग्न हो शान्त चित्त से मंत्र जप करें।

॥ ६. कामकला काली ॥

१. षोडशाक्षर - ह्रीं फ्रें क्रों वं छ्रीं स्त्रीं हूं स्फ्रों खफ्रें हस्खफ्रें क्ष्रौं स्हौं फट् स्वाहा।

विनियोगः– अस्य मंत्रस्य सनक ऋषिः, प्रतिष्ठा छंदः, कामकलाकाली देवता, ह्रीं शक्तिः, ग्लूं कीलकं सर्वाभीष्ट सिद्धये जपे विनियोगः।

२. सप्तदशाक्षर - ॐ ऐं ह्रीं श्रीं क्रीं क्लीं हूं छ्रीं स्त्रीं फ्रें क्रों हौं क्षौं आं स्फ्रों स्वाहा।

विनियोगः– अस्य मंत्रस्य कर्दम ऋषिः, वृहती छंदः, कामकलाकाली देवता, ह्रीं शक्तिः, हूं कीलकं, सर्वाभीष्ट सिद्धये जपे विनियोगः।

३. अष्टादशाक्षर - क्लीं क्रीं हूं क्रों स्फ्रों कामकला कालि स्फ्रों क्रों हूं क्रीं क्लीं स्वाहा।

विनियोगः– अस्य मंत्रस्य महाकाल ऋषिः, वृहती छन्दः, त्रैलोक्याकर्षिणी कामकला काली देवता, क्लीं बीजं, हूं शक्तिः, सर्वत्र सर्वदा सर्वाभीष्ट सिद्ध्यर्थे जपे विनियोगः।

महाकाल ने काली उपासना में इस काली की साधना को मुख्य माना हैं।

षडङ्गन्यास– क्लां, क्लीं, क्लूं, क्लैं, क्लः से षडङ्गन्यास करे। 'महाकाल संहिता' में भगवती का ध्यान २७ श्लोकों में वृहतरूप से दिया हैं।

यथा – कामकला काली काशी शरीर कोयल एवं पके हुये जामुन के समान श्याम वर्ण का हैं। केश घने हैं, रक्तवर्ण के प्रज्वलित त्रिनेत्र हैं। शारदीय पूर्ण चन्द्र के समान मुखमण्डल की कांति है। दीर्घदंष्ट्रा एवं लंबी जिह्वा से वे विकराल लगती है। कंधों पर पड़े नरमुण्ड की बहती रक्त धारा का पान कर रही हैं। गले में अस्थिमाला हैं तथा शवों की लंबी अंगुलियों से वक्ष ढँका हुआ हैं। क्षीण कटिप्रदेश तथा जंघाएँ विशाल हैं। १६ भुजायें है। दाहिने हाथों में क्रमशः खड्ग, त्रिशूल, चक्र, वाण, अंकुश, जिह्वा, कैंची, अक्षमाला तथा बाँयें हाथों में पाश, फरसा, नाग, धनुष, मुद्गर, शिवापीत, वसारक्त मेदपूर्ण खप्पर, नरमुण्ड लिये हुये है। शवपञ्जर के नुपूर हैं। श्मशान भूमि में प्रज्वलित अग्नि के मध्य अधोमुख लेटे हुये विशाल शव के ऊपर वे प्रत्यालीढ पद से विराजमान है। बाएं और दाँए भयङ्कर शिवाएँ है। जिनके मुख से अग्निज्वाला निकल रही है वे दिगम्बर एवं मुक्तकेशी हैं।

॥ अथ यंत्रार्चनम् ॥

वज्रदल में पद्म उल्टा बनताहै। अर्थात् पद्म के पत्रों का मुंह अन्दर की ओर करके बनता है। पूजा यंत्र हेतु एक के ऊपर एक करके ३ त्रिकोण बनाये, उनके ऊपर अष्टदल बनाये उसके बाद अष्टवज्रदल पश्चात् चार द्वार युक्त भूपूर बनाये। यंत्रोद्धार इस प्रकार है –

भूपुरे वसुवज्राढ्ये पद्ममष्ट दलान्वितम् । केसरणि प्रकल्प्यानि तत्रान्तश्चापि कर्णिका ॥
कर्णिकान्तस्त्रिकोणस्य त्रितयं पृथगेव हि । वहिस्त्रिकोण कोणेषु लिखेद् बीजत्रयं शुभम् ॥
मायाबीजं तु वामे स्यात् क्रोधबीजं च दक्षिणे । अधः पाशं विनिर्दिश्य कन्दर्पाणं तु मध्यतः ॥
तदन्तः स्थापिनी देवी तत्र सर्वं प्रतिष्ठितम् । एतद् यंत्रं महादेवि सर्वकाम फलप्रदम् ॥

अर्थात् बाहरी त्रिकोण के वामभाग में "**ह्रीं**" दक्षिण कोण में "**हूं**" नीचे के कोण में "**आं**" एवं मध्य में "**क्लीं**" लिखे। यंत्र को शुद्धकर दक्षिण कालिका २२ अक्षर वत् नव पीठ देवियों का पूजन कर। मूलमंत्र व ध्यान युक्त देवी का आवाहन करे।

कल्पान्तकारिणीं कालीं महारौरव रूपिणीम् । महाभीमां दुर्निरीक्ष्यां सेन्द्रैरपि सुरासुरैः ॥
शत्रुपक्ष क्षयकरीं दैत्यदानव सूदनीम् । चिन्तये दीदृशीं देवीं कालीं कामकलाऽभिधाम् ॥

॥ श्री कामकला काली यन्त्रम्

प्रथममावरणम् – गुरु मण्डल का पूजन करे। पश्चात् **क्लां, क्लीं, क्लूं, क्लैं, क्लौं, क्लः से हृदय, शिर, शिखा, कवच एवं अस्त्रशक्ति** का पूजन यंत्र में मध्यभाग में करे।

द्वितीयवरणम् – (बाहर के त्रिकोण के तीन कोनों में) **ॐ संहारिण्यै नमः। ॐ भीषणायै नमः। ॐ मोहिन्यै नमः।** (कोनों के सामने मध्य में) **ॐ कुरुकुल्लायै नमः। ॐ कपालिन्यै नमः। ॐ विप्रचित्तायै नमः।**

तृतीयावरणम् – (मध्य त्रिकोण के तीन कोनों में) **ॐ उग्रायै नमः। ॐ उग्रप्रभायै नमः। ॐ दीप्तायै नमः।** (कोनों के सामने मध्य में) **ॐ नीलायै नमः। ॐ घनायै नमः ॐ बलाकायै नमः।**

चतुर्थावरणम् – (अंतः त्रिकोण के वामपार्श्व में) **ॐ ब्राह्मै नमः। ॐ नारायण्यै नमः। ॐ माहेश्वर्यै नमः।** (दक्षिण पार्श्वे) **ॐ चामुण्डायै नमः। ॐ कौमार्यै नमः। ॐ अपराजितायै नमः।** (अधोभाग में) **ॐ वराह्यै नमः। ॐ नारसिंह्यै नमः। ॐ इन्द्राण्यै नमः।** ये सभी देवता खड्ग कपाल लिये मुण्डमाला धारण किये हुये जिनका वर्ण श्याम है।

पंचमावरणम् – (अष्टदले)– **ॐ असिताङ्ग भैरवाय नमः। ॐ रूरु भैरवाय नमः। ॐ चण्ड भैरवाय नमः। ॐ उन्मत्त भैरवाय नमः। ॐ क्रोध भैरवाय नमः। ॐ कपालि भैरवाय नमः। ॐ भीषण भैरवाय नमः। ॐ सम्मोहन भैरवाय नमः।** ये सभी द्विभुज और कैंची तथा खर्पर लिये हुये हैं।

षष्ठमावरणम् – (अष्टदल के दो दलों के मध्य में) **ॐ एकपदाय नमः। ॐ विरूपाक्षाय नमः। ॐ भीमाय नमः। ॐ सङ्कर्षणाय नमः। ॐ चण्डघण्टाय नमः। ॐ मेघनादाय नमः। ॐ वेगमालाय नमः। ॐ प्रकम्पनाय नमः।** इन क्षेत्रपालों का पूजन तर्पण करें।

सप्तमावरणम् – (अष्टदलों के अग्रभाग में) **ॐ उल्कामुख्यै नमः। ॐ कोटराक्ष्यै नमः। ॐ विद्युज्जिह्वायै नमः। ॐ करालिन्यै नमः। ॐ वज्रोदर्यै नमः। ॐ तापिन्यै नमः। ॐ ज्वालायै नमः। ॐ जालन्धर्यै नमः।** इन योगनियों का पूजन करें।

(यंत्रोद्धार में अष्टवज्र दल का लेख है परन्तु पूजा नहीं दी गई है अतः कहीं कहीं इसे यंत्र में नहीं बनाया जाता है।)

अष्टमावरणम् – अष्टम आवरण में इन्द्रादि दश दिक्पालों का तथा नवमावरण में उनके आयुधों का पूजन करें पश्चात् मंत्र पुष्पांजलि प्रदान करें।

ॐ अभीष्ट सिद्धि मे देहि शरणगत वत्सले। भक्त्या समर्पये तुभ्यं अमुकावरणार्चनम्॥

कामकला काली के षोढान्यास, कवच, स्तोत्र, सहस्रनाम संपूर्णविधि "**महाकाल संहिता**" में दी गई हैं।

॥७. सिद्धिकाली (हंसकाली)॥

१. षडक्षर – "**ॐ ह्रीं क्रीं मे स्वाहा**" सिद्धि काली के इस मंत्र का ध्यानादि पूर्व में दक्षिणकाली षडक्षर मंत्र में दिया जा चुका है।

२. त्रयोविंशाक्षर – हंसकाली, सिद्धिकाली को दक्षिणकालिका का ही भेदरूप मानते हैं अतः मूलमंत्र दक्षिणकाली का ग्रहण कर ध्यान भिन्न दे दिया है।

१. ॐ क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा। कई विद्वान दक्षिणे कालिके की जगह "**हंस काली**" या "**हंसकालिके**" प्रयुक्त करते हैं। "**तोडल तंत्र**" में ध्यान इस प्रकार हैं–

हंसः परब्रह्मरूपः साकारः हंसरूपकः। तारश्चक्रुर्वरारोहे निगमागम पक्षवान्॥ शिवशक्तिपदद्वंद्व विन्दुत्रय - विलोचनम्। एवं हंसो मणिद्वीपे तस्य क्रोड़े परः शिव॥ वामभागे सिद्धिकाली सदानन्द - स्वरूपिणी। तस्याः प्रसादमासाद्य सर्वकर्ता महेश्वरः॥

॥ ८. कङ्काली काली ॥

१. द्वादशाक्षर - ॐ काली कङ्काली किल किले स्वाहा।

२. त्रयोदशाक्षर - ॐ ह्रीं काली कङ्काली किल किल स्वाहा।

३. चतुर्दशाक्षर - (१) ॐ काली महाकाली केलिकलाभ्यां स्वाहा। (२) ॐ ह्रीं काली कङ्काली किल किल फट् स्वाहा।

४. पञ्चदशाक्षर - (१) क्लीं कालि कालि महाकालि कोले किन्या स्वाहा। (२) ॐ कां काली महाकाली केलिकलाभ्यां स्वाहा। उड्डामहेश्वर तंत्र व काली कल्पतरु में १० हजार जप का पुरश्चरण कहा है। दिन में १० हजार जप कर शाम को हवन करें। इसके होम में न्यासादि की आवश्यकता नहीं बतायी। यह विद्या शीघ्र सिद्धिप्रदा हैं। कहा है - **संध्याकाले सहस्त्रैकं होमयेत् ततः कङ्काली वरदा भवति, सुवर्ण चतुष्टयं प्रत्यहं ददाति॥**

॥ ९. रक्षा काली (निशाकाली) ॥

हिमाचल अरण्य में इत्यादि व अन्यत्र ग्रामों में देशग्राम की रक्षा हेतु पर्व मनाया जाता हैं। रात्रि पर्यन्त देवी का पूजन कर सूर्योदय पूर्व ही विसर्जन किया जाता हैं।

१. त्र्यक्षर - क्रीं ह्रीं ह्रीं। पूजन की विधि दक्षिणा काली के समान हैं।

चतुर्भुजां कृष्णवर्णां मुण्डमाला विभूषितां, खड्गं च दक्षिणे पाणौ विभ्रतीन्दीवर द्वयम् ।
कर्त्रीं च खर्परं चैव क्रमाद् वामेन विभ्रतीं, द्यां लिह्लतीं जटामेकां विभ्रतीं शिरसा द्वयम् ॥
मुण्डमालाधरां शीर्षे ग्रीवायामथ चापरां, वक्षाग्रे नागहारं च बिभ्रतीं रक्तलोचनाम् ।
कृष्णवस्त्रधरां कट्यां व्याघ्राजिन समन्वितां, वामपादं शवहृदि संस्थाप्य दक्षिणं पदम् ॥
विलप्य सिंहपृष्ठे तु लेलिहानासवं स्वयम् । साट्टाहासां महाघोरराव युक्तां सुभीषणाम् ॥

२. चतुरक्षर - ॐ ह्रीं ह्रीं श्रीं उक्त दोनों मंत्रों के **ऋषि दक्षिणमूर्ति, छंद पंक्ति, देवता "श्री निशाकाली" बीज ह्रीं, शक्ति ह्रीं, कीलक ॐ, राष्ट्ररक्षार्थे विनियोग** बताया हैं। इस मंत्र का ध्यान-

ॐ शवोपरि समासीनां मुण्डमाला विभूषितां, ध्यायेष्टभुजैर्युक्तां करपद्मे विराजिताम् ।
शक्तिशूल धनुर्वाण खड्ग खेटवराभयां, पञ्चवक्त्रां महारौद्रीं प्रतिवक्त्र त्रिलोचनम् ॥
प्रलयानल धूम्रामां कृष्णवर्ण विधायिनीं जटाजूट समायुक्त केशजालविराजिताम् ।
कृष्णवस्त्रधरां कट्यां नागपाशेन वेष्टितां, हास्य युक्तां निशाकालीं सदाघूर्णितलोचनाम् ॥

३. द्वा विंशत्यक्षर - त्रीं त्रीं त्रीं हूं हूं ह्रीं ह्रीं दक्षिणे कालिके त्रीं त्रीं त्रीं हूं हूं ह्रीं ह्रीं स्वाहा। पूजनविधि दक्षिणाकाली के समान हैं।

॥ १०. कामाख्या काली ॥

कामाख्या तंत्र में कामाख्या को ही कालिका का भेदरूप माना है। इसे त्रिशक्ति रूपमाना है। इसके दक्ष भाग में लक्ष्मी एवं वामभाग में सरस्वती की पूजा करनी चाहिये। यह प्रत्यक्ष सिद्ध विद्या है। अभिचार एवं आकर्षण में शीघ्र फलदायिनी है।

१. त्र्यक्षरी मंत्र - त्रीं त्रीं त्रीं।

विनियोगः- **अस्य मंत्रस्य अक्षोभ्य ऋषिः, अनुष्टुप् छंद, श्री कामाख्या देवता, सर्वार्थ सिद्धये जपे विनियोगः।**

षडङ्गन्यास- **त्रां, त्रीं, त्रूं, त्रैं, त्रौं, त्रः** से हृदयादि न्यास करे।

रक्तवस्त्रां वरोद्युक्तां सिंदूर तिलकान्वितां, निष्कलङ्कां सुधाधाम वदन कमलोज्ज्वलाम्।
स्वर्णादिमणि माणिक्य भूषणैर्भूषितां परां, नानारत्नादि निर्माण सिंहासनोपरि स्थिताम् ॥
हास्यवक्त्रां पद्मरागमणि कांतिमनुत्मां, पीनोत्तुङ्गकुचां कृष्णां श्रुतिमूल गतेक्षणाम्।
कटाक्षैश्च महासम्पद्दायिनीं हरमोहिनीं, सर्वाङ्गसुन्दरीं नित्यां विद्याभिः परिवेष्टिताम्।
डाकिनी योगिनी विद्याधरीभिः परिशोभितां, कामिनीभिर्युतां नानागन्धाढ्यैः परिगन्धिताम्।
ताम्बूलादि कराभिश्च नायिकाभिर्विराजितां, समस्तसिद्ध वर्गाणां प्रणतां च प्रतीक्षणाम् ॥
त्रिनेत्रां मोहनकरीं पुष्प चापेषु विभ्रतीं, भगलिङ्ग समाख्यानां किन्नरीभ्योऽपि नृत्यताम्।
वाणी लक्ष्मी सुधावाक्य प्रतिवाक्य समुत्सकाम्, अशेषगुण सम्पन्नां करुणासागरां शिवाम् ॥

१ लाख जप कर घृत शर्करा, मधु पायस द्वारा दशांश होम करे। चंदनमिश्रित जल से १ हजार बार तर्पण करे। उत्कृष्ट गन्धद्रव्यादि द्वारा सौ बार मार्जन अभिषेक कर ब्राह्मण भोजन कराये।

२. द्वविंशत्यक्षर - त्रीं त्रीं त्रीं हूं हूं स्त्रीं स्त्रीं कामाख्ये प्रसीद स्त्रीं स्त्रीं हूं हूं त्रीं त्रीं त्रीं स्वाहा। इस मंत्र में तारण बीज **''त्रीं''** एवं वधू बीज **''स्त्रीं''** होने से शीघ्र सिद्धिप्रदा हैं। ''ॐ'' आदि में लगाने से विद्या चतुर्वर्गफल देती है। (कामाख्या तंत्रे)

अतिसुललितवेशां हास्यवक्त्रां त्रिनेत्रां, जित जलदसुकान्तिं पट्टवस्त्रां प्रकाशाम्।
अभयवर कराढ्यां रत्नभूषामि भव्यां, सुरतरुतलपीठे रत्नसिंहासनस्थाम् ॥
हरिहरविधि वंद्यां शुद्धबुद्धि स्वरूपाम्, मदनशर संयुक्तां कामिनीं कामदात्रीम्।
निखिलजन विलासां कामरूपां भवानीं कत्रिकलुषा निहन्त्रीं योनिरूपां स्मरामि ॥

ऋष्यादि सब त्र्यक्षर मंत्र के समान हैं। यंत्रार्चन मेरे अनुमान से **''कामकलाकालि''** के मंत्रवत् करना चाहिये। **''विशेष''** त्रिकोण के मध्य में **''त्रीं त्रीं त्रीं''** लिखें। यंत्र मध्य देवी समीप में में षोडशदल की परिकल्पना कर अथवा षोडशदल में १६ देवियों का पूजन करे। यथा-

ॐ अन्नदायै नमः, ॐ धनदायै नमः, ॐ सुखदायै नमः, ॐ जयदायै नमः, ॐ रसदायै नमः, ॐ मोहदायै नमः, ॐ ऋद्धिदायै नमः। ॐ सिद्धिदायै नमः, ॐ वृद्धिदायै नमः, ॐ शुद्धिदायै नमः। ॐ भुक्तिदायै नमः। ॐ मुक्तिदायै नमः। ॐ मोक्षदायै नमः, ॐ शुभ्रायै नमः, ॐ ज्ञानदायै नमः। ॐ कान्तिदायै नमः। पाठान्तर **''शुभ्रायै''** की जगह **''सुखदायै''** पुनः प्रयुक्त हुआ हैं।

दक्षिण भाग में **लक्ष्मी** एवं वामभाग में **सरस्वती** की पूजा करें। देवी के षडदिक्षु में अथवा षट्कोण में यत्न पूर्वक- **डाकिनी, शाकिनी, काकिनी, राकिनी, हाथिनी, लाकिनी** इत्यादि योगिनियों का पूजन करें। शेष देवताओं का मंत्रार्चन कामकलाकाली यंत्रवत् करे। कामाख्या में योनिपूजा विशेष हैं। पंचमकार साधनामुख्य मानी हैं।

महाप्रीतिकरी पूजा योनिचक्रे कुलेश्वरि। योनिपूजा महापूजा तत्समा न हि सिद्धिदा ॥

योनि साधना में शक्ति पूजन विषय में कामाख्या तंत्र में बताया है।

स्वयम्भू कुसुमेनैव तिलकं परिकलय च। तूलिकायां महादेवि कुलशक्तिं समाविशेत् ॥
कर्पूरितमुखः स्वादु साधकश्चुम्बयन्मुदा। तस्याधरो यथा भृङ्गो नीरज व्याकुलः प्रिये ॥
दन्तक्षति वितानां च परमं तत्र कारयेत्। आलिङ्गयेन्मदोन्मत्तः सुदृढं कुचमर्दनम् ॥
नखाघातैर्नितम्बे च रमयेद् र तिपण्डितः। पुनः पुनश्चुम्बनं च योनौ कुर्यात् कुलेश्वरि ॥
शुक्रं तु स्तंभयेद् वीरो योनौ लिङ्गं प्रवेशयेत्। आघातैस्तोषयेत् तां सन्धान भेदतः प्रिये ॥
ततो लिङ्गे स्थिते यौनौ आज्ञां तस्याः प्रगृह्य च। अष्टोत्तरशतं मन्त्रं जपेद् होमादि कांक्षया ॥

॥ अथ प्रयोगः॥

॥ कामाख्या काली यन्त्रम् ॥

१. अपने मूत्र को "हूं" बीज से शुद्ध करे। 'घोरस्वरूपा भैरवी' का उससे तर्पण करे और शत्रु का नाम लेकर (**अमुकं दहदह**) उसे स्वयं पी जाये। दश दिशाओं में, महापीठ पर और अपने अपने मुख पर छिड़ककर नग्न होकर यहां वहां भ्रमण करता हुआ जप करे तो शत्रु का नाश होगा। रक्त, वीर्य, मूत्र से साधक घृणा करे तो स्वयं का नाश होवे।

२. मिट्टी का पात्र लेकर "**साध्य**" का नाम लिखे। "**यं**" बीज से पुटित कर उस पर अपना मूत्र छिड़के। "**ह्रीं**" एवं मूल मंत्र का १०८ बार जप करे तो शत्रु उन्माद से पीड़ित होवे।

३. बाँए हाथ से अपने मूत्र को लेकर 'भैरवी' का तर्पण करे तो शत्रु का उच्चाटन एवं मारण होता हैं। ४. भैरव मंत्र "**हस्त्रैं**" से शोधित स्वमूत्र को श्रेष्ठसाधक (सिद्धपुरुष) फेंके तो शत्रु को उन्माद होता हैं।

॥ ११. काली की नित्यायें ॥

चन्द्रमा की षोडश कलाओं की तरह काली की भी अपनी कलायें हैं। ५ त्रिकोणों में इनका पूजन होता है अमाकला तो स्वयं ही हैं अतः शेष १५ कलाओं की नित्याओं के मंत्र इस प्रकार है।

१. काली- **ॐ ह्रीं कालि कालि महाकालि कौमारि मह्यं देहि स्वाहा।**

२. कपालिनी- **ॐ ह्रीं क्रीं कपालिनि महाकपालप्रियमानसे कपालसिद्धिं मे देहि हूं फट् स्वाहा।**

३. कुल्ला- **ॐ क्रीं कुल्लायै नमः** ४. कुरुकुल्ला- **क्रीं ॐ कुरुकुल्ले क्रीं ह्रीं मम सर्वजन वशमानय क्रीं कुरुकुल्ले ह्रीं स्वाहा।**

५. विरोधिनी- **ॐ क्रीं ह्रीं क्लीं हूं विरोधिनि शत्रूनुच्चाट्य विरोधय विरोधय शत्रुक्षयंकरि हूं फट् स्वाहा।**

६. विप्रचित्ता- **ॐ श्रीं क्लीं चामुण्डे विप्रचित्ते दुष्टघातिनि शत्रून् नाशय एतद् दिनावधिप्रिये सिद्धिं मे हूं फट् स्वाहा।**

७. उग्रा- **ॐ स्त्रीं हूं ह्रीं ॐ हूं फट्।**

८. उग्रप्रभा- **ॐ हूं हूं उग्रप्रभे देवि कालि महादेवि स्वरूपं दर्शय हूं फट् स्वाहा।**

९. दीप्ता- **ॐ क्रीं ह्रीं हूं दीप्तायै सर्वमन्त्र फलदायै हूं फट् स्वाहा।**

१०. नीला- **हूं हूं क्रीं क्रीं ह्रीं ह्रीं हसबलमरीं नीलपताके हूं फट् स्वाहा।**

११. घना- **ॐ क्रीं ॐ घनालये घनाघने ह्रीं हूं फट्।**

१२. बलाका- **ॐ क्रीं हूं ह्रीं बलाकाकालि अत्यद्भुतपराक्रमे अभीष्ट सिद्धिं मे देहि हूं फट् स्वाहा।**

१३. मात्रा- **(१) ॐ क्रीं ह्रीं हूं अं आं इं ईं ....हं लं क्षं ॐ क्रीं ह्रीं हूं। (२) ॐ क्रीं हूं महामात्रे सिद्धिं मे देहि सत्वरं हूं फट् स्वाहा। (३) ॐ क्रीं हूं ह्रीं शिवेमात्रे ॐ क्रीं हूं ह्रीं हूं फट् स्वाहा।**

१४. मुद्रा- **ॐ क्रीं ह्रीं हूं प्रीं फ्रें मुद्राम्बे मुद्रासिद्धिं मे देहि भो जगन्मुद्रास्वरूपिणि हूं फट् स्वाहा।**

१५. मिता- **ॐ क्रीं हूं ह्रीं ऐं मिते परिमिते पराक्रमाय ॐ क्रीं हूं ह्रीं ऐं सोहं हूं फट् स्वाहा।**

॥ १२. काली पञ्चवाण विद्या ॥

काली के मुख्य अस्त्रों में उनके वाण मंत्रों का अलग से प्रयोग करने का विधान भी लिखा हैं। मारण, मोहन, उच्चाटन क्षोभण, द्रावण इत्यादि का नाम अमुक शब्द के साथ लगाकर करे। **क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणे कालिके "अमुकवाण" क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा।** (रुद्रयामल तंत्रे) यथा - आकर्षण बाणाय, मोहन बाणाय....।

॥ १३. कालरात्रि ॥

(कालरात्रि के मंत्र प्रयोग दुर्गा तंत्र में दिये जा चुके हैं)

॥ १४. काली गायत्री ॥

१. **ॐ कालिकायै विद्महे श्मशानवासिन्यै धीमहि तन्नो प्रचोदयात्।** २. **ॐ कालिकायै विद्महे श्मशानवासिन्यै धीमहि तन्नोऽघोरा प्रचोदयात्।** ३. **ॐ कालिकायै विद्महे श्मशानवासिन्यै धीमहि तन्नो घोरे प्रचोदयात्।**

॥ १५. महाकाल ॥

कालिका पुराण में प्रसंग है कि देवताओं ने अग्नि को शङ्कर का वीर्य धारण करने की आज्ञा दी। अग्नि में जब शिववीर्य डाला गया तो वीर्य के विन्दु अग्नि के बाहर आकर पर्वत पर गिरे जिनसे दो पुत्रों का अविर्भाव हुआ। ब्रह्म ने एक का नाम **महाकाल** रखा तथा दूसरे का **भृङ्गी**। ये दोनों हीं कृष्णवर्ण के हैं। काली की पूजा करने बाद देवी के दाहिनी ओर महाकाल की पूजा का विधान है। परन्तु काली तंत्र में कहा है- **"महाकालं यजेद् यत्नात् पश्चाद् देवीं प्रपूजयेत्।"**

॥ ध्यानम् ॥

महाकालं यजेद् देव्या दक्षिणे धूम्रवर्णकम् ।
विभ्रतं दण्ड खट्वाङ्गौ दंष्ट्राभिमुखं शिशुम् ॥

व्याघ्रचर्मावृतकटिं तुन्दिलं रक्तवाससम् ।
त्रिनेत्रमूर्ध्वकेशं च मुण्डमाला विभूषितम् ॥
जटाभार लसच्चन्द्रखण्डमुग्रं ज्वलन्निभम् ॥

१. षोडशाक्षर – हूं हूं महाकाल प्रसीद ह्रीं ह्रीं स्वाहा।

विनियोग– अस्यमंत्रस्य कालिका ऋषिः, विराट् छंदः महाकाल देवता, हूं बीजं, ह्रीं शक्तिः स्वाहा कीलकं सर्वाभीष्ट सिद्धये जपे विनियोगः। (शक्ति सङ्गम तन्त्र सुन्दरीखण्ड)

षडङ्गन्यास– ह्रां, ह्रीं, ह्रूं इत्यादि से न्यास करे।

कोटिकालानलाभासं चतुर्भुजं त्रिलोचनम्। श्मशानाष्टक मध्यस्थं मुण्डाष्टक विभूषितम् ॥
पञ्चप्रेतस्थितं देवं त्रिशूलं डमरुं तथा। खड्गं च खर्परं चैव वाम दक्षिण योगन ॥
विभ्रतं सुन्दरं देहं श्मशानभस्म भूषितम्। नानाशवः क्रोडकानं कालिकां हृदयस्थितम् ॥
लालयन्तं रतासक्तं घोरचुम्बन तत्पर। गृध्रगोमायुसंयुक्तं फेरवीगण संयुतम् ॥
जटापटल शोभाढ्यं सर्वशून्यालय स्थितम्। सर्वशून्यं मुण्डभूषं प्रसन्नवदनं शिवम् ॥

२. एकविंशाक्षर– ॐ ह्रीं क्लीं हूं महाकालाय ह्रौं महादेवाय क्रीं कालिकायै ह्रौं।

३. एकोनत्रिंशदक्षर – (कुमारी कल्पे) हुं क्ष्रों यां रां लां वां क्रों महाकाल भैरव सर्वविघ्नान् नाशय नाशय ह्रीं श्रीं फट् स्वाहा। (इस मंत्र का ध्यान प्रारम्भ में दे दिया गया है) 'निरुत्तर तंत्र' में अन्य ध्यान दिया है।

धूम्रवर्णं महाकालं जटातारान्वितं प्रिये। त्रिनेत्रं शवरूपं च शक्तियुक्तं निरामयम् ॥
दिगम्बरं घोररूपं नीलाञ्जन समप्रमम्। निगुर्णं च गुणाधारं कालीस्थानं पुनः पुनः ॥

४. त्रिंशदक्षर – ॐ हूं स्फ्रौं यां रां लां वां क्रों महाकालभैरव सर्व विघ्नान् नाशय नाशय ह्रीं श्रीं फट् स्वाहा। (श्यामा पूजा पद्धति) 'योगीनी तंत्र' में भी शिव का ध्यान इस तरह दिया गया है–

रजताद्रिभिव देवं स्फाटिकाचल विग्रहम्। दिगम्बरं महाघोरं चन्द्रार्क परिमण्डितम् ॥
नानालङ्कार भूषाढ्यं भास्वत्स्वर्णतनुरुहम्। योगनिद्राधरं शंभु स्मेरानन सरोरुहम् ।
विपरीत रतासक्तां महाकालेन सन्ततम् ॥

॥ १६. चतुःषठी योगिनी नामावलि ॥

भगवती काली अनेकों भैरवगणादि से तथा योगनियों से घिरी रहती हैं, उनका वर्णन इस प्रकार है।

अशेष ब्रह्माण्ड भाण्डप्रकाशितमहोज्ज्वलम्। शिवाभिर्घोररावाभिर्वेष्टितां प्रलयोदिताम् ॥
कोटि कोटि शरच्चन्द्रन्यक्कतानख मण्डलाम्। क्षुधापूर्णशीर्षहस्त योगिनीभिर्विराजिताम् ॥
आरक्तमुखमदाभिर्मत्ताभिरन्वगान् नरैः। घोररूपैर्महानादैश्चण्डतापैश्च भैरवैः ॥
गृहीतशरकङ्काल जयशब्द परायणै। नृत्यद्भिर्वदन पैररनिशं च दिगंबरैः ।
श्मशानालय मध्यस्थां ब्रह्माद्युप निषेविताम् ॥

॥ ६४ योगिनी नामावलि ॥

जया च विजया चैव जयन्ती चापराजिता। दिव्ययोगी महायोगी सिद्धयोगी महेश्वरी ॥
प्रेताक्षी डाकिनी काली कालरात्रिस्तथैव च। टंकाक्षी रौद्री बेताली हुंकारी चोर्ध्वकेशिनी ॥
विरूपाक्षी च शुष्कांगी नरभोजनिका तथा। फट्कारी वीरभद्रा च धूम्रांगी कलहप्रिया ॥
राक्षसी घोररक्ताक्षी विश्वरूपा भयंकरी। चण्डमारी च चण्डी च वाराही मुण्डधारिणी ॥
भैरवी च तथोर्ध्वाक्षी दुर्मुखी प्रेतवाहिनी। खट्वांगी चैव लंबोष्ठी मालिनी मत्त योगिनी ॥
काली रक्ता च कंकाली तथा च भुवनेश्वरी त्रोटकी च महामारी यमदूती करालिनी ॥
केशिनी दमिनी चैव रोमगंगा प्रवाहिनी। बिडाली कामुकालाक्षी जया चाधोमुखी तथा ॥
मुण्डाग्रधारिणी व्याघ्री कांक्षिणी प्रेतभक्षिणी। धूर्जटी निकटी घोरी कपाली विषलंबिनी ॥
चतुः षष्ठीस्तु योगिन्यः पूजनीयाः प्रयत्नतः ॥

॥ १७. अथ शिवाबलि प्रयोगः ॥

शिवाबलि से साधक का सर्वतोमुखी कल्याण होता है। शिवाबलि श्मशान में या चतुष्पथ में या जहाँ शिवाओं के आने की संभावना हो वहां दी जाती हैं। बलि के लिये चार प्रकार के अन्न प्रस्तुत करे। **१. खीर (पायस) २. अपूप (पुआ) ३. यावश ४. मोदक युक्त शष्कुली।** मस्त्य मांस के व्यञ्जन भी भिन्न भिन्न पात्रों में रखें। बलिद्रव्य एवं "**आसव**" लेकर बलि स्थान पर जाये। श्मशान के वस्त्र का आसन ग्रहण कर उत्तराभिमुख होकर बैठे।

देवीं श्री दक्षिणेकालि सृष्टि स्थित्यन्तकारिणि। अनुज्ञां देहि मे देवि करिष्येऽहं शिवाबलिम्॥

से हाथ जोड़कर "**उल्कामुखी**" घोररूपा शिवा देवी का आवाहन करे।

"**ॐ ऐं ह्रीं हूं हौं क्लीं लं आं ईं औं औं कामकलाकालि घोररावे महाकपालि विकटदंष्ट्रे संमोहिनि शोषणि करालवदने मदनोन्मादिनि ज्वालामालिनि शिवारूपिणि भगवति आगच्छ आगच्छ मम सिद्धि देहि देहि मां रक्ष रक्ष ह्रीं ह्रीं हूं क्षां क्षीं क्षूं क्षौं हूं हूं फट् फट् स्वाहा।** पश्चात् शिवा के आने की प्रतिक्षा करे। शिवा आ जावे तो पूजन पूर्वक "**शिवारूपी काली**" की स्तुति करे।

शिवारूप धरे देवि कालि कालि नमोस्तु ते। उल्कामुखी ललज्जिह्वे घोररूपे शृगालिनि ॥
श्मशानवासिनि प्रेते शवमांसप्रियेऽनद्ये । अरण्यचारिणि शिवे फेरोजम्बुक रूपिणि ॥
नमोऽस्तु ते महामाये जगत् तारिणि कालिके। मातंगी कुक्कुटे रौद्रे कालि कालि नमोऽस्तु ते ॥
सर्वसिद्धि प्रदे देवि भयङ्करि भयापहे। प्रसन्ना भव देवेशि मम भक्तस्य कालिके ॥
संसारतारिणि जये जय सर्वशुभङ्करि । विस्रस्तचिकुरे चण्डे चामुण्डे मुण्डमालिनि ॥
संसारकारिणि जये सर्वसिद्धि प्रयच्छ मे । दुर्गे किराति शबरि प्रेतासनगते शिवे ॥
अनुग्रहं कुरु सदा कृपया मां विलोकय। राज्यं प्रदेहि विकटे वित्तमायुस्सुतान् स्त्रियम् ॥
शिवाबलि विधानेन प्रसन्ना भव शाङ्करि। नमस्तेऽस्तु नमस्तेऽस्तु नमस्तेऽस्तु नमो नमः ॥

इस प्रकार शिव देवी की स्तुति कर साधक आसवपात्र से आसव बलिद्रव्यों पर गिराता हुआ मंत्र पढ़ें।

ॐ ह्लीं शिवे सर्वदानन्दे सर्वकामार्थ सिद्धिदे इश्मां बलिं प्रदास्यामि कार्यसिद्धिप्रदा भव गृहण देवि महाभागे शिवे कालाग्निरूपिणि शुभाशुभफलं ब्रूहि गृहण गृहण बलिं तव॥

यदि शुभाशुभ फल न जानने की इच्छा हो तो अन्य मंत्र से बलि प्रदान करें।

१. ॐ ह्लीं हूं कामकलाकाल्यै महाघोररावायै भगमालिन्यै शिवारूपिण्यै ज्वालामालिन्यै इमं बलि प्रयच्छामि गृहण गृहण खाद खाद मम सिद्धिं कुरु कुरु मम शत्रून् नाशय नाशय मारय मारय स्तंभय स्तंभय उच्चाटय २ हन २ विध्वंसय २ विद्रावय २ पच २ छिन्धि २ शोषय २ त्रासय २ त्रुट २ मोहय २ उन्मूलय २ भस्मीकुरु २ जृंभय २ स्फोटय २ मथ २ विद्रावय २ हर २ विक्षोभय २ तुरु तुरु दम २ मर्दय २ पातय पातय ह्लीं ॐ।

२. सर्वभूतभयङ्करि सर्वजनमनोहारिणि सर्वशत्रुक्षयङ्करि ज्वल ज्वल प्रज्वल शिवारूपधरे कालि कपालि महाकपालि ह्लीं ह्लीं ह्लं ह्लं हौं हौं राज्यं मे देहि देहि किलि किलि चामुण्डे मम सर्वाभीष्टं साधय साधय संहारिणि संमोहिनि कुरुकुल्ले किरि किरि हूं हूं फट् फट् ओं।

शिवाबलिग्रहण करे तो अभीष्टसिद्धि प्राप्त होवे। बलिग्रहण न करे तो फलशून्य। गर्जना करे तो शुभ, रोदन करे तो अशुभ। दक्षिण में मुंहकर शब्द करे तो अशुभ, पूर्वोत्तरदिशाशुभ हैं। यदि पहले नैवेद्य ग्रहण करे तो अन्न से धन प्राप्ति, खीर खाये तो वाक्सिद्धि मिले, घी ग्रहण करे तो आयुवृद्धि, पुआ खाने से पुण्य, मोदक खाने से यश लाभ। मत्स्य खाये तो पत्नि लाभ। मांस खाये तो धन व विजय प्राप्त होवे।

॥ अथ दीक्षा विधानम् ॥

कालिका एवं कामाख्यादि विद्या प्रयोग हेतु साधक को दीक्षा अभिषेक विधिवत् गृहण करना चाहिये।

नानालङ्कारवस्त्राणि, नानाद्रव्याणि भूरिशः। कस्तूरीकुंकुमादीनि, नानागन्धानि चाहरेत् ॥१॥
नानापुष्पाणि माल्यानि, पञ्चतत्त्वानि यत्नतः। विहितान् धूपदीपांश्च, घृतेन यत्नतः ॥२॥
ततः शिष्यं समानीय, गुरुः शुद्धालये प्रिये! वेश्याभिः साधकैः सार्द्धं, पूजनं च समाचरेत् ॥३॥
पटलोक्तविधानेन, भक्तितः परिपूजयेत्। पूजां समाप्य देव्यास्तु, स्तवैस्तु प्रणमेन् मुदा ॥४॥
ततो हि शिवशक्तिभ्यो, गन्धमाल्यानि दापयेत्। आसनं वस्त्रभूषाश्च, प्रत्येकेन कुलेश्वरि! ॥५॥
ततः शङ्खादिवाद्यैश्च, मङ्गलाचरणैः परैः। घटस्थापनकं कुर्यात्, क्रमं तत्र शृणु प्रिये! ॥६॥
कामवीजेन सम्प्रोक्ष्य, वाग्भवेनैव शोधयेत्। शक्त्या कलशमारोप्य, मायया पूरयेज्जलैः ॥७॥
प्रवालादीन् पञ्चरत्नान्, विन्यसेत् तत्र यत्नतः। आवाहयेच्च तीर्थानि, मन्त्रेणानेन देशिकः ॥८॥
ॐ गङ्गाद्याः सरितः सर्वाः, समुद्राश्च सरांसि च। सर्वे समुद्राः सरितः, सरांसि जलदा नदाः ॥९॥
ह्रदाः प्रस्रवणाः पुण्याः, स्वर्गपातालभूगताः। सर्वतीर्थानि पुण्यानि, घटे कुर्वन्तु सन्निधिम् ॥१०॥
रमावीजेन जप्तेन, पल्लवं प्रतिपादयेत्। कूर्चेन फलदानं स्याद्, गन्धवस्त्रे ह्रदात्मना ॥११॥
ललनयैव सिन्दूरं, पुष्पं दद्यात् तु कामतः। मूलेन दूर्वां प्रणवैः, कुर्यादभ्युक्षणं ततः ॥१२॥

हूं फट् स्वाहेति मन्त्रेण, कुर्याद् दर्भैश्च ताड़नम्। विचिन्त्य मूलपीठं तु, तत्र संयोज्यपूजयेत ॥१३॥
स्वतन्त्रोक्तविधानेन, प्रार्थयेदमुना बुधः। तद्घटे हस्तमारोप्य, शिष्यं पश्यन् गुरश्च सः ॥१४॥
उत्तिष्ठ ब्रह्मकलश! देवताऽभीष्टदायक! सर्वतीर्थाम्बुसम्पूर्ण! पूरयास्मन्मनोरथम् ॥१५॥
अभिषिञ्चेत् गुरुः शिष्यं, ततो मन्त्रैश्च पार्वति! मङ्गलैर्निखिलैर्द्रव्यैः, साधकैः शक्तिभिः सह ॥१६॥
पल्लवैराम्रकाद्यैश्च, नतिमत् शिष्यमेव च। आनन्दैः परमेशानि! भक्तानां हितकारिणी ॥१७॥
ॐ दक्षिणामूर्ति ऋषिरनुष्टुप् छन्दः, शक्तिर्देवता, सर्वसङ्कल्पसिद्धये अभिषेके च विनियोगः ॥१८॥

॥ अभिषेक मन्त्राः॥

ॐ राजराजेश्वरी शक्तिर्भैरवी कालभैरवी। श्मशानभैरवी देवी, त्रिपुरानन्दभैरवी ॥
त्रिकूटा त्रिपुटा देवी, तथा त्रिपुरसुन्दरी। त्रिपुरेशी महादेवी, तथा त्रिपुरमालिका ॥
त्रिपुरानन्दिनी देवी, तथैव त्रिपुरातनी। एतास्त्वामभिषिञ्चन्तु, मन्त्रपूतेन वारिणा ॥१॥
ॐ छिन्नमस्ता महादेवी, तथवैकजटेश्वरी। परा तारा जयदुर्गा, शूलिनी भुवनेश्वरी ॥
त्वरिताख्या महादेवी तथैव च त्रिखण्डिका। नित्याऽनित्यस्वरूपा च, वज्रप्रस्तारिणी तथा ॥
एतास्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥२॥
ॐ अश्वारूढा महादेवी, तथा महिषमर्दिनी। दुर्गा च नवदुर्गा च, श्रीदुर्गा भगमालिनी ॥
तथा भगन्दरी देवी, भगक्लिन्ना तथा परा। सर्वचक्रेश्वरी देवी, तथा नीलसरस्वती ॥
सर्वसिद्धिकरी देवी, सिद्धगन्धर्वसेविता। उग्रतारा महादेवी, तथा च भद्रकालिका ॥
एतास्त्वामभिषिञ्चन्तु, मन्त्रपूतेन वारिणा ॥३॥
ॐ क्षेमङ्करी महामाया, चानिरुद्धसरस्वती। मातङ्गिनी चान्नपूर्णा, च राजराजेश्वरी तथा ॥
एतास्त्वामभिषिञ्चन्तु, मन्त्रपूतेन वारिणा ॥४॥
ॐ उग्रचण्डा प्रचण्डा च, चण्डोग्रा चण्डनायिका। चण्डा चण्डवती चैव, चण्डरूपातिचण्डिका ॥
एतास्त्वामभिषिञ्चन्तु, मन्त्रपूतेन वारिणा ॥५॥
ॐ उग्रदंष्ट्रा महादंष्ट्रा, शुभदंष्ट्रा कपालिनी। भीमनेत्रा विशालाक्षी, मङ्गला विजया जया ॥
एतास्त्वामभिषिञ्चन्तु, मन्त्रपूतेन वारिणा ॥६॥
ॐ मङ्गला नन्दिनी भद्रा, लक्ष्मीः कीर्तिर्यशस्विनी। पुष्टिर्मेधा शिवाधात्री, यशा शोभा जया धृतिः ॥
श्रीनन्दा च सुनन्दा च, नन्दिनी नन्दपूजिता। एतास्त्वामभिषिञ्चन्तु, मन्त्रपूतेन वारिणा ॥७॥
ॐ विजया मङ्गला भद्रा, धृतिः शान्तिः शिवा क्षमा। सिद्धिस्तुष्टि रमा पुष्टिः, श्रद्धा चैव रतिस्तथा ॥
दीप्ता कान्तिर्यशोलक्ष्मीरोश्वरी बुद्धिरेव च। एतास्त्वामभिषिञ्चन्तु, मन्त्रपूतेन वारिणा ॥८॥
ॐ चक्री जयावती ब्राह्मी, जयन्ती चापराजिता। आजिता मानवी श्वेता, दितिश्चादितिरेव च ॥
माया चैव महामाया, मोहिनी क्षोभिणी तथा। कमला विमला गौरी, शरण्यम्बुधिसुन्दरी ॥
दुर्गा क्रियाऽरुन्धती च, घण्टकर्णा कपालिनी। एतास्त्वामभिषिञ्चन्तु, मन्त्रपूतेन वारिणा ॥९॥
ॐ रौद्री काली च कौमारी, त्रिनेत्रा चापराजिता। सुरूपा बहुरूपा च, तथैव विग्रहात्मिका ॥

चर्चिका चापरा ज्ञेया, तथैव सुरपूजिता। एतास्त्वामभिषिञ्चन्तु, मन्त्रपूतेन वारिणा ॥१०॥

ॐ वैवस्वती च कौमारी, तथा माहेश्वरी परा। वैष्णवी च महालक्ष्मीः, कार्तिकी कौशिकी तथा ॥

शिवदूती च चामुण्डा, मुण्डलमालाविभूषिता। एतास्त्वामभिषिञ्चन्तु, मन्त्रपूतेन वारिणा ॥११॥

ॐ इन्द्रोऽग्निश्च यमश्चैव, निर्ऋतिर्वरुणस्तथा। पवनो धनदेशानौ, ब्रह्माऽनन्तौ दिगीश्वराः ॥

एतास्त्वामभिषिञ्चन्तु, मन्त्रपूतेन वारिणा ॥१२॥

ॐ सम्वत्सराश्चायनौ च मासाः पक्षौ दिनानि च। तिथयश्चाभिषिञ्चन्तु, मन्त्रपूतेन वारिणा ॥१३॥

ॐ रविः सोमः कुजः सौम्यो, गुरुः शुक्रः शनैश्चरः। राहुः केतुश्च सततमभिषिञ्चन्तु ते ग्रहाः ॥१४॥

ॐ नक्षत्रं करणं योगोऽमृतं सिद्धिस्ततः परम्। दग्धं पापं तथा भद्रा, योगा वाराः क्षणास्तथा ॥

वारवेला, कालवेला, दण्डराश्यादयस्तथा। अभिषिञ्चन्तु सततं, मन्त्र पूतेन वारिणा ॥१५॥

ॐ असिताङ्गो रुरुश्चण्डः, क्रोध उन्मत्तसंज्ञकः। कपाली भीषणाख्यश्च, संहारोऽष्टौ च भैरवाः ॥

अभिषिञ्चन्तु सततं, मन्त्रपूतेन वारिणा ॥१६॥

ॐ डाकिनीपुत्रकाश्चैव, राकिनीपुत्रकास्तथा। लाकिनीपुत्रकाश्चान्ये, काकिनीपुत्रकाः परे ॥

शाकिनीपुत्रका भूयो, हाकिनीपुत्रकास्तथा। ततश्च यक्षिणीपुत्राः, देवीपुत्रास्ततः परम् ॥

मातृणां च तथा पुत्रा, उर्ध्वमुख्याः सुताश्च वै। अधोमुख्याः सुताश्चैव, उन्मुख्याश्च सुताः परे ॥

अभिषिञ्चन्तु ते सर्वे, मन्त्रपूतेन वारिणा ॥१७॥

ॐ ब्रह्मा विष्णुश्च रुद्रश्च, ईश्वरश्च सदाशिवः। एते त्वामभिषिञ्चन्तु, मन्त्रपूतेन वारिणा ॥१८॥

ॐ पुरुषः प्रकृतिश्चैव, विकाराश्चैव षोडशः। आत्माऽन्तरात्मा परमज्ञानात्मानः प्रकीर्तिताः ॥

आत्मनश्च गुणाश्चैव, स्थूलाः सूक्ष्माश्च येऽपरे। एते त्वामभिषिञ्चन्तु, मन्त्रपूतेन वारिणा ॥१९॥

ॐ वेदादिवीजं हुंवीजं, स्त्रीवीजं मीनकेतनम्। शक्तिवीजं रमावीजं, मायावीजं,सुधाकरम् ॥

चिन्तामणिमहावीजं, नारसिंहं च शाङ्करम्। मार्तण्डभैरवं गौर्गं, वीजं श्रीपुरुषोत्तमम् ॥

गाणपत्यं च वाराहं, कालीवीजं भयापहम्। एतानि चाभिषिञ्चन्तु, मन्त्रपूतेन वारिणा ॥२०॥

ॐ गङ्गा गोदावरी रेवा, यमुना च सरस्वती। आत्रेयी भारती चैव, सरयू गण्डकी तथा ॥

करतोया चन्द्रभागा, श्वेतगङ्गा च कौशिकी । भोगवती च पाताले, स्वर्गे मन्दाकिनी तथा ॥

एतास्त्वामभिषिञ्चन्तु, मन्त्रपूतेन वारिणा ॥२१॥

ॐ भैरवो भीमरूपश्च, शोणो घर्घर एव च। सिन्धुश्चैव ह्रदश्चैव, तथा पातालसम्भवाः ॥

एते त्वामभिषिञ्चन्तु, मन्त्रपूतेन वारिणा ॥२२॥

ॐ यानि कानि च तीर्थानि, पुण्यान्यायतनानि च। तानि त्वामभिषिञ्चन्तु, मन्त्रपूतेन वारिणा ॥२३॥

ॐ जम्बुद्वीपादयो द्वीपाः, सागराः लवणादयः। अनन्ताद्यास्तथा नागाः, सर्पा ते तक्षकादयः ॥

एते त्वामभिषिञ्चन्तु, मन्त्रपूतेन वारिणा ॥२४॥

ॐ रतिश्च वल्लभा वह्नेर्वषट् कूर्चमतः परम्। वौषट्कारं तु फट्कारमभिषिञ्चन्तु सर्वदा ॥२५॥

ऊपर लिखे मन्त्रों का उच्चारण करते समय जहाँ '**अभिषिञ्चन्तु**' शब्द आए, उसे कहते हुए आम्रपल्लव द्वारा घटस्थ

जल से शिष्य के शिर पर अभिषेक करना चाहिए। जहां नश्यन्तु एवं ताडिता शब्द आवे उस समय जल शिष्य पर घुमाकर भूमि पर या त्याज्य पात्र में छोड़ें पश्चात् उस त्याज्य पात्र को फेंक देवें। 'अभिषेक' कर्म के पूर्ण होने पर गन्धाक्षत पुष्प हाथ में लेकर निम्न आशीर्वचनों का उच्चारण करें-

॥ आशीर्वचना:॥

नश्यन्तु प्रेतकूष्माण्डा, राक्षसा दानवाश्च ये। पिशाचा गुह्यका भूता अभिषेकेण ताड़िताः ॥१॥
अलक्ष्मीः कालकर्णी च पापानि च महान्ति च। नश्यन्तु चाभिषेकेण, तारावीजेन ताड़िताः ॥२॥
रोगाः शोकाश्च दारिद्र्यं, दौर्बल्यं चित्तविक्रिया। नश्यन्तु चाभिषेकेण, वाग्वीजेनैव ताड़िताः ॥३॥
लोकानुरागस्त्यागश्च, दौर्भाग्यमपि दुर्यशः। नश्यन्तु चाभिषेकेण, मन्मथेनैव ताड़िताः ॥४॥
तेजोह्रासो, बलह्रासो बुद्धिह्रासस्तथैव च। नश्यन्तु चाभिषेकेण, शक्तिवीजेन ताड़िता ॥५॥
विषापमृत्युरोगश्च, डाकिन्यादिभयं तथा। घोराभिचाराः क्रूराश्च, ग्रहा नागास्तथा परे ॥६॥
नश्यन्तु चाभिषेकेण कालीवीजेन ताड़िताः ॥७॥
नश्यन्तु विपदः सर्वाः, सम्पदः सन्तु सुस्थिराः।
अभिषेकेण शाक्तेन, पूर्णाः सन्तु मनोरथाः ॥८॥

'पूर्णा सन्तु मनोरथा' कहने के साथ ही हाथ में लिए हुए गन्धाक्षतपुष्प को शिष्य के शिर पर छोड़कर हृदय से शुभाशीर्वाद देना चाहिए।

॥ अथ श्री काली कीलक स्तोत्रम्॥

विनियोगः - ॐ अस्य श्री कालिका कीलकस्य सदाशिव ऋषिरनुष्टुप् छन्दः श्री दक्षिण कालिका देवता सर्वसिद्धि साधने कीलकन्यासे जपे विनियोगः।

अथातः सम्प्रवक्ष्यामि कीलकं सर्वकामदम्। कालिकायाः परं तत्वं सत्यं सत्यं त्रिभिर्मम ॥
दुर्वासाश्च वशिष्ठश्च दत्तात्रेयो बृहस्पतिः। सुरेशो धनदश्चैव अङ्गिराश्च भृगूद्वहः ॥

॥ अथ कीलक स्तोत्रम्॥

च्यवनः कार्तवीर्यश्च कश्यपोऽथ प्रजापतिः। कीलकस्य प्रसादेन सर्वैश्वर्यमवाप्नुयुः ॥
ॐकारं तु शिखाप्रान्ते लम्बिका स्थान उत्तमे। सहस्त्रारे पङ्कजे तु क्रीं क्रीं क्रीं वाग्विलासिनी ॥
कूर्चवीजयुगं भाले नाभौ लज्जायुगं प्रिये। दक्षिणे कालिके पातु स्वनासापुटयुग्मके ॥
हूँकारद्वन्द्वं गण्डे द्वे द्वे माये श्रवणद्वये। आद्यातृतीयं विन्यस्य उत्तराधर सम्पुटे ॥
स्वाहा दशनमध्ये तु सर्ववर्णन्यसेत् क्रमात्। मुण्डमाला असिकरा काली सर्वार्थसिद्धिदा ॥
चतुरक्षरी महाविद्या क्रीं क्रीं हृदय पङ्कजे। ॐ हूँ ह्रीं क्रीं ततो हूं फट् स्वाहा च कंठकूपके ॥
अष्टाक्षरी कालिका या नाभौ विन्यस्य पार्वति। क्रीं दक्षिणे कालिके क्रीं स्वाहान्ते च दशाक्षरी ॥
मम बाहुयुग्मे तिष्ठ मम कुण्डलिकुण्डले। हूं ह्रीं मे वह्निजाया च हूं विद्या तिष्ठ पृष्ठके ॥

क्रीं हूं ह्रीं वक्षोदेशे च दक्षिणे कालिके सदा । क्रीं हूं ह्रीं वह्निजायाऽन्ते चतुर्दशाक्षरेश्वरी ॥
क्रीं तिष्ठ गुह्यदेशे मे एकाक्षरी च कालिका । ह्रीं हूं फट् च महाकाली मूलाधार निवासिनी ॥
सर्वरोमाणि मे काली करांगुल्यङ्कपालिनी । कुल्ला कटिं कुरुकुल्ला तिष्ठ तिष्ठ सकली मम ॥
विरोधिनी जनुयुग्मे विप्रचित्ता पदद्वये । तिष्ठमे च तथा चोग्रा पादमूले न्यसेत्क्रमात् ॥
प्रभा तिष्ठतु पादाग्रे दीप्ता पादांगुलीनपि । नीली न्यसेद्विन्दुदेशे घना नादे च तिष्ठ मे ॥
वलाका विन्दुमार्गे च न्यसेत्सर्वाङ्ग सुन्दरी । मम पातालके मात्रा तिष्ठ स्वकुल कायिके ॥
मुद्रा तिष्ठ स्वमर्त्येमां मितास्वङ्गाकुलेषु च । एता नृमुण्डमालास्त्रग्धारिण्यः खड्गपाणयः ॥
तिष्ठन्तु मम गात्राणि सन्धिकूपानि सर्वशः । ब्राह्मी च ब्रह्मरंध्रे तु तिष्ठस्व घटिका परा ॥
नारायणी नेत्रयुगे मुखे माहेश्वरी तथा । चामुण्डा श्रवणद्वन्द्वे कौमारी चिबुके शुभे ॥
तथा सुन्दरमध्ये तु तिष्ठ मे चापराजिता । वाराही चास्थिसन्धौ च नारसिंही नृसिंहके ॥
आयुधानि गृहीतानि तिष्ठस्वेतानि मे सदा । इति ते कीलकं दिव्यं नित्यं यः कीलयेत्स्वकम् ॥
कवचादौ महेशानि तस्य सिद्धिर्न संशयः । श्मशाने प्रेतयोर्वापि प्रेतदर्शनतत्परः ॥
यः पठेत्पाठयेद्वापि सर्वसिद्धीश्वरो भवेत् । सवाग्मी धनवान्दक्षः सर्वाध्यक्षः कुलेश्वरः ॥
पुत्र बान्धव सम्पन्नः समीर सदृशो बले । न रोगवान् सदा धीरस्तापत्रय निषूदनः ॥
मुच्यते कालिका पायात् तृणराशिमिवानल । न शत्रुभ्यो भयं तस्य दुर्गमेभ्यो न बाध्यते ॥
यस्य देशे कीलकं तु धारणं सर्वदाम्बिके । तस्य सर्वार्थसिद्धिः स्यात्सत्यं सत्यं वरानने ॥
मन्त्राच्छतगुणं देवि कवचं यन्मयोदितम् । तस्माच्छतगुणं चैव कीलकं सर्वकामदम् ॥
तथा चाप्यसिता मन्त्रं नीलसारस्वते मनौ । न सिध्यति वरारोहे कीलकार्गलके विना ॥
विहीने कीलकार्गलके काली कवचं यः पठेत् । तस्य सर्वाणि मन्त्राणि स्तोत्राण्य सिद्धये प्रिये ॥

॥ इति श्री कालिका कीलकम् समाप्तम् ॥

॥ अथ श्रीकाली अर्गला स्तोत्रम् ॥

विनियोग :- ॐ अस्य श्री कालिकार्गलस्तोत्रस्य भैरव ऋषिरनुष्टुप् छन्दः श्री कालिका देवता मम सर्वसिद्धिसाधने विनियोगः।

ॐ नमस्ते कालिके देवि आद्यवीजत्रय प्रिये । वशमानय मे नित्यं सर्वेषां प्राणिनां सदा ॥
कूर्च्चयुग्मं ललाटे च स्यातु मे शववाहिना । सर्वसौभाग्यसिद्धि च देहि दक्षिण कालिके ॥
भुवनेश्वरि बीजयुग्मं भ्रूयुगे मुण्डमालिनी । कन्दर्परूपं मे देहि महाकालस्य गेहिनि ॥
दक्षिणे कालिके नित्ये पितृकाननवासिनि । नेत्रयुग्मं च मे देहि ज्योतिरालेकनं महत् ॥
श्रवणे च पुनर्लज्जाबीजयुग्मं मनोहरम् । महाश्रुतिधरत्वं च मे देहि मुक्त कुन्तले ॥

ह्रीं ह्रीं बीजद्वयं देवि पातु नासापुटे मम । देहि नाना विधिमह्यं सुगन्धिं त्वं दिगम्बरे ॥
पुनस्त्रिवीजप्रथमं दन्तोष्ठरसनादिकम् । गद्यपद्यमयीं वाणीं काव्यशास्त्राद्यलंकृताम् ॥
अष्टादशपुराणानां स्मृतीनां घोरचण्डिके । कविता सिद्धिलहरीं मम जिह्वां निवेशय ॥
वह्निजाया महादेवि घण्टिकायां स्थिराभव । देहि मे परमेशानि बुद्धिसिद्धिरसायकम् ॥
तुर्याक्षरी चित्स्वरूपा या कालिका मन्त्रसिद्धिदा । सा च तिष्ठतु हृत्पद्मे हृदयानन्दरूपिणी ॥
षडक्षरी महाकाली चण्डकाली शुचिस्मिता । रक्तासिनी घोरदंष्ट्रा भुजयुग्मे सदाऽवतु ॥
सप्ताक्षरी महाकाली महाकालरतोद्यता । स्तनयुग्मे सूर्यकर्णो नरमुण्डसुकुन्तला ॥
तिष्ठ स्वजठरे देवि अष्टाक्षरी शुभप्रदा । पुत्रपौत्रकलत्रादि सुहृन्मित्राणि देहि मे ॥
दशाक्षरी महाकाली महाकालप्रिया सदा । नाभौ तिष्ठतु कल्याणी श्मशानालयवासिनी ॥
चतुर्दशार्णवा या च जयकाली सुलोचना । लिङ्गमध्ये च तिष्ठस्व रेतस्विनी मामाङ्गके ॥
गुह्यमध्ये हर्षकाला मम तिष्ठ कुलाङ्गने । सर्वाङ्गे भद्रकाली च तिष्ठ मे परमात्मिके ॥
कालि पादयुगे तिष्ठ मम सर्वमुखे शिवे । कपालिनी च या शक्तिः खड्गमुण्डधरा शिवा ।
पादद्वयांगुलिष्वङ्गे तिष्ठ स्वपापनाशिनी । कुल्लादेवी मुक्तकेशी रोमकूपेषु वै मम ॥
तिष्ठतु उत्तमाङ्गे च कुरुकुल्ला महेश्वरी । विरोधिनी विराधे च मम तिष्ठतु शंकरी ॥
विप्रचित्तै महेशानि मुण्डधारिणी तिष्ठमाम् । मार्गे दुर्मार्गगमने मुण्डधारिणी तिष्ठतु सर्वदा ॥
प्रभादिक्षु विदिक्षुमाम् दीप्ता दीप्तं करोतुमाम् । नीला शक्तिश्च पातालेघना चाकाशमण्डले ॥
पातु शक्तिर्वलाका मे भुवं मे भुवनेश्वरी । मात्रा मम कुले पातु मुद्रा तिष्ठतु मन्दिरे ॥
मिता मे योगिनी या च तथा मित्रकुलप्रदा । सा मे तिष्ठतु देवेशि पृथिव्यां दैत्यदारिणी ॥
ब्राह्मी ब्रह्मकुले तिष्ठ मम सर्वार्थदायिनी । नारायणी विष्णुमाया मोक्षद्वारे च तिष्ठ मे ॥
माहेश्वरी वृषारूढा काशिका पुरवासिनी । शिवतां देहि चामुण्डे पुत्रपौत्रादि चानघे ॥
कौमारी च कुमाराणां रक्षार्थं तिष्ठ मे सदा । अपराजिता विश्वरूपा जये तिष्ठ स्वभाविनी ॥
वाराही वेदरूपां च सामवेद परायणा । नारसिंही नृसिंहस्य वक्षःस्थल निवासिनी ॥
सा मे तिष्ठतु देवेशि पृथिव्यां दैत्यदारिणी । सर्वेषां स्थावरादीनां जङ्गमानां सुरेश्वरी ॥
स्वेदजोद्भिजण्डजानां चराणां च भयादिकम् । विनाश्याप्यभिमतिं देहि दक्षिण कालिके ॥
य इदं चार्गलं देवि यः पठेत्कालिकार्चने । सर्वसिद्धिमवाप्नोति खेचरो जायते तु सः ॥

॥ इति श्रीकालिकार्गल स्तोत्रम् समाप्तम् ॥

॥ श्री महाकाली सूक्तम् ॥

विनियोग: :- ॐ अस्य श्री महाकाली सूक्तस्य ॐ सदा शिव ऋषि: । ॐ जगति छन्द: । ॐ श्री महाकाली देवता । ॐ ॐ बाजं । ॐ ह्रीं शक्ति: । ॐ कीलकं । ॐ श्री महाकाली प्रीत्यर्थं महाकालीसूक्त परायणे विनियोग: ।

ॐ ह्रां ॐ ह्रीं ॐ ह्रूं ॐ ह्रै ॐ ह्रौ ॐ ह्र: से षडंग न्यास करें ॥

अथ करन्यास:- ॐ ह्रां अंगुष्ठाभ्यां नम: । ॐ ह्रीं तर्जनीभ्यां स्वाहा । ॐ ह्रूं मध्यमाभ्यां वषट् । ॐ ह्रैं अनामिकाभ्यां हूं । ॐ ह्रौं कनिष्ठिकाभ्यां वौषट् । ॐ ह्र: करतल कर पृष्ठाभ्यां फट् ।

अथ हृदयादि न्यास:- ॐ ह्रां हृदयाय नम: । ॐ ह्रीं शिरसे स्वाहा । ॐ ह्रूं शिखायै वषट् । ॐ ह्रैं कवचाय हुं ॐ ह्रौं नेत्रत्रयाय वौषट् । ॐ ह्र: अस्त्राय फट् ।

ध्यानम् :- ॐ ह्रीं ॐ नम: ओं ह्रीं ॐ घोरां भीम पराक्रमां दशकरै: खड्गेषु शूलंगदाम्, चक्रं पाशभुशुंडिके च परशुं चापं शिरो विभ्रतीम् । वागीषां मधुकैटभ प्रमथिनीं ब्रह्मार्ति हंत्री पराम्:, त्रिंशल्लोचन मंडितां दशमुखीं वंदे महाकालिकाम् ॥ ॐ ह्रीं ॐ म: न ह्रीं ॐ ॥१॥

॥ ॐ ह्रीं ॐ नम: ओं ह्रीं ॐ सदा शिव उवाच ॐ ह्रीं ॐ म: न ह्रीं ॐ ॥२॥

(प्रत्येक श्लोक के पूर्व में ॐ ह्रीं ॐ नम: ओं ह्रीं ॐ तथा अंत में ॐ ह्रीं ॐ म: न ह्रीं ॐ का संपुट लगावें)

सुंदरी त्रिपुरा कामाकामिनी साधक प्रिया अमोघ सत्यं वचना विमोहा मोहरूपिणी ॥३॥
अमृतेशी च कल्याणी कारुण्या करुणालया । कलातीता कोमलांत: करणा विश्वनायिका ॥४॥
विघ्नकर्त्री विघ्नहर्त्री विघ्नेशी विघ्न यक्षिणी । कामाख्या कामनिलया कामेशी भगमालिनी ॥५॥
त्रिखंडाा योनिमुद्रा च धेनुमुद्रा च खेचरी । पाशांकुश द्राविणी च मोहिनी मद भंजिनी ॥६॥
मदप्रिया दुराराध्या काला काल विनाशिनी । काष्ठा कुलेशी कल्याणी सुकन्या कल्पकारिणी ॥७॥
कोमलांगी विश्वमाता युगेशानी युगंधरा । ब्रह्मा विष्णु महेशान मोहिनी स्तंभिनी परा ॥८॥
अमोघा सत्यसंकल्पा सत्याऽसत्य विनाशिनी । सत्यग्रामा सत्यवहा सत्यवश्या जनप्रिया ॥९॥
शरीर वासिनी वासा निर्मदा वामदक्षिणा । कपाल कुंडला काली कालिका कालनाशिनी ॥१०॥
गानप्रिया च गीतांगी सुगीता धर्मशालिनी । विश्वयोनि र्विश्वमाता विश्ववंधा क्रियामयी ॥११॥
तुष्टा व वाग्भिर्दिव्याभि महाकालीं महेश्वर: । वेदवाणी सु तत्त्वामि लोंकानां हितकाम्यया ॥१२॥

॥ ॐ ह्रीं ॐ नम: ओं ह्रीं ॐ सदा शिव उवाच ॐ ह्रीं ॐ म: न ह्रीं ॐ ॥१३॥

ॐ ह्रीं ॐ नम: ओं ह्रीं ॐ शिवा मनन्यां विविध प्रभावां कालीं कलामालिनी विश्ववंद्या ।
कपाल खट्वांग धरां नृमुंडमाला विभीषां मृगचर्म शोभाम् ॐ ह्रीं ॐ म: न ह्रीं ॐ ॥१४॥
ॐ ह्रीं ॐ नम: ओं ह्रीं ॐ सु शुष्क मांसा च शवासनस्थां विभीषणां भीषयन्तीं सुराऽसुरीन् ।
रक्त प्रियां माँसम दावि पूर्णां कालीं शरण्यां शरणं व्रजामि ॐ ह्रीं ॐ म: न ह्रीं ॐ ॥१५॥
ॐ ह्रीं ॐ नम: ओं ह्रीं ॐ सुघोर बीजं च कपीश्वरश्च चिंतामणि: कुब्जिक कामरूपे ।
विद्या सुविद्यासु च कामराजं काम: कलामालिनी कालराजम् ॐ ह्रीं ॐ म: न ह्रीं ॐ ॥१६॥

ॐ ह्रीं ॐ नमः ओं ह्रीं ॐ वह्नेवधु मंत्रराजो यमीशे विश्वं पुनातीश्वरि देवि बंद्ये ।
मंत्रेण चानेन सिध्यंति सर्वा सुसिद्धयः सर्व जगन्निवासे ॐ ह्रीं ॐ मः न ह्रीं ॐ ॥१७॥
ॐ ह्रीं ॐ नमः ओं ह्रीं ॐ पंचार युग्मंच त्रिकोण युग्मं पुनश्च पंचार युगेन बद्धम ।
कला प्रकोष्ठं किल भू गृहंच यंत्रेश्वरं ते च पदाब्ज व्रासम् ॐ ह्रीं ॐ मः न ह्रीं ॐ ॥१८॥
ॐ ह्रीं ॐ नमः ओं ह्रीं ॐ संपूज्य यंत्रं तव विश्वनायिके निष्पापिनस्ते सहसा भवंति ।
ये साधकास्तव मार्गानुसारिणः कुलान्नुवृत्या परमापवित्रा ॐ ह्रीं ॐ मः न ह्रीं ॐ ॥१९॥
ॐ ह्रीं ॐ नमः ओं ह्रीं ॐ ते सिद्धि ऋद्धिं च यशोनुगम्यां नृणां वशीकृत्य भवंती भूपाः ।
समस्त मंत्रेण विधायचांगं न्यासादिकं भक्ति सुभाव मुक्ताः ॐ ह्रीं ॐ मः न ह्रीं ॐ ॥२०॥
ॐ ह्रीं ॐ नमः ओं ह्रीं ॐ ते किंकरी कृत्य गृणंति देवा नित्ये जगत्येक विभूति युक्ते ।
नवदामि चान्यं न शृणोमि चान्यं न गृणामि चान्यंन विचिंतयामि ॐ ह्रीं ॐ मः न ह्रीं ॐ ॥२१॥
ॐ ह्रीं ॐ नमः ओं ह्रीं ॐ नस्मरामि चान्यंन भजामि चान्यंन ध्यायामि चान्यंन वितर्कयामि ।
नगायामि चान्यं तव पादमंत्रात्वां विश्वयोनिं शरणं प्रपद्ये ॐ ह्रीं ॐ मः न ह्रीं ॐ ॥२२॥

॥ ॐ ह्रीं ॐ नमः ओं ह्रीं ॐ ऋषि रुवाच ॐ ह्रीं ॐ मः न ह्रीं ॐ ॥२३॥

ॐ ह्रीं ॐ नमः ओं ह्रीं ॐ इति वाक्यं समाकर्ण्य परमामृत सन्निभम् ।
प्रसन्नाभून्महाकाली वियताऽभीप्सितो वरः ॐ ह्रीं ॐ मः न ह्रीं ॐ ॥२४॥
ॐ ह्रीं ॐ नमः ओं ह्रीं ॐ इत्युक्त्वा च विशालाक्षी शंभोरानन्ददायिनी ।
प्रसन्ना परमाहलाद संयुता शिव भाषणात् ॐ ह्रीं ॐ मः न ह्रीं ॐ ॥२५॥

॥ ॐ ह्रीं ॐ नमः ओं ह्रीं ॐ श्री देव्युवाच ॐ ह्रीं ॐ मः न ह्रीं ॐ ॥

ॐ ह्रीं ॐ नमः ओं ह्रीं ॐ व्रियतां मन सोभीष्टो वरो जगति दुर्लभ ।
दास्याम्यद्यामि दातव्यं तव स्तुत्या वशीकृता ॐ ह्रीं ॐ मः न ह्रीं ॐ ॥२६॥

॥ ॐ ह्रीं ॐ नमः ओं ह्रीं ॐ सदा शिव उवाच ॐ ह्रीं ॐ मः न ह्रीं ॐ ॥

ॐ ह्रीं ॐ नमः ओं ह्रीं ॐ कुला चारेण ते देवि मतिस्तु कदाचन ।
शिथिला देव देवेशि सूक्तं च सफलं तव ॐ ह्रीं ॐ मः न ह्रीं ॐ ॥२७॥

॥ श्री देव्युवाच ॐ ह्रीं ॐ मः न ह्रीं ॐ ॥

ॐ ह्रीं ॐ नमः ओं ह्रीं ॐ शृणुध्वं प्रीति संयुक्ता ब्रह्मा विष्णु महेश्वराः ।
देवीसूक्तं परं ध्यान् भविष्यति वरार्थदम् ॐ ह्रीं ॐ मः न ह्रीं ॐ ॥२८॥
ॐ ह्रीं हूं ह्रीं श्रीं क्लीं ऐं ह्रीं क्लीं स्वाहा। बिना त्रिसूक्तं च पठेद्यस्तु सप्तशतीं नरः ।
मातृगामी स विज्ञेयो नरका वास तत्परः । ममाऽवज्ञाऽपराधेन ब्रह्मा ध्यानां गतिं ब्रजेत् ।

॥ इति श्री महाकाली सूक्तं सम्पूर्णम् ॥

॥ श्रीमद् दक्षिणकालिका कवचम् ॥

इस कवच स्तोत्र में सभी आवरण देवताओं से रक्षा प्रार्थना की गई है। अतः इसके पाठ से यंत्र पूजा का फल भी प्राप्त होता है।

कैलास शिखरारूढं भैरवं चन्द्रशेखरम्। वक्षः स्थले समासीना भैरवी परिपृच्छति ॥

॥ श्रीभैरव्युवाच ॥

देवेश परमेशान लोकानुग्रहकारकः। कवचं सूचितं पूर्वं किमर्थं न प्रकाशितम् ॥
यदि मे महती प्रीतिस्तवास्ति कुलभैरव। कवचं कालिका देव्याः कथयस्वानुकम्पया ॥

॥ श्रीभैरव उवाच ॥

अप्रकाश्य मिदं देवि नरलोके विशेषतः। लक्षवारं वारितासि स्त्री स्वभावाद्धि पृच्छसि ॥

॥ देव्युवाच ॥

सेवका बहवो नाथ कुलधर्म परायणाः। यतस्ते त्यक्तजीवाशा शवोपरि चितोपरि ॥
तेषां प्रयोग सिद्ध्यर्थं स्वरक्षार्थं विशेषतः। पृच्छामि बहुशो देव कथयस्व दयानिधे ॥

॥ श्रीभैरव उवाच ॥

कथयामि शृणु प्राज्ञे कालिका कवचं परम्। गोपनीयं पशोरग्रे स्वयोनिमपरे यथा ॥

विनियोग :- ॐ **अस्य श्री कालिका कवचस्य भैरव ऋषिः, उष्णिक् छन्दः, अद्वैतरूपिणी श्रीदक्षिण कालिका देवता, ह्रीं बीजं, हूं शक्तिः, क्रीं कीलकं सर्वार्थ साधन पुरः सरमन्त्र सिद्धौ विनियोगः।**

॥ कवचम् ॥

सहस्रारे महापद्मे कर्पूरधवलो गुरुः। वामोरुस्थिततच्छक्तिः सदा सर्वत्र रक्षतु ॥
परमेशः गुरः पातु परापरगुरुस्तथा। परमेष्ठी गुरुः पातु दिव्य सिद्धिश्च मानवः ॥
महादेवी सदापातु महादेवः सदावतु। त्रिपुरो भैरवः पातु दिव्यरूपधरः सदा ॥
ब्रह्मानन्दः सदापातु पूर्णदेवः सदावतु। चलश्चित्तः सदापातु चेलाञ्चलश्च पातु माम् ॥
कुमारः क्रोधनश्चैव वरदः स्मरदीपनः। मायामायावती चैव सिद्धौधाः पातु सर्वदा ॥
विमलो कुशलश्चैव भीमसेनः सुधाकरः। मीनो गोरक्षकश्चैव भोजदेवः प्रजापतिः।
मूलदेवो रन्तिदेवो विघ्नेश्वर हुताशनः। सन्तोषः समयानन्दः पातु मां मनवा सदा ॥
सर्वेऽप्यानन्दनाथान्तः अम्बान्तां मातरः क्रमात्। गणनाथः सदा पातु भैरवः पातु मां सदा ॥
वटुको नः सदा पातु दुर्गा मां परिरक्षतु। शिरसः पादपर्यन्तं पातु मां घोर दक्षिणा ॥
तथा शिरसि मां काली हृदि मूले च रक्षतु। सम्पूर्ण विद्यया देवी सदा सर्वत्र रक्षतु ॥
क्रीं क्रीं क्रीं वदने पातु हृदि हूं हूं सदावतु। ह्रीं ह्रीं पातु सदाधारे दक्षिणे कलिके हृदि ॥
क्रीं क्रीं क्रीं पातु मे पूर्वे हूं हूं दक्षे सदावतु। ह्रीं ह्रीं मां पश्चिमे पातु हूं हूं पातु सदोत्तरे ॥
पृष्ठे पातु सदा स्वाहा मूला सर्वत्र रक्षतु। षडङ्गे युवती पातु षडङ्गेषु सदैव माम्।

मन्त्रराजः सदापातु ऊर्ध्वाधो दिग्विदिक् स्थितः । चक्रराजे स्थिताश्चापि देवताः परिपान्तु माम् ॥
उग्रा उग्रप्रभा दीप्ता पातु पूर्वे त्रिकोणके । नीला घना वलाका च तथापर त्रिकोणके ॥
मात्रा मुद्रा मिता चैव तथा मध्यत्रिकोणके । काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी ॥
बहिः षट्कोणके पान्तु विप्रचित्ता तथा प्रिये । सर्वाः श्यामाः खड्गधरा वामहस्तेन तर्जनीः ॥
ब्राह्मी पूर्वदले पातु नारायणी तथाग्निके । माहेश्वरी दक्षदले चामुण्डा राक्षसेऽवतु ॥
कौमारी पश्चिमे पातु वायव्ये चापराजिता । वाराही चोत्तरे पातु नारसिंही शिवेऽवतु ॥
ऐं ह्रीं असिताङ्गः पूर्वे भैरवः परिरक्षतु । ऐं ह्रीं रु रुश्चाजिन कोणे ऐं ह्रीं चंडस्तु दक्षिणे ॥
ऐं ह्रीं क्रोधो नैर्ऋत्येऽव्यात् ऐं ह्रीं उन्मत्तकस्तथा । पश्चिमे पातु ऐं ह्रीं मां कपाली वायुकोणके ॥
ऐं ह्रीं भीषणाख्यश्च उत्तरेऽवतु भैरवः । ऐं ह्रीं संहार ऐशान्यां मातृणामङ्कगा शिवाः ॥
ऐं हेतुको वटुकः पूर्वदले पातु सदैव माम् । ऐं त्रिपुरांतको बटुक आग्नेय्यां सर्वदावतु ॥
ऐं वह्नि वेतालो वटुको दक्षिणे मां सदाऽवतु । ऐं अग्नि जिह्ववटुकोऽव्यात् नैर्ऋत्यांपश्चिमे तथा ॥
ऐं कालवटुकः पातु ऐं करालवटुकस्तथा । वायव्यां ऐं एकः पातु उत्तरे वटकोऽवतु ॥
ऐं भीम वटुकः पातु ऐशान्यां दिशि मां सदा । ऐं ह्रीं ह्रीं हूं फट् स्वाहान्ताश्चतुः षष्टिमातरः ॥
ऊर्ध्वाधो दक्षवामार्गे पृष्ठदेशे तु पातु माम् । ऐं हूं सिंह व्याघ्रमुखी पूर्वे मां परिरक्षतु ॥
ऐं कां कीं सर्पमुखी अग्निकोणे सदाऽवतु । ऐं मां मां मृगमेषमुखी दक्षिणे मां सदाऽवतु ॥
ऐं चौं चौं गजराजमुखी नैर्ऋत्यां मां सदाऽवतु । ऐं में में विडालमुखी पश्चिमे पातु मां सदा ॥
ऐं खौं खौं क्रोष्टुमुखी वायुकोणे सदाऽवतु । ऐं हां हां ह्रस्वदीर्घमुखी लम्बोदर महोदरी ॥
पातुमामुत्तरे कोण ऐं ह्रीं ह्रीं शिवकोणके । ह्रस्वजङ्घतालजङ्घ प्रलम्बौष्ठी सदाऽवतु ॥
एताः श्मशानवासिन्यो भीषणा विकृताननाः । पान्तु मां सर्वदा देव्यः साधकाभीष्ट पूरिकाः ॥
इन्द्रो मां पूर्वतो रक्षेदाग्नेय्या मग्निदेवता । दक्षे यमः सदापातु नैर्ऋत्यां नैर्ऋतिश्च माम् ॥
वरुणोऽवतु मां पश्चात् वायुर्मां वायवेऽवतु । कुवेरश्चोत्तरे पायात् ऐशान्यां तु सदाशिवः ॥
ऊर्ध्व ब्रह्मा सदापातु अधश्चानन्तदेवता । पूर्वान्दिक् स्थिताः पान्तु वज्राद्याश्चायुधाश्चमाम् ॥
कालिकाऽवतु शिरसि हृदये कालिकाऽवतु । आधारे कालिका पातु पादयोः कालिकाऽवतु ॥
दिक्षु मां कालिका पातु विदिक्षु कालिका ऽवतु । ऊर्ध्व मे कालिका पातु अधश्च कालिकाऽवतु ।
चर्मासृङ्मांस मेदाऽस्थि मज्जा शुक्राणिमेऽवतु । इन्द्रयाणि मनश्चैव देहं सिद्धिं च मेऽवतु ।
अकेशात् पादपर्य्यन्तं कालिका मे सदाऽवतु । वियति कालिका पातु पथि मां कालिकाऽवतु ।
शयने कालिका पातु सर्वकार्येषु कालिका । पुत्रान् मे कालिका पातु धनं में पातु कालिका ॥
यत्र मे संशयाविष्टास्ता नश्यन्तु शिवाज्ञया ।

॥ श्री त्रैलोक्य विजय कवच ॥

॥ श्री सदाशिव उवाच ॥

त्रैलोक्य विजयस्यास्य कवचस्य ऋषिः शिवः । छन्दोऽनुष्टुं देवता च आद्याकाली प्रकीर्तिता ॥
माया बीजं बीजमिति रमा शक्तिरुदाहृता । क्रीं कीलकं काम्य सिद्धौ विनियोगः प्रकीर्तितः ॥
ह्रीमाद्या मे शिरः पातु श्रीं काली वदनं मम । हृदयं क्रीं परा शक्तिः पयात्कण्ठं परात्परा ॥
नेत्रे पातु जगद्धात्री कर्णौं रक्षतु शङ्करी । घ्राणं पातु महामाया रसनां सर्वमङ्गला ॥
दन्तान्रक्षतु कौमारी कपोलौ कमलालया । ओष्ठाधरौ क्षमा रक्षेच्चिबुकं चारुहासिनी ॥
ग्रीवां पायात्कुलेशानी ककुत्पातु कृपाभयी । द्वौ बाहू बाहुदा रक्षेत्करौ कैवल्यदायिनी ॥
स्कन्धौ कपर्द्दिनी पातु पृष्ठं त्रैलोक्यतारिणी । पार्श्वे पायादपर्णा मे कटिं मे कमठासना ॥
नाभौ पातु विशालाक्षी प्रजास्थानं प्रभावतीं । उरू रक्षतु कल्याणी पादौ मे पार्वती सदा ॥
जय दुर्गाऽवतु प्राणान्सर्वाङ्गं सर्वसिद्धिदा । रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन च ॥
तत्सर्वं मे सदा रक्षेदाद्याकाली सनातनी ॥
इति ते कथितं दिव्यं त्रैलोक्य विजयाभिधम् । कवचं कालिकादेव्या आद्यायाः परमाद्भुतम् ॥
पूजाकाले पठेद्यस्तु आद्याधिकृत मानसः । सर्वान्कामानवाप्नोति तस्याद्याशु प्रसीदति ॥
मंत्रसिद्धि र्भवेदाशु किङ्कराः क्षुद्र सिद्धयः । अपुत्रो लभते पुत्रं धनार्थी प्राप्नुयाद्धनम् ॥
विद्यार्थी लभते विद्यां कामी कामानवाप्नुयात् । सहस्रावृत्त पाठेन वर्म्मणेऽस्य पुरस्क्रिया ॥
पुरश्चरणसम्पन्नं यथोक्तफलदं भवेत् । चन्दनागुरुकस्तूरी कुङ्कुमै रक्त चन्दनैः ॥
भूर्जेविलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि । शिखायां दक्षिणे बाहौ कण्ठे वा साधकः कटौ ॥
तस्याद्या कालिका वश्या वाञ्छितार्थ प्रयच्छति । न कुत्रापि भयं तस्य सर्वत्र विजयी कविः ॥
अरोगी चिरंजीवी स्याद् बलवान्धारणक्षमः । सर्वविद्यासु निपुणः सर्वशास्त्रार्थ तत्ववित् ॥
वशे तस्य महीपाला भोग मोक्षौ करस्थितौ । कलिकल्मष युक्तान्तं निःश्रयेसकरं परम् ॥

॥ श्री जगन्मङ्गल कवच ॥

॥ भैरव्युवाच ॥

काली पूजा श्रुता नाथ भावाश्च विविधाः प्रभो । इदानीं श्रोतु मिच्छामि कवचं पूर्व सूचितम् ॥
त्वमेव शरणं नाथ त्राहि मां दुःख संकटात् । सर्वदुःख प्रशमनं सर्वपाप प्रणाशनम् ॥
सर्व सिद्धिप्रदं पुण्यं कवचं परमाद्भुतम् । अतो वै श्रोतुमिच्छामि वद मे करुणानिधे ॥

॥ श्री भैरव उवाच ॥

रहस्यं शृणु वक्ष्यामि भैरव प्राणवल्लभे । श्री जगन्मङ्गलं नाम कवचं मंत्र विग्रहम् ॥

पठयित्वा धारयित्वा त्रैलोक्यं मोहयेत्क्षणात् । नारायणोऽपि यद्धृत्वा नारी भूत्वा महेश्वरम् ॥
योगिनं क्षोभमनयत् यद्धृत्वा च रघूद्वहः । वरदीप्तां जघानैव रावणादिनिशाचरान् ॥
यस्य प्रसादादीशोऽपि त्रैलोक्य विजयी प्रभुः । धनाधिपः कुबेरोऽपि सुरेशोऽभूच्छचीपतिः ।
एवं च सकला देवाः सर्वसिद्धीश्वराः प्रिये ॥

॥ विनियोगः ॥

ॐ श्री जगन्मङ्गलस्याय कवचाय ऋषिः शिवः । छन्दोऽनुष्टुप् देवता च कालिका दक्षिणेरिता ॥
जगतां मोहने दुष्ट विजये भुक्तिमुक्तिषु । योविदाकर्षणे चैव विनियोगः प्रकोर्तितः ॥

॥ कवच ॥

शिरो मे कालिका पातु क्रींकारैकाक्षरी परा । क्रीं क्रीं क्रीं मे ललाटं च कालिका खड्गधारिणी ॥
हूं हूं पातु नेत्रयुग्मं ह्रीं ह्रीं पातु श्रुति द्वयम् । दक्षिणे कालिके पातु घ्राणयुग्मं महेश्वरि ॥
क्रीं क्रीं क्रीं रसनां पातु हूं हूं पातु कपोलकम् । वदनं सकलं पातु ह्रीं ह्रीं स्वाहा स्वरूपिणी ॥
द्वाविंशत्यक्षरी स्कन्धौ महाविद्याऽखिलप्रदा । खड्गमुण्डधरा काली सर्वाङ्गमभितोऽवतु ॥
क्रीं हूं ह्रीं त्र्यक्षरी पातु चामुण्डा हृदयं मम । ऐं हूं ऊं ऐं स्तन द्वन्द्वं ह्रीं फट् स्वाहा ककुत्स्थलम् ॥
अष्टाक्षरी महाविद्या भुजौ पातु सकर्तृका । क्रीं क्रीं हूं हूं ह्रीं ह्रीं पातु करौ षडक्षरी मम ॥
क्रीं नाभिं मध्यदेशं च दक्षिणे कालिकेऽवतु । क्रीं स्वाहा पातु पृष्ठं च कालिका सा दशाक्षरी ॥
क्रीं मे गुह्यं सदापातु कालिकायै नमस्ततः । सप्ताक्षरी महाविद्या सर्वतन्त्रेषु गोपिता ॥
ह्रीं ह्रीं दक्षिणे कालिके हूं हूं पातु कटिद्वयम् । काली दशाक्षरीविद्या स्वाहान्ता चोरुयुग्मकम् ॥
ॐ ह्रीं क्रीं मे स्वाहा पातु जानुनी कालिका सदा । काली हृन्नामविधेयं चतुवर्गफलप्रदा ॥
क्रीं हूं ह्रीं पातु सा गुल्फं दक्षिणे कालिकेऽवतु । क्रीं हूं ह्रीं स्वाहा पदं पातु चतुर्दशाक्षरीमम ॥
खड्गमुण्डधरा काली वरदाभयधारिणी । विद्याभिः सकलाभिः सा सर्वाङ्गमभितोऽवतु ॥
कालि कपालिनो कुल्ला कुरुकुल्ला विरोधिनी । विप्रचित्ता तथोग्रोग्रप्रभा दीप्ता घनत्विषः ॥
नीला घना वलाका च मात्रा मुद्रा मिता च माम् । एताः सर्वाः खड्गधरा मुण्डमाला विभूषणाः ॥
रक्षन्तु मां दिग्विदिक्षु ब्राह्मी नारायणी तथा : माहेश्वरी च चामुण्डा कौमारी चाऽपराजिता ॥
वाराही नारसिंही च सर्वाश्रयामित भूषणाः । रक्षन्तु स्वायुर्धैर्दिक्षु मां यथा तथा ॥
इति ते कथितं दिव्यं कवचं परमाद्भुतम् । श्री जगन्मङ्गलं नाम महामंत्रौध विग्रहम् ॥
त्रैलोक्याकर्षणं ब्रह्मकवचं मन्मुखोदितम् । गुरु पूजां विधायाथ विधिवत्प्रपठेत्ततः ॥
कवचं त्रिःसकृद्वापि यावज्ज्ञानं च वा पुनः । एतच्छतार्धमावृत्य त्रैलोक्य विजयी भवेत् ॥
त्रैलोक्यं क्षोभयत्येव कवचस्य प्रसादतः । महाकविर्भवेन्मासात् सर्वसिद्धीश्वरो भवेत् ॥
पुष्पाञ्जलीन् कालिका यै मूलेनैव पठेत्सकृत् । शतवर्षसहस्राणां पूजायाः फलमाप्नुयात् ॥
भूर्जेज विलिखितं चैतत् स्वर्णस्थं धारयेद्यदि । शिखायां दक्षिणे बाहौ कण्ठे वा धारणाद्बुद्ध ॥

त्रैलोक्यं मोहयेत्क्रोधात् त्रैलोक्यं चूर्णयेत्क्षणात् । पुत्रवान् धनवान् श्रीमान् नानाविद्यानिधिर्भवेत् ॥
ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्र स्पर्शवात्ततः । नाशमायान्ति सर्वत्र कवचस्यास्य कीर्तनात् ॥
मृतवत्सा च या नारी वन्ध्या वा मृतपुत्रिणी । कण्ठे वा वामबाहौ वा कवचस्यास्य धारणात् ॥
वह्वपत्या जीववत्साभवत्येव न संशयः । न देय परशिष्येभ्यो ह्यभक्तेभ्यो विशेषतः ॥
शिष्योभ्यो भक्ति युक्तेभ्यो ह्यन्यथा मृत्युमाप्नुयात् । स्पर्धामुद्धूय कमला वाग्देवी-मन्दिरे मुखे ॥
पौत्रान्तं स्थैर्यमास्थाय निवसत्येव निश्चितम् । इदं कवचमज्ञात्वा यो जपेद्दक्षकालिकाम् ॥
शतलक्षं प्रजप्त्वापि तस्य विद्या न सिद्धयति । सहस्त्रधातमाप्नोति सोऽचिरान्मृत्युमाप्नुयात् ॥
जपेदादौ जपेदन्ते सप्तवाराण्यनुक्रमात् । नोधृत्य यत्र कुत्रापि गोपनीयं प्रयत्नतः ॥
लिखित्वा स्वर्णपात्रे वै पूजाकाले तु साधकः । मूर्ध्नि धार्यं प्रयत्नेन विद्यारत्नं प्रपूजयेत् ॥

॥ अथ काली महाकौतुहल हृदय स्तोत्रम् ॥

॥ श्री महाकाल उवाच ॥

महाकौतुहल स्तोत्रं हृदयाख्यं महोत्तमम् । शृणु प्रिये! महागोप्यं दक्षिणायाः सुगोपितम् ॥१॥
अवाच्यमपि वक्ष्यामि तव प्रीत्या प्रकाशितम् । अन्येभ्यः कुरु गोप्यं च सत्यं सत्यं च शैलजे ॥२॥

॥ श्री देव्युवाच ॥

कस्मिन् युगे समुत्पन्नं केन स्तोत्रं कृतं पुरा । तत्सर्वं कथ्यतां शंभो दयानिधे महेश्वर ॥३॥

॥ श्रीमहाकाल उवाच ॥

पुरा प्रजापतेः शीर्षच्छेदनं कृतवानहम् । ब्रह्महत्याकृतैः पापैर्भैरवत्वं ममागतम् ।
ब्रह्महत्याविनाशाय कृतं स्तोत्रं मया प्रिये । कृत्याविनाशकं स्तोत्रंब्रह्महत्याऽपहारकम् ॥५॥

विनियोग :- ॐ अस्य श्रीदक्षिणकाल्या हृदय स्तोत्र मंत्रस्य श्रीमहाकाल ऋषिरुष्णिक्छंदः, श्रीदक्षिण कालिका देवता, क्रीं बीजं, ह्रीं शक्तिः, नमः कीलकं, सर्वत्र सर्वदा जपे विनियोगः।

हृदयादिन्यास :- ॐ क्रां हृदयाय नमः। ॐ क्रीं शिरसे स्वाहा। ॐ क्रूं शिखायै वषट्। ॐ क्रैं कवचाय हुं। ॐ क्रौं नेत्रत्रयाय वौषट्। ॐ क्रः अस्त्राय फट्। इति हृदयादि न्यासः।

॥ ध्यानम् ॥

ॐ ध्यायेत्कालीं महामायां त्रिनेत्रां बहुरूपिणीम् । चतुर्भुजां ललज्जिह्वां पूर्णचन्द्रनिभाननाम् ॥१॥
नीलोत्पलदलप्रख्यां शत्रुसंघविदारिणीम् । नरमुण्डं तथा खड्गं कमलं वरदं तथा ॥२॥
बिभ्राणां रक्तवदनां दंष्ट्रालीं घोररूपिणीम् । अट्टाट्टहासनिरतां सर्वदा च दिगंम्बराम् ॥३॥
शवासनस्थितां देवीं मुण्डमालाविभूषिताम् । इति ध्यात्वा महादेवीं ततस्तु हृदयं पठेत् ॥४॥
ॐ कालिका घोररूपाढ्या सर्वकामफलप्रदा । सर्वदेवस्तुता देवी शत्रुनाशं करोतु मे ॥५॥
ह्रीं ह्रीं स्वरूपिणी श्रेष्ठा त्रिषु लोकेषु दुर्लभा । तव स्नेहान्मया ख्यातं न देयं यस्य कस्यचित् ॥६॥

अथ ध्यानं प्रवक्ष्यामि निशा मय परात्मिके । यस्य विज्ञान मात्रेण जीवन्मुक्तो भविष्यति ॥७॥
नागयज्ञोपवीताञ्च चन्द्रार्द्धकृत शेखराम् । जटाजूटाञ्च संचिंत्य महाकालसमीपगाम् ॥८॥
एवं न्यासादयः सर्वे ये प्रकुर्वंति मानवाः । प्राप्नुवंति च ते मोक्षं सत्यं सत्यं वरानने ॥९॥
यन्त्रं शृणु परं देव्याः सर्वार्थसिद्धिदायकम् । गोप्यं गोप्यतरं गोप्यं गोप्यं गोप्यतरं महत् ॥१०॥
त्रिकोणं पञ्चकं चाष्टकमलं भूपुरान्वितम् । मुण्डपंक्तिं च ज्वालां च कालीयंत्रं सुसिद्धिदम् ॥११॥
मन्त्रं तु पूर्वकथितं धारयस्व सदा प्रिये । देव्या दक्षिणकाल्यास्तु नाममालां निशामय ॥१२॥
काली दक्षिणकाली च कृष्णरूपा परात्मिका । मुण्डमाला विशालाक्षी सृष्टिसंहारकारिका ॥१३॥
स्थितिरूपा महामाया योगनिद्रा भगात्मिका । भगसर्पि : पानरता भगोद्योता भगांगजा ॥१४॥
आद्या सदा नवा घोरा महातेजाः करालिका । प्रेतवाहा सिद्धिलक्ष्मीरनिरुद्धा सरस्वती ॥१५॥
एतानि नाममाल्यानि ये पठंति दिने दिने । तेषां दासस्य दासोऽहं सत्यं सत्यं महेश्वरि ॥१६॥
ॐ कालीं कालहरां देवीं कंकालबीजरूपिणीम् । कालरूपां कलातीतां कालिकां दक्षिणां भजे ॥१७॥
कुण्डगोलप्रियां देवीं स्वयंभूकुसुमे रताम् । रतिप्रियां महारौद्रीं कालिकां प्रणमाम्यहम् ॥१८॥
दूतीप्रियां महादूतीं दूतीयोगेश्वरीं पराम् । दूतीयोगोद्भवरतां दूतीरूपां नमाम्यहम् ॥१९॥
क्रीं मंत्रेण जलं जप्त्वा सप्तधा सेचनेन तु । सर्वे रोगा विनश्यंति नात्र कार्या विचारणा ॥२०॥
क्रीं स्वाहांतैर्महामंत्रैश्चन्दनं साधयेत्ततः । तिलकं क्रियते प्राज्ञैर्लोको वश्यो भवेत्सदा ॥२१॥
क्रीं हूं ह्रीं मंत्रजप्तैश्च ह्यक्षतैः सप्तभिः प्रिये । महाभयविनाशश्च जायते नात्र संशयः ॥२२॥
क्रीं ह्रीं हूँ स्वाहामंत्रेण श्मशानाग्निं च मंत्रयेत् । शत्रोर्गृहे प्रतिक्षिप्त्वा शत्रोर्मृत्युर्भविष्यति ॥२३॥
हूँ ह्रीं क्रीं चैव उच्चाटे पुष्पं संशोध्य सप्तधा । रिपूणां चैव चोच्चाटं नयत्येव न संशयः ॥२४॥
आकर्षणे च क्रीं क्रीं क्रीं जप्त्वाक्षतान् प्रतिक्षिपेत् । सहस्त्रयोजनस्था च शीघ्रमागच्छति प्रिये ॥२५॥
क्रीं क्रीं क्रीं हूँ हूँ ह्रीं ह्रीं च कज्जलं शोधितं तथा । तिलकेन जगन्मोहः सप्तधा मंत्रमाचरेत् ॥२६॥
हृदयं परमेशानि सर्वपापहरं परम् । अश्वमेघादियज्ञानां कोटिकोटि गुणोत्तरम् ॥२७॥
कन्यादानादिदानानां कोटिकोटिगुणं फलम् । दूतीयागादियागानां कोटिकोटि फलं स्मृतम् ॥२८॥
गङ्गादिसर्वतीर्थानां फलं कोटिगुणं स्मृतम् । एकधा पाठमात्रेण सत्यं सत्यं मयोदितम् ॥२९॥
कौमारी स्वेष्टरूपेण पूजां कृत्वा विधानतः । पठेत्स्तोत्रं महेशानि जीवन्मुक्तः स उच्यते ॥३०॥
रजस्वलाभगंदृष्ट्वा पठेदेकाग्रमानसः । लभते परमं स्थानं देवीलोके वरानने ॥३१॥
महादुःखे महारोगे महासंकटके दिने । महाभये महाघोरे पठेत्स्तोत्रं महोत्तमम् ।
सत्यं सत्यं पुनः सत्यं गोपायेन्मातृजारवत् ॥३२॥

॥ इति काली हृदयं समाप्तम् ॥

॥ अथ श्रीकाली हृदय स्तोत्रम् ॥

॥ श्री गणेशाय नमः ॥

विनियोग: :- ॐ अस्य श्री दक्षिणकालिका हृदयमन्त्रस्य महाकाल ऋषिः, उष्णिक् छन्दः, श्रीदक्षिण कालिका देवता, ह्रीं बीजं, हूं शक्तिः, क्रीं कीलकं, श्री महाषोढारूपिणी महाकाल महिषा दक्षिण कालिका प्रसन्नार्थे पाठे विनियोगः।

॥ ध्यानम् ॥

चुच्छयामां कोटराक्षीं प्रलयघन घटां घोररूपां प्रचण्डां ।
दिग्वस्त्रां पिंगकेशीं डमरुसृणिधृतां खड्गपाशाभयानि ॥
नागं घंटां कपालं करसरसीरुहै कालिकां कृष्णवर्णां ।
ध्यायामि ध्येयमानां सकलसुखकरीं कालिकां तां नमामि ॥

ॐ ऐं ह्रीं श्रीं क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणकालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा। ॐ ऐं ह्रीं श्रीं हंसः सोहं अं आं ब्रह्मग्रंथिं भेदय भेदय इं ईं विष्णुग्रन्थिं भेदय भेदय उं ऊं रुद्रग्रन्थिं भेदय भेदय अं क्रीं आं क्रीं इं क्रीं ईं हूं उं हूं ऊं ह्रीं ऋं ह्रीं ॠं दं लृं क्षिं लॄं णें एं कां ऐं लिं ओं कें औं क्रीं अं क्रीं अः क्रीं अं हूं आं हूं इं ह्रीं ईं ह्रीं उं स्वां ऊं हां यं हूं रं हूं लं मं वं हां सं कां षं लं सं प्रं हं सीं लं दं क्षं प्रं यं सीं रं दं लं ह्रीं वं ह्रीं शं स्वां षं हां शं हं लं क्षं महाकालभैरवि महाकालरूपिणि क्रीं अनिरुद्धसरस्वति हूं हूं ब्रह्मग्रहबन्धिनि विष्णुग्रहबन्धिनि रुद्रग्रहबन्धिनि गोचरग्रहबन्धिनि अधिव्याधि ग्रहबन्धिनि सर्वदुष्टग्रहबन्धिनि सर्वदानवग्रहबन्धिनि सर्वदेवताग्रहबन्धिनि सर्वगोत्र देवताग्रहबन्धिनि सर्वग्रहोपग्रहबन्धिनि क्रीं कालि क्रीं कपालिनि क्रीं कुल्ले हूं कुरुकुल्ले हूं विरोधिनी ह्रीं विप्रचित्ते ह्रीं उग्रे क्रीं उग्रप्रभे क्रीं दीप्ते क्रीं नीले हूं घने हूं बलाके ह्रीं मात्रे ह्रीं मुद्रे।

ॐ मिते असिते असितकुसुमोपमे हूं हुंकारि कां कां काकिनि लां लां लाकिनि हां हां हाकिनि क्षिस क्षिस भ्रम भ्रम उत्तरतत्त्वविग्रह स्वरूपे अमले विमले अजिते अपाराजिते क्रीं क्रीं स्त्रीं हूं हूं फ्रें फ्रें दुष्टविद्राविणि आं ब्राह्मि ईं वैष्णवि ऊं माहेशि ॠं चामुण्डे लृं कौमारि ऐं अपराजिते औं वाराहि अं नारसिंहि ऐं ह्रीं क्लीं चामुण्डायै विच्चे श्रीं महालक्ष्मि हूं हूं पञ्चप्रेतोपरिस्थितायै शवालङ्कारायै चिन्तान्तस्थायै भैं भद्रकालिके दुष्टान विदारय विदारय मम दारिद्र्यं हन हन पापं मथमथ आरोग्यं कुरु कुरु विरूपाक्षि विरूपाक्षवरदायिनि अष्टभैरवरूपे ह्रीं नवनाथात्मिके

ॐ ह्रीं ह्रीं शक्ति रां रां राकिनि लां लां लाकिनि ह्रां ह्रां हाकिनि कां कां काकिनि क्षिस क्षिस वद वद उत्तरतत्त्वविग्रहे कराल स्वरूपे आदिविद्ये महाकालमहिषि क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणकालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा ॐ ऐं ह्रीं श्रीं ॐ क्रीं हूं ह्रीं मम पुत्रान् रक्ष रक्ष ममोपरि दुष्टबुद्धिम् दुष्ट प्रयोगान् कुर्व्वन्ति कारयन्ति करिष्यन्ति तान् हन हन मम मन्त्रसिद्धिं कुरु कुरु मम दुष्टं विदारय विदारय मम दारिद्रयं हन हन पापं मथ मथ आरोग्यं कुरु कुरु आत्मतत्वं देहि देहि हंसः सोहम् क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा नवकोटिस्वरूपे आद्ये आदिविद्ये अनिरुद्धसरस्वति स्वात्मचैतन्यं देहि देहि मम हृदये तिष्ठ तिष्ठ मम मनोरथं कुरु कुरु स्वाहा।

॥ अथ श्रीकाली कर्पूर स्तोत्रम् ॥

इस स्तोत्र में कई मंत्रों का मंत्रोद्धार है एवं इस पर कई भाष्य व टीकाएं हो चुकी है। यह स्तोत्र कर्पूर की तरह सुगंधित अर्थात् आनंददायी स्तोत्र है एवं भगवती ''कर-पूर'' कर तरह साधक को शीघ्र सद्य हो दक्षिणा फल प्रदान करती है।

कर्पूरंमध्यमान्त्यस्वरपरिरहितं सेन्दुवामाक्षि युक्तं । वीजं ते मातरेतत्त्रिपुरहर वधु त्रिः कृतं ये जपन्ति ॥
तेषांगद्यानिपद्यानिचमुखकुहरा दुल्लसन्त्येव वाचः । स्वच्छन्दं ध्वान्तधाराधररुचि रुचिरे सर्वसिद्धिं गतानाम् ॥१॥
ईशानः सेन्दुवामश्रवणपरिगतो वीजमन्यन्महेशि । द्वन्द्वं ते मन्दचेता यदि जपति जना वार मेकं कदाचित् ॥
जित्वा वाचामधीशं धनदमपिचिरं मोह यन्नम्बुजाक्षी । वृन्दं चन्द्रार्द्ध चूडे प्रभवति स महाघोर वाणावतंसे ॥२॥
ईशोवैश्वानरस्थः शशधर विलसद् वाम नेत्रेण युक्तो । वीजं ते द्वन्द्वमन्यद्विगलित चिकुरे कालिके ये जपन्ति ॥
द्वेष्टारं घ्नन्ति ते च त्रिभुवनमपि ते वश्यभावं नयन्ति । सृक्कद्वन्द्वास्रधाराद्वयधरवदने दक्षिणे कालिके ति ॥३॥
ऊर्ध्वे वामे कृपाणं करकमलतले छिन्नमुण्डं तथाधः । सव्ये चाभीर्वरं च त्रिजगदघहरे दक्षिणे कालिके च ॥
जप्त्वैतन्नाम ये वा तव मनुविभवं भावयन्त्येतदम्ब । तेषामष्टौ करस्थाः प्रकटितरदने सिद्धयस्त्र्यम्बकस्य ॥४॥
वर्गाद्यं वह्निसंस्थं विधुरति वलितं तत्त्रयं कूर्च युग्मं । लज्जाद्वन्द्वं च पश्चात् स्मितमुखितदधष्ठ द्वयं योजयित्वा ॥
मातर्ये ये जपन्ति स्मरहरमहिलेभावयन्तःवरूपं । ते लक्ष्मी लास्य लीला कमल दलदृशः कामरूपा भवन्ति ॥५॥
प्रत्येकं वा त्रयं वा द्वयमपि च परं वीजमत्यन्त गुह्यं । त्वन्नामना योजयित्वा सकलमपि सदा भावयन्तो जपन्ति ॥
तेषां नेत्रारविन्दे विहरति कमला वक्त्रशुभ्रांशुबिम्बे । वाग्देवी देवमुण्डस्त्रगतिशयलसत् कण्ठिपीनस्तनाढये ॥६॥
गतासूनां बाहु प्रकरकृतकाञ्ची परिलसन्नितम्बां दिग्वस्त्रां त्रिभुवन विधात्रीं त्रिनयनाम् ।
श्मशानस्थे तल्पे शवहृदि मकालसुरत प्रसक्तांत्वां ध्यायन् जननि जडचेता अपि कविः ॥७॥
शिवाभिर्घोराभिः शवनिवहमुण्डास्थिनिकरैः, परं सङ्कीर्णायां प्रकटित चितापां हरवधूम् ।
प्रविष्टां सन्तुष्टामुपरिसुरतेनाति युवति, सदात्वां ध्यायन्ति क्वचिदपि न तेषां परिभवः ॥८॥
वदामस्ते किं वा जननि वयमुच्चैर्जडधियो न धीता नापीशो हरिरपि नतेवेत्ति परयम् ।
तथापि त्वद्भक्तिर्मुखरयति चास्माकमसिते, तदेतत् क्षन्तव्यं न खलु पशुरोषः समुचितः ॥९॥
समन्तादापीनस्तनजघनधृग् यौवनवती, रतासक्तो नक्तं यदि जपति भक्तस्तव मनुम् ।
विवासास्त्वां ध्यायन् गलित चिकुरस्तस्त वशगाः, समस्ताः सिद्धौघा भुवि चिरतरं जीवति कविः ॥१०॥
समाः सुस्थीभूतां जपति विपरीतां यदि सदा, विचिन्त्य त्वां ध्यायन्नतिशयमहाकाल सुरताम् ।
तदा तस्य क्षौणीतल विहारभाणस्य विदुषः, कराम्भोजे वश्या हरवधु महासिद्धि निवहाः ॥११॥
प्रसूते संसारं जननि जगतीं पालयति च, समस्तं क्षित्यादि प्रलय समये संहरति च ।
अतस्त्वं धातापिं त्रिभुवनपतिः श्रीपतिरहो, महेशोऽपि प्रायः सकलमपि किं स्तौमि भवतीं ॥१२॥
अनेके सेवन्ते भवदधिक गीर्वाणनिवहान्, विमूढास्ते मातः किमपिं नहि जानन्ति परमम् ।
समाराध्यामाद्यां हरिहरविरिञ्च्यादि विबुधैः, प्रपन्नोऽस्मि स्वैरं रतिरसमहानन्द निरताम् ॥१३॥
धरित्री कीलालं शुचिरपि समीरोऽपि गगनं, त्वमेका कल्याणी गिरिशरमणी कालि सकलम् ।
स्तुतिः का ते मातस्तव करुणया मामगतिकं, प्रसन्ना त्वं भूया भवमनु न भूयान्मम जनुः ॥१४॥

॥ अथ श्रीकाली कर्पूर स्तोत्रम् ॥

इस स्तोत्र में कई मंत्रों का मंत्रोद्धार है एवं इस पर कई भाष्य व टीकाएं हो चुकी है। यह स्तोत्र कर्पूर की तरह सुगंधित अर्थात् आनंददायी स्तोत्र है एवं भगवती ''कर-पूर'' कर तरह साधक को शीघ्र सद्य हो दक्षिणा फल प्रदान करती है।

कर्पूरंमध्यमान्त्यस्वरपरिरहितं सेन्दुवामाक्षि युक्तं । वीजं ते मातरेतत्त्रिपुरहर वधु त्रिः कृतं ये जपन्ति ॥
तेषांगद्यानिपद्यानिचमुखकुहरा दुल्लसन्त्येव वाचः । स्वच्छन्दं ध्वान्तधाराधररुचि रुचिरे सर्वसिद्धिं गतानाम् ॥१॥

ईशानः सेन्दुवामश्रवणपरिगतो वीजमन्यन्महेशि । द्वन्द्वं ते मन्दचेता यदि जपति जना वार मेकं कदाचित् ॥
जित्वा वाचामधीशं धनदमपिचिरं मोह यन्नम्बुजाक्षी । वृन्दं चन्द्रार्द्ध चूडे प्रभवति स महाघोर वाणावतंसे ॥२॥

ईशोषैश्वानरस्थः शशधर विलसद् वाम नेत्रेण युक्तो । वीजं ते द्वन्द्वमन्यद्विगलित चिकुरे कालिके ये जपन्ति ॥
द्वेष्टारं घ्नन्ति ते च त्रिभुवनमपि ते वश्यभावं नयन्ति । सृक्कद्वन्द्वास्त्रधाराद्वयधरवदने दक्षिणे कालिके ति ॥३॥

ऊर्ध्वे वामे कृपाणं करकमलतले छिन्नमुण्डं तथाधः । सव्ये चाभीर्वरं च त्रिजगदघहरे दक्षिणे कालिके च ॥
जप्त्वैतन्नाम ये वा तव मनुविभवं भावयन्त्येतदम्ब । तेषामष्टौ करस्थाः प्रकटितरदने सिद्धयस्त्र्यम्बकस्य ॥४॥

वर्गाद्यं वह्निसंस्थं विधुरति वलितं तत्त्रयं कूर्च युग्मं । लज्जाद्वन्द्वं च पश्चात् स्मितमुखितदधष्ठ द्वयं योजयित्वा ॥
मातर्ये ये जपन्ति स्मरहरमहिलेभावयन्तःवरूपं । ते लक्ष्मी लास्य लीला कमल दलदृशः कामरूपा भवन्ति ॥५॥

प्रत्येकं वा त्रयं वा द्वयमपि च परं वीजमत्यन्त गुह्यं । त्वन्नामना योजयित्वा सकलमपि सदा भावयन्तो जपन्ति ॥
तेषां नेत्रारविन्दे विहरति कमला वक्त्रशुभ्रांशुबिम्बे । वाग्देवी देवमुण्डस्त्रगतिशयलसत् कण्ठिपीनस्तनाढये ॥६॥

गतासूनां बाहु प्रकरकृतकाञ्ची परिलसन्नितम्बां दिग्वस्त्रां त्रिभुवन विधात्रीं त्रिनयनाम् ।
श्मशानस्थे तल्पे शवहृदि मकालसुरत प्रसक्तांत्वां ध्यायन् जननि जडचेता अपि कविः ॥७॥

शिवाभिर्घोराभिः शवनिवहमुण्डास्थिनिकरैः, परं सङ्कीर्णायां प्रकटित चितापां हरवधूम् ।
प्रविष्टां सन्तुष्टामुपरिसुरतेनाति युवति, सदात्वां ध्यायन्ति क्वचिदपि न तेषां परिभवः ॥८॥

वदामस्ते किं वा जननि वयमुच्चैर्जडधियो न धीता नापीशो हरिरपि नतेवेत्ति परयम् ।
तथापि त्वद्भक्तिर्मुखरयति चास्माकमसिते, तदेतत् क्षन्तव्यं न खलु पशुरोषः समुचितः ॥९॥

समन्तादापीनस्तनजघनधृग् यौवनवती, रतासक्तो नक्तं यदि जपति भक्तस्तव मनुम् ।
विवासास्त्वां ध्यायन् गलित चिकुरस्तस्त वशगाः, समस्ताः सिद्धौघा भुवि चिरतरं जीवति कविः ॥१०॥

समाः सुस्थीभूतां जपति विपरीतां यदि सदा, विचिन्त्य त्वां ध्यायन्नतिशयमहाकाल सुरताम् ।
तदा तस्य क्षौणीतल विहारभाणस्य विदुषः, कराम्भोजे वश्या हरवधु महासिद्धि निवहाः ॥११॥

प्रसूते संसारं जननि जगतीं पालयति-च, समस्तं क्षित्यादि प्रलय समये संहरति च ।
अतस्त्वं धातापिं त्रिभुवनपतिः श्रीपतिरहो, महेशोऽपि प्रायः सकलमपि किं स्तौमि भवतीं ॥१२॥

अनेके सेवन्ते भवदधिक गीर्वाणनिवहान्, विमूढास्ते मातः किमपिं नहि जानन्ति परमम् ।
समाराध्यामाद्यां हरिहरविरिञ्च्यादि विबुधैः, प्रपन्नोऽस्मि स्वैरं रतिरसमहानन्द निरताम् ॥१३॥

धरित्री कीलालं शुचिरपि समीरोऽपि गगनं, त्वमेका कल्याणी गिरिशरमणी कालि सकलम् ।
स्तुतिः का ते मातस्तव करुणया मामगतिकं, प्रसन्ना त्वं भूया भवमनु न भूयान्मम जनुः ॥१४॥

श्मशानस्थः सुस्थो गलित चिकुरो दिक्पटधरः, सहस्त्रस्त्वर्काणां निजगलितवीर्येण कुसुमम् ।
जपंस्त्वप्रत्येकं मनुमपि तव ध्यान निरतो, महाकालि स्वैरं स भवति धरित्रीपरिवृढः ॥१५॥
गृहे सम्मार्जन्या परिगलित वीर्यं हि चिकुरं, समूलं मध्याह्ने वितरति चितायां कुजदिने ।
समुच्चार्य प्रेम्ना मनुमपि सकृत् कालि सततं, गजारूढो याति क्षिति परिवृढः सत्कविवरः ॥१६॥
सुपुष्पैराकीर्णं कुसुमधनुषो मन्दिर महो, पुरोध्यायं ध्यायं यदि जपति भक्तस्तव मनुम् ।
स गंधर्व श्रेणीपतिरपि कवित्वामृतनदी, नदीनः पर्यन्ते परमपदलीनः प्रभवतिं ॥१७॥
त्रिपञ्चारे पीठ शवशिवहृदि स्मेरवदनां, महाकालेनोच्चैर्मदनरसलावण्य नियताम् ।
समासक्तो नक्तं स्वयमपि रतानन्दनिरतो, जनो यो ध्यायेत्त्वामयि जननि स स्यात् स्मरहरः ॥१८॥
सलोमस्थि स्वैरं पललमपि मार्जारमसिते, परञ्चौष्ट्रं मैषं नरमहिष योश्छारमपि वा ।
बलिं ते पूजायामपि वितरतां मर्त्यवसतां, सतां सिद्धिः सर्वा प्रतिपदमपूर्वं प्रभवति ॥१९॥
वशी लक्षं मन्त्रं प्रजापति हविष्याशनरतो, दिवा मातर्युष्मच्चरण युगलध्यान निपुणः ।
परं नक्तं नग्नो निधुवनविनोदेन च मनुं, छवेल्लक्षं स स्यात् स्मरहर समानः क्षितितले ॥२०॥
इदं स्तोत्रं मातस्तव मनुसमुद्धारण जनुः, स्वरूपाख्यं पादाम्बुजयुगल प्जाविधियुतम् ।
निशार्द्धं वा पूजासमयमधि वा यस्तु पठति, प्रलापस्तस्यापि प्रसरति कवित्वामृतरसः ॥२१॥
कुरङ्गारक्षीवृकं तमनुसरसि प्रेमतरलं, वशस्तस्य क्षौणीपतिरपि कुबेरप्रतिनिधिः ।
रिपुः कारागारं कलयति च तं केलिकलया, चिरं जीवन्मुक्तः स भवति च भक्तः प्रतिजनुः ॥२२॥

॥ इति श्रीमहाकाल विरचितं स्वरूपाख्यं श्रीकाली कर्पूर स्तोत्रम् समाप्तम् ॥

॥ अथ श्री काली क-कारादि शतनाम् स्तोत्र ॥

श्रृणु देवि जगद्वन्धे स्तोत्रमेतदनुमत्तमम् । पठनाच्छ्रवणादस्य सर्वसिद्धीश्वरो भवेत् ॥
असौभाग्य प्रशमनं सुखसम्पद्विवर्धनम् । अकालमृत्यु हरणं सर्वापद्विनिवारणम् ॥
श्रीमदाद्या कालिकायाः सुखसान्निध्यकारणम् । स्तवस्यास्य प्रसीदेन त्रिपुरारिरहं प्रिये ॥
स्तोत्रस्याय ऋषिर्देवि सदाशिव उदाहृतः । छन्दो ऽनुष्टुप्देवताद्या कालिका परिकीर्तिता ॥
धर्मकामार्थमोक्षेषु विनियोगः प्रकीर्तितः ॥

इस स्तोत्र के ऋषि सदाशिव है छन्द अनुष्टुप है देवता आद्याकाली है तथा धर्म काम अर्थ और माक्ष की प्राप्ति में इसका विनियोग है।

॥ स्तोत्रम् ॥

ह्रीं काली श्रीं कराली च क्रीं कल्याणी कलावती । कमला कलिदर्पघ्नी कपर्दीश कृपान्विता ॥
कालिका कालमाता च कालानल समद्युतिः । कपर्दिनी करालास्या करुणामृतसागरा ॥
कृपामयी कृपाधारा कृपापारा कृपागमा । कृशानुः कपिला कृष्णा कृष्णानन्दविवर्द्धिनी ॥

कालरात्रिः कामरूपा कामपाश विमोचिनी । कादम्बिनी कलाधारा कलिकल्मषनाशिनी ॥
कुमारी पूजन प्रीता कुमारी पूजकाल्या । कुमारी भोजनानन्दा कुमारीरूपधारिणी ॥
कदम्बवनसञ्चारा कदम्बवनवासिनी । कदम्बपुष्पसन्तोषा कदम्बपुष्पमालिनी ॥
किशोरी कलकण्ठा च कलनादनिनादिनी । कादम्बरी पानरता तथा कादम्बरीप्रिया ॥
कपालपात्र निरता कंकालमाल्य धारिणी । कमलासन सन्तुष्टा कमलासन वासिनी ॥
कमलालय - मध्यस्था कमलामोद - मोदिनी । कलहंसगतिः क्लैव्यनाशिनी कामरूपिणी ॥
कामरूपकृतावासा कामपीठ विलासिनी । कमनीया कल्पलता कमनीय विभूषणा ॥
कमनीय गुणाराध्या कोमलाङ्गी कृशोदरी । कारणामृत सन्तोषा कारणानन्द सिद्धिदा ॥
कारणानन्दजापेष्टा कारणार्चन हर्षिता । कारणार्णव सम्मग्ना कारणव्रत पालिनी ॥
कस्तूरीसौरभा मोदा, कस्तूरी तिलकोज्ज्वला । कस्तूरी पूजनरता कस्तूरी पूजनप्रिया ॥
कस्तूरी दाहजननी, कस्तूरी मृगतोषिणी । कस्तूरीभोजन प्रीता, कर्पूरामोद मोदिता ॥
कर्पूरमालाभरणा कर्पूरचदनोक्षिता । कर्पूरकारणाह्लादा कर्पूरामृत - पायिनी ॥
कर्पूरसागर - स्नाता कर्पूरसागरालया । कूर्चबीजजपप्रीता कूर्चजाप परायणा ॥
कुलीना कौलिकाराध्या कौलिक प्रियकारिणी । कुलाचारा कौतुकिनी कुलमार्ग प्रदर्शिनी ॥
काशीश्वरी कष्टहर्त्री काशीश्वर दायिनी । काशीश्वरी कृतामोदा काशीवर मनोरमा ॥
कमलञ्जीरचरणा क्वणत्काञ्चीविभूषणा । काञ्चनाद्रिकृतागारा काञ्चनाचल कौमुदी ॥
कामबीज जपानन्दा कामबीज स्वरूपिणी । कुमतिघ्नी कुलीनार्तिनाशिनी कुल कामिनी ॥
क्रीं ह्रीं श्रीं मंत्रवर्णेन कालकण्टक घातिनी ॥
इत्याद्याकालिका देव्याः शतनाम प्रकीर्तितम् । ककारकूटघटितं कालीरूप स्वरूपकम् ॥
पूजाकाले पठेद्यस्तु कालिकाकृतमानसः । मंत्रसिद्धि र्भवेदाशु तस्य काली प्रसीददति ॥
बुद्धि विद्या च लभते गुरोरादेशमात्रतः । धनवान् कीर्तिमान् भूयाद्दानशीलो दयान्वितः ॥
पुत्रपौत्र सुखैश्वर्यैर्मोदते साधको भुवि । भौमावास्या निशाभागेमपञ्चक समन्वितः ॥
पूजयित्वा महाकालीमाद्यां त्रिभुवनेश्वरीम् । पठित्वा शतनामानि साक्षात्कालीमयो भवेत् ॥
नासाध्यं विद्यते तस्य त्रिषु लोकेषु किञ्चन । विद्यायां वाक्पतिः साक्षात् धने धनपतिर्भवेत् ॥
समुद्र इव गाम्भीर्ये बले च पवनोपमः । तिग्मांशुरिव दुष्प्रेक्ष्यः शशिवच्छुभदर्शनः ॥
रूपे मूर्तिधारः कामो योषितां हृदयङ्गमः । सर्वत्र जयमाप्नोति स्तवस्यायः प्रसादतः ॥
यं यं कामं पुरस्कृत्य स्तोत्रमेतदुदीरयेत् । तं तं काममवाप्नोति श्रीमदाद्याप्रसादतः ॥
रणे राजकुले द्यूते विवादे प्राणसंकटे । दस्युग्रस्ते ग्रामदाहे सिंहव्याघ्रावृते तथा ॥
अरण्ये प्रान्तरे दुर्गे ग्रहराज भयेऽपि वा । ज्वरदाहे चिरव्याधौ महारोगादि संकुले ॥

बालग्रहादि रोगे च तथा दुःस्वप्नदर्शने । दुस्तरे सलिले वापि पोते वातविपद्गते ॥
विचिन्त्य परमां मायामाद्यां कालीं परात्पराम् । यः पठेच्छतनामानि दृढ़भक्ति समन्वितः ॥
सर्वापद्भ्यो विमुच्येत देवि सत्यं नं संशयः । न पापेभ्यो भयं तस्य न रोगोभ्यो भयं क्वचित् ॥
सर्वत्र विजयस्तस्य न कुत्रापि पराभवः । तस्यदर्शन मात्रेण पलायन्ते विपदगणाः ॥
स वक्ता सर्वशास्त्राणां स भोक्ता सर्वसम्पदाम् । स कर्ता जाति धर्माणं ज्ञातीनां प्रभुरेव सः ॥
वाणी तस्य वसेद्वक्त्रे कमला निश्चला गृहे । तन्नाम्ना मानवाः सर्वे प्रणमन्ति ससम्भ्रमा ॥
दृष्ट्या तस्य तृणायन्ते ह्यणिमाद्यष्ट सिद्धयः । आद्याकाली स्वरूपाख्यं शतनाम प्रकीर्तितम् ॥
अष्टोत्तरशतावृत्या पुरश्चर्यास्य गीयते । पुरस्क्रियान्वितं स्तोत्रं सर्वाभीष्टफलप्रदम ॥
शतनामस्तुति मिमामाद्याकाली स्वरूपिणीम् । पठेद्वा पाठयेद्वापि श्रृणुयाच्छ्रावयेदपि ॥
सर्वपापविनिर्मुक्तो ब्रह्मसायुज्य माप्नुयात् ॥

॥ अथ काली ककारादि सहस्रनाम स्तोत्रम् ॥

इस स्तोत्र में कई मंत्रों का मंत्रोद्धार है। यथा - १. ॐ मधुमती स्थावर जंगमाकर्षिणी ठं ठं स्वाहा। २. ॐ ह्रीं पद्मावति त्रैलोक्य वार्ता कथय कथय स्वाहा। ३. ॐ मतसंजीवनी मृतमुथापयोत्थाय स्वाहा। ४. ह्रीं स्वप्न वाराहि कालि स्वप्ने अमुकस्यामुकमं देहि क्रीं स्वाहा। ५. ऐं घोरे आसापघोरे हूं घोररूपे महाघोरे भीममुखी भीषणयमुष्य ऐं ऐं शिवे फट् फट् स्वाहा।

कैलासशिखरे रम्ये नानादेवगणावृते । नानावृक्षलताकीर्णे नानापुष्पैरलंकृते ॥१॥
चतुर्मण्डलसंयुक्ते श्रृंगारमण्डपे स्थितम् । समाधौ संस्थितं शांतं क्रीडन्तं योगिनी प्रियम् ॥२॥
तत्र मौनधरं दृष्ट्वा देवी पृच्छति शंकरम् ।

॥ देव्युवाच ॥

किं त्वया जप्यते देव किं त्वया स्मर्य्यते सदा ॥३॥
सृष्टिः कुत्र विलीनास्ति पुनः कुत्र प्रजायते । ब्रह्माण्डकारणं यत्तत् किमाद्यं कारणं महत् ॥४॥
मनोरथमयी सिद्धिस्तथा वांछामयी शिव । तृतीया कल्पनासिद्धिः कोटिसिद्धीश्वरत्वकम् ॥५॥
शक्तिपाताष्टदशकं चराचरपुरीगतिः । महेन्द्रजालमिन्द्रादिजालानां रचना तथा ॥६॥
अणिमाद्यष्टकं देव पराकायप्रवेशनम् । नवीनसृष्टिकरणं समुद्रशोषणं तथा ॥७॥
अमायां चन्द्रसंदर्शोदिवा चन्द्रप्रकाशनम् । चन्द्राष्टकं चाष्टदिक्षु तथा सूर्याष्टकं शिव ॥८॥
जले जलमयत्वं च वह्नौ वह्निमयत्वकम् । ब्रह्मविष्णवादिनिर्माणमिन्द्राणां कारणं करे ॥९॥
पातालगुटिका यक्षवेतालपंचकं तथा । रसायनं तथा गुप्तिस्तथैव चाखिलांजनम् ॥१०॥
महामधुमती सिद्धिस्तथा पद्मावती शिव । तथा भोगवती सिद्धिर्यावत्यः संति सिद्धयः ॥११॥
केन मंत्रेण तपसा कलौ पापसमाकुले । आयुष्यं पुण्यरहिते कथं भवति तद्वद ॥१२॥

॥ श्रीशिव उवाच ॥

विना मंत्रं विना स्तोत्रं विनैव तपसा प्रिये । विना बलिं विना न्यासं भूतशुद्धिं विना प्रिये ॥१३॥
विना ध्यानं विना यंत्रं विना पूजादिना प्रिये । विना क्लेशादिभिर्देवि देहदुःखादिभिर्विना ॥१४॥
सिद्धिराशु भवेद्येन तदेव कथ्यते मया । शून्ये ब्रह्माण्डगोले तु पंचाशच्छून्यमध्यके ॥१५॥
पंचशून्यस्थिता तारा सर्वान्ते कालिका स्मृता । अनन्तकोटिब्रह्माण्ड राजदन्ताग्रके शिवे ॥१६॥
स्थाप्य शून्यालयं कृत्वा कृष्णवर्णं विधाय च । महानिर्गुणरूपा च वाचातीता परा कला ॥१७॥
क्रीडायां संस्थिता देवी शून्यरूपा प्रकल्पयेत् । सृष्टेरारंभकार्ये तु दृष्ट्वा छाया तया यदा ॥१८॥
इच्छाशक्तिस्तु सा जाता तया कालो विनिर्मितः । प्रतिबिम्बं तत्र दृष्टं जाता ज्ञानाभिधा तु सा ॥१९॥
इदमेतत्किं विशिष्टं जातं विज्ञानकं मुदा। तदा क्रियाभिधा जाता तदीक्षातो महेश्वरि ॥२०॥
ब्रह्माण्डगोले देवेशि राजदंतस्थितं च यत् । सा क्रिया स्थापयामास स्वस्वस्थानक्रमेण च ॥२१॥
तत्रैव स्वेच्छया देवि सामरस्यपरायणा । तदिच्छा कथ्यते देवि यथावदवधारय ॥२२॥
युगादिसमये देवि शिवं परगुणोत्तमम् । तदिच्छानिर्गुणं शांतं सच्चिदानन्दविग्रहम् ॥२३॥
शाश्वतं सुन्दरं शुक्लं सर्वदेवयुतं वरम् । आदिनाथं गुणातीतं काल्यां संयुतमीश्वरम् ॥२४॥
विपरीतरतं देवं सामरस्य परायणम् । पूजार्थमागतं देवगंधर्वाप्सरसाङ्गणम् ॥२५॥
यक्षिणीं किन्नरीमन्यामुर्वश्याद्यां तिलोत्तमाम् । वीक्ष्य तं मायया प्राह सुन्दरी प्राणवल्लभा ॥२६॥
त्रैलोक्य सुन्दरी प्राणस्वामिनी प्राणरंजिनी । किमागतं भवत्याऽद्य मम भाग्यार्णवो महान् ॥२७॥
उक्त्वा मौनधरं शंभुं पूजयंत्यप्सरोगणाः ।

॥ अप्सरस ऊचुः ॥

संसारात्तारितं देव त्वया विश्वजनप्रिय ॥२८॥
सृष्टेरारंभकार्यार्थमुद्युक्तोऽसि महाप्रभो । वेश्याकृत्यमिदं देव मंगलार्थप्रगायनम् ॥२९॥
प्रयाणोत्सवकाले तु समारंभे प्रगायनम् । गुणाद्यारंभकालो हि वर्त्तते शिवशङ्कर ॥३०॥
इन्द्राणीकोटयः संति तस्याः प्रसवबिंदुतः । ब्रह्माणी वैष्णवी चैव माहेशी कोटिकोटयः ॥३१॥
तव सामर सानन्द दर्शनार्थं समुद्भवाः । संजाताश्चाग्रतो देव चास्माकं सौख्य सागर ॥३२॥
रतिं हित्वा कामिनीनां नान्यत्सौख्यं महेश्वर । सा रतिर्दृश्यतेऽस्माभिर्महत्सौख्यार्थ कारिका ॥३३॥
एवमेतत्तु चास्माभिः कर्त्तव्यं भर्तृणा सह । एवं श्रुत्वा महादेवो ध्यानावस्थितमानसः ॥३४॥
ध्यानं हित्त्वा मायया तु प्रोवाच कालिकां प्रति । कालि कालि प्रिये रुण्डमाले भैरववादिनि ॥३५॥
शिवारूपधरे क्रूरे घोरदंष्ट्रे भयानके । त्रैलोक्यसुन्दरकरी सुन्दर्य्यः संति मेऽग्रतः ॥३६॥
सुन्दरीवीक्षणं कर्म कुरु कालि प्रिये शिवे । ध्यानं मुञ्च महादेवि ता गच्छंति गृहं प्रति ॥३७॥
तव रूपं महाकालि महाकालप्रियंकरम् । एतासां सुन्दरं रूपं त्रैलोक्यप्रियकारकम् ॥३८॥
एवं मायाप्रभाविष्टो महाकालो वदन्निति । ततः कालवचः श्रुत्वा कालं प्राह च कालिका ॥३९॥

मायायाच्छाद्य चात्मानं निजस्त्रीरूपधारिणी । इतः प्रभृति स्त्रीमात्रंभविष्यति युगे युगे ॥४०॥
वल्याद्यौषधयो देव दिवा वल्लीस्वरूपताम् । रात्रौ स्त्रीरूपमासाद्य रतिकेलिं परस्परम् ॥४१॥
अज्ञानं चैव सर्वेषां भविष्यति युगे युगे । एवं शापं च दत्त्वा तु पुनः प्रोवाच कालिका ॥४२॥
विपरीतरतिं कृत्वा चिंतयंति भजंति ये । तेषां वरं प्रदास्यामि नित्यं तत्र वसाम्यहम् ॥४३॥
इत्युक्त्वा कालिका विद्या तत्रैवांतरधीयत् । त्रिंशत्त्रिखर्वषड्वृन्दन वत्यर्बुदकोटयः ॥४४॥
दर्शनार्थं तपस्तेपे सा वै कुत्र गता प्रिया । मम प्राणप्रिया देवी हाहा प्राणप्रिये शिवे ॥४५॥
किं करोमि क्वगच्छामि चेत्येवं भ्रमसंकुलः । तस्याः काल्या दया जाता मम चिंतापरः शिवः ॥४६॥
यंत्रप्रस्तारबुद्धिस्तु काल्यादत्तातिसत्वरम् । यंत्रयागं तदारभ्य पूर्वं बिन्दुत्वगोचरम् ॥४७॥
श्रीचक्रयंत्रप्रस्तार रचनाभ्यासतत्परः । इतस्ततो भ्राम्यमाणस्त्रैलोक्यं चक्रमध्यकम् ॥४८॥
चक्रपारदर्शनार्थं कोट्यर्बुदयुगं गतम् । भक्तप्राणप्रिया देवी महाश्रीचक्रनायिका ॥४९॥
तत्र बिन्दौ परं रूपं सुन्दरं सुमनोहरम् । रूपं जातं महेशानि जाग्रत् त्रिपुरसुन्दरि ॥५०॥
रूपं दृष्ट्वा महादेवो राजराजेश्वरोऽभवत् । तस्याः कटाक्षमात्रेण तस्या रूपधरः शिवः ॥५१॥
विनाशृंगारसंयुक्ता तदा जाता महेश्वरी । विना कल्यंशतो देवि जगत्स्थावरजंगमम् ॥५२॥
न शृङ्गारो न शक्तित्वं क्वापि नास्ति महेश्वरी । सुन्दर्या प्रार्थिता काली तुष्टा प्रोवाच कालिका ॥५३॥
सर्वासां नेत्रकेशे च ममांशोऽत्र भविष्यति । पूर्वावस्थासु देवेशि ममांशस्तिष्ठति प्रिये ॥५४॥
सावस्था तरुणाख्या तु तदंतेनैव तिष्ठति । मद्भक्तानां महेशानि सदातिष्ठति निश्चितम् ॥५५॥
शक्तिस्तु कुण्ठिता जाता तथा रूपं न सुन्दरम् । चिंताविष्टा तु मलिना जाता तत्र च सुन्दरी ॥५६॥
क्षणं स्थित्वा ध्यानपरा कालीचिंतनतत्परा । तदा काली प्रसन्नाऽभूत्क्षणार्द्धेन महेश्वरि ॥५७॥
वरं ब्रूहि वरं ब्रूहि वरं ब्रूहीति सादरम् ।

॥ सुन्दर्य्युवाच ॥

ममसिद्धिवरं देहि वरोऽयं प्रार्थ्यते मया ॥५८॥
तादृगुपायं कथय येन शक्तिर्भविष्यति ।

॥ श्रीकाल्युवाच ॥

मम नामसहस्त्रं च मया पूर्वं विनिर्मितम् ॥५९॥
मत्स्वरूपं ककाराख्यं महासाम्राज्यनामकम् । वरदानाभिधं नामक्षणार्द्धाद्वरदायकम् ॥६०॥
तत्पठस्व महामाये तव शक्तिर्भविष्यति । ततः प्रभृति श्रीविद्या तन्नामपाठतत्परा ॥६१॥
तदेव नामसाहस्त्रं सुन्दरीशक्तिदायकम् । कथ्यते नामसाहस्त्रं सांवधानमनाः शृणु ॥६२॥
सर्वसाम्राज्यमेधाख्यनाम साहस्त्रकस्य च । महाकाल ऋषिः प्रोक्त उष्णिक् छन्दः प्रकीर्तितम् ॥६३॥
देवतादक्षिणा काली मायाबीजं प्रकीर्तितम् । हूँ शक्तिः कालिकाबीजं (क्रीं)कीलकं परिकीर्तितम् ॥६४॥
ध्यानं च पूर्ववत्कृत्वा साधय स्वेष्टसाधनम् ।

कालिकावरदानादिस्वेष्टार्थे विनियोगतः ॥
कीलकेन षडङ्गानि षड्दीर्घाब्जेन कारयेत् ॥६५॥

विनियोग :- ॐ अस्य श्रीसर्वसाम्राज्य मेधानामकालीरूपककारात्मक सहस्रनामस्तोत्र मंत्रस्य महाकाल ऋषिः, अनुष्टुप् छंदः, श्रीदक्षिणमहाकाली देवता, ह्रीं बीजं, हूँ शक्तिः, क्रीं कीलकं, कालीवरदानाद्यऽखिलेष्टार्थे पाठे विनियोगः।

ऋष्यादिन्यास :- ॐ महाकालऋषये नमः शिरसि, अनुष्टुप् छंदसे नमः मुखे, श्रीदक्षिणमहाकालीदेवतायै नमः हृदये, ह्रीं बीजाय नमः गुह्ये, हूँ शक्तये नमः पादयोः, क्रीं कीलकाय नमो नाभौ, विनियोगाय नमः सर्वाङ्गे। इति ऋष्यादिन्यासः।

करांगन्यास :- ॐ क्रां अंगुष्ठाभ्यां नमः। ॐ क्रीं तर्जनीभ्यां नमः। ॐ क्रूं मध्यमाभ्यां नमः। ॐ क्रैं: अनामिकाभ्यां नमः। ॐ क्रौं कनिष्ठिकाभ्यां नमः। ॐ क्रः करतलकरपृष्ठाभ्यां नमः। इति करांगन्यासः।

हृदयादिषडङ्गन्यास :- ॐ क्रां हृदयाय नमः। ॐ क्रीं शिरसे स्वाहा। ॐ क्रूं शिखायै वषट्। ॐ क्रैं कवचाय हुम्। ॐ क्रौं नेत्रत्रयाय वौषट्। ॐ क्रः अस्त्राय फट्। इति हृदयादिषडङ्गन्यासः।

॥ अथ ध्यानम् ॥

ॐ करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम्। कालिकां दक्षिणां दिव्यां मुण्डमालाविभूषिताम्।
सद्यश्छिन्नशिरः खड्गवामोर्ध्वाधः कराम्बुजाम्। अभयं वरदं चैव दक्षिणाधोर्ध्वपाणिकाम्।
महामेघप्रभां श्यामां तथा चैव दिगंबराम्। कण्ठावसक्त मुण्डालीगलद्रुधिरचर्चिताम्।
कर्णावतंसतानीत शवयुग्मभयानकाम्। घोरदंष्ट्राकरालास्यां पीनोन्नतपयोधराम्।
शवानां करसंघातैः कृतकांचीं हसन्मुखीम्। सृक्काद्वयगलद्रक्त धाराविस्फुरिताननाम्।
घोररूपां महारौद्रीं श्मशानालयवासिनीम्। दंतुरां दक्षिणव्यापिमुक्तलम्बकचोच्चयाम्।
शवरूपमहादेवहृदयोपरि संस्थिताम्। शिवाभिर्घोररूपाभिश्चतुर्दिक्षु समन्विताम्।
महाकालेन सार्द्धोर्द्धमुपविष्टरतातुराम्। सुखप्रसन्नवदनां स्मेराननसरोरुहाम्॥
एवं संचिंतयेद्देवीं श्मशानालयवासिनीम्॥६६॥

॥ अथ स्तोत्रम् ॥

ॐ क्रोंकाली क्रूँकराली चकल्याणी कमला कला।कलावती कालढ्या च कलापूज्या कलात्मिका ॥६७॥
कलाहृष्टा कलापुष्टा कलामस्ता कलाकरा। कलाकोटिसमाभासा कलाकोटिप्रपूजिता ॥६८॥
कलाकर्म कलाधारा कलापारा कलागमा। कलाधारा कमलिनी ककारा करुणा कविः ॥६९॥
ककारवर्णसर्वांगी कलाकोटिप्रभूषिता। ककारकोटिगुणिता ककारकोटिभूषणा ॥७०॥
ककारवर्णहृदया ककारमनुमण्डिता। ककारवर्णनिलया काकशब्दपरायणा ॥७१॥
कवीरास्फालनरता कमलाकरपूजिता। कमलाकरनाथा च कमलाकररूपधृक् ॥७२॥
कमलाकरसिद्धिस्था कमलाकरपारदा। कमलाकरमध्यस्था कमलाकरतोषिता ॥७३॥

कथंकारपरालापा कथंकारपरायणा । कथंकारपदांतस्था कथंकारपदार्थभूः ॥७४॥
कमलाक्षी कमलजा कमलाक्षप्रपूजिता । कमलाक्षवरोद्युक्ता ककारा कर्बुराक्षरा ॥७५॥
करतारा करच्छिन्ना करश्यामा करार्णवा । करपूज्या कररता करदा करपूजिता ॥७६॥
करतोया करामर्षा कर्मनाशा करप्रिया । करप्राणा करकजा करका करकांतरा ॥७७॥
करकाचलरूपा च करकाचलशोभिनी । करकाचलपुत्री च करकाचलतोषिता ॥७८॥
करकाचलगेहस्था करकाचलरक्षिणी । करकाचलसम्मान्या करकाचलकारिणी ॥७९॥
करकाचलवर्षाढ्या करकाचलरंजिता । करकाचलकांतारा करकाचलमालिनी ॥८०॥
करकाचलभोज्या च करकाचलरूपिणी । करामलकसंस्था च करामलकसिद्धिदा ॥८१॥
करामलकसंपूज्या करामलकतारिणी । करामलककाली च करामलकरोचिनी ॥८२॥
करामलकमाता च करामलकसेविनी । करामलकबद्ध्येया करामलकदायिनी ॥८३॥
कञ्जनेत्रा कञ्जगतिः कञ्जस्था कञ्जधारिणी । कञ्जमालाप्रियकरी कञ्जरूपा च कञ्जजा ॥८४॥
कञ्जजातिः कञ्जगतिः कञ्जहोमपरायणा । कञ्जमण्डलमध्यस्था कञ्जाभरणभूषिता ॥८५॥
कञ्जसंमाननिरता कञ्जोत्पत्तिपरायणा । कञ्जराशिसमाकारा कञ्जारण्यनिवासिनी ॥८६॥
करञ्जवृक्षमध्यस्था करञ्जवृक्षवासिनी । करञ्जफलभूषाढ्या करञ्जवनवासिनी ॥८७॥
करञ्जमालाभरणा करवालपरायणा । करवालप्रत्दृष्टात्मा करवालप्रिया गतिः ॥८८॥
करवालप्रिया कंथा करवालविहारिणी । करवालमयी कर्म्मा करवालप्रियंकरी ॥८९॥
कबन्धमालाभरणा कबन्धराशिमध्यगा । कबन्धकूटसंस्थाना कबन्धानंतभूषणा ॥९०॥
कबन्धनादसंतुष्टा कबंधासनधारिणी । कबंधगृहमध्यस्था कबन्धवनवासिनी ॥९१॥
कबंधकाञ्चीकरणी कबंधराशिभूषणा । कबंधमाला जयदा कबंधदेहवासिनी ॥९२॥
कबंधासनमान्या च कपालाकल्पधारिणी । कपालमालामध्यस्था कपालव्रततोषिता ॥९३॥
कपालदीपसंतुष्टा कपालदीपरूपिणी । कपालदीपवरदा कपालकज्जलस्थिता ॥९४॥
कपालमाला जयदा कपालजपतोषिणी । कपालसिद्धिसंहृष्टा कपालभोजनोद्यता ॥९५॥
कपालव्रतसंस्थाना कपालकमलालया । कवित्वामृतसारा च कवित्वामृतसागरा ॥९६॥
कवित्वसिद्धिसंहृष्टा कवित्वादानकारिणी । कविपूज्या कविगतिः कविरूपा कविप्रिया ॥९७॥
कविब्रह्मानन्दरूपा कवित्वव्रततोषिता । कविमानससंस्थाना कविवाञ्छाप्रपूरिणी ॥९८॥
कविकण्ठस्थिता कं ह्रीं कं कं कं कविपूर्तिदा । कज्जला कज्जलादानमानसा कज्जलप्रिया ॥९९॥
कपालकज्जलसमा कज्जलेशप्रपूजिता । कज्जलार्णवमध्यस्था कज्जलानन्दरूपिणी ॥१००॥
कज्जलप्रियसंतुष्टा कज्जलप्रियतोषिणी । कपालमालाभरणा कपालकरभूषणा ॥१०१॥
कपालकरभूषाढ्या कपालचक्रमण्डिता । कपालकोटिनिलया कपालदुर्गकारिणी ॥१०२॥

कपालगिरिसंस्थाना कपालचक्रवासिनी । कपालपात्र संतुष्टा कपालार्घ्यपरायणा ॥१०३॥
कपालार्घ्यप्रियप्राणा कपालार्घ्यवरप्रदा । कपालचक्ररूपा च कपालरूपमात्रगा ॥१०४॥
कदली कदलीरूपा कदलीवनवासिनी । कदलीपुष्प संप्रीता कदलीफलमानसा ॥१०५॥
कदलीहोम संतुष्टा कदलीदर्शनोद्यता । कदलीगर्भमध्यस्था कदलीवनसुन्दरी ॥१०६॥
कदम्बपुष्पनिलया कदंबवनमध्यगा । कदंबकुसुमामोदा कदंबवन तोषिणी ॥१०७॥
कदंबपुष्पसंपूज्या कदंबपुष्पहोमदा । कदंबपुष्पमध्यस्था कदंबफलभोजिनी ॥१०८॥
कदंबकाननांतःस्था कदंबाचलवासिनी । कक्षपा कक्षपाराध्या कक्षपासनसंस्थिता ॥१०९॥
कर्णपूरा कर्णनासा कर्णाढ्या कालभैरवी । कलप्रीता कलहदा कलहा कलहातुरा ॥११०॥
कर्णयक्षी कर्णवार्ता कथिनी कर्णसुन्दरी । कर्णपिशाचिनी कर्णमञ्जरी कपिकक्षदा ॥१११॥
कविकक्षविरूपाढ्या कविकक्षस्वरूपिणी । कस्तूरीमृगसंस्थाना कस्तूरीमृगरूपिणी ॥११२॥
कस्तूरीमृगसंतोषा कस्तूरीमृगमध्यगा । कस्तूरीरसनीलांगी कस्तूरीगंधतोषिता ॥११३॥
कस्तूरीपूजकप्राणा कस्तूरीपूजकप्रिया । कस्तूरीप्रेमसंतुष्टा कस्तूरीप्राणधारिणी ॥११४॥
कस्तूरीपूजकानन्दा कस्तूरीगंधरूपिणी । कस्तूरीमालिकारूपा कस्तूरीभोजनप्रिया ॥११५॥
कस्तूरीतिलकानन्दा कस्तूरीतिलकप्रिया । कस्तूरीहोमसंतुष्टा कस्तूरीतर्पणोद्यता ॥११६॥
कस्तूरीमार्जनोद्युक्ता कस्तूरीचक्रपूजिता । कस्तूरीपुष्पसंपूज्या कस्तूरीचर्वणोद्यता ॥११७॥
कस्तूरीगर्भमध्यस्था कस्तूरीवस्त्रधारिणी । कस्तूरिकामोदरता कस्तूरीवनवासिनी ॥११८॥
कस्तूरीवनसंरक्षा कस्तूरीप्रेमधारिणी । कस्तूरीशक्तिनिलया कस्तूरीशक्तिकुण्डगा ॥११९॥
कस्तूरीकुण्डसंस्नाता कस्तूरीकुण्डमज्जना । कस्तूरीजीवसंतुष्टा कस्तूरीजीवधारिणी ॥१२०॥
कस्तूरीपरमामोदा कस्तूरीजीवनक्षमा । कस्तूरीजातिभावस्था कस्तूरीगंधचुम्बना ॥१२१॥
कस्तूरीगंधसंशोभाविराजित कपालभूः । कस्तूरीमदनांतःस्था कस्तूरीमदहर्षदा ॥१२२॥
कस्तूरीकवितानाढ्या कस्तूरीगृहमध्यगा । कस्तूरीस्पर्शकप्राणा कस्तूरीविन्दकांतका ॥१२३॥
कस्तूर्य्यामोदरसिका कस्तूरीक्रीडनोद्यता । कस्तूरीदाननिरता कस्तूरीवरदायिनी ॥१२४॥
कस्तूरीस्थापनासक्ता कस्तूरीस्थानरंजिनी । कस्तूरीकुशलप्रश्ना कस्तूरीस्तुतिवन्दिता ॥१२५॥
कस्तूरीवंदकाराध्या कस्तूरीस्थानवासिनी । कहरूपा कहाढ्या च कहानन्दा कहात्मभूः ॥१२६॥
कहपूज्या कहात्याख्या कहहेया कहात्मिका । कहमालाकण्ठभूषा कहमंत्रजपोद्यता ॥१२७॥
कहनामस्मृतिपरा कहनामपरायणा । कहपरायणरता कहदेवी कहेश्वरी ॥१२८॥
कहहेतुकहानन्दा कहनादपरायणा । कहमाता कहांतःस्था कहमंत्रकहेश्वरा ॥१२९॥
अरयः संक्षयं यांति मनसा संस्मृता अपि । दर्शना देवजायंते नरानार्योपितद्वशाः ॥५॥
कर्ता हर्ता स्वयंवीरोजायते नात्रसंशयः । यं यं कामयते कामं तं प्राप्नोति निश्चितम् ॥६॥
दुरितनं च तस्यास्तेनास्ति शोकाः कदाचन । चतुष्पथेर्द्धरात्रयः पठेत्साधकोत्तमः ॥७॥
एकाकी निर्भयो धीरोदशावर्तं स्तवोत्तमम् । मनसा चिंतितं कार्यं तस्य सिध्येन्नसंशयः ॥८॥
विनासहस्त्रनाम्ना यो जपेन्मंत्रं कदाचन । न सिद्धो जायते तस्यमंत्रः कल्पशतैरपि ॥९॥
कुजवारे श्मशाने च मध्याह्ने योजपेदथ । शतावृत्त्या संजायेत कर्ताहर्ता नृणामिह ॥१०॥
रोगार्त्तोऽर्द्धनिशायां तु पठित्वा भसिसंस्थितः । सद्योनी रोगतां यातियदिस्यान्निर्भयस्तदा ॥११॥
अर्द्धरात्रे श्मशाने वै शनिवारे जपेन्मनुम् । अष्टोत्तरसहस्त्रं तद्दशवारं जपेत्ततः ॥१२॥
सहस्त्रनाम चेत्तद्धितदायाति स्वयंशिवा । महापवनरूपेण घोरगोमायुनादिनी ॥१३॥
तदायदि न भीतिस्यात्ततोद्रव्धीतिवा भवेत् । तदापशुवलिं दद्यात्स्वयं गृह्णाति चंडिका ॥१४॥
यथेष्टं च वरदं दत्त्वा याति प्रत्यंगिरा शिवा । रोचना गुरु कस्तूरी कर्पूर मदचंदनैः ॥१५॥
कुंकुम प्रथमाभ्यां तु लिखितं भूर्जपत्रके । शुभनक्षत्रयोगे तु कृत्रिमाकृत सक्रियः ॥१६॥
कृत संतापनां सिद्धिं धारयेद्दक्षिणेकरे । सहस्त्रानामस्वर्णस्थं कण्ठेवापी जितेन्द्रियः ॥१७॥

तदायंत्रं नमेन्मंत्रीं क्रुद्धध्वेसंम्रियते नरः । यस्मै ददाति सस्वस्ति सभवेद्धनदोपमः ॥१८॥
दुष्टश्वापद जंतूनांनभीः कुत्रापि जायते । बालकानामिमां रक्षां गर्भिणीनामपि ध्रुवम् ॥१९॥
मोहनस्तंभनाकर्षण मारणोच्चाटनानि च । यंत्रधारणतो नूनं जायते साधकस्य तु ॥२०॥
नीलवस्त्रे विलिखितं ध्वजायां यदितिष्ठति । तदानष्टा भवत्येव प्रचण्डा परवाहिनी ॥२१॥
एतज्जप्तं महाभस्मललाटे यदि धारयेत् । तद्दशनत एवस्युः प्राणिनस्तस्यकिंकराः ॥२२॥
राजपत्न्योपि वशगाः किमन्याः परयोषितः । एतज्जप्तं पिबेत्तोयं मासैकेन महाकविः ॥२३॥
पंडितश्च महादक्षौ जायते नात्रसंशयः । शक्तिं सम्पूज्य देवेशि पठेत्स्तोत्रं वरंशुभम् ॥२४॥
इहलोके सुखंभुक्त्वा परत्र त्रिदिवंजयेत् । इतिनामसहस्त्रं तु प्रत्यंगिरा मनोहरम् ॥२५॥
गोप्यं गुप्ततमं लोके गोपनीयं स्वयोनिवत् ॥२६॥

॥ इति श्रीरुद्रयामल तंत्रे दशविद्यारहस्ये प्रत्यंगिरा सहस्रनाम सम्पूर्णम् ॥

॥ इति श्री प्रत्यंगिरा तंत्रं सम्पूर्णम् ॥

॥ श्री तारा तन्त्रम् ॥

दश महाविद्याओं में आपका स्थान दूसरा हैं। अतः इसे द्वितीया भी कहते हैं। श्रीतारानित्यार्चन, मंत्र महोदधि, तारास्तवमञ्जरी, तारास्वरूप तत्व इत्यादि में इसके विस्तृत विधान हैं। वसिष्ठ ऋषि ने इस विद्या की साधना चीन में बुद्ध से सीखी थी। बहुत कालतक साधना करने भी आपको अभीष्ट प्राप्ति नहीं हुई तो इस विद्या को उन्होनें शापित कर दिया। शांत होंने पर देवी ने इसके प्रधान बीज (त्रीं) में **स कार** लगाने से इसका **बीज मंत्र ''स्त्रीं''** रूप से जपने को कहा। कृष्णावतार के बाद इस विद्या का स्वयं शापोद्धार होना कहा गया है (ताराभक्ति सुधार्णवे)। वधू के समान यशस्विनी फलदायिनी होने से इसे **''वधू बीज''** भी कहा जाने लगा। यह बीज मंत्र कामाख्या के समान हैं क्योंकि इसका बीज व कामाख्या बीज मंत्र समान हैं। इसके प्रभाव से साधक को ज्ञानवृद्धि एवं कवित्वशक्ति प्राप्त होती हैं।

इस मंत्र की तरंगे उर्ध्वरेता एवं शीतल हैं ऐसा मेरा अनुभव हैं। राजस तामस भेद उपासना के अनुसार साधक को फल प्रदान करती हैं। तारा शीघ्रफलप्रदा हैं अतः इसे **तारिणी विद्या** भी कहते हैं। **इसके आठ स्वरूप हैं** जिनमें तीन स्वरूपों (**१. उग्रतारा २. नीलसरस्वती ३. एकजटा**) का विधान सुलभ उपलब्ध हैं।

तारा चोग्रा महोग्रा च वज्रा नीला सरस्वती। कामेश्वरी भद्रकाली इत्यष्टौ तारिणी स्मृता ॥

॥ षोढान्यासः ॥

तारा उपासना में षोढान्यास की विशेष महत्ता हैं। **१. रुद्रन्यास २. ग्रहन्यास ३. लोकपालन्यास ४. शिवशक्तिन्यास ५. तारादि न्यास ६. पीठन्यास।** इनसे षोढान्यास करे।

१. रुद्रन्यासः- (ध्यानम्)

नीलवर्णां त्रिनयनां शवासन समायुताम् ।
बिभ्रतीं विविधां भूषामर्धेन्दुशेखरां वराम् ॥

प्रत्येक नाम मंत्र के पहले **''ह्रीं त्रीं (स्त्रीं) हुं** उच्चारण करे।'' यथा **ह्रीं त्रीं (स्त्रीं) हुं अं श्रीकंठेशाय नमः** ललाटे। आं अनंतेशाय नमः मुखवृत्ते। इं सूक्ष्मेशाय नमः दक्षनेत्रे। ईं त्रिमूर्तीशाय नमः वामनेत्रे। उं अमरेशाय नमः दक्षकर्णे। ऊं अर्घीशाय नमः वामकर्णे। ऋं भारभूतीशाय नमः दक्षनासायां। ॠं तिथीशाय नमः वामनासायां। लृं स्थाणवीशाय नमः दक्षगण्डे। लॄं हरेशाय नमः वामगण्डे। एं झिण्टीशाय नमः उर्ध्वौष्ठे। ऐं भौतिकेशाय नमः अधरोष्ठे। ओं सद्योजाताय नमः उर्ध्वदन्तपंक्तौ। औं अनुग्रहेशाय नमः अधोदन्त पंक्तौ। अं अक्रूरेशाय नमः ब्रह्मरंध्रे। अः महासेनेशाय नमः मुखे। कं क्रोधीशाय नमः दक्षबाहुमूले। खं चण्डेशाय नमः दक्षकर्पूर। गं पञ्चान्तकेशाय नमः दक्षमणिबन्धे। घं शिवोत्तमेशाय नमः दक्षकरांगुलिमूले। ङ एकरुद्राय नमः दक्षकरांगुल्यग्रे। चं कूर्मेशाय नमः वामबाहुमूले। छं एकनेत्रेशाय नमः वामकर्पूरे। जं चतुराननेशाय नमः वाममणि बंधे। झं अजेशाय नमः

वामकरांगुलि मूले। ञं सर्वेशाय नमः वामकरांगुल्यग्रे। टं सोमेशाय नमः दक्षोरूमूले। ठं लाङ्गलीशाय नमः दक्षजानुमूले। डं दारुकेशाय नमः दक्षपादमूलसंधौ। ढं अर्धनारीश्वराय नमः दक्षपादांगुलिमूले। णं उमाकांतेशाय नमः दक्षपादांगुल्यग्रे। तं आषाढीश नमः वामोरुमूले। थं दण्डीशाय नमः वामजंघामूले। दं अंत्रीशाय नमः वामपाद मूलसन्धौ। धं मीनेशाय नमः वामापादांगुलिमूले। नं मेषेशाय नमः वामपादांगुल्यग्रे। पं लोहितेशाय नमः दक्षपार्श्वे। फं शिखीशाय नमः वामपार्श्वे। बं छगलण्डेशाय नमः पृष्ठे। भं द्विरंडेशाय नाभौ। मं महाकालेशाय नमः जठरे। यं बालीशाय नमः वक्षे। रं भुजेङ्गेशाय नमः दक्षस्कंधौ। लं पिनाकीशाय नमः ककुदि। वं खड्गीशाय नमः वामस्कंधे। शं बकेशाय नमः हृदयादि दक्ष हस्ते। षं श्वेतेशाय नमः हृदयाय वामहस्ते। सं भृग्वीशाय नमः हृदयादि वाम पादे। हं लकुंलीशाय नमः हृदयादि दक्ष पादान्तम्। लं शिवेशाय नमः हृदयादि उदरे। क्षं संवर्तकाय नमः हृदयादि मुखे।

२. ग्रहन्यासः- प्रत्येक नाम मंत्र के पहले "ॐ ह्रीं त्रीं (स्त्रीं) हुं" का उच्चारण करे। यथा- ॐ ह्रीं त्रीं (स्त्रीं) हुं अं आं...अं अः रक्तवर्णं सूर्यं हृदि न्यसामि। यं रं लं वं शुक्लवर्णं सोमं भ्रुवद्वये न्यसामि। कं... ङं रक्तवर्णं मंगलं लोचनत्रये न्यसामि। चं....ञं श्यामवर्णं बुधं वक्षस्थले न्यसामि। टं...णं पीतवर्णं बृहस्पतिं कण्ठकूपे न्यसामि। तं...नं श्वेतवर्णं भार्गवं घण्टिकां न्यसामि। पं....मं नीलवर्णं शनैश्चरं नाभिदेशे न्यसामि। शं...हं धूम्रवर्णं राहुं मुखे न्यासामि। लं क्षं धूम्रवर्णं केतुं नाभौ न्यसामि।

३.लोकपालन्यासः- प्रत्येक नाम मंत्र के पहले ह्रीं त्रीं (स्त्रीं) हुं जोड़े। यथा ह्रीं त्रीं (स्त्रीं) हुं अं इं उं ऋं लृं एं ओं अं ललाटपूर्वे इन्द्राय नमः। आं ईं ऊं ॠं ॡं ऐं औं अः ललाटाग्नेय्यां अग्नये नमः। कं....ङं ललाटदक्षिणे यमाय नमः। चं....ञं ललाटनैर्ऋत्यां निर्ऋतये नमः। टं....णं ललाटपश्चिमायां वरुणाय नमः। तं....नं ललाट वायव्यां वायवे नमः। पं....मं ललाटोत्तरस्यां सोमाय नमः। यं रं लं वं ललाटैशान्यां ईशानाय नमः। शं षं सं हं ललाटोर्ध्वायां ब्रह्मणे नमः। लं क्षं ललाटाधोदिशि अनंताय नमः।

४. शिवशक्तिन्यासः- प्रत्येक नाम मंत्र के पहले ह्रीं त्रीं (स्त्रीं) हुं जोड़े। वं शं षं सं डाकिनी सहित ब्रह्मणे नमः मूलाधारे। बं भं मं यं रं लं राकिनी सहित विष्णवे नमः स्वाधिष्ठाने। डं ढं णं तं थं दं धं नं पं फं लाकिनी सहित रुद्राय नमः मणिपूरे। कं खं ....टं ठं काकिनीसहिताय ईश्वराय नमः अनाहते। अं आं....अं अः शाकिनी सहित सदाशिवाय नमः विशुद्धाख्ये। लं (हं) क्षं हाकिनी सहित पर शिवाय नमः आज्ञाचक्रे।

५. तारादिन्यासः- प्रत्येक नाम मंत्र के पहले ॐ ह्रीं त्रीं (स्त्रीं) हुं जोड़े। अं आं कं खं गं घं ङं तारायै नमः ब्रह्मरन्ध्रे। इं ईं चं छं जं झं ञं उग्रायै नमः ललाटे। उ ऊं टं ठं डं ढं णं महोग्रायै नमः भ्रूमध्ये। ऋं ॠं तं थं दं धं नं वज्रायै नमः कण्ठदेशे। लृं ॡं पं फं बं भं मं महाकाल्यै नमः हृदि। एं ऐं यं रं लं वं सरस्वत्यै नमः नाभौ। ओं औं शं षं सं हं कामेश्वर्यै नमः लिङ्गमूले। अं अः लं क्षं चामुण्डायै नमः मूलाधारे।

६. पीठन्यासः- ५१ पीठों की जगह यहां १० पीठ नाम ही दिये हैं। प्रत्येक नाम मंत्र के पहले ॐ ह्रीं त्रीं (स्त्रीं) हुं जोड़े। अं इं उं ऋं लृं एं ओं अं कामरूपपीठाय नमः आधारे। आं ईं ऊं ॠं ल्टृं ऐं औं अः जालंधरपीठाय नमः हृदि। कं...ङं पूर्णगिरिपीठाय नमः ललाटे। चं....ञं उड्डीयान पीठाय नमः केशसंधौ। टं....णं वाराणसीपीठाय नमः भ्रुवोः। तं....नं अवन्तिपीठाय नमः नेत्रयोः। पं...मं मायापुरी पीठाय नमः मुखे यं....वं मथुरापीठाय नमः नाभौ। लं क्षं कांचीपुरीपीठाय नमः कट्यां।

७. वीरतंत्र के अनुसार काली एवं तारा का स्वरूप एक होने से तारा मंत्र के जप में कालीन्यास में कहे गये वर्णन्यास

का प्रयोग करना चाहिये।

॥ तारा उपासनायां आदौ जलग्रहणादि मंत्राः॥

जलग्रहण मंत्रः- ॐ वज्रोदके हुं फट्। पादप्रक्षालन मंत्र -ॐ ह्रीं स्वाहा।

आचमन मंत्रः- ॐ ह्रीं सुविशुद्ध धर्म सर्वपाप निशाम्याशेष विकल्पानपनय स्वाहा।

शिखाबंधन मंत्रः- ॐ मणिधरि वज्रिणि शिखरिणि सर्ववशंकरिणि कं हुं फट् स्वाहा।

भूमिशोधनमंत्रः - ॐ रक्ष रक्ष हुं फट् स्वाहा।

विघ्ननिवारण मंत्र - ॐ सर्वविघ्नानुत्सारय हुं फट् स्वाहा।

भूमिनिमंत्रण मंत्रः- ॐ पवित्रवज्रभूमे हुं स्वाहा। मंडलरचना मंत्र-ॐ आसुरेखे वज्ररेखे हुं स्वाहा।

पुष्पादिशोधन मंत्रः- ॐ यथागताभिषेक समाग्नि मे हुं फट्। चित्तशोधन मंत्रः- ॐ आं ह्रीं स्वाहा।

विशेषार्घ्य (महाशंख) पूजन मंत्र- (१) ह्रां ह्रीं ह्रूं काली कपालाय नमः (२) स्त्रां स्त्रीं स्त्रूं तारिणीकपालाय नमः (३) ह्रां ह्रीं ह्रूं नीलाकपालाय नमः। (४) ह्रीं स्त्रीं हूं स्वर्गकपालाय सर्वाधाराय सर्वाय सर्वोद्भवाय सर्वशुद्धिमयाय सर्वासुर - रुधिरारुणाय शुभ्राय सुराभाजनाय देवी कपालाय नमः।

॥ अथ तारा (उग्रतारा) मंत्र प्रयोगः॥

उग्रतारा एकाक्षर मंत्रः- त्रीं (महीधर मतानुसारेण) तोडलतंत्र, एक तारा कल्प, विश्वसारतंत्र तथा नीलतंत्र में तास बीज (त्रीं) के स्थान पर वधूबीज (स्त्रीं) का निर्देश किया गया हैं।

त्र्यक्षर मंत्र- हूं स्त्रीं हूं।

चतुरक्षर मंत्रः- ह्रीं ह्रीं स्त्रीं हूं।

पंचाक्षर तारा मंत्रः- ॐ ह्रीं त्रीं हुं फट्।

विनियोगः- अस्य श्री तारामंत्रस्य अक्षोभ्य ऋषिः, वृहती छन्दः, तारा देवता, ह्रीं बीजं, हूं शक्तिः, स्त्रीं कीलकं, आत्मनोऽभीष्टसिद्धये जपे विनियोगः।

ऋष्यादि न्यासः- ॐ अक्षोभ्य ऋषये नमः शिरसि। ॐ वृहतीछन्दसे नमः मुखे। ॐ तारादेवतायै नमः हृदि। ॐ ह्रीं (हूँ) बीजाय नमः गुह्ये। ॐ हूं (फट्) शक्तये नमः पादयोः। ॐ स्त्रीं कीलकं नाभौ। विनियोगाय नमः सर्वाङ्गे।

षडङ्गन्यासः- ह्रां, ह्रीं, ह्रूं, ह्रैं, ह्रौं, ह्रः से क्रमश हृदयादिन्यास एवं करन्यास करना चाहिये। पश्चात् षोढान्यास करे।

एक जटादि षडङ्गन्यासः- ॐ ह्रीं त्रां हां एक जटायै हृदयाय नमः। ह्रीं त्रीं ह्रीं तारिण्यै शिरसे स्वाहा। हूं त्रूं हूं वज्रोदकायै शिखायै वषट्। हैं, त्रैं, हैं उग्रतारायै कवचाय हुं। ह्रौं त्रौं ह्रौं महापरिसरायै नेत्रत्रयाय वौषट्। ह्रः त्रः ह्रः पिङ्गोग्रैकजटायै अस्त्राय फट्। इसी तरह से करन्यास करे।

॥ ध्यानम् ॥

विश्वव्यापक वारिमध्य विलसच्छ्वेताम्बु जन्मस्थिताम्, कर्त्री खड्ग कपाल नीलनलिनै राजत्करां नीलभाम्। काञ्ची कुण्डल हार कङ्कण लसत् केयूर मञ्जीरतामाप्तैर्नाग-वरैर्भूषित तनूमारक्त नेत्रत्रयाम्॥ पिङ्गोग्रैकजटां लसत् सु-रसनां दंष्ट्रा करालाननाम्, चर्मद्वैपि वरंकटौ विदधतं श्वेताऽस्थि पट्टालिकाम्। अक्षोभ्येण विराजमान शिरसं स्मेराननाम्भोरुह ताराम्, शावहच्दासनां दृढ कुचामम्बां त्रिलोक्याः स्मरेत्॥

तारार्णव में हूं बीज, फट् शक्ति तथा स्त्रीं कीलक कहा हैं मेरुतंत्र में ''हुं'' शक्ति कही गयी है।

(तारार्णवे)

प्रत्यालीढ पदार्पितांघ्रि शवहृत् घोराट्टहासांपराम्, खड्गेन्दीवर कर्तृ खर्पर भुजां हूंकार बीजोद्भवाम्। खर्वां नीलविशाल पिङ्गलजटा जूटैक नागैर्युताम्, जाड्यं न्यस्य कपालके त्रिजगतां हन्त्युग्रतारा स्वयम्॥

(मेरुतंत्रे)- **महाप्रलयपानीये लसच्छ्वेताम्बुजस्थितां, कर्त्रीं खड्गं नीलपद्मं कपालं दधतीं करैः। सर्पकाञ्ची सर्पकरां सर्पकङ्कण कुण्डलां, सर्पकेयूर मञ्जीरां नीलाभां रक्तलोचनाम्॥ पिङ्गोग्रैकजटां त्र्यक्षां व्याघ्रत्वक् परिधायिनीं, दंष्ट्रा करालवदनां ललज्जिह्वां स्मिताननाम्। नरास्थिपट्टं बध्नतीं भालेऽक्षोभ्य मुनीश्वरां, स्थापयन्तीं च तदधो ध्यायेच्छव हृदयासनाम्॥**

द्वितीय पंचाक्षर उग्रतारा मंत्रः- (तारारहस्ये)-**ॐ ह्रीं स्त्रीं हुं फट्।**

ताराभक्ति सुधार्णव में लिखा हैं कि कृष्णावतार बाद विद्या वसिष्ठ ऋषि के शाप से विमुक्त हो जायेगी। ऋष्यादि पूर्ववत् हैं बीज ''हूं'' तथा शक्ति ''फट्'' स्त्रीं कीलक हैं। मतान्तर में ऋष्यादि सब पूर्ववत् हैं।

प्रत्यालीढ पदां घोरां मुण्डमाला - विभूषितां, खर्वां लंबोदरीं भीमां व्याघ्रचर्मावृतां कटौ। नवयौवन सम्पन्नां पञ्चमुद्रा - विभूषितां, चतुर्भुजां ललज्जिह्वां महाभीमां वरप्रदाम्। खड्गकर्त्रीं धरां सव्ये वामे मुण्डोत्पलान्वितां, पिङ्गोग्रैकजटां ध्यायेन्मौलावक्षोभ्य - भूषिताम्। बालार्क मण्डलाकार लोचनत्रय - भूषितां, प्रज्वलत् पितृ भूमध्यगतां घोरदंष्ट्रा करालिनीम्। सावेश स्मेर वदनामस्थ्यलङ्कार - भूषितां, विश्वव्यापक तोयान्ते श्वेतपद्मोपरि - स्थिताम्॥

तृतीय पंचाक्षर मंत्रः- **''ॐ त्रीं ह्रीं हुं फट्** (मंत्र महोदधौ)**''**

विनियोगः- अस्य **मंत्रस्य वसिष्ठज (वसिष्ठ पुत्र) शक्ति ऋषिः गायत्री छंद, तारका देवता, ह्रीं बीजं, हुं शक्तिः, स्त्रीं कीलकं, अभीष्टसिद्धये जपे विनियोगः।**

**श्वेताम्बरां शारदचन्द्र कांतिं सदभूषणां चन्द्रकलावतंसाम्।
कर्त्री - कपालान्वित - पाणिपद्मां तारां त्रिनेत्रां प्रभजेऽखिलर्द्धयैं॥**

हिन्दी मंत्र महार्णव में ऋषि वसिष्ठ कहा हैं। (यह ब्रह्मोपासिता विद्या है)

चतुर्थ पंचाक्षर मंत्रः- त्रीं हुं फट् क्लीं ऐं। ऋष्यादि पूर्ववत्। तारा भक्ति सुधार्णव में इसे नारायणोपास्य विद्या कहा हैं। देवता परातारा कहा हैं।

कर्पूरेन्दुनिभां सितां वर युगां रत्नोल्लसद् भूषणाम्, चन्द्रार्धङ्कित भालकां त्रिनयनां हारावली भूषिताम्।

बिभ्राणां नृकपाल कर्तृकलते संशोभिवक्त्राम्बुजाम्, चेटीभिः परिवारितां भगवतीं तारां परामाश्रये ॥

वश्य कर्म में भगवती तारा का रक्तवर्णा, स्तंभन में पीत वर्णा, उच्चाटन में धूम्रवर्णा, मारण में कृष्णवर्णा रूप में ध्यान करना चाहिये।

पंचम् पंचाक्षर मंत्र - श्रीं ह्रीं त्रीं हूं फट्। षष्ठम् पंचाक्षर मंत्र **ह्रीं ह्रीं त्रीं हूं फट्।**

सप्तम् पंचाक्षर मंत्र - ऐं ह्रीं त्रीं हूं फट्। ये तीनों मंत्र नीलतंत्र से है, मूलमंत्रकोष में ''त्रीं'' की जगह ''स्त्रीं'' हैं।

अष्टम् पंचाक्षर मंत्र - ह्रीं स्त्रीं हूं फट् फट्। नवम् पंचाक्षर मंत्र- **ॐ तारे स्वाहा।** (नीलतंत्र सप्तदशपटले)

श्यामवर्णां त्रिनयनां द्विभुजां वरपङ्कजे, दधानां बहुवर्णाभि र्बहुरूपाभिरावृताम् । शक्तिभिः स्मेरवदनां स्मेरमौक्तिक - भूषणां, रत्नपादुकयोर्न्यस्त पादाम्बुजयुगां स्मरेत् ॥

दशम् पंचाक्षर मंत्र- त्रीं हुं ह्रीं हुं फट्। मेरुतंत्र के अनुसार जालन्धर वध के समय शिव ने उपासना की थी एवं रामचन्द्र को उपदेश दिया।

॥ अथ आवरण पूजा प्रयोगः॥

सर्वतोभद्र मण्डल पीठ पर - '' **ॐ मं मण्डूकादि परतत्वान्त पीठ देवताभ्यो नमः**'' से पूजा कर नवपीठ शक्तियों का पूजन करे। **ॐ मेधायै नमः। ॐ प्रज्ञायै नमः। ॐ प्रभायै नमः। ॐ विद्यायै नमः। ॐ धृत्यै नमः। ॐ स्मृत्यै नमः। ॐ बुद्धयै नमः।** मध्ये- **ॐ विद्येश्वर्यै नमः।**

देवी यंत्र को शोधन कर पीठ पर रखकर पुष्पासन देकर ध्यानपूर्वक आवाहन करे। पुष्पांजलि लेकर देवि से आज्ञा मांगे।

ॐ संविन्मये परे देवि परामृतरसप्रिये। अनुज्ञां देहि ताराख्ये परिवारार्चनाय मे।

प्रथमावरणम्:- (भूपूर एवं अष्टदल अंतराले) पूर्वे - **पाशांकुशौ कपालं च त्रिशूलं दधतं करैः। अलङ्कार चयोपेतं गणेशं प्राक् समर्चयेत्। ॐ गं गणेशाय नमः। वज्रपुष्पं प्रतीच्छ फट् स्वाहा।**

दक्षिणे- **कपालशूले हस्ताभ्यां दधतं सर्पभूषणम्। श्वयूथ वेष्ठितं रम्यं बटुकं दक्षिणेऽर्चयेत्॥ बं बटुकाय नमः। बं बटुक वज्रपुष्पं प्रतीच्छ फट् स्वाहा।** पश्चिमे - **असिशूल कपालानि डमरुं दधतं करैः। कृष्णं दिगम्बरं क्रूरं क्षेत्रपश्चिमे यजेत्। ॐ क्षं क्षेत्रपालाय नमः। ॐ क्षं क्षेत्रपाल वज्रपुष्पं प्रतीच्छ फट् स्वाहा॥** उत्तरे - **कपालं डमरुं पाशं लिङ्गं संबिभ्रतीः करैः। अन्त्रावल्या रक्तवस्त्रा योगिनीस्तरे यजेत्॥ ॐ यं योगिनीभ्यो नमः। ॐ यं योगिन्यो वज्रपुष्पं प्रतीच्छ फट् स्वाहा** इससे पुष्प देवे। देवी के मस्तक पर अक्षोभ्य का पूजन करे। **ॐ अक्षोभ्य इहागच्छ इहातिष्ठ। ॐ अक्षोभ्यं वज्रपुष्पं प्रतीच्छ स्वाहा॥**

अभीष्ट सिद्धिं मे देहि शरणागत वत्सले। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

विशेषार्घ से बिन्दु छोड़कर कहे "**पूजितास्तर्पिताः सन्तु**"। इस प्रकार प्रत्येक आवरण बाद कहे।

द्वितीयावरणम् – (षट्कोणे) आग्नेये- **ॐ एक जटायै हृदयाय नमः**। ईशाने- **ॐ तारिण्यै शिरसे स्वाहा**। वायवे- **ॐ वज्रोदके शिखायै वषट्**। नैऋते-**ॐ उग्रतारायै कवचाय हुं**। मध्ये-**ॐ महापरिसरायै नेत्रत्रयाय वौषट्**। दिक्षु – **ॐ पिङ्गोग्रैक जटायै अस्त्राय फट्**। पुष्पांजलि लेकर प्रार्थना करे।

अभीष्ट सिद्धिं मे देहि शरणागत वत्सले। भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ॥

विशेषार्घ से बिन्दु छोड़कर कहे "**पूजितास्तर्पिताः सन्तु**"।

तृतीयावरणम् – (अष्टदले) **ॐ वं वैरोचन वज्रपुष्पं प्रतीच्छ स्वाहा। अं अभिताभ वज्रपुष्पं प्रतीच्छ स्वाहा। पं पद्मनाभ वज्रपुष्पं०। शं शंखनाभ वज्रपुष्पं०। लां लामिके वज्रपुष्पं०। मां मामिके वज्रपुष्पं०। ॐ पां पाण्डुरे वज्रपुष्पं०। ॐ तां तारिके वज्रपुष्पं०।**

चतुर्थावरणम्- (भूपूर के चारों द्वारों में) पूर्वादि क्रम से- **ॐ पं पद्मान्तक वज्रपुष्पं प्रतीच्छ स्वाहा। ॐ यं यमान्तकं(जं जन्मान्तक) वज्रपुष्पं०। ॐ विं विघ्नात्मक वज्रपुष्पं०। ॐ नां नारान्तक (नं नरकांतक) वज्रपुष्पं०।**

पंचमावरणम् – (भूपूरे) पूर्वे- **ॐ लां इन्द्राय देवाधिपतये नमः**। आग्नेये – **ॐ रां अग्नये तेजाधिपतये नमः**। दक्षिणे –**ॐ यां यमाय प्रेताधिपतये नमः। ॐ क्षां निऋतये रक्षोधिपतये नमः नैऋत्ये**। पश्चिमे – **ॐ वां वरुणाय जलाधिपतये नमः**। वायवे – **ॐ यां वायवे प्राणाधिपतये नमः**। उत्तरे – **ॐ सां सोमाय ताराधिपतये नमः**। ईशाने – **ॐ हां ईशानाय गणाधिपतये नमः**। पूर्वेशानयोर्मध्ये – **ॐ आं ब्रह्मणे प्रजाधिपतये नमः**। निर्ऋति वरुणयोर्मध्ये – **ॐ ह्रीं अनन्ताय नागाधिपतये नमः।**

षष्ठमावरणम् – (भूपूरे) – इन्द्रादि दिक्पालों के पास उनके आयुधों का पूजन करें। **ॐ वज्राय नमः। ॐ शक्तये नमः। ॐ दण्डाय नमः। ॐ खड्गाय नमः। ॐ पाशाय नमः। ॐ अंकुशाय नमः। ॐ गदायै नमः। ॐ शूलाय नमः। ॐ पद्माय नमः।ॐ चक्राय नमः।**

धूपदीप नैवेद्यादि अर्पण करे। पश्चात् बलि प्रदान करे। **ॐ ह्रीं श्रीमदकेजटे नीलसरस्वति महोग्रतारे देवि ख ख सर्वभूतपिशाच राक्षसान् ग्रस ग्रस मम जाड्यं छेदय छेदय श्रीं ह्रीं फट् स्वाहा।**

पुनः अर्द्धरात्रि को चौराहे पर बलिप्रदान करे। **ॐ ह्रीं एकजटे महायक्षाधिपते मयोपनीतं बलिं गृह्ण गृह्ण ह्रीं स्वाहा।**

मंत्र के चार लक्ष से पुरश्चरण कर दूध तथा घी मिश्रित ~लकमलों से दशांश होम करे। प्रतिदिन भोजन दूध, दही, मधु मांस ताम्बूलादि का सेवन करते हुये चार लाख जप करे। नारी को देखते हुये भगस्पर्श एवं उसकी तृप्ति करते हुये रात में बलि देवे। मूल मन्त्र से नारीकी एवं योनि पूजन करें। निर्जन स्थान, शून्यघर, देवमन्दिर, वन, पर्वत, में शव साधना करें। शव छः मास के शिशु का, अथवा युद्ध में मारे हुये अपने शत्रु का होवे। अर्थात् युद्ध में मारे गये व्यक्ति का शव अधिक उपयुक्त रहता हैं।

१. बच्चा पैदा होने के बाद उसकी जीभ पर शहद एवं घी से सुवर्ण शलाका अथवा श्वेतदूर्वा की सींख से मंत्र लिखे तो आठ वर्ष बाद वह कविराट् हो जायेगा। शत्रुओं से अजेय होगा।

२. ग्रहण के दिन नदी तीर पर जाये, बहती हुयी लकड़ी को अपने दांतों से पकड़ कर लाये उसकी कील (शंकु) बनाये तेल, मधु, अमृत (सुरा) से कमलनी अभाव में कमल के पत्र पर मंत्र लिखकर उसे **अं आं....हं लं क्षं मातृका**

वर्णों से वेष्टित करे, समतल भूमि में गड्ढा खोदकर पत्र को उसमें गाड़ देवे वहां वेदी बनाकर अग्निस्थापन करे। जल तथा गोदुग्ध से सिंचन कर एक हजार कमलों से होम करे नाना प्रकार के पक्वान्नों व फलों से बलि देवे।

मंत्र - **ॐ पद्मे पद्मे महापद्मे पद्मावत्यै स्वाहा।**

पश्चात रात्रि में पूर्व में कहे एकजटा मंत्र से बलि देवे तो कविराज होवे।

३. गोरोचन को सौ बार मूल मंत्र से अभिमंत्रित कर तिलक लगावे तो उसके सभी जन दास होवे। लक्ष्मी व सरस्वती दोनों का उसके यहां निवास होवे।

४. मंगलवार को श्मशान का कोयला लाकर कालेवस्त्र में लपेटे और लाल धागे से बांधे तथा सौ बार मूल मंत्र से अभिमंत्रित कर शत्रु के घर में फेंक देवे तो समस्त कुटुम्बियों से विरोध होवे तथा उसका उच्चाटन होवे।

५. पुरुष की हड्डी पर नमक व हल्दी से मंत्र लिखे रविवार की रात उसे एक हजार बार अभिमंत्रित कर शत्रुदल में फेंक देवें तो १२ दिन में उनका विनाश होवे। खेत में फेंके तो अन्न की हानि तथा अश्वशाला में फेंके तो घोड़ों की शक्ति क्षीण होने लगे।

६. रक्षाकर्म हेतु यंत्र धारण करे उसके लिये भोजपत्र पर लाक्षारस से षट्कोण, अष्टदल, भूपूर युक्त यंत्र बनाये। षट्कोण में **अमुकं रक्ष रक्ष** युक्त मूल मंत्र लिखे। अष्टदल के नीचे के भाग में (केसरों में) **अं आं, इं ईं, उं ऊं, दो-दो** करके १६ स्वर लिखे। अष्टदल मध में **क वर्ग (कं....ङं), च वर्ग (चं....ञं) इत्यादि हं लं क्षं** तक आठों वर्ग लिखे। यंत्र को पीले वस्त्र में लपेटे तथा पीले सूत्र से बांधे। बालक के बांधे तो भूत प्रेतों से रक्षा होवे। स्त्रियों को पुत्रदायक तथा सौभाग्यदायक है। पुरुष को धन व ज्ञान की वृद्धि करे। प्राचीनकाल में गौतमादि ऋषियों ने मोक्षसिद्धिको तथा राजाओं ने साम्राज्य प्राप्त किया था। यह विद्या प्रत्यक्ष सिद्धिप्रदा है। इस विद्या को गुप्त रखें अर्थात् किसी न कहे कि में तारा की उपासना करता हुं।

॥ षडक्षर मंत्राः ॥

१. ऐं ॐ ह्रीं क्रीं हूं फट्।

विनियोगः- **अस्य मंत्रस्य वसिष्ठ ऋषि, अनुष्टुप् छंदः,** तारा देवता, **सर्वाभीष्ट सिद्धये** जपे **विनियोगः।**

ह्रां, ह्रीं, ह्रूं, ह्रैं, ह्रौं ह्रः से षडङ्गन्यास करे।

प्रत्यालीढ पदार्पितांघ्रि शवहृद्- घोराट्टहासा परा, खड्गेन्दीवर कर्त्रि खर्परभुजा हुंकार बीजाद्भवा।
खर्वा नील विशाल पिङ्गलजटा जूटैकनागैर्युता, जाड्यं न्यस्य कपालकृर्तृ जगतां हन्त्युग्रतारा स्वयम्॥

२. ॐ ह्रीं हुं ह्रीं हुं फट्। मेरुतंत्र के अनुसार इसके ऋषि शिव हैं तथा यह **शिवोपासिता विद्या** हैं।

३. ऐं ह्रीं ॐ फट् स्वाहा।

॥ सप्ताक्षर मंत्राः ॥

(मंत्र महार्णव के अनुसार अधिकतर मंत्रों के वसिष्ठ ऋषि, गायत्री छंद, तारका देवता हैं)

१. ॐ त्रीं ह्रीं, ह्रूं, ह्रीं, हुं फट् (मेरुतंत्रे)

विनियोगः- **अस्य मंत्रस्य ब्रह्माः ऋषिः, गायत्रीश्छंदः,** तारा देवता, **सर्वाभीष्टसिद्धये** जपे **विनियोगः।** यह विद्या **बलराम व ब्रह्माद्वारा उपासित** हैं।

श्वेताम्बरां चन्द्रकांति चन्द्रार्धकृतशेखरां कर्तरीं च
कपालं च कराभ्यां दधतीं भजे।
नानालङ्कार शोभाढ्यां त्रीक्षणः (त्रीक्षणां) पद्मसंस्थितां ॥

२. **ॐ त्रीं ह्रीं हुं ह्रीं हुं फट्।** (ताराभक्ति सुधार्णवे)

३. **ॐ हुं ह्रीं क्लीं सौः हुं फट्।** यह विद्या विष्णु, लक्ष्मी, राम, बलराम व गोपियों द्वारा उपासित रही हैं। मेरु तंत्र में विष्णु ऋषि कहा गया है।

४. मंत्र महोदधि में ब्रह्मोपासिता विद्या के अन्य मन्त्र दिये हैं। १. **ॐ हुं ह्रीं क्लीं ह्सौः हुं फट्।** २. **ॐ हुं ह्रीं क्लीं ह्सौः हुं फट्।**

५. मेरुतंत्र में ब्रह्मोपासिता विद्या हिरण्यकश्यप के वर देते समय का मंत्र दिया हैं। **ॐ हुं ह्रीं क्लीं ह्सौं हुं फट्।**

६. (मंत्रकोषे)- **ह्रीं स्त्रीं हूं फट् स्वाहा।**

७. (मंत्रकोष एवं तंत्र दीपिनीयायां)- **खं हूं ह्रौं ॐ ऐं श्रीं ह्रीं ।**

॥ अष्टाक्षर मंत्राः॥

१. **हंसः ॐ ह्रीं स्त्रीं हुं हंसः** (तारा हृदय में हूं है)। २. **हंसः ह्रीं स्त्रीं हूं फट् हंसः।** (मंत्र कोष)

३. **ऐं स्त्रीं ॐ ऐं ह्रीं फट् स्वाहा** (मातृकार्णवे) उपरोक्त मंत्रों व १२ अक्षर मंत्रों का ध्यान इस प्रकार करे।

श्वेताम्बरां शारदा चन्द्रकांतिं सद्भूषणां चन्द्रकलावतंसाम्।
कर्त्रीं कपालान्वित पादपद्मां तारां त्रिनेत्रां प्रभजेऽखिलर्द्ध्यै॥

(अन्य टीकाकार के अनुसार **पाणिपद्मां** ही शुद्ध है)

॥ दशाक्षर मंत्राः॥

१. **ॐ तारे तारे तत्- तारे स्वाहा।** (मंत्रकोष)

२. **ॐ तारे तत्तारे तुरे स्वाहा।** (ताराभक्ति सुधार्णवे) गंधर्व तंत्र के अनुसार ध्यान इस प्रकार हैं।

श्यामवर्णां द्विनयनां द्विभुजां वरपङ्कजे। दधानां बहुवर्णाभि र्बहुरूपाभिरावृताम् ॥१॥
शक्तिभिः स्मेरवदनां स्फुरन्मौक्तिकभूषणां। रत्नपादुकयो र्न्यस्त पादाम्बुजां स्मरेत् ॥२॥

दस लाख जप कर घृताक्त रक्तपुष्पों से दशांश होम करने से सभी मनोरथ पूर्ण होते हैं।

३. (ब्रह्मसंहिता) **ॐ तारे तुतारे तुरे स्वाहा।**

॥ द्वादशाक्षर मंत्राः॥

१. (मेरुतंत्रे ब्रह्मोपासिता) **ऐं ह्रीं श्रीं क्लीं ह्सौः हुं उग्रतारे हुं फट्।** तारकासुर को वर देते समय ब्रह्माने उपासना की थी।

२. (मेरुतंत्रे नारायणोपासिता) **ऐं ह्रीं श्रीं क्लीं सौः हुं उग्रतारे हुं फट्।** इसके ऋषि विष्णु है। बौद्धधर्म प्रचार हेतु उपासिता रही है।

३. (ताराभक्ति सुधार्णवे) **त्रीं ह्रीं श्रीं क्लीं सौः हुं उग्रतारे हुं फट्।**

यह विद्या भी विष्णु द्वारा उपासित हैं। सभी मंत्रों के वसिष्ठ ऋषि, गायत्री छंद, देवता तारका हैं।

चतुर्दशाक्षर मंत्रः- ॐ उग्रतारे मां तारय तारय स्वाहा। ताराभक्ति सुधार्णव में ब्रह्मसंहिता से संग्रहीत मंत्र के विषय में कहा हैं कि यह मंत्र शत्रुओं व हिंसक जीवों से रक्षा करता हैं।

षोडशाक्षर मंत्रः- ॐ ह्रीं स्त्रीं हूं क्रीं ईं उग्रतारे ऐं क्लीं ह्रीं श्रीं ह्रौं क्रों। (भैरव तंत्रे)

सप्तदशाक्षर मंत्रः- ॐ पद्मे पद्मे महापद्मे पद्मावति माये स्वाहा। मत्स्यसूक्त में भी यही मंत्रोद्धार हैं। पंचाक्षर मंत्र प्रयोग में इसका प्रयोग वर्णन किया जा चुका हैं।

पंचविंशाक्षर मंत्रः- ॐ ह्रीं ह्रां हूं नमस्तारायै सकलदुस्तरं तारय तारय ॐ ॐ स्वाहा। ताराभक्ति सुधार्णव के अनुसार सकलदुस्तरं के स्थान पर सकलदुस्तरान् का उल्लेख है जो अधिक उपयुक्त लगता हैं।

स्वप्रयोगिकः- नील सरस्वती के त्र्यक्षर बीज मंत्र तथा २५-३२ अक्षरात्मक मंत्र के संयोग से तारा का एक मंत्र बनाकर मैने प्रयोग कराये जो लाभकारक रहे। मंत्र - **ह्रीं स्त्रीं हूं नमस्तारायै सकलदुस्तरांस्तारय तारय तर तर स्वाहा।** बीजाक्षरों व तारा के संबोधन पर आपका ध्यान उर्ध्वमुखी रहेगी, तारय तारय शब्द के साथ कानों के पास से खिंचाव बनेगा तथा तर तर शब्द के साथ ऐसा लगेगा कि जीभ पतली हो रही हैं। व उच्चारण में सरलता महसूस होगी। अतः यह मंत्र वाक्सिद्धि प्रद हैं। दोनों मंत्रों का विस्तृत विधान ३२ अक्षरात्मक मंत्र में अवलोकन करे।

द्वात्रिंशत्यक्षर मंत्राः- इन मंत्रों के ऋषि यंत्रादि पूजन पंचाक्षर मंत्र प्रयोगवत् जपना चाहिये।

(१) त्रीं ह्रीं ह्रां हुं नमस्तारायै महातारायै सकल दुस्तरात् तारय तारय तर तर स्वाहा। (मेरुतंत्रे)

(२) ॐ त्रीं ह्रां हुं नमस्तारायै महातारायै सकल दुस्तरांस्तारय तारय तर तर स्वाहा। (मंत्र. महो.) इस मंत्र से साधक को गद्य पद्य मयी वाणी और अष्टसिद्धियां प्राप्त होती हैं। साधक को संकटों से मुक्ति हेतु यह मंत्र अच्छा हैं, ध्यान अवस्था में आप देखेंगे कि तारय तारय शब्द के साथ कानों में स्पंदन व खिंचाव व तर तर शब्द के साथ जिह्वा पर स्पंदन होता हैं अतः वाक्शुद्धि हेतु यह मंत्र उत्तम हैं।

॥ एकजटा तारा ॥

त्र्यक्षर मंत्रः- त्रीं हुं फट्। (ताराभक्ति सुधार्णवे)

चतुरक्षर मंत्रः- (१) ह्रीं स्त्रीं हूं फट्। (२) श्रीं स्त्रीं हूं फट् (३) ऐं स्त्रीं हू फट्

लक्ष्मीकामना हेतु "**श्रीं**" तथा वाक्सिद्धि हेतु प्रारंभ में "**ऐं**" वाले मंत्र का प्रयोग करे। (तारातन्त्र एवं तारा रहस्ये)

(४) ह्रीं त्रीं हूं फट्। (नीलतन्त्र, तारार्ण०)

प्रत्यालीढ पदां घोरां मुण्डमाला - विभूषितां, खर्वां लम्बोदरीं भीमां व्याघ्रचर्मावृता कटौ। नवयौवन संपन्ना पंचमुद्रा - विभूषितां, चतुर्भुजां ललज्जिह्वां महाभीमां वरप्रदाम्॥ खड्गकर्तृ समायुक्तां सव्येतरभुजद्वयां, कपालोल्पल संयुक्तां सव्यपाणि युगान्विताम्। पिङ्गोग्रैकजटां ध्यायेन् मौलावक्षोभ्य भूषितां, बालार्कमण्डलाकारां लोचनत्रय भूषिताम्॥ ज्वलच्चिता मध्यगतां घोरदंष्ट्रां करालिनीं, सुवेश स्मेरवरदां स्त्र्यलङ्कार विभूषिताम्। चन्द्रसूर्याग्निनयनां मद्यपान प्रमत्तिकां, विश्वव्यापक तोयान्तः श्वेतपद्मोपरि स्थिताम्॥

पञ्चाक्षर मंत्रः- त्रीं हुं ह्रीं हुं फट्।

विनियोग- **अस्य मंत्रस्य वसिष्ठ पुत्र शक्ति ऋषिः, गायत्री छंद, एकजटातारा देवता, ममाभीष्ट सिद्धये जपे विनियोगः।**

षडक्षर मंत्रः- ॐ ह्रीं हुं ह्रीं हुं फट्। ऋष्यादि सब पूर्ववत्।

द्वाविंशाक्षर मंत्राः- (१) ॐ ह्रीं नमः भगवत्येकजटे मम वज्रपुष्पं प्रतीच्छ स्वाहा। (२) (मंत्रमहोदधौ) ॐ ह्रीं नमो भगवत्येकजटे मम वज्रपुष्पं प्रतीच्छ स्वाहा।

विनियोगः- **अस्य श्रीमदेकजटामंत्रस्य पतञ्जलि ऋषिः, गायत्री छंदः, एकजटा देवता, ह्रीं बीजं ममाभीष्ट सिद्ध्यर्थे जपे विनियोगः।**

ऋष्यादि न्यासः- **ॐ पतञ्जलि ऋषये नमः शिरसि। गायत्री छन्दसे नमः मुखे। एकजटादेवतायै नमः हृदि। ह्रीं बीजाय नमः गुह्ये विनियोगाय नमः सर्वाङ्गे।**

हृदयादिन्यासः- **ह्रां, ह्रीं, ह्रूं, ह्रैं, ह्रौं, ह्रः से करे।** ध्यानादि सर्व प्रयोग पूर्ववत् जाने।

॥ अथ अष्टतारिणीविद्या मंत्राः॥

१. पञ्चाक्षर तारा- **ॐ ह्रीं स्त्रीं हुं फट्।** २. चतुरक्षर उग्रा- **स्त्रीं ह्रीं हूं फट्।** ३. चतुरक्षर महोग्रा- **हूं स्त्रीं ह्रीं फट्।** ४. चतुरक्षर वज्रा- **हूं ह्रीं स्त्रीं फट्।** ५. चतुरक्षर नीला- **ह्रीं स्त्रीं फट् हूं।** ६. चतुरक्षर सरस्वती- **स्त्रीं ह्रीं हूं फट् हूं।** ७. चतुरक्षर कामेश्वरी- **ह्रीं हूं स्त्रीं फट्।** ८. चतुरक्षर भद्रकाली- **स्त्रीं हूं ह्रीं फट्।** (तंत्र दीपिनी में हूं के स्थान पर हुं ही है)

नीलतंत्र के अनुसार आठों मंत्रों के अष्टक ऋषि, अनुष्टुप्छन्द तथा नाम मंत्रानुसार देवता है

॥ तारामंत्र पञ्चक ॥

(१) ॐ ह्रीं स्त्रीं हूं नमः (२) हूं ह्रीं स्त्रीं हूं फट्। (३) क्लीं ह्रीं स्त्रीं हूं फट् (४) ॐ ह्रीं हूं हूं नमः। (५) ऐं सौः ॐ ऐं क्लीं स्वाहा क्लीं। भैरवतंत्र के अनुसार सभी मंत्र कांति, विद्या, सौभाग्य एवं मोक्षदायक हैं।

॥ हंसः तारा मंत्राः॥

(१) ह्रौं सौं ॐ ह्रीं त्रीं हुं हंसः। (२) ऐं स्त्रीं ॐ ऐं ह्रीं फट् स्वाहा। स्वच्छन्द संग्रह के अनुसार यह मंत्र त्रैलोक्य वशंकर एवं आज्ञासिद्धिकारक हैं। **षडङ्गन्यास हेतु-** एक एक बीजाक्षर से एक एक न्यास तथा शेष अक्षरों से अस्त्रन्यास करे।

॥ कृष्णादेवी (तारणी) महाकल्प॥

नवाक्षर मंत्रः- (१) क्रीं क्लीं कृष्णदेवि ह्रीं क्रीं ऐं।

विनियोग- (तारिणी तंत्रे) **अस्य मंत्रस्य शक्ति ऋषिः, वृहती छंदः, तारिणी देवता सर्वाभीष्ट सिद्धये जपे विनियोगः।** षडङ्गन्यास **ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः** से करे।

(२) मंत्रः- **क्रीं क्लीं कृष्णादेवि ह्रीं क्रीं ऐं।** मंत्रमहार्णव में कृष्णा देवी महाकल्प में कृष्णादेवी लिखा हैं।

विनियोग:- **ॐ अस्य श्री तारिणीमंत्रस्य शक्ति ऋषिः, वृहती छंदः, तारिणी देवता, ह्रीं बीजं, ऐं शक्तिं, मम श्रीतारणीप्रसादतो विद्या प्राप्त्यर्थे जपे विनियोगः।**

षडङ्गन्यास पूर्व की तरह **ह्रां, ह्रीं ह्रूं** की तरह करे। हिन्दी तंत्रसार में "**कृष्णदेवि**" लिखा हैं। षडङ्गन्यास **क्रीं, क्लीं, कृष्णदेवि, ह्रीं, क्रीं, ऐं** इत्यादि से क्रमशः करे।

कृष्णां लंबोदरीं भीमां नागकुण्डल शोभितां, रक्तमुखीं ललज्जिह्वां रक्तांबरधरां कटौ ।
पीनोन्नतस्तनीमुग्रां महानागेन वेष्टितां, शवस्योपरि देवेशि तस्योपरि कपालिके ॥१॥
नासाग्रध्याननिरतां महाघोरां वरप्रदां, चतुर्भुजां दीर्घकेशीं दक्षिणस्योर्ध्व बाहुना ।
विभ्रतीं नलिनीमेकां वामोर्द्धे पानपात्रकं, वराभयधरां देवीमधस्ताद् दक्षवामयोः ॥२॥
पिवन्तीं रौधिरीं धारां पानपात्रे सदाशिवे, सर्वसिद्धिप्रदां देवीं नित्यां गिरिनिवासिनीम् ।
लोचनत्रय संयुक्तां नागयज्ञोपवीतिनीं, दीर्घनासां दीर्घजङ्घां दीर्घाङ्गीं दीर्घजिह्विकाम् ॥३॥
चन्द्रसूर्याग्निभेदेन त्रिलोचन समन्वितां, शत्रुनाशकरीं देवीं महाभीमां वरप्रदाम् ।
व्याघ्रचर्म शिरोबद्धां जगतत्रय विभावितां, साधकानां सुखकर्त्रीं सर्वलोक भयङ्करीम् ॥
एवं भूता महादेवीं तारिणीं प्रणमाम्यहम्॥

मंत्र महार्णव में ८-९ जगह पाठान्तर भेद हैं। एक लक्ष जप का विधान हैं। यह मंत्र जाड्यनाशक, अष्टसिद्धिदायक हैं।

॥ यंत्रार्चनम् ॥

भद्रमण्डल पर "**ॐ मं मण्डूकादि परतत्वान्त पीठदेवताभ्यो नमः**" से पूजा कर पूर्वादि क्रम से ९ पीठ शक्तियों का पूजन करे। **ॐ मेधायै नमः। ॐ प्रज्ञायै नमः। ॐ प्रभायै नमः। ॐ विद्यायै नमः। ॐ धियै नमः। ॐ धृत्यै नमः। ॐ स्मृत्यै नमः। ॐ बुद्ध्यै नमः। मध्ये विश्वेश्वर्यै नमः।** "**ह्रीं तारणी योगपीठात्मने नमः**" से पुष्पासन देकर देवी यंत्र को स्थापित कर ध्यान पूर्वक मूर्ति की कल्पना करे। पुष्पांजलि लेकर देवी से परिवार पूजन की आज्ञा मांगे।

संविन्मये परे देवि परामृतरस प्रिये। अनुज्ञां तारणी देहि परिवारार्चनाय मे।

॥ कृष्णदेवी (तारणी) पूजन यन्त्रम् ॥

प्रथमावरणम् - (चतुर्दले) पूर्वादि क्रमेण- **ऐं नमः। ऐं श्री पादुकां तर्पयामि नमः। इति सर्वत्र॥ क्रीं नमः। ह्रीं नमः। क्रीं क्लीं कृष्णादेव्यै नमः।**

अभीष्टसिद्धिं मे देहि शरणागत वत्सले ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

इसे पढ़कर पुष्पांजलि देवे तथा "**पूजितास्तर्पिताः सन्तु**" कहकर अर्घ्यपात्र से जल छोड़े। ऐसा प्रत्येक आवरण पूजा बाद करे।

द्वितीयावरणम् - (षट्कोणे) आग्नेयी आदि चारों दिशाओं में - **ह्रीं हृदयाय नमः। ह्रीं शिरसे स्वाहा। ह्रीं शिखायै वषट्। ह्रीं कवचाय हुं।** अग्रे- **ह्रीं नेत्रत्रयाय वौषट्।** देवी पश्चिमे **ह्रीं अस्त्राय फट्।**

तृतीयावरणम् – (चतुर्दलाग्रे) **ॐ क्षेत्रपालाय नमः। ॐ भैरवाय नमः। ॐ गणपतयै नमः। ॐ सहाम्बिकायै नमः।**

चतुर्थावरणम् – (अष्टदले) **ॐ अणिमायै नमः। ॐ अनङ्गायै नमः। ॐ मदनायै नमः। ॐ लघिमायै नमः। ॐ मदनातुरायै नमः। ॐ अनङ्गकुसुमायै नमः। ॐ अष्टकर्णिकायै नमः। ॐ कपालिकायै नमः।**

पंचमावरणम्– (षोडशदले) **ॐ सुतदायै नमः। सुतदा श्री पादुकां पूजयामि तर्पयामि नमः।** इति सर्वत्र। **ॐ मोक्षदायै नमः। ॐ भक्तिदायै नमः। ॐ भोगदायै नमः। ॐ मुक्तिदायै नमः। ॐ सिद्धिदायै नमः। ॐ कामदायै नमः। ॐ धनदायै नमः। ॐ क्षेमदायै नमः। ॐ शिवदायै नमः। ॐ परदायै नमः। ॐ आत्मदायै नमः। ॐ योगदायै नमः। ॐ भाग्यदायै नमः। ॐ मोक्षदायै नमः। ॐ सर्वसिद्धिदायै नमः।**

षष्ठमावरणम् – (भूपुर के अंदर पूर्वादि चारों दिशाओं में) **ॐ अणिमाद्यष्टसिद्धिभ्यो नमः। ॐ अग्निदशकलायै नमः। ॐ षोडशचन्द्रकलायै नमः। ॐ द्वादशसूर्यकलायै नमः।**

सप्तमावरणम् – (भूपुरे) पूर्वे **ॐ इन्द्राय नमः। ॐ अग्नये नमः। ॐ यमाय नमः। ॐ निर्ऋतये नमः। ॐ वरुणाय नमः। ॐ वायवे नमः। ॐ कुबेराय नमः।** पूर्वईशानयोर्मध्ये – **ॐ ब्रह्मणे नमः।** निर्ऋतिपश्चिमोर्मध्ये – **ॐ अनंताय नमः।**

अष्टमावरणम् – (भूपुर में इन्द्रादि देवों के पास आयुध पूजा करे) **ॐ वज्राय नमः। ॐ शक्तये नमः। ॐ दण्डाय नमः। ॐ खड्गाय नमः। ॐ पाशाय नमः। ॐ अंकुशाय नमः। ॐ गदायै नमः। ॐ त्रिशूलाय नमः। ॐ पद्माय नमः। ॐ चक्राय नमः।**

पश्चात् धूपादि नैवेद्य, नमस्कार पर्यन्त पूजन करे। इसका पुरश्चरण एक लाख जप का हैं। लाल चंदन से चर्चित नाना प्रकार के फूलों व बेलपत्रों से, विशेष गंधों से पूजन करे। जपा (अढ़उल) पुष्प, रक्तकनेर, श्वेत कनेर, बेलपुष्प, कुन्द, लवंग, अपराजिता, चम्पा, केसर के पुष्पों से देवि का अर्चन करे। मालती, बकपुष्पों व दूर्वादलों से पूजन करे। कदम्बपुष्प, श्वेत पुष्प व नाना द्रव्यों से देवी का पूजन करे। इसके समान अन्य कोई विद्या नहीं हैं। साधक शास्त्रों में पारंगत तथा आशुकवि बन जाता हैं।

॥ तारा के शिव– अक्षोभ्य ॥

अष्टाक्षर मंत्रः– **ॐ स्त्रीं आं अक्षोभ्य स्वाहा।**

विनियोगः– **अस्य मंत्रस्य ब्रह्म विष्णु महेश्वर ऋषिः, विराट् छंदः, अक्षोभ्य भैरव देवता, स्त्रीं बीजं, स्वाहा शक्तिः, ॐ कीलकं चतुर्वर्ग सिद्ध्यर्थे जपे विनियोगः।**

सहस्त्रादित्यसङ्काशं नागरूपधरं शुभं, विद्युत्कोटिसमंवक्त्रं वह्निभंरक्तलोचनम् ।
सार्द्ध त्रिवलयोपेतं जटाकोटिरसंस्थितं, महालावण्य संयुक्तं सुरासुर नमस्कृतम् ॥१॥
समुद्रमध्ये देवि! कालकूटं समुत्थितं, सर्वेदेवाः सदाराश्च महाक्षोभमवाप्नुयु ।
क्षोभादिरहितं यस्मात् पीतं हालाहलं विषं, अतएव महेशानि ! अक्षोभ्यः परिकीर्तितः ॥२॥

॥ तारा गायत्री ॥

(१) उग्रतारा- (१) तारायै विद्महे महोग्रायै धीमहि तन्नो देवी धियो यो नः प्रचोदयात्। (२) ॐ तारायै विद्महे महोग्रायै धीमहि देवि प्रचोदयात्। (तोडल तंत्रे) (३) ॐ तारायै विद्महे महोग्रायै धीमहि तन्नो देवी प्रचोदयात्। (तारा नित्यार्चन)

(२) एकजटा- ॐ भगवत्येकजटे विद्महे घोरदंष्ट्रे धीमहि तन्नस्तारे प्रचोदयात्।

(३) नील सरस्वती- ॐ नीलसरस्वत्यै धीमहि शारदायै विद्महे तन्नः शिवे प्रचोदयात्।

॥ श्री तारा कवचम् ॥

इस कवच स्तोत्र में भगवती तारा के कई मंत्रों का वर्णन है, साधक उन मंत्रों का अलग से प्रयोग कर सकते हैं।

॥ ईश्वर उवाच ॥

कोटितन्त्रेषु गोप्या हि विद्यातिभयमोचिनी । दिव्यं हि कवचं तस्याः शृणुष्व सर्वकामदम् ॥१॥

विनियोगः- अस्य श्री ताराकवचस्य अक्षोभ्य ऋषिः, त्रिष्टुप् छन्दः, भगवती तारा देवता। सर्वमंत्रसिद्धि समृद्धये जपे विनियोगः।

प्रणवो मे शिरः पातु ब्रह्मरूपा महेश्वरी । ललाटे पातु ह्रींकारो बीजरूपा महेश्वरी ॥२॥
स्त्रींकारो वदने नित्यं लज्जारूपा महेश्वरी । हूँकारः पातु हृदये भवानीरूपशक्तिधृक् ॥३॥
फट्कारः पातु सर्वाङ्गे सर्वसिद्धिफलप्रदा । खर्वा मां पातु देवेशी गण्डयुग्मे भयापहा ॥४॥
निम्नोदरी सदा स्कंधयुग्मे पातु महेश्वरी । व्याघ्रचर्मावृता कट्यां पातु देवी शिवप्रिया ॥५॥
पीनोन्नतस्तनी पातु पार्श्वयुग्मे महेश्वरी । रक्तवर्तुलनेत्रा च कटिदेशे सदाऽवतु ॥६॥
ललज्जिह्वा सदा पातु नाभौ मां भुवनेश्वरी । करालास्या सदा पातु लिङ्गेदेवी हरप्रिया ॥७॥
पिङ्गोग्रैकजटा पातु जङ्घायां विघ्ननाशिनी । प्रेतखर्परभृद्देवी जानुवक्रे महेश्वरी ॥८॥
नीलवर्णा सदा पातु जानुनी सर्वदा मम । नागकुण्डलधर्त्री च पातु पादयुगेः ततः ॥९॥
नागहार धरा देवी सर्वाङ्गं पातु सर्वदा । नागकङ्कधरा देवी पातु प्रान्तरदेशतः ॥१०॥
चतुर्भुजा सदा पातु गमने शत्रुनाशिनी । खड्गहस्ता महादेवीं श्रवणे पातु सर्वदा ॥११॥
नीलाम्बरधरा देवी पातु मां विघ्ननाशिनी । कर्त्रिहस्ता सदा पातु विवादे शत्रुमध्यतः ॥१२॥
ब्रह्मरूपधरा देवी संग्रामे पातु सर्वदा । नागकङ्कणधर्त्री च भोजने पातु सर्वदा ॥१३॥
शवकर्णा महादेवी शयने पातु सर्वदा । वीरासनधरा देवी निद्रायां पातु सर्वदा ॥१४॥
धनुर्बाणधरा देवी पातु मां विघ्नसंकुले । नागाञ्चितकटी पातु देवी मां सर्वकर्मसु ॥१५॥
छिन्नमुण्डधरा देवी कानने पातु सर्वदा । चितामध्यस्थिता देवी मारणे पातु सर्वदा ॥१६॥

द्वीपिचर्मधरा देवी पुत्रदारधनादिषु । अलङ्कारान्विता देवी पातु मां हरवल्लभा ॥१७॥
रक्ष रक्ष नदीकुञ्जे हूं हूं फट् सुसमन्विते । बीजरूपा महादेवी पर्वते पातु सर्वदा ॥१८॥
मणिभृद्वज्रिणी देवी महाप्रतिसरे तथा । रक्ष रक्ष सदा हूं हूं ॐ ह्रीं स्वाहा महेश्वरी ॥१९॥
पुष्पकेतुरजार्हेति कानने पातु सर्वदा । ॐ ह्रीं वज्रपुष्पं हुं फट् प्रान्तरे सर्वकामदा ॥२०॥
ॐ पुष्पे पुष्पे महापुष्पे पातु पुत्रान्महेश्वरी । हूं स्वाहा शक्तिसंयुक्ता दारान् रक्षतु सर्वदा ॥२१॥
ॐ आं हूं स्वाहा महेशानी पातु द्यूते हरप्रिया । ॐ ह्रीं सर्वविघ्नोत्सारिणी देवी विघ्नान्मां सदाऽवतु ॥२२॥
ॐ पवित्रवज्रभूमे हुं फट् स्वाहा समन्विता । पूरिका पातु मां देवी सर्वविघ्नविनाशिनी ॥२३॥
ॐ आः सुरेखे वज्ररेखे हुं फट् स्वाहा समन्विता । पाताले पातु सा देवी लाकिनी नामसंज्ञिका ॥२४॥
ह्रींकारी पातु मां पूर्वे शक्तिरूपा महेश्वरी । स्त्रींकारी पातु देवेशी वधूरूपा महेश्वरी ॥२५॥
हूंस्वरूपा महादेवी पातु मां क्रोधरूपिणी । फट्स्वरूपा महामाया उत्तरे पातु सर्वदा ॥२६॥
पश्चिमे पातु मां देवी फट्स्वरूपा हरप्रिया । मध्ये मां पातु देवेशी हूंस्वरूपा नगात्मजा ॥२७॥
नीलवर्णा सदा पातु सर्वतो वाग्भवा सदा । भवानी पातु भवने सर्वैश्वर्यप्रदायिनी ॥२८॥
विद्यादानरता देवी वक्त्रे नीलसरस्वती । शास्त्रे वादे च संग्रामे जले च विषमे गिरौ ॥२९॥
भीमरूपा सदा पातु श्मशाने भयनाशिनी । भूतप्रेतालये घोरे दुर्गमा श्रीघनाऽवतु ॥३०॥
पातु नित्यं महेशानी सर्वत्र शिवदूतिका । कवचस्य च माहात्म्यं नाहं वर्षशतैरपि ॥३१॥
शक्नोमि गदितुं देवि भवेत्तस्य फलं च यत् । पुत्रदारेषु बन्धूनां सर्वदेशे च सर्वदा ॥३२॥
न विद्यते भयं तस्य नृपपूज्यो भवेच्च सः । शुचिर्भूत्वाऽशुचिर्वापि कवचं सर्वकामदम् ॥३३॥
प्रपठन् वा स्मरन्मर्त्यो दुःखशोक-विवर्जितः । सर्वशास्त्रे महेशानि कविराड् भवति ध्रुवम् ॥३४॥
सर्ववागीश्वरो मर्त्योलोकवश्यो धनेश्वरः । रणे द्यूते विवादे च जयस्तत्र भवेद्ध्रुवम् ॥३५॥
पुत्रपौत्रान्वितो मर्त्यो विलासी सर्वयोषिताम् । शत्रवो दासतां यान्ति सर्वेषां वल्लभः सदा ॥३६॥
गर्वी खर्वी भवत्येव वादी स्खलति दर्शनात् । मृत्युश्च वश्यतां याति दासास्तस्यावनीभुजः ॥३७॥
प्रसङ्गात्कथितं सर्वं कवचं सर्वकामदम् । प्रपठन्वा स्मरन्मर्त्यः शापानुग्रहणे क्षमः ॥३८॥
आनन्दवृन्द सिन्धूनामधिपः कविराड् भवेत् । सर्ववागीश्वरो मर्त्यो लोकवश्यः सदा सुखी ॥३९॥
गुरोः प्रसादमासाद्य विद्यां प्राप्य सुगोपिताम् । तत्रापि कवचं देवि दुर्ल्लभं भुवनत्रये ॥४०॥
गुरुर्देवो हरः साक्षात्तत्पत्नी तु हरप्रिया । अभेदेन भजेद्यस्तु तस्य सिद्धिरदूरतः ॥४१॥
मंत्राचारा महेशानि कथिताः पूर्ववत्प्रिये । नाभौ ज्योतिस्तथा रक्तं हृदयोपरि चिन्तयेत् ॥४२॥
ऐश्वर्यं सुकवित्वं च महावागीश्वरो नृपः । नित्यं तस्य महेशानि महिलासङ्गमं चरेत् ॥४३॥
पंचाचाररतो मर्त्यः सिद्धो भवति नान्यथा । शक्तियुक्तो भवेन्मर्त्यः सिद्धो भवति नान्यथा ॥४४॥
ब्रह्मा विष्णुश्च रुद्रश्च ये देवासुरमानुषाः । तं दृष्ट्वा साधकं देवि लज्जायुक्ता भवन्ति ते ॥४५॥

स्वर्गे मर्त्ये च पाताले ये देवाः सिद्धिदायकाः । प्रशंसन्ति सदा देवि तं दृष्ट्वा साधकोत्तमम् ॥४६॥
विघ्नात्मकाश्च ये देवाः स्वर्गे मर्त्ये रसातले । प्रशंसन्ति सदा सर्वे तं दृष्ट्वा साधकोत्तमम् ॥४७॥
इति ते कथितं देवि मया सम्यक्प्रकीर्तितम् । भुक्तिमुक्तिकरं साक्षात्कल्पवृक्षस्वरूपकम् ॥४८॥
आसाद्याद्यगुरुं प्रसाद्य य इदं कल्पद्रुमालम्बनं, मोहेनापि मदेन चापि रहितो जाड्येन वा युज्यते ॥
सिद्धोऽसौ भुवि सर्वदुःखविपदां पारं प्रयात्यन्तके, मित्रंतस्यनृपाश्च देवि विपदोनश्यन्ति तस्याशु च ॥४९॥
तद्गात्रं प्राप्य शस्त्राणि ब्रह्मास्त्रादीनि वै भुवि । तस्य गेहे स्थिरा लक्ष्मीर्वाणी वक्त्रे वसेद् ध्रुवम् ॥५०॥
इदं कवचमज्ञात्वा तारां यो भजते नरः । अल्पायुर्निर्द्धनो मूर्खो भवत्येव न संशयः ॥५१॥
लिखित्वा धारयेद्यस्तु कण्ठे वा मस्तके भुजे । तस्य सर्वार्थसिद्धिः स्याद्यद्यन्मनसि वर्तते ॥५२॥
गोरोचना कुंकुमेन रक्तचन्दनकेन वा । यावकैर्वा महेशानि लिखेन्मन्त्रं समाहितः ॥५३॥
अष्टम्यां मङ्गलदिने चतुर्दश्यामथापि वा । संध्यायां देवदेवेशि लिखेद्यन्त्रं समाहितः ॥५४॥
मघायां श्रवणे वापि रेवत्यां वा विशेषतः । सिंहराशौगते चन्द्रे कर्कटस्थे दिवाकरे ॥५५॥
मीनराशौ गुरौ याते वृश्चिकस्थे शनैश्चरे । लिखित्वा धारयेद्यस्तु उत्तराभिमुखो भवेत् ॥५६॥
श्मशाने प्रान्तरे वापि शून्यागारे विशेषतः । निशायां वा लिखेन्मंत्रं तस्य सिद्धिरचञ्चला ॥५७॥
भूर्जपत्रे लिखेन्मंत्रं गुरुणा च महेश्वरि । ध्यानधारणयोगेन धारयेद्यस्तु भक्तितः ॥५८॥
अचिरात्तस्य सिद्धिः स्यान्नात्र कार्या विचारणा ॥

॥ इति श्रीरुद्रयामले तन्त्रे उग्रताराकवचं समाप्तम् ॥

॥ श्री तारा हृदय स्तोत्रम् ॥

॥ श्रीशिव उवाच ॥

शृणु पार्वति! भद्रं ते लोकानां हितकारकम् । कथ्यते सर्वदा गोप्यं ताराहृदयमुत्तमम् ॥१॥

॥ श्रीपार्वत्युवाच ॥

स्तोत्रं कथं समुत्पन्नं कृतं केन पुरा प्रभो । कथ्यतां सर्वसद्वृत्तं कृपां कृत्वा ममोपरि ॥२॥

॥ श्रीशिव उवाच ॥

रणे देवासुरे पूर्वं कृतमिन्द्रेण सुप्रिये । दुष्टशत्रुविनाशार्थं बलवृद्धियशस्करम् ॥३॥

विनियोग:- ॐ अस्य श्रीमदुग्रताराहृदयस्तोत्र मंत्रस्य श्रीभैरवऋषिः, अनुष्टुप् छन्दः, श्रीमदुग्रतारा देवता, स्त्रीं बीजं, हूं शक्तिः, नमः कीलकं सकल शत्रुविनाशार्थे पाठे विनियोगः।

हृदयादि षडंगन्यास:- ॐ स्त्रीं हृदयाय नमः। ॐ ह्रीं शिरसे स्वाहा। ॐ हूं शिखायै वषट्। ॐ त्रीं कवचाय हुं। ॐ ऐं नेत्रत्रयाय वौषट्। ॐ हंसः अस्त्राय फट्।

॥ ध्यानम् ॥

ॐ ध्यायेत्कोटिदिवाकर - द्युतिनिभां बालेन्दुयुक्छेखरां
रक्तांगीं रसनां सुरक्तवसनां पूर्णेन्दुबिंबाननाम् ।
पाशं कर्त्रिमहांकुशादि दधतीं दोर्भिश्चतुर्भिर्युतां
नानाभूषणभूषितां भगवतीं तारां जगत्तारिणीम् ॥४॥

एवं ध्यात्वा शुभां तारां ततस्तु हृदयं पठेत् । तारिणी तत्त्वनिष्ठानां सर्वतत्त्वप्रकाशिका ॥५॥
रामाभिन्ना पराशक्तिः शत्रुनाशं करोतु मे । सर्वदा शत्रुसंरम्भे तारा मे कुरुतां जयम् ॥६॥
स्त्रीं त्रीं स्वरूपिणी देवि त्रिषु लोकेषु विश्रुता । तव स्नेहान्मयाख्यातं न पैशुन्यं प्रकाश्यताम् ॥७॥
शृणु देवि! तव स्नेहात्तारानामानि तत्त्वतः । वर्णयिष्यामि गुप्तानि दुर्लभानि जगत्त्रये ॥८॥
तारिणी तरला तारा त्रिरूपा तरणिप्रभा । सत्त्वरूपा महासाध्वी सर्वसज्जनपालिका ॥९॥
रमणीया रजोरूपा जगत्सृष्टिकरी परा । तमोरूपा महामाया घोररावा भयानका ॥१०॥
कालरूपा कालिकाख्या जगद्विध्वंसकारिका । तत्त्वज्ञानपरानन्दा तत्त्वज्ञानप्रदाऽनघा ॥११॥
रक्तांगी रक्तवस्त्रा च रक्तमालाप्रशोभिता । सिद्धिलक्ष्मीश्च ब्रह्माणी महाकाली महालया ॥१२॥
नामान्येतानि ये मर्त्त्याःसर्वदैकाग्रमानसाः । प्रपठन्ति प्रिये तेषां किंकरत्वं करोम्यहम् ॥१३॥
तारां तारपरां देवीं तारकेश्वर पूजिताम् । तारिणीं भवपाथोधेरुग्रतारां भजाम्यहम् ॥१४॥
स्त्रीं ह्रीं हूं त्रीं फणमंत्रेण जलं जप्त्वाऽभिषेचयेत् । सर्वेरोगाः प्रणश्यन्ति सत्यं सत्यं वदाम्यहम् ॥१५॥
त्रीं स्वाहान्तैर्महामंत्रैश्चन्दनं साधयेत्ततः । तिलकं कुरुते प्राज्ञो लोको वश्यो भवेत्प्रिये ॥१६॥
स्त्रीं ह्रीं त्रीं स्वाहा मंत्रेण श्मशानं भस्ममंत्रयेत् । शत्रोर्गृहे तत्प्रक्षेपाच्छत्रोर्मृत्युर्भविष्यति ॥१७॥
ह्रीं हूं स्त्रीं फडंत मन्त्रैः पुष्पं संशोध्य सप्तधा । उच्चाटनं नयत्याशु रिपूणां नैव संशयः ॥१८॥
स्त्रीं त्रीं ह्रीं मन्त्रवर्येन अक्षताश्चाभिमंत्रिताः । तत्प्रतिक्षेपमात्रेण शीघ्रमायाति मानिनी ॥१९॥

(हंसः ॐ ह्रीं स्त्रीं हूं हंसः) इति मंत्रेण जप्तेन शोधितं कज्जलं प्रिये । तस्यैव तिलकं कृत्वा जगन्मोहं समाचरेत् ॥२०॥

ताराया हृदयं देवि सर्वपापप्रणाशनम् । वाजपेयादियज्ञानां कोटिकोटिगुणोत्तरम् ॥२१॥
गंगादिसर्वतीर्थानां फलं कोटिगुणात्स्मृतम् । महादुःखे महारोगे सङ्कटे प्राणसंशये ॥२२॥

महाभये महाघोरे - पठेत्स्तोत्रं महोत्तमम् ।
सत्यं सत्यं मयोक्तं ते पार्वति प्राणवल्लभे ॥२३॥
गोपनीयं प्रयत्नेन न प्रकाश्यमिदं क्वचित् ॥२४॥

॥ इति श्रीभैरवीतंत्रे शिवपार्वती संवादे श्रीमदुग्रताराहृदयं सम्पूर्णम् ॥

॥ अथ तारा स्तोत्रम् ॥

मातर्नीलसरस्वति प्रणमतां सौभाग्यसम्पत्प्रदे, प्रत्यालीढपदस्थिते शवहृदि स्मेराननांभोरुहे ।
फुल्लेन्दीवर लोचने त्रिनयने कर्त्रीकपालोत्पले, खड्गंचादधती त्वमेव शरणं त्वामीश्वरीमाश्रये ॥१॥
वाचामीश्वरि भक्तिकल्पलतिके सर्वार्थसिद्धीश्वरि, गद्यप्राकृतपद्यजातरचना सर्वार्थसिद्धिप्रदे ।
नीलेन्दीवरलोचनत्रययुते कारुण्यवारान्निधे सौभाग्यामृतवर्द्धनेन कृपया सिञ्च त्वमस्मादृशम् ॥२॥
खर्वे गर्वसमूहपूरिततनो सर्पादिवेषोज्वले व्याघ्रत्वक् परिवीतसुन्दरकटिव्याधूत घण्टाङ्किते ।
सद्यः कृत्तगलद्रजः परिमिलन्मुण्डद्वयीमूर्द्धजग्रन्थिश्रेणि नृमुण्डदामललिते भीमे भयंनाशय ॥३॥
मायानङ्गविकाररूपललनाबिन्द्वर्द्धचन्द्राम्बिके हुं फट्कारमयि त्वमेव शरणं मंत्रात्मिके मादृशः ।
मूर्तिस्ते जननि त्रिधामघटिता स्थूलातिसूक्ष्मा परा वेदानां नहि गोचरा कथमपि प्राज्ञैर्नुतामाश्रये ॥४॥
त्वत्पादाम्बुजसेवया सुकृतिनो गच्छन्ति सायुज्यतां तस्याः श्रीपरमेश्वर त्रिनयन ब्रह्मादिसाम्यात्मनः ।
संसाराम्बुधिमज्जने पटुतनुर्देवेन्द्रमुख्यान्सुरान् मातस्ते पदसेवने हि विमुखान् किं मन्दधीःसेवते ॥५॥
मातस्त्वत्पद पंकजद्वय रजोमुद्रांक कोटीरिणस्ते देवा जयसङ्गरे विजयिनो निःशङ्कमङ्के गताः ।
देवोऽहं भुवने न मे सम इति, स्पर्द्धां वहन्तः परे तत्तुल्यां नियतं यथा शशिरवी नाशं व्रजन्ति स्वयम् ॥६॥
त्वन्नामस्मरणात्पलायन परान्द्रष्टुं च शक्ता न ते भूतप्रेतपिशाचराक्षसगणा यक्षाश्च नागाधिपाः ।
दैत्यादानव पुङ्गवाश्च खचरा व्याघ्रादिका जन्तवो डाकिन्यः कुपितान्तकश्च मनुजान् मातः क्षणं भूतले ॥७॥
लक्ष्मीः सिद्धिगणश्च पादुकमुखाः सिद्धास्तथा वैरिणां स्तंभश्चापि वराङ्गने गजघटा स्तंभस्तथा मोहनम् ।
मातस्त्वत्पदसेवया खलुनृणां सिध्यन्ति ते ते गुणाः क्लान्तः कान्त मनोभवोऽत्र भवति क्षुद्रोऽपि वाचस्पतिः ॥८॥
ताराष्टकमिदं पुण्यं भक्तिमान् यः पठेन्नरः । प्रातर्मध्याह्नकाले च सायाह्ने नियतः शुचिः ॥९॥
लभते कवितां विद्यां सर्वशास्त्रार्थविद्भवेत्, लक्ष्मीमनश्वरां प्राप्य भुक्त्वा भोगान्यथेप्सितान् ।
कीर्तिं कान्तिं च नैरुज्यं प्राप्यान्ते मोक्षमाप्नुयात् ॥१०॥

॥ इति नीलतंत्रे तारास्तोत्रं सम्पूर्णम् ॥

॥ अथ तारा शतनाम स्तोत्रम् ॥

॥ श्री शिव उवाच ॥

तारिणी तरला तन्वी तारा तरुणवल्लरी । तीररूपा तरी श्यामा तनुक्षीणपयोधरा ॥१॥
तुरीया तरला तीव्रगमना नीलवाहिनी । उग्रतारा जया चण्डी श्रीमदेकजटाशिराः ॥२॥
तरुणी शाम्भवी च्छिन्नभाला च भद्रतारिणी । उग्रा चोग्रप्रभा नीला कृष्णा नीलसरस्वती ॥३॥
द्वितीया शोभना नित्या नवीना नित्यनूतना । चण्डिका विजयाराध्या देवी गगनवाहिनी ॥४॥
अट्टहास्या करालास्या चरास्या दितिपूजिता । सगुणा सगुणाराध्या हरीन्द्रदेवपूजिता ॥५॥
रक्तप्रिया च रक्ताक्षी रुधिरास्यविभूषिता । बलिप्रिया बलिरता दुर्गा बलवती बला ॥६॥

बलप्रिया बलरता बलरामप्रपूजिता । अर्द्धकेशेश्वरी केशा केशवासविभूषिता ॥७॥
पद्ममाला च पद्माक्षी कामाख्या गिरिनंदिनी । दक्षिणा चैव दक्षा च दक्षजा दक्षिणे रता ॥८॥
वज्रपुष्पप्रिया रक्तप्रिया कुसुमभूषिता । माहेश्वरी महादेवप्रिया पञ्चविभूषिता ॥९॥
इडा च पिङ्गला चैव सुषुम्ना प्राणरूपिणी । गान्धारी पञ्चमी पञ्चाननादि परिपूजिता ॥१०॥
तथ्यविद्या तथ्यरूपा तथ्यमार्गानुसारिणी । तत्त्वप्रिया तत्त्वरूपा तत्त्वज्ञानात्मिकानघा ॥११॥
ताण्डवाचारसन्तुष्टा ताण्डवप्रियकारिणी । तालदानरता क्रूरतापिनी तरणिप्रभा ॥१२॥
त्रयीयुक्ता त्रयीमुक्ता तर्पिता तृप्तिकारिणी । तारुण्यभावसंतुष्टा शक्तिर्भक्तानुरागिणी ॥१३॥
शिवासक्ता शिवरतिः शिवभक्तिपरायणा । ताम्रद्युतिस्ताम्ररागा ताम्रपात्रप्रभोजिनी ॥१४॥
बलभद्रप्रेमरता बलिभुग्बलिकल्पिनी । रामरूपा रामशक्ती रामरूपानुरागिणी ॥१५॥
इत्येतत्कथितं देवि रहस्यं परमाद्भुतम् । श्रुत्वा मोक्षमवाप्नोति तारादेव्याः प्रसादतः ॥१६॥
य इदं पठति स्तोत्रं तारास्तुति रहस्यकम् । सर्वसिद्धियुतो भूत्वा विहरेत् क्षितिमण्डले ॥१७॥
तस्यैव मंत्रसिद्धिः स्यान्मम सिद्धिरनुत्तमा । भवत्येव महामाये सत्यं सत्यं न संशयः ॥१८॥
मन्दे मंगलवारे च यः पठेन्निशि संयतः । तस्यैव मंत्रसिद्धिः स्याद्गाणपत्यं लभेत सः ॥१९॥
श्रद्धयाऽश्रद्धया वापि पठेत्ताररहस्यकम् । सोऽचिरणैव कालेन जीवन्मुक्तः शिवो भवेत् ॥२०॥
सहस्रावर्त्तनाद्देवि पुरश्चर्याफलं लभेत् ।
एवं सततयुक्ता ये ध्यायं तस्त्वामुपासते ।
ते कृतार्था महेशानि मृत्युसंसारवर्त्मनः ॥२१॥

॥ इति श्रीस्वर्णमालातंत्रे तारिणी शतनामस्तोत्रम् सम्पूर्णम् ॥

॥ श्री तकारादि तारा सहस्रनाम स्तोत्रम् ॥

॥ श्रीवशिष्ठ उवाच ॥

नाम्नां सहस्रं ताराया मुखाम्भोजाद्विनिर्गतम् । मंत्रसिद्धिकरं प्रोक्तं तन्मे वद पितामह ॥१॥

॥ ब्रह्मोवाच ॥

शृणु वत्स! प्रवक्ष्यामि रहस्यं सर्वसिद्धिदम् । यस्योपदेशमात्रेण तव सिद्धिर्भविष्यति ॥२॥
महाप्रलयकालादौ नष्टे स्थावरजङ्गमे । महाकारं समाकर्ण्य कृपया संहृतं तनौ ॥३॥
नाम्ना तेन महातारा ख्याता सा ब्रह्मरूपिणी । महाशूलत्रयं कृत्वा तत्र चैकाकिनी स्थिता ॥४॥
पुनः सृष्टेश्चिकीर्षा -ऽभूद्दिव्यसाम्राज्यसंज्ञकम् । नाम्नां सहस्रमस्यास्तु तकाराद्यं मया स्मृतम् ॥५॥
तत्प्रभावेण ब्रह्माण्डं निर्मितं सुदृढं महत् । आविर्भूता वयं तन्त्रयन्त्रैस्तस्याः पुरा द्विजः ॥६॥
स्व-स्व-कार्यार्थिनस्तत्र भ्रान्ता भ्रम्यां यथा वयम् । तयोपदिष्टाः कृपया भवामःसृष्टिकारकाः ॥७॥
तस्याः प्रसादाद्विप्रेन्द्र त्रयो ब्रह्माण्डनायकाः । अन्ये सुरगणाः सर्वे तस्याः पादप्रसेवकाः ॥८॥

पठनाद्धारणात्सृष्टेः कर्ताऽहं पालको हरिः । तत्त्वाक्षरोपदेशेन संहर्ता शंकरः स्वयम् ॥९॥
ऋषिच्छन्दादिकं ध्यानं मूलवत्परिकीर्तितम् । नियोगमात्रसिद्धौ च पुरुषार्थचतुष्टयम् ॥१०॥

विनियोगः- ॐ अस्य श्रीतारातकारादिसहस्त्रनाम स्तोत्रस्य वसिष्ठ ऋषिः, अनुष्टुप् छन्दः, तारा देवता, सर्वेष्ट सिद्धये पाठे विनियोगः।

ऋष्यादि न्यासः- ॐ वसिष्ठ ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। तारादेवतायै नमो हृदि। विनियोगाय नमः सर्वाङ्गे। इति ऋष्यादि न्यासः।

हृदयादि षडंगन्यासः- ॐ ह्रां हृदयाय नमः। ॐ ह्रीं शिरसे स्वाहा। ॐ ह्रूं शिखायै वषट्। ॐ ह्रैं कवचाय हुं। ॐ ह्रौं नेत्रत्रयाय वौषट्। ॐ ह्रः अस्त्राय फट्।

करन्यासः- ॐ ह्रां अंगुष्ठाभ्यां नमः। ॐ ह्रीं तर्जनीभ्यां नमः। ॐ ह्रूं मध्यमाभ्यां नमः। ॐ ह्रैं अनामिकाभ्यां नमः। ॐ ह्रौं कनिष्ठिकाभ्यां नमः। ॐ ह्रः करतलकरपृष्ठाभ्यां नमः।

॥ ध्यानम् ॥

प्रत्यालींढपदार्पितांघ्रि शवहृद्-घोराट्टहासा परा खड्गेन्दीवर कर्त्रिखर्परभुजा हुंकारबीजोद्भवा ।
खर्वा नीलविशालपिङ्गल जटाजूटैकनागैर्युता जाड्यं न्यस्य कपालकर्तृ जगतां हन्त्युग्रतारा स्वयम् ॥

इति ध्यात्वा स्तोत्रं पठेत् -

तारा तारादिपंचार्णा तारान्यावेदवीर्यजा । तारा तारहितावर्णा ताराद्याताररूपिणी ॥११॥
तारारात्रि समुत्पन्ना तारारात्रिवरोद्यता । ताराराात्रिजपासक्ता ताराराात्रिस्वरूपिणी ॥१२॥
ताराराज्ञीस्वसंतुष्टा ताराराज्ञीवरप्रदा । ताराराज्ञीस्वरूपा च ताराराज्ञीप्रसिद्धिदा ॥१३॥
ताराहृत्पंकजागारा ताराहृत्पंकजापरा । ताराहृत्पंकजाधारा ताराहृत्पंकजा तथा ॥१४॥
तारेश्वरी च ताराभा तारागणस्वरूपिणी । तारागणसमाकीर्णा तारागणनिषेविता ॥१५॥
तारा तारान्विता तारारत्नान्वितविभूषणा । तारागणरणासन्ना ताराकृत्यप्रपूजिता ॥१६॥
तारागणकृताहारा तारागणकृताश्रया । तारागणकृतागारा तारागणनतत्परा ॥१७॥
तारागुणगुणाकीर्णा तारागुणगणप्रदा । तारागुणगणासक्ता तारागुणगणालया ॥१८॥
तारेश्वरी तारापूज्या ताराजप्या तु तारणा । तारमुख्या तु ताराख्या तारदक्षा तु तारिणी ॥१९॥
तारागम्या तु तारस्था तारामृत तरङ्गिणी । तारभव्या तु तारार्णा तारहव्या तु तारिणी ॥२०॥
तारका तारकांतस्था तारकाराशिभूषणा । तारकाहारशोभाढ्या तारकावेष्टिताङ्गणा ॥२१॥
तारकाहंसकाकीर्णा तारकाकृतभूषणा । तारकाङ्गदशोभाङ्गी तारकाश्रितकङ्कणा ॥२२॥
तारकाञ्चितकाञ्ची च तारकान्वितभक्षणा । तारकाचित्रवसना तारकासनमण्डला ॥२३॥
तारकाकीर्णमुकुटा तारकाश्रितकुण्डला । तारकान्वित ताटङ्कयुग्मगण्डस्थलोज्ज्वला ॥२४॥
तारकाश्रितपादाब्जा तारकावरदायिका । तारकादत्तहृदया तारकाञ्चितसायका ॥२५॥
तारकान्यासकुशला तारकान्यासविग्रहा । तारकान्याससन्तुष्टा तारकान्याससिद्धिदा ॥२६॥

तारकान्यासनिलया तारकान्यासपूजिता । तारकान्याससंहृष्टा तारकान्याससिद्धिदा ॥२७॥
तारकान्याससंमग्ना तारकान्यासवासिनी । तारकान्याससम्पूर्णा मंत्रसिद्धिविधायिनी ॥२८॥
तारकोपासकप्राणा तारकोपासकप्रिया । तारकोपासकासाध्या तारकोपासकेष्टदा ॥२९॥
तारकोपासकासक्ता तारकोपासकार्थिनी । तारकोपासकाराध्या तारकोपासकाश्रया ॥३०॥
तारकासुरसन्तुष्टा तारकासुरपूजिता । तारकासुरनिर्माणकर्त्री तारकवन्दिता ॥३१॥
तारकासुरसम्मान्या तारकासुरमानदा । तारकासुरसंसिद्धा तारकासुरदेवता ॥३२॥
तारकासुरदेहस्था तारकासुरस्वर्गदा । तारकासुरसंसृष्टा तारकासुरगर्वदा ॥३३॥
तारकासुरसंहंत्री तारकासुरमर्दिनी । तारकासुरसंग्रामनर्तकी तारकापरा ॥३४॥
तारकासुरसंग्रामतारिणी तारकारिभृत् । तारकासुरसंग्राम - कबंधवृन्दवन्दिता ॥३५॥
तारकारिप्रसूस्तारकारिमाता तुकारिका । तारकारिमनोहारि वस्त्रभूषानुशासिका ॥३६॥
तारकारिविधात्री च तारकारिनिषेविता । तारकारिवचस्तुष्टा तारकारिसुशिक्षिता ॥३७॥
तारकारिसुसन्तुष्टा तारकारिविभूषिता । तारकारिकृतोत्सङ्गा तारकारिप्रहर्षदा ॥३८॥
तमः सम्पूर्णसर्वाङ्गी तमोलिप्तकलेवरा । तमोव्याप्तस्थलासङ्गा तमः - पटलसन्निभा ॥३९॥
तमोहन्त्री तमःकर्त्री तमः संचारकारिणी। तमोगात्री तमोदात्री तमः पात्री तमोऽपहा ॥४०॥
तमोराशिस्तमोनाशा तमोराशि विनाशिनी । तमोराशिकृतध्वंसी तमोराशिभयंकरी ॥४१॥
तमोगुणप्रसन्नास्या तमोगुणसुसिद्धिदा । तमोगुणोक्तमार्गस्था तमोगुणविराजिता ॥४२॥
तमोगुणस्तुतिपरा तमोगुणविवर्द्धिनी । तमोगुणाश्रितपरा तमोगुणविनाशिनी ॥४३॥
तमोगुणक्षयकरी तमोगुणकलेवरा । तमोगुणध्वंसतुष्टा तमः पारे प्रतिष्ठिता ॥४४॥
तमोभवभवप्रीता तमोभवभवप्रिया । तमोभवभवश्रद्धा तमोभवभवाश्रया ॥४५॥
तमोभवभवप्राणा तमोभवभवार्चिता । तमोभवभवप्रीत्यालीढ - कुम्भस्थलस्थिता ॥४६॥
तपस्विवृन्दसन्तुष्टा तपस्विवृन्दपुष्टिदा । तपस्विवृन्दसंस्तुत्या तपस्विवृन्दवंदिता ॥४७॥
तपस्विवृन्दसम्पन्ना तपस्विवृन्दहर्षदा । तपस्विवृन्दसम्पूज्या तपस्विवृन्दभूषिता ॥४८॥
तपस्विचित्ततल्पस्था तपस्विचित्तमध्यगा । तपस्विचित्तचित्तार्हा तपस्विचित्तहारिणी ॥४९॥
तपस्विकल्पवल्ल्याभा तपस्विकल्पपादपा । तपस्विकामधेनुश्च तपस्विकामपूर्तिदा ॥५०॥
तपस्वित्राणनिरता तपस्विगृहसंस्थिता । तपस्विगृहराज्य श्रीस्तपस्विराज्यदायिका ॥५१॥
तपस्विमानसाराध्या तपस्विमानदायिका । तपस्वितापसंहर्त्री तपस्वितापशान्तिकृत् ॥५२॥
तपस्विसिद्धिविद्या च तपस्विमंत्रसिद्धिकृत् । तपस्विमंत्रतन्त्रेशी तपस्विमंत्ररूपिणी ॥५३॥
तपस्विमंत्रनिपुणा तपस्विकर्मकारिणी । तपस्विकर्मसम्भूता तपस्विकर्मसाक्षिणी ॥५४॥
तपस्सेव्या तपोभव्या तपोभाव्या तपस्विनी । तपोवश्या तपोगम्या तपोगेहनिवासिनी ॥५५॥

तपोधन्या तपोमान्या तपःकन्या तपोवृता । तपस्तथ्या तपोगोप्या तपोजप्या तपोनृता ॥५६॥
तपःसाध्या तपोराध्या तपोवन्द्या तपोमयी । तपस्संध्या तपोवन्ध्या तपस्सान्निध्यकारिणी ॥५७॥
तपोध्येया तपोज्ञेया तपस्तप्ता तपोबला । तपोलेया तपोदेया तपस्तत्त्वफलप्रदा ॥५८॥
तपोविघ्नवरघ्नी च तपोविघ्नविनाशिनी । तपोविघ्नचयध्वंशी तपोविघ्नभयंकरी ॥५९॥
तपोभूमिवरप्राणा तपोभूमिपतिस्तुता । तपोभूमिपतिध्येया तपोभूमिपतीष्टदा ॥६०॥
तपोवनकुरङ्गस्था तपोवनविनाशिनी । तपोवनगतिप्रीता तपोवनविहारिणी ॥६१॥
तपोवनफलासक्ता तपोवनफलप्रदा । तपोवनसुसाध्या च तपोवनसुसिद्धिदा ॥६२॥
तपोवनसुसेव्या च तपोवननिवासिनी । तपोधनसुसंसेव्या तपोधनसुसाधिता ॥६३॥
तपोधनसुसंलीना तपोधन मनोमयी । तपोधननमस्कारा तपोधनविमुक्तिदा ॥६४॥
तपोधनधनासाध्या तपोधनधनात्मिका । तपोधनधनाराध्या तपोधनफलप्रदा ॥६५॥
तपोधनधनाढ्या च तपोधनधनेश्वरी । तपोधनधनप्रीता तपोधनधनालया ॥६६॥
तपोधनजनाकीर्णा तपोधनजनाश्रया । तपोधनजनाराध्या तपोधनजनप्रसूः ॥६७॥
तपोधनजनप्राणा तपोधनजनेष्टदा । तपोधनजनासाध्या तपोधनजनेश्वरी ॥६८॥
लघिमासिद्धे महिमासिद्धे ईशित्वसिद्धे वशित्वसिद्धे प्राकाम्यसिद्धे भुक्तिसिद्धे इच्छासिद्धे प्राप्तिसिद्धे सर्वकामसिद्धे, ब्राह्मि माहेश्वरि कौमारि वैष्णवि वाराहि माहेन्द्रि चामुण्डे महालक्ष्मि, सर्वसंक्षोभिणि सर्वविद्राविणि सर्वाकर्षिणि सर्ववशङ्करि सर्वोन्मादिनि सर्वमहांकुशे सर्वखेचरि सर्ववीजे सर्वयोने सर्वत्रिखण्डे ''त्रैलोक्य मोहनचक्र स्वामिनि'' प्रकटयोगिनि कामाकर्षिणि बुद्ध्याकर्षिणि अहङ्काराकर्षिणि गंधाकर्षिणि चित्ताकर्षिणि धैर्याकर्षिणि स्मृत्याकर्षिणि नामाकर्षिणि बीजाकर्षिण्यात्माकर्षिण्यमृताकर्षिणि शरीराकर्षिणि सर्वाशा परिपूरकचक्र स्वामिनि गुप्तयोगिअनङ्गन्यङ्गकुसुमेऽनङ्ग मेखलेऽनङ्ग मदनेऽनङ्ग मदनातुरेऽनङ्ग-रेखेऽनङ्ग वेगिन्यनऽनङ्गां कुशेऽनङ्गमालिनि सर्वसंक्षोभण चक्र स्वामिनि गुप्ततरयोगिनि सर्वसंक्षोभिणि सर्वविद्राविणि सर्वाकर्षिणि सर्वाह्लादिनि सर्वसम्मोहिनि सर्वस्तम्भिनि सर्वजृम्भिणि सर्ववशङ्करि सर्वरंजिनि सर्वोन्मादिनि सर्वार्थसाधिनि सर्वसम्पत्तिपूरिणि सर्वमन्त्रमयि सर्वद्वन्द्वक्षयङ्करि ''सर्वसौभाग्य दायक चक्रस्वामिनि सम्प्रदाय योगिनि'' सर्वसिद्धिप्रदे सर्वसम्पतप्रदे सर्वप्रियङ्करि सर्वमङ्गलकारिणि सर्वकामप्रदे सर्वदुःखविमोचिनि सर्वमृत्युप्रशमनि सर्वविघ्ननिवारिणि सर्वाङ्गसुन्दरि सर्वसौभाग्य दायिनि ''सर्वार्थ साधक चक्रस्वामिनि'' कुलोत्तीर्ण योगिनिसर्वज्ञे सर्वशक्ते सर्वैश्वर्यप्रदे सर्वज्ञानमयि सर्वव्याधिविनाशिनि सर्वाधार स्वरूपे सर्वपापहरे सर्वानन्दमयि सर्वरक्षास्वरूपिणि सर्वेप्सितप्रदे ''सर्वरक्षाकर चक्रस्वामिनि निगर्भयोगिनि'' वशिनि कामेश्वरि मोदिनि विमलेऽरुणे जयिनि सर्वेश्वरि कौलिनि सर्वरोगहरचक्र स्वामिनि रहस्ययोगिनि वाणिनि चापिनि पाशिन्यंकुशिनि महाकामेश्वरि महावज्रेश्वरि महाभगमालिनि महाश्रीसुन्दरि ''सर्वसिद्धिप्रदचक्र स्वामिन्यति रहस्ययोगिनि'' श्री श्री महाभट्टारिके सर्वानन्दमय चक्रस्वामिनि परापर रहस्ययोगिनि त्रिपुरे त्रिपुरेशि त्रिपुरसुन्दरि त्रिपुर वासिनि त्रिपुरा श्रीस्त्रिपुरमालिनि त्रिपुरासिद्धे त्रिपुराम्ब महात्रिपुरसुन्दरि महामाहेश्वरि महामहागुप्ते महामहाज्ञप्ते महामहा नन्दे महामहाराज्ञि महामहाशक्ते महामहास्पन्दे महामहाशये महामहाश्रीचक्र साम्राज्ञि नमस्ते नमस्ते नमस्ते स्वाहा श्रीं ह्रीं ऐं ॐ।

ॐ ऐं ह्रीं श्रीं समस्त प्रकटगुप्त गुप्ततर सम्प्रदाय कुल कौल निगर्भ रहस्याति रहस्य परापर रहस्य योगिनि श्रीविद्या राजराजेश्वरि श्रीपादुकां पूजयामि नमः।

पुष्पाञ्जलिं निवेद्य मूलेन न्यासं विधाय मानसोपचारैः पूजयेत्।

॥ फलश्रुति ॥

माला मन्त्रो महादेव्याः सर्वसिद्धि प्रदायकः । एकत्रिंशत् सहस्त्राणैं स्त्रिलोकी मोहन क्षमः ॥१॥
एषा विद्या महासिद्धि दायिनी स्मृति मात्रतः । अग्निवातमहाक्षोभे राज राष्ट्रस्य विप्लवे ॥२॥
लुण्ठने तस्कर भये संग्रामे सलिलप्लवे । समुद्रयान विक्षोभे भूतप्रेतादिजे भये ॥३॥
अपस्मार ज्वर व्याधि मृत्यून्मादादिजे भये । डाकिनी पूतना यक्ष रक्षः कूष्माण्डजे भये ॥४॥
मित्रभेदे ग्रहभये व्यसने चाभिचारके । अन्येष्वपि च दोषेषु मालामन्त्रं स्मरेद् बुधः ॥५॥
सर्वोपद्रव निर्मुक्तः सर्वव्याधि विवर्जितः । सर्वदा पूर्णहृदयः साक्षाच्छिव मयो भवेत् ॥६॥
आपत्काले नित्यपूजां विस्तरात् कर्तुमक्षमः । एकावर्तन मात्रेण चक्रपूजा फलं लभेत् ॥७॥
नवावरण देवीनां ललिताया महौजसः । एकत्र गणना रूपो यन्त्र मन्त्रार्थ गोचरः ॥८॥
सर्वागम रहस्यार्थः स्मरणात् पापनाशिनी । नरेन्द्राणां नारीणां सर्वदेव वशङ्करी ॥९॥
ललिताया महेशान्या मालाविद्या महीयसी । अणिमादि गणैश्वर्यैः रञ्जनी पापभञ्जनी ॥१०॥
तत् तथावरण स्थायिदेवतावृन्द मन्त्रजम् । मालामन्त्रो महादेव्याः सर्वकार्यार्थ सिद्धिदः ॥११॥

इदं स्तोत्रं महादेव्याः सर्वलोक विमोहनम् । सर्वसौख्यप्रदं नृणां सर्वसौभाग्य दायकम् ॥१२॥
अनेनशुद्धशक्ति माला मन्त्र जपाख्येन कर्मणा भगवती राजराजेश्वरी श्रीमहात्रिपुर सुन्दरी प्रीयताम् ।

॥ ॐ तत्सत् श्रीललिता परिशिष्टे उमामहेश्वर संवादे शुद्धशक्तिमाला स्तोत्रं सम्पूर्णम् ॥

॥ अथ खड्गमाला स्तोत्र प्रयोग विधिः॥

खड्गमाला स्तोत्र में सभी आवरण देवताओं की नामावलि है अतः इस स्तोत्र के पाठ से ''श्री यंत्र के यंत्रार्चन का फल प्राप्त होता है''। स्तोत्र में पहले भगवती की १५ नित्याओं का स्मरण कर पश्चात भूपुर से त्रिकोण तक विलोम क्रम से आवरण पूजा दी गई हैं। अर्थात् नित्या पूजन के बाद संहार क्रम का पूजन दिया गया है अतः शत्रुनाश व विघ्ननाश के लिये यह प्रयोग ठीक है परन्तु मेरे अनुभव से अर्थप्राप्ति में यह प्रयोग अधिक उपयुक्त नहीं है। खड्गमाला के अलग अलग प्रयोग साधकों में साधना भेद व प्रांतभेद से अलग अलग प्रचलित है।

(१) स्वशरीर में दिव्य शक्ति हेतु ध्यान एवं न्यास

स्तोत्र के प्रारंभ से रामानंदमयि तक ''**सहस्त्रार**'' में तथा अणिमा सिद्धि से सर्वत्रिखण्डे ''**त्रैलोक्य मोहन चक्र स्वमिनि प्रकटयोगिनी**'' तक शरीर के ''**ब्राह्यान्तर प्रदेश**'' मे आठों दशाओं में ध्यान करें। ''**कामाकर्षिणि**'' से सर्वाशापरिपूरक चक्र स्वमिनि गुप्तयोगिनी का ''**मूलाधारचक्र**'' में तथा ''**अनङ्गकुसुमे**''...... ''**सर्वसंक्षोभण चक्रस्वामिनी गुप्ततरयोगिनि**'' तक ''**स्वाधिष्ठान चक्र**'' में यजन करें। ''**सर्वसंक्षोमिणि चक्रस्वमिनि संप्रदाय योगिनि**'' तक ''**मणिपूर चक्र**'' में एवं सर्वसिद्धिप्रदे सर्वार्थसाधकचक्र स्वामिनि कुलोत्तीर्ण योगिनी तक अनाहत् चक्र में ध्यान करें। ''**सर्वज्ञे सर्वरक्षाकर चक्रस्वमिनि निगर्भयोगिनि**'' का ''**विशुद्धचक्र**'' में वशिनि सर्वरोगहर चक्रस्वातिनि रहस्य योगिनी तक ''**आज्ञा चक्र**'' में पूजन करें पश्चात् अन्यशक्तियों का ''**सहस्त्रार**'' में ध्यान कर मानस पूजा करें।

(२) अथ मासान्त पुरश्चरण प्रयोग विधिः।

यह प्रयोग महिने के शुक्ल पक्ष की प्रतिपदा से मासांत तक ''खड्गमाला प्रयोग'' अधिक प्रचलित है। यदि साधक के पास अधिक समय नहीं है तो इसक्रम से दैनिक पूजन करने से साधना का पूर्ण फल प्राप्त होगा।

''खड्गमाला'' अर्चन प्रयोग के मुख्य ५ अङ्ग है। **(१)आवाहन संबोधन (संबुद्धयन्त) (२) नमोऽन्त (३) स्वाहान्त (४) तर्पणान्त (५) जयान्त**। १५ दिन के ऋषि न्यास सहित प्रयोग विस्तृत है। साधरण प्रयोग इस प्रकार है-

प्रतिदिन एक एक विधिसे प्रयोग करे तो ५ दिन में एकक्रम होता है। प्रथम ५ दिन(प्रतिप्रदा से पंचमी) ''**शक्तिप्रधान**'' होने से ''संकल्प'' में अलग अलग दिन अलग अलग क्रम का उल्लेख करे।

यथा प्रथम दिन-**श्री शक्ति संबुद्धयन्त खड्गमाला प्रयोग महं करिष्ये**। दूसरे दिन- **श्री शक्ति नमोऽन्त खड्गमाला प्रयोग करिष्ये**। तीसरे दिन- **श्री शक्ति स्वाहान्त खड्गमाला प्रयोग महं करिष्ये**। चौथे दिन- **श्री शक्ति जयान्त खड्गमाला प्रयोग महं करिष्ये**। पंचम दिन- **श्री शक्ति जयान्त खड्गमाला प्रयोग महं करिष्ये**।

॥ प्रयोग विधानम्॥

प्रतिप्रदा प्रतिनाम के साथ ''**ह्रीं श्रीं** '' या **ऐं ह्रीं श्रीं** प्रथम उच्चारण कर नाम के बाद आवाहयामि ध्यायामि कह कर हाथ जोड़े।

यथा- **ऐं ह्रीं श्रीं ॐ नमस्त्रिपुर सुंदरि आवाहयामि ध्यायामि।** द्वितीया- **ऐं ह्रीं श्रीं ॐ नमस्त्रिपुर सुंदर्यै नमः पादुकां पूजयामि।** गंधार्चन पुष्पार्चन युक्त पुष्पांजलि देवें। तृतीया- **ऐं ह्रीं श्रीं ॐ नमस्त्रिपुर सुन्दर्यै स्वाहा।** प्रतिनाम हवनकुण्ड में घृत की आहुति देवें। चतुर्थी- ऐं **ह्रीं श्रीं ॐ नमस्त्रिपुरसुन्दरी तर्पयामि।** प्रतिनाम देवता से तर्पण करे। वीराचार से पूजन करं तो जिह्वाग्र स्थित कुलकुण्डालिनी का ध्यान कर उसको अमृत से तर्पण करें। पंचमी- **ऐं ह्रीं श्रीं ॐ नमस्त्रिपु सुन्दरि जय जय।** प्रतिनाम पुष्पांजलि देवे।

"**छष्ठी से दशमी**" शिव तत्व प्रधान पूजा है अतः संकल्प में शक्ति की जगह "**शिव**" का उच्चारण करें। पांच दिनों मे पूर्वोक्त विधि से क्रम करें।

"**एकादशी से पूर्णिमा**" शक्ति शिव उभयात्मक अमुक खड्गमाला प्रयोग महं करिष्ये का उल्लेख करें।

पुनः कृष्ण प्रयोग में ५ दिन का यही क्रम प्रतिप्रदा से पंचमी शिव शक्ति उभयात्मक। षष्ठी से दशमी तक **शिव प्रधान** का संकल्प का उल्लेख कर प्रयोग करें। ५ दिनों की प्रयोग विधि पूर्ववत् ही रहेगी केवल मात्र पाठ के संकल्प का भेद है।

एकादशी से अमावस्या तक **शक्ति प्रधान** का संकल्प करें। शुक्लपक्ष की प्रतिप्रदा से पंचमी तक विधान तरह पांचों दिन का प्रयोग करें।

ललिता देवी पंद्रह दिनों में अपने भिन्न-भिन्न स्वरूपों से अपने अपने कामेश्वर शिव के साथ विग्रह स्वरूप में इस प्रकार है- उनका यजन भी करें यथा-

(१) कामेश्वरीललिता- शिव कामेश्वर। (२) एकला ललिता- एकवीरकामेश्वर। (३) ईश्वरीललिता-ईश्वर कामेश्वर (४) ललितालिलिता- ललितकामेश्वर (५) हृल्लेखाललिता- हृदय कामेश्वर। (६) हलिनीललिता- हलिककामेश्वर। (७) सरस्वतीललिता- सर्वज्ञकामेश्वर (८) कमलाललिता -कालमर्दनकामेश्वर (९) हरिवल्लभा ललिता- हरनाथकामेश्वर (१०) लक्ष्मीललिता- ललज्जिह्वकामेश्वर। (११) हिरण्याललिता- हृदयेश्वर कामेश्वर (१२) सकलजननीललिता- सकलेश्वरकामेश्वर। (१३) कामकोटिललिता- करुणाकरकामेश्वर। (१४) लीलावतीललिता- लावण्यनायककामेश्वर। (१५) हरेश्वरीललिता- हिरण्यबाहुकामेश्वर।

॥ इति खड्गमाला प्रयोगः ॥

॥ श्री षोडशी मातृका ॥

इन मातृकाओं के न्यास वहिर्मातृका न्यास की तरह करें।

कामेशी भगमाला च नित्यक्लिन्ना ततः परम् । भेरुण्डा - वह्निवासिन्यौ वज्रेशी तदनन्तरम् ॥१॥
शिवदूती च त्वरिता ततश्च कुलसुन्दरी । नित्या नीलपताका च विजया सर्वमङ्गला ॥२॥
ज्वालामालिनि चित्रा च महात्रिपुरसुन्दरी । षोडशी मातृकांयाश्च सम्प्रोक्ताः स्वरशक्तयः ॥३॥
ग्रसिनी प्रियवादिन्यौ कराली च कपालिनी । शिवा घोषा च दंष्ट्रा च वीरोमा वाक् प्रदा तथा ॥४॥
नारायणी मोहिनी च प्रज्ञा च शिखिवाहिनी । भीषणा वायुवेगा च भीमा चैव विनायिका ॥५॥
पूर्णा शक्तिश्च कङ्काली कुर्दिनी कालिका तथा । दीपनी च जयन्तिन्या पावनी लम्बिनी तथा ॥६॥
संहारिणी छागली च पूतना मोदिका तथा । परशक्तिस्तथाम्बा च इच्छाशक्तिस्ततः परम ॥७॥
महाकाली च सम्प्रोक्ता व्यभ्जनानां च शक्तयः ।

॥ श्री बालात्रिपुरसुन्दरी कवचम् ॥

॥ श्री भैरवी उवाच ॥

देवदेव! महादेव! भक्तानां प्रीतिवर्द्धन! सूचितं यत् त्वया देव्याः कवचं कथयस्व मे ॥१॥

॥ श्री भैरव उवाच ॥

शृणु देवि! प्रवक्ष्यामि कवचं देवदुर्लभम् । अप्रकाश्यं परं गुह्यं साधकाभीष्ट सिद्धिदम् ॥२॥

विनियोगः – **अस्य श्री बालात्रिपुरसुन्दरी कवचस्य श्री दक्षिणामूर्ति ऋषिः, पंक्तिश्छंदः श्री बालात्रिपुरसुन्दरी देवता, ऐं बीजं, सौः शक्ति, क्लीं कीलकं, चतुर्वर्ग साधने पाठे विनियोगः।**

ऋष्यादिन्यासः – **श्रीदक्षिणामूर्ति ऋषये नमः शिरसि। पंक्तिश्छंदसे नमः मुखे। श्री बालात्रिपुरसुन्दरी देवतायै नमः हृदि।, ऐं बीजाय नमो गुह्ये, सौः शक्तये नमो नाभौ, क्लीं बीजाय नमः पादयोः, चतुर्वर्ग साधने पाठे विनियोगाय नमः सर्वाङ्गेषु।**

षडङ्गन्यासः	करन्यास	अङ्गन्यासः
ऐं	**अंगुष्ठाभ्यां नमः**	**हृदयाय नमः**
क्लीं	**तर्जनीभ्यां नमः**	**शिरसे स्वाहा**
सौः	**मध्यमाभ्यां नमः**	**शिखायै वषट्**
ऐं	**अनामिकाभ्यां नमः**	**कवचाय हुँ**
क्लीं	**कनिष्ठिकाभ्यां नमः**	**नेत्रत्रयाय वौषट्**
सौः	**करतलकर पृष्ठाभ्यां नमः**	**अस्त्राय फट्**

॥ ध्यानम् ॥

मुक्ताशेखर – कुण्डलाङ्गद मणि – ग्रैवेय – हारोर्मिका
विद्योतद् वलयादि कङ्कणकटिसूत्रां स्फुरन् नूपुराम् ।
माणिक्योदर बन्धकम्बु कबरीमिन्दोः कलां विभ्रतीं
पाशं चांकुश पुस्तकाक्ष वलयं दक्षोर्ध्व बाह्वादितः ॥

मानसोपचारैः सम्पूज्य कवचं पठेत् –

ऐं वाग्भवं पातु शीर्षं क्लीं कामस्तु तथा हृदि । सौः शक्तिबीजं च पातु नाभौ गुह्ये च पादयोः ॥१॥
ऐं क्लीं सौः वदने पातु बाला मां सर्वसिद्धये । हसकलह्रीं सौः पातु भैरवी कण्ठदेशतः ॥२॥
सुन्दरी नाभि देशेऽव्याच्छीर्षिका सकला सदा । भ्रू नासयोरन्तराले महात्रिपुरसुन्दरी ॥३॥
ललाटे सुभगा पातु भगा मां कण्ठदेशतः । भगा देवी तु हृदये उदरे भगसर्पिणी ॥४॥
भगमाला नाभिदेशे लिङ्गे पातु मनोभवा । गुह्ये पातु महादेवी राजराजेश्वरी शिवा ॥५॥
चैतन्यरूपिणी पातु पादयोर्जगदम्बिका । नारायणी सर्वगात्रे सर्वकार्ये शुभङ्करी ॥६॥
ब्रह्माणी पातु मां पूर्वे दक्षिणे वैष्णवी तथा । पश्चिमे पातु वाराही उत्तरे तु महेश्वरी ॥७॥
आग्नेय्यां पातु कौमारी महालक्ष्मीश्च नैर्ऋते । वायव्यां पातु चामुण्डा इन्द्राणी पातु चेशके ॥८॥

जले पातु महामाया पृथिव्यां सर्वमङ्गला । आकाशे पातु वरदा सर्वतो भुवनेश्वरी ॥९॥

॥ फलश्रुति ॥

इदं तु कवचं नाम देवानामपि दुर्लभम् । पठेत् प्रातः समुत्थाय शुचिः प्रयत मानसः ॥१०॥
नाधयो व्याधयस्तस्य न भयं च क्वचिद् भवेत् । न च मारीभयं तस्य पातकानां भयं तथा ॥११॥
न दारिद्र्यवशं गच्छेत् तिष्ठन्मृत्यु वशे न च । गच्छेच्छिवपुरे देवि! सत्यं सत्यं वदाम्यहम् ॥१२॥
इदं कवचमज्ञात्वा श्रीविद्यां यो जपेच्छिवे । स माप्नोति फलं तस्य प्राप्नुयाच्छस्त्र घातनम् ॥१३॥

॥ इति श्रीरुद्रयामल तन्त्रे भैरव-भैरवी संवादे श्रीबाला त्रिपुरसुन्दरी कवचम् ॥

॥ श्री बालात्रिपुरसुन्दरी स्तोत्रम् ॥

॥ श्री भैरव उवाच ॥

अधुना देव! बालाया स्तोत्रं वक्ष्यामि पार्वति । पञ्चमाङ्गं रहस्यं मे श्रुत्वा गोप्यं प्रयत्नतः ॥

विनियोगः – **अस्य श्री बालात्रिपुरसुन्दरी स्तोत्र मन्त्रस्य श्री दक्षिणामूर्ति ऋषिः, पंक्तिश्छंदः श्री बालात्रिपुरसुन्दरी देवता, ऐं बीजं, सौः शक्ति, क्लीं कीलकं, श्री बालाप्रीतये पाठे विनियोगः।**

ऋष्यादिन्यासः – **श्रीदक्षिणामूर्ति ऋषये नमः शिरसि। पंक्तिश्छंदसे नमः मुखे। श्री बालात्रिपुरसुन्दरी देवतायै नमः हृदि।, ऐं बीजाय नमः गुह्ये, सौः शक्तये नमः नाभौ, क्लीं कीलकाय नमः पादयोः, श्री बालाप्रीतये पाठे विनियोगाय नमः सर्वाङ्गे।**

षडङ्गन्यासः	करन्यास	अङ्गन्यासः
ऐं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
क्लीं	तर्जनीभ्यां नमः	शिरसे स्वाहा
सौः	मध्यमाभ्यां नमः	शिखायै वषट्
ऐं	अनामिकाभ्यां नमः	कवचाय हुँ
क्लीं	कनिष्ठिकाभ्यां नमः	नेत्रत्रयाय वौषट्
सौः	करतलकर पृष्ठाभ्यां नमः	अस्त्राय फट्

॥ ध्यानम् ॥

अरुण – किरणजालै रञ्जिताशावकाशा । विधृतजप वटीका पुस्तकाभीतिहस्ता ।
इतरकरवराढ्या फुल्लकह्लारसंस्था । निवसतु हृदि बाला नित्यकल्याणरूपा ॥

मानसोपचारैः संपूज्य स्तोत्रं पठेत् –

वाणीं जपेद् यस्त्रिपुरे भवान्या बीजं निशीथे जड़भावलीनः ।
भवेत् स गीर्वाण गुरोर्गरीयान् गिरीशपत्नि! प्रभुतादि तस्य ॥१॥

कामेश्वरि! त्र्यक्षरी कामराजं जपेद् दिनान्ते तव मन्त्रराजम् ।
रम्भाऽपि जृम्भारिसभां विहाय भूमौ भजेत् तं कुलदीक्षितं च ॥२॥

तार्तीयकं बीजमिदं जपेद् यस्त्रैलोक्य मातस्त्रिपुरे! पुरस्तात् ।
विधाय लीलां भुवने तथान्ते निरामयं ब्रह्मपदं प्रयाति ॥३॥
धरासद्म - त्रिवृत्ताष्ट - पत्र षट्कोण नागरे !
विन्दुपीठेऽर्चयेद् बालां योऽसौ प्रान्ते शिवो भवेत् ॥४॥
इति मन्त्रमयं स्तवं पठेद् यस्त्रिपुराया निशि वा निशावसाने ।
स भवेद् भुवि सार्वभौम मौलिस्त्रिदिवे शक्र - समान - शौर्यलक्ष्मी ॥५॥
इतीदं देवि! बालाया स्तोत्रं मन्त्रमयं परम् ।
अदातव्यमभक्तेभ्यो गोपनीयं स्वयोनिवत् ॥६॥

॥ इति श्रीरुद्रयामले तन्त्रे भैरव-भैरवी संवादे श्रीबाला त्रिपुरसुन्दरी स्तोत्रम् ॥

॥ श्री सौभाग्य कवच स्तोत्रम् ॥

कैलास शिखरे रम्ये सुखासीनं सुरार्चितम्, गिरीशं गिरिजा स्तुत्वा स्तोत्रैर्वेदान्त पारगैः ।
प्रणम्य परया भक्त्या तमपृच्छत् कृतांजलिः, रहस्यं रक्षणं किं वा सर्व सम्पत्करं वद ॥१॥

॥ श्रीशिवोवाच ॥

शृणु देवि! प्रवक्ष्यामि यस्मात् त्वं परिपृच्छसि, यस्य श्रवण मात्रेण भवभीतिर्न जायते ।
एतत् सौभाग्य कवचं रहस्याति रहस्यकम्, सौभाग्यकवचं देवि! शृणु सौभाग्यदायकम् ॥२॥

विनियोगः :- ॐ अस्य श्रीसौभाग्य कवच स्तोत्रस्य श्रीआनन्द भैरवो ऋषिः। अनुष्टुप् छन्दः। श्रीसौभाग्य सुन्दरी देवता। ॐ क्लीं सौः बीजं। ह्रीं क्लीं शक्तिः। आं ह्रीं क्रों कीलकं। सर्वसौभाग्य सिद्ध्यर्थे पाठे विनियोगः।

ऋष्यादिन्यास :- शिरसि श्रीआनन्दभैरवाय ऋषये नमः। मुखे अनुष्टुप्छन्दसे नमः। हृदि श्री सौभाग्यसुन्दरी देवतायै नमः। गुह्ये ॐ क्लीं सौः बीजाय नमः। पादयो ह्रीं क्लीं शक्तये नमः। नाभौ आं ह्रीं क्रों कीलकाय नमः। सर्वाङ्गे सर्व सौभाग्य सिद्ध्यर्थे पाठे विनियोगाय नमः।

षडङ्गन्यासः	करन्यासः	अङ्गन्यासः
ऐं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
क्लीं	तर्जनीभ्यां नमः	शिरसे स्वाहा
सौः	मध्यमाभ्यां नमः	शिखायै वषट्
ऐं	अनामिकाभ्यां नमः	कवचाय हुम्
क्लीं	कनिष्ठिकाभ्यां नमः	नेत्रत्रयाय वौषट्
सौः	करतल करपृष्ठाभ्यां नमः	अस्त्राय फट्

॥ ध्यानम् ॥

ऐहिक परफलदात्रीमैशानीं मानसी भावये मुद्राम् ।
ऐन्दव - कलावतंसामैश्वर्य स्फुरण परिणतिं जगताम् ॥१॥

क्लीवत्व - दैत्यहन्त्रीं क्लिन्न मनस्कां महेश्वराश्लिष्टाम् ।
क्लृप्त जनेष्टकर्त्रीं कल्पित लोकप्रभां नमामि कलाम् ॥२॥
सौभाग्यदिव्यक - निधिं सौरभ कचवृन्द विचलदलिमालाम् ।
सौशील्यशेष तल्पां सौन्दर्यविभा - मंजरीं कलये ॥३॥
पाशपाणि सृणि पाणि भावये चापपाणि शरपाणि दैवतम् ।
यत्प्रभा पटल - पाटलं जगत् - पद्मरागमणिमण्डपायते ॥४॥
हेमाद्रौ हेमपीठ - स्थितामखिल - सुरैरीड्यमानां विराजत् ।
पुष्पेष्विष्वास पाशांकुश करकमलां रक्तवेषाति - रक्ताम् ॥५॥
दिक्षूद्यद्भिश्चतुर्भिर्मणिमय - कलशैः पञ्च शक्त्याञ्चितैः ।
स्वभ्रष्टैः क्लृप्ताभिषेकां भजत भगवतीं भूतिदामन्त्य यामे ॥६॥

॥ कवच स्तोत्रम् ॥

शिखाग्रं सततं पातु ममत्रिपुर सुन्दरी । शिरः कामेश्वरी नित्या तत् पूर्वं भगमालिनी ॥१॥
नित्य क्लिन्नाऽवताद्दक्षं भेरुण्डा तस्य पश्चिमम् । वह्नि वासिन्यवेद् वामं मुखं विद्येश्वरी तथा ॥२॥
शिवदूती ललाटं मे त्वरिता तस्य दक्षिणम् । तद्वाम पार्श्वमवतात् तथैव कुलसुन्दरी ॥३॥
नित्या पातु भ्रुवोर्मध्यं भ्रुवं नीलपताकिनी । वामभ्रुवं तु विजया नयनं सर्वमङ्गला ॥४॥
ज्वालामालिन्यक्षि वामं चित्रा रक्षत् पक्ष्मणी । दक्ष श्रोत्रं महानित्या वामं पातु महोद्यमा ॥५॥
दक्षं वामं च वटुका कपोलौ क्षेत्रपालिका । दक्षनासा पुटं दुर्गा तदन्यं तु भारती ॥६॥
नासिकाग्रं सदा पातु महालक्ष्मीर्निरन्तरम् । अणिमा दक्षकटिं महिमा च तदन्यकम् ॥७॥
दक्ष गण्डं च गरिमा लघिमा चोत्तरं तथा । ऊर्ध्वोष्ठकं प्राप्तिसिद्धिः प्राकाम्यमधरोष्ठकम् ॥८॥
ईशित्वमूर्ध्व - दन्तांश्च ह्यधो दन्तान् वशित्वकम् । रस सिद्धिश्च रसनां मोक्ष सिद्धिश्च तालुकम् ॥९॥
तालुमूलद्वयं ब्राह्मी माहेश्वर्यौ च रक्षताम् । कौमारी चिबुकं पातु तदधः पातु वैष्णवी ॥१०॥
कण्ठं रक्षतु वाराही चैन्द्राणी रक्षतादधः । कृकाटिकां तु चामुण्डा महालक्ष्मीस्तु सर्वतः ॥११॥
सर्वसंक्षोभिणीमुद्रा स्कन्धं रक्षतु दक्षिणम् । तदन्यं द्राविणीमुद्रा पायादंस द्वयं क्रमात् ॥१२॥
आकर्षणी वश्यमुद्रा चोन्मादिन्यथ दक्षिणम् । भुजं महांकुशा वामं खेचरी दक्ष - कक्षकम् ॥१३॥
वाम कक्षं बीजमुद्रा योनिमुद्रा तु दक्षिणम् । लसत् त्रिखण्डिनीमुद्रा वामभागं प्रपालयेत् ॥१४॥
श्रीकामाकर्षिणी नित्या रक्षताद् दक्षकूर्परम् । कूर्परं वाममवतात् सा बुद्ध्याकर्षिणी तथा ॥१५॥
अहङ्काराकर्षिणी तु प्रकाण्डं पातु दक्षिणम् । शब्दाकर्षिणिका वामं स्पर्शाकर्षिणिकाऽवतु ॥१६॥
प्रकोष्ठं दक्षिणं पातु रूपाकर्षिणिकेतरम् । रसाकर्षिणिका पातु मणिबन्धं च दक्षिणम् ॥१७॥
गन्धाकर्षिणिका वामं चित्ताकर्षिणिकाऽवतु । करभं दक्षिणं धैर्याकर्षिणी पातु वामकम् ॥१८॥

स्मृत्याकर्षिण्यसौ वामं नामाकर्षिणिकेतरम् । बीजाकर्षिणिका पायात् सततं दक्षिणांगुलीः ॥१९॥
आत्माकर्षिणिका त्वन्या अमृताकर्षिणी नखान् । शरीराकर्षिणी वाम नखान् रक्षतु सर्वदा ॥२०॥
अनङ्गकुसुमा शक्तिः पातु दक्षिण स्तनोपरि । अनङ्गमेखला चान्य स्तनोर्ध्वमभि रक्षतु ॥२१॥
अनङ्ग मदना दक्षस्तनं तच्चूचुकं पुनः । रक्षतादनिशं देवी ह्यनङ्ग मदनातुरा ॥२२॥
अनङ्गरेखा वामं तु वक्षोजं तस्य चूचुकम् । अनङ्गवेगिनी क्रोडमनङ्गास्यांकुशाऽवतु ॥२३॥
अनङ्गमालिनी पायाद् वक्षःस्थलमहर्निशम् । सर्वसंक्षोभिणी शक्तिहृत् सर्वद्राविणी परा ॥२४॥
कुक्षिं सर्वाकर्षिणी तु पातु पार्श्वं च दक्षिणम् । आह्लादिनी वाम पाशर्वं मध्यं सम्मोहिनी चिरम् ॥२५॥
सा सर्व स्तम्भिनी पृष्ठं नाभिं वै सर्वजृम्भिणी । वशङ्करी वस्तिदेशं सर्वरंजिनी मे कटिम् ॥२६॥
सा तु सर्वोन्मादिनी मे पायाज्जघन मण्डलम् । सर्वार्थसाधिनी शक्तिः नितम्बं रक्षतान्मम ॥२७॥
दक्ष स्फिचं सदा पांतु सर्वसम्पत्ति पूरिणी । सर्वमन्त्रमयी शक्तिः पातु वाम स्फिचं मम ॥२८॥
पायात् कुकुन्दर द्वन्दं सर्वद्वन्द्वक्षयङ्करी । सर्वसिद्धिप्रदा देवी पातु दक्षिण वंक्षणम् ॥२९॥
सर्व सम्पत्प्रदा देवी पातु मे वाम वंक्षणम् । सर्वप्रियङ्करी देवी गुह्यं रक्षतु मे सदा ॥३०॥
मेढ्रं रक्षतु मे देवी सर्वमङ्गलकारिणी । सर्वकामप्रदा देवी पातु मुष्कं तु दक्षिणम् ॥३१॥
पायात् तदन्यमुष्कं तु सर्वदुःख - विमोचिनी । सर्वमृत्युप्रशमनी देवी पातु गुदं मम ॥३२॥
पातु देवी गुह्य मध्यं सर्वविघ्ननिवारिणी । सर्वाङ्गसुन्दरी देवी रक्षताद् दक्ष सक्थिकम् ॥३३॥
वाम सक्थि तलं पायात् सर्वसौभाग्य दायिनी । अष्ठीवं मम सर्वज्ञा देवी रक्षतु दक्षिणम् ॥३४॥
वामाष्ठीवं सर्वशक्तिः देवी पातु युगं मम । सर्वैश्वर्यप्रदा देवी दक्ष जानुं सदाऽवतु ॥३५॥
सर्वज्ञानमयी देवी जानुमन्यं ममावतात् । अव्याद् देवी दक्ष जङ्घां सर्वव्याधिविनाशिनी ॥३६॥
तदन्यां पातु देवी सा सर्वाधार स्वरूपिणी । सर्व पापहरा देवी गुल्फं रक्षतु दक्षिणम् ॥३७॥
सर्वानन्दमयी देवी वाम गुल्फं सदाऽवतु । पार्ष्णि मे दक्षिणं पायात् सर्व रक्षास्वरूपिणी ॥३८॥
अव्यात्सदा सदापार्ष्णि सर्वेप्सित फल प्रदा । दक्षांघ्रि पार्श्वं वशिनी पूर्व वाग् देवता मम ॥३९॥
सर्वं कामेश्वरी चोर्ध्वमधो वाग् देवता मम । मोदिनी प्रपदं पातु विमला दक्षिणेतरे ॥४०॥
अंगुलीररुणा पातु दक्षपाद नखोज्ज्वजा । तदन्या जयिनी पातु सदा सर्वेश्वरी मम ॥४१॥
दक्ष वामपादतलं कौलिनी देवता मम । कुर्वन्तु जृम्भणा बाणाः त्रैलोक्याकर्षणं मम ॥४२॥
मोहं संहरतादिक्षु कोदण्डं भृङ्गमौविक्रम् । करोतु सततं पाशो वशीकरणमद्भुतम् ॥४३॥
विदध्यादंकुशं नित्यं स्तम्भनं शत्रु सङ्कटे । पीठं मे कामरूपाख्यं पातु कामान्तिकं मनः ॥४४॥
पूर्णं पूर्णगिरेः पीठं कान्तिं मे जनयेत् सदा । जालन्धरमन्य जालन्धर पीठं मे रक्षतु ॥४५॥
सायुज्ये नियतां प्रज्ञां श्रीपीठं श्रीकरं मम । कामेश्वरी त्वात्मतत्त्वं रक्षेद् वज्रेश्वरी तथा ॥४६॥
विद्यातत्त्वं शैवतत्त्वं पायाच्छ्रीभगमालिनी । कामं विद्यान्महाशत्रूनमृतार्णव मानसम् ॥४७॥

क्रोधं क्रोधापहा हन्यान्मन्युं पैताम्बुजासनम् । लोभ चिदासनं हन्याद् देव्यात्मामृतरूप भाक् ॥४८।
मोहं संहरताच्चक्रं मदं मन्त्रासनं मम । मात्सर्यं नाशयेन्नित्यं मम सान्ध्यासनं तथा ॥४९॥
आधारं त्रिपुरा रक्षेत् स्वाधिष्ठानं पुरेश्वरी । मणिपूरं मणिद्योता पायात् त्रिपुरसुन्दरी ॥५०॥
अव्यादनाहतं भव्या नित्यं त्रिपुरवासिनी । विशुद्धिं त्रिपुरा श्रीश्च आज्ञां त्रिपुरमालिनी ॥५१॥
इडां मे त्रिपुरसिद्धा त्रिपुराचापि पिङ्गलाम् । सुषुम्नां पातु मे नित्या पायात् त्रिपुरभैरवी ॥५२॥
त्रैलोक्यमोहनं चक्रं रोम कूपांश्च रक्षतु । सर्वाशापूरकं चक्रं सप्तधातुँश्च रक्षतु ॥५३॥
सर्वसंक्षोभणं चक्र प्राणाद्यं वायु पञ्चकम् । सौभाग्यदायकं चक्रं नागाद्यनिल पञ्चकम् ॥५४॥
सर्वार्थसाधकं चक्रं कारणानां चतुष्टयम् । सर्वरक्षाकरं चक्रं रक्षतान्मे गुणत्रयम् ॥५५॥
सर्वरोगहरं चक्रं पायात् पुर्यष्टकं मम । सर्वसिद्धिप्रदं चक्रमव्यान्मे कोश पञ्चकम् ॥५६॥
सर्वानन्दमयं चक्रं यशः कीर्ति च रक्षतु । सौन्दर्यं मन्मथः पायाद् धृतिश्चापि रतिं मम ॥५७॥
प्रीतिं मे पातु या प्रीतिः रूपं पातु वसन्तकः । संकल्पं कल्पकोद्यानं महालक्ष्मी श्रियं मम ॥५८॥
कान्तिं कपालिनी रक्षेत् मन्दिरं मणिमण्डपः । पुत्रान् शङ्खनिधिः पायाद् भार्यां पद्मनिधिस्तथा ॥५९॥
मार्गे क्षेमङ्करी रक्षेत् मातङ्गी मुकुटं तथा । योगिनी प्रकटाद्यास्ता नव द्वाराणि पान्तु मे ॥६०॥
भोजने मामन्नपूर्णा मातङ्गी क्रीडनेऽवतात् । वने रक्षतु मां दुर्गा जाग्रती दुष्टनिग्रहे ॥६१॥
त्रिधाऽहङ्कार नैष्ठुर्य दोषत्रयं मलत्रयम् । डाकिन्यो योगिनी मुख्याः संहरन्तु ममानिशम् ॥६२॥
इच्छा शक्तिर्गुरोर्भक्तिं पातु मे ज्ञानमात्मनि । ज्ञानशक्तिः क्रियाशक्तिर्वैराग्य विषयेष्वपि ॥६३॥
हृत्- पद्मकर्णिका मध्ये ह्रींकारी परिरक्षतु । वैखरी श्रवणं पातु मध्यमा मननं पुनः ॥६४॥
योगं रक्षतु पश्यन्ती साक्षात् ज्ञानपरा मम । ब्रह्माणी जागृतं पातु शयानं वैष्णवी तथा ॥६५॥
सुषुप्तौ चण्डिका पातु तुर्या मे मोहकारिणी । सदा मां भैरवी पातु जगद्- भरण- पण्डिता ॥६६॥
चरणाम्भोरुहानन्द परामृत - रसेरिता । प्लाविनी कुण्डली पूर्णा अन्तरान्तं सदाऽवतात् ॥६७॥
अष्टदिक्षु महेन्द्राद्या सायुधाः पान्तु सर्वदा । पायादूर्ध्वां दिशं ब्रह्मा विष्णुश्चक्रायुधोप्यधः ॥६८॥
अनावृत्तानि स्थानानि कवचेन तु यानि मे । तानि सर्वाणि रक्षन्तु शिवाद्या गुरुवः सदा ॥६९॥
एतत् सौभाग्य कवचं शाङ्करं यस्तु पाठयेत् । त्रिसन्ध्यं यः पठेद् भक्त्या शृणुयाद् वा समाहित : ॥१॥
तस्य शीघ्रेण सिध्यन्ति सिद्धयस्त्वणिमादयः । गुटिका पादुकाद्यष्ट सिद्धयः सम्भवन्ति च ॥२॥
वश्यादीन्यष्ट कर्माणि योगश्चाष्टाङ्ग संयुतः । ब्रह्मा विष्णु गिरीशेन्द्र कन्दर्प रतिभिः सह ॥३॥
विचरन्ते तदखिलान् सिद्ध गन्धर्व सेविताः । तस्य स्मरण मात्रेण ग्रह भूत पिशाचकाः ॥४॥
कीटवत् पलायन्ते कूष्माण्डा भैरवादयः । तस्यांघ्रि तोय पतनात् प्रशाम्यति महारुजाः ॥५॥

तत् पाद कमलासक्तरजो लेशाभिः मर्शनात् ।
वश्यं भवति शीघ्रेण त्रैलोक्यं स चराचरम् ।
आबाल महिला भूपाः किमू माया विमोहिताः ॥६॥

॥ श्रीललिता हृदय स्तोत्रम् ॥

॥ अगस्त्य उवाच ॥

हयग्रीव! दया सिन्धो! ललितायाः शुभं मम । हृदयं च महोत्कृष्टं कथयस्व महामुने ॥१॥

॥ हयग्रीव उवाच ॥

शृणु त्वं शिष्य! वाक्यं मे हृदयं कथयामि ते । महादेव्यास्तथा शक्तेः प्रीतिसम्पाद कारकम् ॥२॥
बीजात्मकं महामन्त्र रूपकं परमं निजम् । कामेश्वर्याः स्वाङ्गभूतं डामर्यादिभिरावृतम् ॥३॥
कामाकर्ष्यादि संयुक्तं पञ्चकाम- दुघान्वितम् । नववल्लि समायुक्तं कादि हादि मतान्वितम् ॥४॥
त्रिकूट दर्शितं गुप्तं हृदयोत्तममेव च । मूलप्रकृति व्यक्तादि कला शोधन कारकम् ॥५॥
विमर्श - रूपकं चैव विद्या शक्ति षडङ्गकम् । षडध्व मार्ग पीठस्थं सौर शाक्तादि संज्ञकम् ॥६॥
अभेद - भेदनाशं च सर्व वाग्वृत्ति दायकम् । तत्त्वचक्र मयं तत्त्व बिन्दु नाद कलान्वितम् ॥७॥
प्रभायन्त्र समायुक्तं मूलचक्र मयान्वितम् । कण्ठशक्ति मयोपेतं भ्रामरी शक्तिरूपकम् ॥८॥

विनियोग :- ॐ अस्य श्रीललिता हृदयस्तोत्रमाला मन्त्रस्य श्रीआनन्द भैरव ऋषिः । अमृत विराट् छन्दः । श्रीललिता वाग्देवता प्रसाद सिद्धये जपे विनियोगः ।

ऋष्यादि न्यासं कृत्वा कर सम्पुटे कूटत्रयं द्विरावृत्य षडङ्गद्वयम् कुर्यात् ।

॥ ध्यानम् ॥

द्रां द्रीं क्लीं बीजरूपे, हासित कह कहे, ब्रह्म देहान्तरङ्गे !
ब्लूं सः क्रों वर्णमाले, सुरगणनमिते, तत्त्व रूपे! हसखफ्रें ॥
ह्सां ह्सीं ह्सौं बीजरूपे, परमसुख करे, वीर मातः! स्वयम्भूः ।
ऐं हसखफ्रें बीजतत्त्वे, कलित कुल कले! ते नमः शुद्ध वीरे ॥

इति ध्यात्वा मनसा पञ्चधोपचर्य नवमुद्राः प्रदर्श्य, मूलं त्रिवारं जप्त्वा योनि मुद्रया प्रणमेत् ।

॥ स्तोत्रम् ॥

हृदयाम्बुज - मध्यस्था ब्रह्मात्मैक्य प्रदायिनी । त्रिपुराम्बा त्रिकोणस्था पातु मे हृदयं सदा ॥१॥
अवर्ण- मालिका शक्तिर्वर्णमाला स्वरूपिणी । नित्याऽनित्या तत्त्वगा सा निराकार मयान्विता ॥२॥
शब्द ब्रह्ममयी शब्द बोधाकार स्वरूपिणी । सांविदी वादि संसेव्या सर्व श्रुतिभिरीडिता ॥३॥
महावाक्योपदेशानी स्वर नाडी - गुणान्विता । ह्लींकारचक्र मध्यस्था ह्लीमुद्यान विहारिणी ॥४॥
ह्लीं मोक्षकारिणी ह्लीं ह्लीं, महाह्लींकार - धारिणी । कालकण्ठी महादेवी कुरुकुल्ला कुलेश्वरी ॥५॥
ऐं ऐं प्रकाशरूपेण, ऐं बीजान्तर वासिनी । ईशस्था ईदृशी चेशी ईं ईं बीजकरी तथा ॥६॥
लक्ष्मीनारायणान्तःस्था लक्ष्यालक्ष्यकरी तथा । शिवस्था हेतिवर्णस्था सशक्तेवर्ण - रूपिणी ॥७॥
कमलस्था कलामाला ह्लां ह्लीं ह्लीं ह्लीं मुखी तथा । लावण्यसुन्दरी पातु लक्ष्यकोणाग्रमन्विता ॥८॥
लांलांलींलीं सुरैः स्तुत्या सांसींसूंसैं सुरार्चिता । कां कीं कूं काकिनी सेव्या लां लीं लूं काकिनीस्तुता ॥९॥

बिन्दुचक्रेश्वरी पातु द्वितीयावर्ण - देवता । वसु कोणेश्वरी देवी द्विदशारेश्वरी च माम् ॥१०॥
मन्वस्त्रचक्रमध्यस्था नागपत्रेश्वरी सदा । षोडशारेश्वरी नित्या मण्डलत्रयदेवता ॥११॥
भूपुरत्रयमध्यस्था द्वादशग्रन्थि भेदिनी । हंसी हसी सुबीजस्था हरिद्रादिभिरर्चिता ॥१२॥
अनन्तकोटि जन्मस्था जन्माजन्मत्ववर्जिता । अमृताम्भोधिमध्यस्था अमृतेशादिसेविता ॥१३॥
मृतामृतकरी मूलविराट् शक्तिः परात्मिका । आत्मनं प ातु मे नित्यं तथा सर्वाङ्गमेव च ॥१४॥
अष्टदिक्षु कराली सा ऊर्ध्वाधः प्रान्तके तथा । गुरुशक्तिमहाविद्या गुरुमण्डलगामिनी ॥१५॥
सर्वचक्रेश्वरी सर्वब्रह्मादिभिः सुवन्दिता । सत्त्वशक्तिः रजःशक्तिस्तमःशक्ति परात्मिका ॥१६॥
प्रपञ्चेशी सुकालस्था महावेदान्त गर्भिता । कूटस्था कूटमध्यस्था कूटाकूटविवर्जिता ॥१७॥
योगाङ्गी योगमध्यस्था अष्टयोग प्रदायिनी । नवशक्तिः कृती माता अष्टसिद्धि स्वरूपिणी ॥१८॥
नववीरावली रम्या मुक्तिकन्या मुकुन्दगा । उपदेशकरी विद्या महामुख्यविराजिता ॥१९॥
मुख्याऽमुख्या महामुख्या मूल बीज प्रवर्तिका । दिक्पालकाः सदापान्तु श्रीचक्राधि देवताः ॥२०॥
दिग्योगिन्यष्टकं पातु तथा भैरव चाष्टकम् । षडङ्गदेवताः पान्तु नित्या षोडशिकास्तथा ॥२१॥
नाथशक्तिः सदापातु नित्या त्रिकोणान्तर दीपिका । त्रिसारा त्रयकर्माणी नाशिनी त्रयं दर्शति ॥२२॥
त्रिकाला शोषणी शोषकारिणी शोषणेश्वरी । भुक्तिमुक्तिप्रदा बाला भुवनाम्बा बगलेश्वरी ॥२३॥
अतृप्तिस्तृप्ति सन्तुष्टा तृप्ता तृप्तकरी सदा । आम्नायशक्तयः पान्तु आदिशेष - सुतल्पिनी ॥२४॥
राज्यं त्वं देहि मे नित्यं आदिशम्भुस्वरूपिणी । सर्वरोगहरा सर्वकैवल्यपद दायिनी ॥२५॥

॥फलश्रुति॥

इदं तु हृदयं दिव्यं ललिता प्रीतिदायकम् । अनेन च समं नास्ति स्तोत्रं प्रख्यात वैभवम् ॥२६॥
शक्तिरूपं शक्तिगुप्तं प्रकटाङ्गं प्रभुं शुभम् । मूलविद्यात्मकं मूलब्रह्मसम्भव कारणम् ॥२७॥
नादादिशक्ति संयुक्तमभूतमद्भुतं महत् । रोगहं पापहं विघ्ननाशनं विघ्नहारिणम् ॥२८॥
चिरायुष्यप्रदं सर्वमृत्यु दारिद्र्यनाशनम् । क्रोधहं मुक्तिदं मुक्तिदायकं परं मे सुखम् ॥२९॥
रुद्रदं मृडपं विष्णुं दण्डकं ब्रह्मरूपकम् । विचित्रं च सुचित्रं च सुन्दरं च सुगोचरम् ॥३०॥
नाभक्ताय न दुष्टाय नाविश्वस्ताय देशिकः । न दापयेत् परंविद्याहृदयं मन्त्र गर्भितम् ॥३१॥
स्तोत्राणामुत्तमं स्तोत्रं मन्त्राणामुत्तमं मनुम् । वीजानामुत्तमं बीजं शाक्तानामुत्तमं शिवम् ॥३२॥
पठेद् भक्त्या त्रिकालेषु अर्धरात्रे तथैव च । वाक् सिद्धि दायकं नित्यं परविद्याविमोहकम् ॥३३॥
स्वविद्यास्थापकं चान्यद् यन्त्रतन्त्रादिभेदनम् । कृत्तिका नक्षत्र कूर्माख्ये चक्र स्थित्वा जपेन्मनुम् ॥३४॥

॥ इति श्रीमहत्तरयोनि विद्याया महातन्त्रे श्रीललिता हृदयं सम्पूर्णम् ॥

॥ श्रीललिता सौभाग्य प्रदाष्टोत्तर शतनाम स्तोत्रम् ॥

विनियोगः – ॐ अस्य श्रीसौभाग्याष्टोत्तर शतनाम स्तोत्रस्य श्रीभार्गव ऋषिः, अनुष्टुप् छन्दः, क-५ कएईल ह्रीं बीजं, स-४ सकल ह्रीं शक्तिः, ह-६ हसकहल ह्रीं उत्कीलनं, श्रीललिताम्बा देवता प्रसाद सिद्धये पाठे विनियोगः।

ऋष्यादि न्यासः :- श्रीभार्गव ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। श्रीललिताम्बादेवतायै नमः हृदयाय। कएईल ह्रीं बीजाय नमः लिङ्गे। सकलह्रीं शक्तये नमः नाभौ। हसकहल ह्रीं उत्कीलनाय नमः सर्वाङ्गे। श्रीललिताम्बा प्रसाद सिद्धये पाठे विनियोगाय नमः अंजलौ।

मूल मंत्र से षडङ्ग न्यासादि कर ध्यान करे। यथा –

बालार्क - मण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।
पाशांकुश धनुर्वाणन् धारयन्तीं शिवां भजे ॥

ध्यान कर मानस पूजा करे। योनि मुद्रा से प्रणाम कर स्तोत्र पढ़ें। यथा –

ऐं ह्रीं श्रीं ॐ कामेश्वरीकामशक्तिः कामसौभाग्यदायिनी। कामरूपाकामकला कामिनी कमलासना ॥१॥
कमला कलना हीना कमनीया कलावती । पद्मपा भारती सेव्या कल्पिताऽशेष संस्थितिः ॥२॥
अनुत्तराऽनघाऽनन्ताऽद्भुत रूपाऽनलोद्भवा । अतिलोक चरित्राऽतिसुन्दर्यति - शुभप्रदा ॥३॥
विश्वाद्या चातिविस्ताराऽर्चन - तुष्टाऽमितप्रभा । एक - रूपैक वीरैक नाथैकान्तार्चन प्रिया ॥४॥
एकैक - भावतुष्टैक रसैकान्त जनप्रिया । एधमानप्रभा वैध भक्तपातकनाशिनी ॥५॥
एलामोद मुखैर्नोऽद्रि शक्तायुध समस्थितिः । ईहा शून्येप्सितेशादि सेव्येशानवराङ्गना ॥६॥
ईश्वराज्ञापिकेकार - भाव्येप्सित फलप्रदा । ईशानति हरेशैषा चारुणाक्षीश्वरेश्वरी ॥७॥
ललिता ललनारूपा लयहीना लसत्तनुः । लयसर्वा लयक्षोणिर्लय - कर्त्री लयात्मिका ॥८॥
लघिमा लघुमध्यामढ्या ललमाना लघुद्रुता । हयारूढा हताऽमित्रा हरकान्ता हरिस्तुता ॥९॥
हयग्रीवेष्टदा हालाप्रिया हर्षसमुद्भवा । हर्षणा हल्लकाभाङ्गी हस्त्यन्तैश्वर्य- दायिनी ॥१०॥
हलहस्तार्चितपदा हविर्दान प्रसादिनी । रामा रामार्चिता राज्ञी रम्या रवमयी रतिः ॥११॥
रक्षिणी रमणी राकाऽऽदित्यादिमण्डलप्रिया । रक्षिताऽखिल लोकेशी रक्षोगण निषूदिनी ॥१२॥
अन्तान्त कारिण्यम्भोज क्रियान्तक भयङ्करी । अम्बुरूपाम्बुज कराऽम्बुज - जातवरप्रदा ॥१३॥
अन्तः पूजा क्रियान्तःस्था अन्तर्ध्यान वचोमयी । अन्तकाऽराति वामाङ्ग स्थिताऽन्तःसुख रूपिणी ॥१४॥
सर्वज्ञा सर्वगा सारा समा समसुखा सती । सन्ततिः सन्तता सोमा सर्वा सांख्या सनातनी ॥१५॥

॥ फलश्रुति ॥

एतत् ते कथितं देवि! नाम्नामष्टोत्तरं शतम् । अति गोप्यमिदं स्तोत्रं सर्वतो सारमुद्धृतम् ॥१॥
एतच्छदृशं स्तोत्रं त्रिषुलोकेषु दुर्लभम् । अप्रकाश्यमभक्तानां पुरतो देवता द्विषम् ॥२॥

एतत् सदा शिवो नित्यं पठन्त्यन्ये हरादयः । एतत् प्रभावात् कन्दर्पः त्रैलोक्यं जयति क्षणात् ॥३॥
सौभाग्याष्टोत्तर शतनामस्तोत्र मनोहरम् । यस्त्रिसन्ध्यं पठेन्नित्यं न तस्य भुवि दुर्लभम् ॥४॥
श्रीविद्योपासन - वतौ एतदावश्यकं मतम् । सकृदेतत् प्रपठतां नान्यकर्म विलुप्यते ॥५॥
अपठित्वा स्तोत्रमिदं नित्यं नैमितिकं कृतम् । व्यर्थी भवति तन्नर कृतं कर्म यथा-तथा ॥६॥
सहस्त्रनाम पाठादौ पठेत् स्तोत्रं शुभप्रदम् । सहस्त्रनाम पाठस्य फलं शतगुणं भवेत् ॥७॥
सहस्त्रपठनाद् ध्याता वीक्षणान्नाशयेद् रिपून् । करवीरैः रक्तपुष्पैर्हुत्वा लोकान् वशं नयेत् ॥८॥
स्तम्भयेत् पीत - कुसुमैर्नीलैरुच्चाटयेद् रिपून् । मरीचिर्विद्वेषणाय लवङ्गैर्व्याधिं नश्यते ॥९॥
पत्रपुष्पैः फलैर्वापि पूजयेत् प्रतिनामभिः । चक्रराजेऽथवाऽन्यत्र स वसेच्छ्री - पुरंचिरम् ॥१०॥
यः सदाऽऽवर्तयन् आस्ते नामाष्टशतमुत्तमम् । तस्य श्रीललिता माता प्रसन्ना वाञ्छितप्रदा ॥११॥

॥ लकारादि श्रीललिता शतनाम स्तोत्रम् ॥

कैलास शिखरासीनं देव देवं जगद-गुरुम्, पप्रच्छेशं परानन्दं भैरवी परमेश्वरम् ॥१॥

॥ श्रीभैरव्युवाच ॥

कौलेश! श्रोतुमिच्छामि सर्व-मन्त्रोत्तमोत्तमं, ललितायाशतनाम सर्वकामफल प्रदं ॥२॥

॥ श्रीभैरवोवाच ॥

शृणु देवि, महाभागे! स्तोत्रमेतदनुत्तमं, पठनाद् धारणादस्य सर्वसिद्धीश्वरो भवेत् ॥३॥
षट्कर्माणि सिद्ध्यन्ति स्तवस्यास्य प्रसादतः, गोपनीयं पशोरग्रे स्वयोनिमपरे यथा ॥४॥

॥ विनियोग ॥

ललिताया लकारादि नामशतकस्य देवि, राजराजेश्वरो ऋषिः प्रोक्तो छंदोऽनुष्टुप् तथा ।
देवता ललितादेवी षट्कर्म सिद्ध्यर्थे तथा, धर्मार्थ काममोक्षेषु विनियोगः प्रकीर्तितः ।
वाक्काम शक्तिवीजेन करषडङ्गमाचरेत्, प्रयोगे बालात्र्यक्षरी योजयित्वा जपं चरेत् ।

॥ स्तोत्रम् ॥

ललिता लक्ष्मी लोलाक्षी लक्ष्मणा लक्ष्मणार्चिता । लक्ष्मणप्राणरक्षिणी लाकिनी लक्ष्मणप्रिया ॥१॥
लोला लकारा लोमशा लोलजिह्वा लज्जावती । लक्ष्या लाक्ष्या लक्षरता लकाराक्षर भूषिता ॥२॥
लोल लयात्मिका लीला लीलावती च लाङ्गली । लावण्यामृत सारा च लावण्यामृत दीर्घिका ॥३॥
लज्जा लज्जामती लज्जा ललना ललनप्रिया । लवणा लवली लसा लाक्षकी लुब्धा लालसा ॥४॥
लोकमाता लोकपूज्या लोकजननी लोलुपा । लोहिता लोहिताक्षी च लिङ्गाख्या चैव लिङ्गेशी ॥५॥
लिङ्गीतिः लिङ्गभवा लिङ्गमाला लिङ्गप्रिया । लिङ्गाभिधायिनी लिङ्गा लिङ्गनामसदानन्दा ॥६॥
लिङ्गामृतप्रीता लिङ्गार्चन-प्रीता लिङ्गपूज्या । लिङ्गरूपा लिङ्गस्था च लिङ्गालिङ्गन तत्परा ॥७॥
लतापूजन - रता च लतासाधक तुष्टिदा । लतापूजक- रक्षिणी लतासाधन सिद्धिदा ॥८॥

लतागृहनिवासिनी लता पूज्या लताराध्या । लतापुष्पा लतारता लताधारा लतामयी ॥९॥
लतास्पर्शन सन्तुष्टा लताऽऽलिङ्गन हर्षिता । लताविद्या लतासारा लताऽऽचारा लतानिधिः ॥१०॥
लवङ्गपुष्प - सन्तुष्टा लवङ्गलता मध्यस्था । लवङ्गलतिकारूपा लवङ्गहोम सन्तुष्टा ॥११॥
लकाराक्षर पूजिता च लकार वर्णोद्भवा । लकारवर्ण भूषिता लकार - वर्ण रुचिरा ॥१२॥
लकार बीजोद्भवा तथा लकाराक्षर स्थिता। लकार बीज निलया लकार बीज सर्वस्वा॥१३॥
लकारवर्ण सर्वाङ्गी लक्ष्यछेदन तत्परा । लक्ष्यधरा लक्ष्यघूर्णा लक्षजापेन सिद्धिदा ॥१४॥
लक्षकोटिरूपधरा लक्षलीला - कलालक्ष्या । लोकपालेनार्चिता च लाक्षाराग - विलेपना ॥१५॥
लोकातीता लोपामुद्रा लज्जाबीज स्वरूपिणी । लज्जाहीना लज्जामयी लोकयात्राविधायिनी ॥१६॥
लास्यप्रिया लयकरी लोकलया लम्बोदरी । लघिमादि सिद्धिदात्री लावण्यनिधि दायिनी ॥१७॥
लकार वर्ण ग्रथिता लंबीजा ललिताम्बिका । इति ते कथितं देवि! गुह्याद् गुह्यतरं परम् ॥१८॥

॥ श्री ललिताम्बा त्रिंशतीस्तवः ॥

भगवान हयग्रीव ने इस '**सर्वपूर्तिकरी स्तुति**' बहुत प्रयत्न के बाद अगस्त्य ऋषि को दिया था। इसकी महिमा सहस्रनाम से अधिक कही गई है। सहस्र वशिनी आदि वाग् देवियों ने बताया है। जबकी इस पंचदशीमयि स्तोत्र को स्वयं कामेश्वर एवं कामेश्वरी ने बनाया है। '**क**' '**ह**' शिववर्ण है उनके नाम मंत्रों को कामेश्वरी ने बनाया है तथा ए, ई ल, स, ये शक्ति वर्ण है इनके मंत्र कामेश्वर ने बनाये हैं। '**ह्रीं**' शिवशक्ति वर्ण है इसे दोनों ने कहा है। इसके पाठ मात्र से साधना के सभी अंगों की पूर्ति हो जाती है, अर्थात् भगवती अति प्रसन्न हो जाती है।

॥ श्री अगस्त्यउवाच ॥

हयग्रीव, दयासिन्धो! भगवन्, भक्तवत्सल!। त्वत्तः श्रुतमशेषेण, श्रोतव्यं यद्यदस्ति तत् ॥१॥
रहस्यनामसाहस्त्रमपि त्वत्तः श्रुतं मया । इतः परं च मे नास्ति, श्रोतव्यमिति निश्चयः ॥२॥
तथापि मम चित्तस्य, पर्याप्तिर्नैव जायते। कार्तार्थ्यमप्राप्त इव, शोचत्यात्माऽपि मे प्रभो ॥३॥
किमिदं कारणं ब्रूहि ज्ञातव्यांशोऽस्ति वा पुनः। अस्ति चेन्मामनुब्रूहि, ''ब्रूही'' त्युक्त्वा प्रणम्यतम् ॥४॥
समाललम्बे तत्पादयुगलं कलशोद्भवः। हयाननोऽपि भीतः सन्, किमिदं किमिदं मुने! ॥५॥
मुञ्चमुञ्चे ति तं चोक्त्वा, चिन्ताऽऽक्रान्तो बभूव सः। चिरं विचार्य निश्चिन्वन्, वक्तव्यं न मयेत्यसौ ॥६॥
तूष्णीं स्थितः स्मरन्नाज्ञां, ललिताम्बाकृतां पुरा। प्रणमन्नेव स मुनिस्तत्पादावत्यजन् स्थितः ॥७॥
वर्षत्रयमुपासीनौ, गुरुशिष्यौ तथा स्थितौ । श‍ृण्वन्तस्तौ च पश्यन्तः, सर्वे लोकास्तु विस्मिताः ॥८॥
ततः श्रीललिता देवी, कामेश्वरसमन्विता । प्रादुर्भूय हयग्रीवं, रहस्येवमवोचत ॥९॥

॥ श्रीदेवी ललिता उवाच ॥

अश्वाननाऽऽवयोः प्रीतिः, शास्त्रविश्वासतस्त्वयि। राज्यं देयं शिरो देयं, न देया षोडशाक्षरी ॥१०॥
स्वमातृयोनिवद् गोप्या, विद्यैषेत्यागमा जगुः। ततोऽपि गोपनीया मे, सर्वपूर्तिकरी स्तुतिः ॥११॥
मया कामेश्वरेणाऽपि, कृता सा गोपिता भृशम्। मदाज्ञया वचो देव्यश्चक्रुर्नामसहस्त्रकम् ॥१२॥

आवाभ्यां कथिता मुख्या, सर्वपूर्तिकरी स्तुतिः। सर्वक्रियाणां वैकल्ये, पूर्तिर्यज्जपतो भवेत् ॥१३॥
सर्वपूर्तिकरं तस्मादिति नाम कृतं मया। तद् ब्रूहि त्वमगस्त्याय, पात्रमेष न संशयः ॥१४॥
पत्न्यस्य लोपामुद्राख्या, मामुपास्तेऽतिभक्तितः। अयं च नितरां भक्तस्तस्मादस्य वदस्व तत् ॥१५॥
अमुञ्चमानस्त्वत्पादौ, वर्षत्रयमसौ स्थितः। एतज्ज्ञातुमतो भक्तेरिदमेव निदर्शनम् ॥१६॥
चित्तपर्याप्तिरेतस्य, नान्यथा सम्भविष्यति। सर्वपूर्त्तिकरं तस्मादनुज्ञातो मया वद ॥१७॥
इत्युक्त्वाऽन्तर्दधावम्बा, कामेश्वरसमन्विता। अथोत्थाय हयग्रीवः,पाणिभ्यां कुम्भसम्भवम्।
संस्थाप्य निकटे वाचमुवाच भृशं विस्मितः ॥१८॥

॥ श्रीहयग्रीव उवाच ॥

कृतार्थोऽसि कृतार्थोऽसि, कृतार्थोऽसि घटोद्भव! त्वत्समो ललिताभक्तो, नास्ति नास्ति जगत्त्रये ॥१९॥
येनागत्य स्वयं देवी, तव वक्तव्यमन्वशात् ॥२०॥
सच्छिष्येण त्वयाऽहं च, दृष्टवानस्मि तां शिवाम्। यतन्ते यद्दर्शनार्था, ब्रह्मविष्णवीशपूर्वकाः ॥२१॥
अतः परं ते वक्ष्यामि, सर्वपूर्तिकरं स्तवम्। यस्य स्मरणमात्रेण, पर्याप्तिस्ते भवेद् हृदि ॥२२॥
रहस्यनामसाहस्रादपि गुह्यमिदं मुने! आवश्यक ततोऽप्येतल्ललितां समुपासताम् ॥२३॥
तदहं ते प्रवक्ष्यामि, ललिताम्बाऽनुशासनात्। श्रीमत्पञ्चदशाक्षर्याः, कादिवर्णक्रमान्मुने! ॥२४॥
पृथग्विंशतिनामानि, कथितानि घटोद्भव! आहृत्य नाम्नां त्रिशती, सर्वसम्पूर्तिकारिणी ॥२५॥
रहस्याऽतिरहस्यैषा, गोपनीया प्रयत्नतः। तां श्रृणुष्व महाभाग! सावधानेन चेतसा ॥२६॥
केवलं नामबुद्धिस्ते, न कार्या तेषु कुम्भज! मन्त्रात्मकत्वमेतेषां, नाम्नां नामात्मताऽपि च ॥२७॥
तस्मादेकाग्रमनसा, श्रोतव्यं भवतः सदा। इत्युक्त्वा तं हयग्रीवो, प्रोच नाम्नां शतत्रयीम् ॥२८॥

विनियोग :- ॐ अस्य श्रीललिताम्बात्रिशती नाममालामन्त्रस्य भगवान् हयग्रीव ऋषिः, अनुष्टुप् छन्दः, श्रीललितामहाभट्टारिका देवता, ऐं बीजं, सौः शक्तिः, क्लीं कीलकम्, श्रीललितामहाभट्टारिका प्रीत्यर्थे पाठे विनियोगः।

ऋष्यादि न्यास :- भगवान्हयग्रीवऋषये नमः शिरसि। अनुष्टुप्छन्दसे नमः मुखे। श्रीललिता महाभट्टारिका देवतायै नमः हृदि। ऐं बीजाय नमः गुह्ये। सौः शक्तये नमः नाभौ। क्लीं कीलकाय नमः पादयोः। श्रीललितामहाभट्टारिकाप्रीतये पाठे विनियोगाय नमः सर्वाङ्गे।

मंत्र	करन्यासः	अङ्गन्यासः
ऐं क-५	अंगुष्ठाभ्यां नमः	हृदयाय नमः
क्लीं ह-६	तर्जनीभ्यां नमः	शिरसे स्वाहा
सौः स-४	मध्यमाभ्यां नमः	शिखायै वषट्
ऐं क-५	अनामिकाभ्यां नमः	कवचाय हुं
क्लीं ह-६	कनिष्ठिकाभ्यां नमः	नेत्रत्रयाय वौषट्
सौः स-४	करतलकरपृष्ठाभ्यां नमः	अस्त्राय फट्

॥ ध्यानम् ॥

ॐ अतिमधुरचापहस्तामपरिमिताऽऽमोद बाणसौभाग्याम् ।
अरुणामतिशय करुणामभिनवकुल - सुन्दरीं वन्दे ॥१॥
ॐ पाशांकुशेक्षुसुमराजितपञ्चशाखाम् पाटल्यशालिसुषुमाञ्चितगात्रवल्लीम् ।
प्राचीनवाक्स्तुतपदां परदेवतां त्वाम्, पञ्चायुधार्चितपदां, प्रणमामि देवीम् ॥२॥

॥ त्रिशती स्तवः ॥

'क' कार रूपाकल्याणी, कल्याणगुणशालिनी । कल्याणशैलनिलया, कमनीया कलावती ॥१॥
कमलाक्षी कल्मषघ्नी, करुणामृतसागरा । कदम्बकाननावासा, कदम्बकुसुमप्रिया ॥२॥
कन्दर्पविद्या कन्दर्पजनकापाङ्ग वीक्षणा। कर्पूरवीटीसौरभ्यकल्लोलित कुकुत्परा ॥३॥
कलिदोषहरा कञ्जलोचना कम्रविग्रहा । कर्मादिसाक्षिणी कारयित्री कर्मफलप्रदा ॥४॥
'ए' काररूपा चैकाक्षर्येकाऽनेकाक्षराकृतिः । एतत्तदित्यनिर्देश्या, चैकानन्दचिदाकृतिः ॥५॥
एवमित्यागमाबोध्या, चैकभक्तिमदार्चिता । एकाग्रचित्तनिध्यार्ता चैषणारहितादृता ॥६॥
एलासुगन्धिचिकुरा, चैनःकूटविनाशिनी । एकभोगा चैकरसा, चैकैश्वर्यप्रदायिनी ॥७॥
एकातपत्रसाम्राज्यप्रदा चैकान्तपूजिता । एधमानप्रभा चैजदनेकजगदीश्वरी ॥८॥
एक वीरादिसंसेव्या, चैकप्राभवशालिनी । 'ई' काररूपा चेशित्री, चेप्सितार्थप्रदायिनी ॥९॥
ईदृगित्यविनिर्देश्या, चेश्वरत्वविधायिनी । ईशानादिब्रह्ममयी, चेशित्वाद्यष्टसिद्धिदा ॥१०॥
ईक्षित्री क्षणसृष्टाण्डकोटिरीश्वरवल्लभा । ईडिता चेश्वरार्द्धाङ्गशरीरेशाधिदेवता ॥११॥
ईश्वरप्रेरणकरी, चेशताण्डवसाक्षिणी । ईश्वरोत्सङ्गनिलया, चेतिबाधाविनाशिनी ॥१२॥
ईहाविरहिता चेशशक्तिरीषत्स्मितानना । 'ल' काररूपा ललिता, लक्ष्मीवाणीनिषेविता ॥१३॥
लाकिनी ललनारूपा, लसद्दाडिमपाटला । ललन्तिकालसत्फाला, ललाटनयनार्चिता ॥१४॥
लक्षणोज्ज्वलदिव्याङ्गी लक्षकोट्यण्डनायिका । लक्ष्यार्था लक्षणागम्या, लब्धकामा लतातनुः ॥१५॥
ललामराजदलिका, लम्बिमुक्तालताञ्चिता । लम्बोदरप्रसूर्लभ्या, लज्जाढ्या लयवर्जिता ॥१६॥
'ह्रीं' काररूपा ह्रीङ्कारनिलया ह्रींपदप्रिया। ह्रीङ्कार बीजा ह्रीङ्कार मन्त्रा ह्रीङ्कारलक्षणा ॥१७॥
ह्रीङ्कारजपसुप्रीता, ह्रींमती ह्रींविभूषणा। ह्रींशीला ह्रींपदाराध्या ह्रींगर्भा ह्रींपदाभिधा ॥१८॥
ह्रींकारवाच्या ह्रीङ्कारपूज्या ह्रीङ्कारपीठिका। ह्रीङ्कारवेद्या ह्रीङ्कारचिन्त्या ह्रीं ह्रीं शरीरिणी ॥१९॥
'ह' काररूपा हलधृक्पूजिता हरिणेक्षणा । हरिप्रिया हराराध्या हरिब्रह्मेन्द्रवन्दिता ॥२०॥
हयारूढासेविताङ्घ्रिर्हयमेधसमर्चिता । हर्यक्षवाहना हंसवाहना हतदानवा ॥२१॥
हत्यादिपापशमनी, हरिदश्वादिसेविता । हस्तिकुम्भोत्तुङ्गकुचा, हस्तिकृत्तिप्रियाङ्गना ॥२२॥
हरिद्राकुंकुमादिग्धा, हर्यश्वाद्यमरार्चिता । हरिकेशसखी हादिविद्या हालामदोल्लसा ॥२३॥
'स'काररूपा सर्वज्ञा, सर्वेशी सर्वमङ्गला । सर्वकर्त्री सर्वभर्त्री, सर्वहन्त्री सनातना ॥२४॥

सर्वानवद्या सर्वाङ्गसुन्दरी सर्वसाक्षिणी । सर्वात्मिका सर्वसौख्यदात्री सर्वविमोहिनी ॥२५॥
सर्वाधारा सर्वगता, सर्वावगुणवर्जिता । सर्वारुणा सर्वमाता, सर्वभूषणभूषिता ॥२६॥
'क' कारार्था कालहन्त्री, कामेशी कामितार्थदा। कामसञ्जीवनी कल्या, कठिनस्तनमण्डला ॥२७॥
करभोरुः कलानाथमुखी कचजिताम्बुदा । कटाक्षस्यन्दिकरुणा, कपालिप्राणनायिका ॥२८॥
कारुण्यविग्रहा कान्ता, कान्तिधूतजपावलिः । कलाऽऽलापा कम्बुकण्ठी, करनिर्जितपल्लवा ॥२९॥
कल्पवल्लीसमभुजा, कस्तूरीतिलकाञ्चिता। 'ह' कारार्था हंसगतिर्हाटकाऽऽभरणोज्ज्वला ॥३०॥
हारहारिकुचाभोगा, हाकिनी हल्यवर्जिता । हरित्पतिसमाराध्या, हठात्कारहताऽसुरा ॥३१॥
हर्षप्रदा हविर्भोक्त्री, हार्दसन्तमसापहा । हल्लीसलास्यसन्तुष्टा, हंसमन्त्रार्थरूपिणी ॥३२॥
हानोपादाननिर्मुक्ता, हर्षिणी हरिसोदरी। हा-हा-हू-हू-मुख-स्तुत्या, हानिवृद्धिविवर्जिता ॥३३॥
हय्यङ्गवीणहृदया, हरिगोपारुणांशुका। 'ल' कारारव्या लतापूज्या, लयस्थित्युद्भवेश्वरी ॥३४॥
लास्यदर्शनसन्तुष्टा, लाभालाभविवर्जिता । लंघ्येतराज्ञा लावण्यशालिनी लघुसिद्धदा ॥३५॥
लाक्षारससवर्णाभा लक्ष्मणाग्रजपूजिता। लभ्येतरा लभ्यभक्तिसुलभा लाङ्गलायुधा ॥३६॥
लग्नचामरहस्तश्रीशारदापरिवीजिता । लज्जापदसमाराध्या, लम्पटा लकुलेश्वरी ॥३७॥
लब्धमाना लब्धरसा, लब्धसम्पत्समुन्नतिः। 'ह्रीं' कारिणी च ह्रीमाद्या, ह्रींमध्या ह्रींशिखामणिः ॥३८॥
ह्रींकारकुण्डाग्निशिखा, ह्रीङ्कारशशिचन्द्रिका । ह्रीङ्कारभास्कररुचिर्ह्रीङ्काराम्भोदचञ्चला ॥३९॥
ह्रींकारकन्दांकुरिका, ह्रींकारैकपरायणा । ह्रींकारदीर्घिकाहंसी, ह्रींकारोद्यानकेकिनी ॥४०॥
ह्रींकारारण्यहरिणी, ह्रींकाराबालवल्लरी । ह्रींकारपञ्जरशुकी, ह्रींकाराङ्गणदीपिका ॥४१॥
ह्रींकारकन्दरासिंही ह्रींकाराम्बुजभृङ्गिका । ह्रींकारसुमनोमाध्वी, ह्रींकारतरुमञ्जरी ॥४२॥
'स' काराख्या समरसा, सकलागमसंस्तुता । सर्ववेदान्ततात्पर्यभूमिः, सदसदाश्रया ॥४३॥
सकलासच्चिदानन्दा, साध्या सद्गतिदायिनी । सनकादिमुनिध्येया, सदाशिवकुटुम्बिनी ॥४४॥
सकलाधिष्ठानरूपा, सत्यरूपा समाकृतिः । सर्वप्रपञ्चनिर्मात्री, समानाधिकवर्जिता ॥४५॥
सर्वोत्तुङ्गा सङ्गहीना, सगुणा सकलेश्वरी ।'क' कारिणी काव्यलोला, कामेश्वरमनोहरा ॥४६॥
कामेश्वरप्राणनाडी, कामेशोत्सङ्गवासिनी । कामेश्वरालिङ्गिताङ्गी, कामेश्वरसुखप्रदा ॥४७॥
कामेश्वरप्रणयिनी, कामेश्वरविलासिनी । कामेश्वरतपःसिद्धिः, कामेश्वरमनःप्रिया ॥४८॥
कामेश्वरप्राणनाथा, कामेश्वरविमोहिनी । कामेश्वरब्रह्मविद्या, कामेश्वरगृहेश्वरी ॥४९॥
कामेश्वराह्लादकरी, कामेश्वरमहेश्वरी । कामेश्वरी कामकोटिनिलया कांक्षितार्थदा ॥५०॥
'ल' कारिणी लब्धरूपा, लब्धधीर्लब्धवाञ्छिता। लब्धपापमनोदूरा, लब्धाऽहङ्कारदुर्गमा ॥५१॥
लब्धशक्तिर्लब्धदेहा, लब्धैश्वर्यसमुन्नतिः । लब्धवृद्धिर्लब्धलीला, लब्धयौवनशालिनी ॥५२॥
लब्धातिशयसर्वाङ्ग सौन्दर्या लब्धविभ्रमा । लब्धरागा लब्धपतिर्लब्धनानागमस्थितिः ॥५३॥

लब्धभोगा लब्धसुखा लब्धहर्षाभिपूजिता। 'ह्रीं' कारमूर्तिर्ह्रींकारसौध - शृङ्गकपोतिका ॥५४॥
ह्रींकारदुग्धाब्धिसुधा, ह्रींकारकमलेन्दिरा । ह्रींकारमणिदीपार्चिर्ह्रींकारतरुशारिका ॥५५॥
ह्रींकारपेटक मणिर्ह्रीङ्कारादर्शबिम्बिता । ह्रींकारकोशासिलता, ह्रींकारस्थाननर्त्तकी ॥५६॥
ह्रींकारशुक्तिकामुक्तामणिर्ह्रींकार बोधिता । ह्रींकारमयसौवर्ण स्तम्भविद्रुमपुत्रिका ॥५७॥
ह्रींकारवेदोपनिषद् ह्रींकाराध्वरदक्षिणा । ह्रींकारनन्दनाराम नवकल्पकवल्लरी ॥५८॥
ह्रींकारहिमवद्गङ्गा, ह्रींकारार्णवकौस्तुभा । ह्रींकारमन्त्रसर्वस्वा, ह्रींकारपरसौख्यदा ॐ ॥५९॥

॥फलश्रुति ॥

इत्येतत् ते समाख्यातं, दिव्यं नाम्नां शतत्रयम्। रहस्यातिरहस्यत्वाद् गोपनीयं त्वया मुने! ॥१॥
शिववर्णानि नामानि, श्रीदेव्या कथितानि तु। शक्त्यक्षरादिनामानि कामेशकथितानि हि ॥२॥
उभयाक्षरनामानि, उभाभ्यां कथितानि तु । तदन्यैर्ग्रथितं स्तोत्रमेतस्य सदृशंकिमु ॥३॥
नानेन सदृशं स्तोत्रं, श्रीदेवीप्रीतिदायकम् ॥४॥
इति हयमुखगीतं स्तोत्रराजं निशम्य, प्रगलितकलुषोऽभूच्चित्तपर्याप्तिमेत्य ।
निजगुरुमथ नत्वा कुम्भजन्मा तदुक्तेः, पुनरधिकरहस्यं ज्ञातुमेवं जगाद् ॥५॥
अश्वानन! महाभाग! रहस्यमपि मे वद। शिववर्णानि कान्यत्र, शक्तिवर्णानि कानि च ॥६॥
उभयोरपि नामानि, कानि वा वद देशिक! इति पृष्टः कुम्भजेन, हयग्रीवोऽववत् पुनः ॥७॥
तव गोप्यं किमस्तीह, साक्षादम्बाऽन्वशाद् यतः ॥८॥
इदं त्वतिरहस्यं ते, वक्ष्यामि शृणु कुम्भज! एतद्विज्ञानमात्रेण, श्रीविद्या सिद्धिदा भवेत् ॥९॥
कत्रयं हद्वयं चैव, शैवो भागः प्रकीर्त्तितः। शेषाणि शक्त्यक्षराणि, ह्रींकार उभयात्मकः ॥१०॥
एवं विभागमज्ञात्वा, ये विद्याजपशालिनः। न तेषां सिद्धिदा विद्या, कल्पकोटिशतैरपि ॥११॥
चतुर्भिः शिवचक्रैश्च, शक्तिचक्रैश्च पञ्चभिः । नवचक्रैश्च संसिद्धं, श्रीचक्रं शिवयोर्वपुः ॥१२॥
त्रिकोणमष्टकोणं च, दशकोणद्वयं तथा। चतुर्दशारं चैतानि, शक्तिचक्राणि पञ्च च ॥१३॥
विन्तुश्चाष्टदलं पद्मं, पद्मं षोडश पत्रकम् । चतुरस्त्रं च चत्वारि, शिवचक्राण्यनुक्रमात् ॥१४॥
त्रिकोणे बैन्दवं श्लिष्टमष्टारेऽष्टदलाम्बुजम् । दशारयोः षोडशारं, भूगृहं भुवनास्त्रके ॥१५॥
शैवानामपि शाक्तानां, चक्राणां च परस्परम्। अविनाभावसम्बन्धं, यो जानाति स चक्रवित् ॥१६॥
त्रिकोणरूपिणी शक्तिर्बिन्दुरूपः परः शिवः। अविना भाव सम्बन्धं तस्माद् बिन्दुत्रिकोणयोः ॥१७॥
एवं विभागमज्ञात्वा, श्रीचक्रं यः समर्चयेत्। न तत्फलमवाप्नोति, ललिताम्बा न तुष्यति ॥१८॥
ये च जानन्ति लोकेऽस्मिन्, श्रीविद्याचक्रवेदिनः। सामान्यवेदिनः सर्वे, विशेषज्ञोऽतिदुर्लभः ॥१९॥
स्वयं विद्याविशेषज्ञो, विशेषज्ञं समर्चयेत् । तस्मै देयं ततो ग्राह्यमशक्तस्तस्य दापयेत् ॥२०॥
अन्धं तमः प्रविशन्ति, येऽविद्यां समुपासते। विद्याऽन्योपासकानेवं, निन्दत्यारुणकी श्रुतिः ॥२१॥
अश्रुता सश्रुतासश्च, यज्वानो येऽप्ययज्वनः । स्वर्यन्तो नापेक्ष्यन्ते इन्द्रमग्निं च ये विदुः ॥२२॥

सिकता इव संयन्ति, रश्मिभिः समुदीरिताः। अस्माल्लोकादमुष्माच्चेत्याह चारण्यकी श्रुतिः ॥२३॥
यस्य नो पश्चिमं जन्म, यदि वा शङ्करः स्वयम्। तेनैव लभ्यते विद्या, श्रीमत्पञ्चदशाक्षरी ॥२४॥
इति मन्त्रेषु बहुधा, विद्यायाः महिमोच्यते । मोक्षैकहेतुविद्या तु, श्रीविद्या नात्र संशयः ॥२५॥
न शिल्पादिज्ञानयुक्ते, विद्वच्छब्दः प्रयुज्यते। मोक्षैकहेतुविद्या सा, श्रीविद्यैव न संशयः ॥२६॥
तस्माद् विद्याविदेवात्र, विद्वान् विद्वानितीर्यते। स्वयं विद्याविदे दद्याद्, ख्यापयेत् तद्गुणान् सुधीः ॥२७॥
स्वयं विद्यारहस्यज्ञो, विद्यामाहात्म्यवेद्यपि। विद्याविदं नार्चयेच्चेत् को वा तं पूजयेज्जनः? ॥२८॥
प्रसङ्गादेतदप्युक्तं, प्रकृतं शृणु कुम्भज! यः कीर्तयेत् सकृद् भक्त्या, दिव्यं नाम्नां शतत्रयम् ॥२९॥
तस्य पुण्यफलं वक्ष्ये, दिङ्मात्रेण घटोद्भव! रहस्यनामसाहस्रपाठे, यत्फलमीरितम् ॥३०॥
तत्कोटिकोटिगुणितं, त्वेकनामजपाद् भवेत्। कामेश्वरीकामेशाभ्यां, कृतं नामशतत्रयम् ॥३१॥
नान्येन तुलयेदेतत् स्तोत्रेणान्यकृतेन तु । श्रेयः परम्परा यस्य, भाविनी चोत्तरोत्तरम् ॥३२॥
तेनैव लभ्यते चैतत् पश्चाच्छ्रेयः परीक्षयेत्। अस्या नाम्नां त्रिशत्यास्तु, महिमा केन वर्ण्यते ॥३॥
या स्वयं शिवयोर्वक्त्रपद्माभ्यां परिनिःसृता। महाषोडशिकारूपान्, विप्रानादौ तु भोजयेत् ॥३४॥
अभ्यक्तां तिलतैलेन, स्नाताऽनुष्णेन वारिणा। अभ्यर्च्य गन्धपुष्पाद्यैः, कामेश्वर्यादिनामभिः ॥३५॥
सूपापूपैः शर्कराद्यैः, पायसैः फलसंयुतैः ॥३६॥
विद्याविदो विशेषेण, भोजयेत् षोडशद्विजान्। एवं नित्यार्चन कुर्यादादौ ब्राह्मणभोजनम् ॥३७॥
त्रिशतीनामभिः पश्चाद्, ब्राह्मणान् क्रमशो यजेत्। तैलाभ्यङ्गादिकं दद्याद्, विभवे सति भक्तितः ॥३८॥
शुक्लप्रतिपदारभ्य, पौर्णमास्यवधि क्रमात्। दिवसेदिवसे विप्राः, भोज्या विंशतिसंख्यया ॥३९॥
दशभिः पञ्चभिर्वापि, त्रिभिरेकेन वा दिनैः। त्रिंशत् षष्टिशतं विप्राः, सम्भोज्यास्त्रिशतं क्रमात् ॥४०॥
एवं यः कुरुते भक्त्या, जन्ममध्ये सकृन्नरः। तस्यैव सफलं जन्म, मुक्तिस्तस्य करे स्थिता ॥४१॥
रहस्यनामसाहस्र भोजनेऽप्येवमेव हि। आदौ नित्याबलिं कुर्यात्, पश्चाद् ब्राह्मणभोजनम् ॥४२॥
रहस्यनामसाहस्रमहिमा यो मयोदितः । स शीकराणुरत्रैकनाम्नो महिमवारिधेः ॥४३॥
वाग्देवीरचिते नामसहस्रे यद्यदीरितम् । तत्फलं समवाप्नोति, नाम्नोऽप्येकस्य कीर्तनात् ॥४४॥
एतदन्यैर्जपैः स्तोत्रैरर्चनैयत् फलं लभेत्। तत्फलं कोटिगुणितं, भवेन्नामशतत्रयात् ॥४५॥
रहस्यनामसाहस्र कोट्यावृत्त्या तु यत्फलम्। तद्भवेत् कोटिगुणितं, नामत्रिशतकीर्तनात् ॥४६॥
वाग्देवीरचितस्तोत्रे, तादृशी महिमा यदि। साक्षात् कामेशकामेशी कृतेऽस्मिन् बुध्यतां त्वया ॥४७॥
सकृत् सङ्कीर्तिते दिव्यनाम्नामस्मिन् शतत्रये । भवच्चित्तस्य पर्याप्तिर्नूनमन्यानपेक्षिणी ॥४८॥
न ज्ञातव्यमितोऽस्त्यन्यत्र जप्तव्यं च कुम्भज! यदसाध्यतमं कार्यं, तत्तदर्थमिद जपेत् ॥४९॥
तत्तत् सिद्धिमवाप्नोति, पश्चात् कार्यं परीक्षयेत् ॥५०॥
ये ये प्रयोगास्तन्त्रेषु, न तैर्यत् साध्यते फलम्। तत्सर्वं सिद्धयति क्षिप्रं, नामत्रिशतकीर्तनात् ॥५१॥

आयुष्करं पुष्टिकरं, पुत्रदं वश्यकारकम्। विद्याप्रदं कीर्त्तिकरं, सुकर्मत्वप्रदायकम् ॥५२॥
सर्वसम्पत्प्रदं सर्वसिद्धिदं सर्वसौख्यदम् । सर्वाभीष्टप्रदं चैव, देवीनाम शतत्रयम् ॥५३॥
नाविद्याऽवेदिने ब्रूयान्नाभक्ताय कदाचन॥ न शठाय न दुष्टाय, नाविश्वासाय कर्हिचित् ॥५४॥
एतज्जपपरो भूयो, नान्यदिच्छेत् कदाचन ॥५५॥
एतत्कीर्त्तनसन्तुष्टा, श्रीदेवी ललिताऽम्बिका। भक्तस्य यद्यदिष्टं स्यात्, तत्तत्पूरयते ध्रुवम् ॥५६॥
तस्मात् कुम्भोद्भव मुने! कीर्तय त्वमिदं सदा। अपरं किञ्चिदपि ते, बोद्धव्यं नावशिष्यते ॥५७॥
एवमुक्त्वा हयग्रीवः, कुम्भजं तापसोत्तमम्। स्तोत्रेणानेन ललितां, स्तुत्वा त्रिपुरसुन्दरीम् ॥५८॥
आनन्द लहरीमग्नमानसः समवर्त्तत ॥५९॥

॥श्रीब्रह्माण्डपुराणे हयग्रीवागस्त्यसम्वादे श्रीललितानामत्रिशत्युपदेशनामा सर्वसम्पूर्त्तिस्तवः सम्पूर्णः॥

॥ श्री ललिता सहस्रनाम स्तोत्रम् ॥

विनियोग :- ॐ अस्य श्रीललिता सहस्रनाम स्तोत्रमालामन्त्रस्य श्रीवशिन्यादि वाग्देवता ऋषयः। अनुष्टुप् छन्दः। श्रीललिताऽम्बा देवता। कएईलह्रीं बीजम्॥ सकलह्रीं शक्तिः। हसकहलह्रीं कीलकम्। श्रीललिताऽम्बा प्रीत्यर्थे जपे विनियोगः।

ऋष्यादि न्यासः :- श्रीवशिन्यादि वाग्देवता ऋषिभ्यो नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। श्रीललिताऽम्बा देवतायै नमः हृदि। कएईलह्रीं बीजाय नमः गुह्ये। सकलह्रीं शक्तये नमः पादयोः। हसकहलह्रीं कीलकाय नमः सर्वाङ्गे। श्रीललिताऽम्बा प्रीत्यर्थे जपे विनियोगाय नमः अञ्जलौ।

षडङ्ग न्यासः	कर न्यासः	अङ्ग न्यासः
ऐं क-५ (क-५ = कएईल ह्रीं)	अंगुष्ठाभ्यां नमः	हृदयाय नमः
क्लीं ह-६ (ह-६ = हसकहल ह्रीं)	तर्जनीभ्यां नमः	शिरसे स्वाहा
सौः स-४ (स-४ = सकल ह्रीं)	मध्यमाभ्यां नमः	शिखायै वषट्
ऐं क-५	अनामिकाभ्यां नमः	कवचाय हुं
क्लीं ह-६	कनिष्ठाभ्यां नमः	नेत्र त्रयाय वौषट्
सौः स-४	करतल-करपृष्ठाभ्यां नमः	अस्त्राय फट्

॥ ध्यानम् ॥

सिन्दूरारुण विग्रहां त्रिनयनां माणिक्यमौलि स्फुरत्
तारानायक शेखरां स्मितमुखीमापीन वक्षो रुहाम् ।
पाणिभ्यामलिपूर्ण रत्नचषकं रक्तोत्पलं बिभ्रतीम्,
सौम्यां रत्नघटस्थ रक्तचरणां ध्याये परामम्बिकाम् ॥

मानस पूजनम् :- लं पृथिव्यात्मकं गन्धं समर्पयामि नमः, अधोमुखः कनिष्ठा अंगुष्ठ। हं आकाशात्मकं पुष्पं, समर्पयामि नमः, अधोमुख तर्जनी अंगुष्ठ। यं वाय्वात्मकं धूपं घ्रापयामि नमः ऊर्ध्वमुख तर्जनी अंगुष्ठ। रं वह्न्यात्मकं

दीपं दर्शयामि नमः, मध्यमा अंगुष्ठ। वं अमृतात्मकं नैवेद्यं निवेदयामि नमः, अनामा अंगुष्ठ। सं सर्वात्मकं ताम्बूलं समर्पयामि नमः, सर्वांगुलि।

॥ श्रीहयग्रीव उवाचः ॥

॥ अथ प्रथम शतकं नाम द्वितीया तापिनी कला ॥

श्रीमाता श्रीमहाराज्ञी, श्रीमत् सिंहासनेश्वरी। चिदग्निकुण्ड-सम्भूता, देवकार्य समुद्यता ॥१॥
उद्यद्भानु सहस्राभा, चतुर्बाहु समन्विता। रागस्वरूप पाशाढ्या, क्रोधाकारांकुशोज्ज्वला ॥२॥
मनोरूपेक्षु-कोदण्डा, पञ्चतन्मात्र सायका। निजारुण-प्रभा पूर मज्जद् ब्रह्माण्डमण्डला ॥३॥
चम्पकाशोक पुन्नाग सौगन्धिक लसत्कचा। कुरुविन्दमणि श्रेणी कनत्कोटीर मण्डिता ॥४॥
अष्टमीचन्द्र विभ्राजदलिक स्थल शोभिता। मुखचन्द्र कलङ्काभ मृगनाभि विशेषका ॥५॥
वदनस्मर माङ्गल्य गृहतोरण चिल्लिका। वक्त्र लक्ष्मी परीवाह चलन्मीनाभ लोचना ॥६॥
नवचम्पक पुष्पाभ नासा दण्ड विराजिता। ताराकान्ति तिरस्कारि नासाऽऽभरण भासुरा ॥७॥
कदम्बमञ्जरी क्लृप्त कर्णपूर मनोहरा। ताटङ्क युगलीभूत तपनोडुप मण्डला ॥८॥
पद्मराग शिलाऽऽदर्श परिभावि कपोल भूः। नवविद्रुम बिम्ब श्रीन्यक्कारि दशनच्छदा ॥९॥
शुद्ध विद्यांकुराकार द्विजपंक्ति - द्वयोज्ज्वला। कर्पूरवीटिकामोद समाकर्षि दिगन्तरा ॥१०॥
निजसंल्लाप माधुर्य विनिर्भर्त्सित - कच्छपी। मन्दस्मित - प्रभापूर मज्जत्कामेश मानसा ॥११॥
अनाकलित सादृश्य चिबुक श्रीविराजिता। कामेशबद्ध - माङ्गल्यसूत्र शोभित कन्धरा ॥१२॥
कनकाङ्गद केयूर कमनीय भुजान्विता। रत्न ग्रैवेय चिन्ताकलोल - मुक्ताफलान्विता ॥१३॥
कामेश्वरप्रेम रत्नमणि प्रतिपण स्तनी। नाभ्यालवाल रोमालि-लताफल कुचद्वयी ॥१४॥
लक्ष्यरोम - लताधारता समुन्नेय मध्यमा। स्तनभार दलन्मध्य पट्टबन्ध - बलित्रया ॥१५॥
अरुणारुण कौसुम्भ वस्त्र भास्वत् कटी तटी। रत्न किङ्किणिका रम्य रशना दाम भूषिता ॥१६॥
कामेश ज्ञात सौभाग्यमार्दवोरु द्वयान्विता। माणिक्यमुकुटाकार जानुद्वय विराजिता ॥१७॥
इन्द्रगोप परिक्षिप्त स्मरतूणाभ जङ्घिका। गूढगुल्फा कूर्मपृष्ठ जयिष्णुप्रपदान्विता ॥१८॥
नख दीधिति सञ्छन्न नमज्जन तमोगुणा। पदद्वय प्रभाजाल पराकृत सरोरुहा ॥१९॥
शिञ्जानमणि - मञ्जीर मण्डित - श्रीपदाम्बुजा। मराली मन्दगमना महालावण्य - शेवधिः ॥२०॥
सर्वारुणाऽनवद्याङ्गी सर्वाभरणभूषिता। शिव - कामेश्वराङ्कस्था, शिवा स्वाधीन - वल्लभा ॥२१॥
सुमेरुशृङ्ग मध्यस्था श्रीमन्नगर नायिका। चिन्तामणि - गृहान्तस्था, पञ्चब्रह्मासनस्थिता ॥२२॥
महापद्माटवी - संस्था, कदम्बवन - वासिनी। सुधासागर - मध्यस्था कामाक्षी कामदायिनी ॥२३॥
देवर्षिगणसङ्घात स्तूय मानात्मवैभवा। भण्डासुर - वधोद्युक्त शक्तिसेनासमन्विता ॥२४॥
सम्पत्करी समारूढ सिन्धुर - व्रजसेविता। अश्वारूढाऽधिष्ठिताश्व कोटिकोटभिरावृता ॥२५॥
चक्रराज - रथारूढ सर्वायुध परिष्कृता। गेयचक्र - रथारूढ मन्त्रिणी परिसेविता ॥२६॥

किरिचक्र - रथारूढ दण्डनाथा पुरस्कृता । ज्वालामालिनिका क्षिप्तवह्निप्राकार - मध्यगा ॥२७॥
भण्डसैन्य वधोद्युक्त शक्ति विक्रमहर्षिता । नित्यापराक्रमा टोप निरीक्षण समुत्सुका ॥२८॥
भण्डपुत्र वधोद्युक्त बाला विक्रमनन्दिता । मन्त्रिण्यम्बा विरचित विशुक्र - वध तोषिता ॥२९॥
विषङ्गप्राणहरण वाराहीवीर्यनन्दिता । कामेश्वर - मुखालोक कल्पितश्रीगणेश्वरा ॥३०॥
महागणेश - निर्भिन्न विघ्नयन्त्र - प्रहर्षिता । भण्डासुरेन्द्र निर्मुक्त शस्त्र प्रत्यस्त्रवर्षिणि ॥३१॥
करांगुलि नखोत्पन्न नारायण दशाकृतिः । महापाशुपतास्त्राग्नि - निर्दग्धासुर सैनिका ॥३२॥
कामेश्वरास्त्र निर्दग्ध स भण्डासुर शून्यका । ब्रह्मोपेन्द्र महेन्द्रादिदेव संस्तुत वैभवा ॥३३॥
हरनेत्राग्नि - सन्दग्ध कामसञ्जीवनौषधिः । श्रीमद् वाग्भवकूटैक - स्वरूप मुखपङ्कजा ॥३४॥
कण्ठाधः कटि पर्यन्त मध्यकूट स्वरूपिणी । शक्ति कूटैकतापन्न कट्यधोभागधारिणि ॥३५॥
मूलमन्त्रात्मिका मूलकूटत्रय कलेवरा । कुलामृतैक - रसिका कुलसङ्केत पालिनी ॥३६॥
कुलाङ्गना कुलान्तस्थाः कौलिनी कुलयोगिनी । अकुला समयान्तस्था, समयाचार तत्परा ॥३७॥
मूलाधारैक निलया ब्रह्मग्रन्थिविभेदिनी । मणिपूरान्तरुदिता, विष्णुग्रन्थि विभेदिनी ॥३८॥

॥ आधेन शतकेनाभूद द्वितीयां तापिनी कला ॥

आज्ञा चक्रान्तरालस्था रुद्र ग्रन्थि विभेदिनी । सहस्राराम्बुजारूढा, सुधा साराभि वर्षिणी ॥३९॥
तटिल्लता समरुचिः षट्चक्रोपरि संस्थिता । महाऽऽसक्तिः कुण्डलिनी, बिसतन्तु - तनीयसी ॥४०॥
भवानी भावनागम्या भवारण्यकुठारिका । भद्रप्रिया भद्रमूर्तिर्भक्त - सौभाग्यदायिनी ॥४१॥
भक्तप्रिया भक्तिगम्या भक्तिवश्या भयापहा । शाम्भवी शारदाऽऽराध्या, शर्वाणी शर्मदायिनी ॥४२॥
शाङ्करी श्रीकरी साध्वी, शरच्चन्द्र निभानना । शातोदरी शान्तिमती, निराधारा निरञ्जना ॥४३॥
निर्लेपा निर्मला नित्या, निराकारा निराकुला । निर्गुणा निष्कला शान्ता, निष्कामा निरुपप्लवा ॥४४॥
नित्य मुक्ता निर्विकारा, निष्प्रपञ्चा निराश्रया । नित्यशुद्धा नित्यबुद्धा, निरवद्या निरन्तरा ॥४५॥
निष्कारणा निष्कलङ्का, निरुपाधिर्निरीश्वरा । नीगा रागमथना, निर्मदा मदनाशिनी ॥४६॥
निश्चिन्ता निरहङ्कारा, निर्मोहा मोहनाशिनी । निर्ममा ममताहन्त्री, निष्पापा पापनाशिनी ॥४७॥
निष्क्रोधा क्रोधशमनी, निर्लोभा लोभनाशिनी । निःसंशया संशयघ्नी, निर्भवा भवनाशिनी ॥४८॥
निर्विकल्पा निराबाधा, निर्भेदा भेदनाशिनी । निर्नाशा मृत्यु मथिनी निष्क्रिया निष्परिग्रहा ॥४९॥
निस्तुला नीलचिकुरा, निरपाया निरत्यया । दुर्लभा दुर्गमा दुर्गा, दुःखहन्त्री सुखप्रदा ॥५०॥
दुष्टदूरा दूराचार - शमनी दोषवर्जिता । सर्वज्ञा सान्द्रकरुणा, समानाधिक - वर्जिता ॥५१॥
सर्वशक्तिमयी सर्वमङ्गला सद्गतिप्रदा । सर्वेश्वरी सर्वमयी, सर्वमन्त्र स्वरूपिणी ॥५२॥

॥ तृतीया धुम्रिका कला ॥

सर्वयन्त्रात्मिका सर्वतन्त्ररूपा मनोन्मनी । माहेश्वरी महादेवी, महालक्ष्मीर्मृडप्रिया ॥५३॥
महारूपा महापूज्या, महापातकनाशिनी । महामाया महासत्वा महाशक्तिर्महारतिः ॥५४॥

महाभोगा महैश्वर्या, महावीर्या महाबला । महाबुद्धिर्महासिद्धि, र्महायोगेश्वरेश्वरी ॥५५॥
महातन्त्रा महामन्त्रा, महायन्त्रा महाऽऽसना । महायाग - क्रमाराध्या, महाभैरव पूजिता ॥५६॥
महेश्वर महाकल्प महाताण्डवसाक्षिणी । महाकामेश - महिषी, महात्रिपुरसुन्दरी ॥५७॥
चतुःषष्ट्युपचाराढ्या, चतुःषष्टिकलामयी । महाचतुः षष्टिकोटि - योगिनीगणसेविता ॥५८॥
मनुविद्या चन्द्रविद्या, चन्द्रमण्डल मध्यगा । चारुरूपा चारुहासा, चारुचन्द्र - कलाधरा ॥५९॥
चराचर जगन्नाथा, चक्रराजनिकेतना । पार्वती पद्मनयना, पद्मराग समप्रभा ॥६०॥
पञ्चप्रेतासनासीना, पञ्चब्रह्मस्वरूपिणी । चिन्मयी परमानन्दा, विज्ञानघन-रूपिणी ॥६१॥
ध्यान ध्यातृ - ध्येयरूपा, धर्माधर्म विवर्जिता । विश्वरूपा जागरिणी, स्वपन्ती तैजसात्मिका ॥६२॥
सुप्ता प्राज्ञात्मिका तुर्या, सर्वावस्था विवर्जिता । सृष्टिकर्त्री ब्रह्मरूपा, गोप्त्री गोविन्दरूपिणी ॥६३॥
संहारिणी रुद्ररूपा, तिरोधान करीश्वरी । सदाशिवाऽनुग्रहदा, पञ्चकृत्य - परायणा ॥६४॥
भानुमण्डल - मध्यस्था, भैरवी भगमालिनी । पद्मासना भगवती, पद्मनाभ सहोदरी ॥६५॥
उन्मेष निमिषोत्पन्न विपन्न - भुवनावली । सहस्रशीर्षवदना, सहस्राक्षी सहस्रपात् ॥६६॥
आब्रह्म - कीटजननी, वर्णाश्रमविधायिनी । निजाज्ञा रूप निगमा, पुण्यापुण्य फल प्रदा ॥६७॥
श्रुति सीमन्त सिन्दूरीकृत पादाब्ज धूलिका । सकलागम सन्दोह शुक्तिसम्पुट मौक्तिका ॥६८॥
पुरुषार्थप्रदा पूर्णा, भोगिनी भुवनेश्वरी । अम्बिकाऽनादि निधना, हरिब्रह्मेन्द्र सेविता ॥६९॥
नारायणी नादरूपा, नामरूप विवर्जिता । ह्रींकारी ह्रीमती हृद्या, हेयोपादेय वर्जिता ॥७०॥

॥ मरीच्याख्या कला तुर्या जाता नाम्नाशतत्रयात् ॥

राज राजार्चिता राज्ञी, रम्या, राजीव लोचना । रञ्जनी रमणी रस्या, रणत् किङ्किणि मेखला ॥७१॥
रमाराकेन्दु वदना, रतिरूपा रतिप्रिया । रक्षाकरी राक्षसघ्नी, रामा रमण लम्पटा ॥७२॥
काम्या कामकलारूपा, कदम्बकुसुमप्रिया । कल्याणी जगतीकन्दा, करुणारससागरा ॥७३॥
कलावती कलाऽऽलापा, कान्ता कादम्बरीप्रिया । वरदा वामनयना, वारुणी - मदविह्वला ॥७४॥
विश्वाधिका वेद-वेद्या, विन्ध्याचलनिवासिनी । विधात्री वेदजननी, विष्णुमायाविलासिनी ॥७५॥
क्षेत्र-स्वरूपा क्षेत्रेशी, क्षेत्रक्षेत्रज्ञ-पालिनी । क्षयवृद्धि विनिर्मुक्ता, क्षेत्रपाल समर्चिता ॥७६॥
विजया विमला वन्द्या, वन्दारु-जनवत्सला । वाग् वादिनी वामकेशी, वह्निमण्डलवासिनी ॥७७॥
भक्तिमत् कल्प लतिका, पशुपाशविमोचिनी । संहृताशेष-पाखण्डा, सदाचार-प्रवर्तिका ॥७८॥
तापत्रयाग्नि-सन्तप्त समाह्लादन चन्द्रिका । तरुणी तापसाराध्या, तनुमध्या तमोऽपहा ॥७९॥
चितिस्तत् पदलक्ष्यार्था, चिदेक रसरूपिणी । स्वात्मानन्द-लवीभूत ब्रह्माद्यानन्द सन्ततिः ॥८०॥
परा प्रत्यक्-चितीरूपा, पश्यन्ती परदेवता । मध्यमा-वैखरीरूपा, भक्तमानस-हंसिका ॥८१॥
कामेश्वर प्राणनाडी, कृतज्ञा कामपूजिता । शृङ्गाररससम्पूर्णा, जया जालन्धर-स्थिता ॥८२॥
ओड्याण पीठनिलया, बिन्दु मण्डल वासिनी । रहोयाग क्रमाराध्या, रहस्तर्पण तर्पिता ॥८३॥

सद्यः प्रसादिनी विश्व साक्षिणी साक्षि वर्जिता । षडङ्ग - देवतायुक्ता, षाड्गुण्य परिपूरिता ॥८४॥
नित्य क्लिन्ना निरुपमा, निर्वाणसुखदायिनी । नित्या षोडशिकारूपा, श्रीकण्ठार्ध शरीरिणी ॥८५॥
प्रभावती प्रभारूपा, प्रसिद्धा परमेश्वरी । मूलप्रकृतिरव्यक्ता, व्यक्ताव्यक्त स्वरूपिणी ॥८६॥
॥ व्यापिनी विविधाकारा, विद्याऽविद्या स्वरूपिणी ॥
चतुर्थ शतकेनाभूत् पंचमी ज्वालिनी कला । महाकामेश-नयन कुमुदाह्लाद कौमुदी ॥८७॥
भक्तहार्द तमोभेद-भानु मद् भानुसन्ततिः । शिवदूती शिवाराध्या, शिवमूर्तिः शिवङ्करी ॥८८॥
शिवप्रिया शिवपरा, शिष्टेष्टा शिष्ट पूजिता । अप्रमेया स्वप्रकाशा, मनोवाचामगोचरा ॥८९॥
चिच्छक्तिश्चेतना रूपा, जडशक्तिर्जडात्मिका । गायत्री व्याहृतिः सन्ध्या, द्विजवृन्द-निषेविता ॥९०॥
तत्त्वासना तत्त्वमयी, पञ्चकोशान्तर स्थिता । निःसीम महिमा नित्ययौवना मदशालिनी ॥९१॥
मदघूर्णित रक्ताक्षी, मदपाटल - गण्ड- भूः । चन्दन द्रव दिग्धाङ्गा , चाम्पेय कुसुमप्रिया ॥९२॥
कुशला कोमलाकारा, कुरुकुल्ला कुलेश्वरी । कुल कुण्डालया कौलमार्ग तत्पर सेविता ॥९३॥
कुमार- गणनाथाम्बा, तुष्टिः पुष्टिर्मतिर्धृतिः । शान्तिः स्वस्तिमती, कान्तिर्नन्दिनी विघ्ननाशिनी ॥९४॥
तेजोवती त्रिनयना, लोलाक्षी कामरूपिणी । मालिनी हंसिनी माता, मलयाचलवासिनी ॥९५॥
सुमुखी नलिनी सुभ्रूः, शोभना सुरनायिका । कालकण्ठी कान्तिमती, क्षोभिणी सूक्ष्मरूपिणी ॥९६॥
वज्रेश्वरी वामदेवी, वयोऽवस्था विवर्जिता । सिद्धेश्वरी सिद्धविद्या, सिद्धमाता यशस्विनी ॥९७॥
विशुद्धि चक्र निलयाऽऽरक्तवर्णा त्रिलोचना । खट्वाङ्गादि - प्रहरणा, वदनैक - समन्विता ॥९८॥
पायसान्नप्रिया त्वक्स्था, पशुलोक भयङ्करी । अमृतादि महाशक्ति संवृता डाकिनीश्वरी ॥९९॥
अनाहताब्जनिलया, श्यामाभा वदनद्वया । दंष्ट्रोज्ज्वलाक्ष मालादिधरा रुधिरसंस्थिता ॥१००॥
काल - रात्र्यादि शक्त्यौघवृता स्निग्धौदन प्रिया । महावीरेन्द्र - वरदा राकिण्यम्बा स्वरूपिणी ॥१०१॥
मणिपूराब्जनिलया, वदनत्रय - संयुता । वज्रादिकायुधोपेता, डामर्यादिभिरावृता ॥१०२॥
रक्तवर्णा मांसनिष्ठा गुडान्न - प्रीतमानसा । समस्तभक्त सुखदा, लाकिन्यम्बा स्वरूपिणी ॥१०३॥
स्वाधिष्ठानाम्बुजगता, चतुर्वक्त्र - मनोहरा । शूलाद्यायुध सम्पन्ना, पीतवर्णाऽति गर्विता ॥१०४॥
मेदो निष्ठा मधु प्रीता, बन्धिन्यादि समन्विता । दध्यन्नासक्त - हृदया, काकिनी - रूपधारिणी ॥१०५॥
मूलाधाराम्बुजारूढा, पञ्चवक्त्राऽस्थि संस्थिता । अंकुशादि प्रहरणा, वरदादि निषेविता ॥१०६॥
मुद्गौदनासक्त - चित्ता, साकिन्यम्बा स्वरूपिणी । आज्ञाचक्राब्ज-निलया, शुक्लवर्णा- षडानना ॥१०७॥
मज्जासंस्था हंसवती, मुख्यशक्ति - समन्विता । हरिद्रान्नैकरसिका, हाकिनीरूपधारिणी ॥१०८॥
सहस्त्रदल - पद्मस्था, सर्व वर्णोपशोभिता । सर्वायुधधरा शुक्लसंस्थिता सर्वतोमुखी ॥१०९॥
सर्वौदन-प्रीत चित्ता, याकिन्यम्बा स्वरूपिणी । स्वाहा स्वधा मतिर्मेधा, श्रुति स्मृतिरनुत्तमा ॥११०॥
पुण्यकीर्तिः पुण्यलभ्या, पुण्यश्रवण कीर्तना । पुलोमजाऽर्चिता बन्धमोचिनी बन्धुरालका ॥१११॥
विमर्शरूपिणी विद्या, वियदादि जगत् प्रसूः । सर्वव्याधिप्रशमनी, सर्वमृत्युनिवारिणी ॥११२॥

अग्रगण्याऽचिन्त्यरूपा, कलिकल्मष नाशिनी । कात्यायनी कालहन्त्री, कमलाक्ष - निषेविता ॥११३॥

ताम्बूलपूरित - मुखी, दाडिमीकुसुम - प्रभा । मृगाक्षी मोहिनी मुख्या, मृडानी मित्ररूपिणी ॥११४॥

नित्यतृप्ता भक्तनिधिर्नियन्त्री निखिलेश्वरी । मैत्र्यादि - वासाना लभ्या, महाप्रलयसाक्षिणी ॥११५॥

पराशक्तिः परानिष्ठा, प्रज्ञान घनरूपिणी । माध्वी पानालसा मत्ता, मातृका - वर्णरूपिणी ॥११६॥

महाकैलास - निलया, मृणाल-मृदुदोर्लता । महनीया दयामूर्तिर्महा - साम्राज्यशालिनी ॥११७॥

आत्म विद्या महाविद्या, श्रीविद्याकामसेविता । श्रीषोडशाक्षरी विद्या, त्रिकूटा काम कोटिका ॥११८॥

कटाक्ष किङ्करीभूत कमलाकोटिसेविता । शिरः स्थिता चन्द्रनिभा, भालस्थेन्द्र धनुष्प्रभा ॥११९॥

हृदयस्था रविप्रख्या, त्रिकोणान्तर दीपिका । दाक्षायणी दैत्यहन्त्री, दक्षयज्ञविनाशिनी ॥१२०॥

॥ षष्ठेन शतकेनाभूद सुषुम्णा सप्तमी कला ॥

दरान्दोलित दीर्घाक्षी, दरहासोज्ज्वलन्मुखी । गुरुमूर्तिर्गुण - निधिर्गोमाता गुहजन्म भूः ॥१२१॥

देवेशी दण्डनितिस्था, दहराकाश- रूपिणी । प्रतिपन्मुख्य - राकान्त - तिथिमण्डल पूजिता ॥१२२॥

कलात्मिका कलानाथा, काव्यालाप विमोदिनी । स चामर रमा वाणी सव्य दक्षिणसेविता ॥१२३॥

आदि शक्तिरमेयात्मा, परमा पावनाकृतिः । अनेक कोटिब्रह्माण्ड - जननी दिव्यविग्रहा ॥१२४॥

क्लीङ्कारी केवला गुह्या, कैवल्यपद - दायिनी । त्रिपुरा त्रिजगद्वन्द्या, त्रिमूर्तिस्त्रिदशेश्वरी ॥१२५॥

त्र्यक्षरी दिव्यगन्धाढ्या, सिन्दूरतिलकाञ्चिता । उमा शैलेन्द्रतनया, गौरी गन्धर्वसेविता ॥१२६॥

विश्वगर्भा स्वर्णगर्भा, वरदा वागधीश्वरी । ध्यान गम्याऽपरिच्छेद्या, ज्ञानदा ज्ञानविग्रहा ॥१२७॥

सर्व वेदान्त- सम्वेद्या, सत्यानन्दस्वरूपिणी । लोपामुद्रार्चिता लीला क्लृप्त ब्रह्माण्डमण्डला ॥१२८॥

अदृश्या दृश्यरहिता, विज्ञात्री वेद्य वर्जिता । योगिनी योगदा योग्या, योगानन्दा युगन्धरा ॥१२९॥

इच्छाशक्ति ज्ञानशक्ति क्रियाशक्तिस्वरूपिणी । सर्वाधारा सुप्रतिष्ठा, सदसद्रूप धारिणी ॥१३०॥

अष्टमूर्तिरजा जैत्री, लोकयात्राविधायिनी । एकाकिनी भूमरूपा, निर्द्वैता द्वैतवर्जिता ॥१३१॥

अन्नदा वसुदा वृद्धा, ब्रह्मात्मैक्य स्वरूपिणी । बृहती ब्रह्माणी ब्राह्मी, ब्रह्मानन्दा बलिप्रिया ॥१३२॥

भाषारूपा बृहत्सेना, भावाभाव विवर्जिता । सुखाराध्या शुभकरी, शोभना सुलभा गतिः ॥१३३॥

राजराजेश्वरी राज्यदायिनी राज्यवल्लभा । राजत् कृपा राजपीठ निवेशित निजाश्रिता ॥१३४॥

राज्यलक्ष्मीः कोशनाथा, चतुरङ्ग - बलेश्वरी । साम्राज्यदायिनी सत्यसन्धा सागरमेखला ॥१३५॥

दीक्षिता दैत्य शमनी, सर्वलोकवशङ्करी । सर्वार्थदात्री सावित्री, सच्चिदानन्दरूपिणी ॥१३६॥

॥ सप्तमेन शतकेनाभूदष्टमो भोगदा कला ॥

देश कालापरिच्छिन्ना, सर्वगा सर्व मोहिनी । सरस्वती शास्त्रमयी, गुहाम्बा गुह्य रूपिणी ॥१३७॥

सर्वोपाधि विनिर्मुक्ता, सदाशिव - पतिव्रता । सम्प्रदायेश्वरी साध्वी, गुरुमण्डलरूपिणी ॥१३८॥

कुलोत्तीर्णा भगाराध्या, माया मधु मती मही । गणाम्बा गुह्यकाराध्या, कोमलाङ्गी गुरुप्रिया ॥१३९॥

स्वतन्त्रा सर्वतन्त्रेशी, दक्षिणामूर्तिरूपिणी । सनकादि समाराध्या, शिवज्ञानप्रदायिनी ॥१४०॥

चित् - कलानन्दकलिका, प्रेमरूपा प्रियङ्करी । नामपारायण - प्रीता, नन्दिविद्या नटेश्वरी ॥१४१॥
मिथ्या जगदधिष्ठाना, मुक्तिदा मुक्तिरूपिणी । लास्यप्रिया लयकरी, लज्जा रम्भादि वन्दिता ॥१४२॥
भवदा वसुधा वृष्टिः, पापारण्य दवानला । दौर्भाग्य - तूल- वातूला, जराध्वान्त - रविप्रभा ॥१४३॥
भाग्याब्धिचन्द्रिका भक्तचित्त केकि घनाघना । रोग पर्वत दम्भोलिर्मृत्यु दारु कुठारिका ॥१४४॥
महेश्वरी महाकाली, महाग्रासा महाऽशना । अपर्णा चण्डिका चण्डमुण्डासुर निषूदनी ॥१४५॥
क्षराक्षरात्मिका सर्वलोकेशी विश्वधारिणी । त्रिवर्गदात्री सुभगा, त्र्यम्बका त्रिगुणात्मिका ॥१४६॥
स्वर्गापवर्गदा शुद्धा, जपापुष्प निभाऽऽकृतिः । ओजोवती द्युतिधरा, यज्ञरूपा प्रियव्रता ॥१४७॥
दुराराध्या दुराधर्षा, पाटली - कुसुमप्रिया । महती मेरुनिलया, मन्दारकुसुमप्रिया ॥१४८॥
वीराराध्या विराड्रूपा, विरजा विश्वतोमुखी । प्रत्यग्रूपा पराकाशा, प्राणदा प्राणरूपिणी ॥१४९॥
मार्तण्ड भैरवाराध्या, मन्त्रिणी न्यस्तराज्य - धूः । त्रिपुरेशी जयत्सेना, निस्त्रैगुण्या परापरा ॥१५०॥
सत्यज्ञानानन्दरूपा, सामरस्य - परायणा । कपर्दिनी कलामाला, कामधुक् कामरूपिणी ॥१५१॥
कलानिधिः काव्यकला, रसज्ञा रस-शेवीधाः । पुष्टा पुरातना पूज्या, पुष्करा पुष्करेक्षण ॥१५२॥

॥ शतकेनाष्टमेनाभूद विश्वाख्या नवमीकला ॥

परंज्योतिः परंधाम, परमाणुः परात्परा । पाशहस्ता पाशहन्त्री, परमन्त्र विभेदिनी ॥१५३॥
मूर्ताऽमूर्ता नित्यतृप्ता, मुनिमानस - हंसिका । सत्यव्रता सत्यरूपा, सर्वान्तर्यामिणी सती ॥१५४॥
ब्रह्माणी ब्रह्मजननी, बहुरूपा बुधार्चिता । प्रसवित्री प्रचण्डाऽऽज्ञा, प्रतिष्ठा प्रकटाकृतिः ॥१५५॥
प्राणेश्वरी प्राणदात्री, पञ्चाशत् पीठरूपिणी । विशृङ्खला विक्तिस्था, वीरमाता वियत् प्रसूः ॥१५६॥
मुकुन्दा मुक्तिनिलया, मूलविग्रहरूपिणी । भावज्ञा भावरोगघ्नी, भवचक्रप्रवर्तिनी ॥१५७॥
छन्दःसारा शास्त्रसारा, मन्त्रसारा तलोदरी । उदार कीर्तिरुद्दाम - वैभवा वर्णरूपिणी ॥१५८॥
जन्ममृत्यु जरा तप्तजन विश्रान्तिदायिनी । सर्वोपनिषदुद्घुष्टा, शान्त्यतीता कलात्मिका ॥१५९॥
गम्भीरा गगनान्तस्था, गर्विता गानलोलुपा । कल्पना रहिता काष्ठाऽकान्ताकान्तार्ध विग्रहा ॥१६०॥
कार्य कारण निर्मुक्ता, कामकेलि तरङ्गिता । कनत् कनकताटङ्का, लीलाविग्रहधारिणी ॥१६१॥
अजा क्षयविनिर्मुक्ता, मुग्धा क्षिप्रप्रसादिनी । अन्तर्मुख - समाराध्या, बहिर्मुख - सुदुर्लभा ॥१६२॥
त्रयी त्रिवर्गनिलया, त्रिस्था त्रिपुरमालिनी । निरामया निरालम्बा, स्वात्मारामा सुधा स्रुतिः ॥१६३॥
संसारपङ्क - निर्मग्न समुद्धरण - पण्डिता । यज्ञप्रिया यज्ञकर्त्री, यजमान - स्वरूपिणी ॥१६४॥
धर्माधारा धनाध्यक्षा, धनधान्यविवर्धिनी । विप्रप्रिया विप्ररूपा, विश्वभ्रमणकारिणी ॥१६५॥
विश्वग्रासा विद्रुमाभा, वैष्णवी विष्णुरूपिणी । अयोनिर्योनि - निलया, कूटस्था कुलरूपिणी ॥१६६॥
वीरगोष्ठी- प्रिया वीरा, नैष्कर्म्या नादरूपिणी । विज्ञान कलना कल्या, विदग्धा बैन्दवासनी ॥१६७॥

॥ नवमेन शतकेनाभूद दशमी बोधिनी कला ॥

तत्त्वाधिका तत्त्वमयी, तत्त्वमर्थ स्वरूपिणी । साम गान प्रिया सौम्या, सदाशिव कुटुम्बिनी ॥१६८॥

सव्यापसव्य - मार्गस्था, सर्वापद् - विनिवारिणी । स्वस्था स्वभाव - मधुरा, धीरा धीरसमर्चिता ॥१६९॥
चैतन्यार्घ्य - समाराध्या, चैतन्यकुसुमप्रिया । सदोदिता सदातुष्टा, तरुणादित्य - पाटला ॥१७०॥
दक्षिणाऽदक्षिणाराध्या, दरस्मेर - मुखाम्बुजा । कौलिनी केवलाऽनर्घ्य कैवल्यपददायिनी ॥१७१॥
स्तोत्रप्रिया स्तुतिमती, श्रुतिसंस्तुतवैभवा । मनस्विनी मानवती, महेशी मङ्गलाकृतिः ॥१७२॥
विश्वमाता जगद्धात्री, विशालाक्षी विरागिणी । प्रगल्भा परमोदारा, पराऽऽमोदा मनोमयी ॥१७३॥
व्योमकेशी विमानस्था, वज्रिणी वामकेश्वरी । पञ्चयज्ञप्रिया पञ्चप्रेतमञ्चाधि - शायिनी ॥१७४॥
पञ्चमी पञ्च भूतेशी, पञ्च संख्योपचारिणी । शाश्वती शाश्वतैश्वर्या, शर्मदा शम्भुमोहिनी ॥१७५॥
धराधरसुता धन्या, धर्मिणी धर्मवर्धिनी । लोकातीता गुणातीता, सर्वातीता शमात्मिका ॥१७६॥
बन्धूककुसुम - प्रख्या, बाला लीलाविनोदिनी । सुमङ्गली सुखकरी, सुवेषाढ्या सुवासिनी ॥१७७॥
सुवासिन्यर्चन प्रीताऽऽशोभना शुद्धमानसा । बिन्दुतर्पण - सन्तुष्टा, पूर्वजा त्रिपुराऽम्बिका ॥१७८॥
दशमुद्रा- समाराध्या, त्रिपुराश्रीवशङ्करी । ज्ञानमुद्रा ज्ञानगम्या, ज्ञानज्ञेय - स्वरूपिणी ॥१७९॥
योनिमुद्रा त्रिखण्डेशी, त्रिगुणाम्बा त्रिकोणगा । अनघाऽद्भुत चारित्रा, वाञ्छितार्थप्रदायिनी ॥१८०॥
अभ्यासातिशय ज्ञाता, षडध्वातीत रूपिणी । अव्याज - करुणा मूर्तिरज्ञान व्वान्तदीपिका ॥१८१॥
आबाल - गोपविदिता, सर्वानुल्लङ्घ्य शासना । श्रीचक्रराज - निलया, श्रीमत्त्रिपुरसुन्दरी ॥१८२॥
श्रीशिवाशिव शक्त्यैक्यरूपिणी ललिताऽम्बिका ॥
दशमेन दशतकेनाभूद् धारिण्ये कला ।

पुनः विनियोग, ऋष्यादि न्यास करषडङ्गन्यासादि पूर्वकं ध्यानं कृत्वा मानस पूजनं च कुर्यात्। ततः प्रार्थयेत् -अनेन श्रीललिता सहस्त्रनाम स्तोत्र पाठेन श्रीराजराजेश्वरी महात्रिपुरसुन्दरी देवता प्रीयताम्॥

॥ फलश्रुति ॥

॥ हयग्रीव उवाच ॥

इत्येव नाम साहस्त्रं, कथितं ते घटोद्भव । रहस्यानां रहस्यं च ललिताप्रीतिदायकम् ॥१॥
अनेन सदृशं स्तोत्रं, न भूतं न भविष्यति । सर्वरोग - प्रशमनं, सर्वसम्पत्प्रवर्धनम् ॥२॥
सर्वापमृत्यु - शमनं, कालमृत्यु निवारणम् । सर्व ज्वरार्ति शमनं, दीर्घायुष्य - प्रदायकम् ॥३॥
पुत्र- प्रदमपुत्राणां, पुरुषार्थ प्रदायकम् । इदं विशेषाच्छ्री देव्याः, स्तोत्रं प्रीति विधायकम् ॥४॥
जपेन्नित्यं प्रयत्नेन, ललितोपास्ति तत्परः । प्रातः स्नात्वा विधानेन, सन्ध्याकर्म समाप्य च ॥५॥
पूजागृहं ततो गत्वा चक्रराजं समर्चयेत् । विद्यां जपेत् सहस्त्रं वा त्रिशतं शतमेव वा ॥६॥
रहस्य नाम साहस्त्रमिदं पश्चात् पठेन्नरः । जन्ममध्ये सकृच्चापि य एवं पठते सुधीः ॥७॥
तस्य पुण्यफलं वक्ष्ये शृणु त्वं कुंभसम्भव । गङ्गादि सर्वतीर्थेषु यः स्नायात्कोटिजन्मसु ॥८॥
कोटिलिङ्ग प्रतिष्ठां तु यः कुर्यादविमुक्तके । कुरुक्षेत्रे च यो दद्यात्कोटिवारं रविग्रहे ॥९॥
कोटिं सौवर्णभाराणां श्रोत्रियेषु द्विजन्मसु । यः कोटि हयमेधानामाहरेद् गाङ्गरोधसि ॥१०॥

आचरेत् कूप कोटीर्यो, निर्जले मरुभूतले । दुर्भिक्षे यः प्रतिदिनं, कोटिब्राह्मणभोजनम् ॥११॥
श्रद्धया परया कुर्यात्, सहस्त्र परिवत्सरान् । तत् पुण्यं कोटि गुणितं, लभेत् पुण्यमनुत्तमम् ॥१२॥
रहस्य नाम सहस्त्रे, नाम्नोऽप्येकस्य कीर्तनात् । रहस्य नाम साहस्त्रे, नामैकमपि यः पठेत् ॥१३॥
तस्य पापानि नश्यन्ति, महान्त्यपि न संशयः । नित्य कर्माननुष्ठानान्निषिद्ध करणादपि ॥१४॥
यत्पापं जायते पुंसां तत्सर्वं नश्यन्ति ध्रुवम् । बहुनाऽत्र किमुक्तेन शृणु त्वं कलशीसुत ॥१५॥
अत्रैकनाम्नो या शक्तिः पातकानां निवर्तने । तन्निवर्त्यमघं कर्तुं नालं लोकाश्चतुर्दश ॥१६॥
यस्त्यक्त्वा नामसहस्त्र पापहानिमभीप्सति । स हि शीतनिवृत्त्यर्थ हिमशैलं निषेवते ॥१७॥
भक्तो यः कीर्तयन्नित्यमिदं नाम सहस्त्रकम् । तस्मै श्रीललिता देवी, प्रीताऽभीष्टं प्रयच्छति ॥१८॥
नवम्यां वा चतुर्दश्यां, सितायां शुक्रवासरे । कीर्तयेन्नाम साहस्त्रं, पौर्णमास्यां विशेषतः ॥१९॥
पौर्णमास्यां चन्द्रबिम्बे, ध्यात्वा श्रीललिताम्बिकां । पञ्चोपचारैः सम्पूज्य, पठेन्नाम सहस्त्रकम् ॥२०॥
सर्वरोगाः प्रणश्यन्ति, दीर्घायुष्यं च विन्दति । अयमायुष्करो नाम, प्रयोगः कल्पनोदितः ॥२१॥
ज्वरार्तं शिरसि स्पृष्ट्वा, पठेन्नाम सहस्त्रकम् । तत् क्षणात् प्रशमं याति, शिरस्तोदो ज्वरोऽपि च ॥२२॥
सर्वव्याधि निवृत्त्यर्थ, स्पृष्ट्वा भस्म जपेदिदम् । तद् भस्म धारणादेव, नश्यन्ति व्याधयो क्षणात् ॥२३॥
जलं सम्मन्त्र्य कुम्भस्थं, नाम साहस्त्रतो मुने! । अभिषिञ्चेद् ग्रह ग्रहस्तान्, ग्रहा नश्यंति तत्क्षणात् ॥२४॥
सुधासागर- मध्यस्थां, ध्यात्वा श्रीललिताऽम्बिकाम् । यः पठेन्नाम साहस्त्रं, विषं तस्य विनश्यति ॥२५॥
वन्ध्यानां पुत्रलाभाय, नामसाहस्त्र मन्त्रितम् । नवनीतं प्रदद्यात्तु, पुत्रलाभो भवेद्-ध्रुवम् ॥२६॥
देव्याः पाशेन सम्बद्धामाकृष्टामंकुशेन च । ध्यात्वाऽभीष्टां स्त्रियं रात्रौ, पठेन्नाम सहस्त्रकम् ॥२७॥
आयाति स्वसमीपं, सा यद्यप्यन्तः पुरं गता । राजाऽऽकर्षण कामश्चेद्, राजाऽवसथ दिङ् मुखः ॥२८॥
त्रि रात्रं यः पठेदेतच्छ्री देवी ध्यानतत्परः । स राजा पार वश्येन मातङ्गं वा तमङ्गजम् ॥२९॥
आरुह्याऽऽयाति निकटं, दासवत् प्रणिपत्य च । तस्मै राज्यं च कोशं च, दद्यादेव वशं गतः ॥३०॥
रहस्य नाम साहस्त्रं, यः कीर्तयति नित्यशः । तन्मुखालोक मात्रेण, मुह्येल्लोकत्रयं मुने! ॥ ३१॥
यस्त्विदं नाम साहस्त्र, सकृत् पठति भक्तिमान् । तस्य ये शत्रवस्तेषां, निहन्ता शरभेश्वरः ॥३२॥
यो वाऽभिचारं कुरुते, नाम सहस्त्रपाठके । निवर्त्य तत् क्रियां हन्यात्, तं वै प्रत्यङ्गिरा स्वयम् ॥३३॥
ये क्रूर दृष्ट्या वीक्ष्यन्ते, नाम सहस्त्रपाठकम् । तानन्धान् कुरुते क्षिप्रं, स्वयं मार्तण्ड भैरवः ॥३४॥
धनं यो हरते चौरैनमि साहस जापिनः । यत्र कुत्र स्थितं वापि, क्षेत्रपालो निहन्ति तम् ॥३५॥
विद्यासु कुरुते वादं, यो विद्वान नाम जापिनः । तस्य वाक्स्तम्भनं सद्यः, करोति नकुलीश्वरी ॥३६॥
यो राजा कुरुते वैरं, नाम साहस जापिनः । चतुरङ्ग बलं तस्य, दण्डिनी संहरेत् स्वयम् ॥३७॥
यः पठेन्नाम साहस्त्रं, षणमासं भक्ति संयुतः । लक्ष्मीश्चाञ्चल्य रहिता, सदा तिष्ठति तद् गृहे ॥३८॥
मासमेकं प्रतिदिनं, त्रिवारं यः पठेन्नरः । भारती तस्य जिह्वाग्रे, रङ्गे नृत्यति नित्यशः ॥३९॥

यस्त्वेक वारं पठति, पक्षमेकमतन्द्रितः । मुह्यन्ति काम वशगा, मृगाक्ष्यस्तस्य वीक्षणात् ॥४०॥

यः पठेन्नाम साहसं, जंम मध्ये सकृन्नरः । तद् दृष्टि गोचराः सर्वे, मुच्यन्ते सर्व किल्विषैः ॥४१॥

यो वेत्ति नाम साहस्रं, तस्मै देयं द्विजन्मने । अन्नं वस्त्रं धनं धान्यं, नान्येभ्यस्तु कदाचन ॥४२॥

श्रीमंत्रराजं यो वेत्ति श्रीचक्रं यः समर्चति । यः कीर्तयति नामानि, तं सत् - पात्रं विदुर्बुधाः ॥४३॥

तस्मै देयं प्रयत्नेन, श्रीदेवी प्रीतिमिच्छता ॥४४॥

न कीर्तयति नामानि, मन्त्र राजं न वेत्ति यः । पशु तुल्यः स विज्ञेयस्तस्मै दत्तं निरर्थकम् ॥४५॥

परीक्ष्य विद्या विदुषस्तेभ्यो दद्याद् विचक्षणः ॥ श्रीमन्त्र राज सदृशो, यथा मन्त्रो न विद्यते । ॥४६॥

देवता ललिता तुल्या, यथा नास्ति घटोद्भव ! रहस्य नाम साहस्र तुल्या नास्ति तथा स्तुतिः ॥४७॥

लिखित्वा पुस्तके यस्तु, नाम साहस्रमुत्तमम् । समर्चयेत् सदाभक्त्या, तस्य तुष्यति सुन्दरी ॥४८॥

बहुनाऽत्र किमुक्तेन, शृणु त्वं कुम्भ सम्भव! नानेन सदृशं स्तोत्रं, सर्व तन्त्रेषु विद्यते ॥४९॥

तस्मादुपासको नित्यं, कीर्तयेदिदमादरात् । एभिर्नाम सहस्रैस्तु श्रीचक्रं योऽर्चयेत् सकृत् ॥५०॥

पद्मैर्वा तुलसीपुष्पैः, कह्लारैर्वा कदम्बकैः । चम्पकैर्जाति कुसुमैर्मल्लिका करवीरकैः ॥५१॥

उत्पलैर्विल्वपत्रैर्वा, कुन्द केसर पाटलैः । अन्यैः सुंगधिकुसुमै केतकी माधवीमुखैः ॥५२॥

तस्य पुण्य फलं वक्तुं, न शक्नोति महेश्वरः ॥५३॥

सा वेत्ति ललिता देवी, स्व चक्रार्चनजं फलम् । अन्ये कथं विजानीयुर्ब्रह्माद्याः स्वल्प मेधसः? ॥५४॥

प्रतिमासं पौर्णमास्यामेभिर्नाम सहस्रकैः । रात्रौः यश्चक्रराजस्थामर्चयेत् परदेवताम् ॥५४॥

स एव ललितारूपस्तद्- रूपा ललिता स्वयम् । न तयोर्विद्यते भेदो, भेदकृत् पापकृद- भवेत् ॥५५॥

महानवम्यां यो भक्तः, श्रीदेवीं चक्रमध्यगाम् । अर्चयेन्नाम साहस्रैस्तस्य मुक्तिः करे स्थिता ॥५६॥

यस्तु नामसाहस्रेण, शुक्रवारे समर्चयेत् । चक्रराजे महादेवीं, तस्य पुण्य फलं शृणु ॥५७॥

सर्वान् कामानवाप्येह, सर्वसौभाग्य संयुतः । पुत्र पौत्रादि संयुक्तो, भुक्त्वा भोगान् यथेप्सितान् ॥५८॥

अन्ते श्रीललिता देव्याः, सायुज्यमति दुर्लभम् । प्रार्थनीयं शिवाद्यैश्च, प्राप्नोत्येव न संशयः ॥५९॥

यः सहस्त्रं ब्राह्मणानामेभिर्नाम सहस्रकैः । समर्च्य भोजयेद् भक्त्या पायसापूप षड्रसैः ॥६०॥

तस्मै प्रीणाति ललिता, स्वसाम्राज्यं प्रयच्छति । न तस्य दुर्लभं वस्तु, त्रिषु लोकेषु विद्यते ॥६१॥

निष्कामः कीर्तयेद् यस्तु, नाम साहस्रमुत्तमम् । ब्रह्मज्ञानमवाप्नोति, येन मुच्येत बन्धनात् ॥६२॥

धनार्थी धनमाप्नोति, यशोऽर्थी चाप्नुयाद् यशः । विद्यार्थी चाप्नुयाद् विद्यां, नाम साहस्र कीर्तनात् ॥६३॥

नानेन सदृशं स्तोत्रं, भोग मोक्ष प्रदं मुने ! कीर्तनीयमिदं तस्माद् भोग मोक्षार्थिभिर्नरैः ॥६४॥

चतुराश्रम निष्ठैश्च, कीर्तनीयमिदं सदा । स्वधर्म समनुष्ठान वैकल्प परिपूर्तये ॥६५॥

कलौ पापैक बहुले, धर्मानुष्ठान वर्जिते । नामानुकीर्तनं मुक्त्वा, नृणां नान्यत् परायणम् ॥६६॥

लौकिकाद् वचनान्मुख्यं, विष्णु नामानुकीर्तनम् । विष्णुनाम सहस्राच्च, शिव नामैकमुत्तमम् ॥६७॥

देवी नाम सहस्राणि, कोटिशः सन्ति कुम्भज ! तेषु मुख्यं दशविधं, नामसाहस्रमुच्यते ॥६८॥
रहस्य नाम साहस्रमिदं शस्तं दशस्वपि । तस्मात् सङ्कीर्तयेन्नित्यं, कलिदोष निवृत्तये ॥६९॥
मुख्यं श्रीमातृनामेति न जानन्ति विमोहिताः ॥७०॥
विष्णु नाम पराः केचिच्छिव नाम पराः परे। न कश्चिदपि लोकेषु, ललितानाम तत् परः ॥ ७१ ॥
येनान्य देवता नाम, कीर्तितं जन्म कोटिषु । तस्यैव भवति श्रद्धा, श्रीदेवी नाम कीर्तने ॥७२॥
चरमे जन्मनि यथा, श्रीविद्योपासको भवेत् । नाम साहस्र पाठश्च, तथा चरम जन्मनि ॥७३॥
यथैव विरला लोके, श्रीविद्याऽऽचार वेदिनः । तथैव विरलो गुह्यनाम साहस्र पाठकः ॥७४॥
मन्त्रराज जपश्चैव, चक्रराजार्चनं तथा । रहस्य नाम पाठश्च, नाल्पस्य तपसः फलम् ॥७५॥
अपठन् राम साहस्रं, प्रीणयेद् यो महेश्वरीम् । स चक्षुषा विना रूपं, पश्येदेव नरो परः ॥७६॥
रहस्य नाम साहस्रं, त्यक्त्वा यः सिद्धि कामुकः । स भोजनं विना नूनं, क्षुन्निवृत्तिमभीप्सति ॥७७॥
यो भक्तो ललिता देव्याः, स नित्यं कीर्तयेदिदं । नान्यथा प्रीयते देवी, कल्प कोटि शतैरपि ॥७८॥
तस्माद् रहस्य नामानि, श्रीमातुः प्रयतः पठेत् । इति ते कथितं स्तोत्रं, रहस्यं कुम्भ सम्भव ॥७९॥
नाविद्या वेदिने ब्रूयान्नाभक्ताय कदाचन । यथैव गोप्या श्रीविद्या, तथा गोप्यमिदं मुने ॥८०॥
स्वतन्त्रेण मया नोक्तं, तवापि कलशोद्भव ! ललिता प्रेरणादेव, मयोक्तं स्तोत्रमुत्तमम् ॥८१॥
कीर्तनीयमिदं भक्त्या, कुम्भयोने ! निरन्तरम् । तेन तुष्टा महादेवो, तवाभीष्टं प्रदास्यति ॥८२॥

॥ श्रीसूत उवाच ॥

इत्युक्त्वा श्रीहयग्रीवो, ध्यात्वा श्रीललिताऽम्बिकाम् । आनन्दमग्न हृदयः, सद्यः पुलकितोऽभवत् ॥८३॥

॥ श्रीत्रिपुरसुन्दरी मंत्रराज स्तोत्रम् ॥

''क'' कर्तुंदेवि जगद् विलास विधिना सृष्टेन ते मायया, सर्वानन्द मयेन मध्य विलसच्छ्री विन्दुनाऽलंकृतम् ।
श्रीमत् सद्गुरु पूज्यपाद करुणा सम्वेद्य तत्त्वात्मकम्, श्री चक्रं शरणं व्रजामि सततं सर्वेष्ट सिद्धि प्रदम् ॥१॥
''ए'' एकस्मिन्नणिमादिभिर्विलसितं भूमीगृहे सिद्धिभिः, बाह्याद्याभिरुपाश्रितं च दशभिर्मुद्राभिरुद्भासितम् ।
चक्रेश्या प्रकटेड्यया त्रिपुरया त्रैलोक्य सम्मोहनम्, श्रीचक्रं शरणं व्रजामि सततं सर्वेष्ट सिद्धि प्रदम् ॥२॥
''ई'' ईड्याभिर्नव विद्रुमच्छवि समाभिख्याभिरङ्गी कृतम्, कामाकर्षिणी कादिभिः स्वर दले गुप्ताभिधाभिः सदा ।
सर्वाशापरिपूरके परिलसद् देव्या पुरेश्या युतम्, श्रीचक्रं शरणं व्रजामि सततं सर्वेष्ट सिद्धि प्रदम् ॥३॥
''ल'' लब्ध प्रोज्जवल यौवनाभिरभितोऽनङ्ग प्रसूनादिभिः, सेव्यं गुप्ततराभिरष्ट कमले संक्षोभकाख्ये सदा ।
चक्रेश्या पुरसुन्दरीति जगति प्रख्यातयासङ्गतम्, श्रीचक्रं शरणं व्रजामि सततं सर्वेष्ट सिद्धि प्रदम् ॥४॥
''ह्रीं'' ह्रीङ्काराङ्कित मन्त्रराज- निलयं श्रीसर्वसंक्षोभिणी, मुख्याभिश्चल कुन्तलाभिरुषितं मन्वस्त्र चक्रे शुभे ।
यत्र श्रीपुरवासिनी विजयते श्रीसर्वसौभाग्यदे, श्रीचक्रं शरणं व्रजामि सततं सर्वेष्ट सिद्धि प्रदम् ॥५॥
''ह'' हस्ते पाश गदादि शस्त्र निचयं दीप्तं वहन्तीभिः, उत्तीर्णाख्याभिरुपायस्य पाति शुभदे सर्वार्थ सिद्धिप्रदे ।

चक्रे बाह्यदशारके विलसित देव्या पुरश्चयाख्यया, श्रीचक्रं शरणं व्रजामि सततं सर्वेष्ट सिद्धि प्रदम् ॥६॥
"स" सर्वज्ञादिभिरिन्दु कान्ति धवला कालाभिरारक्षिते, चक्रेऽन्तर्दश- कोणकेऽति विमले नाम्ना च रक्षा करे ।
यत्र श्रीत्रिपुरमालिनी विजयते नित्यं निगर्भा स्तुता, श्रीचक्रं शरणं व्रजामि सततं सर्वेष्ट सिद्धि प्रदम् ॥७॥
"क" कर्तुं मूकमनर्गल स्त्रवदति द्राक्षादि वाग् वैभवम्, दक्षाभिर्वशिनी मुखाभिरभितो वाग् देवताभिर्युताम् ।
अष्टारे पुरसिद्धया विलसितं रोगप्रणाशे शुभे, श्रीचक्रं शरणं व्रजामि सततं सर्वेष्ट सिद्धि प्रदम् ॥८॥
"ह" हन्तु दानव सङ्घमाहव भुवि स्वेच्छा समाकल्पितैः, शस्त्रैरस्त्र चयैश्च चापनिवहैरत्युग्र तेजोभरैः ।
आर्तत्राण परायणैररि कुल प्रध्वंसिभिः सम्वृतम्, श्रीचक्रं शरणं व्रजामि सततं सर्वेष्ट सिद्धिप्रदम् ॥९॥
"ल" लक्ष्मीवाग गजादिभिः करलसत् पाशासि घण्टादिभिः, कामेश्यादिभिरावृतं शुभकरं श्रीसर्व सिद्धि प्रदम् ।
चक्रेशी च पुराम्बिका विजयते यत्र त्रिकोणे मुदा, श्रीचक्रं शरणं व्रजामि सततं सर्वेष्ट सिद्धि प्रदम् ॥१०॥
"ह्रीं" ह्रींकारं परमं जपद्भिरनिशं मित्रेश नाथादिभिः, दिव्यौघैर्मनुजौघ सिद्धनिवहैः सारूप्य मुक्तिं गतैः ।
नाना मन्त्र रहस्य विद्भिरखिलैरन्वासितं योगिभिः, श्रीचक्रं शरणं व्रजामि सततं सर्वेष्ट सिद्धि प्रदम् ॥११॥
"स" सर्वोत्कृष्ट वपुर्धराभिरभितो देवी समाभिर्जगत्, संरक्षार्थमुपगताऽऽभिरसकृन्नित्याभिधाभिर्मुदा।
कामेश्यादिभिराज्ञयैव ललिता देव्याः समुद्भासितम्, श्रीचक्रं शरणं व्रजामि सततं सर्वेष्ट सिद्धि प्रदम् ॥१२॥
"क" कर्तुं श्रीललिताङ्ग रक्षण विधिं लावण्यपूर्णां तनूम्, आस्थायास्त्र वरोल्लसत् कर पयोजाताभिरध्यासितम् ।
देवीभिर्हृदयादिभिश्च परितो विन्दुं सदाऽऽनन्ददम्, श्रीचक्रं शरणं व्रजामि सततं सर्वेष्ट सिद्धि प्रदम् ॥१३॥
"ल" लक्ष्मीशादि पदैर्युतेन महता मञ्चेन संशोभितम्, षट्त्रिंशद्भिरनर्घ रत्न खचितैः सोपानकैर्भूषितम् ।
चिन्ता रत्न विनिर्मितेन महता सिंहासनेनोज्ज्वलम्, श्रीचक्रं शरणं व्रजामि सततं सर्वेष्ट सिद्धि प्रदम् ॥१४॥
"ह्रीं" ह्रीङ्कारैक महामनुं प्रजपता कामेश्वरेणोषितम्, तस्याङ्के च निषण्णया त्रिजगतां मात्रा चिदाकारया ।
कामेश्या करुणा-रसैक निधिना कल्याणदात्र्या युतम्, श्रीचक्रं शरणं व्रजामि सततं सर्वेष्ट सिद्धि प्रदम् ॥१५॥
"श्रीं" श्रीमत् पञ्च दशाक्षरैक निलयं श्रीषोडशी मन्दिरम्, श्रीनाथादिभिरर्चितं व बहुधा देवैः समाराधितम् ।
श्रीकामेश रहस्सखी निलयनं श्रीमद्गुहाराधितम्, श्रीचक्रं शरणं व्रजामि सततं सर्वेष्ट सिद्धि प्रदम् ॥१६॥

॥ श्रीत्रिपुरसुन्दरी स्तोत्रम् ॥

श्वेत पद्मासनारूढ़ां शुद्धस्फटिक सन्निभां । वन्दे वाग्देवतां ध्यात्वा देवीं त्रिपुरसुन्दरीम् ॥१॥
शैलाधिराजतनयां शङ्करप्रिय वल्लभां । तरुणन्दुनिभां वन्दे देवीं त्रिपुरसुन्दरीम् ॥२॥
सर्वभूत मनोरम्यां सर्वभूतेषु संस्थितां । सर्वसम्पत्करीं वन्दे देवीं त्रिपुरसुन्दरीम् ॥३॥
पद्मालयां पद्महस्तां पद्मसम्भव सेवितां । पद्मरागनिभां वन्दे देवीं त्रिपुरसुन्दरीम् ॥४॥
पञ्चवाण धनुर्बाण पाशाङ्कुशधरां शुभां । पञ्चब्रह्ममयीं वन्दे देवीं त्रिपुरसुन्दरीम् ॥५॥
षट् पुण्डरीक निलयां षडानन सुपूजितां । षट् कोणान्तः स्थितां वन्दे देवीं त्रिपुरसुन्दरीम् ॥६॥
हरार्धभाग - निलयामम्बामद्रिसुतां मृडां । हरिप्रियाऽनुजां वन्दे देवीं त्रिपुरसुन्दरीम् ॥६॥
अष्टैश्वर्य - प्रदामम्बामष्टदिक्पाल सेवितां । अष्टमूर्तिमयीं वन्दे देवीं त्रिपुरसुन्दरीम् ॥७॥

नवमणिक्य मुकुटां नवनाथ सुपूजितां । नवयौवन शोभाढ्यां वन्दे देवीं त्रिपुरसुन्दरीम् ॥९॥
काञ्चीवास मनोरम्यां काञ्चीदाम विभूषितां । काञ्ची पुरीश्वरीं वन्दे देवीं त्रिपुरसुन्दरीम् ॥१०॥

॥फलश्रुति॥

इति ते कथितं देवि! सुन्दरी प्रीतिदायकं । महानिशाकाले पाठमात्रेण सिद्धिर्भवति ॥११॥
एकादश सहस्राणि संख्या चास्य पुरस्क्रिया । ततः काम्यार्थे प्रयोगान् साधयेत् साधकोत्तमः ॥१२॥
मारणं मोहनं वश्यं स्तम्भनोच्चाटनादिकं । पाठमात्रेण सिद्ध्यन्ति सत्यं सत्यं न संशयः ॥१३॥
निष्कामो यः पठेन्नित्यं पञ्चतत्व समन्वितम् ।
धर्मार्थ काम मोक्षं च लभते नात्र संशयः ॥
इह लोके सुखं भुक्त्वा चान्ते देवी लोके वसेत् ॥१४॥

॥ सिद्धि यामले श्रीत्रिपुर-सुन्दरी स्तोत्रं सम्पूर्णम् ॥

॥ श्रीललितोपनिषत् ॥

ॐ परम् कारणभूता शक्तिः केन नवचक्ररूपो देहः । नवचक्र शक्तिमयं श्रीचक्रं । वाराही पितृरूपा, कुरुकुल्ला चीलदेवता माता । पुरुषार्थाः सागराः । देहो नवरत्ने द्वीपः । आधार नवकमुद्राः शक्तयः । त्वगादि सप्तधातुभिरनेकैः संयुक्ताः सङ्कल्पाः कल्पतरवः । तेजः कल्पकोद्यानं ।

रसनया भासमाना मधुराम्लतिक्त कटुकषाय लवण रसाः षड्रसाः । क्रियाशक्ति पीठं, कुण्डलिनी ज्ञानशक्तिः, अहम् इच्छाशक्ति । महात्रिपुरसुन्दरी ज्ञाता, होता ज्ञानमर्घ्यं, ज्ञेयं हवि ज्ञातृज्ञान ज्ञेया । नमो भेदभावनं श्रीचक्रपूजनं ।

नियति सहित शृङ्गारादयो नवरसाः । अणिमादयः कामक्रोध लोभ मोह मद मात्सर्य पुण्यपापमया ब्राह्मयादयोऽष्ट शक्तयः । आधार नवकमुद्रा शक्तयः । पृथ्व्यप् तेजोवाय्वाकाश श्रोत्रत्वक्चक्षु जिह्वा घ्राण वाक्पाणि पाद पायूपस्थ मनश्च विकाराः षोडश शक्तयः । वचनादान गमन विसर्गानन्दादानोपादानोपेक्षाबुद्ध्योऽनङ्ग- कुसुमादि शक्तयोऽष्टौ । अलम्बुषा-कुहू विश्वोदरी वरुणाहस्ति जिह्वा यशस्विनी गान्धारी पूषा सरस्वती इडा पिङ्गला सुषुम्ना चेति चतुर्दश नाड्यः सर्वसंक्षोभिण्यादि चतुर्दशार देवताः ।

प्राणापान व्यानोदान समान नागकूर्म कृकल देवदत्त धनञ्जया दश वायवः सर्वसिद्धि प्रदादि बहिर्दशार देवताः । एतद् वायु दशक संसर्गोपाधि भेदेन रेचक पूरक पोषक दाहकाल्पावकामृतमिति प्राण सख्यत्वेन पञ्चविधोऽस्ति । जठराग्निर्मनुष्याणां मोहको भक्ष्य भोज्य लेह्य चोष्यात्मकं चतुर्विधमन्नं पाचयति । तदा प्रकाशवान् सकलाः सर्वज्ञत्वाद्यन्तर्दशार देवताः ।

शीतोष्ण सुख दुःखेच्छा सत्व रजस्तमो गुणादि वशिन्यादि शक्तयोऽष्टौ । शब्दस्पर्श रूप रस गंधाः पञ्च तन्मात्राः पञ्चपुष्पबाणाः, मनेक्षुधनुर्वल्यो वाणो रागः पाशो द्वेषो अंकुशोऽव्यक्त महत् तत्वाहङ्कार कामेश्वरी वज्रेश्वरी भगमालिन्योऽन्त स्त्रिकोणाग्रदेवताः ।

पञ्चदश तिथि रूपेण कालस्य परिणामावलोकन पञ्चदश नित्या शुद्धानुरूपाधि देवता निरुपाधि सार्व देव कामेश्वरी सदाऽऽनन्दपूर्णाः स्वात्म्यैक्य रूप ललिता कामेश्वरी सदाऽऽनन्दघन पूर्णा स्वात्मैक्यरूपा देवता ललितामिति ।

साहित्य करणं सत्वं कर्त्तव्यमकर्त्तव्यमिति भावना मुक्ता उपचारा। अहं त्वमस्ति नास्ति कर्त्तव्याकर्त्तव्य मुपासितव्यानु- पासितव्यमिति विकल्पना। मनो विलापनं होमः।

बाह्याभ्यन्तर करणानां रूप ग्रहण योग्यतास्तीत्यावाहनं। तस्य बाह्याभ्यन्तर करणानामेक रूप विषय ग्रहणमसनं। रक्त शुक्ल पदैकी करणं पाद्यं। उज्ज्वलदामोदाऽऽनन्दा सानन्दनमर्घ्यं। स्वच्छास्वतः शक्तिरित्याचमनं। चिच्चन्द्रमयी स्मरणं स्नानं। चिदग्निस्वरूप परमानन्दशक्ति स्मरणं वस्त्रं। प्रत्येकं सप्तविंशतिधा भिन्नत्वेन इच्छा क्रियात्मक ब्रह्मग्रन्थिमयी सतन्तु ब्रह्मनाडी ब्रह्मसूत्रं सव्यातिरिक्त वस्त्रं। सङ्गरहितं स्मरणं विभूषणम्। स्वच्छन्द परिपूर्ण स्मरणं गन्धः। समस्त विषयाणां मनःस्थैर्येणानु सन्धानं कुसुमं। तेषामेव सर्वदा स्वीकरणं धूपः। पवनाच्छिन्नोर्ध्व ज्वाला सच्चिदाह्लादाकाशदेहो दीपः। समस्त यातायात वर्जनं नैवेद्यं। अवस्था त्रयैकीकरणं ताम्बूलं। मूलाधारादाब्रह्मरन्ध्र पर्यन्तं ब्रह्मरन्ध्रादामूलाधार पर्यन्तं गतागतरूपेण प्रादक्षिण्यं। तुरीयावस्थानं संस्कार देहशून्यं प्रमादितावति मज्जनं बलि हरणं। सत्वमस्ति कर्त्तव्यमकर्त्तव्यमौदासीन्यमात्म विलापनं होमः। भावना विषयाणामभेद भावना तर्पणं। स्वयं तत् पादुका निमज्जनं परिपूर्ण ध्यानं।

एवं मूर्तित्रयं भावनया युक्तो मुक्तो भवति। तस्य देवतात्मैक्य सिद्धिः चितिकार्याण्यप्रयत्नेन सिध्यन्ति स एव शिव योगीति कथ्यते।

॥ इति श्री ललितोपनिषत् ॥

॥ श्रीत्रिपुरोपनिषत् ॥

ॐ वाङ् मे मनसि प्रतिष्ठिता, मनो मे वाचि प्रतिष्ठितमाविरावीर्म एधि वेदस्य मे आणीस्थः, श्रुतं मे म प्रहासीरनेनाहोऽधीतेनाहोरात्रान्त्संदधामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तदवक्तारमवतु। अवतु माम्। अवतु वक्तारम्॥

ॐ शान्तिः शान्तिः शान्तिः

ॐ तिस्रः पुरस्त्रिपथा विश्वचर्षणी। अत्राकथा अक्षराः सन्निविष्टाः ।
अधिष्ठायैनामजरा पुराणी। महत्तरा महिमा देवतानाम् ॥१॥
नवयोनीर्नवचक्राणि दीधिरे। नवैव योगा नवयोगिन्यश्च ।
नवानां चक्रे अधिनाथाः स्योना। नवमुद्रा नवभद्रा महीनाम् ॥२॥
एका सा आसीत् प्रथमा सा । नवासीदासोन विंशदासोनत्रिंशत् ।
चत्वारिंशदथ तिस्रः समिधा । उशतीरिव मातरो माऽऽविशन्तु ॥३॥
ऊर्ध्वज्वलज्ज्वलन-ज्योतिरग्रे। तमो वै तिरश्चीनमजरं तद्रजोऽभूत् ।
आनन्दनं मोदनं ज्योतिरिन्दोरेता उ वै मण्डला मण्डयन्ति ॥४॥
तिस्रश्च रेखाः सदनानि भूमेस्त्रि-विष्टपास्त्रिगुणास्त्रिप्रकाशाः ।
एतत् पुरं पूरकं पूरकाणामत्र प्रथेते मदनो मदन्या ॥५॥
मदन्तिका मानिनी मङ्गला च । सुभगा च सा सुन्दरी शुद्धमत्ता ।
लज्जा मतिस्तुष्टिरिष्टा च पुष्टा लक्ष्मीरुमा ललिता लालपन्ती ॥६॥

इमां विज्ञाय सुधया मदन्ति । परिस्नुता तर्पयन्तः स्वपीठम् ।
नाकस्य पृष्ठे महतो वसन्ति । परंधाम त्रैपुरं चाविशन्ति ॥७॥
कामो योनिः कमला वज्रपाणिर्गुहा हसा मातरिश्वाऽभ्रमिन्द्रः ।
पुनर्गुहा सकला मायया च । पुरूच्येषा विश्वमाताऽऽदि विद्या ॥८॥
षष्ठं सप्तममथ वह्नि सारथिमस्या । मूल त्रिकमावेशयन्तः ।
कथ्यं कविं कल्पकं काममीशं । तुष्टुवांसो अमृतत्वं भजन्ते ॥९॥
त्रिविष्टपं त्रिमुख विश्व मातुर्नव - रेखाः स्वर मध्यं तदीले ।
वृहत् तिथीर्दश - पञ्चादिनित्या । सा षोडशी पुरमध्यं विभर्त्ति ॥१०॥
द्वा मण्डला द्वा स्तना बिम्बमेकं । मुखं चाधस्त्रीणि गुहा सदनानि ।
कामीं कलां काम्यरूपा विदित्वा । नरो जायते कामरूपश्च काम्यः ॥११॥
परिस्नुतं झषमाद्यं पलं व । भक्तानि योनीः सुपरिष्कृतानि ।
निवेदयन् देवतायै महत्यै । स्वात्मीकृत्य सुकृती सिद्धिमेति ॥१२॥
सृण्येव सितया विश्वचर्षणिः । पाशेन प्रतिबध्नात्यभीकान् ।
इषुभिः पञ्चभिर्धनुषा च विध्यत्यादि-शक्तिररुणा विश्वजन्या ॥१३॥
भगः शक्तिर्भगवान् काम ईश उभा दाताराविह सौभगानाम् ।
समप्रधानौ समसत्त्वौ समोजौ तयोः शक्तिरजरा विश्वयोनिः ॥१४॥
परिस्नुतौ हविषा भावितेन प्रसंकोचे गलिते वै मनस्कः ।
शर्वः सर्वस्य जगतो विधाता धर्ता हर्ता विश्वरूपत्वमेति ॥१५॥
एषर्ग्यजुः परमेतच्च सामेवायमथर्वेयमन्या च विद्या ॐ ।
इयं महोपनिषत् त्रिपुरायाः यामक्षयं परमे गीर्भिरीट्टे ॥१६॥

॥ ॐ ह्रीं ॐ ह्रीमिति त्रिपुरोपनिषत् ॥

॥ श्री महात्रिपुरसुन्दरी कवचम् ॥

॥ श्री ईश्वर उवाच ॥

शृणु देवि! प्रवक्ष्यामि कवचं सुन्दरी प्रियम् । रहस्यामि रहस्यं च मन्त्ररूपमिदं प्रिये ॥

॥ श्रीपार्वत्युवाच ॥

भगवन्! सर्वलोकेश! सर्वलोकैक वन्दित! गुह्याद् गुह्यतमं तत्त्वं श्रोतुमिच्छामि तत्त्वतः ॥

विनियोगः - अस्य श्री महात्रिपुरसुन्दरी कवच स्तोत्र मंत्रस्य श्री दक्षिणामूर्ति ऋषिः, अनुष्टुप्छंदः, श्री महात्रिपुरसुन्दरी देवता, ऐं-५ कएईल ह्रीं बीजं, क्लीं-६ हसकहल ह्रीं कीलकं, सौः स-४ सकल ह्रीं शक्तिः, सर्वाभीष्टसिद्ध्यर्थं श्री महात्रिपुरसुन्दरी कवच स्तोत्र पाठे विनियोगः ।

ऋष्यादिन्यासं कृत्वा मूलमन्त्रेण षडङ्गन्यासं कुर्यात्।

॥ ध्यानम् ॥

स कुंकुम - विलेपनामलिक - चुम्बिकस्तूरिकाम्
स - मन्द - हसितेक्षणां स शरचाप पाशाङ्कुशाम् ।
अशेष जन मोहिनीमरुण - माल्य - भूषाम्बरां
जपाकुसुम भासुरां जप विधौ स्मरेदम्बिकाम् ॥१॥
चतुर्भुजे! चन्द्रकलावतंसे कुचोन्नते कुंकुम रागशोणे ।
पुण्ड्रेक्षु पाशांकुश पुष्पवाण हस्ते नमस्ते जगदेकमातः ॥२॥

मानसोपचारेण भगवती सम्पूज्य विधिना कवचं पठेत् -

ककारः पातु शीर्षं मे एकारः पातु फालके । ईकारः पातु वक्त्रं मे लकारः कूर्पयुग्मके ॥१ ।
ह्रींकारः पातु हृदयं वाग्भवश्च सदाऽवतु । हकारः पातु जठरं सकारो नाभि देशके ॥२॥
ककारः पार्श्वभागे च हकारः पातु पृष्ठके । लकारश्च नितम्बके मे ह्रींकारः पातु मूलके ॥३॥
कामराजः सदापातु जठरादि प्रदेशके । सकारः पातु कट्यां मे ककारः पातु लिङ्गके ॥४॥
लकारो जानुनी पातु ह्रींङ्कारो जङ्घ युग्मके । शक्तिबीजं सदा पातु मूलविद्या सदाऽवतु ॥५॥
त्रिपुरा मां सदा पातु त्रिपुरेशी च सर्वदा । त्रिपुरासुन्दरी पातु वसुपत्रस्य देवता ॥६॥
त्रिपुरावासिनी पातु त्रिपुराश्रीः सदाऽवतु । त्रिपुरामालिनी पातु त्रिपुरा सिद्धिसदाऽवतु ॥७॥
त्रिपुरा तथा पातु पातु त्रिपुराभैरवी । अणिमाद्यास्तथा पांतु ब्राह्मयाद्याः पातु मां सदा ॥८॥
नवमुद्रास्तथा पान्तु कामाकर्षणि पूर्विकाः । पान्तु मां षोडशारे तु अनङ्गकुसुमादिकाः ॥९॥
पान्तु मामष्टपत्रेषु सर्वसंक्षोभणादिकाः । पान्तु चक्रकोणेषु सर्वसिद्धि प्रदायिकाः ॥१०॥
पान्तु मां बाह्यकोणेषु मध्यादि कोणके तथा । सर्वज्ञाद्यास्तथा पान्तु सर्वाभीष्ट प्रपूरिकाः ॥११॥
वशिन्याद्यास्तथा पान्तुवसु पत्रस्य देवताः । त्रिकोणस्यान्तरालेषु पान्तु मामायुधानि च ॥१२॥
कामेश्वर्यादिकाः पांतु त्रिकोणे कोण संस्थिताः । विन्दुचक्रे तथा पातु श्रीमत् त्रिपुरसुन्दरी ॥१३॥
इदं श्रीकवचं नित्यं त्रिसन्ध्यं यः पठेन्नरः । सर्वसिद्धिमवाप्नोति सर्वाभीष्ट फलप्रदम् ॥१४॥

॥ इति श्री महात्रिपुर-सुन्दरी कवचं सम्पूर्णम् ॥

॥ श्रीपरा महायोनि कवचम् ॥

ॐ नमः शिवाय गुरवे नाद विन्दुकलात्मने। श्रीगणेशाय नमः। श्रीमन्महात्रिपुर सुन्दर्यै नमः।

॥ श्रीभैरव उवाच ॥

क्रमदीक्षा विधानानि मयोक्तानि महेश्वरि!
त्वयात्मनः कुलागारे कवचं यत् सुगोपितं ॥१॥
अधुना कृपया त्वं च तत् सर्वं वक्तुमर्हसि।

॥ श्रीभैरव्युवाच ॥

शृणु! प्रवक्ष्यामि तन्त्रसारमिदं महत् ॥२॥

एतच्छ्री कवचस्यास्य परब्रह्म ऋषिः शिवः। महती जगतीच्छन्दश्चिच्छक्तिर्देवतोच्यते ॥३॥

ऐं बीजं ह्रीं तथा शक्तिः सकलह्रीं कीलकं तथा। परब्रह्म प्राप्ति हेतौ विनियोगः प्रकीर्तितः ॥४॥

ऋष्यादिन्यासं कृत्वा कवचं पठेत्। यथा -

ॐ ह्रीं स्त्रीं हूं फट् उग्रतारा मूलाधारं ममावतु। ह्रीं भुवनेश्वरी पातु स्वाधिष्ठानं च मे सदा ॥५॥

क्रीं हूं ह्रीं दक्षिणा पातु मणिपुरं तथा मम । नमो भगवत्यै हस्ख्फ्रें कुब्जिकायै

स्ह्रां स्ह्रीं स्ह्रूं ङञणन मे अघोरा मुखि छांछीं किणि किणि विच्चे ॥६॥

अनाहतं सदा पातु कुब्जिका परमेश्वरी। फ्रं ख्फ्रें गुह्यकाली सा विशुद्धं मे च रक्षतु ॥७॥

कएईलह्रीं हसकहलह्रीं सकलह्रीं श्रीं। आज्ञाचक्रं महादेवी षोडशी पातु मे सदा ॥८॥

हस्क्ष्म्लवरयूँ स्हक्ष्म्लवरयीं नादचक्रं । च मे पातु श्रीमदानन्दभैरवः ॥९॥

ह्सौः स्हौः अर्धनारीश्वरी बिन्दुश्च मेऽवतु। हंसः सोऽहं सदापातु सहस्त्रारं सदा मम ॥१०॥

कएईलह्रीं हसकहलह्रीं सकलह्रीं श्रीं । शिरो मे पातु सा देवी महात्रिपुरसुन्दरी ॥११॥

कएईलह्रीं कामेशी भ्रूमध्यं मे सदाऽवतु । हसकहलह्रीं वज्रेशी दक्षनेत्रं सदाऽवतु ॥१२॥

सकलह्रीं वामनेत्रं रक्षतु भगमालिनी । ह्स्त्रैं हसकलह्रीं ह्सौः त्रिनेत्रं पातु भैरवी ॥१३॥

ह्रीं श्रीं सौः त्रिपुरासिद्धा कर्णौ मे परिरक्षतु । ह्रीं क्लीं क्षुं मां सदा पातु मुखं त्रिपुरमालिनी ॥१४॥

हसैं हस्क्लीं हसौं कण्ठं पातु श्रीत्रिपुराश्रीर्मे हैं । हक्लीं हसौं पातु वक्षस्त्रिपुरवासिनी ॥१५॥

दौवारिजौ सदापातु ह्यणिमाद्यष्ट सिद्धयः। ह्रीं क्लीं सौः पातु मे नाभिं परा त्रिपुरसुन्दरी ॥१६॥

दशमुद्रायुता देवी ममोरू पातु सर्वदा । ऐं क्लीं सौः पातु मे जानू श्रीमहात्रिपुरेश्वरी ॥१७॥

षड्दर्शनं सदापातु जङ्घायुग्मं च सर्वदा। अं आं सौः त्रिपुरा पातु पादौ च सततं नमः ॥१८॥

ॐ ह्रीं श्रीं पातु मां पूर्वे श्रीमहाभुवनेश्वरी। कएईलह्रीं दक्षिणे मां पराऽऽद्या परिरक्षतु ॥१९॥

सौः ऐं क्लीं ह्रीं श्रीं श्रीकुजापश्चिमे मांसदाऽवतु। श्रीं ह्रीं क्लीं ऐं सौः चोत्तरे मां पातु योगेश्वरी परा ॥२०॥

हसकहलह्रीं पातु मामधो वज्रयोगिनी । सकलह्रीं सा ललिता ह्यूर्ध्वे मां परिरक्षतु ॥२१॥

श्रीं ५ ॐ ३ क ५ ह ६ स ४ सौः ५ सदाऽवतु। सर्वाङ्गं मे च चिद्रूपा महात्रिपुर सुन्दरी ॥२२॥

(टीका - ॐ३= ॐ ह्रीं श्रीं। स४= सकल ह्रीं। क५= कएईल ह्रीं। श्रीं५= श्रीं ह्रीं क्लीं ऐं सौः। सौः ५= सौः ऐं क्लीं ह्रीं श्रीं। ह ६= हसकहल ह्रीं।)

॥ फलश्रुति ॥

इति ते कथितं देव! ब्रह्मानन्द मयं परं । श्रीमहायोनिराख्यातं कवचं देवदुर्लभम् ॥२३॥

मम तेजसा रचितं श्रीविद्या क्रम संयुतम् । तव स्नेहान्महादेव तवाग्रे तु मयोदितम् ॥२४॥

राज्यं देयं शिरो देयं न देयं कवचं परम् । देयं पूर्णाभिषिक्ताय स्वशिष्याय महेश्वर ॥२५॥

अन्यथा नारकी भूयात् कल्प कोटि शतैरपि । दिक्सहस्त्रेण पाठेन ह्यसाध्यं साध्यते क्षणात् ॥२६॥
लक्षं जप्त्वा महादेव तद्दशांशं हुनेद् यदि । ब्रह्मज्ञानमवाप्नोति परब्रह्मणि लीयते ॥२७॥

भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद् यदि ।
कण्ठे वा दक्षिणे बाहौ साक्षात् कामेश्वरो भवेत् ।
नारी वामभुजे धृत्वा भवेत् त्रिपुर सुन्दरी ॥२८॥

॥ ॐ तत्सत् श्रीमहानिर्वाणतन्त्रे श्रीमहायोनि नाम श्रीमन्महात्रिपुरसुन्दरी कवचम् ॥॥

॥ १. श्रीषोडशी कवच स्तोत्रम् ॥

॥ श्री देव्युवाच ॥

देव देव महादेव भक्तानां प्रीतिवर्द्धनं सूचितं यन् महादेव्याः कवचं कथयस्व मे ॥

॥ श्रीमहादेव उवाच ॥

शृणु देवि प्रवक्ष्यामि कवचं देव दुर्लभं । न प्रकाश्यं परंगुह्यं साधकाभीष्ट सिद्धिदं ॥
कवचस्य ऋषिर्देवि दक्षिणामूर्तिररव्ययः । छन्दः पंक्ति समुद्दिष्टं देवी त्रिपुरसुन्दरी ॥
धर्मार्थ काम मोक्षाणां विनियोगस्तु साधने । वाग्भवः कामराजश्च शक्ति बीजं सुरेश्वरि ॥

॥ कवच स्तोत्रम् ॥

वाग्भवः पातु शीर्षे मां कामराजस्तथा हृदि । शक्ति बीजं सदा पातु नाभौ गुह्ये च पादयोः ॥
ऐं क्लीं सौः वदने पातु बाला मां सर्वसिद्धये । ह्सौः सकलह्रीं पातु भैरवी कण्ठ देशतः ।
सुंदरी नाभिदेशे च शीर्षे कामकला सदा । भ्रू नासयोरन्तराले महात्रिपुरसुन्दरी ॥
ललाटे सुभगा पातु भगा मां कण्ठदेशतः । भगोदया च हृदये उदरे भग सर्पिणी ॥
भगमाला नाभिदेशे लिङ्गे पातु मनोभवा । गुह्ये पातु महादेवी राजराजेश्वरी शिवा ॥
चैतन्य रूपिणी पातु पादयोर्जगदम्बिका । नारायणी सर्वगात्रे सर्वकार्ये शुभङ्करी ॥
ब्रह्माणी पातु मां पूर्वे दक्षिणे वैष्णवी तथा । पश्चिमे पातु वाराही उत्तरे तु महेश्वरी ॥
आग्नेय्यां पातु कौमारी महालक्ष्मीस्तु नैर्ऋते । वायव्यां पातु चामुण्डा इन्द्राणी पातु ईशके ॥
जले पातु महामाया पृथिव्यां सर्वमङ्गला । आकाशे पातु वरदा सर्वत्र भुवनेश्वरी ॥

॥ फलश्रुति ॥

इदं तु कवचं देव्या देवानामपि दुर्लभम् । पठेत् प्रातः समुत्थाय शुचिर्प्रयत मानसः ॥
नाधयो व्याधयस्तस्य न भयं च कश्चिद् भवेत् । न च मारीभयं तस्य पातकानां भयं तथा ॥
न दारिद्र्यवशं गच्छेत् तिष्ठेन्मृत्युवशे न च । गच्छेच्छिवपुरं देवि सत्यं सत्यं वदाम्यहं ॥
इदं कवचमज्ञात्वा श्रीविद्यां यो जपेत् सदा । स नाप्नोति फलं तस्य प्राप्नुयाच्छस्त्र घातनं ॥

॥ इति सिद्ध यामले श्री षोडशी कवचं सम्पूर्णम् ॥

॥ २. श्रीषोडशी कवच स्तोत्रम् ॥

॥ श्री देव्युवाच ॥

भगवन् देव-देवेश लोकानुग्रह कारक त्वत्प्रसादान्महादेव श्रुता मन्त्रास्तवनेकधा ।
साधनं विविधं देव कीलकोद्धरणं तथा शापादि दूषणोद्धारः श्रुतस्त्वत्तो मया प्रभो ।
राजराजेश्वरी देव्याः कवचं सञ्चितं मया श्रोतुमिच्छामि त्वत्तस्तत्कथयस्व दयानिधे ॥

॥ श्री ईश्वरोवाच ॥

लक्षवारसहस्त्राणि वारिताऽसि पुनः पुनः स्त्रीस्वभावात् पुनर्देवि पृच्छसि त्वं मम प्रिये ।
अत्यन्तगुह्यं कवचं सर्वकामफलप्रदं प्रीतये तव देवेशि कथयामि शृणुष्व तत् ॥

विनियोगः :- **अस्य षोडशी कवचस्य श्रीमहादेव ऋषिः, प्रस्तार पंक्तिश्छन्दः, श्री राजराजेश्वरी महात्रिपुर - सुन्दरी देवता, धर्मार्थ काम मोक्ष साधने पाठे विनियोगः।**

ऋष्यादिन्यासः :- **श्रीमहादेव ऋषये नमः शिरसि। प्रस्तार पंक्तिश्छन्दसे नमः मुखे। श्री राजराजेश्वरी महात्रिपुर-सुन्दरी देवतायै नमः हृदि। सर्वार्थ काम मोक्ष साधने पाठे विनियोगाय नमः सर्वाङ्गे।**

॥ कवच स्तोत्रम् ॥

पूर्वे मां भैरवी पातु बाला मां पातु दक्षिणे, मालिनी पश्चिमे पातु त्रासिनी तूत्तरेऽवतु ॥
ऊर्ध्वं पातु महादेवी महात्रिपुरसुन्दरी, अधस्तात् पातु देवेशी पातालातल वासिनी ॥
आधारे वाग्भवः पातु कामराजस्तथा हृदि, डामरः पातु मां नित्यं मस्तके सर्व कामदः ॥
ब्रह्मरन्ध्रे सर्वगात्रे छिद्रस्थाने च सर्वदा, महाविद्या भगवती पातु मां परमेश्वरी ॥
ऐं ह्रीं ललाटे मां पातु क्लीं क्लुं सश्च नेत्रयोः, नासायां मे कर्णयोश्च द्रीं द्रैं द्रां द्रीं चिबुके तथा ॥
सौः पातु गले हृदये स ह ह्रीं नाभिदेशके, क ल ह्रीं क्लीं स्त्रीं गुह्यदेशे सह्रीं पादयोस्तथा ॥
स ह्रीं मां सर्वतः पातु सकली पातु सन्धिषु, जले स्थले तथाकाशे दिक्षु राजगृहे तथा ॥
हूं क्षेमा त्वरिता पातु स ह्रीं स क्लीं मनोभवा हंसः पायान्महादेवि परं निष्कल देवता ॥
विजया मंगला दूती कल्याणी भगमालिनी, ज्वाला च मालिनी नित्या सर्वदा पातु मां शिवा ॥
इत्येवं कवचं देवि देवानामपि दुर्लभं, तव प्रीत्या मयाख्यातं गोपनीयं प्रयत्नतः ॥
इदं रहस्यं परमं गुह्याद् गुह्यतरं प्रिये, धन्यं यशस्यमायुष्यं भोग मोक्षं प्रद शिवे ॥
दुःस्वप्न नाशनं पुण्यं नर-नारी वशङ्करम्, आकर्षणकरं देवि स्तम्भोच्चाटकं शिवे ॥
इदं कवचमज्ञात्वा राजराजेश्वरीं पराम्, योऽर्चयेद् योगिनी वृन्दैः स भक्ष्यो नात्र संशयः ॥
न तस्य मन्त्रसिद्धिः स्यात् कदाचिदपि शांकरि, इह लोके च दारिद्र्यं रोगदुःखाशुभानि च ॥
परत्र नरकं गत्वा पशु योनिमवाप्नुयात्, तस्मादेतत् सदाभ्यासादधिकारी भवेत् किल ॥
मद्वक्त्र निर्गतमिदं कवचं सुपुण्यं, पूजाविधेश्च पुरतो विधिना पठेद्यः ॥
सौभाग्य भाग ललितानि शुभानि भुक्त्वा, देव्याः पदं भजति तत् पुनरन्तकाले ॥

॥ कुलानन्द संहितायां षोडशीकवचं सम्पूर्णम् ॥

॥ षोडशी हृदय स्तोत्रम् ॥

कैलासे करुणाक्रान्ता परोपकृतिमानसा, पप्रच्छ करुणासिन्धुं सुप्रसन्नं महेश्वरं ।

॥ श्रीपार्वत्युवाच ॥

आगामिनि कलौ ब्रह्मन् धर्म-कर्मविवर्जिताः, भविष्यन्ति जनास्तेषां कथं श्रेयो भविष्यति ?

॥ शिव उवाच ॥

शृणुदेवि प्रवक्ष्यामिं तव स्नेहान्महेश्वरि दुर्लभं यत् त्रिलोकेषुसुन्दरी हृदयस्तवं ।
ये नरा दुःख सन्तप्ता दारिद्र्य हत मानसाः अस्यैव पाठ मात्रेण तेषां श्रेयो भविष्यति ॥

विनियोगः – ॐ अस्य श्रीमहात्रिपुरसुन्दरी हृदयस्तोत्र मन्त्रस्य श्रीआनन्दभैरवः ऋषिः। देवी गायत्रीश्छन्दः। श्रीमहात्रिपुरसुन्दरी देवता। ऐं बीजं। सौः शक्तिः। क्लीं कीलकं। धर्मार्थ-काम-मोक्षार्थे विनियोगः।

ऋष्यादिन्यासः – श्रीआनन्दभैरवाय ऋषये नमः शिरसि। देवी गायत्रीछन्दसे नमः मुखे। श्रीमहात्रिपुरसुन्दरी देवतायै नमः हृदये। ऐं बीजाय नमः लिङ्गे। सौः शक्तये नमः नाभौ। क्लीं कीलकाय नमः मूलाधारे। धर्मार्थ-काम-मोक्षार्थे विनियोगाय नमः सर्वाङ्गे।

षडङ्गन्यासः	करन्यास	अङ्गन्यासः
ऐं ह्रीं क्लीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
क्लीं श्रीं सौः ऐं	तर्जनीभ्यां नमः	शिरसे स्वाहा
सौः ॐ ह्रीं श्रीं	मध्यमाभ्यां नमः	शिखायै वषट्
ऐं कएईलह्रीं हसकहलह्रीं	अनामिकाभ्यां नमः	कवचाय हुँ
क्लीं सकलह्रीं	कनिष्ठिकाभ्यां नमः	नेत्रत्रयाय वौषट्
सौः सौः ऐं क्लीं ह्रीं श्रीं	करतलकर पृष्ठाभ्यां नमः	अस्त्राय फट्

॥ ध्यानम् ॥

बालव्यक्त विभाकरामितनिभां भव्यप्रदां भारतीम्, ईषत् फुल्लमुग्ब्राम्बुजस्मित् करैराशाभवान्धापहाम् ।
पाशं साभयमंकुशं च वरदं सम्बिभ्रतीं भूतिदाम्, भ्राजन्तीं चतुरम्बुजाकृति करैर्भक्त्या भजे सुन्दरीम् ॥

॥ स्तोत्रम् ॥

सुन्दरी सकल कल्मषापहा कोटिकञ्जप्रिय काम्यकान्तिका ।
कोटिकल्पकृत पुण्य कर्मणा पूजनीय – पदपुण्यपुष्करा ॥१॥

शर्वरीश सम सुन्दरानना श्रीश-शक्ति सुकृताश्रय श्रिता ।
सज्जनानु शरणीय सत्पदा सङ्कटे सुरगणैः सुवन्दिता ॥२॥

या सुरासुर-रणे जयान्विता आजघान जगदम्बिकाऽजिता ।
तां भजामि जगतां जनिं जयां युद्धयुक्त दितिजान् सुदुर्जयान् ॥३॥

योगिनां हृदय सङ्गतां शिवां योगयुक्त मनसां यतात्मनाम् ।
जाग्रतीं जगति यत्नतो द्विजा यां जपन्ति हृदि तां भजाम्यहम् ॥४॥

कल्पकास्तु कलयन्ति कालिकां यत् कला कलि जनोपकारिकाम् ।
कौल कालि कलितांघ्रि कञ्जकां तां भजामि कलिकल्मषापहाम् ॥५॥

बालार्कानन्त शोचिर्निज तनु किरणैर्दीपयन्तीं दिगन्तान्
दीप्तैर्देदीप्यमानां दनुज दल वनानल्प दावानलाभाम् ।
दान्तो दन्तोग्रचित्तान् दलितदितिसुतान् दर्शनीयान् दुरन्तान्
देवीं दीनार्द्रचित्तान् हृदि मुदितमनाः सुन्दरीं संस्मरामि ॥६॥

धीरान् धन्यान् धरित्रीं धवविधृत शिरोधूत धूल्यब्ज पादान्
धृष्टान् धाराधराधो विनिधृत चपला चारु चन्द्रत् प्रभाभाम् ।
धर्मान् धूतोपहारान् धरणि सुरधवोद्धारिणीं ध्येय रूपाम्
धीमद्धन्याऽतिधन्यां धनद-धनवृतां सुन्दरीं चिन्तयामि ॥७॥

जयतु जयतु जल्पा योगिनी योगयुक्ता जयतु जयतु सौम्या सुन्दरी सुन्दरास्या ।
जयतु जयतु पद्मा पद्मिनी केशवस्य जयतु जयतु काली कालिनी कालकान्ता ॥८॥

जयतु जयतु खर्वा षोडशी वेदहस्ता जयतु जयतु धात्री धर्मिणी धातृशक्तिः ।
जयतु जयतु वाणी ब्राह्मणा ब्रह्मवन्द्या जयतु जयतु दुर्गा दारिणी देवशत्रोः ॥

देवी त्वं सृष्टिकाले कमलभवभृता राजसी रक्तरूपा
रक्षाकाले त्वमम्बा हरिहृदय धृता सात्विकी श्वेतरूपा
भूरि क्रोधा भवान्ते भवभवन गता तामसी कृष्णरूपा
एताश्चान्यास्त्वमेव क्षितिमनुज मता सुन्दरी केवलाद्या ॥१०॥

सुमल सुमनमेतद् देवि गोप्यं गुणज्ञे ग्रहण मनन योग्यं षोडशीयं खलघ्नम् ।
सुरतरुसमशीलं सम्प्रदं पाठकानां प्रभवति हृदयाख्यं स्तोत्रमत्यन्त मान्यम् ॥११॥
इदं त्रिपुरसुन्दर्याः षोडश्याः परमाद्भुतं यः शृणोति नरः स्तोत्रं स सदा सुखमश्नुते ॥१२॥

॥ श्रीत्रिपुरसुन्दरीतन्त्रे हृदयाख्यं स्तोत्रं सम्पूर्णम् ॥

॥ श्री षोडशी अष्टोत्तरशतनाम स्तोत्रम् ॥

॥ भृगुरुवाच ॥

चतुर्वक्त्र जगन्नाथ स्तोत्रं वद मम प्रभो यस्यानुष्ठान मात्रेण नरो भक्तिमवाप्नुयात् ।
सहस्त्र नाम्नामाकृष्य नाम्नामष्टोत्तरं शतम् गुह्याद् गुह्यतरं गुह्यं सुन्दर्याः परिकीर्तितं ॥

विनियोगः - ॐ अस्य श्रीषोडश्यष्टोत्तर शतनामस्तोत्रस्य शम्भुः ऋषिः। अनुष्टुप्छन्दः। श्रीषोडशी देवता। धर्मार्थ काम मोक्ष सिद्धये पाठे विनियोगः।

ऋष्यादिन्यासं कृत्वा।

ॐ त्रिपुरा षोडशी माता त्र्यक्षरा त्रितया त्रयी । सुन्दरी सुमुखी सेव्या सामवेद परायणा ॥
शारदा शब्दनिलया सागरा सरिदम्बरा । शुद्धा शुद्ध तनुः साध्वी शिवध्यान परायणा ॥
स्वामिनी शंभुवनिता शांभवी च सरस्वती । समुद्रमथिनी शीघ्रगामिनी शीघ्रसिद्धिदा ॥
साधुसेव्या साधुगम्या साधुसंतुष्ट मानसा । खट्वाङ्ग धारिणी खर्वा खड्ग खर्पर धारिणी ॥
षड्वर्ग भाव रहिता षड्वर्ग परिचारिका । षड्वर्गा च षडंगा च षोढा षोडश वार्षिकी ॥
ऋतुरूपा क्रतुमती ऋभुक्षक्रतु मण्डिता । कवर्गादि पवर्गान्ता अन्तःस्था अन्तरूपिणी ॥
अकाराकार रहिता कालमृत्यु जरापहा । तन्वी तत्त्वेश्वरो तारा त्रिवर्षा ज्ञानरूपिणी ॥
काली कराली कामेशी च छाया संज्ञाप्यरुंधती । निर्विकल्पा महावेगा महोत्साहा महोदरी ॥
मेधा बलाका विमला विमल ज्ञानदायिनी । गौरी वसुन्धरा गोप्त्री गवांपति निषेविता ॥
भगाङ्गा भगरूपा च भक्तिभाव परायणा । छिन्नमस्ता महाधूमा तथा धूम्रविभूषणा ॥
धर्मकर्मादि रहिता धर्मकर्म परायणा । सीता मातङ्गिनी मेधा मधुदैत्य विनाशिनी ॥
भैरवी भुवना माताऽभयदा भवसुन्दरी । भावुका बगला कृत्या बालात्रिपुरसुन्दरी ॥
रोहिणी रेवती रम्या रम्भा रावण वन्दिता । शतयज्ञमयी सत्वा शतक्रतुवरप्रदा ॥
शतचन्द्रानना देवी सहस्रादित्य सन्निभा । सोमसूर्याग्नि नयना व्याघ्रचर्माम्बरावृता ॥
अर्द्धेन्दु धारिणी मत्ता मदिरा मदिरेक्षणा । इति ते कथितं गोप्यं नाम्नामष्टोत्तरं शतम् ॥
सुन्दर्याः सर्वदा सेव्यं महापातक नाशनं । गोपनीयं गोपनीयं गोपनीयं कलौ युगे ॥
सहस्रनाम पाठस्य फलं यद् वै प्रकीर्तितम् । तस्मात्कोटिगुणं पुण्यं स्तवस्यास्य प्रकीर्तनात् ॥
पठेत् सदा भक्तियुतो नरो तु यो निशीथ कालेऽप्यरुणोदये वा ।
प्रदोषकाले नवमीदिनेऽथवा लभेत् भोगान् परमाद्भुतान् प्रियान् ॥

॥ ब्रह्मयामले षोडश्यष्टोत्तरशत नामस्तोत्रं सम्पूर्णम् ॥

॥ श्रीषोडशी सहस्रनाम स्तोत्रम् ॥

कैलाश शिखरे रम्ये नानारत्नोप शोभिते । कल्पपादप मध्यस्थे नानापुष्पोप शोभिते ॥
मणिमण्डपमध्यस्थे मुनिगन्धर्वसेविते । कदाचित् सुखमासीनं भगवन्तं जगद्गुरुम् ॥
कपाल खट्वाङ्गधरं चन्द्रार्धकृत शेखरं । हस्तत्रिशूल डमरुं महावृषभवाहनम् ॥
जटाजूटधरं देवं कण्ठभूषण वासुकिं । विभूतिभूषणं देवं नीलकण्ठं त्रिलोचनम् ॥
द्वीपिचर्म परीधानं शुद्धस्फटिक सन्निभं । सहस्रादित्य सङ्काशं गिरिजार्द्धाङ्गभूषणम् ॥
प्रणम्य शिरसा नाथं कारणं विश्व रूपिणम् । कृताञ्जलिपुटो भूत्वा प्राहैनं शिखवाहनः ॥

॥ कार्तिकेय उवाच ॥

देव देव जगन्नाथ सृष्टिस्थिति लयात्मक । त्वमेव परमात्मा च त्वं गतिः सर्वदेहिनाम् ॥
त्वं गतिः सर्वलोकानां दीनानां च त्वमेव हि । त्वमेव जगदाधारस्त्वमेव विश्वकारणम् ॥
त्वमेव पूज्यः सर्वेषां त्वदन्यो नास्ति मे गतिः । किं गुह्यं परमं लोके किमेकं सर्वसिद्धिदं ॥
किमेकं परमं श्रेष्ठं को योगः स्वर्ग मोक्षदः । विना तीर्थेन तपसा विना दानैर्विना मखैः ॥
विना लयेन ध्यानेन नरः सिद्धिमवाप्नुयात् । कस्मादुत्पद्यते सृष्टिः कस्मिंश्च प्रलयो भवेत् ॥
कस्मादुत्तीर्यते देव संसारार्णव सङ्कटात् । तदहं श्रोतुमिच्छामि कथयस्व महेश्वर ॥

॥ ईश्वर उवाच ॥

साधु साधु त्वया पृष्टं पार्वतीप्रिय नन्दन । अस्ति गुह्यतमं पुत्र कथयिष्याम्यसंशयम् ॥
सत्वं रजस्तमश्चैव ये चान्ये महदादयः । ये चान्ये बहवो भूताः सर्वे प्रकृति सम्भवाः ॥
सैव देवी परा शक्तिर्महात्रिपुर- सुन्दरी । सैव प्रसूयते विश्वं विश्वं सैव प्रपास्यति ॥
सैव संहरते विश्वं जगदेतच्चराचरं । आधारः सर्वभूतानां सैव रोगार्ति हारिणी ॥
इच्छाज्ञानक्रियाशक्ति र्ब्रह्माविष्णुशिवात्मिका । त्रिधा शक्तिस्वरूपेण सृष्टिस्थितिविनाशिनी ॥
सृज्यते ब्रह्मरूपेण विष्णुरूपेण पाल्यते । ह्रियते रुद्ररूपेण जयदेतच्चराचरम् ॥
यस्या योनौ जगत्सर्वमद्यापि परिवर्तते । यस्यां प्रलीयते चान्ते यस्यां च जायते पुनः ॥
यां समाराध्य त्रैलोक्ये सम्प्राप्यं पदमुत्तमम् । तस्या नाम सहस्त्रं तु कथयामि शृणुष्व तत् ॥

विनियोगः - ॐ अस्य श्रीमहात्रिपुर- सुन्दरी सहस्त्रनाम स्तोत्र मन्त्रस्य श्रीभगवान् दक्षिणामूर्तिर्ऋषिः। **जगतीच्छन्दः। समस्त प्रकट गुप्त सम्प्रदाय कुलकौलोत्तीर्ण निगर्भ रहस्याचिन्त्यप्रभावती देवता। ॐ बीजं। ह्रीं शक्तिः। क्लीं कीलकं। धर्मार्थ-काम-मोक्षार्थे जपे विनियोगः।**

ऋष्यादिन्यासं कृत्वा। ध्यायेद् यथा-

॥ ध्यानम् ॥

ॐ आधारे तरुणार्कबिम्बरुचिरं हेमप्रभं वाग्भवं । बीजं मन्मथमिन्द्रगोप सदृशं हृत्- पङ्कजे संस्थितम् ॥
विष्णुब्रह्मपदस्थ शक्ति कलितं सोमप्रभा भासुरं । ये ध्यायन्ति पदत्रयं तवशिवे ते यांति सौख्यं तदम् ॥

मानसोपचार से देवी का पूजन करें पश्चात् सहस्त्रनाम पाठ करें।

कल्याणी कमला काली कराली कामरूपिणी । कामाख्या कामदा काम्या कामना कामचारिणी ॥
कालरात्रिर्महारात्रिः कपाली कालरूपिणी । कौमारी करुणा मुक्तिकल्मष - नाशिनी ॥
कात्यायनी कराधारा कौमुदी कमलप्रिया । कीर्तिदा बुद्धिदा मेधा नीतिज्ञा नीतिवत्सला ॥
माहेश्वरी महामाया महातेजा महेश्वरी । महाजिह्वा महाघोरा महादंष्ट्रा महाभुजा ॥
महामोहान्ध कारघ्नी महामोक्ष - प्रदायिनी । महादारिद्र्यनाशा च महाशत्रु विमर्दिनी ॥
महामाया महावीर्या महापातक - नाशिनी । महामखा मन्त्रमयी मणिपूरक वासिनी ॥

मानसी मानदा मान्या मनश्चक्षूरणे चरा । गणमाता च गायत्री गणगन्धर्व सेविता ।
गिरिजा गिरिशा साध्वी गिरिस्था गिरिवल्लभा । चण्डेश्वरी चण्डरूपा प्रचण्डा चण्डमालिनी ॥
चर्विका चर्चिकाकारा चण्डिका चारुरूपिणी । यज्ञेश्वरी यज्ञरूपा जपरूपा जपयज्ञपरायणा ॥
यज्ञमाता यज्ञभोक्त्री यज्ञेशी यज्ञसम्भवा । सिद्धयज्ञक्रिया सिद्धिर्यज्ञाङ्गी यक्षरक्षिका ॥
यज्ञक्रिया यज्ञरूपा यज्ञाङ्गी यज्ञरक्षिका । यज्ञक्रिया च यज्ञा च यज्ञा यज्ञक्रियालया ॥
जालन्धरी जगन्माता जातवेदा जगत्प्रिया । जितेन्द्रिया जितक्रोधा जननी जन्मदायिनी ॥
गङ्गा गोदावरी चैव गोमती च शतद्रुका । घर्घरा वेदगर्भा च रेचिका समवासिनी ॥
सिन्धुर्मन्दाकिनी क्षिप्रा यमुना च सरस्वती । भद्रा रागविपाशा च गण्डकी विन्ध्यवासिनी ॥
नर्मदा सिन्धु कावेरी वेत्रवत्या सुकौशिकी । महेन्द्रतनया चैव अहल्या चर्मकावती ॥
अयोध्या मथुरा माया काशी काञ्ची अवन्तिका । पुरी द्वारावती तीर्था महाकिल्विष नाशिनी ॥
पद्मिनी पद्ममध्यस्था पद्मकिञ्जल्क वासिनी । पद्मवक्त्रा चकोराक्षी पद्मस्था पद्मसम्भवा ॥
ह्रींकारी कुण्डलाधारा हृत्पद्मस्था सुलोचना । श्रींकारी भूषणा लक्ष्मीः क्लींकारी क्लेशनाशिनी ॥
हरिवक्त्रोद्भवा शान्ता हरिवक्त्रकृतालया । हरिवक्त्रोद्भवा शान्ता हरिवक्षःस्थल स्थिता ॥
वैष्णवी विष्णुरूपा च विष्णुमातृस्वरूपिणी । विष्णुमाया विशालाक्षी विशालनयनोज्ज्वला ॥
विश्वेश्वरी च विश्वात्मा विश्वेशीविश्वरूपिणी । विश्वेश्वरी शिवाराध्या शिवनाथा शिवप्रिया ॥
शिवमाता शिवाख्या च शिवदा शिवरूपिणी । भवेश्वरी भवाराध्या भवेशी भवनायिका ॥
भवमाता भवागम्या भवकण्टक नाशिनी । भवप्रिया भवनन्दा भवानी भवमोहिनी ॥
गायत्री चैव सावित्री ब्रह्माणी ब्रह्मरूपिणी । ब्रह्मेशी ब्रह्मदा ब्रह्मा ब्रह्माणी ब्रह्मवादिनी ॥
दुर्गस्था दुर्गरूपा च दुर्गा दुर्गार्तिनाशिनी । सुगमा दुर्गमा दान्ता दयादोग्ध्री दुरापहा ॥
दुरितघ्नी दुराध्यक्षा दुरा दुष्कृत - नाशिनी । पञ्चास्या पञ्चमी पूर्णा पूर्णपीठ निवासिनी ॥
सत्वस्था सत्वरूपा च सत्वस्था सत्वसम्भवा । रजस्था च रजोरूपा रजोगुण समुद्भवा ॥
तमस्था च तमोरूपा तामसी तामसप्रिया । तमोगुण समुद्भूता सात्विकी राजसी कला ॥
काष्ठा मुहूर्ता निमिषा अनिमेषा ततः परं । अर्द्धमासा च मासा च सम्वसर स्वरूपिणी ॥
योगस्था योगरूपा च कल्पस्था कल्परूपिणी । नानारत्नविचित्राङ्गी नानाऽऽभरणमण्डिता ॥
विश्वात्मिका विश्वमाता विश्वपाशविनाशिनी । विश्वासकारिणी विश्वाविश्वशक्तिर्विचक्षणा ॥
जपा कुसुम सङ्काशा दाडिमीकुसुमोपमा । चतुरङ्गी चतुर्बाहुश्चतुराचार वासिनी ॥
सर्वेशी सर्वदा सर्वा सर्वदायिनी । माहेश्वरी च सर्वाद्या शर्वाणी सर्वमङ्गला ॥
नलिनी नन्दिनी नन्दा आनन्दानन्द वर्द्धिनी । व्यापिनी सर्वभूतेषु भवभारविनाशिनी ॥
सर्वशृङ्गार वेषाढ्या पाशाङ्कुश करोद्यता । सूर्यकोटि सहस्राभा चन्द्रकोटि निभानना ॥

गणेशकोटिलावण्या विष्णुकोट्यरिमर्दिनी । दावाग्नि कोटि दलिनी रुद्रकोट्युग्ररूपिणी ॥
समुद्रकोटि गम्भीरा वायुकोटिमहाबला । आकाशकोटिविस्तारा यमकोटि भयङ्करी ॥
मेरुकोटि समुच्छ्राया गणकोटि समृद्धिदा । निष्कस्तोका निराधारा निर्गुणा गुणवर्जिता ॥
अशोका शोक रहिता तापत्रय विवर्जिता । वसिष्ठा विश्वजननी विश्वाख्या विश्ववर्द्धिनी ॥
चित्रा विचित्रचित्राङ्गी हेतुगर्भा कुलेश्वरी । इच्छाशक्तिर्ज्ञानशक्तिः क्रियाशक्तिः शुचिस्मिता ॥
शुचिः स्मृतिमयी सत्या श्रुतिरूपा श्रुतिप्रिया । महासत्वमयी सत्वा पञ्चतत्त्वोपरिस्थिता ॥
पार्वती हिमवत्पुत्री पारस्था पाररूपिणी । जयन्ती भद्रकाली च अहल्या कुलनायिका ॥
भूतधात्री च भूतेशी भूतस्था भूतभाविनी । महाकुण्डलिनी शक्तिर्महाविभव वर्द्धिनी ॥
हंसाक्षी हंसरूपा च हंसस्था हंसरूपिणी । सोमसूर्याग्नि मध्यस्था मणिमण्डलवासिनी ॥
द्वादशार सरोजस्था सूर्यमण्डलवासिनी । अकलङ्का शशाङ्काभा षोडशार निवासिनी ॥
डाकिनी राकिनी चैव लाकिनी काकिनी तथा । शाकिनी हाकिनी चैव षट्चक्रेषु निवासिनी ॥
सृष्टिस्थितिविनाशिनी सृष्टिस्थित्यंतकारिणी । श्रीकण्ठप्रियहृत्कंठा नन्दाख्या विंदुमालिनी ॥
चतुष्षष्टि कलाधारा देहदण्ड समाश्रिता । माया काली धृतिर्मेधा क्षुधा तुष्टिर्महाद्युतिः ।
हिंगुला मंगला सीता सुषुम्ना मध्यगामिनी । परघोरा करालाक्षी विजया जयदायिनी ॥
हृत्पद्मनिलया भीमा महाभैरव नादिनी । आकाश लिङ्गसम्भूता भुवनोद्यान वासिनी ॥
महत् सूक्ष्मा च कङ्काली भीमरूपा महाबला । मेनकागर्भ सम्भूता तप्तकाञ्चन सन्निभा ॥
अन्तरस्था कूटबीजा त्रिकूटाचल वासिनी । वर्णाख्या वर्णरहिता पञ्चाशद्वर्ण भेदिनी ॥
विद्याधरी लोकधात्री अप्सरा अप्सरःप्रिया । दीक्षा दाक्षायणी दक्षा दक्षयज्ञविनाशिनी ॥
यशःपूर्णा यशोदा च यशोदागर्भसम्भवा । देवकी देवमाता च राधिका कृष्णवल्लभा ॥
अरुंधती शचीन्द्राणी गांधारी गंधमालिनी । ध्यानातीता ध्यानगम्या ध्यानज्ञा ध्यानधारिणी ॥
लम्बोदरी च लम्बोष्ठी जाम्बवन्ती जलोदरी । महोदरी मुक्तकेशी मुक्तकामार्थसिद्धिदा ॥
तपस्विनी तपोनिष्ठा सुपर्णा धर्मवासिनी । वाणचापधरा धीरा पाञ्चाली पञ्चमप्रिया ॥
गुह्याङ्गी च सुभीमा च गुह्यतत्त्वा निरंजना । अशरीरा शरीरस्था संसारार्णव तारिणी ॥
अमृता निष्कला भद्रा सकला कृष्णपिङ्गला । चक्रप्रिया च चक्राह्वा पञ्चचक्रादिदारिणी ॥
पद्मराग प्रतीकाशा निर्मलाकाश सन्निभा । अधःस्था ऊर्ध्वरूपा च ऊर्ध्वपद्मनिवासिनी ।
कार्यकारण कर्तृत्वे शश्वद्रूपेषु संस्थिता । रसज्ञा रसमध्यस्था गन्धस्था गन्धरूपिणी ॥
परब्रह्मस्वरूपा च परब्रह्मनिवासिनी । शब्दब्रह्मस्वरूपा च शब्दस्था शब्दवर्जिता ॥
सिद्धिःबुद्धिः पराबुद्धिः सन्दीप्तिर्मध्यसंस्थिता । स्वगुह्या शांभवी शक्तिस्तत्त्वस्था तत्त्वरूपिणी ॥
शाश्वती भूतमाता च महाभूताधिप प्रिया । शुचिप्रेता धर्मसिद्धिर्धर्मवृद्धिः पराजिता ॥

कामसन्दीपिनी कामा सदा कौतूहलप्रिया । जटाजूटधरा मुक्ता सूक्ष्मा शक्तिविभूषणा ॥
द्वीपिचर्मपरीधाना चीरवल्कल धारिणी । त्रिशूलडमरुधरा नरमाला विभूषणा ॥
अत्युग्ररूपिणी चोग्रा कल्पान्त दहनोपमा । त्रैलोक्यसाधिनी साध्या सिद्धिसाधकवत्सला ॥
सर्वविद्यामयी सारा चासुराणां विनाशिनी । दमनी दामिनी दान्ता दयादोग्ध्री दुरापहा ॥
अग्निजिह्वोपमा घोरा घोर घोर तराननना । नारायणी नारसिंही नृसिंहहृदये स्थिता ॥
योगेश्वरी योगरूपा योगमाता च योगिनी । खेचरी खचरी खेल । निर्वाणपद संश्रया ॥
नागिनी नागकन्या च सुवेशा नागनायिका । विषज्वालावती दीप्ता कलाशत विभूषणा ॥
तीव्रवक्त्रा महावक्त्रा नागकोटित्वधारिणी । महासत्वा च धर्मज्ञा धर्माति सुखदायिनी ॥
कृष्णमूर्द्धा महामूर्द्धा घोरमूर्द्धा वरानना । सर्वेन्द्रिय मनोन्मत्ता सर्वेन्द्रिय मनोमयी ॥
सर्वसंग्रामजयदा सर्वप्रहरणोद्यता । सर्वषोडोपशमनी सर्वारिष्टनिवारिणी ॥
सर्वैश्वर्य समुत्पन्ना सर्वग्रहविनाशिनी । मातङ्गी मत्तमातङ्गी मातङ्गीप्रिय मण्डला ॥
अमृतोदधि मध्यस्था कटिसूत्रैरलंकृता । अमृतोदधि मध्यस्था प्रवालवसनाम्बुजा ॥
मणिमण्डलमध्यस्था ईषत् प्रहसिताननना । कुमुदा ललिता लोला लाक्षालोहित लोचना ॥
दिग्वासा देवदूती च देवदेवाधि देवता । सिंहोपरि समारूढ़ा हिमाचलनिवासिनी ॥
अट्टाट्टहासिनी घोरा घोरदैत्य विनाशिनी । अत्युग्ररक्त वस्त्राभा नागकेयूर मण्डिता ॥
मुक्ताहार लतोपेता तुङ्गपीन पयोधरा । रक्तोत्पल - दलाकारा मदाघूर्णित - लोचना ॥
समस्त देवता मूर्तिः सुरारि - क्षयकारिणी । खड्गिनी शूलहस्ता च चक्रिणी चक्रमालिनी ॥
शंखिनी चापिनी वाणा वज्रिणी वज्रदण्डिनी । आनन्दोदधि मध्यस्था कटिसूत्रैरलंकृता ॥
नानाभरण दीप्ताङ्गी नानामणिविभूषिता । जगदानन्दसम्भूता चिन्तामणि गुणान्विता ॥
त्रैलोक्य नमिता तुर्या चिन्मयानन्द रूपिणी । त्रैलोक्य नन्दिनी देवी दुःखं दुस्स्वप्न नाशिनी ॥
घोराग्निदाह शमनी राज्यदेवार्थ साधिनी । महाऽपराध - राशिघ्नी महाचौर - भयापहा ॥
रागादिदोष रहिता जरामरण वर्जिता । चन्द्रमण्डल मध्यस्था पीयूषार्णव सम्भवा ॥
सर्वदेवैः स्तुता देवी सर्वसिद्धैर्नमस्कृता । अचिन्त्यशक्तिरूपा च मणिमन्त्रमहौषधी ॥
अस्तिस्वस्तिमयी बाला मलयाचल वासिनी । धात्री विधात्री संहारी रतिज्ञा रतिदायिनी ॥
रुद्राणी रुद्ररूपा च रुद्ररौद्रार्त्तिनाशिनी । सर्वज्ञा चैव धर्मज्ञा रसज्ञा दीनवत्सला ॥
अनाहता त्रिनयना निर्भारा निर्वृतिः परा । पराऽघोरा करालाक्षी सुमतीश्रेष्ठदायिनी ॥
मन्त्रालिका मन्त्रगम्या मन्त्रमाला सुमंत्रिणी । श्रद्धानन्दा महाभद्रा निर्द्वन्द्वा निर्गुणात्मिका ॥
धरिणी धारिणी पृथ्वी धरा धात्री व सुन्धरा । मेरुमन्दर मध्यस्था स्थितिः शङ्करवल्लभा ॥
श्रीमती श्रीमयी श्रेष्ठा श्रीकरीभावभाविनी । श्रीदा श्रीमा श्रीनिवासा श्रीमती श्रीमतांगतिः ॥

उमा सारंगिणी कृष्णा कुटिला कुटिलालका । त्रिलोचना त्रिलोकात्मा पुण्यपुण्या प्रकीर्तिता ।
अमृता सत्यसङ्कल्पा सा सत्या ग्रंथि भेदिनी । परेशी परमा साध्या पराविद्या परात्परा ॥
सुन्दराङ्गी सुवर्णाभा सुरासुरनमस्कृता । प्रजा प्रजावती धन्या धनधान्य समृद्धिदा ॥
ईशानी भुवनेशानी भवानी भुवनेश्वरी । अनन्तानन्त महिता जगत्सारा जगद्भवा ॥
अचिंत्यात्मा चिंत्यशक्तिश्चिंत्याचिंत्यस्वरूपिणी । ज्ञानगम्या ज्ञानमूर्तिर्ज्ञानिनी ज्ञानशालिनी ॥
असिता घोररूपा च सुधाधारा सुधावहा । भास्करी भास्वती भीतिर्भास्वदक्षानुशायिनी ॥
अनसूया क्षमा लज्जादुर्लभा भरणात्मिका । विश्वघ्नी विश्ववीरा च विश्वघ्नी विश्वसंस्थिता ॥
शीलस्था शीलरूपा च शीला शीलप्रदायिनी । बोधनी बोधकुशला रोधनी बोधनी तथा ॥
विद्योतिनी विचित्रात्मा विद्युत्पटलसन्निभा । विश्वयोनिर्महायोनिः कर्मयोनिः प्रियात्मिका ॥
रोहिणी रोगशमनी महारोगज्वरापहा । रसदा पुष्टिदा पुष्टिर्मानदा मानवप्रिया ॥
कृष्णाङ्गवाहिनी कृष्णाकृष्णा कृष्णसहोदरी । शाम्भवी शम्भुरूपा च शंभुस्था शंभुसंभवा ॥
विश्वोदरी योगमाता योगमुद्राघ्न योगिनी । वागीश्वरी योगनिद्रा योगिनी - कोटिसेविता ॥
कौलिका मन्दकन्या च शृङ्गार पीठवासिनी । क्षेमङ्करी सर्वरूपा दिव्यरूपा दिगम्बरी ॥
धूम्रवक्त्रा धूम्रनेत्रा धूम्रकेशी च धूसरा । पिनाकी रुद्रवेताली महावेताल रूपिणी ॥
तपिनी तापिनी दीक्षा विष्णुविद्यात्मनाश्रिता । मंथरा जठरा तीव्रा अग्निजिह्वा भयापहा ॥
पशुघ्नी पशुरूपा च पशुहा पशुवाहिनी । पिता माता च धीरा च पशुपाश विनाशिनी ॥
चन्द्रप्रभा चन्द्ररेखा चन्द्रकांति विभूषिणी । कुङ्कमाङ्कित सर्वाङ्गी सुधा सद्गुरु लोचना ॥
शुक्लाम्बरधरा देवी वीणापुस्तक धारिणी । ऐरावत पद्मधरा श्वेतपद्मासन स्थिता ॥
रक्ताम्बरधरा देवी रक्तपद्मविलोचना । दुस्तरा तारिणी तारा तरुणी ताररूपिणी ॥
सुधाधारा च धर्मज्ञा धर्मसंगोपदेशिनी । भगेश्वरी भगाराध्या भगिनी भगनायिका ॥
भगबिम्बा भगक्लिन्ना भगयोनिर्भगप्रदा । भगेश्वरी भगाराध्या भगिनी भगनायिका ॥
भगेशी भगरूपा च भगगुह्या भगावहा । भगोदरी भगानन्दा भगस्था भगशालिनी ॥
सर्वसंक्षोभिणी शक्तिस्सर्वविद्राविणी तथा । मालिनी माधवी माध्वी मधुरूपा महोत्कटा ॥
भरुण्ड - चन्द्रिका ज्योत्स्ना विश्वचक्षुस्तमोपहा । सुप्रसन्ना महादूती यमदूती भयङ्करी ॥
उन्मादिनी महारूपा दिव्यरूपा सुरार्चिता । चैतन्यरूपिणी नित्या क्लिन्ना काममदोद्धता ॥
मदिरानन्दकैवल्या मदिराक्षी मदालसा । सिद्धेश्वरी सिद्धविद्या सिद्धाद्या सिद्धसंभवा ॥
सिद्धर्द्धिः सिद्धमाता च सिद्धिः सर्वार्थसिद्धिदा । मनोमयी गुणातीता परंज्योतिःस्वरूपिणी ॥
परमेशी परगा पारापरा सिद्धिः परागतिः । विमला मोहिनी आद्या मधुपानपरायणा ॥
वेदवेदाङ्ग जननी सर्वशास्त्रविशारदा । सर्वदेवमयी विद्या सर्वशास्त्रमयी तथा ॥

सर्वज्ञानमयी देवी सर्वधर्ममयीश्वरी । सर्वयज्ञमयी यज्ञा सर्वमन्त्राधिकारिणी ॥
सर्वसम्पत् प्रतिष्ठात्री सर्वविद्राविणी परा । सर्वसंक्षोभिणी देवी सर्वमङ्गलकारिणी ॥
त्रैलोक्याकर्षिणी देवी सर्वाह्लादन कारिणी । सर्वसंमोहिनी देवी सर्वस्तंभन कारिणी ॥
त्रैलोक्य - जृम्भिणी देवी तथा सर्ववशङ्करी । त्रैलोक्य रञ्जिनी देवी सर्वसंपत्तिदायिनी ॥
सर्वमन्त्रमयी देवी सर्वद्वन्द्वक्षयङ्करी । सर्वसिद्धिप्रदा देवी सर्वसम्पत्प्रदायिनी ॥
सर्वप्रियकरी देवी सर्वमङ्गलकारिणी । सर्वकामप्रदा देवी सर्वदुःखविमोचिनी ॥
सर्वमृत्युप्रशमनी सर्वविघ्नविनाशिनी । सर्वाङ्गसुन्दरी माता सर्वसौभाग्य दायिनी ॥
सर्वज्ञा सर्वशक्तिश्च सर्वैश्वर्य फलप्रदा । सर्वज्ञानमयी देवी सर्वव्याधि विनाशिनी ॥
सर्वाधारस्वरूपा च सर्वपापहरा तथा । सर्वानन्दमयी देवी सर्वेच्छायाः स्वरूपिणी ॥
सर्वलक्ष्मीमयी विद्या सर्वेप्सित फलप्रदा । सर्वारिष्ट प्रशमनी परमानन्द दायिनी ॥
त्रिकोणनिलया त्रिस्था त्रिमात्रा त्रितनुस्थिता । त्रिवेणी त्रिपथा त्रिस्था त्रिमूर्तिस्त्रिपुरेश्वरी ॥
त्रिधाम्नी त्रिदशाध्यक्षा त्रिवित्रि पुरवासिनी । त्रयीविद्या च त्रिशिरा त्रैलोक्या च त्रिपुष्करा ॥
त्रिकोटरस्था त्रिविधा त्रिपुरा त्रिपुरात्मिका । त्रिपुरा श्री त्रिजननी त्रिपुरा त्रिपुरसुन्दरी ॥

॥ फलश्रुति ॥

इदं त्रिपुरसुन्दर्याः स्तोत्रं नाम साहस्त्रकं । गुह्याद् गुह्यतरं पुत्र तव प्रीत्यै प्रकीर्तितम् ॥१॥
गोपनीयं प्रयत्नेन पठनीयं प्रयत्नतः । नातः परतरं पुण्यं नातः परतरं तपः ॥२॥
नातः परतरं स्तोत्रं नातः परतरा गतिः । स्तोत्रं सहस्त्र नामाख्यं मम वक्त्राद् विनिर्गतम् ॥३॥
यः पठेत् प्रयतो भक्त्या शृणुयाद् वा समाहितः । मोक्षार्थी लभते मोक्षं स्वर्गार्थी स्वर्गमाप्नुयात् ॥४॥
कामांश्च प्राप्नुयात् कामी धनार्थी च लभेद् धनं । विद्यार्थी लभते विद्यां यशोऽर्थी लभते यशः ॥५॥
कन्यार्थी लभते कन्या सुतार्थी लभते सुतम् । गुर्विणी जनयेत् पुत्रं कन्या विन्दति सत्पतिम् ॥६॥
मूर्खोऽपि लभते शास्त्रं हीनोऽपि लभते गतिम् । संक्रान्त्यां वार्कामावस्यामष्टम्यां च विशेषतः ॥७॥
पौर्णमास्यां चतुर्दश्या नवम्यां भौमवासरे । पठेद् वा पाठयेद् वापि शृणुयाद् वा समाहितः ॥८॥
स मुक्तो सर्वपापेभ्यः कामेश्वर समोभवेत् । लक्ष्मीवान् धर्मवाश्चैव वल्लभस्सर्व योषिताम् ॥९॥
तस्य वश्यं भवेदाशु त्रैलोक्यं सचराचरम् । रुद्रं दृष्ट्वा यथा देवा विष्णुं दृष्ट्वा च दानवाः ॥१०॥
यथाहिर्गरुडं दृष्ट्वा सिंहं दृष्टा यथा गजाः । कीटवत् प्रपलायन्ते तस्य वक्त्रावलोकनात् ॥११॥
अग्निचौरभयं तस्य कदाचिन्नैव सम्भवेत् । पातका विविधाः शान्तिर्मेरु - पर्वत सन्निभाः ॥१२॥
यस्मात् तच्छृणुयाद् विघ्नांस्तृणं वह्निहुतं यथा । एकदा पठनादेव सर्वपापक्षयो भवेत् ॥१३॥
दशधा पठनादेव वाचा सिद्धिः प्रजायते । शतधा पठनाद् वापि खेचरो जायते नरः ॥१४॥
सहस्त्रदशसंख्यातं यः पठेद् भक्तिमानसः । माताऽस्य जगतां धात्री प्रत्यक्षा भवति ध्रुवम् ॥१५॥
लक्षपूर्णे यथा पुत्र स्तोत्रराजं पठेत् सुधीः । भवपाश विनिर्मुक्तो मम तुल्यो न संशयः ॥१६॥

सर्वतीर्थेषु यत्पुण्यं सकृज्जप्त्वा लभेन्नरः । सर्ववेदेषु यत् प्रोक्तं तत् फलं परिकीर्त्तितम् ॥१७॥
भूत्वा च बलवान्पुत्र धनवान् सर्वसम्पदः ।
देहान्ते परमं स्थानं यत् सुरैरपि दुर्लभम् ॥
स यास्यति न सन्देहः स्तवराजस्य कीर्त्तनात् ॥१८॥

॥ श्रीवामकेश्वरतन्त्रे षोडश्याः सहस्रनामस्तोत्रं सम्पूर्णम् ॥

॥ श्री तुरीया षोडशी त्रैलोक्य विजयं कवच स्तोत्रम् ॥

कैलास शिखरे रम्ये देव देवं जगद्गुरुम् । शङ्करं परिपप्रच्छ कुमारः शिखि वाहनः ॥

॥ श्रीस्कन्द उवाच ॥

जनक श्रीगुरो देव पुत्र वात्सल्य वर्धन । कवचं षोडशाक्षर्या वद मे परमेश्वर ॥

॥ श्रीईश्वर उवाच ॥

शृणु पुत्र महाभाग! कवचं मन्त्र विग्रह । गोप्याद् गोप्यतरं गोप्यं गुह्याद् गुह्यतरं महत् ॥
तव स्नेहात्प्रवक्ष्यामि नाख्यातं यस्य कस्यचित् । ब्रह्मेश विष्णु शक्रेभ्यो मया न कथितं पुरा ॥
देवाग्रे नैव दैत्याग्रे न शौनक गुणाग्रके । तव भक्त्या तु कवचं गोप्यं कर्तुं न शक्यते ॥
एकादश महाविद्या स वर्णा सद् गुणान्विता । सर्वशक्ति प्रधाना हि कवचं मन्मुखोदितं ॥
गणेशश्च रविर्विष्णुः शिव शक्तिश्च भैरवः । पञ्च तत्त्वादि सर्वेषां वर्मावर्तेन तुष्यताम् ॥
ऊर्ध्वाम्नायं महामन्त्रं कवचं निर्मितं मया । त्रैलोक्यविजयं दिव्यं तुरीयं कवचं शुभं ॥

॥ श्रीस्कन्द उवाच ॥

कवचं परमं देव्याः श्रोतुमिच्छाम्यहं प्रभो । यत् सूचितं त्वया पूर्वं धर्म कामार्थ मोक्षदं ॥
तद् विनाऽऽराधनं नास्ति जपं ध्यानादि कर्मणि । तस्याश्च कवचं यस्मात् तस्मात् तद् वद मे प्रभो ॥

॥ श्रीईश्वर उवाच ॥

शृणु पुत्र महाप्राज्ञ! रहस्याति रहस्यकम् । तुरीयं कवचं दिव्यं सर्वमन्त्र मयं शुभं ॥

॥ विनियोगः ॥

पूजान्ते तु जपात् पूर्वं कवचं समुदीरयेत् । अस्य श्रीकवचस्यास्य ऋषिरानन्द भैरवः ॥
श्रीविद्या देवताश्छन्दो गायत्री रुचि वृत्तिकं । रमाबीजं परा शक्तिर्वाग्भवं कीलकं स्मृतं ॥

॥ करन्यासः ॥

मम सर्वार्थ सिद्ध्यर्थे जपे तु विनियोगतः । अङ्गुष्ठाग्रे वाग्भवं च हृल्लेखां तर्जनी न्यसेत् ॥
लक्ष्मी बीजं मध्यमायामङ्गिराऽनामिका तथा । पराबीजं कनिष्ठायां लक्ष्मीं करतले न्यसेत् ॥

॥ षडङ्गन्यास ॥

हृदये वाग्भवं न्यस्यात् परां शिरसि च न्यसेत् । लक्ष्मीबीजं शिखायां च कवचे वाग्भवं न्यसेत् ॥

॥दिग्बन्धन ॥

हृल्लेखां नेत्रयोर्न्य स्यादस्त्रं तु कमलां न्यसेत् । भूर्भुवः स्वरिति मनुना दिग्-बन्धनमाचरेत् ॥
ध्यानं तस्य प्रवक्ष्यामि धर्म कामार्थ मोक्षदं । न्यास ध्यानादिकं सर्वं कृत्त्वा तु कवचं पठेत् ॥

॥ ध्यानम् ॥

क्षीरसागर मध्यस्थे रत्नद्वीपे मनोहरे । रत्नसिंहासने दिव्ये तत्र देवीं विचिन्तयेत् ॥
कोटिसूर्य प्रतीकाशां चन्द्रकोटि निभाननां । दाडिमी पुष्प सङ्काशां कुकुंमोदर सन्निभां ॥
जपा कुंसुम सङ्काशां त्रिनेत्रां च चतुर्भुजां । पाशांकुशधरां रम्यामिक्षु चापशरान्वितां ॥
कर्पूर शकलोन्मिश्र ताम्बूल पूरिताननाम् । सर्वशृंगार वेषाढ्यां सर्वावयव शोभिनीं ॥
सर्वायुध समायुक्तां प्रसन्नवदने क्षणाम् । सपरिवार सावरणां सर्वोपचारार्चिताम् ॥
एवं ध्यायेत् ततो वीर! कवचं सर्वकामदं । आवर्तयेत् स्वदेहे तु सर्वरक्षाकरं शुभम् ॥

॥ कवच स्तोत्रम् ॥

शिखायां मे ह्सौः पातु स्हौ मे ब्रह्मरन्ध्रके । सर्वदा ह्लौं च मां पातु वाम दक्षिण भागयोः ॥
ऐं ह्रीं श्रीं सर्वदा पातु षोडशी सुन्दरी परा । श्रीं ह्रीं क्लीं सर्वदा पातु ऐं सौं ॐ पातु मे सदा ॥
ह्रीं श्रीं ऐं पातु सर्वत्र क्नौं रं लं ह्रीं सदा मम । क्लीं हसकहल ह्रीं मे पातु सदा सौः क्लीं मम ॥
सौः ऐं क्लीं ह्रीं श्रिया पातु सबीजा षोडशाक्षरी । आपाद मस्तकं पातु महात्रिपुरसुन्दरी ॥
श्रीजयन्ती मस्तके मां पातु नित्यं विभूतये । ह्रीं मङ्गलासदा नेत्रे पातु सर्वार्थ सिद्धये ॥
क्लीं कालिका कर्णयुग्मं पातु सर्वशुभावहा । ऐं भारती घ्राण युग्मं पातु सर्वजयाप्तये ॥
सौः कराली मुखं पातु सर्वलोक वशाप्तये । ऐं शारदा सदा वाचं पातु साहित्य सिद्धये ॥
ॐ कपालिनी मे कर्णौं पातु सद्गान सिद्धये । ह्रीं दुर्गासहिता पातु स्कन्ध देशौ सदा मम ॥
श्रीं क्षमसहिता पातु हृदयं मम सर्वदा । ककार सहिता धात्री पार्श्वयुग्मं सदाऽवतु ॥
एकार सहिता स्वाहा पातु मे जठरं सदा । ईकार सहिता नाभिं स्वधा मां सर्वदाऽवतु ॥
लकार सहिता ब्राह्मी पृष्ठदेशं सदाऽवतु । ह्रींकार सहमाहेशी कटिं पातु सदा मम ॥
हकार सहिता गुह्यं कौमारी पातु सर्वदा । सकार सहिता पातु वैष्णवी गुद देशकम् ॥
ककार युक्ता वाराही ह्यूरु युग्मं सदाऽवतु । हकार सहिता जानु युग्मं माहेन्द्री मेऽवतु ॥
लकार युक्ता चामुण्डा जङ्घा युग्मं सदाऽवतु । ह्रींकार सहिता गुल्फयुग्मं लक्ष्मीः सदाऽवतु ॥
सकार युक्ता मे पाद युग्मेऽव्यात् शिवदूतिका । ककार सहिता प्राच्यां चण्डा रक्षतु सर्वदा ॥
लकारसहिताऽऽग्नेयां प्रचण्डा सर्वदाऽवतु । ह्रींङ्कार सहिता पातु दक्षिणे चण्डनायिका ॥
सौःकार सहिता चण्डवेगिनी नैर्ऋतेऽवतु । ऐङ्कार संयुता चण्डप्रकाशा पातु पश्चिमे ॥
क्लींकार सहिता पातु चण्डिका वायु गोचरे । ह्रींकार सहिता पातु चामुण्डा चोत्तरे मम ॥

श्रीङ्कार सहिता रौद्री पायादैशान्यके मम । ऊर्ध्वं ब्रह्माणी मे रक्षेत् षोडशी सह सर्वदा ॥
अधस्ताद् वैष्णवी रक्षेत् पुनः षोडशी संयुता । सर्वाङ्गं सर्वदा पातु सहिता भुवनेश्वरी ।
जले दावानलेऽरण्ये महोत्पाते च सागरे । दिवारात्रौ च मे रक्षेद् देवी तार त्रयी मम ।

॥फलश्रुति॥

इदं तुरीया सहितं षोडशाक्षरिकात्मकं । अभेद्यं कवचं त्वेदं मन्त्रबीज समन्वितम् ॥
योगिनी चक्रसहितं तवप्रीत्या प्रकाशितम् । धारयस्व मयादत्तं गोपनीयं सुपुत्रक ॥
न पुत्राय न शिष्याय बन्धुभ्यो न प्रकाशयेत् । इदं त्रिपुर सुन्दर्यास्तुरीयं कवचं शुभम् ॥
गोपनीयं प्रयत्नेन मन्त्रवर्णक्रमोदितम् । प्रातरारभ्य सायान्तं कर्म वेदान्तमोक्तिकम् ॥
तत्फलं समवाप्नोति तुरीय कवच व्रतम् । दशधा मातृकान्यासं लघुषोढा ततः परम् ॥
शक्तिन्यासं महाषोढां कृत्वा बाह्यान्तरं न्यसेत् । श्रीविद्यायां महान्यासं क्रमात् सावर्णतां व्रजेत् ॥
पूजान्ते यत्फलं प्राप्तं तत्फलं कवचव्रते । सवत्सां दुग्धसहितां साधकः कामधेनुवत् ॥
त्रैलोक्य विजयायेदं कवचं परमाद्भुतम् । यथा चिन्तामणौ पुत्र! मनसा परिकल्पिते ॥
तत्सर्वं लभते शीघ्रं मम वाक्यान्न संशयः । सायुरारोग्यमैश्वर्यं सदा सम्पत्प्रवर्धनम् ॥
कवचस्य प्रभावेण त्रैलोक्य विजयीभवेत् । अदीक्षिताय न देयं श्रद्धा विरहितात्मने ॥
नाख्येयं यस्य कस्यापि कृतघ्नायाततायिने । शान्ताय गुरुभक्ताय देयं शुद्धाय साधने ॥
अज्ञात्वा कवचं चेदं यो जपेत् पर देवताम् । सिद्धिर्न जायते वत्स! कल्पकोटि शतैरपि ॥
स एव च गुरु साक्षात् कवचं यस्तु पुत्रक । त्रिसन्ध्यं च पठेन्नित्यमिदं कवचमुत्तमम् ॥
निशार्धे जपकाले वा प्रत्यहं यन्त्रमग्रतः । जगद्वश्यं भवेच्छीघ्रं नात्र कार्याविचारणा ॥
सप्तकोटि महामन्त्राः सवर्णाः सगुणान्विताः । सर्वे प्रसन्नतां यान्ति सत्यं सत्यं न संशयः ॥
इति ते कथितं दिव्यं सगुणं भजन क्रमम् । निर्गुणं परमं वक्ष्ये तुरीयं कवचं शृणु ॥
कवचस्यास्य माहात्म्यं वर्णितुं नैव शक्यते । मूलादि ब्रह्मरन्ध्रान्तं श्रीचक्रं समुदीरयेत् ॥
देहमध्ये च सर्वस्वं श्रीचक्रं चिन्तयेत् सुत । पञ्चविंशति तत्वं च अतलं वितलं तथा ॥
सुतलं च तलातलं महातलं च पञ्चमम् । रसातलं षष्ठं वक्ष्ये सप्तमं पाताललोकम् ॥
भूर्भुवः स्वर्लोकमतो महल्लोक जनस्तथा । तपश्च सत्यलोकश्च भुवनानि चतुर्दश ॥
सर्वं श्रीभुवनं चैव निराकारं विचिन्तयेत् । मानसे पूजयेत् ध्यायेज्ज्योति रूपं सुचिन्मयं ॥
कवचं प्रजपेद् वत्स! राजराजेश्वरो भवेत् । इति परमरहस्यं सर्वमन्त्रार्थ सारं ।
भजति परम भक्त्या निश्चलं निर्मलत्वम् ॥
विलसित भुवि मध्ये पुत्रपौत्राभिवृद्धिं ।
धनसकल समृद्धिं भोग-मोक्षप्रदं च ॥

॥इतिश्री चूड़ामणौ श्रीशिव-स्कन्द संवादे त्रैलोक्य विजयं नाम श्रीतुरीया षोडशी श्रीराजराजेश्वरी महात्रिपुरसुन्दरी कवचं सम्पूर्णम्॥

॥ श्री श्रीविद्या वृहत्कर्पूर स्तोत्रम् ॥

इस स्तोत्र में श्लोक २ से ८ एवं १०-११ के अन्तर्गत कई मंत्रों के मंत्रोद्धार दिये गये हैं, पश्चात् श्रीचक्रराज महिमा अभिव्यक्त की गई है।

सपूज्य शुक्लारुण चक्र चारिणीं मूलादि विन्द्वान्तर्गतां विभावयन् ।
स्थिति स्वरूपां हृदयारविन्दगामीडेश पाशांकुश वाण चापिनीम् ॥१॥

कर्पूरं पूर रेफैर्विरहितममलं योनियुक्तं महेशीकारोपेतं ललज्जा युतमपि वरदे देवि! वाक् कूटमाहुः। एतन्नित्यं जपन्ति स्मरहरमहिले! तर्क काव्याऽऽगमज्ञास्तान् मुञ्चत्यब्ज हस्ता कथमपि न च ते साधकाः सम्भवन्ति॥२॥

ईशानः सोम मारौ गिरिश शत मखौ भौवने शाख्य बीजमित्थं ते काम कूटं प्रजपति सुजनो वारमेकं कदाचित्। पार्श्वे नृत्यन्ति कामाकुलित मृग दृशाः प्राणदाः साधकस्य नित्यं निर्वाणविद्या विलसति हृदयाम्भोज मध्ये च तस्य ॥३॥

सोमः कामेन्द्र लज्जायुतमिदमनिशं शक्ति कूटं तृतीयं प्रातर्यश्चन्द्र चूडां विकसित वदनाम्भोज संशोभितां त्वाम्। ध्यायन् राजाधि राजेश्वरि! जपति जनः शान्तचित्तः प्रकामं स स्यात् त्रैलोक्यनाथः सुर मुनि दनुजैः सेव्य मानो महात्मा ॥४॥

सर्वं वागादि कूट त्रयमपि ललिते! दिश्य कौलावतंसं, कौलज्ञानैक गम्यां धृत कुसुम धनुर्वाण पाशांकुशां त्वाम्। त्रैलोक्याकर्षकः स्याद् यदि जपति सदा भावयन् रक्त वर्णां प्रातः स्वान्तोपचारै रतुल्ति विभवेऽभ्यर्च्य मूलाम्बुजस्थाम् ॥५॥

जपित्वा लक्ष त्रयं ते मनुमनल मुखे तद् दशांशं विधाय कुर्याद् यश्चक्रपूजां सुरगणनमिते श्रीयुतः स्यात् स एव। पृथ्वी पालोत्तमाङ्गासृत मणिमुकुट ज्वालिनी राजितांघ्रिर्वाचालः काव्यकर्त्ताऽमर पुरगणिका चित्तचौरश्चिरायुः ॥६॥

वाक्कूटं तदनु तव शिवे! शक्ति कूटं नियोज्य श्रीयुक्तं मन्त्रमेतज्जपति परशिवां षोडशीं षोडशार्णाम्। ध्यायेत् पाशांकुशां त्वामभय वर करां सोमसूर्याग्नि नेत्रां रक्तां चन्द्रावतंसां स भवति सकलैश्वर्य युक्तः कुलज्ञः ॥७॥

तारं मायां स पद्मां तदनु निगदितं देवि! कूट त्रयं च श्रीमाया काम वाणी स्मर हर दयिते! शक्ति युक्तैस्तदेतैः। इत्युक्तैः पञ्च बीजैः कृत पुटित महाबीज षट्कं विधाय श्रीविद्ये बीजरूपं भवति तव मनुं श्रीयुतं मोक्षदं च ॥८॥

मातः श्रीमन्त्रराज स्मरति यदि जनो वारमेकं जितात्मा कामेशाङ्क स्थितां त्वामरुणित वसनां सुस्मितामम्बुजस्थाम्। खं व्योमाकाश चन्द्र प्रमित दल युताम्भोज मध्ये विभाव्य सर्वैः पापर्विमुक्तस्तदवधि चरितैः पुण्यरूपः स एव ॥९॥

तारान्ते वाक् त्रयान्ते स्मरमपि कमलान्तेऽपि तच्छक्तिकूटं पूर्वोक्तैः पञ्च बीजैः कृतपुटित महामन्त्र राजं तवेदम्। ध्यायन् विद्याक्ष पाशांकुश करकमलां गौर वर्णां त्रिनेत्रां सर्वज्ञः। स्याज्जपेद् यः कुलपथ विधिना श्रीमहाषोडशीं त्वाम् ॥१०॥

शक्त्याख्यं चैव कामं प्रथम निगदितं कूटमब्जासनाढ्यां मायावेदादि युक्तं पुटितमपि सदा पञ्चबीजैः पुरोक्तैः। ध्यायन् नीलाम्बरां त्वां शशि सकल धरां पान पात्रां त्रिनेत्रां त्रैलोक्यं क्षोभयेद् यः प्रजपति विधिना दीक्षितः कौलिकेन्द्रः ॥११॥

मातः! श्रीमन्त्रमेतत् त्रितयमपि सदा दिव्य भावानुरक्तो दीक्षां सम्प्राप्य यत्नाज्जपति निजगुरु प्रोक्त मार्गेण कश्चित्। जीवन्मुक्तः स एव त्रिभुवन विजयी सर्व वेद गमज्ञः साक्षान्नारायणस्य प्रतिनिधिरचिरात् त्वत् पदं प्राप्नुयाद् यः ॥१२॥

प्रातः श्रीचक्र संस्थामविरतं महिलाभिर्युतः साधकेन्द्रः शुक्लैर्वोक्तोपचारैः क्रमपथनिहितैर्मन्त्रवर्यैः समर्च्य। साङ्गां साम्नाय विद्यामकुलकुलगतां षोडशाधारमूलां ध्यायन् यो वर्ण लक्षं जपति शिव समः स्यान्महाषोडशीं त्वाम् ॥१३॥

त्रिवृत्तं भूगेहे रसविधु - दलान्तर्वसुदलं ततो मन्वस्रान्तः सुललितदशार द्वयमपि ।
तदन्तः सर्पारं जननि! कुल बालार्क सदृशं, त्रिकोणं तन्मध्ये विमल तर विन्दुर्भगवति ॥१४॥

तवेदं श्रीचक्रं जगदखिलमात्मा त्वमिति च शरीरं तच्छैवं चिदपि परमे शाक्तममलम् ।
गुरोर्ज्ञात्वा सर्वं विलिखति सदा भावनपरस्त्रि लक्षं सिन्दूरैः स भवति नरेन्द्रः क्षितितले ॥१५॥

सुधाक्तैः सिन्दूरैरपि कुलरजोभिः सुरुचिरं, विलिख्य श्रीचक्रं प्रणमति च सन्तर्पयति यः ।
निशायां प्रालेयाचल कुल महोत्तंस कलिके, भवेच्छक्त्या युक्तः सकल जगतामेव वशकृत् ॥१६॥

गुरुप्रोक्तैर्मार्गैः परशिवमुखाम्भोज मुदिते, स्वदेहे श्रीचक्रं सततमपि सञ्चिन्तयति यः ।
स योगीशो वाग्मी वर निकर चूडामणिरपि, प्रवालप्राले य प्रभजति सुगुप्तं प्रभवति ॥१७॥

तदस्मिञ्छ्री पीठाश्रितरुचिर सिंहासनगतां, महापञ्च प्रेतैः सुर निकर कोलैश्च सहिताम् ।
समुक्ता माणिक्यैरसुर विवुधालभ्य मणिभिः, कृताङ्गालङ्कारां जितमदन रूपां त्रिनयनाम् ॥१८॥

नवीनादित्याभां धृत शशिकलां मुक्त चिकुरां, शरांश्चापं पाशं शृणिमपि धृतां हस्त कमलैः ।
महाकामेशाङ्के - कृतनिवसतीं रक्तवदनां, स्मितं कामं दृष्ट्वा स्मितमुख सरोजां परशिवाम् ॥१९॥

जनो योध्यायेत् त्वामकुलकुलमार्ग क्रमयुतः, समर्चायां नित्यं भुवन भय भङ्ग व्यासनिनि ।
मयूखाभिस्ताभिः प्रकट वदनाभिश्च सहितां, चतुः पीठासीनां त्रिदशगण वन्द्यः स भवति ॥२०॥

शिवे! त्वं संक्षोभिण्यसि जननि! विद्रावणकरी, परे! सर्वाकर्षिण्यसि सुललिते! सर्व वशिनी ।
अजे! सर्वोन्मादिन्यसि भगवति! त्वं त्रिनयने, त्वमेका कल्याणीश्वरि! कुलमहेश्यंकुशधरी ॥२१॥

भवाधारे खेचर्यसि जननि! बीजा त्वमसि च, महायोनिस्त्वं वै निखिलभुवनानामपि सदा ।
त्रिखण्डारूपा त्वं जगदघहरे! कौलसुखदे, करेमुद्रारूपा ब्रजसि यदि कस्यापि स शिवः ॥२२॥

समाराध्यां देवीं सकलकुल मुद्राक्रम युतां, विभाव्य त्वां नित्यं परमशिव - पर्यङ्कनिलये ।
गुरूक्तैस्तद् वीजैः सहरचित मुद्रास्तव मुदे, पुरस्त जायन्ते मदनहरतुल्याः सुरनुताः ॥२३॥

उमा त्वं काली त्वं त्वमसि भुवना दुर्गतिहरे, परा गुह्या तारा स्मरहरसती चन्द्रवदने ।
महाकुब्जा बाला त्रिपुर ललिता त्वं च विमले, रमा वाणी सर्वावरणजननी त्वं भगवति ॥२४॥

कलाभिर्नित्याभिस्तिथि परिमिताभिः परिवृतां, समभ्यर्चच्छ्री मद्‌गुरु कुलमपि प्रोक्त विधिना ।
स्मरेद् यस्त्वामङ्गाश्रित युवतिषड्भिः स्मितमुखि, स सर्वार्थावासः प्रमुदितमना स्यादिह सदा ॥२५॥

धरित्रि चक्रस्थां स्फटिक दृशदच्छच्छविमयीं, त्रिनेत्रामम्भोज - द्वय धृतकरां पुस्तकधराम् ।

तथाक्ष स्त्रग्धस्तां प्रकट जननीभिः परिवृतां, स चार्वाकां रम्यां निखिल भव सम्मोहन कराम् ॥२६॥

त्रिवृत्तस्थां रक्तां कठिन कुचभारां त्रिनयनां, विचित्रालङ्कारामभययुत विद्याक्ष वरदाम् ।

महाक्षैः संयुक्तां स विजितमनस्कांश्च युवतीं, सदा त्रैवर्गाणां फलमपि सकृत् साधन कराम् ॥२७॥

कलापत्राब्जस्थां हिमगिरि निभां शुभ्रवसनां, महागुप्ताख्याभिः करकलित पाशामभि युताम् ।

त्रिनेत्रां पाणिभ्यामभय वरदामकुश करां, स बौद्धां सर्वेषामभिलषित दानाश्वासनिनीम् ॥२८॥

जपापुष्पारक्तामभय वर विद्याक्ष विलसत्, कराम्भोजामष्टच्छद कमलसंस्थां त्रिनयनाम् ।

सदैनां देवीं गुप्ततर सकलाभिः परिवृतां, सुधासक्तां शान्तां पशुजनमहा - क्षोभण कराम् ॥२९॥

सदा शक्रारस्थामरुण वसनां सम्पदयुत, प्रदायाख्याभिस्ताभिरखिल सुसौभाग्यजननीम् ।

त्रिनेत्रां विद्याक्षाभय वर कराब्जैरपि युतां, ससांख्यां स्वच्छंदां स्मितमुखसरोजां च सुभगाम् ॥३०॥

सहस्त्रार्काभासामखिल कुल कौलादि सहितां, त्रिनेत्रां विद्याक्षाभय वरकरां रक्तवसनाम् ।

बहिः खैकारस्थां निखिलनिगमैः संयुतपदां, सतां सर्वार्थानामपि सुतरसा साधन करीम् ॥३१॥

दशारस्थामन्तः सकल सुररक्षणकरीं, प्रवालारक्ताभां त्रिनयनयुक्तां साभय वराम् ।

स पाशां शृण्याढ्यां सुरुधिर कपालं जपवटीं, धृतां सौरोपेतामभि नुतनिगर्भादि सहिताम् ॥३२॥

शशाङ्काभां शुभ्राभरण वसनां सस्मितमुखीं, त्रिनेत्रां तां प्राशांकुशयुत कपालाभय कराम् ।

रहस्याभिर्युक्तां निखिल भवरोग क्षयकरीं, सदाष्टारे संस्थां सुमदमुदितां वैष्णव - युताम् ॥३३॥

महाचक्रे कोणाश्रितभुवन कूटादि सहिते, स्थितां माणिक्याभामभय वरदां पुस्तक धराम् ।

तथा सालङ्कारां स्फटिक गुटिकामण्डितकरां, त्रिनेत्रां मुण्डाढ्यामपि कुसुममालां च दधतीम् ॥३४॥

स्मितास्यामारक्तामरुण वसनां मन्दहसितां, निशानाथोत्तंसामभयवर विद्याक्ष सहिताम् ।

त्रिनेत्रां पञ्चाशत् परिमित महामुण्डरचितां, दधानां तां मालां गलित चिकुरां रत्नखचिताम् ॥३५॥

क्रमात् त्वां नित्यं यः स्मरति दशचक्रेषु परमे, पुनस्तत्तन्मन्त्रैः सहकुल गुरुप्रोक्त विधिना ।

स वित्ते वित्तेशः सुर गुरु समः शास्त्र कुशलो, भवेत् त्रैलोक्याधीश्वरि! तव दयापाङ्गविषयः ॥३६॥

प्रतीहारान् मातस्तव चरणविद्यां च ललिते, प्रपञ्चाख्यां विद्यां तदनु दशदिक्पाल निवहाम् ।

ततस्तेषां शस्त्राण्यपि कुल पथाभ्यचर्य मुदितः, कहानन्ताराध्ये! ब्रजति परमधाम मनुजः ॥३७॥

रसैकास्याम्मबां धृतशशिकलां मुक्तचिकुरां, त्रिनेत्रामापीनोन्नत कुचयुगां रक्तवसनाम् ।

हरि ब्रह्मेशानाजिनमभिधानां करशतैरथाष्टोपेतैर्वा सुरनिकरयुक्तैरपि युताम् ॥३८॥

महापञ्च - प्रेतोपरि रुचिरसिंहासनमथों परीशस्तन्त्राभ्युद्भवममल रक्ताभ - कमलम् ।

श्मशानं तन्मध्ये वृषभविगतानन्द पुरुषोरसिस्थां, यो ध्यायेज्जननि स हि मोक्षं च लभते ॥३९॥

स्मरेन्निर्वाणाख्यं तव चरणसम्पूजन विधौ षडाम्नायोपेतां ब्रज गतममुं पञ्चवदनम् ।

कराम्भोजैः पद्मानि च दश दधानां च दशभिर्महाविद्यायुक्तं किमपि कुलकल्पं विदधतम् ॥४०॥

जपेद् यस्तवन्मन्त्रं जननि! सकलाम्नाय जनकं, सदा सर्वाचारैरपि यजनशीलः प्रमुदितः ।

स वाग्मार श्रीसम्पुटित दश कूटात्मकमथ, श्रुतिश्रीशाकिन्यादिकमिति सुगुह्यद्वयमपि ॥४१॥
सजीवनमुक्तः स्यादिह जननि! निर्वाणसुखदे, पयोधिः सिद्धिर्नाममर दितिजर्वन्दितपदः ।
बहूक्तैः किं पञ्चाननदश शतास्याद्यविदिते, महिम्ना संयुक्तो मदन महिला मोहनकरः ॥४२॥
जनो यो हालाभिर्जननि! तव सम्पूज्यचरणौ, करे पात्रं धृत्वा भगवति! कुलज्ञान निरतः ।
सहस्रारे ध्यात्वा परशिव गुरुं शक्तिसहितं, पिवेद् वामोच्छिष्टं स हि भवति शम्भोः प्रतिनिधिः ॥४३॥
कुलागारं पश्यन्नति दृढमना यस्तव मनुं, जपेल्लक्षं रात्रौ रहसि च मदामोद मुदितः ।
तथा श्रीदूतीं तां गजदशनपयङ्क निलयां, यजेद् यस्त्वद्रूपां स भवति हरिमन्मथकले ॥४४॥
स्मरागारे कुर्वन निजकर सरोजं त्रिनयने, त्रिलक्षं त्वन्मन्त्रं भगवति! सदा घोर विधिना ।
महापीठे मातस्तव दश शतार्णं शुभमनुं जपेद्, यः कौलेन्द्रः स हि भुवनसौख्यं च लभते ॥४५॥
शिवे! लक्षं मन्त्रं जपति विपरीतो यदि नरः, स एव श्रीमातः! सकल भुवनानामधिपतिः ।
शवारूढः कौलः पितृ वनगतः श्रीक्रमयुतस्त्रिकूटाख्यां विद्यामपि जपति स स्यात् कुलपतिः ॥४६॥
नरं मेषं छागं महिषमपि मार्जारमथवा शुभं मत्स्यं हंसं हरिहरनुते कुक्कुटमपि ।
बलिं ते पूजायां वितरति यदा कौलिक जनस्तदा क्रोधादीनामपि रिपुगणानां प्रहरणम् ॥४७॥
महामूलाधारोपरि रसदलं यद् रविनिभं, ततो दिग्पत्राख्यं ललितमणिपूरं तदुपरि ।
हृदम्भोजं मातस्तदुपरि विशुद्धाख्यमपरं, ततस्त्वां वै ध्यायन् द्विदलयुत पद्मोपरिगताम् ॥४८॥
हठाभ्यां संयोगाद् विलसति सुषुम्णाख्य रमणि, तथा सार्द्धं प्रीत्वाऽमर मुनि मनोभ्यर्थित सुधाम् ।
परां दीपाकारां निखिलभुवनाधार जननीं, स्मरन्तस्त्वां मातर्भुवन नमिताः कौलमुनयः ॥४९।
त्वदीयं श्रीस्तोत्रं भगवति! महामन्त्रसदनं, तथा ते ध्यानाङ्गावरण नवमुद्रादि सहितम् ।
महाचक्रोद्धारैर्यतमिदमहो साधकवरः, पठेद् यः पूजाऽन्ते भुवि भवति स श्रीप्रियतरः ॥५०॥

॥ श्री श्रीविद्या वृहत् कर्पूर स्तोत्रं सम्पूर्णम् ॥

॥ श्री आवरण सहस्राक्षरी ॥

ॐ ऐं ह्रीं श्रीं हंसः ॐ नमो भगवति अक्षोभ्ये रूक्ष कर्णे राक्षसि पक्षत्रणे क्षपे पिङ्गलाक्षि अरुणे क्षये लीले लोले ललिते लूते लुलिते लम्बिके लङ्केश्वरि लासे विमले हुताशनि विशालाक्षि हूँकारे वडवामुखि महारवे महाक्रीड क्रोधिनि खरास्ये सर्वज्ञे तरले तारे दृष्टि हृष्टे खगकन्धरे सारसि रससंग्रहिणि तालजङ्घे करङ्किणि मेघनादे प्रचण्डोग्रे कालकर्णि चेलप्रदे चम्पे चम्पावति प्रचम्पे मलयान्तकि पितृवक्त्रे पिशाचाक्षि पिशुनि लोलुपे वानति वानरि वायु विकृतास्ये वागुवेगे बृहत्कुक्षि विकृते विश्वरूपिणि।

यम जिह्वे जये दुर्जये पुमन्तकि बिडाल रेवति पूतने विजये अनन्ते क्रन्दिनि चण्डि रेकर्णि (सर्वसंक्षोभिणि) सर्वविद्राविणि सर्वाकर्षिणि सर्ववशङ्करि सर्वोन्मादिनि सर्वमहांकुशे खेचरि (ख चक्र धारिणि) सर्वबीजरूपे महायोनिरूपे त्रिखण्डे!

अनंगब्राह्मि अनङ्गमाहेश्वरि अनङ्गकौमारि अनङ्गवैष्णवि अनङ्गवाराहि अनङ्गइन्द्राणि अनङ्गचामुण्डे अनङ्ग महालक्ष्मि प्रकटयोगिनीशि चार्वाक दर्शनाङ्गि त्रैलोक्यमोहनचक्र स्वामिनि!

कामाकर्षिणि बुद्ध्याकर्षिणि अहङ्काराकर्षिणि शब्दाकर्षिणि स्पर्शाकर्षिणि रूपाकर्षिणि रसाकर्षिणि गन्धाकर्षिणि चित्ताकर्षिणि धैर्याकर्षिणि स्मृत्याकर्षिणि नामाकर्षिणि बीजाकर्षिणि आत्माकर्षिणि अमृताकर्षिणि शरीराकर्षिणि गुप्तयोगिनीशि बौद्धदर्शनाङ्गि सर्वाशापूरकचक्रस्वामिनि!

अनङ्गकुसुमे अनङ्गमेखले अनङ्गमदने अनङ्गमदनातुरे अनङ्गरेखे अनङ्गवेगिनि अनङ्गांकुशे अनङ्गमालिनि अतिगुप्त योगिनीशि रौद्रदर्शनाङ्गि सर्वसंक्षोभिणिचक्रस्वामिनि पूर्वाम्नायेशि सृष्टि प्रदे!

सर्वसंक्षोभिणि सर्वविद्राविणि सर्वाकर्षिणि सर्वाह्लादिनि सर्वसम्मोहिनि सर्वस्तम्भनि सर्वजृम्भिनि सर्ववशङ्करि सर्वरञ्जनि सर्वोन्मादिनि सर्वार्थसाधनि सर्वसम्पत् - प्रपूरणि सर्वमन्त्रमयि सर्वद्वन्द्वक्षयङ्करि सप्रदाययोगिनीशि सर्वदर्शनाङ्गि सर्वसौभाग्यदायकचक्र स्वामिनि!

सर्वसिद्धिप्रदे सर्वसम्पत्प्रदे सर्वप्रियङ्करि सर्वमंगलकारिणि सर्वकामप्रदे सर्वदुःख विमोचनि सर्वमृत्युप्रशमनि सर्वविघ्न निवारणि सर्वाङ्गसुन्दरि सर्वसौभाग्य दायिनि कुलकौल योगिनीशि सर्वार्थसाधक चक्र स्वामिनि।

सर्वज्ञे सर्वशक्ते सर्वैश्वर्य प्रदायिनि सर्वज्ञानमयि सर्वव्याधिविनाशिनि सर्वाधरस्वरूपे सर्वपापहरे सर्वानन्दमयि सर्वरक्षास्वरूपे सर्वेप्सितफलप्रदे निगर्भयोगिनीशि सर्वरक्षाकरचक्र स्वामिनि दक्षिणाम्नायेशि स्थिति प्रदे!

ब्लूँ वशिनि कलह्रीं कामेशि न्व्लूँ मोदिनि य्लूँ विमले ज्म्रीं अरुणे हसलवरयूँ जयिनि झमरयूं सर्वेश्वरि क्ष्म्रीं कौलिनि रहस्ययोगिनीशि शाक्तदर्शनाङ्गि सर्वरोगहरचक्र स्वामिनि द्रां क्लिन्नेमोहनकामबाण द्रीं शोषणकामवाण क्लीं नित्यसन्दीपन कामबाण ब्लूँ मन्दसन्तापन कामबाण सः द्रवे उन्मादन कामबाण द्रां द्रीं क्लीं ब्लूं सः।

जम्भिनि! जम्भय जम्भय मोहिनि! मोहय मोहय आं आकर्षिणि! आकर्षय आकर्षय स्तम्भिनि! स्तंभय स्तंभय ऐं कामेशि! क्लीं वज्रेशि! सौः भगमाले! अतिरहस्य योगिनीशि सर्वसिद्धिमय चक्रस्वामिनि कामराजविद्या महात्रिपुरसुन्दरी मातः परापर रहस्य योगिनीशि सौगत दर्शनाङ्गि सर्वानन्दमयचक्र स्वामिनि पश्चिमाम्नायेशि!

अं आं सौः त्रिपुरे ऐं क्लीं सौः त्रिपुरेश्वरि ह्रीं क्लीं सौः त्रिपुरसुन्दरि हैं हक्लीं हसौः त्रिपुरवासिनि हसैं हसक्लीं हसौः त्रिपुराश्रि ह्रीं क्लीं ब्लें त्रिपुरमालिनि ह्रीं श्रीं सौः त्रिपुरासिद्धे हस्त्रैं हसकलरीं हस्त्रौं त्रिपुराम्बे हसकलरडैं हसकलरडीं हसकलरडौः महात्रिपुरभैरवि अं कामेशि आं भगमाले इं नित्यक्लिन्ने ईं भैंरुण्डें उं वह्निवासिनि ऊं महावज्रेश्वरि ऋं शिवदूति ॠं त्वरिते लृं कुल सुन्दरि लॄं नित्ये ॱं नीलपताके ऐं विजये ओं सर्वमङ्गले औं ज्वालामालिनि अं विचित्रे अः कामेश्वरि!

विद्यामालिनि अकुले कुलाकुल महाकुले सर्वोत्तर पञ्चार्थ ज्ञानप्रदे सर्वदर्शनाङ्गमयि सर्वदर्शनोत्तीर्ण स्वरूपिणि सर्वाध्व शोधनि काल कालेश वर्णे नवाक्षरि बालविद्या षोडशाधिका च नवकूटद्वयं सहखफ्रें आनन्देश्वरि घोरकालिनि! अम्बा श्रीपादुकां पूजयामि हंसः श्रीं ह्रीं ऐं ॥

॥ इत्यावृत्ति सहस्त्रावर्णाविद्या त्रैलोक्यपूजिता ॥

॥ श्रीराजराजेश्वरी तर्पण स्तोत्रम् ॥

इस स्तोत्र का प्रथम श्लोक श्रीराजराजेश्वरी का वामेश्वरी स्वरूप में पैरों से मुख तक वाङमयी ध्यान है। अन्य श्लोक तर्पण प्रयोग हेतु है।

छन्दः पादयुगां निरुक्ति सुमुखां शिक्षां च जङ्घायुगाम्, ऋग्वेदोरु युगां यजुस्तु जघनां या साम वेदोदराम् ।
तर्कन्याय कुचां श्रुति स्मृतिकरां काव्यादिवेदाननाम्, वेदान्तामृत लोचनां भगवती श्रीराजराजेश्वरीम् ॥१॥
कल्याणायुत पूर्णबिम्बवदनां पूर्णेश्वरानन्दिनीम्, पूर्णां पूर्णपरां परेशमहिषीं पूर्णामृतास्वादिनीम् ।
सम्पूर्णां परमोत्तमामृतकलां विद्यावतीं भारतीं, श्रीचक्रप्रिय बिन्दुतर्पण परां श्रीराजराजेश्वरीम् ॥२॥
एकानेकमनेक कार्य विविधां कार्यैकं चिद्रूपिणीम्, चैतन्यात्मक एकचक्र रचितां चक्राङ्क एकाकिनीम् ।
भावाभव विवर्द्धिनीं भयहरां सद्भक्ति चिन्तामणिम्, श्रीचक्रप्रिय बिन्दुतर्पण परां श्रीराजराजेश्वरीम् ॥३॥
ईशाधीश्वर योगिवृन्द विदितां सानन्द भूत्यंपराम्, पश्यन्तीं तनु मध्यमां विलसतीं श्रीभैरवी रूपिणीम् ।
आत्मानात्म-विचारिणीं विवरगां विद्यां त्रिबीज त्रयीम्, श्रीचक्रप्रिय बिन्दुतर्पणपरां श्रीराजराजेश्वरीम् ॥४॥
लक्ष्यालक्ष्य निरीक्षणां निरुपमां रुद्राक्षमालाधराम्, साक्षात् कारणदक्षवंशकलितां दीर्घाक्षि दीर्घेश्वरीम् ।
भद्रां भद्रवरप्रदां भगवतीं भद्रेश्वरीं भद्रिणीम्, श्रीचक्र प्रिय बिन्दु तर्पण परां श्रीराजराजेश्वरीम् ॥५॥
ह्रीं बीजान्वित नाद बिन्दु भरितां ॐ कार नादात्मिकाम्, ब्रह्मानन्द घनोदरीं गुणवतीं ज्ञानेश्वरीं ज्ञानदाम् ।
इच्छाज्ञान क्रियावतीं जितवतीं गन्धर्वसंसेविताम्, श्रीचक्र प्रिय बिन्दु तर्पण परां श्रीराजराजेश्वरीम् ॥६॥
हर्षोन्मत्त सुवर्णपात्रभरितां पानोन्नवाघूर्णिताम्, हुङ्कारप्रिय शब्द ब्रह्मनिरतां सारस्वतोल्लासिनीम् ।
सारासार विचार चारु चतुरां वर्णाश्रमाकारिणीम्, श्रीचक्र प्रिय बिन्दु तर्पण परां श्रीराजराजेश्वरीम् ॥७॥
सर्वज्ञान कलावतीं सकरुणां सन्नादिनीं नन्दिनीम्, सर्वान्तर्गत शालिनीं शिवतनुं सन्दीपिनीं दीपिनीम् ।
संयोग प्रिय रूपिणीं प्रियवतीं प्रीति प्रतापोन्नताम्, श्रीचक्र प्रिय बिन्दु तर्पण परां श्रीराजराजेश्वरीम् ॥८॥
कर्माकर्मविवर्जितां कुलवतींकर्मप्रदां कौलिनीम्, कारुण्यां तनु बुद्धिकर्म निरतां सिन्धुप्रियां शालिनीम् ।
पञ्चब्रह्म सनातनां शवहृदां ज्ञेयाङ्ग योगान्विताम्, श्रीचक्र प्रिय बिन्दु तर्पण परां श्रीराजराजेश्वरीम् ॥९॥
हस्ते कुम्भनिभां पयोधर धरां पीनोन्नतां नौमिताम्, हाराद्याभरणां सुरेन्द्रविनुतां शृङ्गार पीठालयाम् ।
योन्याकारिणि योनिमुद्रितकरां नित्यां च वर्णात्मिकां, श्रीचक्रप्रिय बिन्दुतर्पणपरां श्रीराजराजेश्वरीम् ॥१०॥
लक्ष्मी लक्षणपूर्ण भक्ति वरदां लीला विनोद स्थिताम्, लाक्षारञ्जितपाद-पद्म युगलां ब्रह्माण्डसंसेविताम् ।
लोकालोकित लोककामजननीं लोकश्रियाङ्कस्थिताम्, श्रीचक्रप्रिय बिन्दुतर्पणपरां श्रीराजराजेश्वरीम् ॥११॥
ह्रींकारायुत शङ्करप्रिय तनुं श्रीयोगपीठेश्वरीम्, माङ्गल्यायुत पङ्कजाभनयनां माङ्गल्यसिद्धि प्रदाम् ।
तारुण्यां तपसार्चितां तरुणिकां तत्रोद्भवां तत्त्विनीम्, श्रीचक्रप्रिय बिन्दु तर्पणपरां श्रीराजराजेश्वरीम् ॥१२॥
सर्वेशाङ्ग विहारिणीं सकरुणां सर्वेश्वरीं सर्वगाम्, सत्यां सर्वमयीं सहस्त्रदलजां सप्तार्णवोपस्थिताम् ।
संगासंग विवर्जितां शुभकरीं बालार्ककोटिप्रभाम्, श्रीचक्र प्रिय बिन्दु तर्पण परां श्रीराजराजेश्वरीम् ॥१३॥

कादिक्षान्त सुवर्ण बिन्दु सुतनुं स्वर्णादि सिंहासिनीम्, नानावर्ण विचित्रचित्रचरितां चातुर्य चिन्तामणिम् ।
चित्तानन्द विधायिनीं सुविपुलां रूढत्रयां शेषिकां, श्रीचक्र प्रिय बिन्दु तर्पण परां श्रीराजराजेश्वरीम् ॥१४॥
लक्ष्मीशादि विधीन्द्र चन्द्रमुकुटामष्टाङ्गपीठार्चिताम्, सूर्येन्द्राग्निमयैक पीठ निलयां त्रिस्थां त्रिकोणेश्वरीम् ।
गोप्त्रीं गुर्विणि गर्वितां गगनगां गङ्गा गणेशप्रियाम्, श्रीचक्रप्रिय बिन्दु तर्पण परां श्रीराजराजेश्वरीम् ॥१५॥
ह्रीं कूटत्रय रूपिणीं समयिनीं संसारिणीं हंसिनीम्, वामाचार परायणां सुकुलजां बीजावतीं मुद्रिणीम् ।
कामाक्षीं करुणार्द्रचित्त चरितां श्रीमन्त्रमूर्त्यात्मिकाम्, श्रीचक्रप्रिय बिन्दु तर्पणपरांश्रीराजराजेश्वरीम् ॥१६॥

॥ श्री शङ्कराचार्य विरचितं श्रीराजराजेश्वरी स्तोत्रं सम्पूर्णम् ॥

॥ श्री विद्या शाप विमोचनम् ॥

श्रीविद्या शापविमोचन हेतु लघु प्रयोग इस प्रकार है।

विनियोग:- **ॐ अस्य श्रीविद्या शापविमोचन मंत्रस्य वसिष्ठ नारद सामवेदाधिपतिर्ब्रह्मऋषय:, गायत्री छन्द:, सवैश्वर्यकारिणी सर्वमंगला राजराजेश्वरी त्रिपुरसुन्दरी देवता, ह्रीं बीजं, श्रीं शक्ति:, क्लीं कीलकं संकल्पित मंत्र सिद्धये यथा कामराज- लोपामुद्रा- नंदिकेश्वरोपासिता श्रीविद्या प्राप्तये शाप विमोचने विनियोग:।**

शापविमोचन मंत्रा:- **ॐ श्रीं श्रीविद्या स्वरूपिण्यै अक्षय फलदात्र्यै ब्रह्म वसिष्ठ विश्वामित्र शापद् विमुक्ता भव। ॐ कां कान्ति स्वरूपिण्यै राजवरप्रदायै ब्रह्म वसिष्ठ विश्वामित्र शापद् विमुक्ता भव। ॐ ह्रीं श्रीं सं सर्वैश्वर्यकारिण्यै ब्रह्म वसिष्ठ विश्वामित्र शापद् विमुक्ता भव।**

इन मंत्रों से पठन करते हुए व्यापक न्यास करें।

॥ इति श्री श्रीविद्या तंत्रं सम्पूर्णम् ॥

॥ श्रीभुवनेश्वरी तंत्रम् ॥

दशमहाविद्याओं में चौथी महाविद्या भुवनेश्वरी हैं। हिन्दी तंत्रसार, भुवनेश्वरी रहस्य, भुवनेश्वरी स्तव मंजरी इत्यादि में विस्तृत विधान हैं। आपको **हल्लेखा विद्या** भी कहते हैं। आप १४ भुवनों की अधिष्ठात्री है। शांति विधान, वशीकरण, आर्थिक विकास हेतु इनका प्रयोग करना चाहिये।

॥ एकाक्षरी मंत्र प्रयोगः॥

मंत्रोद्धारः- **नकुलीशोऽग्निमारूढो वामनेत्रार्द्ध चन्द्रवान। नकुलीश (ह) अग्नि (र) वामनेत्र (ई) अर्द्धचन्द्र (ँ) इन वर्ण चतुष्टय से** एकाक्षरी मंत्र ''ह्रीं'' **बनता हैं। यह भुवनेश्वरी मंत्र तांत्रिक प्रणव भी कहलाता हैं। ह कार से आकाश, ई कार से वायु रकार से अग्नि (पृथ्वी) मानने से भूः भुवः स्वः त्रिलोक जननी होने से भुवनेश्वरी** कहा हैं। माया बीज भी उक्त मंत्र को कहा हैं। आप अन्नपूर्णा स्वरूपा हैं। साधक को ज्ञान एवं आर्थिक समृद्धि देती हैं।

एकाक्षरी मंत्रः - ह्रीं।

विनियोगः- **अस्य श्री भुवनेश्वरी मंत्रस्य शक्तिर्ऋषिः, गायत्रीश्छंदः, भुवनेश्वरी देवता, हकारो बीजं, ईकार शक्तिः रेफः कीलकं चतुर्वर्ग सिद्ध्यर्थे विनियोगः।**

ऋष्यादिन्यासः- **ॐ शक्तये ऋषये नमः शिरसि। ॐ गायत्र्यै छंदसे नमः मुखे। ॐ भुवनेश्वर्यै देवतायै नमः हृदि। हं बीजाय नमः गुह्ये। ईं शक्तये नमः पादयोः। रं कीलकाय नमः सर्वाङ्गे।**

कराङ्गन्यासः- **ह्रां, ह्रीं, ह्रूं, ह्रैं, ह्रौं, ह्रः** इत्यादि से न्यास करें।

षडाङ्गन्यासः- **ह्रां हृदयाय नमः। ह्रीं शिरसे स्वाहा। ह्रूं शिखायै वषट्। ह्रैं कवचाय हुं। ह्रौं नेत्रत्रयाय वौषट्। ह्रः अस्त्राय फट्।**

मंत्रवर्णन्यासः- **ॐ हल्लेखायै नमः शिरसि। एं गगनायै नमः वदने। उं रक्तायै नमः हृदि। इं करालिकायै नमः गुह्ये। अं महोच्छुष्मायै नमः पादयोः।**

पञ्चवक्त्रन्यासः-**ॐ हल्लेखायै नमः इत्यादि पूर्वोक्त देवताओं का उर्ध्व, पूर्व, दक्षिण, उत्तर एवं पश्चिम वक्त्र** में न्यास कर स्वयं को शिव स्वरूप माने। **शिवोऽहंपरिचिन्तयेत्।**

देवन्यासः- **भाले ॐ गायत्री सहित ब्रह्मणे नमः। दक्षकपोले ॐ सावित्री सहित विष्णवे नमः। वाम कपोले ॐ वागीश्वरी सहित महेश्वराय नमः। वाम कर्णोपरि श्री सहित धनपतये नमः। मुखे ॐ रतिसहितस्मराय नमः।**

सव्य कर्णोपरि ॐ पुष्टि सहित गणपतये नमः। दक्षिणगण्डे ॐ शंखनिधये नमः। वामगण्डे ॐ पद्मनिधये नमः। मुखे ॐ भुवनेश्वर्यै देवतायै नमः। ''शारदा तिलक'' में कहा हैं कि इसी प्रकार इन मंत्रों से कण्ठमूल दक्ष वामस्तन, बायां कन्ध, हृदय, दायाँ कंधा, दक्ष वामपार्श्व एवं नाभि में न्यास करे। पश्चात् -

मातृकान्यास :- **भाले ॐ ब्राह्म्यै नमः, वामांसे ॐ माहेश्वर्यै नमः। वामपार्श्वे ॐ कौमार्यै नमः। जठरे ॐ वैष्णव्यै नमः। दक्षिणपार्श्वे ॐ वाराह्यै नमः। दक्षिणांसे ॐ इन्द्राण्यै नमः। गले ॐ चामुण्डायै नमः। हृदि ॐ महालक्ष्म्यै नमः। पश्चात्**- मूलमंत्र से ३ या ७ बार व्यापक न्यास करे।

॥ ध्यानम् ॥

उद्यद् दिनकरद्युतिमिन्दु किरीटां तुङ्गकुचां नयनत्रय युक्ताम्।
स्मेरमुखीं वरांकुश पाशाभीतिकरां प्रभजे भुवनेशीम् ॥

॥ यंत्र आवरण पूजा ॥

यंत्र बनाने हेतु पहले षट्कोण, अष्टदल, वृत्त, षोडशदल बनाये उनके बाहर चारद्वार युक्त चतुरस्र बनाये। भद्रपीठ पर '' **ॐ मण्डूकादि परतत्वान्त देवतायै नमः**। पश्चात् केसरों में नवपीठशक्तियों की यंत्रपीठ में पूजा करे। **ॐ जयायै नमः। ॐ विजयायै नमः। ॐ अजितायै नमः। ॐ अपराजितायै नमः। ॐ नित्यायै नमः। ॐ विलासिन्यै नमः। ॐ दोग्ध्र्यै नमः। ॐ अघोरायै नमः। मध्ये ॐ मङ्गलायै नमः। ह्रीं सर्वशक्ति कमलासनाय नमः** से पुष्प द्वारा देवी को आसन देकर ध्यान करे।''

प्रथमावरणम्-(देवीसमीपे)- मध्ये - **ॐ हृल्लेखायै नमः। पूर्वे - एं गगनायै नमः।** दक्षिणे - **उं रक्तायै नमः।** उत्तरे - **इं करालिकायै नमः।** पश्चिमे - **अं महोच्छूष्मायै नमः।**

॥ भुवनेश्वरी यन्त्रम् ॥

द्वितीयावरणम् - (षट्कोणे) :- **ह्रां हृदयाय नमः। ह्रीं शिरसे स्वाहा। ह्रूं शिखायै वषट्। ह्रैं कवचाय हुं। ह्रौं नेत्रत्रयाय वौषट्। ह्रः अस्त्राय फट्।** पुनः षट्कोणे- पूर्वे- **ॐ गायत्र्यै नमः, ब्रह्मणे नमः।** नैऋते- **सावित्र्यै नमः विष्णवे नमः।** वायवे- **सरस्वत्यै नमः रुद्राय नमः।** अग्निकोणे- **श्रियैनमः, धनपतये नमः।** पश्चिमे- **रत्यै नमः, स्मराय नमः।** ऐशान्यां- **पुष्ट्यै नमः, गणपतये नमः।** षट्कोणदक्षिणे- **शंखनिधये नमः।** वामे- **पद्मनिधये नमः।**

तृतीयावरणम्- (अष्टदले) **ॐ अनङ्गकुसुमायै नमः। अनङ्ग कुसुमातुरायै नमः। अनङ्ग मदनायै नमः। अनङ्ग मदनातुरायै नमः। भुवनपालायै नमः। अनङ्ग वेद्यायै नमः। शशिरेखायै नमः। गगन रेखायै नमः।**

चतुर्थावरणम्:- (षोडशदले) पूर्वादिक्रमेण- **ॐ कराल्यै नमः। विकराल्यै नमः। उमायै नमः। सरस्वत्यै नमः। श्रियै नमः। दुर्गायै नमः। उषायै नमः। लक्ष्म्यै नमः। श्रुत्यै नमः। स्मृत्यै नमः। धृत्यै नमः। श्रद्धायै नमः। मेधायै नमः। मत्यै नमः। कान्त्यै नमः। आर्यायै नमः।**

पंचमावरणम्- (भूपूर अंतराले) पूर्वादिक्रमेण- **ॐ अनङ्गरूपायै नमः। अनङ्गमदनायै नमः। अनङ्ग मदनातुरायै नमः। भुवनवेगायै नमः। भुवनपालिकायै नमः। सर्व शिशिरायै नमः। अनङ्ग वेदनायै नमः। अनङ्ग मेखलायै नमः।**

षष्ठावरणम् - (भूपूरे)- **इन्द्रादि दश दिग्पालों का सायुध पूजन करें।**

पुरश्चरण हेतु ३२ लाख जप कर दशांश होम त्रिमधु एवं अष्टद्रव्यों (अश्वत्थ, यज्ञोडुम्बर, पाकड़ वटसमिध, तिल, श्वेतसरसों, पायस एवं घृत)द्वारा होम करे। २५ दिन तक नित्य अभिमंत्रित जल पीवे अभिषिंचन करे तो कवि होवें। कर्पूर, अगर, कुंकुम से तिलक करे तो सबका वशीकरण होवे। कमल, पलाशपुष्प, कुमुदपुष्पों से होम करे सौभाग्यवान होवें। शालिपुष्टि की मधुसिक्त पुतली बनाये। प्राणप्रतिष्ठा करें रविवार को प्रयोग करे तो नरनारी राजा का वशीकरण होवें। कंठमात्र जल में स्थित होकर सूर्यबिम्ब को पानी में देखें ३ हजार जप करे तो कन्या को वर प्राप्त होवें। मंत्री श्री प्राप्त करें। भस्म से साध्य नाम को मूल मंत्र से आवृत करे एवं गर्भिणि को दिखावे तो सुखपूर्वक प्रसव होवें।

॥ त्र्यक्षरी मंत्र प्रयोगः ॥

त्र्यक्षरी मंत्रों के ऋषि देवता एकाक्षरी मंत्रवत् हैं।

मंत्र - **१. ऐं ह्रीं श्रीं।**

वाग्भव (ऐं) शंभुवनिता (ह्रीं) रमा बीज (श्रीं) त्रयात्मकं। अर्थात् **ऐं ह्रीं श्रीं** मंत्र होता हैं।

न्यास - **ऐं ह्रां, ऐं ह्रीं, ऐं ह्रूं, ऐं ह्रैं, ऐं ह्रौं, ऐं ह्रः** से षडङ्गन्यास करें।

सिन्दूरारुण विग्रहां त्रिनयनां माणिक्य मौलिस्फुरत्। तारा नायक शेखरां स्मितमुखी- मापीन वक्षोरुहम् ॥
पाणिभ्यां मणिपूर्ण रत्नचषकं रक्तोपल विभ्रतीम्। सौम्यां रत्नघटस्थ सव्यचरणां ध्यायेत् परामाम्बिकाम् ॥

१२ लाख जपकर त्रिमधुयुक्त पायस द्वारा दशांश होम करें।

मंत्र - **२. "ऐं ह्रीं ऐं"।**

वाग्बीज (ऐं) पुटिता माया (ह्रीं) विद्येयं त्र्यक्षरी मता। अर्थात् **"ऐं ह्रीं ऐं"** मंत्र बनता हैं।

न्यास - **ऐं ह्रां ऐं, ऐं ह्रीं ऐं, ऐं ह्रूं ऐं, ऐं ह्रैं ऐं, ऐं ह्रौं ऐं, ऐं ह्रः ऐं, से षडङ्गन्यास करें।**

श्यामाङ्गीं शशिशेखरां निजकरैर्दानं च रक्तोत्पलम्, रत्नाढ्यं चषकं परं भयहरं संबिभ्रतीं शाश्वतीम् ।
मुक्ताहार लसत् पयोधरनतां नेत्रत्रयोल्लासिनीम्, वन्हेऽहंसुरपूजितां हरवधूं रक्तारविन्द स्थिताम् ॥

॥ आवरण पूजा प्रयोगः ॥

एकाक्षरी मंत्रवत् आवरण पूजा करें। **अष्टदलों में "अष्टभैरव"** एवं **"मातृकाओं"** का पूजन करें। **अं आं असिताङ्ग ब्राह्मीभ्यां नमः। इं ईं रुरुमाहेश्वरीभ्यां नमः। उं ऊं चण्डकौमारीभ्यां नमः। ऋं ॠं क्रोधभैरव वैष्णवीभ्यां नमः। लृं लॄं उन्मत्तवाराहीभ्यां नमः। एं ऐं कपालीइन्द्राणीभ्यां नमः। ओं औं भीषण चामुण्डाभ्यां नमः। अं अः संहार महालक्ष्मीभ्यां नमः।** अन्य प्रयोग, विनियोग, पूजाविधि पूर्ववत् हैं।

३. त्र्यक्षरी मंत्रः- आं ह्रीं क्रों।

न्यास - **ह्रां, ह्रीं, ह्रूं, ह्रैं, ह्रौं, ह्रः** से अङ्गन्यास करें।

वरांकुशौ पाशमभीतिमुद्रां करैर्वहन्तीं कमलासनस्थाम्।
बालार्ककोटिप्रतिमां त्रिनेत्रां भजेऽहमाद्यां भुवनेश्वरीताम्॥

षोडश दल पूजा का विधान नहीं हैं अन्य विधान पूर्वोक्त हैं।

भद्रातिथि युक्त तिथि को सोमवार को आग्नेय दिशा में मुख करके जप करें सभी कामनाऐं पूरी होती है।

द्वयबीजाक्षर युक्तमंत्रः- श्रीं ह्रीं भुवनेश्वर्यै नमः।

एक बीजाक्षर युक्तमंत्रः- ह्रीं भुवनेश्वर्यै नमः।

त्र्यय बीजाक्षर युक्त मंत्रः- ॐ श्रीं क्लीं भुवनेश्वर्यै नमः। इस मंत्र को मंगलवार को दक्षिणाभिमुख होकर जप करने से सभी कामनायें पूरी होती हैं।

चतुरक्षरबीज युक्तमंत्रः- ॐ ह्रीं श्रीं क्लीं भुवनेश्वर्यै नमः। चतुर्थी युक्त बुधवार को नैऋत्य दिशा में मुँहकर जपने से सर्वसिद्धियां प्राप्त होवें।

पंचाक्षर बीजयुक्तमंत्रः- ॐ श्रीं ऐं क्लीं ह्रीं भुवनेश्वर्यै नमः। पंचमी गुरुवार को पश्चिमाभिमुख होकर जपने से अभीष्ट प्राप्ति हो।

षडाक्षर बीजयुक्त मंत्रः-ॐ श्रीं ह्रीं क्लीं ऐं सौः भुवनेश्वर्यै नमः। षष्ठीयुक्त शुक्रवार को वायव्याभिमुख कर जपने से मंत्रसिद्धि होवें।

सप्ताक्षर बीजयुक्तमंत्रः- ॐ श्रीं ह्रीं क्लीं ऐं सौः ह्रीं भुवनेश्वर्यै नमः। सप्तमी युक्त शनिवार को उत्तराभिमुख कर जपने से सिद्धि प्राप्त होवें।

अष्टाक्षर एवं बीजयुक्तमंत्रः-

(१) ''आं श्रीं ह्रीं क्लीं क्लीं ह्रीं श्रीं क्रों'' इस मंत्र के **''शारदा तिलक'' में अजऋषि, गायत्री छंद, देवता शक्ति कहा हैं। ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः से षडङ्गन्यास करें।**

आनंदरूपिणीं देवीं पाशांकुश धनुः शरान्। बिभ्रतीं दोर्भिररुणां कुचार्त्तां हृदि भावयेत् ॥

(२) मंत्रो यथा- **कामिनि रञ्जिनि स्वाहा। इस मंत्र के ऋषि संमोहन, छन्द निवृती, देवता संमोहिनी है।** इस के तीन पदों की दो आवृत्ति करके षडङ्गन्यास करें।

॥ ध्यानम् ॥

श्यामाङ्गीं वल्लकीं दोर्भ्यां वादयन्तीं सुभूषणां। चन्द्रावतंसां विविधगानैर्मोहयन्तीं जगत् ॥

(३) **ॐ श्रीं ह्रीं क्लीं ऐं सौः क्लीं ह्रीं भुवनेश्वर्यै नमः।** भुवनेश्वरी रहस्य तृतीय पटल में अष्टमीतिथि रविवार को ईशान दिशा की ओर मुख करके जप करने से मंत्र सिद्धि कही हैं।

नवाक्षर बीजयुक्तमंत्रः- ॐ श्रीं ह्रीं क्लीं ऐं क्लीं सौः ऐं सौः भुवनेश्वर्यै नमः। नवमी युक्त सोमवार को पूर्वाभिमुख होकर मंत्र जप करने से परम सिद्धि प्राप्त होवें।

दशाक्षर बीजयुक्तमंत्रः- ॐ ह्रीं श्रीं क्लीं ऐं सौः क्रीं हूं ह्रीं ह्रीं भुवनेश्वर्यै नमः। दशमीयुक्त मंगलवार को आग्नेय दिशा की ओर मुखकर इस मंत्र का जप करने से ब्रह्मशक्ति का साक्षात्कार होवे।

अन्य मंत्रः- श्रीं ह्रीं क्लीं भुवनेश्वर्यै स्वाहा।

एकादशाक्षर बीजयुक्तमंत्रः- ॐ ह्रीं श्रीं क्लीं ऐं सौः क्लीं ऐं सौः श्रीं ह्रीं भुवनेश्वर्यै नमः। एकदशी तिथि

युक्त बुधवार को दक्षिणाभिमुख होकर जप करें।

द्वादशाक्षर बीजयुक्तमंत्रः- **ॐ ॐ ह्रीं ह्रीं श्रीं श्रीं क्लीं क्लीं ऐं ऐं सौंः सौंः भुवनेश्वर्यै नमः।** द्वादशी युक्त गुरुवार को नैऋत्य दिशा की ओर मुख कर जप करें।

अन्य मंत्रः- **ॐ ह्रीं ऐं क्लीं सौं भुवनेश्वरि स्वाहा (द्वितीय पटले भुव. रह.)**

त्रयोदशाक्षर बीजयुक्तमंत्र :- ॐ ह्रां क्रीं ह्रीं श्रीं ऐं सौंः क्लीं श्रीं ह्रीं ऐं सौंः क्लीं भुवनेश्वर्यै नमः। त्रयोदशी युक्त शुक्रवार को पश्चिमाभिमुख होकर जप करें।

अन्य- **(भुव. रह. द्वि.पटले) ॐ ऐं श्रीं क्लीं सौंः हसौंः भुवनेश्वरि स्वाहा। तथा च- ॐ ह्रीं ऐं सौंः क्लीं श्रीं भुवनेश्वरि स्वाहा।**

चतुर्दशाक्षर बीजयुक्तमंत्रः- (१) ॐ ॐ क्लीं क्लीं सौंः सौंः श्रीं श्रीं ऐं ऐं सौंः सौंः ह्रीं ह्रीं भुवनेश्वर्यै नमः। चतुर्दशीयुक्त शनिवार को उत्तराभिमुख होकर जप करें।

अन्य मंत्रः- (भुव. रह. द्वि.पटले) **(२) ॐ सौंः क्लीं श्रीं ऐं ह्रीं हूं भुवनेश्वरि स्वाहा।** तथा च- **(३) ॐ क्लीं श्रीं ह्रीं हूं ह्रौं भुवनेश्वरि स्वाहा। (४) ॐ क्लीं श्रीं ह्रीं हूं हौं भुवनेश्वरि हूं स्वाहा।**

पंचदशाक्षर बीजयुक्तमंत्रः- ॐ श्रीं ॐ श्रीं ह्रीं ऐं ह्रीं ऐं क्लीं सौंः क्लीं सौंः क्रीं क्रीं ह्रीं भुवनेश्वर्यै नमः। अमावस्या या पूर्णिमा रविवार को ईशानाभिमुख हो जप करें।

अन्य मंत्रः- ह्रौं सौंः ह्रीं भुवनेश्वरि ह्रीं तत्वरूपिणि ह्रीं। (भुव. रह. चतु. पटले) ऋष्यादि षोडशाक्षरवत् हैं। अन्य मन्त्रः- ऐं सौंः श्रीं क्लीं भुवनेश्वरि ॐ हूं फट् स्वाहा।

षोडशाक्षर बीजयुक्तमंत्रः- (भुव. रह तृती. पटले) **ॐ ह्रीं श्रीं क्लीं ऐं सौंः हसौंः ॐ हसौंः सौंः ऐं क्लीं श्रीं ह्रीं ॐ ह्रीं भुवनेश्वर्यै नमः।** इस मंत्र का जप प्रतिदिन करें।

अन्य मंत्रः- (भुव रह. चतुर्पटले) **ॐ ऐं सौंः ह्रीं तत्वरूपिणी ह्रीं भुवनेश्वरि ह्रीं।** इस मंत्र के **ऋषि भैरव, छन्द अनुष्टुप्, देवता श्री तत्वरूपिणि भुवनेश्वरि, ह्रीं बीज, हूं शक्ति, ह्रः कीलक वीर साधने विनियोग कहा हैं।**

स्मरेद् रवीन्द्वग्नि विलोचनां तां सत्पुस्तकां जाप्यवटीं दधानाम् ।
सिंहासनां मध्यम पत्रसंस्थां श्री तत्त्वविद्यां परमां भजामि ।

अन्य मंत्रः- (शारदा तिलक) **ह्रीं गौरि रुद्रदयिते योगेश्वरि हुं फट् स्वाहा।**

इस मंत्र के **ऋषि अज, छंद अनुष्टुप् देवता गौरी चण्ड कात्ययनी हैं। ह्रां, ह्रीं, ह्रूं इत्यादि से षडङ्गन्यास करे।**

हेमाभां बिभ्रतीं दोर्भिर्दर्पणाञ्जन साधने ।
पाशांऽकुशौ सर्वभूषां तां गौरीं सर्वदा भजे ।।

सप्तदशाक्षर बीजयुक्तमंत्रः- ॐ श्रीं क्लीं सौंः ह्रीं भुवनेश्वरि ॐ हूं ठः ठः ठः स्वाहा। (भुव रह. द्वि. प.)

एकोनविंशाक्षर बीजयुक्तमंत्रः- (भुव. रह. द्वि. पटले) **ॐ ऐं सौं क्लीं ह्रीं श्रीं हौं सौंः हूं हूं भुवनेश्वरि ॐ ऐं स्वाहा।**

अन्य मंत्रः- **१. ॐ ह्रीं क्लीं श्रीं हूं क्रीं क्रीं ऐं सौंः भुवनेश्वरि क्रीं हूं फट् स्वाहा। २. ॐ ह्रीं क्लीं हूं क्रीं ह्रीं श्रीं ऐं सौंः क्लीं भुवनेश्वरि हूं फट् स्वाहा।**

विंशाक्षर बीजयुक्तमंत्रः- (भुव. रह. द्वि.प.) **ॐ ह्रीं श्रीं क्लीं सौः ऐं ॐ ॐ श्रीं श्रीं भुवनेश्वरि ऐं क्लीं सौः स्वाहा।**

एकविंशाक्षर बीजयुक्तमंत्रः- **ॐ सौः क्लीं ऐं क्लीं सौः स्त्रीं हूं श्रीं ह्रीं क्रीं भुवनेश्वरि ॐ हूं फट् स्वाहा।**

द्वाविंशाक्षर बीजयुक्तमंत्रः- **ॐ क्लीं ऐं सौः ह्रीं क्रीं क्रीं क्रीं हूं हूं भुवनेश्वरि क्रीं ठः ठः ठः फट् स्वाहा।**

॥ भुवनेश्वरि गायत्री मंत्राः॥

१. भुवनेश्वरि गायत्री-ह्रीं भुवनेश्वर्यै विद्महे आद्यायै धीमहि तन्नो देवी प्रचोदयात्। २. ॐ नारायण्यै विद्महे भुवनेश्वर्यै धीमहि तन्नो देवी प्रचोदयात्।

(१) मूल गायत्री- ऐं ह्ल्लेखायै विद्महे ह्री भुवनायै धीमहि श्रीं तन्नः शक्तिः प्रचोदयात्। प्रातः गायत्री- ऐं ह्ल्लेखायै विद्महे भुवनायै धीमहि तन्नः शक्तिः प्रचोदयात्। मध्याह्न गायत्री- ह्रीं ह्ल्लेखायै विद्महे भुवनायै धीमहि तन्नः शक्तिः प्रचोदयात्। सायं गायत्री-श्रीं ह्ल्लेखायै विद्महे भुवनायै धीमहि तन्नः शक्तिः प्रचोदयात्।
अर्द्धरात्रि गायत्री- **ऐं ह्ल्लेखायै विद्महे ह्रीं भुवनायै धीमहि तन्नशक्तिः प्रचोदयात्।**

॥ भुवनेश्वरि मातृकाः ॥

ह्रीं अं नमः, ह्रीं आं नमः......इस तरह से मातृका वर्णों से युक्त मंत्र जाप करें। इसके **ऋषि शक्ति, छन्द गायत्री, देवता मातृका भुवनेशी, बीज ह्रीं, नमः शक्ति, मूल प्रकृति कीलक हैं। ह्रां ह्रीं से षडङ्गन्यास करें।**

उद्यत्कोटि दिवाकर प्रतिभटा तुङ्गोरुपीन - स्तनी, मूर्धार्धेन्दु किरीट हार रशना मंजीर संशोभिता ।
विभ्राणा करपङ्कजैर्जपवटीं पाशांकुशौ पुस्तकम्, द्विश्याद् वो जगदीश्वरी त्रिनयना पद्मे निषण्णा सुखम् ॥

॥श्रीभुवनेश्वरी मातृका॥

जया च विजया चैव अजिता चापराजिता। नित्या विलासिनी दोग्ध्री अघोरा मङ्गला तथा ॥१॥
डाकिनी राकिनी चैव लाकिनी काकिनी तथा । शाकिनी हाकिनी चैव याकिनी स्वरशक्तयः ॥२॥
मङ्गला च महाकाली कुण्डली कुलसुन्दरी। कपाली कमलावत्या चामुण्डा मेरुवासिनी ॥३॥
भुवनेशी सरस्वत्यौ कपिला कुलमालिनी। विनायिका जया नन्दा महालक्ष्मीश्च भैरवी ॥४॥
ब्रह्माणी च तथा ज्वालावली लिंगप्रभा तथा। मुण्डिनी च महावेगा उद्भवा वैष्णवी शिवा ॥५॥
महामाया तु चक्रांगी एकपादा सुरेश्वरी। कौवेरी मण्डली चैव वाराही च जलन्धरी ॥६॥
कामाख्या काममध्यस्था व्यञ्जनानां तु शक्तयः ।

॥ दशाक्षर ईश्वरमंत्रः ॥

भुवनेश्वरि के भैरव ईश्वर हैं। मंत्रो यथा- ॐ **ईं ह्रीं श्रीं सीं हसवरयूं।**

॥ध्यानम्॥

शुद्धस्फटिक संकाशं त्रिनेत्रमीश्वरं प्रभुं, सिंहचर्मपरीधानं गजचर्मोत्तरीयम् ।
सुधाढ्यं कलशं शूलं वरं चाभयमेव च, धारयन्तं कराम्भोजं शशाङ्ककृत शेखराम् ।
पद्मासनं स्मितमुखं वामाङ्गं संस्तृतं परम्, भुवनेश्यां महादेव्याः हत्पद्मे भावयाम्य हम् ॥

पुरश्चर्यार्णव के अनुसार भुवनेश्वरी के शिव पञ्चाक्षर महादेव हैं।

॥ भुवनेश्वरी त्रैलोक्य मंगल कवचम् ॥

इस कवच में दुर्गा, भुवनेश्वरी एवं त्रिपुरा के मंत्रों का मंत्रोद्धार है।

॥ देव्युवाच ॥

भुवनेश्याश्च देवेश! या या विद्याः प्रकाशिताः । श्रुताश्चाधिगताः सर्वाः श्रोतुमिच्छामि सांप्रतं ॥१॥
त्रैलोक्य मङ्गलं नाम कवचं यत् पुरोदितम् । कथयस्व महादेव! मम प्रीतिकरं परम् ॥२॥

॥ ईश्वर उवाच ॥

शृणु पार्वति! वक्ष्यामि सावधानाऽवधारय । त्रैलोक्यमङ्गलं नाम कवचं मन्त्र विग्रहम् ॥३॥
सिद्धविद्यामयं देवि! सर्वैश्वर्य प्रदायकम् । पठनाद् धारणान्मर्त्य स्त्रैलोक्यैश्वर्यवान् भवेत् ॥४॥
त्रैलोक्य मंगलस्यास्य कवचस्य ऋषिशिवः, छन्दो विराट् जगद्धात्री देवता भुवनेश्वरी । धर्मार्थ काम मोक्षेषु विनियोगः प्रकीर्तितः ॥५॥

॥ कवच स्तोत्र ॥

ह्रीं बीजं मे शिरः पातु भुवनेशी ललाटकम्। ऐं पातु दक्ष नेत्रं मे ह्रीं पातु वाम लोचनम् ॥१॥
श्रीं पातु दक्षकर्णं मे त्रिवर्णात्मा महेश्वरी। वामकर्णं सदा पातु ऐं घ्राणं पातु मे सदा ॥२॥
ह्रीं पातु वदनं देवी ऐं पातु रसनां मम। वाक्पुटा च त्रिवर्णात्मा कण्ठं पातु पराम्बिका ॥३॥
श्रींस्कन्धौ पातु नियतं ह्रीं भुजौ पातु सर्वदा। क्लीं करौ त्रिपुरेशानी त्रिपुरैश्वर्य दायिनी ॥४॥
ॐ पातु हृदयं ह्रीं मे मध्यदेशं सदाऽवतु। क्रों पातु नाभि देशं सा त्र्यक्षरी भुवनेश्वरी ॥५॥
सर्व - बीजप्रभा पृष्ठं पातु सर्ववशङ्करी। ह्रीं पातु गुह्यदेशं मे नमो भगवती कटिम् ॥६॥
माहेश्वरी सदा पातु सक्थिनी जानुयुग्मकम्। अन्नपूर्णा सदापातु स्वाहा पातु पदद्वयम् ॥७॥
सप्तदशाक्षरी पायादन्नपूर्णाऽखिलं वपुः तारं। माया रमा कामः षोडशार्णा ततः परं ॥८॥
शिरःस्था सर्वदा पातु विंशत्यर्णात्मिका परा। तारं दुर्गे युगं रक्षिणि स्वाहेति दशाक्षरी ॥९॥
जयदुर्गा घनश्यामा पातु मां पूर्वतो मुदा। माया - बीजादिका चैषा दशार्णा च परा तथा ॥१०॥
उत्तप्त काञ्चनाभासा जय दुर्गाऽनलेऽवतु। तारं ह्रीं दुं दुर्गायै नमोऽष्टवर्णात्मिका परा ॥११॥
शङ्खचक्र धनुर्बाण- धरा मां दक्षिणेऽवतु। महिष मर्दिनी स्वाहा वसु वर्णात्मिका परा ॥१२॥
नैर्ऋत्यां सर्वदा पातु महिषासुर- नाशिनी। माया पद्मावती स्वाहा सप्तार्णा परिकीर्तिता ॥१३॥

पद्मावती पद्मसंस्था पश्चिमे मां सदाऽवतु। पाशांकुश- पुटा मायेति परमेश्वरि स्वाहा ॥१४॥
त्रयोदशार्णा ताराद्या अश्वारूढाऽनिलेऽवतु। सरस्वती पञ्चस्वरे नित्यक्लिन्ने मदद्रवे ॥१५॥
स्वाहा च त्र्यक्षरी विद्या मामुत्तरे सदाऽवतु। तारं माया तु कवचं खे रक्षेत् सततं वधूः ॥१६॥
हूं क्षें ह्रीं फट् महाविद्या द्वादशार्णाऽखिलप्रदा। त्वरिताष्टादिभिः पायाच्छिव कोणे सदा च मां ॥१७॥
ऐं क्लीं सौः सततं बाला मामूर्ध्व देशतोऽवतु विन्द्वन्ता भैरवी बाला भूमौ च मां सदाऽवतु ॥१८॥

॥फलश्रुति ॥

इति ते कथितं पुण्यं त्रैलोक्य मङ्गलं परं। सारात् सारतरं पुण्यं महाविद्यौघ विग्रहम् ॥१॥
अस्य हि पठनात् सद्यः कुबेरोऽपि धनेश्वरः। इन्द्राद्याः सकला देवाः पठनाद धारणाद्यतः ॥२॥
सर्वसिद्धीश्वराः सन्तः सर्वैश्वर्यमवाप्नुयुः। पुष्पांजल्यष्टकं दत्वा मूलेनैव पठेत् सकृत् ॥३॥
संवत्सर कृतायास्तु पूजायाः फलमाप्नुयात्। प्रीतिमान् योऽन्यतः कृत्वा कमला निश्चला गृहे ॥४॥
वाणी च निवसेद् वक्त्रे सत्यं न संशयः। यो धारयति पुण्यात्मा त्रैलोक्य म ङ्गलाभिधम् ॥५॥
कवचं परमं पुण्यं सोऽपि पुण्यवतां वरः। सर्वैश्वर्ययुतो भूत्वा त्रैलोक्यविजयी भवेत् ॥६॥
पुरुषो दक्षिणे- बाहौ नारी वामभुजे तथा। बहुपुत्रवती भूत्वा वन्ध्याऽपि लभते सुतम् ॥७॥
ब्रह्मास्त्रादीनि शस्त्राणि नैव कृन्तन्ति तं जनम्। एतत् कवचमज्ञात्वा यो जपेद् भुवनेश्वरीम् ॥
दारिद्र्यं परमं प्राप्य सोऽचिरान्मृत्युमाप्नुयात् ॥८॥

॥ भुवनेश्वरी त्रैलोक्य मोहन कवचम् ॥

॥श्रीदेव्युवाच ॥

भगवन् परमेशान, सर्वागम विशारद, कवचं भुवनेश्वर्याः कथयस्व महेश्वर!

॥ श्रीभैरव उवाच ॥

शृणु देवि महेशानि! कवचं सर्वकामदं त्रैलोक्य मोहनं नाम सर्वेप्सित फलप्रदं।

विनियोग :- ॐ अस्य श्रीत्रैलोक्यमोहन कवचस्य श्रीसदाशिव ऋषिः। विराट् छन्दः। श्रीभुवनेश्वरी देवता। चतुवर्ग सिद्ध्यर्थं कवच पाठे विनियोगः।

ऋष्यादिन्यास :- श्रीसदाशिव ऋषये नमः शिरसि। विराट् छन्दसे नमः मुखे। श्रीभुवनेश्वरी देवतायै नमः हृदि। चतुर्वर्ग सिद्ध्यर्थं कवच पाठे विनियोगाय नमः सर्वाङ्गे।

॥कवचस्तोत्र॥

ॐ ह्रीं क्लीं मे शिरः पातु श्रीं फट् पातु ललाटकम्। सिद्धपञ्चाक्षरी पायान्नेत्रे मे भुवनेश्वरी ॥१॥
श्रीं क्लीं ह्रीं मे श्रुतीः पातु नमः पातु च नासिकाम्। देवी षडक्षरी पातु वदनं मुण्डभूषणा ॥२॥
ॐ ह्रीं श्रीं ऐं गलं पातु जिह्वां पायान्महेश्वरी। ऐं स्कन्धौ पातु मे देवी महात्रिभुवनेश्वरी ॥३॥
हूं घण्टां मे सदा पातु देव्येकाक्षर रूपिणी। ऐं ह्रीं श्रीं हूं तु फट् पायादीश्वरी मे भुजद्वयम् ॥४॥

ॐ ह्रीं श्रीं क्लीं ऐं फट् पायाद् भुवनेशी स्तन द्वयम् । ह्रां ह्रीं ऐं फट् महामाया देवी च हृदयं मम ॥५॥
ऐं ह्रीं श्रीं हूं तु फट् पायात् पार्श्वौ कामस्वरूपिणी । ॐ ह्रीं क्लीं ऐं नमः पायात् कुक्षिं महाषडक्षरी ॥६॥
ऐं सौः ऐं ऐं क्लीं फट् स्वाहा कटिदेशे सदाऽवतु । अष्टाक्षरी महाविद्या देवेशी भुवनेश्वरी ॥७॥
ॐ ह्रीं ह्रौं ऐं श्रीं ह्रीं फट् पायान्मे गुह्यस्थलं सदा । षडक्षरी महाविद्या साक्षाद् ब्रह्मस्वरूपिणी ॥८॥
ऐं ह्रां ह्रौं हूं नमो देव्यै देवि! सर्वं पदं ततः, दुस्तरं पदं तारय तारय प्रणवद्वयम् ।
स्वाहा इति महाविद्या जानुनि मे सदाऽवतु ॥९॥
ऐं सौः ॐ ऐं क्लीं फट् स्वाहा जंघेऽव्याद् भुवनेश्वरी । ॐ ह्रीं श्रीं क्लीं ऐं फट् पायात् पादौ मे भुवनेश्वरी ॥१०॥
ॐ ॐ ह्रीं ह्रीं श्रीं श्रीं क्लीं क्लीं ऐं ऐं सौः सौः वद वद । वाग्वादिनीति च देवि विद्या या विश्वव्यापिनी ॥११॥
सौः सौः सौः ऐं ऐं ऐं क्लीं क्लीं क्लीं श्रीं श्रीं श्रीं ह्रीं ह्रीं ह्रीं ॐ। ॐ ॐ चतुर्दशात्मिका विद्या पायात् बाहू तु मे ॥१२॥
सकलं सर्वभीतिभ्यः शरीरं भुवनेश्वरी । ॐ ह्रीं श्रीं इन्द्रदिग्भागे पायान्मे चापराजिता ॥१३॥
स्त्रीं ऐं ह्रीं विजया पायादिन्दुमदग्नि दिक्स्थले । ॐ श्रीं सौः क्लीं जया पातु याम्यां मां कवचान्वितम् ॥१४॥
ह्रीं ह्रीं ऐं सौः ह्सौः पायान्नैर्ऋतिर्मां तु परात्मिका । ॐ श्रीं श्रीं ह्रीं सदापायात् पश्चिमे ब्रह्मरूपिणी ॥१५॥
ॐ ह्रां ऐं सौः मां भयाद् रक्षद् वायव्यां मन्त्ररूपिणी । ऐं क्लीं श्रीं सौः सदाऽव्यान्मां कौवेर्यां नगनन्दिनी ॥१६॥
ॐ ह्रीं श्रीं क्लीं महादेवी ऐशान्यां पातु नित्यशः । ॐ ह्रीं मन्त्रमयी विद्या पायादूर्ध्वं सुरेश्वरी ॥१७॥
ॐ ह्रीं श्रीं क्लीं ऐं मां पायादधस्था भुवनेश्वरी । एं वं दशदिशो रक्षेत् सर्वमन्त्रमयी शिवा ॥१८॥
प्रभाते पातु चामुण्डा श्रीं क्लीं ऐं सौः स्वरूपिणी । मध्याह्नेऽव्यान्मामम्बा श्रीं ह्रीं क्लीं ऐं सौः स्वरूपिणी ॥१९॥
सायं पायादुमा देवी ऐं ह्रीं क्लीं सौः स्वरूपिणी । निशादौ पातु रुद्राणी ॐ क्लीं क्रीं सौः स्वरूपिणी ॥२०॥
निशीथे पातु ब्रह्माणी क्रीं हूं ह्रीं ह्रीं स्वरूपिणी । निशान्ते वैष्णवी पायादो मैं ह्रीं क्लीं स्वरूपिणी ॥२१॥
सर्वकाले च मां पायादो ॐ ह्रीं श्रीं भुवनेश्वरी । एषा विद्या मया गुप्ता तन्त्रेभ्यश्चापि साम्प्रतम् ॥२२॥

॥फलश्रुति ॥

देवेशि! कथितां तुभ्यं कवचेच्छा त्वयि प्रिये! इति ते कथितं देवि! गुह्यतर परं ।
त्रैलोक्यमोहनं नाम कवचं मन्त्रविग्रहं, ब्रह्मविद्यामयं भद्रे! केवलं ब्रह्मरूपिणं ॥१॥
मन्त्रविद्या मयं चैव कवचं मन्मुखोदितं, गुरुमभ्यर्च्य विधिवत् कवचं धारयेद्यदि ।
साधको वै यथा ध्यानं तत्क्षणाद् भैरवो भवेत्, सर्वपापविनिर्मुक्तः कुलकोटि समुद्धरेत् ॥२॥
गुरुः स्यात् सर्वविद्यासु ह्यधिकारो जपादिषु, शतमष्टोत्तरं चास्य पुरश्चर्या विधिः स्मृता ।
शतमष्टोत्तरं जप्त्वा तावद्धोमादिकं तथा, त्रैलोक्ये विचरेद्वीरो गणनाथो यथा स्वयं ॥३॥
गद्य-पद्यमयी वाणी भवेद् गङ्गाप्रवाहवत्, पुष्पाञ्जल्यष्टकं दत्वा मूलेनैव पठेत् सकृत् ॥४॥

॥ श्रीभुवनेश्वरी पञ्जर स्तोत्रम् ॥

तंत्र में लिखा है कि पञ्जर स्तोत्र ''**दुर्ग-किले** '' के समान साधक की रक्षा करता है। इस स्तोत्र के पाठ में प्रत्येक दिशा में रक्षा करने के लिए भुवनेश्वरी के बाद '**योगविद्ये महामाये योगिनी गणसेविते..........**' से ' लेकर **............त्रैलोक्य मोहिन्यैविद्महे विश्व जनन्यै धीमहि तन्नः शक्तिः प्रचोदयात् ॥**' तक अवश्य पढ़ें।

॥पञ्जर स्तोत्रम् ॥

इदं श्रीभुवनेश्वर्याः पञ्जरं भुवि दुर्लभम्। येन संरक्षितो मर्त्यो वाणैः शस्त्रैर्न बाध्यते ॥१॥

ज्वरमारी पशु व्याघ्र- कृत्या चौराद्युपद्रवैः। नद्यम्बु - धरणी विद्युत्कृशानु - भुजगारिभिः ॥२॥

सौभाग्यारोग्य - सम्पत्ति - कीर्ति - कान्ति - यशोऽर्थदम् ॥३॥

ॐ क्रों श्रीं ह्रीं ऐं सौः पूर्वेऽधिष्ठाय मां पाहि चक्रिणि भुवनेश्वरि! योगविद्ये महामाये योगिनी- गणसेविते! कृष्णवर्णे महद्भूते वृहत् कर्णे भयङ्करि। देव-देवि! महादेवि! मम शत्रून् विनाशय। उत्तिष्ठ पुरुषे किं स्वपिषि भयं मे समुपस्थितं ॥ यदि शक्यमशक्यं तन्मे भगवति! शमय स्वाहा। त्रैलोक्य - मोहिन्यै विद्महे विश्वजनन्यै धीमहि तन्नः शक्तिः प्रचोदयात् ॥१॥

ममाग्नेयां स्थिता पाहि गदिनी भुवनेश्वरि ! योगविद्ये ... कृष्णवर्णे .... तन्नः शक्तिः प्रचोदयात् ॥२॥

याम्येऽधिष्ठाय मां पाहि शङ्खिनी भुवनेश्वरि ! योगविद्ये ... कृष्णवर्णे .... तन्नः शक्तिः प्रचोदयात् ॥३॥

नैर्ऋत्ये मां स्थिता पाहि खड्गिनी भुवनेश्वरि ! योगविद्ये ... कृष्णवर्णे .... तन्नः शक्तिः प्रचोदयात् ॥४॥

पश्चिमे मां स्थिता पाहि पाशिनी भुवनेश्वरि ! योगविद्ये ... कृष्णवर्णे .... तन्नः शक्तिः प्रचोदयात् ॥५॥

वायव्ये मां स्थिता पाहि शक्तिनी भुवनेश्वरि। योगविद्ये...कृष्णवर्णे....तन्नः शक्तिः प्रचोदयात् ॥६॥

सौम्येऽधिष्ठाय मां पाहि चापिनी भुवनेश्वरि। योगविद्ये...कृष्णवर्णे....तन्नः शक्तिः प्रचोदयात् ॥७॥

ईशेऽधिष्ठाय मां पाहि शूलिनी भुवनेश्वरि। योगविद्ये...कृष्णवर्णे....तन्नः शक्तिः प्रचोदयात् ॥८॥

ऊर्ध्वेऽधिष्ठाय मां पाहि पद्मिनी भुवनेश्वरि। योगविद्ये...कृष्णवर्णे....तन्नः शक्तिः प्रचोदयात् ॥९॥

अधस्तान्मां स्थिता पाहि वाणिनी भुवनेश्वरि। योगविद्ये...कृष्णवर्णे....तन्नः शक्तिः प्रचोदयात् ॥१०॥

अग्रतो मां सदा पाहि सांकुशे भुवनेश्वरि। योगविद्ये...कृष्णवर्णे....तन्नः शक्तिः प्रचोदयात् ॥११॥

पृष्ठतो मां स्थिता पाहि वरदे भुवनेश्वरि। योगविद्ये...कृष्णवर्णे....तन्नः शक्तिः प्रचोदयात् ॥१२॥

सर्वतो मां सदा पाहि सायुधे भुवनेश्वरि। योगविद्ये...कृष्णवर्णे....तन्नः शक्तिः प्रचोदयात् ॥१३॥

फलश्रुति में १४ दिशाओं का रक्षण कहा गया है परन्तु स्तोत्र में १२ दिशओं का ही लेख है अतः यदि १३वे श्लोक में ''**सर्वतो मां**'' की जगह **वामे-दक्षे** प्रयुक्त होतो १४ दिशाओं का रक्षण होता है।

॥फलश्रुति ॥

प्रोक्ता दिङ्मनवो देवि! चतुर्दश शुभ प्रदाः। एतत् पञ्जरमाख्यातं सर्व रक्षाकरं नृणाम् ॥

गोपनीयं प्रयत्नेन स्व-योनिरिव पार्वति। न भक्ताय प्रदातव्यं नाशिष्याय कदाचन ॥

सिद्धिकामो महादेवि! गोपयेन्मातृ -जारवत्। भयकाले होमकाले पूजाकाले विशेषतः ॥

दीपस्यारम्भ- काले वै यः कुर्यात् पञ्जरं सुधीः । सर्वान् कामानवाप्नोति प्रत्यूहैर्नाभि भूयते ॥
रणे राजकुले द्यूते सर्वत्र विजयी भवेत् । कृत्या- रोग- पिशाचाद्यैर्न कदाचित् प्रबाध्यते ॥
प्रातः काले च मध्याह्ने सन्ध्यायामर्द्धरात्रके । यः कुर्यात् पञ्जरं मर्त्यो देवीं ध्यात्वा समाहितः ॥
काल - मृत्युमपि प्राप्तं जयेदत्र न संशयः ।
ब्रह्मास्त्रादीनि शस्त्राणि तद् गात्रं न लगन्ति च ॥
पुत्रवान् धनवाँल्लोके यशस्वी जायते नरः ॥

॥ श्रीभुवनेश्वरी हृदय स्तवः ॥

॥ देव्युवाच ॥

भगवन्! ब्रूहि तत्स्तोत्रं सर्वकाम प्रसाधनम्, यस्य श्रवण मात्रेण नान्यच्छ्रोतव्यमिष्यते ॥
यदि मेऽनुग्रहः कार्यः प्रीतिश्चापि ममोपरि । तदिदं कथय ब्रह्मन्! विमलं यन्महीतले ॥

॥ ईश्वर उवाच ॥

शृणु देवि! प्रवक्ष्यामि सर्वकामप्रसाधनम् । हृदयं भुवनेश्वर्या स्तोत्रमस्ति यशोदयम् ॥

विनियोग :- ॐ अस्य श्रीभुवनेश्वरी हृदय स्तोत्रस्य श्रीशक्तिः ऋषिः । गायत्री छन्दः । श्रीभुवनेश्वरी देवता । हं बीजं । ईं शक्तिः । रं कीलकं । सकल मनोवाञ्छित सिद्ध्यर्थे पाठे विनियोगः ॥

ऋष्यादिन्यास :- श्रीशक्ति ऋषये नमः शिरसि । गायत्री छन्दसे नमः मुखे । श्रीभुवनेश्वरी देवतायै नमः हृदि । हं बीजाय नमः गुह्ये । ईं शक्तये नमः नाभौ । रं कीलकाय नमः पादयोः । सकल मनोवांच्छित सिद्ध्यर्थे पाठे विनियोगाय नमः सर्वाङ्गे ।

मन्त्रः	करन्यास	षड्ङ्गन्यास
ह्रीं श्रीं ऐं	अंगुष्ठाभ्यां नमः ।	हृदयाय नमः ।
ह्रीं श्रीं ऐं	तर्जनीभ्यां नमः ।	शिरसे स्वाहा ।
ह्रीं श्रीं ऐं	मध्यमाभ्यां नमः ।	शिखायै वषट् ।
ह्रीं श्रीं ऐं	अनामिकाभ्यां नमः ।	कवचाय हुँ ।
ह्रीं श्रीं ऐं	कनिष्ठिकाभ्यां नमः ।	नेत्रत्रयाय वौषट् ।
ह्रीं श्रीं ऐं	करतलकरपृष्ठाभ्यां नमः ।	अस्त्राय फट् । ।

॥ ध्यानम् ॥

ध्यायेद् ब्रह्मादिकानां कृतजनि जननी योगिनीं योग - योनिम् ।
देवानां जीवनायोज्ज्वलित- जय पर- ज्योतिरुग्राङ्ग - धात्रीम् ॥
शङ्खं चक्रं च बाणं धनुरपि दधतीं दोश्चतुष्काम्बुजातैः ।
मायामाद्यां विशिष्टां भव भव भुवनां भूभवा भार भूमिम् ॥

मानसोपचारैः सम्पूज्य, पठेत् -

यदाज्ञया यो जगदाद्यशेषं सृजत्यजः श्रीपतिरौरसं वा ।
बिभर्ति संहन्ति भवस्तदन्ते भजामहे श्रीभुवनेश्वरीं ताम् ॥१॥

जगज्जनानन्द - करीं जयाख्यां यशस्विनीं यन्त्रसुयज्ञ - योनिम् ।
जितामितामित्र- कृत प्रपञ्चां भजामहे श्रीभुवनेश्वरीं ताम् ॥२॥

हरौ प्रसुप्ते भुवनत्रयान्ते अवातरन्नाभिज पद्मजन्मा ।
विधिस्ततोऽब्धे विदधार यत्पदं भजामहे श्रीभुवनेश्वरीं ताम् ॥३॥

न विद्यते क्वापि तु जन्म यस्या न स्थितिः सान्ततिकीह यस्याः ।
न वा निरोधेऽखिलकर्म यस्याः भजामहे श्रीभुवनेश्वरीं ताम् ॥४॥

कटाक्ष मोक्षा चरणोग्रवित्ता निवेशितार्णाः करुणार्द्रचित्ता ।
सुभक्तये एति समीप्सितं या भजामहे श्रीभुवनेश्वरीं ताम् ॥५॥

यतो जगज्जन्म बभूव योनेस्तदेव मध्ये प्रतिपाति यां वा ।
तदत्ति यान्तेऽखिलमुग्र - काली भजामहे श्रीभुवनेश्वरीं ताम् ॥६॥

सुषुप्तिकाले जनमध्ययन्त्या यया जनः स्वप्नमवैति किंचित् ।
प्रबुध्यते जाग्रति जीव एष भजामहे श्रीभुवनेश्वरीं ताम् ॥७॥

दयास्फुरत् कोरकटाक्ष लाभान्नैकत्र यस्या प्रलभन्ति सिद्धाः ।
कवित्वमीशित्वमपि स्वतन्त्रा भजामहे श्रीभुवनेश्वरीं ताम् ॥८॥

लसन्मुखाम्भोरुहमुत्-स्फुरन्तं हृदि प्रणिध्याय दिशि स्फुरन्तः ।
यस्याः कृपार्द्रं प्रविकाशयन्ति भजामहे श्रीभुवनेश्वरीं ताम् ॥९॥

यदानुरागानुगतालि - चित्राश्चिरन्तन प्रेम परिप्लुताङ्गाः ।
सुनिर्भयाः सन्ति प्रमुद्य यस्याः भजामहे श्रीभुवनेश्वरीं ताम् ॥१०॥

हरिर्विरिञ्चिर्हर ईशितारः पुरोऽवतिष्ठन्ति परव्रताङ्गाः ।
यस्या समिच्छन्ति सदानुकूल्यं भजामहे श्रीभुवनेश्वरीं ताम् ॥११॥

मनुं यदीयं हरमग्निसंस्थं ततश्च वामश्रुति चन्द्रसक्तम् ।
जपन्ति ये स्युः सुरवन्दितास्ते भजामहे श्रीभुवनेश्वरीं ताम् ॥१२॥

प्रसीदतु प्रेमरसार्द्र चित्ता सदा हि सा श्रीभुवनेश्वरी मे ।
कृपा कटाक्षेण कुबेर कल्या भवन्ति यस्याः पदभक्ति भाजः ॥१३॥

मुदा सुपाठ्यं भुवनेश्वरीयं सदा सतां स्तोत्रमिदं सुसेव्यं ।
सुखप्रदं स्यात् कलिकल्मषघ्नं सुश्रृण्वतां सम्पठतां प्रशस्यम् ॥१४॥

एतत्तु हृदय स्तोत्रं पठेद् यस्तु समाहितः । भवेत् तस्येष्टदा देवी प्रसन्ना भुवनेश्वरी ॥१५॥

ददाति धनमायुष्यं पुण्यंपुण्यमतिं तथा । नैष्ठिकीं देवभक्तिं च गुरु- भक्तिं विशेषतः ॥१६॥
पूर्णिमायां चतुर्दश्यां कुजवारे विशेषतः । पठनीयमिदं- स्तोत्रं देवसद्मनि यत्नतः ॥१७॥
यत्रकुत्रापि पाठेन स्तोत्रस्यास्य फलं भवेत् । सर्वस्थानेषु देवेश्याः पूतदेहः सदा पठेत् ॥१८॥

पूर्ववत् न्यासध्यानादि कुर्वन् निवेद्य प्रणमेत् ।

मंत्रमहार्णव में पाठान्तर भेद भी कहीं-कहीं है

॥ इतिश्रीनीलसरस्वती तंत्रे भुवनेश्वरी पटले हृदयस्तोत्रं समाप्तम् ॥

॥ श्रीभुवनेश्वरी स्तवः ॥

आद्यामशेष - जननीमरविन्द - योनेर्विष्णोः, शिवस्य च वपुः प्रतिपादयित्रीम् ।
सृष्टिस्थितिक्षयकरीं जगतां त्रयाणां, स्तुत्वा गिरं विमलयाम्यहमम्बिके ! त्वां ॥१॥
पृथ्व्या जलेन शिखिना मरुतां वरेण, होत्रेन्दुना दिनकरेण च मूर्तिभाजः ।
देवस्य मन्मथ - रिपोरपि - शक्तिमत्ता, हेतुस्त्वमेव खलु पर्वतराज पुत्रि! ॥२॥
त्रिस्त्रोतसः सकललोक समर्चिताया, वैशिष्ट्य कारणमवैमि तदेव मातः ।
त्वत् पद्पङ्कज - पराग पवित्रतासु, शम्भोर्जटासु नियतं परिवर्तनं यत् ॥३॥
आनन्दयेत् कुमुदिनीमधिपः कलानां, नान्यामिनः कमलिनीमथ नेतरां वा ।
एकस्य मोदनविधौ परमेकमिष्टे, त्वं तु प्रपञ्चमभिनन्दयसि स्वदृष्ट्या ॥४॥
आद्याप्यशेष - जगतां नवयौवनाऽसि, शैलाधिराज - तनयाप्यति कोमलाऽसि ।
त्रय्याः प्रसूरपि तया न समीक्षिताऽसि, ध्येयाऽपि गौरि ! मनसो न पथि स्थिताऽसि ॥५॥
आसाद्य जन्म मनुजेषु चिराद् दुरापं, तत्रापि पाटवमवाप्य निजेन्द्रियाणां ।
नाभ्यर्चयन्ति जगतां जनयित्रि! ये त्वां, निःश्रेणिकाग्रमधिरुह्य पुनः पतन्ति ॥६॥
कर्पूरचूर्ण हिमवारि विलोडितेन, ये चन्दनेन कुसुमैश्च सुजातगन्धैः ।
आराधयन्ति हि भवानि! समुत्सुकास्त्वां, ते खल्वशेष - भुवनादि भुवं प्रथन्ते ॥७॥
आविश्य मध्यपदवीं प्रथमे सरोजे, सुप्ता हि राजसदृशी विरचय्य विश्वम् ।
विद्युल्लता - वलय विभ्रममुद्वहन्ती, पद्मानि पञ्च विदलय्य समश्नुवाना ॥८॥
तन्निर्गतामृत - रसैरभिषिच्य गात्रं, मार्गेण तेन विलयं पुनरप्यवाप्ता ।
येषां हृदि स्फुरति जातु न ते, भवेयुमतिर्महेश्वर कुटुम्बिनि ! गर्भभाजः ॥९॥
आलम्बि कुन्तल - भरामभिराम - वक्त्रां, पीवर - स्तनतटीं च तनुवृत्त मध्यां ।
चिन्ताक्ष - सूत्र कलशालिखिताढ्य - हस्तां, मातर्नमामि मनसा तव गौरि ! मूर्तिम् ॥१०॥
आस्थाय योगमवजित्य च वैरिषट्कमाबध्य चेन्द्रियगणं मनसि प्रसन्ने ।
पाशाङ्कुशाभय वराढ्यकरां सुवक्त्रामालोकयन्ति भुवनेश्वरि ! योगिनस्त्वाम् ॥११॥

उत्तप्त हाटक निभा करिभिश्चतुर्भिरावर्तितामृत घटैरभिषिच्यमाना ।
हस्तद्वयेन नलिने रुचिरे वहन्ती, पद्मापि साऽभयकरा भवसि त्वमेव ॥१२॥
अष्टाभिरुग्र विविधायुध वाहिनीभिर्दोर्वल्लरीभिरधिरुह्य मृगाधिराजं ।
पूर्वादलद्युतिरमर्त्य विपक्षपक्षान्, न्यक्कुर्वती त्वमसि देवि, भवानि दुर्गे ॥१३॥
आविर्निदाघ जलशीकर शोभि- वक्त्रां, गुंजाफलेन परिकल्पितहार यष्टिम् ।
रत्नांशुकामसित - कान्तिमलंकृतां त्वामाद्यां पुलिन्दतरुणीं असकृत् स्मरामि ॥१४॥
हंसैर्गति क्वणित - नूपुरदूर - कृष्टैर्मूर्तैरिवाप्त वचनैरनु - गम्यमानौ ।
पद्माविवोर्ध्व मुख रूढ़ सुजात नालौ, श्रीकण्ठपत्नि! शिरसैव दधे तवांघ्रिं ॥१५॥
द्वाभ्यां समीक्षितुमतृप्ति - मतेन दृग्भ्यामुत्पाद्यता त्रिनयनं वृषकेतनेन ।
सान्द्रानुराग भवनेन निरीक्ष्यमाणे, जंघे उभेऽपि भवानि तवानतोऽस्मि ॥१६॥
ऊरुं स्मरामि शितहस्ति करावलेपौ, स्थौल्येन मार्दवतया परिभूत रम्भौ ।
श्रोणी भरस्य सहनौ परिकल्प्य दत्तौ, स्तम्भाविवाङ्ग वयसा तव मध्यमेन ॥१७॥
श्रोण्यौ स्तनौ च युगपत् प्रथयिष्यतोच्चैर्बाल्यात् परेण वयसा परिहृष्टसारौ ।
रोमावली विलसितेन विभाव्यमूर्तिं, मध्यं तव स्फुरतु मे हृदयस्य मध्ये ॥१८॥
सख्यः स्मरस्य हरनेत्र हुताश - भीरोर्लावण्य - वारि भरितं नवयौवनेन ।
आपाद्य - दत्तमिव पल्वलमप्रविष्ट, नाभिं कदापि तव देवि न विस्मरेयं ॥१९॥
ईशोपगूह - पिशुनं भसितं दधाने , काश्मीर कर्दममनु - स्तन - पङ्कजे ते ।
स्नानोत्थितस्य करिणः क्षणलक्ष फेनौ, सिन्दूरितौ स्मरयतः समदस्य कुम्भौ ॥२०॥
कण्ठातिरिक्त गलदुज्ज्वल कान्तिधारा, शोभौ भुजौ निज रिपोर्मकरध्वजेन ।
कण्ठग्रहाय रचितौ किल दीर्घपाशौ, मातर्मम स्मृतिपथं न विलङ्घ्येताम् ॥२१॥
नात्यायतं रचित कम्बुविलास चौर्यं, भूषाभरेण विविधेन विराजमानं ।
कण्ठं मनोहरगुणं गिरिराज कन्ये!, संचिन्त्य तृप्तिमुपयामि कदापि नाहं ॥२२॥
अत्यायताक्षमभिजात - ललाट पट्टं, मन्दस्मितेन दरफुल्ल कपोलरेखं ।
बिम्बाधरं वदनमुन्नतदीर्घ - नासं यत्ते, स्मरत्यसकृदम्ब! स एव जातः ॥२३॥
आविस्तुषार करलेखमनल्प - गन्ध पुष्पोपरि भ्रमदलि व्रज निर्विशेषं ।
यश्चेतसा कलयते तव केशपाशं तस्य स्वयं गलति देवि! पुराणपाशः ॥२४॥
श्रुतिसुरचित - पाकं श्रीमतां स्तोत्रमेतत् , पठति य इह मर्त्यो नित्यमार्द्रान्तरात्मा ।
स भवति पदमुच्चैः सम्पदां पादनम्रः, क्षितिप मुकुट लक्ष्मी लक्षणानां चिराय ॥२५॥

॥ आनन्दमयी श्रीभुवनेश्वरी स्तवः ॥

अथानन्दमयीं साक्षाच्छब्द ब्रह्मस्वरूपिणीम् । ईडे सकल सम्पत्त्यै जगत्कारणम्बिकाम् ॥१॥
आद्यामशेष जननीमरविन्द योनेर्विष्णोः, शिवस्य च वपुः प्रतिपादयित्रीम् ।
सृष्टिस्थिति क्षयकरीं जगतां त्रयाणां स्तुत्वा गिरं विमलयाम्यहमम्बिके! त्वाम् ॥२॥
पृथ्व्या जलेन शिखिना मरुतां वरेण, होत्रेन्दुना दिनकरेण च मूर्त्तिभाजः ।
देवस्य मन्मथ रिपोरपि शक्तिमत्ता, हेतुस्त्वमेव खलु पर्वतराजपुत्रि! ॥३॥
त्रिस्रोतसः सकलदेव - समर्च्चिताया, वैशिष्ट्य कारणमवैमि तदेव मातः ।
त्वत्पाद - पङ्कज - पराग पवित्रितासु, शम्भोर्जटासु सततं परिवर्तनं यत् ॥४॥
आनन्दयेत् कुमुदिनीमधिपः कलानां, नान्यामिनः कमलिनीमथ नेतरां वा ।
एकस्य मोदनविधौ परमेक इष्टे, त्वं तु प्रपञ्चमभिनन्दयसि स्वदृष्ट्या ॥५॥
आद्याऽप्यशेष जगतां नवयौवनाऽसि, शैलाधिराज - तनयाऽप्यति कोमलाऽसि ।
त्रय्याः प्रसूरपि तथा न समीक्षिताऽसि, ध्येयाऽसि गौरि! मनसो न पथि स्थिताऽसि ॥६॥
आसाद्य जन्म मनुजेषु चिराद् दुरापं, तत्रापि पाटवमवाप्य निजेन्द्रियाणाम् ।
नाभ्यर्चयन्ति जगतां जनयित्रि! ये त्वां, निःश्रेणिकाग्रमधिरुह्य पुनः पतन्ति ॥७॥
कर्पूरचूर्ण हिमवारि विलोडितेन, ये चन्दनेन कुसुमैश्च सुगन्धिगन्धैः ।
आराधयन्ति हि भवानि! समुत्सुकास्त्वां, ते खल्वशेष भुवनाधिभुवः प्रथन्ते ॥८॥
आविश्य मध्यपदवीं प्रथमे सरोजे, सुप्ताहि राजसदृशी विरचय्य विश्वम् ।
विद्युल्लता वलय विभ्रममुद्वहन्ती, पद्मानि पञ्च विदलय्य समश्नुवाना ॥९॥
तन्निर्गतामृतरसैः परिषिक्तगात्र मार्गेण तेन निलयं पुनरप्यवाप्ता ।
येषां हृदि स्फुरसि जातु न ते, भवेयुर्मातर्महेश्वर कुटुम्बिनि! गर्भभाजः ॥१०॥
आलम्बि - कुण्डल - भरामभिराम वक्त्रामापीवर - स्तनतटीं तनुवृत्त मध्याम् ।
चिन्ताक्ष सूत्र कलशालिखिताढ्य हस्तामावर्त्तयामि मनसा तव गौरि! मूर्तिम् ॥११॥
आस्थाय योगमवजित्य च वैरिषट्कमाबद्ध्य चेन्द्रियगणं मनसि प्रसन्ने ।
पाशाङ्कुशाभय वराढ्यकरां सुवक्त्रामालोकयन्ति भुवनेश्वरि! योगिनस्त्वाम् ॥१२॥
उत्तप्तहाटक - निभा करिभिश्चतुर्भिरावर्तितामृत - घटैरभिषिच्यमाना ।
हस्तद्वयेन नलिने रुचिरे वहन्ती पद्माऽपि साऽभयवरा भवसि त्वमेव ॥१३॥
अष्टाभिरुग्र विविधायुध - वाहिनीभिर्दोर्वल्लरीभिरधिरुह्य मृगाधिराजम् ।
दूर्वादलद्युतिरमर्त्य - विपक्ष-पक्षान् न्यक्कुर्वती त्वमसि देवि भवानि! दुर्गा ॥१४॥
आविर्न्निदाघ - जल शीकर शोभि वक्त्रां, गुञ्जाफलेन परिकल्पित हारयष्टिम् ।
पीतांशुकामसित कान्तिमनङ्ग - तन्द्रामाद्यां पुलिन्दतरुणीमसकृत् स्मरामि ॥१५॥

हंसैर्गति क्वणित - नूपुर दूरदृष्टे, मूर्तैरिवार्थ वचनैरनुगम्य मानौ ।
पद्माविवोर्ध्व - मुख - रूढ सुजात नालौ, श्रीकण्ठपत्नि शिरसा विदधे तवांघ्री ॥१६॥
द्वाभ्यां समीक्षितुमतृप्तिमतेव दृग्भ्यात्मुपाट्य भाल नयनं वृषकेतनेन ।
सान्द्रानुराग तरलेन निरीक्ष्यमाणे, जङ्घे शुभे अपि भवानि तवानतोऽस्मि ॥१७॥
ऊरू स्मरामि जितहस्ति करावलेपौ, स्थौल्येन मार्दवतया परिभूत रम्भौ ।
श्रोणीभरस्य सहनौ परिकल्प्य दत्तौ, स्तम्भाविवाङ्ग वयसा तव मध्यमेन ॥१८॥
श्रोण्यौ स्तनौ च युगपत् प्रथयिष्यतोच्चैर्बाल्यात् परेण वयसा परिहृष्टसारौ ।
रोमावली विलसितेन विभाव्यमूर्ति मध्यं तव स्फुरतु मे हृदयस्य मध्ये ॥१९॥
सख्यः स्मरस्य हर नेत्रहुताश शान्त्यै, लावण्य वारिभरितं नवयौवनेन ।
आपाद्य दत्तमिव पल्लवमप्रविष्टं नाभिं, कदापि तव देवि न विस्मरेयम् ॥२०॥
ईशेऽपिगेहपिशुनं भसितं दधाने, काश्मीरकर्दममनुस्तन पङ्कजे ते ।
स्नातोत्थितस्य करिणः क्षणलक्ष्य फेनौ, सिन्दूरितौ स्मरयतः समदस्य कुम्भौ ॥२१॥
कण्ठातिरिक्त गलदुज्ज्वल कान्ति धारा, शोभौ भुजौ निजरिपोर्मकर - ध्वजेन ।
कण्ठग्रहाय रचितौ किल दीर्घपाशौ, मातर्मम स्मृतिपथं न विलंघयेताम् ॥२२॥
नात्यायतं रचित कम्बुविलास चौर्यं, भूषाभरेण विविधेन विराजमानम् ।
कण्ठं मनोहर गुणं गिरिराजकन्ये!, संचिन्त्य तृप्तिमुपयामि कदापि नाहम् ॥२३॥
अत्यायताक्षमभिजात ललाटपट्टं, मन्दस्मितेन दरफुल्लकपोल - रेखम् ।
बिम्बाधरं वदनमुन्नत दीर्घनासं, यस्ते स्मरत्यसकृदम्ब स एव जातः ॥२४॥
आविस्तुषार करलेखमनल्प - गन्ध, पुष्पोपरि भ्रमदलि व्रज निर्विशेषम् ।
यश्चेतसा कलयते तव केशपाशं, स्वयं गलति देवि पुराणपाशः ॥२५॥
श्रुतिसुचरित पाकं श्रीमतां स्तोत्रमेतत्, पठति य इह मर्त्यो नित्यमार्द्रान्तरात्मा ।
स भवति पदमुच्चैः सम्पदां पादनम्र, क्षितिप मुकुट लक्ष्मीर्लक्षणानां चिराय ॥

॥ श्रीरुद्रयामले तन्त्रे आनन्दमयी श्रीभुवनेश्वरी स्तवः ॥

॥ श्रीभुवनेश्वरी खड्गमाला ॥

इस स्तोत्र के पाठ से यंत्रार्चन का फल प्राप्त होता है।

विनियोग :- ॐ अस्य श्रीभुवनेश्वरी खड्गमाला मन्त्रस्य श्रीप्रकाशात्मा ऋषिः, गायत्रीछन्दः, श्रीभुवनेश्वरी देवता, हं बीजं, ईं शक्तिः, रं कीलकं, श्रीभुवनेश्वरी परामबाप्रसन्नार्थे जपे विनियोगः।

ऋष्यादिन्यास :- श्रीप्रकाशात्मा ऋषये नमः शिरसि। गायत्री छन्दसे नमः मुखे। श्रीभुवनेश्वरी देवतायै नमः हृदि। हं बीजाय नमः गुह्ये। ईं शक्तये नमः पादयोः। रं कीलकाय नमः नाभौ। श्रीभुवनेश्वरी पराम्बा प्रसन्नार्थे जपे

विनियोगाय नमः सर्वाङ्गे।

॥ ध्यानम् ॥

स्मरेद् रवीन्द्वग्नि विलोचनां तां , सत्पुस्तकां जाप्यवटीं दधानाम् ।
सिंहासनां मध्यमयन्त्र संस्थां, श्रीतत्त्व विद्यां परम्बां भजामि ॥
य एनां सचिन्तयेन्मन्त्री, सर्वकामार्थ सिद्धिदाम् ।
तस्य हस्ते सदैवास्ति सर्वसिद्धिर्न संशयः ॥
तादृशं खड्गमाप्रोति येन हस्त स्थितेन वै ।
अष्टादश महाद्वीपे सम्राट् भोक्ता भविष्यति ॥

ॐ श्रीं ह्रीं श्रीं श्रीभुवनेश्वरी हृदय देवि शिरोदेवि शिखादेवि कवचदेवि नेत्रदेव्यस्त्र देवि कराले विकराले उमे सरस्वति श्रीदुर्गे उषे लक्ष्मि श्रुति स्मृति धृति श्रद्धे मेधे रति कान्ति आर्ये श्रीभुवनेश्वरि दिव्यौघगुरु- रूपिणि, सिद्धौघगुरु- रूपिणि, मानवौघगुरु रूपिणि, श्रीगुरु- रूपिणि, परमगुरु- रूपिणि, परापरगुरु- रूपिणि, परमेष्ठीगुरु रूपिणि, अमृतभैरव सहित श्रीभुवनेश्वरि हृदयशक्ति, शिरःशक्ति, शिखाशक्ति, कवचशक्ति, नेत्रशक्त्यस्त्रशक्ति हृल्लेखे गगने रक्ते करालिके महोच्छूष्मे सर्वानन्दमयचक्र स्वामिनि ॥१॥

गायत्री सहित ब्रह्ममयि, सावित्री सहित विष्णुमयि, सरस्वतीसहित रुद्रमयि, लक्ष्मीसहित कुबेरमयि, रतिसहित काममयि, पुष्टिसहित विघ्नराजमयि, शङ्खनिधिसहित वसुधामयि, पद्मनिधिसहित वसुमतिमयि, गायत्र्यादि सहश्रीभुवनेश्वरि ह्रां हृदय देवि, ह्रीं शिरोदेवि, ह्रूं शिखा देवि, ह्रैं कवच देवि, ह्रौं नेत्रदेवि, ह्रः अस्त्रदेवि, सर्वसिद्धिप्रद चक्रस्वामिनि ॥२॥

अनङ्गकुसुमे अनङ्गकुसुमातुरे अनङ्गमदने अनङ्गमदनातुरे भुवनपालिके गगनवेगे शशिरेखे अनङ्गवेगे सर्वरोग-हरचक्र स्वामिनि ॥३॥

कराले विकराले उमे सरस्वति श्रीदुर्गे उषे लक्ष्मि श्रुति स्मृति धृति श्रद्धे मेधे रति कान्ति आर्ये सर्वसंक्षोभण चक्र स्वामिनि ॥४॥

ब्राह्मी माहेश्वरि कौमारि वैष्णवि वाराहि इन्द्राणि चामुण्डे महालक्ष्म्यनङ्ग रूपेऽनङ्ग -कुसुमे अनङ्गमदनातुरे भुवनवेगे भुवनपालिके सर्वशिशिरेऽनङ्ग - मदनेऽनङ्ग -मेखले सर्वाशा- परिपूरक- चक्र स्वामिनि ॥५॥

इन्द्रमय्यग्नि मयि यममयि निऋतिमयि वरुणमयि वायुमयि सोममयि शानमयी ब्रह्ममय्यनन्तमयि वज्रमय्यग्निमयि दण्डमयि खड्गमयि पाशमय्यंकुशमयि गदामयि त्रिशूलमयि पद्ममयि चक्रमयि वरमय्यंकुशमयि पाशमय्यभयमयि बटुकमयि योगिनीमयि क्षेत्रपालमयि गणपतिमय्यष्टवसुमयि द्वादशादित्यमय्येकादशरुद्रमयि सर्वभूतमय्यमृतेश्वर सहित श्रीभुवनेश्वरि त्रैलोक्यमोहन चक्रस्वामिनि नमस्ते नमस्ते नमस्ते स्वाहा श्रीं ह्रीं श्रीं ॐ ॥६॥

॥ फलश्रुति ॥

कथयामि महादेवि भुवनेशीं महेश्वरीं । अनया सदृशी विद्या नान्या ज्ञानस्य साधने ॥१॥
नात्र चित्त विशुद्धिर्वा नारि मित्रादि दूषणम् । न वा प्रयास बाहुल्यं समयासमयादिकम् ॥२॥
देवैर्देवत्व विधये सिद्धैः खेचर सिद्धये । पन्नगै राक्षसैर्मर्त्यैर्मुनिभिश्च मुमुक्षुभिः ॥३॥
कामिभिर्धर्मिभिश्चार्थ लिप्सुभिः सेविता परा । न तथा व्यय बाहुल्यं काम क्लेश करं तथा ॥४॥

य एवं चिन्तयेन्मन्त्री सर्वकामार्थ सिद्धिदाम् । तस्य हस्ते सदैवास्ति सर्वसिद्धिर्न संशयः ॥५॥
गद्य-पद्यमयी वाणी सभायां विजयी भवेत् । तस्य दर्शन मात्रेण वादिनो निष्कृतादरः ॥६॥
राजानोऽपि हि दासत्वं भजन्ते किं प्रयोजनः । दिवारात्रौ पुरश्चर्या कर्तुश्चैव क्षमो भवेत् ॥७॥
सर्वस्यैव जनस्येह वल्लभः कीर्तिवर्धनः । अन्ते च भजते देवीगणत्वं दुर्लभं नरः ॥८॥
चन्द्र-सूर्य-समो भूत्वा वसेत् कल्पायुतं दिवि । न तस्य दुर्लभं किञ्चित् यो वेत्ति भुवनेश्वरीम् ॥

॥श्रीभुवनेश्वरी रहस्ये खड्गमाला स्तोत्रं सम्पूर्णम्॥

॥श्रीभुवनेश्वरी अष्टोत्तर शतनाम स्तोत्रम्॥

कैलाश शिखरे रम्ये नानारत्नोप शोभिते । नर-नारी हितार्थाय शिवं पप्रच्छ पार्वती ॥

॥देव्युवाच ॥

भुवनेश्वरी महाविद्या नाम्नामष्टोत्तरं शतम् । कथयस्व महादेव यद्यहं तव वल्लभा ॥

॥ईश्वर उवाच ॥

शृणु देवि महाभागे स्तवराजमिदं शुभम् । सहस्र नाम्नामधिकं सिद्धिदं मोक्षहेतुकम् ॥
शुचिभिः प्रातरुत्थाय पठितव्यं समाहितैः । त्रिकालं श्रद्धया युक्तैः सर्व कामफल प्रदम् ॥

विनियोग :- ॐ अस्य श्रीभुवनेश्वर्यष्टोत्तर शतनाम स्तोत्रस्य श्रीशक्तिर्ऋषिः । गायत्री छन्दः । श्रीभुवनेश्वरी देवता। चतुर्वर्ग साधने विनियोगः ।

ऋष्यादिन्यास :- श्रीशक्ति ऋषये नमः शिरसि। गायत्री छन्दसे नमः मुखे। श्री भुवनेश्वरी देवतायै नमः हृदि। चतुर्वर्ग साधने विनियोगाय नमः सर्वाङ्गे।

॥स्तोत्रम्॥

महामाया महाविद्या महायोगा महोत्कटा। माहेश्वरी कुमारी च ब्रह्माणी ब्रह्मरूपिणी ॥१॥
वागीश्वरी योगरूपा योगिनी कोटि सेविता। जया च विजया चैव कौमारी सर्वमङ्गला ॥ २॥
हिंगुला च विलासी च ज्वालिनी ज्वालरूपिणी। ईश्वरी क्रूरसंहारी कुलमार्ग प्रदायिनी ॥३॥
वैष्णवी सुभगाकारा सुकुल्या कुलपूजिता। वामाङ्गा वामाचारा च वामदेवप्रिया तथा ॥४॥
डाकिनी योगिनीरूपा भूतेशी भूतनायिका । पद्मावती पद्मनेत्रा प्रबुद्धा च सरस्वती ॥५॥
भूचरी खेचरी माया मातङ्गी भुवनेश्वरी । कान्ता पतिव्रता साक्षी सुचक्षुः कुण्डवासिनी ॥६॥
उमा कुमारी लोकेशी सुकेशी पद्मरागिनी । इन्द्राणी ब्रह्मचाण्डाली चण्डिका वायुवल्लभा ॥७॥
सर्वधातुमयी - मूर्तिर्जलरूपा जलोदरी । आकाशी रणगा चैव नृकपाल विभूषणा ॥८॥
शर्म्मदा मोक्षदा चैव काम धर्मार्थदायिनी । गायत्री चाथ सावित्री त्रिसंध्या तीर्थगामिनी ॥९॥
अष्टमी नवमी चैव दशम्येकादशी तथा। पौर्णमासी कुहूरूपा तिथिमूर्ति - स्वरूपिणी ॥१०॥
सुरारि - नाशकारी च उग्ररूपा च वत्सला । अनला अर्द्धमात्रा च अरुणा पीतलोचना ॥११॥

क्षयरूपी क्षयकरी तेजस्विनी शुचिस्मिता । अव्यक्ता व्यक्तलोका च शम्भुरूपा मनस्विनी ॥१३॥
मातङ्गी मत्तमातङ्गी महादेवप्रिया सदा। दैत्यहा चैव वाराही सर्वशास्त्रमयी शुभा ॥१४॥

॥फलश्रुति ॥

य इदं पठते भक्त्या शृणुयाद् वा समाहितः । अपुत्रो लभते पुत्रान् निर्धनो धनवान् भवेत् ॥१॥
वैश्यस्तु धनवान् भूयात् शूद्रस्तु सुखमेधते। अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः ॥३॥
मूर्खोपि लभते शास्त्रं चौरोपि लभते गतिम्। वेदानां पाठको विप्रः क्षत्रियो विजयो भवेत्॥२॥
ये पठन्ति सदाभक्त्या न ते वै दुःख भागिनः ॥४॥
एककालं द्विकालं वा त्रिकालं वा चतुर्थकं। ये पठन्ति सदा भक्त्या स्वर्ग लोके च पूजिताः ॥५॥
रुद्रं दृष्ट्वा यथा देवा पन्नगा गरुडं यथा। शत्रवः प्रपलायन्ते तस्य वक्त्र विलोकनात् ॥६॥

॥श्रीरुद्रयामले श्रीभुवनेश्वर्यष्टोत्तर शतनाम स्तोत्रं सम्पूर्णम् ॥

॥ श्रीभुवनेश्वरी सहस्त्रनाम स्तोत्रम् ॥

॥ श्रीपार्वत्युवाच ॥

देव देव! महादेव! सर्वशास्त्र विशारद, कपाल खट्वाङ्गधर! चिता-भस्मानुलेपन! ।
या आद्या प्रकृतिर्नित्या सर्वशास्त्रेषु गोपिता, तस्याः श्रीभुवनेश्वर्या नाम्नां पुण्यं सहस्त्रकम् ।
कथयस्व महादेव! येन देवी प्रसीदति॥

॥ श्रीमहेश्वर उवाच ॥

साधु पृष्टं महादेवि! साधु लोकहिताय च, या आद्या प्रकृतिर्नित्या सर्वशास्त्रेषु गोपिता
यस्याः स्मरणमात्रेणसर्वपापैः प्रमुच्यते, आराधनाद् भवेद् यस्या जीवन्मुक्तो न संशयः॥
तस्या नाम सहस्त्राणि कथयामि शृणुष्व तत् ॥

विनियोग :- ॐ अस्य श्रीभुवनेश्वरी सहस्त्रनाम स्तोत्रस्य श्रीदक्षिणामूर्ति ऋषिः, पंक्तिश्छन्दः, आद्या श्रीभुवनेश्वरी देवता, ह्रीं बीजं, श्रीं शक्तिः, क्लीं कीलकं, मम धर्मार्थ काम मोक्षार्थे पाठे विनियोगः।

ऋष्यादिन्यास - श्रीदक्षिणामूर्ति ऋषये नमः शिरसि। पंक्तिश्छंदसे नमः मुखे। आद्या श्रीभुवनेश्वरी देवतायै नमः हृदि। ह्रीं बीजाय नमः गुह्ये। श्रीं शक्तये नमः नाभौ। क्लीं कीलकाय नमः पादयोः। धर्मार्थ काम मोक्षार्थे विनियोगाय नमः सर्वाङ्गे।

॥सहस्त्रनाम स्तोत्रम्॥

ॐ आद्या कमला वाणी माया श्रीभुवनेश्वरी । भुवना भावना भव्या भवानी भवमोचनी ॥
रुद्राणी रुद्रभक्ता च तथा रुद्रप्रिया सती । उमा कामेश्वरी दुर्गा सर्वाणी सर्वमङ्गला ॥
त्रिपुरा परमेशानी सुन्दरी सुन्दरप्रिया । रमणी रमणा रामा रामकार्यकरी शुभा ॥
ब्राह्मी नारायणी चण्डा चामुण्डा चण्डनायिका । माहेश्वरी च कौमारी वाराही चापराजिता ॥
महामाया मुक्तकेशी महात्रिपुरसुन्दरी । सुन्दरी शोभना रक्ता रक्तवस्त्र - पिधायिनी ॥

रक्ताभा रक्तवर्णा च रक्तबीज - निसूदिनी । रक्तचन्दन - लिप्ताङ्गी रक्तपुष्पप्रिया सदा ॥
कमला कामिनी कान्ता कामदेवप्रिया सदा । लक्ष्मीर्लोलाञ्चला चञ्चलाक्षी च चपलप्रिया ॥
भैरवी भयहर्त्री च महाभय - विनाशिनी । भयङ्करी महाभीम भयहा भयनाशिनी ॥
श्मशाने प्रान्तरे दुर्गे संस्मृता भयहारिणी । जया च विजया चैव जयपूर्णा जयप्रदा ॥
यमुना यामुना याम्या यमश्रेष्ठा यमप्रिया । सर्वेषां जनिका जन्या जनवर्द्धनकारिणी ॥
काली कपालिनी कुल्ला कालिका कालरात्रिका । महाकाल - हृदिस्था च कालभैरवरूपिणी ॥
कपाल खट्वांगधरा पाशाङ्कुश - विधारिणी । अभया च भया चैव तथा चाभयदायिनी ॥
महामाया भीमवेगा तथा च वरहस्तिनी । गौरी गौराङ्गिनी गौरा गौरवर्णा जयप्रदा ॥
उग्रा उग्रप्रभा शान्तिः शान्तिदाऽशान्ति- नाशिनी । उग्रतारा तथा चोग्रा नीला चैकजटा तथा ॥
हंसरूपा महातारा तथा च सिद्धिकालिका। तारा नीला च वागीशी तथा नीलसरस्वती ॥
गङ्गा काशी सती सत्या सर्वतीर्थमयी तथा । तीर्थरूपा तीर्थपुण्या तीर्थदा तीर्थसेविका ॥
पुण्यापुण्य - स्वरूपा च पुण्यदात्री सनातनी । पुण्यकाला पुण्यसंस्था तथा पुण्यजनप्रिया ॥
तुलसी तुलना तुल्या बालिका वेधसः प्रिया । सत्या सत्यवती भीमा रुक्मिणी कृष्णवल्लभा ॥
देवकी कृष्णमाता च सुभद्रा भद्ररूपिणी । मनोहरा तथा सौम्या सोमांगी सोमदर्शना ॥
घोररूपा घोरतेजा घोरवत् प्रियदर्शना । कुमारी बालिका क्षुद्रा कुमारी - रूपधारिणी ॥
युवती युवतीरूपा युवतीरस - रञ्जिका । पीनस्तनी क्षीणमध्या प्रौढ़ा मध्या जरातुरा ॥
अतिवृद्धा स्थाणुरूपा चार्वङ्गी चञ्चलानना । देवमाता देवरूपा देवकार्यकरी शुभा ॥
देवमाता दितिर्दक्षा सर्वमाता सनातनी । पानप्रिया पायिनी च चपला पललप्रिया ॥
मत्स्यमांस- प्रिया मांसाशिनी च जनवल्लभा । तपस्विनी तपी तप्या तपः सिद्धिप्रदायिनी ॥
हविष्याशी हविर्भोक्ती हव्यकव्य विलाशिनी । स्वधा स्वाहा स्वधाधारा यज्ञाङ्गी यज्ञभुक्सदा ॥
दक्षा दाक्षायणी दुर्गा दक्षयज्ञ - विनाशिनी । पार्वती पर्वतप्रीता तथा पर्वतवासिनी ॥
हैमी हर्म्या हेमरूपा मौलिमान्या मनोरमा । कैलासवासिनी शुक्ला शिवक्रोड - निवासिनी ॥
चार्वङ्गी चारुरूपा च शुभा चैव शुभानना। चलत् कुण्डलगण्डा श्रीलसत् - कुण्डल - धारिणी ॥
हेमसिंहोपरिस्था च हेमभूषणभूषणा । हेमाङ्गदा हेमभूषा सूर्यकोटिसमप्रभा ॥
तरुणादित्य सङ्काशा सिन्दूराञ्जित - विग्रहा । यवा यावकरूपा च रक्तचन्दन रूपधृक् ॥
कोटरी कोटराक्षी च निर्लज्जा च दिगम्बरी । पूतना वत्समाता च सूर्यमण्डलवासिनी ॥
श्मशान - वासिनी शून्या दृप्तचत्वर -वासिनी । मधुकैटभ -संहर्त्री महिषासुरघातिनी ॥
निशुम्भ-शुम्भ - शमनी चण्डमुण्ड विनाशिनी । शिवानी शिवरूपा च शिवदूती शिवप्रिया ॥
शिवदा शिववक्षःस्था शिवेष्टा शिवकारिणी । इन्द्राणी इन्द्रकन्या च राजकन्या सुरप्रिया ॥

लज्जाशीला साधुशीला कुलस्त्री कुलपूजिता । महाकुलीना निष्कामा विलज्जा भूषणान्विता ॥
कुलीना कुलकन्या सा तथैव कुलभूषिता । अनन्तानन्त - पाणिकाऽनन्तासुर - विनाशिनी ॥
सदाशिव सुसंगेन वाञ्छिताऽऽनन्द - दायिनी। नागांगी नागभूषा च नागहार- विधायिनी ॥
धरणी धारिणी धन्या महासिद्धिप्रदायिनी । भूतप्रेत पिशाचा च राकिनी लाकिनी तथा ॥
भूत-प्रेत पिशाचानां वलदा यक्षिणी शिवा । धृतिः कीर्तिः स्मृतिर्मेधा पुष्टिस्तुष्टिरुमा उषा ॥
शाङ्करी शाम्भवी मेना रतिः प्रीतिः सुलोचना । अनंग- मदना देवी अनंगमदनाऽऽतुरा ॥
भुवनेशी महामाया तथा भुवनपालिनी । ईश्वरी ईश्वरप्रीता चन्द्रशेखर -भूषिता ॥
चित्तानन्दकरी नन्दा चित्तसंस्था जनस्य च । अरूपा बहुरूपा च सर्वरूपा चिदात्मिका ॥
आनन्दरूपिणी नित्या तथाऽऽनन्द प्रदायिनी । नन्दा चानन्दरूपा च तथाऽऽनन्दप्रकाशिनी ॥
सदानन्दा सदानित्या साधकानन्ददायिनी । त्वरिता तरुणा भव्या भाविका च विभाविनी ॥
चन्द्रसूर्य - समादीप्ता चन्द्रसूर्यस्य - पालिका । नारसिंही हयग्रीवा हिरण्याक्ष - विनाशिनी ॥
वैष्णवी विष्णुभक्ता च शालग्राम - निवासिनी । चतुर्भुजा चाष्टभुजा सहस्त्रभुज - संज्ञिता ॥
आद्या कात्यायनी नित्या सर्वाद्या सर्वदायिका । सर्वमन्त्रमयी देवी सर्ववेदमयी शुभा ॥
सर्वदेवमयी देवी सर्वलोकमयी परा । सर्वसम्मोहिनी देवी सर्वलोकवशङ्करी ॥
रंजनी रंजिता रागा देहलावण्य रंजिता । नटी नटप्रिया धूर्ता तथा धूर्त्तजनप्रिया ॥
महामाया महामोहा महासत्त्व विमोहिता । बलिप्रिया मांसरुचिर्मधु -मांसप्रिया सदा ॥
मधुमत्ता माधविका मधुमाधव - रूपिका । दिवामयी रात्रिमयी सन्ध्या सन्ध्या - स्वरूपिणी ॥
कामरूपा सूक्ष्मरूपा सूक्ष्मिणी चातिसूक्ष्मिणी । तिथिरूपा वाररूपा तथा नक्षत्ररूपिणी ॥
सर्वभूतमयी देवी पञ्चभूत - निवासिनी । शून्याकारा शून्यरूपा शून्यसंस्था च स्तम्भिनी ॥
ग्रहाणां स्थितिरूपा च रुद्रादीनां च सम्भवा । आकाश - गामिनी देवी ज्योतिश्चक्रनिवासिनी ॥
ऋषीणां ब्रह्मपुत्राणां तपःसिद्धि प्रदायिनी । अरुन्धती च गायत्री सावित्री सत्त्वरूपिणी ॥
चितासंस्था चितारूपा चित्तसिद्धि प्रदायिनी । शवस्था शवरूपा च शवसङ्गकुतूहला ॥
योगिनी योगरूपा च योगिनां मलहारिणी । सुप्रसन्ना महादेवी यामिनी मुक्तिदायिनी ॥
निर्मला विमला शुद्धा शुद्धसत्त्वा जयप्रदा । महामाया विष्णुमाया मोहिनी विश्वमोहिनी ॥
कार्यसिद्धिकरी देवी सर्वकार्य - निवासिनी । कार्याकार्यकरी रौद्री महाप्रलय - कारिणी ॥
स्त्री पुं भेदाह्यभेद्या च भेदिनी भेदनाशिनी । सर्वरूपा सर्वमयी अद्वैतानन्दरूपिणी ॥
प्रचण्डा चण्डिका चण्डा चण्डासुर - विनाशिनी । सुप्रशस्ता समस्ता च छिन्नमस्ता सुनासिका ॥
अरूपा च विरूपा च सुरूपा रूपवर्जिता । चित्ररूपा महारूपा विचित्रा च चिदात्मिका ॥
बहुशस्त्रा अशस्त्रा च सर्वशास्त्र - प्रदाहिणी । शास्त्रार्था शास्त्रवादा च नानाशात्रार्थवादिनी ॥

काव्यशास्त्रप्रमोदा च काव्यालङ्कार- वासिनी । रसज्ञा रसना जिह्वा रसामोदा रसप्रिया ॥
नानाकौतुक संयुक्ता नानारसविलासिनी । अव्यक्ता व्यक्तरूपा च विश्वरूपा सुरूपिणी ॥
रूपावस्या तथा जीवा वेशाढ्या वेशधारिणी । नानावेशधरा देवी नाना वेशेषु संस्थिता ॥
कुरूपा कुत्सिता कृष्णा कृष्णरूपा च कालिका । लक्ष्मीप्रदा महालक्ष्मीः सर्वलक्षण संयुता ॥
कुबेरगृह - संस्थाना धनरूपा धनप्रदा । नानारत्नप्रदा देवी रत्नपुष्पेषु संस्थिता ॥
वर्णसंस्था वर्णरूपा सर्ववर्णमयी तथा । ॐकाररूपिणी आद्या आदित्यज्योति- रूपिणी ॥
संसारमोचिनी देवी संग्रामे जयदायिनी । जयस्वरूपा जयाख्या जयिनी जयकारिणी ॥
मानिनी मानरूपा च मानभङ्ग - प्रणाशिनी । मान्या मानप्रिया मेधा मानिनी मानदायिनी ॥
साधका साधिका साध्या साधना साधनप्रिया । स्थावरा जङ्गमा सूक्ष्मा चपला चपलप्रिया ॥
ऋद्धिदा ऋद्धिरूपा च सिद्धिदा सिद्धिरूपिणी । क्षेमङ्करी शङ्करी च सर्वसम्मोह कारिणी ॥
वाञ्छिता वाञ्छनीया च सर्ववाञ्छा प्रदायिनी । भग - लिङ्ग प्रमोदा च भग-लिङ्गनिवासिनी ॥
भगरूपा भगाभोग्या लिङ्गरूपा च लिङ्गिनी । भगगीतिर्महाप्रीति लिङ्गगीति -र्महासुखा ॥
स्वयम्भू - कुसुमाराध्या स्वयम्भू - कुसुमाकुला । स्वयम्भूपुष्परूपा च स्वयम्भूकुसुमप्रिया ॥
शुक्ररूपा महाशुक्ला शुक्रबिन्दुनिवासिनी । शुक्रस्था शुक्रिणी शुक्रा शुक्र पूजक पूजिता ॥
कामाक्षा कामरूपा च योगिनीपीठवासिनी । सर्वपीठमयी देवी पीठमध्यनिवासिनी ।
अक्षमालाधरा देवी पानपात्रविधायिनी । शूलहस्ता चक्रहस्ता पाशिनी पाशरूपिणी ।
खड्गिनी गदिनी चैव तथा सर्वास्त्रधारिणी । भाव्या भव्या भवानी सा भवभुक्ति प्रदायिनी ।
चतुरा चतुरप्रीता चतुराननपूजिता । देवस्तव्या देवपूज्या सर्वपूज्या सुरेश्वरी ।
जननी जनपुण्या च जनमानसचारिणी । जटिनी केशबद्धा च सुकेशी केशवासिका ।
अहिंसा द्वेषिका द्वेश्या सर्वद्वेषविनाशिनी । उच्चाटिनी स्तम्भिनी च मोहिनी मधुरेक्षणा ॥
क्रीडा क्रीडनखेला च खेलाकरणकारिका । सर्वज्ञा सर्वकार्या च सर्वभक्षा सुरारिहा ॥
सर्वरूपा सर्वशान्ता सर्वेषां प्राणरूपिणी । सृष्टिस्थितिकरी देवी तथा प्रलयकारिणी ।
मुग्धा साध्वी तथा रौद्री नानामूर्ति - विधारिणी । सर्वतत्वात्मिका गौरी नानामूर्तिविहारिणी ॥
उक्तानि यानि देवेशि! अनुक्तानि महेश्वरि । यत् किञ्चिद् दृश्यते देवि! तत् सर्वं भुवनेश्वरी ॥
इति श्रीभुवनेश्वर्या नामानि कथितानि ते । सहस्राणि महादेवि! फलमेषां निगद्यते ।

॥ फलश्रुति ॥

यः पठेत् प्रातरुत्थाय अर्द्धरात्रौ तथा परे । प्रातःकाले तथा मध्ये सायाह्ने हरवल्लभे !
यत्र-तत्र पठित्वा च भक्त्या एकाग्र - मानसः । यथाकाले यथास्थाने तस्य सिद्धिर्न संशयः ।
यः पठेत् पाठयेद्वापि शृणुयाच्छ्रावयेत् तथा । तस्य सर्वंभवेत् सत्यं मनसा यच्च वाञ्छितम् ॥

अष्टम्यां च चतुर्दश्यां नवम्यां च विशेषतः। कुहू-मङ्गल-संयुक्ते संक्रान्त्या शनिभौमयोः॥ य पठेत् पाठयेद् भक्त्या देव्या नाम सहस्त्रकं। तस्यसर्वं भवेद् देहे सफलं भुवनेश्वरी॥ श्मशाने प्रान्तरे वापि शून्यागारे च पार्वति! चतुष्पथे चैकलिङ्गे मेरुदेशे तथैव च। जलमध्ये वह्निमध्ये संग्रामे ग्रामशान्तये। रणमध्ये च संग्रामे तथा प्राणस्य संशये। जत्वा मंत्र सहस्त्रं तु पठेन्नाम सहस्त्रकं। तस्य तुष्टा भवेद् देवी सर्वदा भुवनेश्वरी॥८॥

॥ इति श्री भुवनेश्वरी सहस्त्रनाम स्तोत्रं समाप्तम्॥

॥ अथ अन्नपूर्णा मंत्रः॥

(अन्नपूर्णा की आवरण पूजा प्रयोग ग्रंथ के दुसरे भाग में अवलोकन करें इस ग्रंथ में अन्नपूर्णा भैरवी नाम से यंत्रार्चन है।)

अन्नपूर्णा मंत्र- ॐ ह्रीं श्रीं क्लीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा।

विनियोगः- **ॐ अस्यान्नपूर्णा मंत्रस्य द्रुहिण (ब्रह्मा) ऋषिः। कृतिच्छन्दः। अन्नपूर्णेशी देवता। ममाखिल सिद्ध्यर्थे जपे विनियोगः।**

ऋष्यादिन्यासः- **ॐ द्रुहिण ऋषये नमः शिरसि। कृतिच्छन्दसे नमः मुखे। अन्नपूर्णा देवतायै नमः हृदि। विनियोगाय नमः सर्वाङ्गे।**

षडङ्गन्यासः- **ह्रां, ह्रीं, ह्रूं, ह्रैं, ह्रौं, ह्रः इत्यादि से करन्यास एवं हृदयादि न्यास करें।**

॥ ध्यानम्॥

तप्तस्वर्णनिभा शशाङ्कमुकुटा रत्नप्रभासुरा, नानावस्त्र विराजिता त्रिनयना भूमिरमाभ्यां युता। दर्वीं हाटक भजानं च दधती रम्योच्चपीन-स्तनी, नित्यं तं शिवमाकलय मुदिता ध्यायेन्नपूर्णेश्वरी॥

॥ अन्य मंत्राः॥

(१) ॐ ह्रीं नमो भगवति माहेश्वर्येन्नपूर्णे स्वाहा।

(२) ॐ ह्रीं श्रीं क्लीं नमो भगवति माहेश्वरि ममाभिमतमन्नं देहि देहि अन्नपूर्णे स्वाहा।

(३) ॐ श्रीं ह्रीं नमो भगवति प्रसन्न पारिजातेश्वर्यन्नपूर्णे स्वाहा।

(४) ॐ श्रीं ह्रीं नमो भगवति माहेश्वरि प्रसन्न वरदेऽन्नपूर्णे स्वाहा।

चार लाख जप कर पायसान्न, मिष्ठान्नादि से उदुम्बर समिध से बिल्व होम करे तो अन्न-धन की वृद्धि होवें।

॥ अन्नपूर्णा कवचम् ॥

॥ देव्युवाच ॥

भवता त्वन्नपूर्णाया या या विद्याः सुदुर्ल्लभाः ।
कृपया कथिताः सर्वाः श्रुताश्चाधिगता मया ॥१॥
सांप्रतं श्रोतुमिच्छामि कवचं मंत्र विग्रहम् ।

॥ ईश्वर उवाच ॥

शृणु पार्वति! वक्ष्यामि सावधानावधारय ॥२॥
ब्रह्मविद्यास्वरूपं च महदैश्वर्यदायकम् ।
पठनाद्धारणान्मर्त्यस्त्रैलोक्यैश्वर्य भाग्भवेत् ॥३॥

विनियोगः– ॐ अस्यश्रीत्रैलोक्यरक्षणस्यास्य कवचस्यऋषिः शिवः। छन्दो विराट् देवता स्यादन्नपूर्णा समृद्धिदा ॥४॥ धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः।

ह्रीं नमो भगवत्यन्ते माहेश्वरिपदं ततः ॥५॥
अन्नपूर्णे ततः स्वाहा चैषा सप्तदशाक्षरी। पातु मामन्नपूर्णा सा या ख्याता भुवनत्रये ॥६॥
विमायाप्रणवाद्यैषा तथा सप्तदशाक्षरी। यात्वन्नपूर्णा सर्वाङ्गे रत्नकुम्भान्नपात्रदा ॥७॥
श्रीबीजाद्या तथैवैषा द्विरन्ध्रार्णा तथा मुखम् । प्रणवाद्या भ्रुवौ पातु कण्ठं वाग्बीजपूर्विका ॥८॥
कामबीजादिका चैषा हृदयं तु महेश्वरी। ऐं श्रीं ह्रीं च नमोऽन्ते च भगवतीपदं ततः ॥९॥
माहेश्वरी पदं चान्नपूर्णे स्वाहेति पातु मे। नाभिमेकार्ण विंशर्णा पायान्माहेश्वरी सदा ॥१०॥
तारं माया रमा कामः षोडशार्णा ततः परम् । शिरःस्था सर्वदा पातु विंशत्यर्णात्मिका परा ॥११॥
अन्नपूर्णा महाविद्या ह्रीं पातु भुवनेश्वरी। शिरः श्रीं ह्रीं तथा क्लीं च त्रिपुटा पातु मे गुदम् ॥१२॥
षट्दीर्घभाजा बीजेन षडङ्गानि पुनन्तु माम् । इन्द्रो मां पातु पूर्वे च वह्निकोणेऽनलोऽवतु ॥१३॥
यमो मां दक्षिणे पातु नैर्ऋत्यां निर्ऋतिश्च माम् । पश्चिमे वरुणः पातु वायव्यां पवनोऽवतु ॥१४॥
कुबेरश्चोत्तरे पातु चैशान्यां शंकरोऽवतु। ऊर्ध्वाधः पातु सततं ब्रह्मानन्तो यथाक्रमात् ॥१५॥
पान्तु वज्राद्यायुधानि दशदिक्षु यथाक्रमात् । इति ते कथितं पुण्यं त्रैलोक्यरक्षणं परम् ॥१६॥
यद्धृत्वा पठनाद्देवाः सर्वैश्वर्यमवाप्नुयुः। ब्रह्मा विष्णुश्च रुद्रश्च धारणात्पठनाद्यतः ॥१७॥
सृजत्यवति हन्त्येव कल्पेकल्पे पृथक् पृथक् । पुष्पाञ्जल्यष्टकं देव्यै मूलेनैव समर्पयेत् ॥१८॥
कवचस्यास्य पठनात्पूजायाः फलमाप्नुयात् । वाणी वक्त्रे वसेत्तस्य सत्यं सत्यं न संशयः ॥१९॥
अष्टोत्तरशतं चास्य पुरश्चर्याविधिः स्मृतः। भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि ॥२०॥
कण्ठे वा दक्षिणे बाहौ सोपि पुण्यवतां वरः। ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रं प्राप्य पार्वति ।
माल्यानि कुसुमान्येव सुखदानि भवन्ति हि ॥२१॥

॥ इति श्रीभैरवतन्त्रेऽन्नपूर्णा कवचं समाप्तम् ॥

॥ अन्नपूर्णास्तोत्र ॥

ॐ नमः कल्याणदे देवि नमः शङ्करवल्लभे । नमो मुक्तिप्रदे देवि ह्यन्नपूर्णे नमोऽस्तु ते ॥१॥
नमो मायागृहीताङ्गि नमः शङ्करवल्लभे । माहेश्वरि नमस्तुभ्यमन्नपूर्णे नमोऽस्तु ते ॥२॥
अन्नपूर्णे हव्यवाहपत्नीरूपे हरप्रिये । कलाकाष्ठास्वरूपे च ह्यन्नपूर्णे नमोऽस्तु ते ॥३॥
उद्यद्भानु सहस्राभे नयनत्रयभूषिते । चन्द्रचूडे महादेवि ह्यन्नपूर्णे नमोऽस्तु ते ॥४॥
विचित्रवसने देवि त्वन्नदानरतेऽनघे । शिवनृत्यकृतामोदे ह्यन्नपूर्णे नमोऽस्तु ते ॥५॥
षट्कोण पद्ममध्यस्थे षडङ्गयुवतीमये । ब्रह्माण्यादिस्वरूपे च ह्यन्नपूर्णे नमोऽस्तु ते ॥६॥
देवि चन्द्रकलापीठे सर्वसाम्राज्यदायिनि । सर्वानन्दकरे देवि ह्यन्नपूर्णे नमोऽस्तु ते ॥७॥
साधकाभीष्टदे देवि भवदुःख विनाशिनि । कुचभारनत देवि ह्यन्नपूर्णे नमोऽस्तु ते ॥८॥
इन्द्राद्यर्चित पादाब्जे रुद्रादिरूपधारिणि । सर्वसम्पत्प्रदे देवि ह्यन्नपूर्णे नमोऽस्तु ते ॥९॥
पूजाकाले पठेद्यस्तु स्तोत्रमेतत्समाहितः । तस्य गेहे स्थिरा लक्ष्मीर्जायते नात्र संशयः ॥१०॥
प्रातःकाले पठेद्यस्तु मन्त्रजापपुरः सरम् । तस्यैवात्र समृद्धिः स्याद्वर्द्धमाना दिनेदिने ॥११॥
यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन । प्रकाशात्सिद्धि हानिस्तद्गोपायेद्यत्नतः सुधीः ॥१२॥

॥ इति श्रीभैरवतन्त्रेऽन्नपूर्णा स्तोत्रं सम्पूर्णम् ॥

॥ इति श्री भुवनेश्वरी तंत्रं सम्पूर्णम् ॥

॥ भैरवी तंत्रम् ॥

दशमहाविद्याओं में आपका पांचवाँ स्थान हैं। त्रयीसिद्ध विद्या में पहला स्थान हैं। यह भगवती त्रिपुर सुंदरी का ही रौद्ररूप हैं। सृष्टि स्थिति संहार की अधिष्ठात्री हैं। भैरवी के अनेक मंत्र कार्यभेद से प्रचलित हैं आप शीघ्र सिद्धिप्रदा हैं। भगवती के अनेक स्वरूपों के प्रयोग प्रचलित हैं।

॥ अथ त्रिपुर भैरवी मंत्र प्रयोग: ॥

त्रिपुरा के तीन प्रकार हैं। **१. बाला २. भैरवी ३. सुन्दरी।** शारदा तिलक में इसके तीन कूटों का उद्धार लिखा हैं। हकार, सकार एवं रकार अर्धाक्षर तथा ऐंकार के योग से प्रथम वाग्भव कूट मंत्र **''हस्रैं''** हुआ। हकार, सकार, ककार, लकार, रकार अर्द्धाक्षर में ईकार का योगकर बिन्दु लगाने से द्वितीय कामराजकूट **''हस्क्लीं''** बनता हैं। हकार, सकार और रकार अर्द्ध में औं कार का योग कर विसर्ग लगाने से तृतीय शक्तिकूट **''हस्रौंः''** बनता हैं।

त्र्यक्षरी मंत्र :- हस्रैं हस्क्लीं हस्रौंः यह त्रिकूटा मंत्र हैं। पांच व्यञ्जनों से रचित होने के कारण त्रिपुर भैरवी का यह मंत्र पञ्चकूटा भी कहा जाता हैं।

विनियोगः- **अस्य मंत्रस्य दक्षिणामूर्ति ऋषिः, पंक्तिश्छंदः, त्रिपुरभैरवी देवता, ऐं बीजम्, सौः (तार्तीय) शक्तिः, क्लीं कीलकं सर्वार्थ सिद्धयर्थे जपे विनियोगः।**

ऋष्यादिन्यास - क्रमशः शिर, मुख, हृदय, गुह्य, पाद एवं सर्वाङ्ग में करें। इसके बाद नाभि से पैर तक **''हस्रैं नमः''** हृदय से नाभि तक **''हस्क्ल्रीं नमः''** से और मस्तक से हृदय तक **''हस्रौंः नमः''** से न्यास करें। **हस्रैं नमः दक्ष हस्ते, हस्क्लीं नमः वाम हस्ते, हस्रौं नमः करयोः, हस्रैं नमः शिरसि, हस्क्ल्रीं नमः मूलाधारे, हस्रौं नमः हृदये** से न्यास करें।

नवयोनि न्यासः- **हस्रैं नमः दक्ष कर्णे। हस्क्लीं नमः वामकर्णे। हस्रौंः नमः चिबुके। हस्रैं नमः दक्षगण्डे। हस्क्लीं नमः वामगण्डे। हस्रौंः नमः मुखे। हस्रैं नमः दक्षनेत्रे। हस्क्ल्रीं नमः वाम नेत्रे। हस्रौं नमः नासिकायां। हस्रै नमः दक्ष स्कंधे। हस्क्ल्रीं नमः वाम स्कंधै। हस्रौंः नमः उदरे। हस्रैं नमः दक्षकर्पूरे। हस्क्लीं नमः वाम कर्पूरे। हस्रौंः नमः जठरे। हस्रैं नमः दक्षजानै। हस्क्लीं नमः वाम जानौ। हस्रौंः नमः लिङ्गे। हस्रैं नमः दक्षपादे। हस्क्लीं नमः वाम पादे। हस्रौंः नमः गुह्ये।। हस्रैं नमः दक्षपार्श्वे। हस्क्लीं नमः वाम पार्श्वे। हस्रौंः नमः हृदये। हस्रैं नमः दक्षस्तने। हस्क्लीं नमः वाम स्तने। हस्रौंः नमः कण्ठे।** त्रिपुरसुंदरी विधान की तरह रत्यादि न्यास करें।

रत्यादि न्यासः- **मूलाधारे ऐं रत्यै नमः। हृदि क्लीं प्रीत्यै नमः। भ्रूमध्ये सौः मनोभवाय नमः। भ्रूमध्ये सौः अमृतेश्यै नमः। हृदि क्लीं योगेश्यै नमः। मूलाधारे ऐ विश्वयोन्यै नमः।**

मूर्तिन्यासः- **मूर्ध्नि स्ह्रों ईशान मनोभवाय नमः। वक्त्रे स्ह्रें तत्पुरुष मकरध्वजाय नमः। हृदि स्ह्रूं अधोरकुमार कन्दर्पाय नमः। गुह्ये स्ह्रिं वामदेवाय मन्मथाय नमः। पादयोः स्ह्रं सद्योजात कामदेवाय नमः।**

वाणन्यासः- **द्रां दाविण्यै नमः अंगुष्ठयोः। द्रीं क्षोभण्यै नमः तर्जन्योः। क्लीं वशीकरण्यै नमः मध्यमयोः। ब्लूं आकर्षण्यै नमः अनामिकयोः। सः सम्मोहन्यै नमः कनिष्ठयोः।** (ज्ञानार्णव में पंचवाणो को स्त्री संज्ञा से संबोधन करने को कहा हैं।)

कामन्यासः- **ह्रीं कामाय नमः अंगुष्ठयोः। क्लीं मन्मथाय नमः तर्जन्योः। ऐं कंदर्पाय नमः मध्यमयोः। ब्लूं मकरध्वजाय नमः अनामिकयोः। स्त्रीं मीनकेतवेनमः कनिष्ठयोः। तदन्तर द्रां द्रावण्यै नमः** इत्यादि पंचवाणों से मस्तक, पद, मुख, गुह्य, हृदय में क्रमशः न्यास करे। पुनः कराङ्गन्यास करे। यथा- **हस्त्रां अंगुष्ठाभ्यां नमः, हस्त्रीं तर्जनीभ्यां स्वाहा। हस्त्रूं मध्यमाभ्यां वषट्। हस्त्रें अनामिकाभ्यां हुं। हस्त्रौं कनिष्ठाभ्यां वौषट्। हस्त्रः करतल करपृष्ठाभ्यां फट्। इसी तरह से "हृदयादि न्यास" करे।**

सुभगादि न्यासः- **भाले ऐं क्लीं ब्लूं स्त्रीं सः सुभगायै नमः। भ्रूमध्ये ऐं क्लीं ब्लूं स्त्रीं सः भगायै नमः। वदने ऐं क्लीं ब्लूं स्त्रीं सः भगसर्पिण्यै नमः। कण्ठिकायां ऐं क्लीं ब्लूं स्त्रीं सः भगमालिन्यै नमः। कण्ठे ऐं क्लीं ब्लूं स्त्रीं सः अनङ्गायै नमः हृदि। ऐं क्लीं ब्लूं स्त्रीं सः अनङ्गकुसुमायै नमः नाभौ। ऐं क्लीं ब्लूं स्त्रीं सः मेखलायै नमः लिङ्ग- मूले। ऐं क्लीं ब्लूं स्त्रीं सः अनङ्गमदनायै नमः।**

भूषणन्यासः- सब वर्णों के बाद "**नमः**" लगाकर न्यास करे। **अं नमः शिरसि। आं भाले। इं ईं भ्रुवोः। उं ऊं कर्णयोः। ऋं ॠं नेत्रयोः। लृं नसि। ॡं एं गण्डयोः ऐं ओं ओष्ठयोः। औं अधोदन्ते। अः उर्ध्वदन्तपंक्ते। कं चिबुके। खं गले। गं कण्ठे। घं ङं पार्श्वयोः। चं छं स्तनयो। जं झं बाहुमूलयोः। ञं टं कर्पूरयोः। ठं डं पाण्यो। ढं णं करपृष्ठयोः। तं नाभौ। थं गुह्ये। दं धं ऊर्वोः। नं पं जानुनोः। फं बं जङ्घयोः। भं मं स्फिचोः। यं चरणतलयोः। रं चरणांगुष्ठयोः। वं काञ्च्यां लं ग्रीवायां। ळं कटके। शं हृदये। क्षं गुह्ये। षं कर्णयोः। सं गण्डयोः। हं मौलौ।** उसके बाद त्रिखण्डा मुद्रा दिखाकर ध्यान करे।

॥ ध्यानम् ॥

उद्यद्भानु सहस्त्रकांतिमरुण- क्षौमां शिरोमालिकाम्, रक्तालिप्त- पयोधरां जपवटीं विद्यामभीतिं वरम्।
हस्ताब्जैर्दधतीं त्रिनेत्र विलसद् वक्त्रार्विन्द श्रियम्। देवीं बद्धहिमांशु रत्नमुकटां वन्देऽरविन्द स्थिताम्॥

पीठपूजा- "**ॐ आधार शक्तये नमः**" से आधार शक्ति की पूजा करे। **ॐ मण्डूकादि पीठदेवताभ्यो नमः** से पीठ देवता पश्चात् पीठ शक्तियों की पूजा करें। **ॐ इच्छायै नमः। ज्ञानायै, क्रियायै, कामिन्यै, कामदायिन्यै, रत्यै रतिप्रियायै, नन्दायै, नन्दिन्यै, मध्ये मनोन्मन्यै नमः। ऐं परायै नमः। ऐं अपरायै नमः। ऐं परापरायै नमः। हसौः सदाशिव- महाप्रेत-पद्मासनाय नमः** से आसन शक्ति की पूजा करे।

॥ अथ आवरण पूजनम् ॥

शारदातिलक के अनुसार दुर्गायंत्र की तरह नवयोनि (नव त्रिकोण) मय कर्णिका के ऊपर अष्टदल बनाये। उसके बाहर चारद्वार युक्त भूपूर बनायें। अन्य ग्रन्थों में एक पर एक नव त्रिकोण बनाते हुये उन पर अष्टदल, भूपुर युक्त यंत्र है।

॥ श्री त्रिपुर भैरवी यन्त्रम् ॥

॥ मन्त्रमहार्णवोक्त नवयोन्यात्मकत्रिपुरभैरवी यन्त्रम् ॥

प्रथमावरणम्:- मध्य बिन्दु में **''ऐं ह्रीं श्रीं हस्ख्फ्रें हसौः''** से देवी की मूर्ति की कल्पना करे। देवी का आवाहन करे- **ॐ देवेशि भक्ति सुलभे परिवार समन्विते। यावत् त्वां पूजयिमामि तावत् त्वं सुस्थिरा भव॥** अपने चार गुरु का अमुकानंदनाथ नाम सहित पूजन करे। **ॐ गुरुभ्यो नमः। ॐ परमगुरुभ्यो नमः। ॐ परात्पर गुरुभ्यो नमः। ॐ परमेष्ठी गुरुभ्यो नमः।** मध्य त्रिकोण में- **ऐं रत्यै नमः, क्लीं प्रीत्यै नमः, सौः मनोभवायै नमः** से पूजन करे।

द्वितीयवरणम्:- (मध्ये) षट्दिक्षु चारों कोणों में- **ह्सां हृदयाय नमः। ह्सीं शिरसे स्वाहा। ह्सूं शिखायै वषट्। ह्सें कवचाय हुं।** अग्रे - **ह्सौं नेत्रत्रयाय वौषट्। ह्सः अस्त्राय फट् दिक्षु।**

तृतीयावरणम्:- (मध्ये) देवी के उत्तर में- **''द्रां द्राविण्यै नमः, द्रीं क्षोभिण्यै नमः।** दक्षिण में- **क्लीं वशीकरण्यै नमः ब्लूं आकर्षण्यै नमः।** अग्रभाग में- **सः संमोहिन्यै नमः।** से पंचबाणों की पूजा करे। पुनः उत्तर में **ह्रीं कामाय नमः, क्लीं मन्मथाय नमः।** दक्षिण में- **ऐं कन्दर्पाय नमः, ब्लूं मकरध्वाज नमः।** अग्रभाग में- **स्त्रीं मीनकेतवे नमः।** पंचकामों की पूजा करे।''

चतुर्थावरणम्:- अष्टयोनियों में (अष्ट त्रिभुजों में) सभी नाम मंत्रों के प्रारंभ में **''ऐं क्लीं ब्लूं स्त्रीं सः''** एवं अंत में ''नमः'' लगाकर पूजा करे। यथा- **ऐ क्लीं ब्लूं स्त्रीं सः सुभगायै नमः। भगायै। भगसर्पिण्यै। भगमालिन्यै। अनङ्गायै। अनङ्ग- कुसुमायै नमः। अनङ्ग- मेखलायै। अनङ्गमदनायै नमः।**

पंचमावरणम्- अष्टदलों में अष्ट भैरव एवं अष्टमातृकाओं का पूजन करे। **ॐ असिताङ्ग- भैरव ब्राह्मीभ्यां नमः। ॐ रुरुभैरवमाहेश्वरीभ्यां नमः। ॐ चण्ड- भैरव कौमारीभ्यां नमः। ॐ क्रोधभैरव वैष्णवीभ्यां नमः। ॐ उन्मत्त- भैरव वाराहीभ्यां नमः। ॐ कपालीभैरव इन्द्राणीभ्यां नमः। ॐ भीषणभैरव चामुण्डाभ्यां नमः। ॐ संहारभैरव महालक्ष्मीभ्यां नमः।**

षष्ठमावरणम्- भूपूर में इन्द्रादि दिक्पालों एवं उनके आयुधों का पूजन करे। नैवेद्य के बाद गणेश, भैरव, योगिनी क्षेत्रपाल को बलि देवे। दस लाख जपकर पलाश पुष्पों द्वारा बारह सहस्त्र होम करे।

॥ अथ सम्पत्प्रदा भैरवी मंत्र ॥

संपत्प्रदा भैरवी की पूजा त्रिपुर भैरवी के समान ही हैं। मंत्र में मूल अंतर तीसरे कूट में सकार के आगे विसर्ग नहीं हैं।

मंत्रः- **हस्त्रैं हस्क्ल्रीं (हस्क्ल्रीं) हस्त्रौं**। हिन्दी तंत्रसार में **ह** अक्षर पूर्ण हैं मंत्रकोष में हकार अर्द्धाक्षर हैं।

आताम्रार्क सहस्राभां स्फुरच्चन्द्रकला जटाम्। किरीटरत्नविलसच्चित्र विचित्र मौक्तिकाम्। स्रवद रुधिर पङ्काढ्य मुण्डमाला विराजिताम्। नयनत्रयशोभाढ्यां पूर्णेन्दु-वदनान्विताम् ॥ मुक्ताहारलता राजत् पीनोन्नत-घटस्तनीम्। रक्ताम्बर परीधानां योवन्मत्त रूपिणीम्। पुस्तकं चाऽभयं वामे दक्षिणे चाक्षमालिकाम्। वरदानप्रदा नित्यां महासंपत् प्रदां स्मरेत् ॥

कराङ्गन्यासः- **हस्त्रैं अगुष्ठाभ्यां नमः। हस्कल्ह्रीं तर्जनीभ्यां स्वाहा। हस्त्रौं मध्यमाभ्यां वषट्। हस्त्रैं अनामिकाभ्यां हुं। हस्क्लरीं कनिष्ठाभ्यां वौषट्। हस्त्रौं करतल करपृष्ठाभ्यां फट्**। मंत्रसिद्धि के लिये एक लाख जप करे। कुमारी पूजा पद्धति के अनुसार भगवती के न्यास करे। ऐसा अन्य तंत्रों में लिखा हैं। **(पाठान्तर- हस्क्ल्रीं तर्जनी.। स्क्लरीं कनितिष्ठ.।)**

॥ कौलेश भैरवी ॥

मंत्र - **स्हैं स्हक्लीं (स्ह्क्ल्रीं) स्हौं** ध्यान संपत्प्रदा भैरवी के समान। ऋष्यादि भी **त्रिपुरा** के समान हैं। तंत्रसार में द्वितीय कूट में **ह** पूर्णाक्षर हैं। मंत्र कोष में **ह** अर्द्धाक्षर हैं।

॥ सकलसिद्धिदा भैरवी ॥

मंत्र - **''स्हैं स्हक्लीं स्हौं''** कौलव भैरवी एवं इस मंत्र में रकार का अभाव हैं। इसका ध्यान संपत्प्रदा भैरवी के समान ही हैं। मंत्रकोष में मध्यकूट में **''ह''** अर्द्ध है। तथा रेफ हीन के लिये लिखा है एतस्या एव विद्याया आद्यन्ते रेफ वर्जिते।

॥ भय विध्वंसिनी भैरवी ॥

मंत्र - **(१) हस्त्रैं हस्त्रीं हसौं** इसका ध्यान भी संपत्प्रदा भैरवी के समान हैं।
(२) हसैं हस्क्ल्रीं हसौं (मंत्रकोषे)।

॥ चैतन्य भैरवी ॥

मंत्रः- **१. स्हैं स्क्ल्हीं स्हौं** इसको त्रैलोक्यमातृका चैतन्य भैरवी विद्या भी कहते हैं।

२. स्हैं स्क्ल्हीं स्हौंः तृतीय कूट का मंत्रोद्धार यथा - चन्द्रशेखर वह्नि बीजं चतुर्दश स्वर युक्तं विसर्गाढ्यं (मंत्रकोष)

॥ आवरण पूजा ॥

मण्डूकादि पीठदेवताभ्यो नमः से पीठ पूजा तथा वामादि पीठ शक्तियों का पूजन करे। **ॐ वामायै नमः, ज्येष्ठायै नमः, रौद्रै नमः, अंबिकायै नमः, इच्छायै नमः। ज्ञानायै नमः, क्रियायै नमः, कुब्जिकायै नमः, चित्रायै नमः, विषघ्निकायै नमः, भ्रामयैं (भूचयैं) नमः मध्ये- आनन्दायै नमः**। पश्चात् मध्ये में- **''हसौः सदाशिव महाप्रेत पद्मासनाय नमः''** से पीठ पूजा करे। ज्ञानार्णव ग्रंथ के अनुसार संपत्प्रदा, बाला, कौलेशी, सकलसिद्धिदा विद्याओं की उपरोक्त पीठशक्तियाँ ही हैं।

विनियोगः- **अस्य मंत्रस्य दक्षिणामूर्तिः ऋषिः, पंक्तिश्छंद, चैतन्य भैरवी देवता इष्टार्थे जपे विनियोगः।**

करांगन्यासः- **स्हैं अंगुष्ठाभ्यां नमः। स्क्ल्ह्रीं तर्जनीभ्यां स्वाहा। स्ह्रौः मध्यमाभ्यां वषट्। स्हैं अनामिकाभ्यां हुं। स्क्स्ह्रीं कनिष्ठाभ्यां वौषट्। स्हरौः करतलकर पृष्ठाभ्यां फट्।** इसी तरह षडङ्गन्यास करे(पाठान्तर- **स्क्ल्ह्रीं कनिष्ठि.**)।

॥ ध्यानम् ॥

उद्यद्भानु सहस्राभां नानालङ्कार भूषिताम्, मुकुटाग्र लसच्चन्द्ररेखां रक्ताम्बरान्विताम्। पाशांकुशधरां नित्यां वामहस्ते कपालिनीम्, वरदाभय शोभाढ्यां पीनोन्नत- घनस्तनीम् ॥

॥ अथ आवरण पूजा प्रयोगः॥ (ज्ञानार्णवे)

पहले त्रिकोण पश्चात् षट्कोण, अष्टदल उसके बाहर चारद्वार युक्त भूपूर की रचना करे।

प्रथमावरणम् - मध्य बिन्दु में देवी का ध्यान कर गुरु, परमगुरु, परात्पर गुरु, परमेष्ठी गुरु का पूजन करे।

द्वितीयावरणम्-(षट्कोणे) अग्निकोणे - **स्हैं हृदयाय नमः।** ईशाने - **स्क्ल्ह्रीं शिरसे स्वाहा।** नैर्ऋते - **स्ह्रौः शिखायै वषट्।** वायुकोणे - **स्हैं कवचाय हुं।** मध्ये - **स्क्ल्ह्रीं नेत्रत्रयाय वौषट्। चतुर्दिके स्ह्रौः अस्त्राय फट्।** पुनः **रत्यै नमः। प्रीत्यै नमः। मनोभवायै नमः। अमृतेश्यै नमः। योगेश्यै नमः। विश्वयोन्यै नमः।** से षट्कोण में पूजा करे। देवीके अग्रभाग में **ॐ वसन्ताय नमः।** वामे - **ॐ कामदेवाय नमः।** दक्षिणे-**ॐ चापाय नमः।** फिर पञ्च बाणों की पूजा करे- **द्रां द्राविण्यै नमः। द्रीं क्षोभण्यै नमः। क्लीं वशीकरण्यै नमः। ब्लूं आकषण्यै नमः। सः संमोहन्यै नमः।** पुनः षट्कोणे- **ॐ डाकिन्यै नमः। ॐ राकिण्यै नमः। ॐ लाकिन्यै नमः। ॐ काकिन्यै नमः। ॐ साकिन्यै नमः। ॐ हाकिन्यै नमः।**

॥ श्री भैरवी यन्त्रम् ॥

तृतीयावरणम्:- (अष्टदले) सभी शक्तियों के नाम के पहले **ऐं क्लीं ब्लूं स्त्रीं सः एवं पश्चात् नमः** लगाकर पूजा करे। **सुभगायै नमः। भगायै नमः। भगसर्पिण्यै नमः। भगमालिन्यै नमः। अनङ्गायै नमः। अनङ्ग कुसुमायै नमः। अनङ्गमेखलायै नमः। अनङ्गमदनायै नमः।**

चतुर्थावरणम्:- (अष्टदल पत्राग्रे) **ॐ परभृतायै (परभृते) नमः। सारसाय नमः। शुकाय नमः। मेघाह्वयाय (मेघच्छयाय) नमः। मेघाय नमः। अपाङ्गाय नमः। भ्रूविलासाय नमः। हावाय नमः। भावाय नमः।**

पंचमावरणम्:- भूपूर में इन्द्रादि १० दिग्पालों एवं उनके आयुधों का पूजन करे। धूप दीप नैवेद्यादि अर्पण कर जप करे। मंत्र के पुरश्चरण हेतु एक लाख जप करे।

॥ कामेश्वरी भैरवी ॥

''ज्ञानार्णव तंत्र'' में कामेश्वरी भैरवी को पंचसिंहासनों में पूर्वदिशा में स्थित सिंहासन पर विराजमान कहा हैं।

एकादशाक्षर मंत्रः- स्हैं स्क्ल्ह्रीं नित्य-क्लिन्ने मदद्रवे स्ह्रौः। इसका ध्यान पूजन चैतन्य भैरवी के समान हैं। आवरण पूजा में कुछ भेद से त्रिकोण में **''ॐ नित्यायै नमः, ॐ क्लिन्नायै नमः, ॐ मदद्रवायै नमः''** से पूजन कर एक एक कूट से **''षडङ्गपूजा एवं न्यास''** करे।

॥ षट्कूटा भैरवी ॥

मंत्रः- **इ्र्ल्क्स्हैं इ्र्ल्क्स्हीं इ्र्ल्क्स्हौं**। कहीं कहीं तृतीय बीज ''**इ्र्ल्क्स्हौः**'' रूप में ग्रहण किया हैं।

॥ ध्यानम् ॥

बालसूर्यप्रभां देवीं जवाकुसुम - सन्निभाम् । मुण्डमावली - रम्यां बालसूर्यमांशुकाम् ॥ सुवर्णकलशाकार पीनोन्नत-पयोधराम् । पाशांकुशौ पुस्तकं च तथा च जप मालिकाम् ॥

कराङ्गन्यासः- **इ्र्ल्क्स्हैं अंगुष्ठाभ्यां नमः। इ्र्ल्क्स्हीं तर्जनीभ्यां स्वाहा। इ्र्ल्क्स्हौं मध्यमाध्यां वषट्। इ्र्ल्क्स्हैं अनामिकाभ्यां हुं। इ्र्ल्क्स्हीं कनिष्ठाभ्यां वौषट्। इ्र्ल्क्स्हौं करतल करपृष्ठाभ्यां फट्**। इसी तरह हृदयादि न्यास करे।

॥ आवरण पूजा प्रयोगः ॥

पूजा यंत्र हेतु पहले **त्रिकोण, अष्टदल उसके बाहर द्वादशदलकमल, उसके बाहर चारद्वार युक्त चतुरस्त्र बनाये**। यंत्र मध्य में देवी का आवाहन करे।

१. यन्त्र मध्य में देवी का ध्यान कर आवाहन पूजा करे।
२. षट्कोण में पूर्व में जो ''**षडङ्गन्यास**'' मंत्र कहे है उनसे एक एक कोण में हृदयादि न्यास शक्तियों का पूजन करे।
३. त्रिकोण में- **ऐं रत्यै नमः, क्लीं प्रीत्यै नमः, सौः मनोभवायै नमः**।
४. षट्कोण में- **ॐ डाकिन्यै नमः, राकिण्यै, लाकिन्यै, काकिन्यै, साकिन्यै, हाकिन्यै** नमः से पूजा करे।
५. अष्टदल में- **असिताङ्गादि अष्टभैरव एवं ब्राह्मी आदि अष्टमात्तृकाओं** का पूजन पूर्वादि क्रम से करे। यथा- **ॐ असिताङ्ग ब्राह्मीभ्यां नमः। रुरुमाहेश्वरीभ्यां नमः। चण्डकौमारीभ्यां नमः। क्रोधभैरव भैरवीभ्यां नमः। उन्मत्त वाराहीभ्यां नमः। कपालीन्द्राणीभ्यां नमः। भीषण चामुण्डाभ्यां नमः। संहारभैरव महालक्ष्मीभ्यांनमः।**
६. द्वादशदलेः- **ॐ वामायै नमः। ज्येष्ठायै नमः। रौद्र्यै नमः। अंबिकायै नमः। इच्छायै नमः। ज्ञानायैनमः। क्रियायै नमः। कुब्जिकायै नमः। विचित्रायै नमः। विषध्निकायै नमः। भूचर्यै नमः। आनंदायै नमः।**
७. चतुरस्त्र में सायुध ''इन्द्रादि द्वारपालों'' का पूजन करे।

॥ नित्या भैरवी ॥

मंत्रः- **हस्क्ल्डैं हस्क्ल्र्डीं हस्क्ल्डौं**। (मंत्रकोष में ''**ह**'' अर्द्ध है।)

ज्ञानार्णव में **षट्कूटा भैरवी** मंत्र को **विलोम** करके यह मंत्र लिखा हैं। पूजा पद्धति षट्कूटा भैरवी के समान हैं। मेरे अनुमान से इसकी आवरण पूजा षट्कूटा के विलोम क्रम अर्थात् पहले चतुरस्त्र, द्वादशदल अष्टदल, षट्कोण में कर पश्चात् मध्य त्रिकोण में पूजा करे। मध्य बिन्दु में देवी का ध्यान कर पूजा करे।

॥ रुद्रभैरवी ॥

मंत्रो यथा- **हस्ख्फ्रें हस्क्ल्रीं हसौः**।

विनियोगः- **अस्य मंत्रस्य दक्षिणामूर्तिः ऋषिः। पंक्तिश्छंदः। रुद्रभैरवी देवता इष्टार्थे जपे विनियोगः।**

कराङ्गन्यासः- **हस्ख्फ्रें अंगुष्ठाभ्यां नमः। हस्क्ल्रीं तर्जनीभ्यां स्वाहा। हसौः मध्यमाभ्यां वषट्। हस्ख्फ्रें**

अनामिकाभ्यां हुं। हस्क्लीं कनिभ्यां वौषट्। हसौः करतलकरपृष्ठाभ्यां फट्।

उद्यद्भानु सहस्राभां चन्द्रचूडां त्रिलोचनाम्। नानाऽलङ्कार सुभगां सर्ववैरि-निकृन्तनीम्॥ वमद्-रुधिर-मुण्डाली कलितां रक्तवाससीम्। त्रिशूलं डमरुं खड्गं तथा खेटकमेव च। पिनाकं च शरान् देवीं पाशांकुश युगं क्रमात्। पुस्तकं चाक्षमालां च शिवसिंहासन स्थिताम्॥

॥ आवरण पूजा ॥

पहले त्रिकोण उसके बाहर दो वृत्त एवं अष्टदल बनाये उसके बाहर वृत्त तथा चारद्वार युक्त चतुरस्त्र बनाये। शिव की पीठ शक्तियों का आधारपीठ में पूजन करे। **ह्रीं ज्ञानात्मने नमः** से आधार शक्ति की पूजा करे। **वामायै नमः। ज्येष्ठायै नमः। रौद्र्यै नमः। काल्यैनमः। कलविकरण्यै नमः। बलविकरण्यै नमः। बल प्रमथन्यै नमः। सर्वभूतदमन्यै नमः** (इति पूर्वादिक्रमेण)। मध्ये- **ॐ मनोन्मन्यै नमः**। पीठपर मंत्र से भद्रमण्डल पर न्यास करे। यथा- **अघोरे ऐं घोरे ह्रीं सर्वतः सर्व सर्वेभ्यो घोर घोरतरे श्री नमोऽस्तु रुद्ररूपेभ्यः ऐं ह्रीं श्रीं।**

इस प्रकार ध्यान कर चैतन्य भैरवी के समान पीठ पूजा करे।

प्रथमावरणम् - चैतन्य भैरवी के समान मध्य बिन्दु में गुरु चतुष्टय व भगवती का पूजन करे।

द्वितीयावरणम्ः- (षट्कोणे)- अग्निकोणे- **हस्ख्रें हृदयाय नमः**। ईशाने- **हस्क्लीं शिरसे स्वाहा**। नैऋते- **हसौः शिखायै वषट्**। वायुकोणे **हस्ख्रे कवचाय हुं**। मध्ये- **हस्क्लीं नेत्रत्रयाय वौषट्**। चतुर्दिक्षु- **हसौः अस्त्राय फट्**। देवी के वाम कोण में- "**ऐं रत्यै नमः**" दक्षिणकोण में- "**क्लीं प्रीत्यै नमः**" अग्निकोण में- "**सौः मनोभवायै नमः**" से पूजन करे।

तृतीयावरणम्ः- (अष्टदलमूले)- **सुभगायै नमः। भगायै नमः। भगसर्पिण्यै नमः। भगमालिन्यै नमः। अनङ्गायै नमः। अनङ्गकुसुमायै नमः। अनङ्ग- मेखलायै नमः। अनङ्गमदनायै नमः।**

चतुर्थावरणम्-(अष्टदले) दलों के मध्य भाग में असितांगादि अष्टभैरव तथा दलों के अग्रभाग में ब्राह्मयादि अष्टमातृकाओं का पूजन करे। पूर्वादि क्रमेण- **ॐ असिताङ्ग ब्राह्मीभ्यां नमः। रुरुभैरव माहेश्वरीभ्यां नमः। चण्डभैरव भैरवीभ्यां नमः। क्रोधभैरव भैरवीभ्यां नमः। उन्मत्तभैरव वाराहीभ्यां नमः। कपालीन्द्राणीभ्यां नमः। भीषण भैरव चामुण्डाभ्यां नमः। संहार भैरव महालक्ष्मीभ्यां नमः।**

पंचमावरणम्ः- चतुरस्त्र में इन्द्रादि दिग्पालों का सायुध पूजन करे।

॥ भुवनेश्वरी भैरवी ॥

मंत्रा :- **(१) हसैं हस्क्ल्हीं हसौः** इस मंत्र के दक्षिणामूर्ति ऋषि, पंक्तिछंद, "**भुवनेश्वरी भैरवी**" देवता हैं
(२) स्हैं हस्क्ल्हीं स्हौः दोनों मंत्रों की पूजा पद्धति समान हैं। इसे "**कमलेश्वरी भैरवी**" भी कहा हैं।

मंत्रकोष में प्रथम मंत्र तथा द्वितीय मंत्र के मध्यकूट में "**ह**" अर्द्ध है।

कराङ्गन्यासः- **हस्क्ल्हां अंगुष्ठाभ्यां नमः। हस्क्ल्हीं तर्जनीभ्यां स्वाहा। हस्क्ल्हूं मध्यमाभ्यां वषट्। हस्क्ल्हैं अनामिकाभ्यां हुं। हस्क्ल्हौं कनिष्ठाभ्यां वौषट्। हस्क्ल ह्रः करतल करपृष्ठाभ्यां फट्।** इसी तरह से हृदयादि षडङ्गन्यास करे।

जवाकुसुम - सङ्काशां दाडिमी - कुसुमोपमाम्। चन्द्ररेखां जटाजूटां त्रिनेत्रां रक्तवाससीम् ॥ नानाऽलङ्कार सुभगां पीनोन्नत - घनस्तनीम्। पाशांकुश - वराभीतिधारयन्तीं शिवां प्रिये।

इस प्रकार ध्यान कर शेषकर्म **''चैतन्य भैरवी''** की पूजा पद्धति के अनुसार पूर्ण करे।

॥ अष्टाक्षरी त्रिपुर भैरवी ॥

अष्टाक्षरी मंत्रः- **हसैं हसकरीं हसैं।**

विनियोगः- **अस्य मंत्रस्य दक्षिणामूर्तिः ऋषिः। पंक्तिश्छंदः। त्रिपुरभैरवी देवता। ऐं बीजम्। ह्रीं शक्तिं। क्लीं कीलकं। ममाभीष्ट सिद्धये जपे विनियोगः।**

षडङ्गन्यासः- **हसरां हृदयाय नमः। हसरीं शिरसे स्वाहा। हसरूं शिखायै वषट्। हसरैं कवचाय हुं। हसरों नेत्रत्रयाय वौषट्। हसरः अस्त्राय फट्।** इसी तरह कराङ्गन्यास करे।

॥ ध्यानम् ॥

उद्यद्भानु - सहस्रकान्तिमरुणक्षौमां शिरोमालिकां, रक्तालिप्तपयोधरां जपपरां विद्यामभीतिं वरम्। हस्ताब्जैर्दधतीं त्रिनेत्र - विलसद्वक्त्रारविन्द श्रियं, देवीं बद्धहिमांशुरत्नमुकुटां वन्दे सुमन्दस्मिताम् ॥

॥ आवरण पूजा प्रयोगः ॥

ॐ मं मण्डूकादि परतत्वांत पीठदेवताभ्यो नमः से सर्वतोभद्र पीठ की पूजा करे। उस नवपीठशक्तियों का पूजन करें। **ॐ इच्छायै नमः। ॐ ज्ञानायै नमः। ॐ क्रियायै नमः। ॐ कामदायिन्यै नमः। ॐ रत्यै नमः। ॐ रतिप्रियायै नमः। ॐ नंदायै नमः। ॐ परायै नमः।** पश्चात् देवी यंत्र को शुद्धकर पीठ पर स्थापित करे। मध्य में **''नव योनि त्रिकोण''** एक के ऊपर एक बनाये मंत्रमहार्णव में त्रिकोण उर्ध्वमुखी बनाये है जो अशुद्ध हैं स्त्री देवता का त्रिकोण नीचे एवं पुरुष देवता का त्रिकोण ऊपर हैं। अथवा **नवदुर्गा यंत्र की तरह नव त्रिकोण बनाये। उनके बाहर अष्टदल एवं चारद्वारयुक्त चतुरस्त्र बनायें।** हाथ में पुष्प लेकर देवी को आसन प्रदान करे। **हसौं सदाशिव महाप्रेतपद्मासनाय नमः।** पुनः पीठ मध्ये में - **''ऐं ह्रीं स ह स ष ह क्रे ह्भौं''** इस मंत्र से यंत्र मध्य में मूर्ति कल्पना करे एवं देवी का ध्यान कर आवाहन करें।

प्रथमावरणम्:- यंत्र मध्य में अग्निकोणादि में तथा मध्य व दिक्षु दिशा में षडङ्गन्यास मंत्रों से हृदयादि अंग पूजा करे।

द्वितीयावरणम् :- (मध्ये) उत्तरे- **द्रां द्राविण्यै नमः। द्रीं क्षोभिण्यै नमः।** दक्षिणे- **क्लीं वशीकरण्यै नमः। प्लुं लोपाकर्षिण्यै नमः।** आग्रेयां- **स्त्रीं संमोहिन्यै नमः।** उत्तरे- **ह्रीं कामाय नमः। क्लीं मन्मथाय नमः।** दक्षिणे- **ऐं कंदर्पाय नमः। प्लूं मकरध्वजाय नमः।** आग्रेयां- **स्त्रीं मीनकेतवे नमः।**

तृतीयावरणम् (अष्टयोनिषु) :- **रुद्र भैरवी की तरह सुभगादि से ''अनङ्ग मदनादि''** देवियों तक का पूजन करें।

चतुर्थावरणम्:-(अष्टदले) **अष्टदल में रुद्रभैरवी के समान अष्टभैरव व ब्राह्मी आदि अष्टमातृका का पूजन करें। चण्ड भैरव के साथ ''कौमारी'' तथा क्रोध भैरव के साथ ''वैष्णवी'' का पूजन करे यहीं अंतर हैं।**

पंचमावरणम् - (भूपूरे) :- **इन्द्रादि लोकपालों का सायुध अर्चन करे।** मंत्र के २४ लाख जप व १२ हजार बहेडे के पुष्पों से होम करे।

॥ त्रिपुराबाला भैरवी ॥

१. ऐं क्लीं सौः। यह बाला त्रिपुरा का मंत्र हैं २. ऐं सौः क्लीं। ३. ऐं क्लीं सौः सौः क्लीं यह पंचाक्षर मंत्र हैं। ४-५ **हंसः ऐं क्लीं सौः एवं ऐं क्लीं सौः हंसः।** इन दोनों मंत्रों के जप से बाला देवी के सुप्तादि दोषों की शुद्धि होती हैं। **६-७ आं सहैं ह्रीं सहकलरीं क्रों सहरौंः।** इस मंत्र के अंत में "**हंसः**" जोड़ने से षोडशाक्षरी मंत्र बन जाता हैं।

॥ नवकूटाबाला भैरवी ॥

मंत्रो यथा-(१) **ऐं क्लीं सौः हसैं हस्क्लीं हसौं हस्त्रैं हस्क्लीं हस्त्रौः।** अन्यत्र **हकार** अर्द्धाक्षर हैं तथा आखिरी दो कूट **ह्स्क्लीं हसौः**, हैं। (२) **ऐं क्लीं सौः ह्सैं ह्स्क्लैं हसौः स्हैं स्ह्क्लैं स्हौः।**

दीपनी मंत्रः- (३) ऐं वद वद वाग्वादिनि क्लिन्ने क्लेदिनि महामोक्षं कुरु क्लीं ॐ महामोक्षं कुरु सौः। (श्रीक्रमे)

॥ एकादशाक्षरी कामेश्वरी भैरवी ॥

मंत्रो यथा- **स्हैं स्क्ल्हीं नित्यक्लिन्ने मदद्रवे स्हौः।** पूजन विधि चैतन्य भैरवी के समान हैं।

॥ माहेश्वरी अन्नपूर्णा भैरवीश्वरि ॥

षोडशाक्षरी मंत्रः-नमः भगवति माहेश्वरि अन्नपूर्णे स्वाहा।

सप्तदशाक्षरी मंत्रः- (१) ह्रीं नमः भगवति माहेश्वरि अन्नपूर्णे स्वाहा। (२) ॐ नमः भगवति माहेश्वरि अन्नपूर्णे स्वाहा। (३) "श्रीं" अथवा **"ऐं"** या **"क्लीं"** बीजाक्षर युक्त- **श्रीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा।**

अष्टादशाक्षरी मंत्र :- (१) ह्रीं ॐ नमः भगवति माहेश्वरि अन्नपूर्णे स्वाहा। (मेरु तंत्रे) (२) ॐ ह्रीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा। (३) ह्रीं श्रीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा। (४) श्रीं ह्रीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा।

ऊनविंशाक्षरी मंत्रः- तीसरे, चौथे मंत्र के आगे "ॐ" लगावे।

॥ विंशत्यक्षर मंत्र प्रयोगः ॥

मंत्र - **ॐ श्रीं ह्रीं क्लीं नमः भगवति माहेश्वरि अन्नपूर्णे स्वाहा।** (मेरु तंत्रे) इस मंत्र के **ऋषि ब्रह्मा, त्रिष्टुप्छंद, अन्नपूर्णा देवता, ह्रीं बीज, श्रीं शक्ति, क्लीं कीलक हैं। (२) ॐ ह्रीं श्रीं क्लीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा।** (तंत्रसारे)

विनियोगः- **अस्य मंत्रस्य ब्रह्मा ऋषिः, पंक्तिश्छन्दः, श्री अन्नपूर्णा भैरवी देवता, ह्रीं बीजं, श्रीं शक्तिं, क्लीं कीलकं, अन्न धन ऐश्वर्यादि प्राप्तये जपे विनियोगः।**

ऋष्यादिन्यासः- **शिरसि ब्रह्मणे ऋषये नमः। मुखे पंक्तिश्छन्दसे नमः। हृदि अन्नपूर्णेश्वर्यै नमः। गुह्ये ह्रीं बीजाय नमः। पादयोः श्रीं शक्तये नमः। सर्वाङ्गे क्लीं कीलकाय नमः।**

पदन्यासः- **मूर्ध्नि ॐ नमः। नेत्रयोः ह्रीं नमः, श्रीं नमः। कर्णयोः क्लीं नमः नमो नमः। नसोः भगवति नमः माहेश्वरि नमः। मुखे अन्नपूर्णे नमः। गुह्ये स्वाहा नमः।** फिर पुनः विपरीत क्रम से गुह्य से मूर्ध्नि तक न्यास करे। पुनः **ॐ नमः ब्रह्मरंध्रे। ह्रीं नमः मुखे। श्रीं नमः हृदये। क्लीं नमः मूलाधारे। नमो नमः भ्रूमध्ये। भगवति नमः नासिकायां। माहेश्वरि नमः कण्ठे। अन्नपूर्णे नमः नाभौ। स्वाहा नमः लिङ्गे।** पश्चात् मूल मंत्र से व्यापक न्यास करे।

ध्यानम् :- अन्नपूर्णा का शरीर तपे हुये सुवर्ण के समान हैं, मस्तक पर नवोदित चन्द्रमा हैं, नवीन रत्नों की चमक से मुकुट देदीप्यमान हैं। शरीर का वर्ण कुंकुम के समान अरुण हैं। त्रिलक्षण वस्त्र धारण किये हुये हैं। त्रिनेत्रा हैं दोनों स्तन स्वर्ण कलशों के समान उन्नत हैं उनके सामने श्वेत वर्ण के **पांचमुखवाले, नीलकण्ठ, सर्पों से विभूषित शंभु नृत्य कर रहे हैं।** उन्हे देखकर माहेश्वरि प्रसन्न हो रही हैं, देवी अन्न प्रदान कर रही हैं। **भगवती अन्नपूर्णा लक्ष्मी** एवं **पृथ्वी** से विभूषिता हैं।

॥ शिवध्यानम् ॥

गोक्षीरधाम धवलं पञ्चवक्त्रं त्रिलोचनं, प्रसन्नवदनं शान्तं नीलकण्ठ विराजिताम् ।
कपर्दिनं स्फुरत् सर्पभूषणं मल्लसन्निभं, नृत्यन्तमीश्वरं देवं त्रिकोणाग्रे सुरेश्वरम् ॥

॥ देवी ध्यानम् ॥

तप्तकाञ्चन सङ्काशां बालेन्दुकृतशेखरां, नवरत्नप्रभा दीप्तमुकुटां कुंकुमारुणाम् ।
चित्रवस्त्र परीधानां मीनाक्षीं कमलस्तनीं, नृत्यन्तीमीशमनिशं दृष्ट्वानन्दमयीं पराम् ॥
सानन्दमुख लोलाक्षीं मेखलाढ्य नितम्बिनीं, अन्नदानरतः नित्यां भूमि श्रीभ्यां नमस्कृताम् ।
दुग्धान्नभरितं पात्रं सरत्नं वाम हस्तके, दक्षिणे तु करे देव्या दर्वीं ध्यायेत् सुवर्णजाम् ॥

॥ आवरण पूजा ॥

पहले त्रिकोण, उसके बाहर चतुर्दल उसके बाहर अष्टदल पश्चात् षोडशदल एवं चार द्वार युक्त भूपूर बनाकर यंत्र बनावे। यंत्र पीठ पर मंडूकादि पीठ देवताओं का पूजन करे। "**ॐ वामायै नमः, ज्येष्ठायै नमः, रौद्र्यै नमः, काल्यै नमः, कलविकरण्यै नमः, बलविकरण्यै नमः, बलप्रमथनायै नमः, सर्वभूतदमन्यै नमः** से न्यास कर मध्ये **मनोन्मन्यै नमः** से न्यास करे। वहीं पूर्वादिक्रम से -**ॐ जयायै नमः विजयायै नमः, अजितायै नमः, अपराजितायै नमः, नित्यायै नमः, विलासिन्यै नमः दोग्ध्र्यै नमः, अघोराय नमः, मध्ये मंगलाय नमः** से नव पीठ शक्तियों का न्यास करे। तब उनके ऊपर **हसौः सदाशिव महाप्रेत-पद्मासनाय नमः** से न्यास करे। मूल बिन्दु का ध्यान कर पञ्च पुष्पाञ्जलि देवे। षट्कोणों की कल्पना करें-

प्रथमावरणम् - (षट्कोणे) आग्नेयादि कोणे- **ह्रां हृदयाय नमः। ह्रीं शिरसे स्वाहा। ह्रूं शिखायै वषट्। ह्रैं कवचाय हुं। ह्रौं नेत्रत्रयाय वौषट्। ह्रः अस्त्राय फट्।**

द्वितीयावरणम् - (त्रिकोणे):- अग्रे **ॐ ह्रौं नमः शिवाय नमः।** ईशानेकोणे **ॐ नमो भगवते वराहरूपाय भूर्भुवः स्वः पतये भूपतित्वं मे देहि ददापय स्वाहा।** अग्निकोणे- **ॐ नारायणाय**

स्वाहा। देवि के वाम व दक्षिण में ''भूमि'' तथा ''श्री'' की पूजा करें। ॐ ग्लौं श्रीं अन्नं मे देह्यन्नाधिपतये ममान्नं प्रदापय स्वाहा। श्रीं ग्लौं भूम्यै नमः॥ ॐ श्रियै नमः।

तृतीयावरणम् - (चतुर्दले) पूर्वे-**ॐ परविद्यायै नमः**। दक्षिणे- **ह्रीं भुवनेश्वर्यै नमः**। पश्चिमे- **श्रीं कमलायै नमः**। उत्तरे- **क्लीं सुभगायै नमः**।

चतुर्थावरणम् - (अष्टदले)-**ॐ ब्राह्म्यै नमः, माहेश्वर्यै नमः, वैष्णव्यै नमः, कौमार्यै नमः, वाराह्यै नमः, ऐन्द्राण्यै नमः, चामुण्डायै नमः, महालक्ष्म्यै नमः**।

पंचमावरणम् - (षोडशदले) **ॐ नं अमृतायै अन्नपूर्णायै नमः**। सभी नामावलि के अंत में **अन्नपूर्णायै नमः** कहे। **मों मानदायै। भं तुष्ट्यै। गं पुष्ट्यै। वं प्रीत्यै। तिं रत्यै। मां क्रियायै। हे श्रियै। श्वं सुधायै। रिं रात्र्यै। अं ज्योत्स्नायै। न्नं हैमवत्यै। पूं छायायै। णें पूर्णिमायै। स्वां नित्यायै। हां अमावस्यायै।**

षष्ठमावरणम्- चतुरस्त्र में इन्द्रादि १० दिग्पालों व आयुधों का पूजन करे। पुरश्चरण में एक लाख जप कर पायस, घृताक्त अन्न से दशांश होम करें।

॥ श्मशान भैरवी ॥

मंत्रो यथा- **श्मशान भैरवि नररुधिरास्थि- वसाभक्षिणि सिद्धिं मे देहि मम मनोरथान् पूरय पूरय हुं फट् स्वाहा।**

॥ भैरवी गायत्री ॥

मंत्रो यथा- **ॐ त्रिपुरायै विद्महे महाभैरव्यै धीमहि तन्नो देवी प्रचोदयात्।**

॥ त्रिपुर भैरव ॥

मंत्रो यथा- **ह्रीं श्रीं हंसः ह्सौं स्वाहा।**

॥ ध्यानम् ॥

एकवक्त्रं त्रियनं चतुर्बाहु समन्वित, दक्षिणे चांकुशं खड्गं वामे खेटकपाशकौ ।
धारयन्तं रक्तवर्णं वृषासनंगतं, उर्ध्वकेशं हार-हारं कपालमालयाऽन्वितम् ॥
एवं विधं महादेवि! ध्यायेत् त्रिपुरभैरवम्॥ (पुरश्चर्यार्णवे)

॥ श्री भैरवी मातृका ॥

त्रिपुरा त्रिपुरेशी च तथा त्रिपुरसुन्दरी । त्रिपुराद्या वासिनी च त्रिपुराश्रीस्ततः परम् ॥१॥
त्रिपुरामालिनी चैव त्रिपुरसिद्धा ततः परम् । त्रिपुराम्बा ततश्चैव महात्रिपुरभैरवी ॥२॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा । वाराही च तथेन्द्राणी चामुण्डा स्वरशक्तयः ॥३॥
विशाला च विशालाक्षी निर्मला मलवर्जिता । काली च कालकल्पा च कालरात्रिर्निशाचरी ॥४॥
ऊर्ध्वकेशी मुक्तकेशी वीरा चैव महाभया । जयदा मानिनी माया प्रचण्डा विन्दुमालिनी ॥५॥
विरूपा च विरूपाक्षी खट्वाङ्गी विश्वरूपिणी । रौद्री माया च प्रेताक्षी फेत्कारी भयनादिनी ॥६॥
धम्राक्षी योगिनी घोरा विश्वरूपा [illegible]

॥ अथ श्री भैरवी त्रैलोक्य विजय कवचम् ॥

॥ श्री देव्युवाच ॥

भैरव्याः सकला विद्याः श्रुताश्चाधिगता मया । सांप्रतं श्रोतुमिच्छामि कवचं यत्पुरोदितम् ॥१॥
त्रैलोक्यविजयं नाम शस्त्रास्त्रविनिवारणम् । त्वत्तः परतरो नाथ कः कृपां कर्तुमर्हति ॥२॥

॥ ईश्वर उवाच ॥

शृणु पार्वति वक्ष्यामि सुन्दरी प्राणवल्लभे । त्रैलोक्यविजयं नाम शस्त्रास्त्रविनिवारकम् ॥३॥
पठित्वा धारयित्वेदं त्रैलोक्यविजयी भवेत् । जघान सकलान्दैत्यान् यद्धृत्वा मधुसूदनः ॥४॥
ब्रह्मासृष्टिं वितनुते यद्धृत्वाभीष्टदायकम् । धनाधिपः कुबेरोऽपि वासवस्त्रिदशेश्वरः ॥५॥
यस्य प्रसादादीशोऽहं त्रैलोक्यविजयी विभुः । न देयं परशिष्येभ्योऽसाधकेभ्यः कदाचन ॥६॥
पुत्रेभ्यः किमथान्येभ्यो दद्याच्चेन्मृत्युमाप्नुयात् । ऋषिस्तु कवचस्यास्य दक्षिणामूर्तिरेव च ॥७॥
विराट् छन्दो जगद्धात्री देवता बालभैरवी । धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ॥८॥
अधरो बिन्दुमानाद्यः कामः शक्तिशशीयुतः । भृगुर्मनुस्वरयुतः सर्गोबीजत्रयात्मकः ॥९॥
बालैषा मे शिरः पातु बिन्दुनादयुतापि सा । भालं पातु कुमारीशा सर्गहीना कुमारिका ॥१०॥
दृशौ पातु च वाग्बीजं कर्णयुग्मं सदावतु । कामबीजं सदा पातु घ्राणयुग्मं परावतु ॥११॥
सरस्वतीप्रदा बाला जिह्वां पातु शुचिप्रभा । हस्त्रैं कंठं हसकलरीं स्कंधौ पातु हस्त्रौ भुजौ ॥१२॥
पंचमी भैरवी पातु करौ हसैं सदावतु । हृदयं हसकलीं वक्षः पातु हसौः स्तनौ मम ॥१३॥
पातु सा भैरवी देवी चैतन्यरूपिणी मम । हस्त्रैं पातु सदा पार्श्वयुग्मं हसकलरीं सदा ॥१४॥
कुक्षिं पातु हसौर्मध्ये भैरवी भुवि दुर्लभा । ऐंईंओंवं मध्यदेशं बीजविद्या सदावतु ॥१५॥
हस्त्रैं पृष्ठं सदा पातु नाभिं हसकलह्रीं सदा । पातु हसौं करौ पातु षट्कूटा भैरवी मम ॥१६॥
सहस्त्रैं सक्थिनी पातु सहसकलरीं सदावतु । गुह्यदेशं हस्त्रौं पातु जनुनी भैरवी मम ॥१७॥
संपत्प्रदा सदा पातु हैं जंघे हसक्लीं पदौ । पातु हंसौः सर्वदेहं भैरवी सर्वदावतु ॥१८॥
हसैं मामवतु प्राच्यां हरक्लीं पावकेऽवतु । हसौं मे दक्षिणे पातु भैरवी चक्रसंस्थिता ॥१९॥
ह्रीं क्लीं ल्वें मां सदा पातु निर्ऋत्यां चक्रभैरवी । क्रीं क्रीं क्रीं पातु वायव्ये हूं हूं पातु सदोत्तरे ॥२०॥
ह्रीं ह्रीं पातु सदैशान्ये दक्षिणे कालिकावतु । ऊर्द्धं प्रागुक्तबीजानि रक्षन्तु मामधः स्थले ॥२१॥
दिग्विदिक्षु स्वाहा पातु कालिका खड्गधारिणी । ॐ ह्रीं स्त्रीं हूं फट् सा तारा सर्वत्र मां सदावतु ॥२२॥
संग्रामे कानने दुर्गे तोये तरंगदुस्तरे । खड्गकर्त्रिधरा सोग्रा सदा मां परिरक्षतु ॥२३॥
इति ते कथितं देवि सारात्सारतरं महत् । त्रैलोक्यविजयं नाम कवचं परमाद्भुतम् ॥२४॥
यः पठेत्प्रयतो भूत्वा पूजायाः फलमाप्नुयात् । स्पर्द्धामूद्धूय भवने लक्ष्मीर्वाणी वसेत्ततः ॥२५॥
यः शत्रुभीतो रणकातरो वा भीतो वने वा सलिलालये वा । वादे सभायां प्रतिवादिनो वा रक्षःप्रकोपाद् ग्रहसकुलाद्वा ॥२६॥
प्रचंडदंडाक्षमनाच्च भीतो गुरोः प्रकोपादपि कृच्छ्रसाध्यात् । अभ्यर्च्य देवीं प्रपठेत्रिसंध्यं स स्यान्महेशप्रतिमो जयी च ॥२७॥

त्रैलोक्यविजयं नाम कवचं मन्मुखोदितम् । विलिख्य भूर्जगुटिकां स्वर्णस्थां धारयेद्यदि ॥२८॥
कंठे वा दक्षिणे बाहौ त्रैलोक्यविजयी भवेत् । तद्गात्रं प्राप्य शस्त्राणि भवंति कुसुमानि च ॥२९॥
लक्ष्मीः सरस्वती तस्य निवसेद्भवने मुखे । एतत्कवचमज्ञात्वा यो जपेद्भैरवीं पराम् ।
बालां वा प्रजपेद्विद्वान्दरिद्रो मृत्युमाप्नुयात् ॥३०॥

॥ इति श्रीरुद्रयामले देवीश्वरसंवादे त्रैलोक्यविजयं नाम भैरवीकवचं समाप्तम् ॥

॥ अथ श्री त्रिपुरभैरवी कवचम् ॥

॥ श्री पार्वत्युवाच ॥

देवदेव महादेव सर्वशास्त्र विशारद । कृपां कुरु जगन्नाथ धर्म्मज्ञोऽसि महामते ॥१॥
भैरवी या पुरा प्रोक्ता विद्या त्रिपुरपूर्विका । तस्यास्तु कवचं दिव्यं मह्यं कथय तत्त्वतः ॥२॥
तस्यास्तु वचनं श्रुत्वा जगाद जगदीश्वरः । अद्भुतं कवचं देव्या भैरव्या दिव्यरूपि वै ॥३॥

॥ईश्वर उवाच ॥

कथयामि महाविद्या कवचं सर्वदुर्लभम् । शृणुष्व त्वं च विधिना श्रुत्वा गोप्यं तवापि तत् ॥४॥
यस्याः प्रसादात्सकलं बिभर्मि भुवनत्रयम् । यस्याः सर्वं समुत्पन्नं यस्यामद्यापि तिष्ठति ॥५॥
माता पिता जगद्धन्या जगद् ब्रह्मस्वरूपिणी । सिद्धिदात्री च सिद्धास्या ह्यसिद्धा दुष्टजंतुषु ॥६॥
सर्वभूतप्रियकरी सर्वभूतस्वरूपिणी । ककारी पातु मां देवी कामिनी कामदायिनी ॥७॥
एकारी पातु मां देवी मूलाधारस्वरूपिणी । इकारी पातु मां देवी भूरिसर्वसुखप्रदा ॥८॥
लकारी पातु मां देवी इन्द्राणी वरवल्लभा । ह्रींकारी पातु मां देवी सर्वदा शम्भुसुन्दरी ॥९॥
एतैर्वर्णैर्महामाया शाम्भवी पातु मस्तकम् । ककारे पातु मां देवी शर्वाणी हर - गेहिनी ॥१०॥
मकारे पातु मां देवी सर्वपापप्रणाशिनी । ककारे पातु मां देवी कामरूपधरा सदा ॥११॥
ककारे पातु मां देवी शम्बरारिप्रिया सदा। पकारे पातु मां देवी धरा धरणिरूपधृक् ॥१२॥
ह्रींकारी पातु मां देवी अकारार्द्ध - शरीरिणी । एतैर्वर्णैर्महामाया कामराहुप्रियाऽवतु ॥१३॥
मकारः पातु मां देवी सावित्री सर्वदायिनी । ककारः पातु सर्वत्र कलाम्बर स्वरूपिणी ॥१४॥
लकारः पातु मां देवी लक्ष्मीः सर्वसुलक्षणा । ह्रीं पातु मां तु सर्वत्र देवी त्रिभुवनेश्वरी ॥१५॥
एतैर्वर्णैर्महामाया पातु शक्तिस्वरूपिणी । वाग्भवं मस्तकं पातु वदनं कामराजिका ॥१६॥
शक्तिस्वरूपिणी पातु हृदयं यंत्रसिद्धिदा । सुन्दरी सर्वदा पातु सुन्दरी परिरक्षतु ॥१७॥
रक्तवर्णा सदा पातु सुन्दरी सर्वदायिनी । नानालंकार - संयुक्ता सुन्दरी पातु सर्वदा ॥१८॥
सर्वांगसुन्दरी पातु सर्वत्र शिवदायिनी । जगदाह्लाद- जननी शम्भुरूपा च मां सदा ॥१९॥
सर्वमंत्रमयी पातु सर्वसौभाग्यदायिनी । सर्वलक्ष्मीमयी देवी परमानन्द दायिनी ॥२०॥
पातु मां सर्वदा देवी नानाशंखनिधिः शिवा । पातु पद्मनिधिर्देवी सर्वदा शिवदायिनी ॥२१॥

मां पातु दक्षिणामूर्तिर्ऋषिः सर्वत्र मस्तके । पंक्तिश्छन्दः स्वरूपा तु मुखे पातु सुरेश्वरी ॥२२॥
गंधाष्टकात्मिका पातु हृदयं शाङ्करी सदा । सर्वसम्मोहिनी पातु पातु संक्षोभिणी सदा ॥२३॥
सर्वसिद्धिप्रदा पातु सर्वाकर्षणकारिणी । क्षोभिणी सर्वदा पातु वशिनी सर्वदावतु ॥२४॥
आकर्षिणी सदा पातु सम्मोहिनी सदावतु । रतिर्देवी सदा पातु भगांगा सर्वदावतु ॥२५॥
माहेश्वरी सदा पातु कौमारी सर्वदावतु । सर्वाह्लादनकरी मां पातु सर्ववशंकरी ॥२६॥
क्षेमंकरी सदा पातु सर्वांगसुन्दरी तथा । सर्वांग युवतिः सर्वा सर्वसौभाग्यदायिनी ॥२७॥
वाग्देवी सर्वदा पातु वाणिनी सर्वदावतु । वशिनी सर्वदा पातु महासिद्धिप्रदा सदा ॥२८॥
सर्वविद्राविणी पातु गणनाथः सदावतु । दुर्गादेवी सदा पातु वटुकः सर्वदावतु ॥२९॥
क्षेत्रपालः सदा पातु पातु चा वीरशांतिका । अनंतः सर्वदा पातु वराहः सर्वदावतु ॥३०॥
पृथिवी सर्वदा पातु स्वर्णसिंहासनं तथा । रक्तामृतं च सततं पातु मां सर्वकालतः ॥३१॥
सुरार्णवः सदा पातु कल्पवृक्षः सदावतु । श्वेतच्छत्रं सदा पातु रक्तद्वीपः सदावतु ॥३२॥
सततं नन्दनोद्यानं पातु मां सर्वसिद्धये । दिक्पालाः सर्वदा पातु द्वन्द्वौघाः सकलास्तथा ॥३३॥
वाहनानि सदा पांतु अस्त्राणि पांतु सर्वदा । शस्त्राणि सर्वदा पातु योगिन्यः पांतु सर्वदा ॥३४॥
सिद्धाः पांतु सदा देवी सर्वसिद्धिप्रदावतु । सर्वांगसुन्दरी देवी सर्वदा पातु मां तथा ॥३५॥
आनन्दरूपिणी देवी चित्स्वरूपा चिदात्मिका । सर्वदा सुन्दरी पातु सुन्दरी भवसुन्दरी ॥३६॥
पृथग्देवालये घोरे संकटे दुर्गमे गिरौ । अरण्ये प्रांतरे वापि पातु मां सुन्दरी सदा ॥३७॥
इदं कवचमित्युक्तो मंत्रोद्धारश्च पार्वति । यः पठेत्प्रयतो भूत्वा त्रिसंध्यं नियतः शुचिः ॥३८॥
तस्य सर्वार्थसिद्धिः स्याद्यद्यन्मनसि वर्तते । गोरोचना कुंकुमेन रक्तचन्दननेन वा ॥३९॥
स्वयंभूकुसुमैः शुक्लैर्भूमिपुत्रे शनौ सुरै । श्मशाने प्रांतरे वापि शून्यागारे शिवालये ॥४०॥
स्वशक्त्या गुरुणां यंत्रं पूजयित्वा कुमारिकाः । तन्मनुं पूजयित्वा च गुरुपंक्तिं तथैव च ॥४१॥
देव्यै बलिं निवेद्याथ नरमार्जार सूकरैः । नकुलैर्महिषैर्मेषैः पूजयित्वा विधानतः ॥४२॥
धृत्वा सुवर्णमध्यस्थं कण्ठे वा दक्षिणे भुजे । सुतिथौ शुभनक्षत्रे सूर्यस्योदयने तथा ॥४३॥
धारयित्वा च कवचं सर्वसिद्धिं लभेन्नरः । कवचस्य च माहात्म्यं नाहं वर्षशतैरपि ॥४४॥
शक्नोमि तु महेशानि वक्तुं तस्य फलं तु यद् । न दुर्भिक्षफलं तत्र न चापि पीडनं तथा ॥४५॥
सर्वविघ्नप्रशमनं सर्वव्याधि - विनाशनम् । सर्वरक्षाकरं जंतोश्चतुर्वर्ग- फलप्रदम् ॥४६॥
मंत्रं प्राप्य विधानेन पूजयेत्सततं सुधीः । तत्रापि दुर्लभं मन्ये कवचं देवरूपकम् ॥४७॥
गुरोः प्रसाद मासाद्य विद्यां प्राप्य सुगोपिताम् । तत्रापि कवचं दिव्यं दुर्लभं भुवनत्रये ॥४८॥
सर्वं वा श्लोकमेकं वा यः पठेत्प्रयतः शुचिः । तस्य सर्वार्थसिद्धिः स्याच्छंकरेण प्रभाषितः ॥४९॥
गुरुर्देवो हरः साक्षात्पत्नी तस्य च पार्वती । अभेदेन भजेद्यस्तु तस्य सिद्धिरदूरतः ॥५०॥

॥ इति श्रीरुद्रयामले भैरव-भैरवीसंवादे श्रीत्रिपुरभैरवी कवचं समाप्तम् ॥

॥ श्री भैरवीस्तवराज प्रारम्भः ॥

ब्रह्मादयः स्तुतिशतैरपि सूक्ष्मरूपं जानंति नैव जगदादिमनादिमूर्तिम् ।
तस्माद्वयं कुचनतां नवकुंकुमाभां स्थूलां स्तुमः सकलवाङ्मयमातृभूताम् ॥१॥
सद्यः समुद्यतसहस्त्रदिवाकराभां विद्याक्षसूत्र वरदाभयचिन्हहस्ताम् ।
नेत्रोत्पलैस्त्रिभिरलंकृत वक्त्र पद्मां त्वां तारहाररुचिरां त्रिपुरे भजामः ॥२॥
सिन्दूरपूररुचिरं कुचभारनम्रं जन्मांतरेषु कृतपुण्यफलैकगम्यम् ।
अन्योन्यभेद कलहाकुल मानसास्ते जानंति किं जडधियस्तवरूपमम्ब ॥३॥
स्थूलां वदंति मुनयः श्रुतयो गृणंति सूक्ष्मां वदंति वचसामधिवासमन्ये ।
त्वां मूलमाहुरपरे जगतां भवानि मन्यामहे वयमपारकृपांबुराशिम् ॥४॥
चन्द्रावतंसकलितां शरदिंदुशुभ्रां पंचाशदक्षरमयीं हृदि भावयंतीम् ।
त्वां पुस्तकं जपवटीममृताम्बुकुंभं व्याख्यां च हस्तकमलैर्दधतीं त्रिनेत्राम् ॥५॥
शंभुस्त्वमद्रितनया कलितार्द्धभागो विष्णुस्त्वमम्ब कमलापरिरब्धदेहः ।
पद्मोद्भवस्त्वमपि वागधिवासभूमिस्तेषां क्रियाश्च जगति त्रिपुरे त्वमेव ॥६॥
आश्रित्य वाग्भवभवांश्चतुरः परादीन् भावान्पदेषुविहितान्समुदीरयंतीम् ।
कंठादिभिश्च करणैः परदेवतां त्वां संविन्मयीं हृदि कदापि न विस्मरामि ॥७॥
आकुंच्य वायुमवजित्य च वैरिषट्कमालोक्य निश्चलधिया निजनासिकाग्रम् ।
ध्यायंति मूर्ध्नि कलितेंदुकलावसंतं त्वद्रूपमंब कृतिनस्तरुणार्कमित्रम् ॥८॥
त्वं प्राप्य मन्मथरिपोर्वपुरर्द्धभागं सृष्टिं करोषि जगतामिति वेदवादः ।
सत्यं तदद्रितनये जगदेकमातर्नो चेदशेषजगतः स्थितिरेव न स्यात् ॥९॥
पूजां विधाय कुसुमैः सुरपादपानां पीठे तवाम्ब कनकाचलगह्वरेषु ।
गायंति सिद्धवनिताः सह किंनरीभिरास्वादिता सवरसारुणनेत्रपद्माः ॥१०॥
विद्युद्विलासवपुषः श्रियमुद्वहंतीं यांतीं स्ववासभवनाच्छिवराजधानीम् ।
सौषुम्नवर्त्मकमलानि विकासयंतीं देवीं भजे हृदि परामृतसिक्तगात्राम् ॥११॥
आनन्दजन्मभवनं भवनं श्रुतीनां चैतन्यमात्रतनुमम्ब तवाश्रयामि ।
ब्रह्मेशविष्णुभिरुपासितपादपद्मां सौभाग्यजन्मवसतिं त्रिपुरे यथावत् ॥१२॥
शब्दार्थभावि भवनं सृजतीन्दुरूपा या तद्बिभर्ति पुनरर्कतनुः स्वशक्त्या ।
ब्रह्मात्मिका हरति तत्सकलं युगांते तां शारदां मनसि जातु न विस्मरामि ॥१३॥
नारायणीति नरकार्णवतारिणीति गौरीति खेदशमनीति सरस्वतीति ।
ज्ञानप्रदोति नयनत्रयभूषितेति त्वामद्रिराजतनये बहुधा वदंति ॥१४॥
ये स्तुवंति जगन्मातः श्लोकैर्द्वादशभिः क्रमात् । त्वामनुप्राप्य वाक्सिद्धिं प्राप्नुयुस्ते नराः श्रियम् ॥१५॥

॥ इति रुद्रयामले भैरवीस्तवराज स्तोत्रं समाप्तम् ॥

॥ श्री भैरव्यष्टोत्तरशतनाम स्तोत्रम् ॥

॥ श्रीदेव्युवाच ॥

कैलासवासिन् भगवन्प्राणेश्वर कृपानिधे । भक्तवत्सल भैरव्या नाम्नामष्टोत्तरं शतम् ॥१॥
न श्रुतं देवदेवेश वद मां दीनवत्सल ।

॥ श्रीशिव उवाच ॥

शृणु प्रिये महागोप्यं नाम्नामष्टोत्तरं शतम् ॥२॥
भैरव्याः शुभदं सेव्यं सर्वसम्पत्प्रदायकम् । यस्यानुष्ठानमात्रेण किं न सिद्ध्यति भूतले ॥३॥
ॐ भैरवी भैरवाराध्या भूतिदा भूतभावना । कार्य्या ब्राह्मी कामधेनुः सर्वसम्पत्प्रदायिनी ॥४॥
त्रैलोक्यवन्दिता देवी महिषासुरमर्दिनी । मोहघ्नी मालतीमाला महापातक नाशिनी ॥५॥
क्रोधिनी क्रोधनिलया क्रोधरक्तेक्षणा कुहूः । त्रिपुरा त्रिपुराधारा त्रिनेत्रा भीमभैरवी ॥६॥
देवकी देवमाता च देवदुष्टविनाशिनी । दामोदरप्रिया दीर्घा दुर्गा दुर्गतिनाशिनी ॥७॥
लम्बोदरी लम्बकर्णा प्रलम्बितपयोधरा । प्रत्यंगिरा प्रतिपदा प्रणतक्लेशनाशिनी ॥८॥
प्रभावती गुणवती गणमाता गुहेश्वरी । क्षीराब्धितनया क्षेम्या जगत्त्राणविधायिनी ॥९॥
महामारी महामोहा महाक्रोधा महानदी । महापातकसहंर्त्री महामोहप्रदायिनी ॥१०॥
विकराला महाकाला कालरूपा कलावती । कपालखट्वांगधरा खड्गखर्प्परधारिणी ॥११॥
कुमारी कुंकुमप्रीता कुंकुमारुणरंजिता । कौमोदकी कुमुदिनी कीर्त्या कीर्तिप्रदायिनी ॥१२॥
नवीना नीरदा नित्या नन्दिकेश्वरपालिनी । घर्घरा घर्घरारावा घोरा घोरस्वरूपिणी ॥१३॥
कलिघ्नी कलिधर्मघ्नी कलिकौतुकनाशिनी । किशोरी केशवप्रीता क्लेशसंघनिवारिणी ॥१४॥
महोत्तमा महामत्ता महाविद्या महीमयी । महायज्ञा महावाणी महामन्दरधारिणी ॥१५॥
मोक्षदा मोहदा मोहा भुक्तिमुक्तिप्रदायिनी । अट्टाट्टहासनिरता कणन्नूपुरधारिणी ॥१६॥
दीर्घदंष्ट्रा दीर्घमुखी दीर्घघोणा च दीर्घिका । दनुजांतकरी दुष्टा दुःखदारिद्र्यभंजिनी ॥१७॥
दुराचारा च दोषघ्नी दमपत्नी दयापरा । मनोभवा मनुमयी मनुवंशप्रवर्द्धिनी ॥१८॥
श्यामा श्यामतनुः शोभा सौम्या शम्भुविलासिनी । इति ते कथितं दिव्यं नाम्नामष्टोत्तरं शतम् ॥१९॥
भैरव्या देवदेवेश्यास्तव प्रीत्यै सुरेश्वरि । अप्रकाश्यमिदं गोप्यं पठनीयं प्रयत्नतः ॥२०॥
देवीं ध्यात्वा सुरां पीत्वा मकारपञ्चकैः प्रिये । पूजयेत्सततं भक्त्या पठेत्स्तोत्रमिदं शुभम् ॥२१॥
षण्मासाभ्यंतरे सोऽपि गणनाथसमो भवेत् । किमत्र बहुनोक्तेन त्वदग्रे प्राणवल्लभे ॥२२॥
सर्वं जानासि सर्वज्ञे पुनर्मां परिपृच्छसि । न देयं परशिष्येभ्यो निन्दकेभ्यो विशेषतः ॥२३॥

॥ इति श्री भैरव्यष्टोत्तरशतनाम स्तोत्रं समाप्तम् ॥

॥ अथ त्रिपुरभैरवी सहस्रनाम स्तोत्रम् ॥

॥ महाकालभैरव उवाच ॥

अथ वक्ष्ये महेशानि देव्या नाम सहस्रकम् । यत्प्रसादान्महादेवि चतुर्वर्गफलं लभेत् ॥१॥
सर्वरोगप्रशमनं सर्वमृत्युविनाशनम् । सर्वसिद्धिकरं स्तोत्रं नातः पर तरः स्तवः ॥२॥
नातः परतरा विद्यातीर्थं नातः परं स्मृतम् । यस्यां सर्वं समुत्पन्नं यस्यामद्यापि तिष्ठति ॥३॥
क्षयमेष्यति तत्सर्वं लयकाले महेश्वरि । नमामि त्रिपुरां देवीं भैरवीं भयमोचिनीम् ।
सर्वसिद्धिकरीं साक्षान्महापातकनाशिनीम् ॥४॥

विनियोगः - ॐ अस्य श्रीत्रिपुरभैरवी सहस्रनामस्तोत्रस्य भगवान् ऋषिः । पंक्तिश्छंदः । आद्या शक्तिः । भगवती त्रिपुरभैरवी देवता । सर्वकामार्थसिद्ध्यर्थे जपे विनियोगः ।

ॐ त्रिपुरा परमेशानी योगसिद्धिनिवासिनी । सर्वमन्त्रमयी देवी सर्वसिद्धिप्रवर्तिनी ॥१॥
सर्वाधारमयी- देवी सर्वसम्पत्प्रदा शुभा । योगिनी योगमाता च योगसिद्धि प्रवर्तिनी ॥२॥
योगिध्येया योगमयी योगियोगनिवासिनी । हेला लीला तथा क्रीडा कालरूपप्रवर्तिनी ॥३॥
कालमाता कालरात्रिः काली कमलवासिनी । कमला कांतिरूपा च कामराजेश्वरी क्रिया ॥४॥
कटुः कपटकेशा च कपटा कुटिलाकृतिः । कुमुदा चर्चिका कांतिः कालरात्रिप्रिया सदा ॥५॥
घोराकारा घोरतरा धर्म्माधर्म्मप्रदामतिः । घण्टाघर्घरदा घण्टा घण्टानादप्रिया सदा ॥६॥
सूक्ष्मा सूक्ष्मतरा स्थूला अतिस्थूला सदामतिः । अतिसत्या सत्यवती सत्यसङ्केत वासिनी ॥७॥
क्षमा भीमा तथाऽभीमाभीमनाद प्रवर्तिनी । भ्रमरूपा भयहरा भयदा भयनाशिनी ॥८॥
श्मशानवासिनी देवी श्मशानालयवासिनी । शवासना शवाहारा शवदेहा शिवाऽशिवा ॥९॥
कंठदेशशवाहारा शवकंकणधारिणी । दंतुरा सुदंती सत्या सत्यसंकेतवासिनी ॥१०॥
सत्यदेहा सत्यहारा सत्यवादनिवासिनी । सत्यालया सत्यसंगा सत्यसंगरकारिणी ॥११॥
असंगसंगरहिता सुसंगासंगमोहिनी । माया मतिर्महामाया महामखविलासिनी ॥१२॥
गलद्रुधिरधारा च मुखद्वयनिवासिनी । सत्यायासा सत्यसंगा सत्यसंगतिकारिणी ॥१३॥
असंगा संगनिरता सुसंगा संगवासिनी । सदासत्या महासत्या मांसपाशा सुमांसका ॥१४॥
मांसाहारा मांसधरा मांसाशी मांसभक्षका । रक्तपाना रक्तरुचिरारक्ता रक्तवल्लभा ॥१५॥
रक्ताहारा रक्तप्रिया रक्तनिन्दकनाशिनी । रक्तपानप्रिया -बाला रक्तदेशा सुरक्तिका ॥१६॥
स्वयंभूकुसुमस्था च स्वयंभूकुसुमोत्सुका । स्वयंभूकुसुमाहारा स्वयंभूनिन्दकासना ॥१७॥
स्वयंभूपुष्पकप्रीता स्वयंभूपुष्पसम्भवा । स्वयंभूपुष्पहाराढ्या स्वयंभूनिन्दकांतका ॥१८॥
कुण्डगोल विलासा च कुण्डगोलसदामतिः । कुण्डगोलप्रियकरी कुण्डगोलसमुद्भवा ॥१९॥
शुक्रात्मिका शुक्रकरा सुशुक्रा च सुशुक्तिका । शुक्रपूजकपूज्या च शुक्रनिन्दकनिन्दका ॥२०॥
रक्तमाल्या रक्तपुष्पा रक्तपुष्पकपुष्पका । रक्तचन्दनसिक्तांगी रक्तचन्दननिन्दका ॥२१॥

मत्स्या मत्स्यप्रिया मान्या मत्स्यभक्षा महोदया । मत्स्याहारा मत्स्यकामा मत्स्यनिन्दकनाशिनी ॥२२॥
केकराक्षी तथा क्रूरा क्रूरसैन्यविनाशिनी । क्रूरांगी कुलिशांगी च चक्रांगी चक्रसम्भवा ॥२३॥
चक्रदेहा चक्रहारा चक्रकंकाल वासिनी । निम्ननाभिर्भीतिहरा भयदा भयहारिका ॥२४॥
भयप्रदा भया भीता अभीमा भीमनादिनी । सुन्दरी शोभना सत्या क्षेम्या क्षेमकरी तथा ॥२५॥
सिन्दूराञ्चितसिन्दूरा सिन्दूरसदृशाकृतिः । रक्तारंजितनासा च सुनासा निम्ननासिका ॥२६॥
खर्वा लम्बोदरी दीर्घा दीर्घघोणा महाकुचा । कुटिला चञ्चला चण्डी चण्डनाद प्रचण्डिका ॥२७॥
अतिचण्डा महाचण्डा श्रीचण्डा चण्डवेगिनी । चाण्डाली चण्डिका चण्डशब्दरूपा च चञ्चला ॥२८॥
चम्पा चम्पावती चोस्ता तीक्ष्णतीक्ष्णा प्रिया क्षतिः । जलदा जयदा योगा जगदानन्दकारिणी ॥२९॥
जगद्वन्द्या जगन्माता जगती जगतः क्षमा । जन्या जयजनेत्री च जयिनी जयदा तथा ॥३०॥
जननी च जगद्धात्री जयाख्या जयरूपिणी । जगन्माता जगन्मान्या जयश्रीर्जयकारिणी ॥३१॥
जयिनी जयमाला च जया च विजया तथा । खड्गिनी खड्गरूपा च सुसंगा खड्गधारिणी ॥३२॥
खड्गरूपा खड्गकरा खड्गिनी खड्गवल्लभा । खड्गदा खड्गभावा च खड्गदेहसमुद्भवा ॥३३॥
खड्गा खड्गधरा खेला खड्गिनी खड्गमण्डिनी । शंखिनी चापिनी देवी वज्रिणी शूलिनी मतिः ॥३४॥
बलिनी भिन्दिपाली च पाशिनी चांकुशी शरी । धनुषी चटकी चर्म्मादंती च कर्णनालिकी ॥३५॥
मुसली हलरूपा च तूणीरगणनासिनी । तूणालया तूणहरा तूणसंभवरूपिणी ॥३६॥
सुतूणी तूणखेदा च तूणांगी तूणवल्लभा । नानास्त्रधारिणी देवी नानाशस्त्रसमुद्भवा ॥३७॥
लाक्षा लक्षहरा लाभा सुलाभा लाभनाशिनी । लाभहारा लाभकरा लाभिनी लाभरूपिणी ॥३८॥
धरित्री धनदा धान्या धान्यरूपा धरा धनुः । धुरशब्दा धुरा मान्या धरांगी धननाशिनी ॥३९॥
धनहा धनलाभा च धनलभ्या महाधनुः । अशांता शान्तिरूपा च श्वासमार्गनिवासिनी ॥४०॥
गगणा गणसेव्या च गणांगा वागवल्लभा । गणदा गणहा गम्या गमनागमसुन्दरी ॥४१॥
गम्यदा गणनाशी च गदहा गदवर्द्धिनी । स्थैर्य्या च स्थैर्य्यनाशा च स्थैर्य्यांतकारिणी कुला ॥४२॥
दात्री कर्त्रीप्रिया प्रेमा प्रियदा प्रियवर्द्धिनी । प्रियहा प्रियभव्या च प्रियप्रेमांघ्रिपा तनुः ॥४३॥
प्रियजा प्रियभव्या च प्रियस्था भवनस्थिता । सुस्थिरा स्थिररूपा च स्थिरदा स्थैर्य्यवर्हिणी ॥४३॥
चञ्चला चपला चोला चपलांगनिवासिनी । गौरी काली तथा च्छिन्ना माया मायाहरप्रिया ॥४५॥
सुन्दरी त्रिपुरा भव्या त्रिपुरेश्वरवासिनी । त्रिपुरनाशिनी देवी त्रिपुरप्राणहारिणी ॥४६॥
भैरवी भैरवस्था च भैरवस्य प्रिया तनुः । भवांगी भैरवाकारा भैरवप्रियवल्लभा ॥४७॥
कालदा कालरात्रिश्च कामा कात्यायनी क्रिया । क्रियदा क्रियहा क्लैव्या प्रियप्राणक्रिया तथा ॥४८॥
क्रींकारी कमला लक्ष्मीः शक्तिः स्वाहा विभुः प्रभुः । प्रकृतिः पुरुषश्चैव पुरुषा पुरुषाकृतिः ॥४९॥
परमः पुरुषश्चैव माया नारायणी मतिः । ब्राह्मी महेश्वरी चैव कौमारी वैष्णवी तथा ॥५०॥
वाराही चैव चामुण्डा इन्द्राणी हरवल्लभा । भार्गी माहेश्वरी कृष्णा कात्यायन्यपि पूतना ॥५१॥

राक्षसी डाकिनी चित्रा विचित्रा विभ्रमा तथा । हाकिनी राकिनी भीता गंधर्वा गंधवाहिनी ॥५२॥
केकरी कोटराक्षी च निर्मांसा लूकमांसिका । ललज्जिह्वा सुजिह्वा च बालदा बालदायिनी ॥५३॥
चन्द्रा चन्द्रप्रभा चान्द्री चन्द्रकांतिसुतत्परा । अमृता मानदा पूषा तुष्टिः पुष्टी रतिर्धृतिः ॥५४॥
शशिनी चन्द्रिका कांतिर्ज्योत्स्ना श्रीः प्रीतिरंगदा । पूर्णा पूर्णामृता कल्पलतिका कल्पदानदा ॥५५॥
सुकल्पा कल्पहस्ता च कल्पवृक्षकरी हनुः । कल्पाख्या कल्पभव्या च कल्पानन्दकवन्दिता ॥५६॥
सूचीमुखी प्रेतमुखी च उल्कामुखी महामुखी । उग्रमुखी च सुमुखी काकास्या विकटानना ॥५७॥
कृकलास्या च संध्यास्या मुकुलीशा रमाकृतिः । नानामुखी च नानास्या नानारूपप्रधारिणी ॥५८॥
विश्वार्च्या विश्वमाता च विश्वाख्या विश्वभाविनी । सूर्य्या सूर्य्यप्रभा शोभा सूर्य्यमण्डलसंस्थिता ॥५९॥
सूर्य्यकांतिः सूर्य्यकरा सूर्य्याख्या सूर्य्यभावना । तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः ॥६०॥
सुरदा भोगदा विश्वा बोधिनी धारिणी क्षमा । युगदा योगहा योग्या योग्यहा योगवर्द्धिनी ॥६१॥
वह्निमण्डलसंस्था च वह्निमण्डलमध्यगा । वह्निमण्डलरूपा च वह्निमण्डलसंज्ञका ॥६२॥
वह्नितेजा वह्निरागा वह्निदा वह्निनाशिनी । वह्निक्रिया वह्निभुजा कला वह्निस्थिता सदा ॥६३॥
धूम्रार्चिषा चोज्ज्वलिनी तथा वै विस्फुलिंगिनी । शूलिनी वै स्वरूपा च कपिला हव्यवाहिनी ॥६४॥
नानातेजस्विनी देवी परब्रह्मकुटुम्बिनी । ज्योतिर्ब्रह्ममयी देवी परब्रह्मस्वरूपिणी ॥६५॥
परमात्मा परा पुण्या पुण्यदा पुण्यवर्द्धिनी । पुण्यदा पुण्यनाम्नी च पुण्यगंधा प्रिया तनुः ॥६६॥
पुण्यदेहा पुण्यकरा पुण्यनिन्दकनिन्दका । पुण्यकालकरा पुण्या सुपुण्या पुण्यमालिका ॥६७॥
पुण्यखेला पुण्यकेली पुण्यनामसमा पुरा । पुण्यसेव्या पुण्यखेल्या पुराणपुण्यवल्लभा ॥६८॥
पुरुषा पुरुषप्राणा पुरुषात्मस्वरूपिणी । पुरुषांगी च पुरुषी पुरुषस्य कला सदा ॥६९॥
सुपुष्पा पुष्पकप्राणा पुष्पहा पुष्पवल्लभा । पुष्पप्रिया पुष्पहारा पुष्पवन्दकवन्दका ॥७०॥
पुष्पहा पुष्पमाला च पुष्पनिन्दकनाशिनी । नक्षत्रप्राणहंत्री च नक्षत्रालक्ष्यवन्दका ॥७१॥
लक्षमाल्या लक्षहारा लक्ष्यालक्ष्यस्वरूपिणी । नक्षत्राणी सुनक्षत्रा नक्षत्राहा महोदया ॥७२॥
महामाल्या महामान्या महती मातृपूजिता । महामहाकनीया च महाकालेश्वरी महा ॥७३॥
महास्या वन्दनीया च महाशब्दनिवासिनी । महाशंखेश्वरी मीना मत्स्यगंधा महोदरी ॥७४॥
लम्बोदरी च लम्बोष्ठी लम्बनिम्नतनूदरी । लम्बोष्ठी लम्बनासा च लम्बघोणा ललत्सुका ॥७५॥
अतिलम्बा महालम्बा सुलम्बा लम्बवाहिनी । लम्बार्हा लम्बशक्तिश्च लम्बस्था लम्बपूर्विका ॥७६॥
चतुर्घण्टा महाघण्टा घण्टानाद- प्रिया सदा । वाद्यप्रिया वाद्यरता सुवाद्या वाद्यनाशिनी ॥७७॥
रमा रामा सुबाला च रमणीयस्वभाविनी । सुरम्या रम्यदा रम्भा रम्भोरू रामवल्लभा ॥७८॥
कामप्रिया कामकरा कामांगी रमणी रतिः । रतिप्रिया रतिरती रतिसेव्या रतिप्रिया ॥७९॥
सुरभिः सुरभीशोभा दिक्शोभाऽशुभनाशिनी । सुशोभा च महाशोभाऽतिशोभा प्रेततापिनी ॥८०॥
लोभिनी च महालोभा सुलोभा लोभवर्द्धिनी । लोभांगी लोभवंद्या च लोभाही लोभवासका ॥८१॥

लोभप्रिया महालोभा लोभनिन्दकनिन्दका । लोभांगवासिनी गंधा विगंधा गंधनाशिनी ॥८२॥
गंधाङ्गी गंधपुष्टा च सुगंधा प्रेमगंधिका । दुर्गंधा पूतिगंधा च विगंधा चातिगंधिका ॥८३॥
पद्मांतिका पद्मवहा पद्मप्रियप्रियंकरी । पद्मनिन्दकनिन्दा च पद्मसंतोषवाहना ॥८४॥
रक्तोत्पलवरा देवी रक्तोत्पलप्रिया सदा । रक्तोत्पलसुगंधा च रक्तोत्पलनिवासिनी ॥८५॥
रक्तोत्पलमहामाला रक्तोत्पलमनोहरा । रक्तोत्पलसुनेत्रा च रक्तोत्पलस्वरूपधृक् ॥८६॥
वैष्णवी विष्णुपूज्या च वैष्णवांगनिवासिनी । विष्णुपूजकपूज्या च वैष्णवे संस्थिता तनुः ॥८७॥
नारायणस्य देहस्था नारायण मनोहरा । नारायणस्वरूपा च नारायणमनःस्थिता ॥८८॥
नारायणांगसम्भूता नारायणप्रिया तनुः । नारी नारायणी गण्या नारायणगृहप्रिया ॥८९॥
हरपूज्या हरश्रेष्ठा हरस्य - वल्लभा क्षमा । संहारी हरदेहस्था हरपूजनतत्परा ॥९०॥
हरदेहसमुद्भूता हरांगवासिनी कुहूः । हरपूजकपूज्या च हरवन्दकतत्परा ॥९१॥
हरदेहसमुत्पन्ना हरक्रीडासदागतिः । सुगणा - संगरहिता असंगा संगनाशिनी ॥९२॥
निर्जना विजना दुर्गा दुर्गक्लेशनिवारिणी । दुर्गदेहांतका दुर्गारूपिणी दुर्गतस्थिता ॥९३॥
प्रेतप्रिया प्रेतकरा प्रेतदेहसमुद्भवा । प्रेतांगवासिनी प्रेता प्रेतदेहविमर्द्दिका ॥९४॥
डाकिनी योगिनी कालरात्रिः कालप्रिया सदा । कालरात्रिहरा काली कृष्णदेहा महातनुः ॥९५॥
कृष्णांगी कुटिलांगी च वज्रांगी वज्ररूपधृक् । नानादेहधरा धन्या षट्चक्रक्रमवासिनी ॥९६॥
मूलाधारनिवासा च मूलाधारस्थिता सदा । वायुरूपा महारूपा वायुमार्गनिवासिनी ॥९७॥
वायुयुक्ता वायुकरा वायुपूरकपूरका । वायुरूपधरा देवी सुषुम्नामार्गगामिनी ॥९८॥
देहस्था देहरूपा च देहध्येया सुदेहिका । नाडीरूपा महीरूपा नाडीस्थाननिवासिनी ॥९९॥
इडा च पिंगला चैव सुषुम्नामध्यवासिनी । सदाशिवप्रियकरी मूलप्रकृतिरूपधृक् ॥१००॥
अमृतेशी महाशाली श्रृंगारांगनिवासिनी । उत्पत्तिस्थितिसंहारिप्रलया - पदवासिनी ॥१०१॥
महाप्रलययुक्ता च सृष्टिसंहारकारिणी । स्वधा स्वाहा हव्यवाहा हव्या हव्यप्रिया सदा ॥१०२॥
हव्यस्था हव्यभक्षा च हव्यदेहसमुद्भवा । हव्यक्रीडा कामधेनुस्वरूपा रूपसम्भवा ॥१०३॥
सुरभिर्नन्दिनी पुण्या यज्ञांगी यज्ञसंभवा । यज्ञस्था यज्ञदेहा च योनिजा योनिवासिनी ॥१०४॥
अयोनिजा सती सत्या असती कुटिला तनुः । अहल्या गौतमी गम्या विदेहा देहनाशिनी ॥१०५॥
गांधारी द्रौपदी दूती शिवप्रिया त्रयोदशी । पौर्णमासी पञ्चदशी पञ्चमी च चतुर्दशी ॥१०६॥
षष्ठी च नवमी चैव अष्टमी दशमी तथा । एकादशी द्वादशी च द्वाररूपाऽभयप्रदा ॥१०७॥
संक्रांतिः सामरूपा च कुलीना कुलनाशिनी । कुलकांता कृशा कुम्भा कुम्भदेहविवर्द्धिनी ॥१०८॥
विनीता कुलवत्यर्था अंतरी चानुगाप्युषा । नदीसागरदा शान्तिः शान्तिरूपा सुशान्तिका ॥१०९॥
आशा तृष्णा क्षुधा क्षोभ्या क्षोभरूपनिवासिनी । गङ्गासागरगा कांतिः श्रुतिः स्मृतिर्द्धृतिर्मही ॥११०॥
दिवा रात्रिः पंचभूतदेहा चैव सुदेहिका । तण्डुला च्छिन्नमस्ता च नागयज्ञोपवीतिनी ॥१११॥

वर्णिनी डाकिनी शक्तिः कुरुकुल्ला सुकुल्लका । प्रत्यंगिराऽपरा देवा अजिता जयदायिनी ॥११२॥
जया च विजया चैव महिषासुरघातिनी । मधुकैटभहंत्री च चण्डमुण्डविनाशिनी ॥११३॥
निशुंभशुंभहननी रक्तबीजक्षयंकरी । काशी काशीनिवासा च मधुरा पार्वती परा ॥११४॥
अपर्णा चण्डिका देवी मृडानी चाम्बिका कला । शुक्ला कृष्णा वर्ण्यवर्णा शरदिन्दुकलाकृतिः ॥११५॥
रुक्मिणी राधिका चैव भैरव्याः परिकीर्तितम् । अष्टाधिकसहस्त्रं तु देवीनामानुकीर्त्तनात् ॥११६॥
महापातकयुक्तोऽपि मुच्यते नात्र संशयः । ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ॥११७॥
महापातक कोट्यस्तु तथा चैवोपपातकम् । स्तोत्रेण भैरवोक्तेन सर्वनश्यति तत्क्षणात् ॥११८॥
सर्वं वा श्लोकमेकं वा पठनात्स्मरणादपि । पठेद्वा पाठयेद्वापि सद्यो मुच्येत बन्धनात् ॥११९॥
राजद्वारे रणे दुर्गे संकटे गिरिदुर्गमे । प्रांतरे पर्वते वापि नौकायां वा महेश्वरि ॥१२०॥
वह्निदुर्गभये प्राप्ते सिंहव्याघ्रभयाकुले । पठनात् स्मरणान्मर्त्यो मुच्यते सर्वसंकटात् ॥१२१॥
अपुत्रो लभते पुत्रं दरिद्रो धनवान्भवेत् । सर्वशास्त्रपरो विप्रः सर्वयज्ञफलं लभेत् ॥१२२॥
अग्निवायुजलस्तंभं गतिस्तंभं विवस्वतः । मारणे द्वेषणे चैव तथोच्चाटे महेश्वरि ॥१२३॥
गोरोचनाकुंकुमेन लिखेत्स्तोत्रमनन्यधीः । गुरुणा वैष्णवैर्वापि सर्वयज्ञफलं लभेत् ॥१२४॥
वशीकरणमंत्रैर्वा जायंते सर्वसिद्धयः । प्रातःकाले शुचिर्भूत्वा मध्याह्ने च निशामुखे ॥१२५॥
पठेद्वा पाठयेद्वापि सर्वयज्ञफलं लभेत् । वादी मूको भवेद्दुष्टो राजा च सेवको यथा ॥१२६॥
आदित्यमंगलदिने गुरौ वापि महेश्वरि । गोरोचनाकुंकुमेन लिखेत्स्तोत्रमनन्यधीः ॥१२७॥
धृत्वा सुवर्णमध्यस्थं सर्वान् कामानवाप्नुयात् । स्त्रीभिर्वामकरे धार्य्यं पुंभिर्दक्षकरे तथा ॥१२८॥
आदित्यमंगलदिने गुरौ वापि महेश्वरि । शनैश्चरे लिखेद्वापि सर्वासिद्धिं लभेद्ध्रुवम् ॥१२९॥
प्रांतरे वा श्मशाने वा निशायामर्द्धरात्रके । शून्यागारे च देवेशि लिखेद्यत्नेन साधकः ॥१३०॥
सिंहराशौ गुरुगते कर्कटस्थे दिवाकरे । मीनराशौ गुरुगते लिखेद्यत्नेन साधकः ॥१३१॥
रजस्वलाभगं दृष्ट्वा तत्रस्थो विलिखेत्सदा । सुगंधिकुसुमैः शुक्लैः सुगन्धिगंधचन्दनैः ॥१३२॥
मृगनाभि – मृगमदैर्विलिखेद्यत्नपूर्वकम् । लिखित्वा च पठित्वा च धारयेच्चाप्यनन्यधीः ॥१३३॥
कुमारीं पूजयित्वा च नारीश्चापि प्रपूजयेत् । पूजयित्वा च कुसुमैर्गंधचन्दन वस्त्रकैः ॥१३४॥
सिन्दूररक्तकुसुमैः पूजयेद्भक्तियोगतः । अथवा पूजयेद्देवि कुमारीर्दश नान्यधीः ॥१३५॥
सर्वाभीष्टफलं तत्र लभते तत्क्षणादपि । नात्र सिद्ध्याद्यपेक्षास्ति न वा मित्रारिदूषणम् ॥१३६॥
न विचार्य्यं च देवेशि जपमात्रेण सिद्धिदम् । सर्वदा सर्वकालेषु षट्साहस्त्रप्रमाणतः ॥१३७॥
बलिं दत्त्वा विधानेन प्रत्यहं पूजयेच्छिवाम् । स्वयंभूकुसुमैः पुष्पैर्बलिदानं दिवानिशम् ॥१३८॥
पूजयेत्पार्वतीं देवीं भैरवीं त्रिपुरात्मिकाम् । ब्राह्मणान्भोजयेन्नित्यं दश वा द्वादशं तथा ॥१३९॥
अनेन विधिना देवि बालां नित्यं प्रपूजयेत् । मासमेकं पठेद्यस्तु त्रिसंध्यं विधिनाऽमुना ॥१४०॥
अपुत्रो लभते पुत्रं निर्द्धनो धनवान्भवेत् । सदा चानेन विधिना तथा मासत्रयेण च ॥१४१॥

कृतकार्यो भवेद्देवि तथा मासचतुष्टये । दीर्घरोगात्प्रमुच्येत पञ्चमे कविराड् भवेत् ॥१४२॥
सर्वैश्वर्य्यं लभेद्देवि मासषट्के तथैव च । सप्तमे खेचरत्वं च अष्टमे च बृहद्द्युतिः ॥१४३॥
नवमे सर्वसिद्धिः स्याद्दशमे लोकपूजितः । एकादशे राजवश्यो द्वादशे तु पुरन्दरः ॥१४४॥
वारमेकं पठेद्यस्तु प्राप्नुयात् पूजने फलम् । समग्रं श्लोकमेकं वा यः पठेत्प्रयतः शुचिः ॥१४५॥
स पूजाफलमाप्नोति भैरवेण च भाषितम् । आयुष्मत्प्रीतियोगे च ब्राह्मैन्द्रे च विशेषतः ॥१४६॥
पंचम्यां च तथा षष्ठ्यां यत्र कुत्रापि तिष्ठति । शंका न विद्यते तत्र न च मायादिदूषणम् ॥१४७॥
वारमेकं पठेन्मर्त्यो मुच्यते सर्वसंकटात् । किमन्यद्बहुना देवि सर्वाभीष्टफलं भवेत् ॥१४८॥

॥इति श्रीविश्वसारे महाकालविरचितं श्रीमत्त्रिपुरभैरवी सहस्रनाम स्तोत्रं समाप्तम् ॥

॥ इति भैरवी तंत्रं समाप्तम् ॥

॥ श्री छिन्नमस्ता (प्रचण्ड चण्डिका) तंत्रम् ॥

छिन्नमस्ता दशमहाविद्याओं में षष्ठी महाविद्या हैं। इनका दूसरा नाम "**प्रचण्ड चण्डिका**" भी हैं। विद्यात्रयी में इनका दूसरा स्थान हैं। इस विद्या का प्रयोग "**मणिपूर चक्र**" में करना चाहिये। योगी लोगों का ध्यान जब ऊपर "**रोधिनी**" नाड़ी के पास वायु के अवरोध होने पर रुक जाता हैं तब इस "**कपालवेधनी**" विद्या का सहारा लेते हैं। यह विद्या उग्र हैं, शास्त्रज्ञान हेतु यह विद्या उत्तम हैं। शिवशक्ति के विपरीत रति आलिंगन पर आप स्थित हैं एक हाथ में खड्ग दूसरे में अपना मस्तकलिये हैं अपने कटे हुये स्कंध से रक्त की तीन धारायें जो निकलती हैं उनमें एक तो स्वयं पीती हैं अन्य दो धाराओं से अपनी "**वर्णिनी**" एवं "**डाकिनी**" नाम की सहेलियों को पिलाकर तृप्त करती हैं। अतः यह इडा पिंगला व सुषुम्ना त्रिनाड़ी का संधान कर योग मार्ग में सिद्धि प्रशस्त करती हैं।

जो देवि अपनी सहेलियों की क्षुधा को शांत करने के लिये अपने रुधिर से उन्हे तृप्त कर सकती हैं तो वह देवी अपने पुत्रवत् भक्तों के लिये क्या कुछ नहीं कर सकती, अर्थात् संकट शीघ्र हरने वाली हैं। भगवती छिन्नमस्त स्वरूप हे अतः इस देवी के नेत्र इनके हृदय में है। वज्रानाड़ी पर आपका अधिकार है तथा हिरण्यकश्यपु और वैरोचन का मनोरथ सिद्ध करने वाली होने से **वज्रवैरोचनीया** कहते हैं। वैरोचन अग्नि को भी कहते हैं। बिरले साधकों के अनेक किस्से सुनने में आते हैं। महाराष्ट्र में एक अच्छे उपासक थे उनसे कोई मिलने जाता तो कभी-कभी व्यक्ति को उनका शिर दिखाई नहीं देता था। बंद कमरे में विशिष्ट साधक जो साधना करते हैं उससे अंग छेदन साधना अंतर्गत साधक के हाथ, पैर, शिर छिन्न-भिन्न होकर अलग अलग कोने में हो जाते हैं तथा क्रम पूर्ण होने पर सभी अंग सिमट कर एक हो जाते है। अर्थात् उसका शरीर आकाश तत्वमय होजाता है, अब तो ऐसे साधक असंभव से लगते हैं।

देवी गले में हड्डियों की माला व नाग यज्ञोपवीत धारण किये हुये है। मेरा यह अनुभव है कि शांत स्थिर चित्त से उपासना करने पर देवी शांतभाव ही प्रकट करती है। उग्र व क्रोधमुद्रा में तापस भाव से उग्रउपासना करने पर ही उग्रस्वरूप में दर्शन देती है परन्तु ऐसी स्थिति में साधक के उच्चाटन का भय अधिक रहता है।

मेरे अनुमान से इसकी साधना का अधिकारी दीक्षित व्यक्ति जो नवार्ण मन्त्र के २०-२५ लाख या त्रिपुरसुन्दरी के १६ लाख जप अथवा भैरव के १२ लाख जप कर चुका हो ध्यान योग का अभ्यास हो उसी को इसकी साधना करनी चाहिये।

भगवती के मंत्र बीजाक्षरों में महाकाली, महालक्ष्मी, महासरस्वती, वरुण, इन्द्र, वसुधाधिप, त्रिपुरा एवं त्रिपुरसुंदर, गणेश चन्द्रमा, काम एवं रति की समष्टि है जैसा कि आगे मन्त्रोद्धार में समझाया गया है।

एकाक्षर मंत्र :- हूं।

त्र्यक्षर मंत्रः - ॐ हूं ॐ , हूं स्वाहा। चतुरक्षर मंत्र - ॐ हूं स्वाहा। पंचाक्षर मंत्र - ॐ हूं स्वाहा ॐ।

षडक्षर मंत्रः - १. ह्रीं क्लीं श्रीं ऐं हूं फट्। २. ह्रीं क्लीं हूं ऐं हूं फट्। ३. ह्रीं ऐं हूं ऐं हूं फट्।

द्वादशाक्षर मंत्रः – हूं वज्रवैरोचनीये हूं फट् स्वाहा।

त्रयोदशाक्षर मंत्रः – ॐ वज्रवैरोचनीये हूं हूं फट् स्वाहा।

चतुर्दशाक्षर मंत्रः – (१) ह्रीं हूं ऐं ॐ वज्रवैरोचनीये फट् स्वाहा। (२) ह्रीं हूं ऐं वज्रवैरोचनीये हूं फट् स्वाहा। (३) ॐ ह्रीं ह्रीं वज्रवैरोचनीये हूं फट् स्वाहा। (४) ॐ ह्रीं ऐं ॐ वज्रवैरोचनीये फट् स्वाहा।

पंचदशाक्षर मंत्रः – (१) हूं श्रीं ह्रीं वज्रवैरोचनीये हूं हूं फट स्वाहा। (२) श्रीं ह्रीं हूं ऐं वज्रवैरोचनीये ह्रीं हूं फट् स्वाहा। इस मंत्र के बीजाक्षरों के परिवर्तन से अलग-अलग कामना मंत्र बनते है।

षोडशाक्षर मंत्राः – १. श्रीं क्लीं ह्रीं ऐं वज्रवैरोचनीये ह्रीं हूं फट् स्वाहा।

मंत्र की व्याख्या इस प्रकार है – **श्रीं-लक्ष्मीं, क्लीं-कालीं, ह्रीं-माया भुवनेश्वरीं, ऐं-सरस्वती, व-वरुण, ज-इन्द्र, र-अग्नि, पुनः व-वसुधाधिप, ऐ-(मात्रा) त्रिपुरादेवी, पुनः र-त्रिपुरसुंदरी, ओ (मात्रा)-विजयदेवी = रो। च-चन्द्रमा, न-विनायक। ई (मात्रा) कमला = नी। ये-सरस्वती। पुनः ह्रीं-माया युग्म। फट्-वैखरीशक्ति। स्वा-काम, हा-रति।**

२. क्लीं श्रीं ह्रीं ऐं वज्रवैरोचनीये ह्रीं ह्रीं फट् स्वाहा। ३. ऐं श्रीं क्लीं ह्रीं वज्रवैरोचनीये ह्रीं ह्रीं फट् स्वाहा। ४. ह्रीं श्रीं क्लीं ऐं वज्रवैरोचनीये ह्रीं ह्रीं फट् स्वाहा। ५. श्रीं ह्रीं हूं ऐं वज्रवैरोचनीये हूं हूं फट् स्वाहा। ६. क्लीं ह्रीं हूं ऐं वज्रवैरोचनीये हूं हूं फट् स्वाहा। ७. हूं श्रीं ह्रीं ऐं वज्रवैरोचनीये हूं हूं फट् स्वाहा। ८. ऐं ह्रीं हूं श्रीं वज्रवैरोचनीये हूं हूं फट् स्वाहा। ९. ह्रीं श्रीं हूं ऐं वज्रवैरोचनीये हूं हूं फट् स्वाहा। १०. ऐं श्रीं ह्रीं हूं वज्रवैरोचनीये हूं हूं फट् स्वाहा।

कामनाभेद में पंचदशी या षोडशी मंत्रों के पहले **"हूं"** लगाने से पापनाश, **"ऐं"** से वागीत्व, **"ह्रीं"** से वश्य तथा **"श्रीं"** से लक्ष्मी प्राप्ति होवें।

सप्तदशाक्षर मंत्रः – पूर्वोक्त षोडशाक्षरी मंत्रों केआगे **ॐ** लगाने से सप्तदशाक्षरी मंत्र हो जाते हैं। **(मन्त्रमहौदधौ)** **ॐ श्रीं ह्रीं ह्रीं ऐं वज्रवैरोचनीये ह्रीं ह्रीं फट् स्वाहा।**

अष्टादशाक्षरी मंत्रः – श्रीं ह्रीं हूं ऐं वज्रवैरोचनीये श्रीं ह्रीं हूं ऐं फट् स्वाहा। ह्रीं क्लीं हूं ऐं ह्रीं हूं ऐं वज्रवैरोचनीये हुं फट् स्वाहा।

(मंत्र महार्णवे) – ॐ श्रीं ह्रीं ह्रीं क्लीं ऐं वज्रवैरोचनीये ह्रीं ह्रीं फट् स्वाहा।

एकोनविंशाक्षर मंत्रः – ॐ श्रीं ह्रीं हूं ऐं वज्रवैरोचनीये श्रीं ह्रीं हूं ऐं फट् स्वाहा। (मंत्रकोषे)

वज्रवैरोचनीय के आगे एवं पीछे क्रमभेद से क्रमशः **श्रीं हूं ह्रीं ऐं** को जोड़ने पर चार प्रकार के १९ अक्षरात्मक मंत्र बनते हैं।

विंशाक्षर मंत्रः – १९ अक्षरों वाले मंत्र चार मंत्रों के आगे **श्रीं** जोड़ने पर २० अक्षर के मंत्र बनते हैं।

एकविंशत्यक्षर मंत्रः – २० अक्षरों वाले मंत्र चार मंत्रों के आगे **ॐ** जोड़ने पर २१ अक्षर के मंत्र बनते हैं।

॥ अस्य पूजा–प्रयोग विधानम् ॥

कुल्लुकादि निर्णयः– सेतु, महाकेतु, कुल्लुका बगलामुखी के अनुसार जाने। मंत्र प्रयोग के प्रारंभ एवं अन्त में **"ॐ ह्रीं ॐ"** एक सौ आठ बार जपने से मंत्र सिद्धिप्रद होता है।

विनियोग:- **अस्य शिरश्छिन्ना मंत्रस्य भैरव ऋषिः, सम्राट् छन्दः, छिन्नमस्ता देवता, ह्रींकार द्वयं बीजम्, स्वाहा शक्तिः। अभीष्ट सिद्धये जपे विनियोगः।** (अन्यत्र - " **क्रोधभैरव ऋषिः** भी लिखा है'')

ऋष्यादि न्यास- **ॐ भैरव ऋषये नमः शिरसि, सम्राट् छन्दसे नमः मुखे, छिन्नमस्ता देवतायै नमः हृदये, ह्रींह्रीं बीजाय नमः गुह्ये, स्वाहा शक्तये नमः पादयोः। विनियोगाय नमः सर्वाङ्गे।** इति ऋष्यादिन्यास।

करन्यास- **ॐ आं खड्गाय स्वाहा अंगुष्ठयोः, ॐ ईं सुखड्गाय स्वाहा तर्जन्योः, ॐ ऊं वज्राय स्वाहा मध्यमयोः, ॐ ऐं पाशाय स्वाहा अनामिकयोः, ॐ औं अंकुशाय स्वाहा कनिष्ठयोः, ॐ अः सुरक्षरक्ष ह्रीं ह्रीं स्वाहा करतलयोः।** इति करन्यासः।

हृदयादि षडङ्गन्यास :- **ॐ आं खड्गाय हृदयाय नमः स्वाहा, ॐ ईं सुखड्गाय शिरसे स्वाहा, ॐ ऊं वज्राय शिखायै वषट् स्वाहा, ॐ ऐं पाशाय कवचाय हुं स्वाहा, ॐ औं अंकुशाय नेत्रत्रयाय वौषट् स्वाहा, ॐ अः सुरक्षरक्ष ह्रीं ह्रीं अस्त्राय फट् स्वाहा।**

ॐ श्रीं ह्रीं ह्रीं क्लीं ऐं वज्रवैरोचनीये ह्रीं ह्रीं फट् स्वाहा मस्तकादि पाद पर्यन्तम्। ॐ श्रीं ह्रीं ह्रीं क्लीं ऐं वज्रवैरोचनीये ह्रीं ह्रीं फट् स्वाहा पादादि मस्तकांतम्। इति त्रिवारं न्यसेत्।

॥ ध्यानम् ॥

ॐ भास्वन्मण्डलमध्यगां निजशिरश्छिन्नं विकीर्णालकं, स्फारास्यं प्रपिबद्गलात्स्वरुधिरं वामे करे बिभ्रतीम् ।
याभासक्तरतिस्मरोपरिगतां सख्यौ निजे डाकिनीवर्णिन्यौ परिदृश्य मोदकलितां श्रीछिन्नमस्तां भजे ॥१॥
तंत्रांतरेऽपि- **प्रत्यालीढपदां सदैव दधतीं छिन्नं शिरः, कर्त्रिकां दिग्वस्त्रां स्वकबंधशोणित सुधाधारां पिबंतीं मुदा ।**
नागाबद्धशिरोमणिं त्रिनयनां हृद्युत्पलालं कृतां, रत्यासक्त- मनोभवोपरि दृढां ध्यायेज्जवासन्निभाम् ॥२॥
दक्षे चातिसिता विमुक्तचिकुरा कर्त्रीं तथा खर्परं, हस्ताभ्यां दधती रजोगुणभवा नाम्नापि सा वर्णिनी ।
देव्याश्छिन्नकबंधतः पतदसृग्धारां पिबंती मुदा, नागाबद्धशिरोमणिर्मनुविदा ध्येया सदा सा सुरैः॥३॥
प्रत्यालीढपदा कबंधविगलद्रक्तं पिबंती मुदा, सैषा या प्रलये समस्तभुवनं भोक्तुं क्षमा तामसी ।
शक्तिः सापि परात्परा भगवती नाम्ना परा डाकिनी, ध्येया ध्यानपरैः सदा सविनयं भक्तेष्टभूतिप्रदा ॥४॥

अन्यत्रापि-

स्वनाभौ नीरजं ध्यायेदर्द्धं विकसितं सितम् । तत्पद्मकोशमध्ये तु मण्डलं चण्डरोचिषः ॥१॥
जपाकुसुमसंकाशं रक्तबन्धूकसन्निभम् । रजः सत्त्वतमोरेखा योनिमण्डल मण्डितम् ॥२॥
मध्ये तु तां महादेवीं सूर्य्यकोटिसमप्रभाम् । छिन्नमस्तां करे वामे धारयन्तीं स्वमस्तकम् ॥३॥
प्रसारितमुखीं देवीं लेलिहानाग्र जिह्विकाम् । पिबंती रौधिरीं धारां निजकंठविनिर्गताम् ॥४॥
विकीर्णकेशपाशां च नानापुष्प समन्विताम् । दक्षिणे च करे कर्त्रीं मुण्डमालाविभूषिताम् ॥५॥
दिगम्बरां महाघोरां प्रत्यालीढपदे स्थिताम् । अस्थिमालाधरां देवीं नागयज्ञोपवीतिनीम् ॥६॥
रतिकामोपरिष्ठां च सदा ध्यायंति मंत्रिणः । सदा षोडशवर्षीयां पीनोन्नतपयोधराम् ॥७॥
विपरीत रतासक्तौ ध्यायेद्रतिमनोभवौ । योनिमुद्रा समारूढां विचित्रासन संस्थिताम् ॥८॥
डाकिनीवर्णिनीयुक्तां वामदक्षिणयोगतः । देवीगलोच्छलद्रक्त धारापानं प्रकुर्वन्तीम् ॥९॥

वर्णिनीं लोहितां सौम्यां मुक्तकेशीं दिगम्बराम् । कपालकर्त्रिकाहस्तां वामदक्षिणयोगतः ॥१०॥
नागयज्ञोपवीताढ्यां ज्वलत्तेजोमयीमिव । प्रत्यालीढपदां विद्यां नानालंकारभूषिताम् ॥११॥
सदा द्वादशवर्षीयामस्थिमाला- विभूषिताम् । डाकिनी वामपार्श्वे तु कल्पसूर्य्यानलोपमाम् ॥१२॥
विद्युज्जटां त्रिनयनां दंतपंक्तिबलाकिनीम् । दंष्ट्राकरालवदनां पीनोन्नतपयोधराम् ॥१३॥
महादेवीं महाघोरां मुक्तकेशीं दिगम्बराम् । लेलिहानमहाजिह्वां मुण्डमालाविभूषिताम् ॥१४॥
कपालकर्त्रिकाहस्तां वामदक्षिणयोगतः । देवीं गलोच्छलद्रक्तधारापानं प्रकुर्वतीम् ॥१५॥
करस्थितकपालेन भीषणेनातिभीषणाम् । आभ्यां निषेवमाणां तां ध्यायेद्देवीं विचक्षणः ।

इति ध्यायेत्।

॥ अथ आवरण पूजनम् ॥

यंत्रोद्धार - यंत्र में त्रिकोण बनायें। उसके बाहर श्वेत, रक्त, कृष्णवर्ण के "सूर्यमण्डल" बनाये। मध्यत्रिकोण में "ॐ हुं फट्" लिखें। उसके बाद षट्कोण, अष्टदल, एवं ३ रेखाओं से युक्त भूपूर बनावें। अष्टदल में पूर्व में श्वेत, अग्निकोण में रक्त, दक्षिण में कृष्ण (काला), नैऋत्य में पीत (पीला) पश्चिम में श्वेत, वायव्य में रक्त, उत्तर में श्वेत, ईशान में कृष्ण रंग भरें। मध्यकर्णिका पीली बनावें। भूपूर के पूर्वादि द्वार- लाल, काले, श्वेत, पीले रंग के है उनमें क्षेत्रपाल गण अधिष्ठित है (हि. तंत्रसार)

॥ छिन्नमस्ता यन्त्रम् ॥

भद्रपीठ पर आधार शक्तये नमः, मं मण्डूकादि पीठ देवताभ्यो नमः से आधार शक्ति की पूजा कर **"जयादि"** नवपीठ शक्तियों की पूजा करें। (मंत्र महा., हि. तंत्रसार में चित्र व यंत्रोद्धार के अनुसार पूजाक्रम नही दिया गया है। हमने शेषक्रम देने का प्रयास किया है।)

पूर्वादिक्रमेण - **ॐ जयायै नमः, ॐ विजयायै नमः, ॐ अजितायै नमः, ॐ अपराजितायै नमः, ॐ नित्यायै नमः, ॐ विलासिन्यै नमः, ॐ दोग्ध्र्यै नमः, ॐ अघोरायै नमः।** मध्ये - **ॐ मंगलायै नमः।**

स्वर्णनिर्मित मूर्ति को ताम्रपात्र में रखें दुग्धधारा देवे अग्न्युतारण करें, प्राणप्रतिष्ठा करें।

देवी का आवाहन करें पुष्पादि से

आसन देवे - **ॐ सर्वबुद्धिप्रदे वर्णनीये सर्वसिद्धिप्रदे डाकिनीयै ॐ वज्रवैरोचनीये एह्येहि नमः।**

भैरवमत के अनुसार आधारशक्ति, कूर्म, नाग, पद्मनाल, पद्म, मण्डल, चतुरस्त्र, सत्त्व, रज, तम, रति एवं काम की पूजा कर शक्ति पूजा करें। रति व काम के ऊपर - **"ॐ वज्रवैरोचनीये देहि देहि एहि एहि गृह्ण गृह्ण स्वाहा मम सिद्धिं देहि देहि मम शत्रून् मारय मारय करालिके हुं फट् स्वाहा"।**

इसके बाद पुनः ध्यान करें - **"ॐ सर्वसिद्धिवर्णनीये सर्वसिद्धडाकिनीये वज्रवैरोचनीये इहागच्छागच्छ इहतिष्ठ इहसंन्निधेहि इह सान्निरुध्यस्व इत्येननावाह्य "हूंकार' बीजेन मूर्ति प्रकल्प।**

आं ह्रीं क्रों हंसः से प्राणप्रतिष्ठा करें।

तंत्रसार एवं मंत्रमहार्णव में आवरणपूजा में नामभेद है क्रम में कमी रही है, अतः एकदूसरे का पूरक करते हुये समष्टि पूजा दी जा रही है। आवरण पूजा विपरीत क्रम से अर्थात् भूपूर से मूल त्रिकोण तक होगी। पुष्प लेकर परिवार पूजन की आज्ञा मांगें -

ॐ संविन्मये परे देवि परामृतरसप्रिये। अनुज्ञां छिन्नके देहि परिवारार्चनाय मे॥

प्रत्येक नाम मन्त्र के बाद **पादुकां पूजयामि तर्पयामि नमः** कहें।

प्रथमावरणम् - (भूपूरे पूर्वादिक्रमेण) **ॐ वं वज्राय नमः, वज्रश्री पादुकां पूजयामि तर्पयामि नमः।** इति सर्वत्र। **ॐ शं शक्तये नमः। ॐ दं दण्डाय नमः। ॐ खं खड्गाय नमः। ॐ पां पाशाय नमः। ॐ अं अंकुशाय नमः। ॐ गं गदायै नमः। ॐ त्रिं त्रिशूलाय नमः।** इन्द्रेशानयोर्मध्ये - **ॐ पं पद्माय नमः।** वरुणनिर्ऋति मध्ये - **ॐ चं चक्राय नमः।**

इसके बाद पुष्पांजलि देवे।

ॐ अभीष्टसिद्धिं मे देहि शरणागत वत्सले। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्॥

विशेषार्घ्य से जल छोड़कर कहें **पूजितास्तर्पिताः सन्तु**। इस तरह सभी आवरणपूजा के बाद पुष्पांजलि देवें।

द्वितीयावरणम् - (भूपूरे) पूर्वादिक्रमेण - **ॐ लं इन्द्राय नमः। ॐ रं अग्नये नमः। ॐ मं यमाय नमः। ॐ क्षं निर्ऋतये नमः। ॐ वं वरुणाय नमः। ॐ यं वायवे नमः। ॐ कुं कुबेराय नमः। ॐ हं ईशानाय नमः। ॐ आं ब्रह्मणे नमः। ॐ ह्रीं अनंताय नमः।**

यहीं पर पूर्वादि द्वारों में क्षेत्रपाल गणों का पूजन करें- **पूर्वे- गं गणेशाय नमः।** दक्षिणें- **वं वटुकाय नमः।** पश्चिमे- **यां योगिन्यभ्यौ नमः।** उत्तरे- **क्षां क्षेत्रपालाय नमः।** ईशाने- **ॐ सर्वभूत दमनाय नमः।**

तृतीयावरणम् - (भूपूरे चतुर्द्वारि) **ॐ करालाय नमः। ॐ विकरालाय नमः। ॐ अतिकरालाय नमः। ॐ महाकालाय नमः।**

चतुर्थावरणम् - (अष्टदले केसरेषु) पूर्वादिक्रमेण- **ॐ लक्ष्म्यै नमः। ॐ लज्जायै नमः। ॐ मायायै नमः। ॐ वाण्यै नमः।** आग्नेयादि कोणे - **ॐ ब्रह्मणे नमः। ॐ विष्णवे नमः। ॐ रुद्राय नमः। ॐ ईश्वराय नमः।** मध्ये- **ॐ सदाशिवाय नमः।**

पंचमावरणम् - (अष्टदल मध्ये) **ॐ ह्रीं काल्यै नमः। (ॐ एकलिंगाय नमः।)ॐ वर्णिन्यै नमः। (ॐ योगिन्यै नमः।) ॐ डाकिन्यै नमः। ॐ भैरव्यै नमः। ॐ महाभैरव्यै नमः। ॐ इन्द्राक्ष्यै नमः। ॐ पिङ्गाक्ष्यै नमः।**

(ॐ असितांग्यै नमः।) ॐ संहारिण्यै नमः।

षष्ठमावरणम्– अष्टदल के मध्य में– **''हूं फट् नमः, स्वाहाय नमः''** । देवी के दक्षिण में– **ॐ सम्राटछन्दसे नमः, ॐ बीजशक्तिभ्यां नमः।** देवी के उत्तर की ओर– **ॐ सर्व वाणेभ्यो नमः।** पुनः अष्टदलाग्रे– **ॐ ब्रह्मयै नमः, माहेश्वर्यै., कौमार्यै., वैष्णव्यै., वाराह्यै., इन्द्राण्यै., चामुण्डायै., महालक्ष्म्यै.।**

सप्तमावरणम् – (षट्कोणे) आग्नेयादि कोणे) – **ॐ आं खड्गाय नमः। हृदयश्री पादुकां पूजयामि। ॐ ईं सुखड्गाय शिरसे स्वाहा। ॐ ऊं वज्राय शिखायै वषट्। ॐ ऐं पाशाय कवचाय हुं।** मध्ये – **ॐ औं अंकुशाय नेत्रत्रयाय वौषट्।** दिक्षु – **ॐ अः वसु रक्ष रक्ष ह्रीं ह्रीं अस्त्राय फट्।**

अष्टमावरणम् – (त्रिकोणे) – **ॐ ऐं छिन्नमस्तायै नमः।** देवी दक्षिणतः – **ॐ ऐं डाकिन्यै नमः। ॐ शंखनिधये नमः।** देवीवामतः – **ॐ ऐं वर्णिन्यै नमः। ॐ पद्मनिधये नमः।** तंत्रसार में डाकिनी वाम ओर तथा वर्णिनी दाँयी ओर कही है।

नवमावरणम्– (सूर्य के तीन वृत्तमण्डलो में)– **ॐ सं सत्त्वाय नमः। ॐ रं रजसे नमः। ॐ तं तमसे नमः।**

पश्चात् धूपदीप नैवेद्यादि समर्पण कर नमस्कार करें। पूजा समय व मध्यरात्रि में मत्स्यमांसादि की बलि देवे। यदि पूजा दिन में करें, बलिरात्रि को देवे तो पुनः पंचोपचार पूजन कर बलि देवें।

मंत्र – **ॐ सर्वसिद्धिप्रदे वर्णिनीये सर्वसिद्धिप्रदे डाकिनीये वज्रवैरोचनीये एह्येहि इमं बलिं गृह्ण गृह्ण मम सिद्धिं देहि ह्रीं फट् स्वाहा।**

इस देवी का मंत्र पुरश्चरण ४ लाख जप का है। पलाश बिल्व पुष्प फल से दशांश होम करें। तर्पण मार्जन कर ब्राह्मण कुमारी भोजन करायें। बिल्वपुष्प व बिल्वफल होम से लक्ष्मी प्राप्ति होवे।

॥नमस्कार मंत्रः॥

नाभौ शुद्धारविंदं तदुपरि कमल - मण्डलं चण्डरश्मेः।
संसारस्यैक- सारां त्रिभुवन- जननी धर्म- कामोदयाढ्याम् ॥
तस्मिन् मध्ये त्रिकोण त्रितय - तनुधरां छिन्नमस्तां प्रशस्ताम्।
तां वन्दे ज्ञानरूपां निखिल भयहरां योगिनी योगमुद्राम् ॥

यदि कोई स्त्री इस मंत्र को ग्रहण करे तो वह डाकिनी होती है। प्रति पुत्रादि से रहित होकर सिद्धयोगिनी के समान विचरण करती है। मालती पुष्पों के होम से वाक्सिद्धि, चंपा के होम से सुख प्राप्ति। घृताक्त १०० छागमांस खण्डों के होम से एक महीने में सब का वशीकरण करें। सफेद करवीर पुष्पों से १ लाख होम करने पर साधक रोगदोष से मुक्त होकर सुखी जीवन जीता है। लालकनेर के होम से राजा का वशीकरण होवे।

विल्बफल, पुष्प, उदुम्बर, पलाश एवं फल के होम से लक्ष्मी प्राप्ति। पायसान्न होम से कवित्व, बन्धूक पुष्प से सौभाग्य प्राप्ति तथा तिल तण्डुल होम से सभी का वशीकरण होवे।

स्त्री का रज मृगमांस होम से आकर्षण, महिषमांस से स्तंभन होवे। चिताग्नी में परमृत्कोकिल होम से शत्रु का मारण होवे। धतूर की काष्ठ एवं काक मांस से होम करें तो शत्रु मृत्यु होवें।

भुक्ति मुक्ति हेतु श्वेत, उच्चाटन हेतु नील, वशीकरण हेतु रक्त, मारण में धूम्र, स्तंभन में कनकप्रभा देवी का ध्यान करें। निर्जनस्थान में कृष्णपक्ष में रात्रिसमय पंचपुरुषगामी नवयौवना सुंदरी का विवस्त्र रूप में छिन्नमस्ता स्वरूप मानकर

पूजा करें। भूषणदानादि से संतुष्ट करें। बलिप्रदान करें, ब्राह्मण भोजन करायें तो लक्ष्मीवान पुत्रवान होवे।

॥ छिन्नमस्ता गायत्री ॥

ॐ वैरोचन्ये विद्महे छिन्नमस्तायै धीमहि तन्नो देवी प्रचोदयात्।

॥ अङ्गदेवता:॥

१ क्रोधभैरव- मंत्रो यथा- (भूतडामर तंत्रे)- ॐ वज्र ज्वालेन हन हन सर्वभूतान् हूं फट्।

इस विद्या के भैरव क्रोधभैरव है। साधना रहस्य व पुरश्चर्यार्णव में मंत्र उल्लिखित है।

साट्टहासं महारौद्रं भिन्नाञ्जन चयोपमं प्रत्यालीढं चतुर्बाहुं दक्षिणे चक्रधारिणम्।
तर्जनी वामहस्तेन तीक्ष्णदंष्ट्रा करालिनं कपाल रत्नमुकुटं त्रैलोकस्य विनायकम्।
आदित्य कोटि सङ्काशमष्टनाग विभूषितं अपराजित पदाक्रांत मुद्रावान् बलविष्टिभिः॥

२. कोकिलार्णवतंत्र के अनुसार अंगदेवता नृसिंह एवं शरभ है- नृसिंहो विष्णुराख्यातो, शरभो ब्रह्मचारीवान्।

३. विज्ञानाकर्षिणी- ॐ ब्रह्ममुखे फट् फट्। (डामर तंत्रे)

४. रक्षाकरण सुरेखा मंत्र- ॐ वज्ररेखे सुरेखे हुं हुं फट्।

॥ श्री त्रैलोक्यविजय छिन्नमस्ता कवचम् ॥

॥ देव्युवाच ॥

कथिताश्छिन्नमस्ताया या या विद्याः सुगोपिताः। त्वया नाथेन जीवेश श्रुताश्चाधिगता मया ॥१॥
इदानीं श्रोतुमिच्छामि कवचं पूर्वसूचितम्। त्रैलोक्यविजयं नाम कृपया कथ्यतां प्रभो ॥२॥

॥ भैरव उवाच ॥

शृणु वक्ष्यामि देवेशि! सर्वदेवनमस्कृते। त्रैलोक्यविजयं नामकवचं सर्वमोहनम् ॥३॥
सर्वविद्यामयं साक्षात्सुरासुर जयप्रदम्। धारणात्पठनादीशस्त्रैलोक्यविजयी विभुः ॥४॥
ब्रह्मा नारायणो रुद्रो धारणात्पठनाद्यतः। कर्ता पाता च संहर्ता भुवनानां सुरेश्वरि ॥५॥
न देयं परशिष्येभ्योऽभक्तेभ्योऽपि विशेषतः। देयं शिष्याय भक्ताय प्राणेभ्योऽप्यधिकाय च ॥६॥
देव्याश्च च्छिन्नमस्तायाः कवचस्य च भैरवः। ऋषिस्तु स्याद्विराट् छंदो देवता छिन्नमस्तका ॥७॥
त्रैलोक्यविजये मुक्तौ विनियोगः प्रकीर्तितः। हुंकारो मे शिरः पातु छिन्नमस्ता बलप्रदा ॥८॥

ह्रां ह्रूं ऐं त्र्यक्षरी पातु भालं वक्त्रं दिगंबरा । श्रीं ह्रीं ह्रूं ऐं दृशौ पातु मुंडं कर्त्रिधरापि सा ॥९॥
सा विद्या प्रणवाद्यंता श्रुतियुग्मं सदाऽवतु । वज्रवैरोचनीये हुं फट् स्वाहा च ध्रुवादिका ॥१०॥
घ्राणं पातु च्छिन्नमस्ता मुण्डकर्त्रिविधारिणी । श्रीमायाकूर्चवाग्बीजै र्वज्रवैरोचनीय हूं ॥११॥
हूं फट् स्वाहा महाविद्या षोडशी ब्रह्मरूपिणी । स्वपार्श्वे वर्णिनी चासृग्धारां पाययती मुदा ॥१२॥
वदनं सर्वदा पातु च्छिन्नमस्ता स्वशक्तिका । मुण्डकर्त्रिधरा रक्ता साधकाभीष्टदायिनी ॥१३॥
वर्णिनी डाकिनीयुक्ता सापि मामभितोऽवतु । रामाद्या पातु जिह्वां च लज्जाद्या पातु कंठकम् ॥१४॥
कूर्चाद्या हृदयं पातु वागाद्या स्तनयुग्मकम् । रमया पुटिता विद्या पार्श्वौ पातु सुरेश्वरी ॥१५॥
मायया पुटिता पातु नाभिदेशे दिगंबरा । कूर्चेण पुटिता देवी पृष्ठदेशे सदाऽवतु ॥१६॥
वाग्बीजपुटिता चैषा मध्यं पातु सशक्तिका । ईश्वरी कूर्चवाग्बीजै र्वज्रवैरोचनीय हूं ॥१७॥
हूं फट् स्वाहा महाविद्या कोटिसूर्य्यसमप्रभा । छिन्नमस्ता सदा पायादुरुयुग्मं सशक्तिका ॥१८॥
ह्रीं ह्रूं वर्णिनी जानुं श्रीं ह्रीं च डाकिनी पदम् । सर्वविद्यास्थिता नित्या सर्वांगं मे सदाऽवतु ॥१९॥
प्राच्यां पायादेकलिंगा योगिनी पावकेऽवतु । डाकिनी दक्षिणे पातु श्रीमहाभैरवी च माम् ॥२०॥
नैर्ऋत्यां सततं पातु भैरवी पश्चिमेऽवतु । इन्द्राक्षी पातु वायव्येऽसितांगी पातु चोत्तरे ॥२१॥
संहारिणी सदापातु शिवकोणे सकर्त्रिका । इत्यष्टशक्तयः पांतु दिग्विदिक्षु सकर्त्रिकाः ॥२२॥
क्रीं क्रीं क्रीं पातु सा पूर्वं ह्रीं ह्रीं मां पातु पावके । ह्रूं ह्रूं मां दक्षिणे पातु दक्षिणे कालिकावतु ॥२३॥
क्रीं क्रीं क्रीं चैव नैर्ऋत्यां ह्रीं ह्रीं च पश्चिमेऽवतु । हूं हूं पातु मरुत्कोणे स्वाहा पातु सदोत्तरे ॥२४॥
महाकाली खड्गहस्ता रक्षःकोणे सदावतु । तारो माया वधूः कूर्चं फट्कारोऽयं महामनुः ॥२५॥

खड्गकर्त्रिधरा तारा चोर्द्धदेशं सदाऽवतु ।
ह्रीं स्त्रीं हूं फट् च पाताले मां पातु चैकजटा सती ।
तारा तु सहिता खेऽव्यान्महानीलसरस्वती ॥२६॥

इति ते कथितं देव्याः कवचं मन्त्रविग्रहम् । यद्धृत्वा पठनाद्भीमः क्रोधाख्यो भैरवः स्मृतः ॥२७॥
सुरासुर मुनीन्द्राणां कर्ता हर्ता भवेत्स्वयम् । यस्याज्ञया मधुमती याति सा साधकालयम् ॥२८॥
भूतिन्याद्याश्च डाकिन्यो यक्षिण्याद्याश्च खेचराः । आज्ञां गृह्णंति तास्तस्य कवचस्य प्रसादतः ॥२९॥
एतदेव परं ब्रह्मकवचं मन्मुखोदितम् । देवीमभ्यर्च्य गंधाद्यैर्मूले - नैव पठेत्सकृत् ॥३०॥
संवत्सरकृतायास्तु पूजायाः फलमाप्नुयात् । भूर्जे विलिखितं चैतद्गुटिकां कांचनस्थिताम् ॥३१॥
धारयेद्दक्षिणे - बाहौ कंठे वा यदि वान्यतः । सर्वैश्वर्ययुतो भूत्वा त्रैलोक्यं वशमानयेत् ॥३२॥
तस्य गेहे वसेल्लक्ष्मीर्वाणी च वदनांबुजे । ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रे यांति सौम्यताम् ॥३३॥
इदं कवचमज्ञात्वा यो भजेच्छिन्नमस्तकाम् । सोऽपि शस्त्रप्रहारेण मृत्युमाप्नोति सत्वरम् ॥३४॥

॥ इति भैरवतन्त्रे भैरव भैरवीसंवादे त्रैलोक्यविजयं नाम छिन्नमस्ता कवचं समाप्तम् ॥

॥ श्री छिन्नमस्ता हृदय स्तोत्रम् ॥

॥ श्री पार्वत्युवाच ॥

श्रुतं पूजादिकं सम्यग्भवद्वक्त्राब्ज निःसृतम् । हृदयं छिन्नमस्तायाः श्रोतुमिच्छामि साम्प्रतम् ॥१॥

॥ महादेव उवाच ॥

नाद्यावधि मया प्रोक्तं कस्यापि प्राणवल्लभे । यत्त्वया परिपृष्टोऽहं वक्ष्ये प्रीत्यै तव प्रिये ॥२॥

विनियोगः – ॐ अस्य श्रीछिन्नमस्ताहृदय स्तोत्र मन्त्रस्य भैरव ऋषिः। सम्राट् छन्दः। छिन्नमस्ता देवता। हूं बीजम्। ॐ शक्तिः। ह्रीं कीलकम्। शत्रुक्षयकरणार्थे पाठे विनियोगः।

ऋष्यादिन्यासः – ॐ भैरव ऋषये नमः शिरसि। सम्राट् छन्दसे नमो मुखे। छिन्नमस्ता देवतायै नमो हृदि। हूं बीजाय नमो गुह्ये। ॐ शक्तये नमः पादयोः। ह्रीं कीलकाय नमो नाभौ। विनियोगाय नमः सर्वाङ्गे।

करन्यासः – ॐ ॐ अंगुष्ठाभ्यां नमः। ॐ हूं तर्जनीभ्यां नमः। ॐ ह्रीं मध्यमाभ्यां नमः। ॐ ऐं अनामिकाभ्यां नमः। ॐ क्लीं कनिष्ठिकाभ्यां नमः। ॐ हूं करतल करपृष्ठाभ्यां नमः। इति करन्यास।

हृदयादिषड्ङ्गन्यास :– ॐ ॐ हृदयाय नमः। ॐ हूं शिरसे स्वाहा। ॐ ह्रीं शिखायै वषट्। ॐ ऐं कवचाय हुम्। ॐ क्लीं नेत्रत्रयाय वौषट्। ॐ हूं अस्त्राय फट्।

॥ ध्यानम् ॥

रक्ताभां रक्तकेशीं करकमललसत्कर्त्रिकां कालकांतिं
विच्छिन्नात्मीय मुण्डासृगरुण बहुलोदग्रधारां पिबंतीम् ।
विघ्नाभ्रौघप्रचण्डश्वसनसमनिभां सेवितां सिद्धसंघैः पद्माक्षीं
छिन्नमस्तां छलकरदितिजच्छेदिनीं संस्मरामि ॥१॥

वन्देऽहं छिन्नमस्तां तां छिन्नमुण्डधरां पराम् । छिन्नग्रीवोच्छटाच्छन्नां क्षौमवस्त्रपरिच्छदाम् ॥२॥

सर्वदा सुरसंघेन सेवितां- घ्रिसरोरुहाम् । सेवेसकल - सम्पत्त्यै छिन्नमस्तां शुभप्रदाम् ॥३॥

यज्ञानां योगयज्ञाय या तु जाता युगे युगे । दानवांतकरीं देवीं छिन्नमस्तां भजामि ताम् ॥४॥

वैराचनीं वरारोहां वामदेवविवर्द्धिताम् । कोटिसूर्य्यप्रभां वंदे विद्युद्वर्णाक्षिमण्डिताम् ॥५॥

निजकण्ठोच्छलद्रक्तधारया या मुहुर्मुहुः । योगिनीस्तर्पयन्त्युग्रा तस्याश्चरणमाश्रये ॥६॥

हूमित्येकाक्षरं मंत्रं यदयि युक्तमानसः । यो जपेत्तस्य विद्वेषी भस्मतां याति तां भजे ॥७॥

हूं स्वाहेति मनुं सम्यग्यः स्मरत्यर्तिमान्नरः । छिनत्ति च्छिन्नमस्ताया तस्य बाधां नमामिताम् ॥८॥

यस्याः कटाक्षमात्रेण क्रूरभूतादयो द्रुतम् । दूरतः सम्पलायंते च्छिन्नमस्तां भजामि ताम् ॥९॥

क्षितितलपरिरक्षाक्षांतरोषा सुदक्षा, छलयुतखलकक्षाच्छेदने क्षांतिलक्ष्या ।
क्षितिदितिजसुपक्षा क्षोणिपाक्षय्यशिक्षा, जयतु जयतु चाक्षा च्छिन्नमस्तारिभक्षा ॥१०॥

कलिकलुषकलानां कर्त्तने कर्त्रिहस्ता, सुरकुवलयकाशा मन्दभानुप्रकाशा ।
असुरकुलकलापत्रासिकाऽम्लान मूर्तिर्जयतु, जयतुकाली छिन्नमस्ता कराली ॥११॥

भुवनभरणभूरिभ्राजमानानुभावा भवभवविभवानां भारणोद्धातभूतिः ।
द्विजकुलकमलानां भासिनी भानुमूर्तिर्भवतु भवतु वाणी छिन्नमस्ता भवानी ॥१२॥
मम रिपुगणमाशु च्छेत्तुमुग्रं कृपाणं सपदि, जननि तीक्ष्णं छिन्नमुण्डं गृहाण ।
भवतु तव यशोऽलं छिंधि शत्रूनखलान्मे, मम च परिदिशेष्टं छिन्मस्ते क्षमस्व ॥१३॥
छिन्नग्रीवा छिन्नमस्ता छिन्नमुण्ड धराऽक्षता । क्षोदक्षेमकरी स्वक्षा क्षोणीशाच्छादनक्षमा ॥१४॥
वैरोचनी वरारोहा बलिदानप्रहर्षिता । बलिपूजितपादाब्जा वासुदेवप्रपूजिता ॥१५॥
इति द्वादशनामानि च्छिन्नमस्ताप्रियाणि यः । स्मरेत्प्रातः समुत्थाय तस्य नश्यंति शत्रवः ॥१६॥

यां स्मृत्वा संति सद्यः सकलसुरगणाः सर्वदा सम्पदाढ्याः
शत्रूणां संघमाहत्य विशदवदनाः स्वस्थचित्ताः श्रयंति ।
तस्याः संकल्पवंतः सरसिजचरणं संततं संश्रयंति
साऽऽद्या श्रीशादिसेव्या सुफलतु सुतरां छिन्नमस्ता प्रशस्ता ॥१७॥

इदं हृदयमज्ञात्वा हंतुमिच्छति यो द्विषम् । कथं तस्याचिरं शत्रुर्नाशमेष्यति पार्वति ॥१८॥
यदीच्छेन्नाशनं शत्रोः शीघ्रमेतत्पठेन्नरः । छिन्नमस्ता प्रसन्ना हि ददाति फलमीप्सितम् ॥१९॥
शत्रुप्रशमनं पुण्यं समीप्सितफलप्रदम् । आयुरारोग्यदं चैव पठतां पुण्यसाधनम् ॥२०॥

॥ इति श्रीनंद्यावर्ते महादेवपार्वती संवादे श्रीछिन्नमस्ता हृदयस्तोत्रं सम्पूर्णम् ॥

॥ श्री छिन्नमस्ता स्तोत्रम् ॥

॥ ध्यानम् ॥

नाभौ शुभ्रारविन्दं तदुपरि विलसन्मण्डलं चण्डरश्मेः
संसारस्यैकसारां त्रिभुवनजननीं धर्म्मकर्म्मार्थदात्रीम् ।
तस्मिन्मध्ये त्रिभागे त्रितयतनुधारां छिन्नमस्तां प्रशस्तां
तां वन्दे छिन्नमस्तां शमनभयहरां योगिनीं योगमुद्राम् ॥१॥

॥ स्तोत्रम् ॥

नाभौ शुभ्रसरोजवक्त्र विलसद्बंधूक - पुष्पारुणं, भास्वद्भास्करमण्डलं तदुदरे तद्योनिचक्रं महत् ।
तन्मध्ये विपरीत मैथुनरतप्रद्युम्नसत्कामिनी पृष्ठस्थां तरुणार्क कोटिविलसत्तेजः स्वरूपां शिवाम् ॥१॥
वामे च्छिन्नशिरोधरां तदितरे पाणौ महत्कर्त्रिकां, प्रत्यालीढपदां दिगंतवसनामुन्मुक्तकेश - व्रजाम् ।
छिन्नात्मीयशिरः समुच्छलदसृग्धारां पिबंतीं परां, बालादित्यसमप्रकाशविलसन्नेत्र त्रयोद्भासिनीम् ॥२॥
वामादन्यत्र नालं बहुगहनगलद्रक्तधाराभिरुच्चैः, पायंतीमस्थिभूषां करकमललसत्कर्त्रि कामुग्ररूपाम् ।
रक्ताभांरक्तकेशीमपगतवसनां वर्णिनीमात्मशक्तिं, प्रत्यालीढोरुपादामरुणि तनयनां योगिनींयोनिमुद्राम् ॥३॥
दिग्वस्त्रां मुक्तकेशीं प्रलयघनघटाघोटरूपां प्रचण्डां, दंष्ट्रादुष्प्रेक्ष्य वक्रोदरविवरल सल्लोलजिह्वाग्रभासाम् ।
विद्युल्लोलाक्षियुग्मां हृदयतटलसद्भोगिनीमात्ममूर्तिं, सद्यश्छिन्नात्मकंठ प्रगलितरुधिरैर्डाकिनीं वर्द्धयंतीम् ॥४॥

ब्रह्मेशानाच्युताद्यैः शिरसि विनिहितां मंदपादारविंदैराज्ञैर्योगीन्द्रमुख्यैः प्रतिपदमनिशं चिंतितां चिंत्यरूपाम्।
संसारे सारभूतां त्रिभुवनजननीं छिन्नमस्तां प्रशस्तामिष्टां तामिष्टदात्रीं कलिकलुषहरां चेतसा चिंतयामि ॥५॥
उत्पत्तिस्थितिसंहृतीर्घटयितुं धत्ते त्रिरूपां तनुं, त्रैगुण्याज्जगतो यदीयविकृतिर्ब्रह्माच्युतः शूलभृत् ।
तामाद्यां प्रकृतिं स्मरामि मनसा सर्वार्थसंसिद्धये, यस्याः स्मेरपदारविंदयुगले लाभं भजंतेऽमराः ॥६॥
अभिलषित परस्त्रीयोगपूजापरोऽहं, बहुविधजनभावारंभसंभावितोऽहम्।
पशुजनविमुखोऽहं भैरवीसंयुतोऽहं, गुरुचरणपरोऽहं भैरवोऽहं शिवोऽहम् ॥७॥
इदं स्तोत्रं महापुण्यं ब्रह्मणा भाषित पुरा । सर्वसिद्धिप्रदं साक्षान्महापातकनाशनम् ॥८॥
यः पठेत्प्रातरुत्थाय देव्याः सन्निहितो भवेत् । तस्य सिद्धिर्भवेद्देवि वांछितार्थप्रदायिनी ॥९॥
धनं धान्यं सुतान् जायां हयं हस्तिनमेव च । वसुंधरां महाविद्यामष्टसिद्धीर्लभेद्ध्रुवम् ॥१०॥
वैयाघ्राजिनरंजितस्य जघने रम्ये प्रलंबोदरे, खर्वानिर्वचनीयसर्वसुभगे मुण्डावलीमण्डिते।
कर्त्रीं कुंदरुचिं विचित्रकलितां ज्ञाने दधाने पदेमातर्भक्तजनानुकंपिनि महामायेऽस्तु तुभ्यं नमः ॥११॥

॥ इति श्रीब्रह्मविरचितं प्रचण्डचण्डिका स्तोत्रं समाप्तम् ॥

॥ श्री छिन्नमस्ता (प्रचण्डचण्डिका स्तवराज) स्तोत्रम् ॥

आनन्दयित्रि परमेश्वरि वेदगर्भे मातः पुरंदरपुरांतरलब्धनेत्रे ।
लक्ष्मीमशेषजगतां परिभावयंतः सन्तो भजंति भवतीं धनदेशलब्ध्यै ॥१॥
लज्जानुगां विमलविद्रुमकांतिकांतां कान्तानुरागरसिकाः परमेश्वरि त्वाम् ।
ये भावयन्ति मनसा मनुजास्त एते सीमन्तिनीभिरनिशं परिभाव्यमानाः ॥२॥
मायामयीं निखिलपातककोटिकूटविद्राविणीं भृशमसंशयिनो भजन्ति ।
त्वां पद्मसुंदरतनुं तरुणारुणास्यां पाशांकुशाभयवराद्यकरां वरास्त्रैः ॥३॥
ते तर्ककर्कशधियः श्रुतिशास्त्र शिल्पैश्छंदोऽभिशोभितमुखाः सकलागमज्ञाः ।
सर्वज्ञलब्धविभवाः कुमुदेन्दुवर्णां ये वाग्भवे च भवतीं परिभावयंति ॥४॥
वज्रप्रणुन्नहृदया- समयद्रुहस्ते वैरोचने मदनमंदिरगास्यमातः ।
मायाद्वयानुगतविग्रहभूषिताऽसि दिव्यास्त्रवह्निवनितानुगताऽसि धन्ये ॥५॥
वृत्तत्रयाष्टदलवह्निपुरःसरस्य मार्तण्डमण्डलगतां परिभावयन्ति ।
ये वह्निकूटसदृशीं मणिपूरकान्तस्ते कालकंटकविडंबन चंचवः स्युः ॥६॥
कालागरुभ्रमर चंदनकुण्डगोल- खण्डैरनंगमदनोद्भवमादनीभिः ।
सिन्दूरकुंकुमपटी- रहिमैर्विधाय सन्मण्डलं तदुपरीह यजेन्मृडानीम् ॥७॥
चंचत्तडिन्मिहिरकोटिकरां विचेलामुद्यत्कबंधरुधिरां द्विभुजां त्रिनेत्राम् ।
वामे विकीर्णक च शीर्षकरे परे तामीडे परं परमकर्त्रिकया समेताम् ॥८॥

कामेश्वरांगनिलयां कलया सुधांशोर्विभ्राजमानहृदयामपरे स्मरंति ।
सुप्ताहिराजसदृशीं परमेश्वरस्थां त्वामद्रिराजतनये च समानमानाः ॥९॥

लिंगत्रयोपरिगतामपि वह्निचक्रपीठानुगां सरसिजासनसन्निविष्टाम् ।
सुप्तां प्रबोध्य भवतीं मनुजा गुरूक्तहूंकार वायुवशिभिर्मनसा भजन्ति ॥१०॥

शुभ्रासि शान्तिककथासु तथैव पीता स्तम्भे रिपोरथ च शुभ्रतरासि मातः ।
उच्चाटनेऽप्यसितकर्म सुकर्म्मणि त्वं संसेव्यसे स्फटिककांतिरनन्तचारे ॥११॥

त्वामुत्पलैर्मधुयुतैर्मधुनोपनीतैर्गव्यैः पयोविलुलितैः शतमेव कुंडे ।
साज्यैश्च तोषयति यः पुरुषस्त्रिसंध्यं षण्मासतो भवति शक्रसमो हि भूमौ ॥१२॥

जाग्रत्स्वपन्नपि शिवे तव मन्त्रराजमेवं विचिंतयति यो मनसा विधिज्ञः ।
संसारसागरसमुद्धरणे वहित्रं चित्रं न भूतजननेऽपि जगत्सु पुंसः ॥१३॥

इयं विद्या वंद्या हरिहरविरंचिप्रभृतिभिः पुरारातेरन्तः पुरमिदमगम्यं पशुजनैः ।
सुधामंदानंदैः पशुपतिसमानव्यसनिभिः सुधासेव्यैः सद्भिर्गुरुचरणसंसार चतुरैः ॥१४॥

कुंडे वा मण्डले वा शुचिरथ मनुना भावयत्येव मन्त्री, संस्थाप्योच्चैर्जुहोति प्रसवसुफलदैः पद्मपालाशकानाम् ।
हैमंक्षीरैस्तिलैर्वा समधुककुसुमैर्मालती बंधुजातीश्वेतैरब्धंसकानामपि वरसमिधा संपदे सर्वसिद्ध्यै ॥१५॥

अंधः साज्यं समांसं दधियुतमथवा योऽन्वहं यामिनीनां मध्ये देव्यै ददाति प्रभवति गृहगा श्री रमुष्यावखंडा ॥
आज्यं मांसं सरक्तं तिलयुतमथवा तंडुलं पायसं वा हुत्वा मांसं त्रिसंध्यं स भवति मनुजो भूतिभिर्भूतनाथः ॥१६॥

इदं देव्याः स्तोत्रं पठति मनुजो यस्त्रिसमयं, शुचिर्भूत्वा विश्वे भवति धनदो वासवसमः ।
वशा भूपाः कांता निखिलरिपुहन्तुः सुरगणा, भवंत्युच्चैर्वाचो यदिह ननु मासैस्त्रिभिरपि ॥१७॥

॥ इति श्रीशंकराचार्य विरचितः प्रचण्डचण्डिका स्तवराजः समाप्तम् ॥

॥ श्री छिन्नमस्ता मातृका ॥

लक्ष्मीर्लज्जा शिवा माया वाणी ब्राह्मी च वैष्णवी । रौद्रीश्वरी जया पद्मा वर्णिनी डाकिनी तथा ॥१॥
कराली विकराली च घोरा च स्वर शक्तयः । काली च खड्गिनी चण्डा भैरवी पिङ्गला तथा ॥२॥
इन्द्राणी चैव फट्कारी हारिणी योगिनी तथा । प्रकाशिनी वज्रिणी च सिता पीता रमा तथा ॥३॥
दिगम्बरी महाघोरा मुक्तकेशी चिदाश्रया । चामुण्डा छिन्नमस्ता च भीमा हूङ्कारिणी सिता ॥४॥
पद्मानना पद्मगर्भा पुष्पिणी चारुहासिनी । विजया मङ्गला कान्तिर्मालिनी तारिणी तथा ॥५॥
महोदर्यस्थिमाला च नागयज्ञोपवीतिनी । व्यञ्जनानां च सम्प्रोक्ताः शक्तयः सर्वकामदः ॥६॥

॥ श्री छिन्नमस्ताष्टोत्तर शतनाम स्तोत्रम् ॥

॥ श्रीपार्वत्युवाच ॥

नाम्नां सहस्त्रं परमं छिन्नमस्ताप्रियं शुभम् । कथितं भवता शंभो सद्यः शत्रुनिकृन्तनम् ॥१॥
पुनः पृच्छाम्यहं देव कृपां कुरु ममोपरि । सहस्त्रनामपठने ह्यशक्तो यः पुमान् भवेत् ॥२॥
तेन किं पठ्यते नाथ तन्मे ब्रूहि कृपामय ॥

॥ श्री सदाशिव उवाच ॥

अष्टोत्तरशतं नाम्नां पठ्यते तेन सर्वदा ।
सहस्त्रनामपाठस्य फलं प्राप्नोति निश्चितम् ॥३॥

विनियोगः - ॐ अस्य श्रीच्छिन्नमस्ताष्टोत्तरशतनाम स्तोत्रमन्त्रस्य सदाशिव ऋषिः । अनुष्टुप्छन्दः । श्रीछिन्नमस्ता देवता । मम सकल सिद्धिप्राप्तये पाठे विनियोगः ।

ॐ छिन्नमस्ता महाविद्या महाभीमा महोदरी । चण्डेश्वरी चण्डमाता चण्डमुण्ड - प्रभंजिनी ॥४॥
महाचण्डा चण्डरूपा चण्डिका चण्डखण्डिनी । क्रोधिनी क्रोधजननी क्रोधरूपा कुहूः कला ॥५॥
कोपातुरा कोपयुता कोपसंहारकारिणी । वज्रवैरोचनी वज्रा वज्रकल्पा च डाकिनी ॥६॥
डाकिनीकर्मनिरता डाकिनीकर्मपूजिता । डाकिनीसङ्गनिरता डाकिनीप्रेमपूरिता ॥७॥
खट्वाङ्गधारिणी खर्वा खड्गखर्प्परधारिणी । प्रेतासना प्रेतयुता प्रेतसङ्गविहारिणी ॥८॥
छिन्नमुण्डधरा छिन्नचण्डविद्या च चित्रिणी । घोररूपा घोरदृष्टिर्घोररावा घनोदरी ॥९॥
योगिनी योगनिरता जपयज्ञपरायणा । योनिचक्रमयी योनिर्योनिचक्रप्रवर्तिनी ॥१०॥
योनिमुद्रा योनिगम्या योनियंत्रनिवासिनी । यंत्ररूपा यंत्रमयी यंत्रेशी यंत्रपूजिता ॥११॥
कीर्त्या कपर्द्दिनी काली कङ्काली कलविकारणी । आरक्ता रक्तनयना रक्तपानपरायणा ॥१२॥
भवानी भूतिदा भूतिर्भूतिदात्री च भैरवी । भैरवाचारनिरता भूतभैरव सेविता ॥१३॥
भीमा भीमेश्वरी देवी भीमनाद परायणा । भवाराध्या भवनुता भवसागर तारिणी ॥१४॥
भद्रकाली भद्रतनुर्भद्ररूपा च भद्रिका । भद्ररूपा महाभद्रा सुभद्रा भद्रपालिनी ॥१५॥
सुभव्या भव्यवदना सुमुखी सिद्धसेविता । सिद्धिदा सिद्धिनिवहा सिद्धा सिद्धनिषेविता ॥१६॥
शुद्धदा सुभगा शुद्धा शुद्धसत्त्वा शुभावहा । श्रेष्ठा दृष्टिमयी देवी दृष्टिसंहारकारिणी ॥१७॥
शर्वाणी सर्वगा सर्वा सर्वमङ्गल- कारिणी । शिवा शांता शांतिरूपा मृडानी मदनातुरा ॥१८॥
इति ते कथितं देवि स्तोत्रं परमदुर्ल्लभम् । गुह्याद्गुह्यतरं गोप्यं गोपनीयं प्रयत्नतः ॥१९॥
किमत्र बहुनोक्तेन त्वदग्रे प्राणवल्लभे । मारणं मोहनं देवि ह्युच्चाटनमतः परम् ॥२०॥
स्तंभनादिक कर्माणि ऋद्धयः सिद्धयोऽपि च । त्रिकालपठनादस्य सर्वे सिद्ध्यंत्यसंशयम् ॥२१॥
महोत्तमं स्तोत्रमिदं वरानने मयेरितं नित्यमनन्य बुद्धयः ।
पठंतिये भक्तियुता नरोत्तमा भवेन्न तेषां रिपुभिः पराजयः ॥२२॥

॥ इति श्रीच्छिन्नमस्ताष्टोत्तर शतनामस्तोत्रं समाप्तम् ॥

॥ श्री छिन्नमस्ता सहस्रनाम स्तोत्रम् ॥

॥ श्रीदेव्युवाच ॥

देवदेव महादेव सर्वशास्त्रविदांवर । कृपां कुरु जगन्नाथ कथयस्व मम प्रभो ॥१॥
प्रचण्ड चण्डिका देवी सर्वलोक हितैषिणी । तस्याश्च कथितं सर्वं स्तवं च कवचादिकम् ॥२॥
इदानीं छिन्नमस्ताया नाम्नां साहस्रकं शुभम् । त्वं प्रकाशय मे देव कृपया भक्तवत्सल ॥३॥

॥ श्रीशिव उवाच ॥

शृणु देवि प्रवक्ष्यामि च्छिन्नायाः सुमनोहरम् । गोपनीयं प्रयत्नेन यदीच्छेदात्मनो हितम् ॥४॥
न वक्तव्यं च कुत्रापि प्राणैः कण्ठगतैरपि । तच्छृणुष्व महेशानि सर्वं तत्कथयामि ते ॥५॥
विना पूजां विना ध्यानं विना जाप्येन सिद्ध्यति । विना ध्यानं तथा देवि विना भूतादिशोधनम् ॥६॥
पठनादेव सिद्धिः स्यात्सत्यं सत्यं वरानने । पुरा कैलासशिखरे सर्वदेवसभालये ॥७॥
परिपप्रच्छ कथितं तथा शृणु वरानने ॥८॥

विनियोगः – ॐ अस्य श्री प्रचण्ड चण्डिका सहस्रनाम स्तोत्रस्य भैरव ऋषिः । सम्राट् छन्दः । प्रचण्डचण्डिका देवताः । धर्मार्थ काममोक्षार्थे पाठे विनियोगः ।

ॐ प्रचण्ड चण्डिका चण्डा चण्ड देव्यविनाशिनी । चामुण्डा च सुचण्डा च चपला चारुदेहिनी ॥९॥
ललज्जिह्वा चलद्रक्ता चारु चन्द्रनिभानना । चकोराक्षी चण्डनादा चञ्चला च मनोन्मदा ॥१०॥
चेतना चितिसंस्था च चित्कला ज्ञानरूपिणी । महाभयंकरी देवी वरदाभयधारिणी ॥११॥
भवाढ्या भवरूपा च भवबंधविमोचिनी । भवानी भुवनेशी च भवसंसारतारिणी ॥१२॥
भवाब्धिर्भवमोक्षा च भवबंधविघातिनी । भागीरथी भगस्था च भाग्यभोग्यप्रदायिनी ॥१३॥
कमला कामदा दुर्गा दुर्गबंधविमोचिनी । दुर्द्दर्शना दुर्गरूपा दुर्ज्ञेया दुर्गनाशिनी ॥१४॥
दीनदुःखहरा नित्या नित्यशोकविनाशिनी । नित्यानन्दमया देवी नित्यं कल्याणकारिणी ॥१५॥
सर्वार्थसाधनकरी सर्वसिद्धिस्वरूपिणी । सर्वक्षोभणशक्तिश्च सर्वविद्राविणी परा ॥१६॥
सर्वरञ्जनशक्तिश्च सर्वोन्मादस्वरूपिणी । सर्वज्ञा सिद्धिदात्री च सिद्धविद्यास्वरूपिणी ॥१७॥
सकला निष्कला सिद्धा कलातीता कलामयी । कुलज्ञा कुलरूपा च चक्षुरानन्ददायिनी ॥१८॥
कुलीना सामरूपा च कामरूपा मनोहरा । कमलस्था कञ्जमुखी कुञ्जरेश्वरगामिनी ॥१९॥
कुलरूपा कोटराक्षी कमलैश्वर्य्य दायिनी । कुंती ककुब्निनी कुल्ला कुरुकुल्ला करालिका ॥२०॥
कामेश्वरी काममाता कामतापविमोचिनी । कामरूपा कामसत्त्वा कामकौतुककारिणी ॥२१॥
कारुण्यहृदया क्रीं क्रीं मन्त्ररूपा च कोटरा । कौमोदकी कुमुदिनी कैवल्या कुलवासिनी ॥२२॥
केशवी केशवाराध्या केशिदैत्यनिषूदिनी । क्लेशहा क्लेशरहिता क्लेशसंघविनाशिनी ॥२३॥
कराली च करालास्या करालासुरनाशिनी । करालचर्मासिधरा करालकलनाशिनी ॥२४॥
कंकिनी कंकनिरता कपालवरधारिणी । खड्गहस्ता त्रिनेत्रा च खण्डमुण्डासिधारिणी ॥२५॥

खलहा खलहंत्री च क्षरंती खगता सदा । गङ्गागौतमपूज्या च गौरी गंधर्ववासिनी ॥२६॥
गंधर्वा गगणाराध्या गणा गंधर्वसेविता । गणत्कारगणा देवी निर्गुणा च गुणात्मिका ॥२७॥
गुणता गुणदात्री च गुणगौरवदायिनी । गणेशमाता गम्भीरा गगणा ज्योतिकारिणी ॥२८॥
गौराङ्गी च गया गम्या गौतमस्थानवासिनी । गदाधर - प्रिया ज्ञेया ज्ञानगम्या गुहेश्वरी ॥२९॥
गायत्री च गुणवती गुणातीता गुणेश्वरी । गणेशजननी देवी गणेशवरदायिनी ॥३०॥
गणाध्यक्षनुता नित्या गणाध्यक्षप्रपूजिता । गिरीशरमणी देवी गिरीशपरिवन्दिता ॥३१॥
गतिदा गतिहा गीता गौतमी गुरुसेविता । गुरुपूज्या गुरुयुता गुरुसेवनतत्परा ॥३२॥
गंधद्वारा च गंधाढ्या गंधात्मा गंधकारिणी । गीर्वाणपतिसंपूज्या गीर्वाणपतितुष्टिदा ॥३३॥
गीर्वाणाधीशरमणी गीर्वाणाधीशवन्दिता । गीर्वाणाधीशसंसेव्या गीर्वाणाधीशहर्षदा ॥३४॥
गानशक्तिर्गानगम्या गानशक्तिप्रदायिनी । गानविद्या गानसिद्धा गानसंतुष्टमानसा ॥३५॥
गानातीता गानगीता गानहर्षप्रपूरिता । गंधर्वपतिसंहृष्टा गंधर्वगुणमण्डिता ॥३६॥
गंधर्वगणसंसेव्या गंधर्वगणमध्यगा । गंधर्वगणकुशला गंधर्वगणपूजिता ॥३७॥
गंधर्वगणनिरता गंधर्वगणभूषिता । घर्घरा घोररूपा च घोरघुर्घुरनादिनी ॥३८॥
धर्मबिन्दुसमुद्भूता धर्मबिन्दुस्वरूपिणी । घण्टारवा घनरवा घनरूपा घनोदरी ॥३९॥
घोरसत्त्वा च घनदा घण्टानादविनोदनी । घोरचाण्डालिनी घोरा घोरचण्डविनाशिनी ॥४०॥
घोरदानवदमनी घोरदानवनाशिनी । घोरकर्मादिरहिता घोरकर्म्मनिषेविता ॥४१॥
घोरतत्त्वमयी देवी घोरतत्त्वविमोचनी । घोरकर्मादिरहिता घोरकर्मादिपूरिता ॥४२॥
घोरकर्मादिनिरता घोरकर्मप्रवर्द्धिनी । घोरभूतप्रमथिनी घोरवेतालनाशिनी ॥४३॥
घोरदावाग्निदमनी घोरशत्रुनिषूदिनी । घोरमन्त्रयुता चैव घोरमन्त्रप्रपूजिता ॥४४॥
घोरमन्त्रमनोभिज्ञा घोरमन्त्रफलप्रदा । घोरमन्त्रनिधिश्चैव घोरमन्त्रकृतास्पदा ॥४५॥
घोरमन्त्रेश्वरी देवी घोरमन्त्रार्थमानसा । घोरमन्त्रार्थ तत्त्वज्ञा घोरमन्त्रार्थपारगा ॥४६॥
घोरमन्त्रार्थविभवा घोरमन्त्रार्थबोधिनी । घोरमन्त्रार्थनिचया घोरमन्त्रार्थजन्मभूः ॥४७॥
घोरमन्त्रजपरता घोरमन्त्रजपोद्यता । ङकारवर्णनिलया ङकाराक्षरमण्डिता ॥४८॥
ङकारापररूपा च ङकाराक्षररूपिणी । चित्ररूपा चित्रनाडी चारुकेशी चयप्रभा ॥४९॥
चञ्चला चञ्चलाकारा चारुरूपा च चण्डिका । चतुर्वेदमयी चण्डा चण्डालगणमण्डिता ॥५०॥
चाण्डालच्छेदिनी चण्डतपोनिर्मूलकारिणी । चतुर्भुजा चण्डरूपा चण्डमुण्डविनाशिनी ॥५१॥
चन्द्रिका चन्द्रकीर्तिश्च चन्द्रकांतिस्तथैव च । चन्द्रास्या चन्द्ररूपा च चन्द्रमौलिस्वरूपिणी ॥५२॥
चन्द्रमौलिप्रिया चन्द्रमौलिसंतुष्टमानसा । चकोरबंधुरमणी चकोरबंधुपूजिता ॥५३॥
चक्ररूपा चक्रमयी चक्राकारस्वरूपिणी । चक्रपाणिप्रिया चक्रपाणिप्रीतिप्रदायिनी ॥५४॥
चक्रपाणिरसाभिज्ञा चक्रपाणिवरप्रदा । चक्रपाणिवरोन्मत्ता चक्रपाणिस्वरूपिणी ॥५५॥
चक्रपाणीश्वरी नित्यं चक्रपाणिनमस्कृता । चक्रपाणिसमुद्भूता चक्रपाणिगुणास्पदा ॥५६॥

चन्द्रावली चन्द्रवती चन्द्रकोटिसमप्रभा । चन्दनार्चितपादाब्जा चन्दनान्वितमस्तका ॥५७॥
चारुकीर्तिश्चारुनेत्रा चारुचन्द्रविभूषणा । चारुभूषा चारुवेषा चारुवेषप्रदायिनी ॥५८॥
चारुभूषाभूषिताङ्गी चतुर्वक्त्र - वरप्रदा । चतुवक्त्र - समाराध्या चतुर्वक्त्रसमाश्रिता ॥५९॥
चतुर्वक्त्र चतुर्वाहा चतुर्थी च चतुर्दशी । चित्रा चर्मण्वती चैत्री चन्द्रभागा च चम्पका ॥६०॥
चतुर्द्दशयमाकारा चतुर्दशयमानुगा । चतुर्दशयमप्रीता चतुर्दशयमप्रिया ॥६१॥
छलस्था च्छिद्ररूपा च च्छद्मदा च्छद्मराजिका । छिन्नमस्ता तथा छिन्ना छिन्नमुण्डविधारिणी ॥६२॥
जयदा जयरूपा च जयंती जयमोहिनी । जया जीवनसंस्था च जालंधरनिवासिनी ॥६३॥
ज्वालामुखी ज्वालदात्री जाज्वल्यदहनोपमा । जगद्वंद्या जगत्पूज्या जगत्त्राणपरायणा ॥६४॥
जगती जगदाधारा जन्ममृत्युजरापहा । जननी जन्मभूमिश्च जन्मदा जयशालिनी ॥६५॥
ज्वररोगहरा ज्वाला ज्वालामालाप्रपूरिता । जंभारातीश्वरी जंभारातिवैभवकारिणी ॥६६॥
जंभारातिस्तुता जंभारातिशत्रुनिषूदिनी । जयदुर्गा जयाराध्या जयकाली जयेश्वरी ॥६७॥
जयतारा जयातीता जयशङ्करवल्लभा । जयदा जह्नुतनया जलधित्रासकारिणी ॥६८॥
जलधिव्याधिदमनी जलधिज्वरनाशिनी । जंगमेशी जाड्यहरा जाड्यसंघनिवारिणी ॥६९॥
जाड्यग्रस्तजनातीता जाड्यरोगनिवारिणी । जन्मदात्री जन्महर्त्री जयघोषसमन्विता ॥७०॥
जपयोगसमायुक्ता जपयोगविनोदिनी । जपयोगप्रिया जाप्या जपातीता जयस्वना ॥७१॥
जायाभावस्थिता जाया जायाभावप्रपूरणी । जपाकुसुमसंकाशा जपाकुसुमपूजिता ॥७२॥
जपाकुसुमसम्प्रीता जपाकुसुममण्डिता । जपाकुसुमवद्भासा जपाकुसुमरूपिणी ॥७३॥
जमदग्निस्वरूपा च जानकी जनकात्मजा । झंझावातप्रमुक्ताङ्गी झोरझंकारवासिनी ॥७४॥
झंकारकारिणी झंझावातरूपा च झंकरी । अकाराणुस्वरूपा च टनटंकारनादिनी ॥७५॥
टंकारी टकुवाणी च ठकाराक्षररूपिणी । डिण्डिमा च तथा डिम्भा डिण्डुडिण्डिमनादिनी ॥७६॥
ढक्कामयी ढिलमयी नृत्यशब्दा विलासिनी । ढक्का ढक्केश्वरी ढक्काशब्दरूपा तथैव च ॥७७॥
ढक्कानादप्रिया ढक्कानादसंतुष्टमानसा । णकारा णाक्षरमयी णाक्षरादिस्वरूपिणी ॥७८॥
त्रिपुरा त्रिपुरमयी त्रिशक्तिस्त्रिगुणात्मिका । तामसी च त्रिलोकेशी त्रिपुरा च त्रयीश्वरी ॥७९॥
त्रिविद्या च त्रिरूपा च त्रिनेत्रा च त्रिरूपिणी । तारिणी तरला तारा तारकारिप्रपूजिता ॥८०॥
तारकारिसमाराध्या तारकारिवरप्रदा । तारकारिप्रसूस्तन्वी तरुणी तरलप्रभा ॥८१॥
त्रिरूपा च त्रिपुरगा त्रिशूलवरधारिणी । त्रिशूलिनी तंत्रमयी तंत्रशास्त्रविशारदा ॥८२॥
तंत्ररूपा तपोमूर्तिस्तंत्रमंत्रस्वरूपिणी । तडित्तडिल्लताकारा तत्त्वज्ञानप्रदायिनी ॥८३॥
तत्त्वज्ञानेश्वरी देवी तत्त्वज्ञानप्रमोदिनी । त्रयीमयी त्रयीसेव्या त्र्यक्षरी त्र्यक्षरेश्वरी ॥८४॥
तापविध्वंसिनी तापसंघनिर्मूलकारिणी । त्रासकर्त्री त्रासहर्त्री त्रासदात्री च त्रासहा ॥८५॥
तिथीशा तिथिरूपा च तिथिस्था तिथिपूजिता । तिलोत्तमा च तिलदा तिलप्रीता तिलेश्वरी ॥८६॥
त्रिगुणा त्रिगुणाकारा त्रिपुरी त्रिपुरात्मिका । त्रिकुटा त्रिकुटाकारा त्रिकूटाचलमध्यगा ॥८७॥

त्रिजटा च त्रिनेत्रा च त्रिनेत्रवरसुन्दरी । तृतीया च त्रिवर्षा च त्रिविधा त्रिमतेश्वरी ॥८८॥
त्रिकोणस्था त्रिकोणेशी त्रिकोणयंत्रमध्यगा । त्रिसंध्या च त्रिसंध्यार्च्या त्रिपदा त्रिपदास्पदा ॥८९॥
स्थानस्थिता स्थलस्था च धन्यस्थलनिवासिनी । थकाराक्षररूपा च स्थलरूपा तथैव च ॥९०॥
स्थूलहस्ता तथा स्थूला स्थैर्य्यरूपप्रकाशिनी । दुर्गा दुर्गार्तिहंत्री च दुर्गबंधविमोचिनी ॥९१॥
देवी दानवसंहंत्री दनुजेष्ठनिषूदिनी । दारापत्यप्रदा नित्या शंकरार्द्धाङ्गधारिणी ॥९२॥
दिव्याङ्गी देवमाता च देवदुष्टविनाशिनी । दीनदुःखहरा दीनतापनिर्मूलकारिणी ॥९३॥
दीनमाता दीनसेव्या दीनदंभविनाशिनी । दनुजध्वंसिनी देवी देवकी देववल्लभा ॥९४॥
दानवारिप्रिया दीर्घा दानवारिप्रपूजिता । दीर्घस्वरा दीर्घतनुर्द्दीर्घदुर्गतिनाशिनी ॥९५॥
दीर्घनेत्रा दीर्घचक्षुर्द्दीर्घकेशी दिगम्बरा । दिगम्बरप्रिया दांता दिगम्बरस्वरूपिणी ॥९६॥
दुःखहीना दुःखहरा दुःखसागरतारिणी । दुःखदारिद्र्यशमनी दुःखदारिद्र्यकारिणी ॥९७॥
दुःखदा दुस्सहा दुष्टखण्डनैकस्वरूपिणी । देववामा देवसेव्या देवशक्तिप्रदायिनी ॥९८॥
दामिनी दामिनीप्रीता दामिनीशतसुन्दरी । दामिनीशतसंसेव्या दामिनीदामभूषिता ॥९९॥
देवताभावसंतुष्टा देवताशतमध्यगा । दयाद्र्द्रा च दयारूपा दयादानपरायणा ॥१००॥
दयाशीला दयासारा दयासागरसंस्थिता । दशविद्यात्मिका देवी दशविद्यास्वरूपिणी ॥१०१॥
धरणी धनदा धात्री धन्या धन्यपरा शिवा । धर्म्मरूपा धनिष्ठा च धेया च धीरगोचरा ॥१०२॥
धर्म्मराजेश्वरी धर्म्मकर्म्मरूपा धनेश्वरी । धनुर्विद्या धनुर्गम्या धनुर्द्धरवरप्रदा ॥१०३॥
धर्म्मशीला धर्म्मलीला धर्म्मकर्म्मविवर्जिता । धर्म्मदा धर्म्मनिरता धर्म्मपाखण्डखण्डिनी ॥१०४॥
धर्म्मेशी धर्म्मरूपा च धर्म्मराजवरप्रदा । धर्म्मिणी धर्म्मगेहस्था धर्म्माधर्म्मस्वरूपिणी ॥१०५॥
धनदा धनदप्रीता धनधान्यसमृद्धिदा । धनधान्यसमृद्धिस्था धनधान्यविनाशिनी ॥१०६॥
धर्म्मनिष्ठा धर्म्मधीरा धर्म्ममार्गरता सदा । धर्म्मबीजकृतस्थाना धर्म्मबीजसुरक्षिणी ॥१०७॥
धर्म्मबीजेश्वरी धर्म्मबीजरूपा च धर्म्मगा । धर्म्मबीजसमुद्भूता धर्म्मबीजसमाश्रिता ॥१०८॥
धराधरपतिप्राणा धराधरपतिस्तुता । धराधरेन्द्रतनुजा धराधरेन्द्रवन्दिता ॥१०९॥
धराधरेन्द्रगेहस्था धराधरेन्द्रपालिनी । धराधरेन्द्रसर्वार्तिनाशिनी धर्म्मपालिनी ॥११०॥
नवीना निर्म्मला नित्या नागराजप्रपूजिता । नागेश्वरी नागमाता नागकन्या च नग्निका ॥१११॥
निर्लेपा निर्विकल्पा च निर्लोमा निरुपद्रवा । निराहारा निराकारा निरञ्जनस्वरूपिणी ॥११२॥
नागिनी नागविभवा नागराजपरिस्तुता । नागराजगुणज्ञा च नागराजसुखप्रदा ॥११३॥
नागलोकगता नित्यं नागलोकनिवासिनी । नागलोकेश्वरी नागभागिनी नागपूजिता ॥११४॥
नागमध्यस्थिता नागमोहसंक्षोभदायिनी । नृत्यप्रिया नृत्यवती नृत्यगीतपरायणा ॥११५॥
नृत्येश्वरी नर्तकी च नृत्यरूपा निराश्रया । नारायणी नरेन्द्रस्था नरमुण्डास्थिमालिनी ॥११६॥
नरमांसप्रिया नित्या नररक्तप्रिया सदा । नरराजेश्वरी नारीरूपा नारीस्वरूपिणी ॥११७॥
नारीगणार्च्चिता नारीमध्यगा नूतनाम्बरा । नर्मदा च नदीरूपा नदीसंगमसंस्थिता ॥११८॥

नर्मदेश्वरसम्प्रीता नर्मदेश्वररूपिणी । पद्मावती पद्ममुखी पद्मकिञ्जल्कवासिनी ॥११९॥
पट्टवस्त्रपरीधाना पद्मरागविभूषिता । परमा प्रीतिदा नित्या प्रेतासननिवासिनी ॥१२०॥
परिपूर्णरसोन्मत्ता प्रेमविह्वलवल्लभा । पवित्रासवनिष्पूता प्रेयसी परमात्मिका ॥१२१॥
प्रियव्रतपरा नित्यं परमप्रेमदायिनी । पुष्पप्रिया पद्मकोशा पद्मधर्म्मनिवासिनी ॥१२२॥
फेत्कारिणी तंत्ररूपा फेरुफेरवनादिनी । वंशिनी वंशरूपा च बगला वामरूपिणी ॥१२३॥
वाङ्मयी वसुधा धृष्या वाग्भवाख्या वरा नरा । बुद्धिदा बुद्धिरूपा च विद्या वादस्वरूपिणी ॥१२४॥
बाला वृद्धमयीरूपा वाणी वाक्यनिवासिनी । वरुणा वाग्वती वीरा वीरभूषण भूषिता ॥१२५॥
वीरभद्रार्चितपदा वीरभद्रप्रसूरपि । वेदमार्गरता वेदमंत्ररूपा वषट्प्रिया ॥१२६॥
वीणावाद्यसमायुक्ता वीणावाद्यपरायणा । वीणारवा तथा वीणाशब्दरूपा च वैष्णवी ॥१२७॥
वैष्णवाचारनिरता वैष्णवाचारतत्परा । विष्णुसेव्या विष्णुपत्नी विष्णुरूपा वरानना ॥१२८॥
विश्वेश्वरी विश्वमाता विश्वनिर्माणकारिणी । विश्वरूपा च विश्वेशी विश्वसंहारकारिणी ॥१२९॥
भैरवी भैरवाराध्या भूतभैरवसेविता । भैरवेशी तथा भीमा भैरवेश्वरतुष्टिदा ॥१३०॥
भैरवाधीशरमणी भैरवाधीशपालिनी । भीमेश्वरी भीममाता भीमशब्दपरायणा ॥१३१॥
भीमरूपा च भीमेशी भीमा भीमवरप्रदा । भीमपूजितपादाब्जा भीमभैरवपालिनी ॥१३२॥
भीमासुरध्वंसकरी भीमदुष्टविनाशिनी । भुवना भुवनाराध्या भवानी भूतिदा सदा ॥१३३॥
भयदा भयहंत्री च अभयाऽभयरूपिणी । भीमनादा विह्वला च भयभीतिविनाशिनी ॥१३४॥
मत्ता प्रमत्तरूपा च मन्दोन्मत्तस्वरूपिणी । मान्या मनोज्ञा माना च मंगला च मनोहरा ॥१३५॥
माननीया महापूज्या महामहिषमर्द्दिनी । महिषासुरहंत्री च मातंगी मयवासिनी ॥१३६॥
माध्वी मधुमयी मुद्रा मुद्रिका मंत्ररूपिणी । महाविश्वेश्वरी दूती मौलिचन्द्रप्रकाशिनी ॥१३७॥
यशःस्वरूपिणी देवी योगमार्गप्रदायिनी । योगिनी योगगम्या च याम्येशी योगरूपिणी ॥१३८॥
यज्ञांगी च योगमयी जपरूपा जपात्मिका । युगाख्या च युगांता च योनिमण्डलवासिनी ॥१३९॥
अयोनिजा योगनिद्रा योगानन्दप्रदायिनी । रमा रतिप्रिया नित्यं रतिरागविवर्द्धिनी ॥१४०॥
रमणी राससम्भूता रम्या रासप्रिया रसा । रणोत्कण्ठा रणस्था च वरा रंगप्रदायिनी ॥१४१॥
रेवती रणजैत्री च रसोद्भूता रणोत्सवा । लता लावण्यरूपा च लवणाब्धिस्वरूपिणी ॥१४२॥
लवंगकुसुमाराध्या लोलजिह्वा च लेलिहा । वशिनी वनसंस्था च वनपुष्पप्रिया वरा ॥१४३॥
प्राणेश्वरी बुद्धिरूपा बुद्धिदात्री बुधात्मिका । शमनी श्वेतवर्णा च शाङ्करी शिवभाषिणी ॥१४४॥
शाम्यरूपा शक्तिरूपा शक्तिबिन्दुनिवासिनी । सर्वेश्वरी सर्वदात्री सर्वमाता च शर्वरी ॥१४५॥
शांभवी सिद्धिदा सिद्धा सुषुम्ना - सुरभासिनी । सहस्त्रदलमध्यस्था सहस्त्रदलवर्त्तिनी ॥१४६॥
हरप्रिया हरध्येया हूँकारबीजरूपिणी । लंकेश्वरी च तरला लोममांसप्रपूजिता ॥१४७॥
क्षेम्या क्षेमकरी क्षामा क्षीरबिन्दुस्वरूपिणा । क्षिप्तचित्तप्रदा नित्या क्षौमवस्त्रविलासिनी ॥१४८॥
[illegible] ॥१४९॥

सर्वसम्पत्प्रदात्री च सम्पदापद्विभूषिता । सत्त्वरूपा च सर्वार्था सर्वदेवप्रपूजिता ॥१५०॥
सर्वेश्वरी सर्वमाता सर्वज्ञा सुरसात्मिका । सिन्धुर्मंदाकिनी गंगानदी सागररूपिणी ॥१५१॥
सुकेशी मुक्तकेशी च डाकिनी वरवर्णिनी । ज्ञानदा ज्ञानगगना सोममण्डलवासिनी ॥१५२॥
आकाश- निलया नित्या परमाकाशरूपिणी । अन्नपूर्णा महानित्या महादेवरसोद्भवा ॥१५३॥
मंगला कालिका चण्डा चण्डनादातिभीषणा । चण्डासुरस्य मथिनी चामुण्डा चपलात्मिका ॥१५४॥
चण्डी चामरकेशी च चलत्कुण्डलधारिणी । मुण्डमालाधरा नित्या खण्डमुण्डविलासिनी ॥१५५॥
खड्गहस्ता मुण्डहस्ता वरहस्ता वरप्रदा । असिचर्मधरा नित्या पाशांकुशधरा परा ॥१५६॥
शूलहस्ता शिवहस्ता घण्टानादविलासिनी । धनुर्बाणधराऽऽदित्या नागहस्ता नगात्मजा ॥१५७॥
महिषासुरहंत्री च रक्तबीजविनाशिनी । रक्तरूपा रक्तगा च रक्तहस्ता भयप्रदा ॥१५८॥
असिता च धर्म्मधरा पाशांकुशधरा परा । धनुर्बाणधरा नित्या धूम्रलोचननाशिनी ॥१५९॥
परस्था देवतामूर्तिः शर्वाणी शारदा परा । नानावर्णविभूषांगी नानारागसमापिनी ॥१६०॥
पशुवस्त्रपरीधाना पुष्पायुधधरा परा । मुक्तरंजितमालाढ्या मुक्ताहारविलासिनी ॥१६१॥
स्वर्णकुण्डलभूषा च स्वर्णसिंहासनस्थिता । सुन्दरांगी सुवर्णाभा शांभवी शकटात्मिका ॥१६२॥
सर्वलोकेशविद्या च मोहसम्मोहकारिणी । श्रेयसी सृष्टिरूपा च च्छिन्नच्छद्ममयी च्छला ॥१६३॥
छिन्नमुण्डधरा नित्या नित्यानन्दविधायिनी । नन्दा पूर्णा च रिक्ता च तिथयः पूर्णषोडशी ॥१६४॥
कुहूः संक्रांतिरूपा च पञ्चपर्वविलासिनी । पञ्चबाणधरा नित्या पञ्चमप्रीतिदा परा ॥१६५॥
पञ्चपत्राभिलाषा च पञ्चामृतविलासिनी । पञ्चाली पञ्चमी देवी पञ्चरक्तप्रसारिणी ॥१६६॥
पञ्चबाणधरा नित्या नित्यदात्री दयापरा । पललादिप्रिया नित्याऽपशुगम्या परेशिता ॥१६७॥
परा पररहस्या च परमप्रेमविह्वला । कुलीना केशिमार्गस्था कुलमार्गप्रकाशिनी ॥१६८॥
कुलाकुलस्वरूपा च कुलार्णवमयी कुला । रुक्मा च कालरूपा च काल- कम्पनकारिणी ॥१६९॥
विलासरूपिणी भद्रा कुलाकुलनमस्कृता । कुबेरवित्तधात्री च कुमारजननी परा ॥१७०॥
कुमारीरूपसंस्था च कुमारीपूजनाम्बिका । कुरंगनयना देवी दिनेशास्याऽपराजिता ॥१७१॥
कुण्डली कदली सेना कुमार्गरहिता वरा । अनंतरूपाऽनंतस्था आनन्दसिंधुवासिनी ॥१७२॥
इलास्वरूपिणी देवी इईभेदभयंकरी । इडा च पिंगला नाडी इकाराक्षररूपिणी ॥१७३॥
उमा चोत्पत्तिरूपा च उच्चभावविनाशिनी । ऋग्वेदा च निराराध्या यजुर्वेदप्रपूजिता ॥१७४॥
सामवेदेन संगीता अथर्ववेदभाषिणी । ऋकाररूपिणी ऋक्षा निरक्षरस्वरूपिणी ॥१७५॥
अहिदुर्गासमाचारा इकारार्णस्वरूपिणी । ओंकारा प्रणवस्था च ओंकारादिस्वरूपिणी ॥१७६॥
अनुलोमविलोमस्था थकारवर्णसम्भवा । पञ्चाशद्वर्णबीजाढ्या पञ्चाशन्मुण्डमालिका ॥१७७॥
प्रत्येका दशसंख्या च षोडशीच्छिन्नमस्तका । षडंगयुवतीपूज्या षडंगरूपवर्जिता ॥१७८॥
षड्वक्त्रसंश्रिता नित्या विश्वेशी खड्गदालया । मालामन्त्रमयी मन्त्रजपमाता मदालसा ॥१७९॥

सर्वविश्वेश्वरी - शक्तिः सर्वानन्दप्रदायिनी । इति श्रीच्छिन्नमस्ताया नामसाहस्त्रमुत्तमम् ॥१८०॥
पूजाक्रमेण कथितं साधकानां सुखावहम् । गोपनीयं गोपनीयं गोपनीयं न संशयः ॥१८१॥
अर्द्धरात्रे मुक्तकेशो भक्तियुक्तो भवेन्नरः । जपित्वा पूजयित्वा च पठेन्नामसहस्त्रकम् ॥१८२॥
विद्यासिद्धिर्भवेत्तस्य षण्मासाभ्यासयोगतः । येन केन प्रकारेण देवीभक्तिपरो भवेत् ॥१८३॥
अखिलान्स्तंभयेल्लोकान्राज्ञोऽपि मोहयेत्सदा । आकर्षयेद्देवशक्तिं मारयेद्देवि विद्विषम् ॥१८४॥
शत्रवो दासतां यांति यांति पापानि संक्षयम् । मृत्युश्च क्षयतां याति पठनाद्धाषणात्प्रिये ॥१८५॥
प्रशस्तायाः प्रसादेन किं न सिद्ध्यति भूतले । इदं रहस्यं परमं परं स्वस्त्ययनं महत् ॥१८६॥
धृत्वा बाहौ महासिद्धिः प्राप्यते नात्र संशयः । अनया सदृशी विद्या विद्यते न महेश्वरि ॥१८७॥
वारमेकं तु योऽधीते सर्वसिद्धीश्वरो भवेत् । कुलवारे कुलाष्टम्यां कुहूसंक्रांतिपर्वसु ॥१८८॥
यश्चेमां पठते विद्यां तस्य सम्यक्फलं शृणु । अष्टोत्तरशतं जप्त्वा पठेन्नामसहस्त्रकम् ॥१८९॥
भक्त्या स्तुत्वा महादेवि सर्वपापात्प्रमुच्यते । सर्वपापैर्विनिर्मुक्तः सर्वसिद्धीश्वरो भवेत् ॥१९०॥
अष्टम्यां वा निशीथे च चतुष्पथगतो नरः । माषभक्तबलिं दत्त्वा पठेन्नामसहस्त्रकम् ॥१९१॥
सुदर्शवामवेद्यां तु मासत्रयविधानतः । दुर्जयः कामरूपश्च महाबलपराक्रमः ॥१९२॥
कुमारीपूजनं नाम मंत्रमात्रं पठेन्नरः । एतन्मंत्रस्य पठनात्सर्वसिद्धीश्वरो भवेत् ॥१९३॥
इति ते कथितं देवि सर्वसिद्धिपरं नरः । जप्त्वा स्तुत्वा महादेवीं सर्वपापैः प्रमुच्यते ॥१९४॥
न प्रकाश्यमिदं देवि सर्वदेवनमस्कृतम् । इदं रहस्यं परमं गोप्तव्यं पशुसंकटे ॥१९५॥
इति सकलविभूतेर्हेतुभूतं प्रशस्तं पठति य इह मर्त्त्यश्छिन्नमस्तास्तवं च ।
धनद इव धनाढ्यो माननीयो नृपाणां स भवति च जनानामाश्रयः सिद्धिवेत्ता ॥१९६॥

॥ इति श्रीविश्वसारतंत्रे शिवपार्वती संवादे श्रीछिन्नमस्तासहस्त्रनामस्तोत्रं सम्पूर्णम् ॥

॥ इति छिन्नमस्ता तंत्रम् ॥

॥ धूमावती तंत्रम् ॥

धूमावती देवी जिन्हे ज्येष्ठा लक्ष्मी भी कहा है दशमहाविद्याओं में यह सातवीं महाविद्या हैं। इसका स्वरूप वृद्धा कृशकाय तथा विधवारूप में है, बालबिखरे हुये हैं रथ पर आरूढ है जिसके ऊपर काक विराजमान है। शूप इनका मुख्य अस्त्र है जिसमें समस्त विश्व को समेट कर महाप्रलय कर देती हैं। शूप व मूसल से शत्रुसंहार करती हैं भयानक रूप वक्रदंता है। **विशेष ध्यान देने की बात हैं कि** इस विद्या का **स्थायी आवाहन नहीं होता** अर्थात् इसे अपने घर में चिरकाल विराजमान होने की भावना नहीं रखनी चाहिये यह दुःख, क्लेश व दरिद्रता की अधिष्ठात्री है। अर्थात् पूजा व जप करते समय ऐसी भावना करनी चाहिये कि देवी प्रसन्न होकर मेरे समस्त विघ्न, रोग, दोष, क्लेश, प्रेतादि बाधाओं को अपने शूप में समेट कर हमारे घर से विदा हो रही है और हमें धन, लक्ष्मी, सुख, शांति का आशीर्वाद दे रही है। शत्रु निग्रह में यह भावना करनी चाहिये कि शत्रु के धन, वैभव, यश पराक्रम को अपने शूप में समेट रही है मूसल से उसे प्रताडित कर रही है। शत्रु के घर में दुःख दरिद्रता का पूर्ण निवास हो गया है। शत्रु के घर में काकपक्षी बहुसंख्या में विराजमान हैं उसका घर निर्जन होता जा रहा है। शत्रु संहार प्रयोगों में **बगलामुखी** व **काली** के प्रयोगों में ''**समयाविद्या**'' के रूप में इसका जप पूजन करना चाहिये ऐसी मेरी अभिव्यक्ति है। अगर दुर्भाग्य भी काफी समय से पीछा कर रहा हो तो दुःख दरिद्रता की इस देवी को प्रसन्न कर घर से विदा होने की प्रार्थना करनी चाहियें तो यह धन अवश्य देती है ऐसा मेरा अनुभव है। इसकी मुख्य उपासना शून्यगार में करनी चाहियें।

सप्ताक्षर मंत्रः– धूं धूमावती स्वाहा।

॥ ध्यानम् ॥

ध्यायेत् कालाभ्रनीलां विकलितवदनां काकनासां विकर्णाम् ।
संमार्जन्युक शूर्पैयुत मुसल करां वक्रदन्तां विषास्याम् ॥
ज्येष्ठां निर्वाणवेषां प्रकुटित नयनां मुक्तकेशीमुदाराम् ।
शुष्कोत्तुङ्गाति तिर्यक् स्तनभर युगलां निष्कृपां शत्रुहन्त्रीम् ॥

विनियोगः– इस मंत्र के **नारसिंह ऋषिः, पंक्तिश्छंदः, धूमावती देवता, धूं बीज, स्वाहा शक्तयः शत्रु निग्रहे जपे विनियोगः।**

षडङ्गन्यास– **धां, धीं, धूं, धैं, धौं, धः** से षडङ्गन्यास करें।

अष्टाक्षर मंत्रः– (१) **धूं धूं धूमावती स्वाहा।**

इस मंत्र के **पिप्पलाद ऋषि, निवृचछंद देवता धूमावती,** हैं। **धूं बीज, स्वाहा शक्ति** हैं।

(२) धूं धूं धूमावती ठः ठः। शाक्त प्रमोद में इसके षडङ्गन्यास **ॐ धां, ॐ धीं, ॐ धूं, ॐ धें, ॐ धौं, ॐ धः** से करने को कहा हैं।

॥ध्यानम्॥

विवर्णां चञ्चलां दीर्घां च मलिनाम्बरां। विमुक्तकुन्तलां दीर्घां विधवां विरल द्विजाम् ॥
काकध्वज - रथारूढां विलम्बित पयोधरां। शूर्पहस्तां तु रुक्षाक्षीं धूतहस्तां तरान्विताम् ॥
प्रवृद्ध - रोमणी तु भृशं जटिलं कुटिलेक्षणां। क्षुत् पिपासार्दितां नित्यं सदा कलह- तत्पराम् ॥

दशाक्षर मंत्रः- धूं धूं धूं धूमावती स्वाहा।

इस मंत्र के **ऋषि स्कन्द। पंक्ति छन्द। देवता धूमिनी। धूं बीज एवं शक्ति स्वाहा** हैं।

॥ध्यानम्॥

श्यामाङ्गीं रक्तनयनां श्याम - वस्त्रोत्तरीयकां। वामहस्ते शोधनं च दक्षहस्ते च शूर्पकम् ॥
धृत्वा विकीर्ण केशांश्च धूलिधूसर विग्रहां। लंबोष्ठीं शुभ्रदशनां लम्बमान पयोधराम् ॥
संलग्न भ्रूयुगगतां कटुदंष्ट्रोष्ठ - वल्लभां। कृसरस्तु कुलुत्थोत्थं भग्नभाण्डतले स्थितम् ॥
तिलपिष्टसमायुक्तं मुहुर्मुहुश्च भक्षितं। महिषीशृङ्ग ताटङ्कीं लम्बकर्णाति भीषणाम् ॥

चतुर्दशाक्षर मंत्रः- धूं धूं धुर धुर धूमावती क्रों फट् स्वाहा। इस मंत्र के **ऋषि क्षपणक, छन्द गायत्री, देवता धूमावती, बीज धूं, शक्ति स्वाहा तथा उच्चाटन हेतु विनियोग हैं।** अतः इस मंत्र को **शत्रु के उच्चाटन हेतु** प्रयोग करे।

काकारूढाऽति कृष्णाभा भिन्नदन्ता विरागिणी
मुक्तकेशां सुधूम्राक्षी क्षुत् - तृषार्ता रयातुरा।
चञ्चला चातिकामार्त्ता क्लिष्टा पुष्टा पिशङ्गिका
मलिना श्रमणी रक्ता व्यक्त - गंधा विरोधिनी ॥
धूत शूर्पाग्रहस्ता च ध्येया धूमावती परा॥

शक्ति सङ्गम तंत्र में पाठान्तर है- **रयातुरा - भयातुरा विशङ्किका। गंधा-गर्भा। धूत-धृत। शूर्पाग्र-सर्पाग्र।**

षडङ्गन्यासः- **धां, धीं, धूं, धैं, धौं, धः** से षडङ्गन्यास करें।

पंचदशाक्षर मंत्रः- (१) ॐ धूं धूमावति देवदत्त धावति स्वाहा।

(२) धूं धूं धूं धुरु, धुरु धूमावति क्रों फट् स्वाहा। देवदत्त का अर्थ अमुक व्यक्ति अमुकशत्रुनाम। उपरोक्त मंत्र के ऋषि ध्यान १४ अक्षर वाले मंत्र के समान हैं।

धूमावती गायत्री- ॐ धूमावत्यै विद्महे संहारिणे धीमहि तन्नो धूमा प्रचोदयात्।

॥ अष्टाक्षर मंत्र प्रयोगः ॥

मंत्रो यथा (मंत्रमहोदधौ) - **धूं धूं धूमावति स्वाहा।** इत्यष्टाक्षरो मंत्रः। (मेरुतंत्र के अनुसार "**धूमावती**" के स्थान पर "**धूमावती**" होना चाहिये।)

विनियोगः - **अस्य धूमावतीमंत्रस्य पिप्पलाद ऋषिः। निवृच्छंदः। ज्येष्ठा देवता। धूं बीजम्। स्वाहा शक्तिः। धूमावती कीलकम्। ममाभीष्टसिद्ध्यर्थे जपे विनियोगः।**

ऋष्यादिन्यास :- **ॐ पिप्पलादऋषये नमः शिरसि ॥१॥ निवृच्छंदसे नमः मुखे ॥२॥ ज्येष्ठादेवतायै नमः हृदि ॥३॥ धूं बीजाय नमः गुह्ये ॥४॥ स्वाहाशक्तये नमः पादयोः ॥५॥ धूमावती कीलकाय नमः नाभौ ॥६॥ विनियोगाय नमः सर्वांगे ॥७॥** इति ऋष्यादिन्यासः।

करन्यासः- **ॐ धूं धूं अंगुष्ठाभ्यां नमः ॥१॥ ॐ धूं तर्जनीभ्यां नमः ॥२॥ ॐ मां मध्यमाभ्यां नमः ॥३॥ ॐ वं अनामिकाभ्यां नमः ॥४॥ ॐ तिं कनिष्ठिकाभ्यां नमः ॥५॥ ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः ॥६॥** इति करन्यासः।

हृदयादिषडंगन्यास :- **ॐ धूं धूं हृदयाय नमः ॥१॥ ॐ धूं शिरसे स्वाहा ॥२॥ ॐ मां शिखायै वषट् ॥३॥ ॐ वं कवचाय हुम् ॥४॥ ॐ तिं नेत्रत्रयाय वौषट् ॥५॥ ॐ स्वाहा अस्त्राय फट् ॥६॥** इति हृदयादिषडंगन्यासः। एवं न्यासं कृत्वा ध्यायेत्।

॥ ध्यानम् ॥

अत्युच्चा मलिनांबराखिलजनोद्वेगावहा दुर्मना, रूक्षाक्षित्रितया विशालदशना सूर्य्योदरी चंचला ।
प्रस्वेदाम्बुचिताक्षुधाकुलतनुः कृष्णातिरूक्षाप्रभा, ध्येया मुक्तकचा सदाप्रियकलिर्धूमावती मंत्रिणा ॥१॥

तंत्रांतरेऽपि ध्यानं यथा-

विवर्णा चंचला दुष्टा दीर्घा च मलिनांबरा । विमुक्त कुंतला रूक्षा विधवा विरलद्विजा ।
काकध्वजरथारूढा विलंबितपयोधरा । शूर्प्पहस्तातिरक्ताक्षी धृतहस्ता वरान्विता ।
प्रवृद्धघोणा तु भृशं कुटिला कुटिलेक्षणा । क्षुत्पिपासार्दिता नित्यं भयदा कलहास्पदा ॥२॥

॥ आवरण पूजनम् ॥

भद्रपीठ पर मण्डूकादि पीठदेवता का पूजन करे पश्चात् पूर्वादि क्रम से **पीठ की नौ शक्तियों** का पूजन करें।

यथा- ॐ कामदायै नमः। ॐ मानदायै नमः। ॐ नक्तायै नमः। ॐ मधुरायै नमः। ॐ मधुराननायै नमः। ॐ नर्मदायै नमः। ॐ भोगदायै नमः। ॐ नंदायै नमः। मध्ये ॐ प्राणदायै नमः।

॥ धूमावती यन्त्रम् ॥

स्वर्ण यंत्र को दुग्धधारा से शुद्धकर ताम्रपात्र में रखकर पीठ पर स्थापित करे। "**ॐ धूमावती योगपीठाय नमः**" से पुष्पादि से आसन देवे। मूर्ति की पूजा करने के पश्चात् आवरण पूजा की आज्ञा हेतु पुष्पांजलि प्रदान करे।

ॐ संविन्मये परे देवि परामृतरसप्रिये ।
अनुज्ञां देहि मातस्त्वं परिवारार्चनाय मे ॥

त्रिकोण मध्य में देवी का ध्यान करें।

प्रथमावरणम्- (षट्कोणे)- आग्नेयादि चतुर्दिक्षु- **ॐ धूं धूं**

हृदयाय नमः। हृदय श्री पादुकां पूजयामि तर्पयामि नमः (इति सर्वत्र)। **ॐ धूं शिरसे स्वाहा। ॐ मां शिखायै वषट्। ॐ वं नमः कवचाय हुं। ॐ तिं नेत्रत्रयाय वौषट्** (इति देव्यग्रे)। **ॐ स्वाहा अस्त्राय फट्।** (इति दिक्षु) पश्चात् पुष्पांजलि देवे।

अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्।

विशेषार्ध्य से जल छोड़कर कहे "**पूजितास्तर्पिताः संतु**"। इस तरह सभी आवरण पूजा हेतु करें।

द्वितीयावरणम् - (अष्टदले)- **ॐ क्षुधायै नमः। ॐ तृष्णायै नमः। ॐ रत्यै नमः। ॐ निद्रायै नमः। ॐ निर्ऋत्यै नमः। ॐ दुर्गत्यै नमः। ॐ रुषायै नमः। ॐ अक्षमायै नमः।** पुनः पुष्पांजलि देवे।

तृतीयावरणम् - (भूपूरे)- **ॐ इन्द्राय नमः। ॐ अग्नये नमः। ॐ यमाय नमः। ॐ निर्ऋतये नमः। ॐ वरुणाय नमः। ॐ वायवे नमः। ॐ सोमाय नमः। ॐ ईशानाय नमः। ॐ ब्रह्मणे नमः। ॐ अनंताय नमः।**

चतुर्थावरणम् - (भूपूरे)- दिक्पालों के समीप उनके आयुधों की पूजा करे। **ॐ वज्राय नमः। ॐ शक्त्ये नमः। ॐ दण्डाय नमः। ॐ खड्गाय नमः। ॐ पाशाय नमः। ॐ अंकुशाय नमः। ॐ गदायै नमः। ॐ त्रिशूलाय नमः। ॐ पद्माय नमः। ॐ चक्राय नमः।**

पश्चात् धूपदीप नैवेद्यादि अर्पण करें। पश्चात् जप करे। बलि प्रदान करे। एक लक्ष जप कर पुरश्चरण करे, निशाभोजन करे। दशांश होम करे। तर्पण मार्जन कर ब्राह्मण भोजन करें। पुरश्चरण के लिये **कृष्णपक्ष की चतुर्दशी** से उपवास रखे। किसी सूने घर, श्मशान या वन प्रदेश में मौन रहते हुये एक लाख जप करे। पुरश्चरण काल में उष्णीय और आर्द्रवस्त्र धारण करना आवश्यक हैं। फिर शत्रु के नाम पर मूलमंत्र लिखकर उसके ऊपर शिवलिङ्ग का स्थापन कर पूजन पूर्वक जप करें। अन्यत्र लिखा है कि शिवलिङ्ग का निर्माण कर "**अमुकं मारय**" इस प्रकार शत्रुनाम का निर्देश कर जप करना चाहिये। इस प्रकार पाँच सौ बार जप करने से शत्रु ज्वर ग्रस्त होगा। पञ्चगव्य या दूध द्वारा होम से उसका ज्वर छूट सकेगा। पश्चात् देवी का पंचोपचार पूजन करें। जप करें। हरिद्रापत्र पर शत्रु का नाम लिखकर किसी वन के बीच में डालकर उसके ऊपर उक्त मंत्र का १० हजार जप करे तो शत्रु का उच्चाटन होगा। श्मशाग्नि में कौए को दग्ध कर उसकी भस्म को लेकर उसे १०८ मंत्र से अभिमंत्रित करें एवं उस भस्म को शत्रु का नाम लेते हुये आठों दिशाओं में फेंके। इससे भी शत्रु का उच्चाटन होता हैं।

कृष्णपक्ष में श्मशान की भस्म से शिवलिङ्ग बनायें उस पर शत्रुनाम सहित उक्त मंत्र लिखकर पूजा करें। भैंस के दूध द्वारा धूप देकर जो जो पदार्थ शत्रु के अमङ्गल सूचक है वे ही द्रव्य प्रदान करें। इससे देवी महिषी रूप धारण का शत्रु का विनाश करती हैं। श्मश्मान भस्म से शिवलिङ्ग बनाये। पुष्पादि से उसकी पूजा करे। "हे भगवान्" इस प्रकार उन्हे संबोधन कर अपने अन्तःमन में कर्त्तव्य की चिन्ता करते हुये नीम और काक पक्ष को एकत्र लेकर उसके ऊपर १०८ बार मंत्र का जप करे। फिर "**अमुकं द्वेषय द्वेषय**" कहकर मूल मंत्र का उच्चारण करें, धूप प्रदान करें। इससे शत्रु वर्ग में विद्वेषण होगा। इस विद्वेषण की शांति करनी हो तो चिता काष्ठ लाकर उसकी अग्नि प्रज्वलित करें उसमें दूध से हवन करें। रजस्वला के रक्ताक्तवस्त्र द्वारा निर्मित धूप को जलाकर यदि निवेदन करे तो कालिका गृध्ररूप में आकर शत्रु का संहार करती हैं। निर्माल्य पत्र पुष्पादि द्वारा धूप देने से इस प्रयोग की शांति होती हैं। वराह कर्ण द्वारा धूप देने से देवीरात्रिकाल में शूकर रूप में आकर शत्रु का नाश करती हैं। अश्वत्थ पत्र की धूप देकर पंचगव्य अथवा केवल दूध अथवा घृत, मधु एवं शर्करा से होम करने से सभी प्रकार के अभिचार की शांति होती हैं। यज्ञोडुम्बर आदि श्रीवृक्ष की कील बनाकर उसके ऊपर शत्रुनाम सहित धूमावती का मंत्र लिखे। फिर इस कील के ऊपर मंत्र का जप कर शत्रु के

दोनों पैरों को भूमि में कील द्वारा जटिल करने की भावना करें। इससे शत्रु का उच्चाटन होता है। शत्रु के दोनों पैरों की धूल और घृतसहित पक्षियों की बलि देकर चिता भस्म के ऊपर मूल मंत्र का जप करें। फिर उसी भस्म को शत्रु के घर के भीतर गुप्तरूप से पहुँचाये। इससे शत्रु का उच्चाटन होगा।

॥ धूमावति गायत्री मंत्राः ॥

(१) धूं धूमावति विद्महे विवर्णा देवी धीमहि तन्नो घोरे प्रचोदयात्। (२) ॐ धूमावत्यै विद्महे संहारिण्यै धीमहि तन्नो धूमा प्रचोदयात्।

॥ अंग देवता अघोर रुद्र ॥

(धूमावत्या सपर्यार्णवे) - १. धूमावत्यङ्गमन्त्राश्च वीरेशोबटुकः शिवे। प्रत्यंगिरा च शरभस्तथा पाशुपतो मनुः॥ संहारास्त्रं च ककुदी तथा कर्कटिका शिवे। मारिणी त्वरिता विद्या कुल्लुका पञ्चकं शिवे ॥

२. अघोर मंत्र - ह्रीं स्फुर स्फुर प्रस्फुर प्रस्फुर घोर घोरतर तनुरूप चट चट प्रचट प्रचट कह कह वम वम बन्ध बन्ध घातय घातय हुं फट्।

॥ धूम्रवाराही ॥ (कालमृत्यु तंत्रे)

वाराही विद्या में धूमावती का प्रयोग "**धूम्रवाराही**" नाम से है। यंत्रार्चन आदि प्रयोग पुस्तक के द्वितीय पुस्तक उत्तरार्द्ध भाग में वाराही प्रयोगान्तर दिया गया है।

मंत्र- **ॐ धूं धूं मृत्युधूमे धूं धूं कालधूमे धूं धूं धूम्रवाराहि हुँ फट् स्वाहा।**

विनियोगः- **ॐ अस्य श्री धूम्रवाराही मंत्रस्य कालमृत्यु ऋषिः। बृहतीश्छन्दः। धूम्रवाराही देवता। धूं बीजं। हूं शक्तिः। स्वाहा कीलकं। शत्रुमारणे विनियोगः।**

षडङ्गन्यासः- **सप्तभिः पुनः षड्भिर्द्वाभ्यां वेदैद्विका (द्वाभ्यांत्रिका) ब्धिभिः। न्यासं चैवानुलोमेन विलोमेन पुनर्न्यसेत् ॥**

ॐ धूं धूं मृत्युधूमे। धूं धूं कालधूमे धूं धूं धूम्र। वाराहि हूं फट् स्वाहा। वाराहि हुं फट् स्वाहा। धूं धूं कालधूमे धूं धूं धूम्र। ॐ धूं धूं मृत्युधूमे। इनसे हृदयादि न्यास करें।

ध्यानम्-

वाराही धूम्रवर्णा च भक्षयन्ती रिपून् सदा। पशुरूपान् मुनिसुरैर्वन्दितां धूम्ररूपिणीम् ॥

त्रिमधु एवं गुडौदन से तथा मधूक कुसुमों से होम करें।

॥ अस्त्र वाराही ॥

इस विद्या का प्रयोग भी शत्रू के मारण में होता है।

मंत्रः- **ॐ फट् फट् मृत्युरूपे फट् फट् कालरूपे फट् फट् अस्त्रवाराही हुं फट् स्वाहा।**

ऋष्यादिन्यासः- ऋष्यादिन्यास पूर्व मंत्रवत् है।

॥ ध्यानम् ॥

नमस्ते अस्त्रवाराहि वैरिप्राणापहारिणी । गोकण्ठमिव शार्दूलो गजकण्ठं यथा हरिः ॥
शत्रूरूपपशून् हत्वा आशु मांसं च भक्षय । वाराहि त्वां सदा वन्दे वन्द्ये चास्त्रस्वरूपिणी ॥

॥ श्री धूमावती मातृका ॥

धूमावती धूमनेत्रा घर्मटी मर्कटी तथा। घोररूपा च लम्बोष्ठी श्यामा श्याममुखी शिवा ॥१॥
काकध्वजा कोटराक्षी धूमा धूमान्धकारिणी । मुक्तकेशी महाघोरा तथा लम्बपयोधरा ॥२॥
स्वराणां शक्तयः प्रोक्ताः सर्वसिद्धिप्रदायिकाः । कोटरा कोटराक्षी च ऊर्ध्वकेशी दिगम्बरी ॥३॥
तमिस्रा तामसी चोग्रा विवर्णा मलिनाम्बरा। लम्बस्तनी च विरलद्विजा दीर्घा कृशोदरी ॥४॥
विधवा शूर्पहस्ता च रूक्षा रूक्ष शिरोधरा । चलहस्ता चञ्चलाक्षी जटिला कुटिलेक्षणा ॥५॥
क्षुधातुरा पिपासार्त्ता तीक्ष्णा रौद्रा भयानका । उत्कारी क्रोधिनी मृत्युः क्रिया रिपुविमर्दिनी ॥६॥
सत्वरा काकजङ्घा च श्मशानालयवासिनी । महाकाली च गदिताः सिद्धा व्यञ्जनशक्तयः ॥७॥

॥ श्री धूमावती कवचम् ॥

॥ श्री पार्वत्युवाच ॥

धूमावत्यर्चनं शंभो श्रुतं विस्तरतो मया । कवचं श्रोतुमिच्छामि तस्या देव वदस्व मे ॥१॥

॥ श्रीभैरव उवाच ॥

शृणु देवि परं गुह्यं न प्रकाश्यं कलौ युगे । कवचं श्रीधूमवत्याः शत्रुनिग्रहकारकम् ॥२॥
ब्रह्माद्या देवि सततं यद्वशादरिघातिनः । योगिनो भवंति शत्रुघ्ना यस्या ध्यानप्रभावतः ॥३॥

विनियोगः – ॐ अस्य श्रीधूमावतीकवचस्य पिप्पलाद ऋषिः । अनुष्टुप्छंदः । श्रीधूमावती देवता । धूं बीजम् । स्वाहा शक्तिः । धूमावती कीलकम् । शत्रुहनने पाठे विनियोगः ।

ॐ धूं बीजं मे शिरः पातु धूं ललाटं सदाऽवतु । धूमा नेत्रयुगं पातु वती कर्णौ सदाऽवतु ॥४॥
दीर्घा तूदरमध्ये तु नाभिं मे मलिनाम्बरा । शूर्पहस्ता पातु गुह्यं रूक्षा रक्षतु जानुनी ॥५॥
मुखं मे पातु भीमाख्या स्वाहा रक्षतु नासिकाम् । सर्वविद्याऽवतु कण्ठं विवर्णा बाहुयुग्मकम् ॥६॥
चञ्चला हृदयं पातु धृष्टा पार्श्वे सदाऽवतु । धूमहस्ता सदा पातु पादौ पातु भयावहा ॥७॥
प्रवृद्धरोमा तु भृशं कुटिला कुटिलेक्षणा । क्षुत्पिपासार्द्दिता देवी भयदा कलहप्रिया ॥८॥
सर्वांगं पातु मे देवी सर्वशत्रुविनाशिनी । इति ते कथितं पुण्यं कवचं भुवि दुर्लभम् ॥९॥
न प्रकाश्यं न प्रकाश्यं न प्रकाश्यं कलौयुगे । पठनीयं महादेवि त्रिसंध्यं ध्यानतत्परः ॥१०॥
दुष्टाभिचारो देवेशि तद्गात्रं नैव संस्पृशेत् ॥११॥

॥ इति भैरवी भैरव संवादे धूमावतीतत्त्वे धूमावती कवचं सम्पूर्णम् ॥

॥ श्री धूमावती हृदय स्तोत्रम् ॥

विनियोग :- ॐ अस्य श्रीधूमावतीहृदय स्तोत्र मन्त्रस्य पिप्पलाद ऋषिः। अनुष्टुप्छंदः। श्रीधूमावती देवता। धूं बीजम्। ह्रीं शक्तिः। क्लीं कीलकम्। सर्वशत्रुसंहरणे पाठे विनियोगः।

हृदयादिषडङ्गन्यास :- ॐ धां हृदयाय नमः। ॐ धीं शिरसे स्वाहा। ॐ धूं शिखायै वषट्। ॐ धैं कवचाय हुम्। ॐ धौं नेत्रत्रयाय वौषट्। ॐ धः अस्त्राय फट्। पश्चात् करन्यास करें।

॥ ध्यानम् ॥

ॐ धूम्राभां धूम्रवस्त्रां प्रकटितदशनां मुक्तवालां वराढ्यां,
काकांकस्यन्दनस्थां धवलकरयुगां शूर्पहस्तातिरूक्षाम्।
नित्यं क्षुत्क्षामदेहां मुहुरतिकुटिलां वारिवांछाविचित्रां,
ध्यायेद् धूमावतीं वामनयनयुगलां भीतिदां भीषणास्याम् ॥१॥

कल्पादौ या कालिकाद्याऽचीकलन्मधुकैटभौ। कल्पांते त्रिजगत्सर्वं धूमावतीं भजामि ताम् ॥२॥
गुणागाराऽगम्यगुणा या गुणागुणवर्द्धिनी। गीतावेदार्थतत्त्वज्ञैर्धूमावतीं भजामि ताम् ॥३॥
खट्वांगधारिणी खर्वा खण्डिनीखलरक्षसाम्। धारिणी खेटकस्यापि धूमावतीं भजामि ताम् ॥४॥
घूर्णा घूर्णकरा घोरा घूर्णिताक्षी घनस्वना। घातिनी घातकानां या धूमावतीं भजामि ताम् ॥५॥
चर्वंतीमस्थिखण्डानां चण्डमुण्डविदारिणीम्। चण्डाट्टहासिनीं देवीं भजे धूमावतीमहम् ॥६॥
छिन्नग्रीवां क्षताच्छन्नां छिन्नमस्तस्वरूपिणीम्। छेदिनीं दुष्टसंघानां भजे धूमावतीमहम् ॥७॥
जाता या याचिता देवैरसुराणां विघातिनी। जल्पंती बहु गर्जंती भजे तां धूम्ररूपिणीम् ॥८॥
झंकारकारिणीं झंझां झंझमाझमवादिनीम्। झटित्याकर्षिणीं देवीं भजे धूमावतीमहम् ॥९॥
टीपटंकार संयुक्तां धनुष्टंकारकारिणीम्। घोरां घनघटाटोपां वंदे धूमावतीमहम् ॥१०॥
ठंठंठंठं मनुप्रीतिं ठःठः मंत्रस्वरूपिणीम्। ठमकाह्वगति प्रीतांभजे धूमावतीमहम् ॥११॥
डमरू डिंडिमारावां डाकिनीगणमण्डिताम्। डाकिनीभोगसन्तुष्टां भजे धूमावतीमहम् ॥१२॥
ढक्कानादेन संतुष्टां ढक्कावादकसिद्धिदाम्। ढक्कावादचलच्चित्तां भजे धूमावतीमहम् ॥१३॥
तत्त्ववार्त्ताप्रियप्राणां भवपाथोधितारिणीम्। तारस्वरूपिणीं तारां भजे धूमावतीमहम् ॥१४॥
थां थीं थूं थें मंत्ररूपां थैं थौं थं थः स्वरूपिणीम्। थकारवर्णसर्वस्वां भजे धूमावतीमहम् ॥१५॥
दुर्गास्वरूपिणीं देवीं दुष्टदानवदारिणीम्। देवदैत्यकृतध्वंसां वंदे धूमावतीमहम् ॥१६॥
ध्वांताकारांधकध्वंसां मुक्तधम्मिल्लधारिणीम्। धूमधाराप्रभां धीरां भजे धूमावतीमहम् ॥१७॥
नर्तकीनटनप्रीतां नाट्यकर्म्मविवर्द्धिनीम्। नारसिंहीं नराराध्यां नौमि धूमावतीमहम् ॥१८॥
पार्वतीपतिसंपूज्यां पर्वतोपरिवासिनीम्। पद्मारूपां पद्मपूजां नौमि धूमावतीमहम् ॥१९॥
फूत्कारसहितश्वासां फट्मंत्रफलदायिनीम्। फेत्कारिगणसंसेव्यां सेवे धूमावतीमहम् ॥२०॥

बलिपूज्यां बलाराध्यां बगलारूपिणीं वराम् । ब्रह्मादिवंदितां विद्यां वंदे धूमावतीमहम् ॥२१॥
भव्यरूपां भवाराध्यां भुवनेशीस्वरूपिणीम् । भक्तभव्यप्रदां देवीं भजे धूमावतीमहम् ॥२२॥
मायां मधुमतीं मान्यां मकरध्वजमानिताम् । मत्स्यमांसमहास्वादां मन्ये धूमावतीमहम् ॥२३॥
योगयज्ञप्रसन्नास्यां योगिनीपरिसेविताम् । यशोदां यज्ञफलदां यजे धूमावतीमहम् ॥२४॥
रामाराध्यपदद्वंद्वां रावणध्वंसकारिणीम् । रमेशरमणीं पूज्यामहं धूमावतीं श्रये ॥२५॥
लक्षलीलाकलालक्ष्यां लोकवंद्यपदांबुजाम् । लंबितां बीजकोशाढ्यां वंदे धूमावतीमहम् ॥२६॥
बकपूज्यपदांभोजां वकध्यानपरायणाम् । बालां बकारिसंध्येयां वंदे धूमावतीमहम् ॥२७॥
शांकरीं शंकरप्राणां संकटध्वंसकारिणीम् । शत्रुसंहारिणीं शुद्धां श्रये धूमावतीमहम् ॥२८॥
षडाननारिसंहंत्रीं षोडशीरूपधारिणीम् । षड्रसास्वादिनीं सौम्यां सेवे धूमावतीमहम् ॥२९॥
सुरसेवितपादाब्जां सुरसौख्यप्रदायिनीम् । सुन्दरीगणसंसेव्यां सेवे धूमावतीमहम् ॥३०॥
हेरंबजननीं योग्यां हास्यलास्यविहारिणीम् । हारिणीं शत्रुसंघानां सेवे धूमावतीमहम् ॥३१॥
क्षीरोदतीरसंवासां क्षीरपानप्रहर्षिताम् । क्षणदेशेज्यपादाब्जां सेवे धूमावतीमहम् ॥३२॥
चतुस्त्रिंशद्वर्णकानां प्रतिवर्णादिनामभिः । कृतं तु हृदयं स्तोत्रं धूमावत्याः सुसिद्धिदम् ॥३३॥
य इदं पठति स्तोत्रं पवित्रं पापनाशनम् । स प्राप्नोति परां सिद्धिं धूमावत्याः प्रसादतः ॥३४॥
पठन्नेकाग्रचित्तो यो यद्यदिच्छति मानवः । तत्सर्वं समवाप्नोति सत्यं सत्यं वदाम्यहम् ॥३५॥

॥ इति धूमावतीहृदयं स्तोत्रं समाप्तम् ॥

॥ अथ श्री धूमावती स्तोत्रम् ॥

प्रातर्या स्यात्कुमारी कुसुमकलिकया जापमालां जपंती, मध्याह्ने प्रौढरूपा विकसितवदना चारुनेत्रा निशायाम् ।
संध्यायां वृद्धरूपागलितकुचयुगा मुण्डमालां वहंती सा देवी देवदेवी त्रिभुवनजननी कालिकापातु युष्मान् ॥१॥
वद्धा खट्वांगखेटौ कपिलवरजटामण्डलं पद्मयोनेः, कृत्वा दैत्योत्तमांगैः स्त्रजमुरसि शिरःशेखरं ताक्ष्र्यपक्षैः ।
पूर्णं रक्तैः सुराणां यममहिष महाशृङ्गमादाय पाणौ, पायाद्वो वंद्यमानः प्रलयमुदितया भैरवः कालरात्र्याम् ॥२॥
चर्वन्तीमस्थिखण्डं प्रकटकटकटाशब्द संघातमुग्रं, कुर्वाणा प्रेतमध्ये कहहकहकहाहास्यमुग्रं कृशांगी ।
नित्यं नित्यप्रसक्ता डमरुडिमडिमान् स्फारयंती मुखाब्जं, पायान्नश्चण्डिकेयं झझमझमझमाजल्पमाना भ्रमंती ॥३॥
टंटंटंटंटटंटाप्रकर टमटमा नादघंटां वहंती, स्फेंस्फेंस्फेंस्फारकारा टकटकितहसा नादसंघट्टभीमा ।
लोलन्मुण्डाग्रमाला ललहलहलहालोललोलाग्रवाचं, चर्वंती चण्डमुण्डं मटमटमटितैश्चर्वयंती पुनातु ॥४॥
वामे कर्णे मृगांकं प्रलय परिगतं दक्षिणे सूर्य्यबिंबं, कण्ठे नक्षत्रहारं वरविकट जटाजूटके मुण्डमालाम् ।
स्कंधे कृत्वोरगेन्द्रध्वजनिकरयुतं ब्रह्मकंकालभारं संहारे, धारयंती मम हरतु भयं भद्रदा भद्रकाली ॥५॥
तैलाभ्यक्तैकवेणी त्रपुमयविलसत्कर्णिकाक्रांतकर्णा, लौहेनैकेन कृत्वा चरणनलिन कामात्मनः पादशोभाम् ।

दिग्वासा रासभेन ग्रसति जगदिदं या यवाकर्णपूरा, वर्षिण्यातिप्रवृद्धा ध्वजवितत भुजा सासि देवि त्वमेव ॥६॥
संग्रामे हेतिकृत्तैः सरुधिरदशनैर्यद्भटानां शिरोभिर्मालामाबद्ध्य मूर्ध्नि ध्वजवितत भुजा त्वं श्मशाने प्रविष्टा ।
दृष्टा भूतप्रभूतैः पृथुतरजघनाबद्धनागेन्द्रकाञ्ची, शूलाग्रव्यग्रहस्ता मधुरुधिरसदाताम्रनेत्री निशायाम् ॥७॥
दंष्ट्रारौद्रे मुखेऽस्मिंस्तव विशति जगद्देवि सर्वं क्षणार्द्धात्, संसारस्यांतकाले नररुधिरवशासम्प्लवे धूमधूम्रे ।
कालीकापालिकी सा शवशयनरता योगिनीयोगमुद्रारक्ता ऋद्धिःसभास्था मरणभयहरा त्वं शिवाचण्डघण्टा ॥८॥
धूमावत्यष्टकं पुण्यं सर्वापद्विनिवारकम् । यः पठेत्साधको भक्त्या सिद्धिं विंदति वांछिताम् ॥९॥
महापदि महाघोरे महारोगे महारणे । शत्रूच्चाटे मारणादौ जंतूनां मोहने तथा ॥१०॥
पठेत्स्तोत्रमिदं देवि सर्वत्र सिद्धिभाग्भवेत् । देवदानवगंधर्वा यक्षराक्षसपन्नगाः ॥११॥
सिंहव्याघ्रादिकाः सर्वे स्तोत्रस्मरणमात्रतः । दूराद्दूरतरं यांति किं पुनर्मानुषादयः ॥१२॥
स्तोत्रेणानेन देवेशि किं न सिद्ध्यति भूतले । सर्वशांतिर्भवेद्देवि ह्यंते निर्वाणतां व्रजेत् ॥१३॥

॥ इत्यूर्द्ध्वाम्नाये धूमावतीस्तोत्रं समाप्तम् ॥

॥ श्री धूमावत्यष्टोत्तरशतनाम स्तोत्रम् ॥

॥ ईश्वर उवाच ॥

ॐ धूमावती धूम्रवर्णा धूम्रपानपरायणा । धूम्राक्षमथिनी धन्या धन्यस्थाननिवासिनी ॥१॥
अघोराचारसंतुष्टा अघोराचारमण्डिता । अघोरमंत्रसम्प्रीता अघोरमंत्रपूजिता ॥२॥
अट्टाट्टहासनिरता मलिनाम्बरधारिणी । वृद्धा विरूपा विधवा विद्या च विरलद्विजा ॥३॥
प्रवृद्धघोणा कुमुखी कुटिला कुटिलेक्षणा । कराली च करालास्या कंकाली शूर्पधारिणी ॥४॥
काकध्वजरथारूढा केवला कठिना कुहूः । क्षुत्पिपासार्द्दिता नित्या ललज्जिह्वा दिगम्बरा ॥५॥
दीर्घोदरी दीर्घरवा दीर्घांगी दीर्घमस्तका । विमुक्तकुंतला कीर्त्या कैलासस्थानवासिनी ॥६॥
क्रूरा कालस्वरूपा च कालचक्रप्रवर्तिनी । विवर्णा चञ्चला दुष्टा दुष्टविध्वंसकारिणी ॥७॥
चण्डीचण्डस्वरूपा च चामुण्डा चण्डनिःस्वना । चण्डवेगा चण्डगतिश्चंडमुण्डविनाशिनी ॥८॥
चाण्डालिनी चित्ररेखा चित्रांगी चित्ररूपिणी । कृष्णा कपर्द्दिनी कुल्ला कृष्णारूपा क्रियावती ॥९॥
कुम्भस्तनी महोन्मत्ता मदिरापानविह्वला । चतुर्भुजा ललज्जिह्वा शत्रुसंहारकारिणी ॥१०॥
शवारूढा शवगता श्मशानस्थानवासिनी । दुराराध्या दुराचारा दुर्ज्जनप्रीतिदायिनी ॥११॥
निर्मांसा च निराकारा धूमहस्ता वरान्विता । कलहा च कलिप्रीता कलिकल्मषनाशिनी ॥१२॥
महाकालस्वरूपा च महाकालप्रपूजिता । महादेवप्रिया मेधा महासंकटनाशिनी ॥१३॥
भक्तप्रिया भक्तगतिर्भक्तशत्रुविनाशिनी । भैरवी भुवना भीमा भारती भुवनात्मिका ॥१४॥
भूरुण्डा भीमनयना त्रिनेत्रा बहुरूपिणी । त्रिलोकेशी त्रिकालज्ञा त्रिस्वरूपा त्रयीतनुः ॥१५॥
त्रिमूर्तिश्च तथा तन्वी त्रिशक्तिश्च त्रिशूलिनी । इति धूमामहत्स्तोत्रं नाम्नामष्टशतात्मकम् ॥१६॥

मया ते कथितं देवि शत्रुसंघविनाशनम् । कारागारे रिपुग्रस्ते महोत्पाते महाभये ॥१७॥
इदं स्तोत्रं पठेन्मर्त्यो मुच्यते सर्वसंकटैः । गुह्याद्गुह्यतरं गुह्यं गोपनीयं प्रयत्नतः ॥१८॥
चतुष्पदार्थदं नृणां सर्वसम्पत्प्रदायकम् ।

॥ इति धूमावत्यष्टोत्तरशतनाम स्तोत्रं समाप्तम् ॥

॥ श्री धूमावती सहस्त्रनाम स्तोत्रम् ॥

॥ श्रीभैरव्युवाच ॥

धूमावत्या धर्म्मरात्र्याः कथयस्व महेश्वर । सहस्त्रनामस्तोत्रं मे सर्वसिद्धिप्रदायकम् ॥१॥

॥ श्री भैरव उवाच ॥

शृणु देवि महामाये प्रिये प्राणस्वरूपिणि। सहस्त्रनामस्तोत्रं मे भवशत्रुविनाशनम् ॥२॥

विनियोगः - ॐ अस्य श्रीधूमावती सहस्त्रनामस्तोत्रस्य पिप्पलाद ऋषिः। पंक्तिश्छंदः। धूमावती देवता। शत्रुविनिग्रहे पाठे विनियोगः।

धूमा धूमवती धूमा धूमपानपरायणा । धौता धौतगिरा धाम्नी धूमेश्वरनिवासिनी ॥३॥
अनंताऽनंतरूपा च अकाराकाररूपिणी । आद्या आनन्ददा नंदा इकारा इन्द्ररूपिणी ॥४॥
धनधान्यार्थवाणीदा यशोधर्म्मप्रियेष्टदा । भाग्यसौभाग्यभक्तिस्था गृहपर्वत - वासिनी ॥५॥
रामरावणसुग्रीव मोहदा हनुमत्प्रिया । वेदशास्त्रपुराणज्ञा ज्योतिश्छंदः स्वरूपिणी ॥६॥
चातुर्य्यचारुरुचिरा रंजनप्रेमतोषदा । कमलास्या सुधावक्त्रा चन्द्रहासा स्मितानना ॥७॥
चतुरा चारुकेशी च चतुर्वर्गप्रदा मुदा । कला कलाधरा धीरा धारिणी वसुनीरदा ॥८॥
हीरा हीरकवर्णाभा हरिणायतलोचना । दंभमोहक्रोधलोभस्नेहद्वेषहरा परा ॥९॥
नरदेवकरी रामा रामानन्द मनोहरा । योगभोगक्रोधलोभहरा हरनमस्कृता ॥१०॥
दानमानज्ञानमान पानगानसुखप्रदा । गजगोऽश्वपदा गुंजा भूतिदा भूतनाशिनी ॥११॥
भवभावा तथा बाला वरदा हरवल्लभा । भगभंगभया माला मालतीमालना ह्लदा ॥१२॥
जालवालहालकाल - कपालप्रियवादिनी । करंजशीलगुंजाढ्या चूतांकुरनिवासिनी ॥१३॥
पनसस्था पानसक्ता पनशेशकुटुम्बिनी । पावनी पावनाधारा पूर्णा पूर्णमनोरथा ॥१४॥
पूता पूतकला पौरा पुराणसुरसुन्दरी । परेशी परदा पारा परमात्मा प्रमोहिनी ॥१५॥
जगन्माया जगत्कर्त्री जगत्कीर्तिर्जगन्मयी । जननी जयिनी जायाजिता जिनजयप्रदा ॥१६॥
कीर्तिज्ञानध्यानमानदायिनी दानवेश्वरी । काव्यव्याकरणज्ञा काप्रज्ञा प्रज्ञानदायिनी ॥१७॥
विज्ञाज्ञा विज्ञजयदा विज्ञा विज्ञप्रपूजिता । परावरेज्या वरदा पारदा शारदा दरा ॥१८॥

दारिणी देवदूती च दमना दमनामदा । परमज्ञानगम्या च परेशी परगा परा ॥१९॥
यज्ञा यज्ञप्रदा यज्ञज्ञान कार्य्यकरी शुभा । शोभिनी शुभ्रमथिनी निशुंभासुरमर्दिनी ॥२०॥
शांभवी शंभुपत्नी च शंभुजाया शुभानना । शांकरी शंकराराध्या संध्यासंध्यासुधर्मिणी ॥२१॥
शत्रुघ्नी शत्रुहा शत्रुप्रदा शात्रवनाशिनी । शैवी शिवालयां शैला शैलराजप्रिया सदा ॥२२॥
शर्वरी शर्वरी शंभुः सुधाढ्या सौधवासिनी । सगुणा गुणरूपा च गौरवी भैरवारवा ॥२३॥
गौरांगी गौरदेहा च गौरी गुरुमती गुरुः । गौर्गौगर्व्यस्वरूपा च गुणानन्दस्वरूपिणी ॥२४॥
गणेशगणदा गुण्या गुणा गौरववांछिता । गणमाता गणाराध्या गणकोटिविनाशिनी ॥२५॥
दुर्गा दुर्जनहंत्री च दुर्जनप्रीतिदायिनी । स्वर्गापवर्गदा दात्री दीना दीनदयावती ॥२६॥
दुर्निरीक्ष्या दुरा दुःस्था दौःस्थ्यभंजनकारिणी । श्वेतपाण्डुरकृष्णाभा कालदा कालनाशिनी ॥२७॥
कर्मनर्मकरी नर्मा धर्माधर्मविनाशिनी । गौरी गौरवदा गोदा गणदा गायनप्रिया ॥२८॥
गङ्गा भागीरथी भंगा भगा भाग्यविवर्द्धिनी । भवानी भवहंत्री च भैरवी भैरवासना ॥२९॥
भीमा भीमरवा भैमी भीमानन्दप्रदायिनी । शरण्या शरणा शम्या शशिनी शंखनाशिनी ॥३०॥
गुणा गुणकरी गौणी प्रिया प्रीतिप्रदायिनी । जनमोहनकर्त्री च जगदानन्ददायिनी ॥३१॥
जिता जाया च विजयाविजया जयदायिनी । कामा काली करालास्या खर्वा खञ्जा खरागदा ॥३२॥
गर्वा गरुत्मती घर्मा घर्घरा घोरनादिनी । चराचरी चराराध्या च्छिन्ना छिन्नमनोरथा ॥३३॥
छिन्नमस्ता जया जाप्या जगज्जाया च झर्झरी । झकारा झीष्कृतिष्टीका टंका टंकारनादिनी ॥३४॥
ठीका ठक्कुरठक्कांगी ठठठांकारढुण्ढुरा । ढुण्ढीता राजतीर्णा च तालस्था भ्रमनाशिनी ॥३५॥
थकारा थकरादात्री दीपा दीपविनाशिनी । धन्या धना धनवती नर्मदा नर्ममोदिनी ॥३६॥
पद्मा पद्मावती पीता स्फीता फूत्कारकारिणी । फुल्ला ब्रह्ममयी ब्राह्मी ब्रह्मानन्दप्रदायिनी ॥३७॥
भवाराध्या भवाध्यक्षा भगाली मन्दगामिनी । मदिरा मदिरेक्षा च यशोदा यमपूजिता ॥३८॥
याम्या राम्या रामरूपा रमणी ललिता लता । लंकेशी वाक्प्रदा वाच्या सदाश्रमनिवासिनी ॥३९॥
श्रांता शकाररूपा च षकारा खरवाहना । सह्याद्रिरूपा सानन्दा हरिणी हरिरूपिणी ॥४०॥
हराराध्या बालवा च लवंगप्रेमतोषिता । क्षपा क्षयप्रदा क्षीरा ह्यकारादिस्वरूपिणी ॥४१॥
कालिक कालमूर्तिश्च कलहा कलहप्रिया । शिवा शंदायिनी सौम्या शत्रुनिग्रहकारिणी ॥४२॥
भवानी भवमूर्तिश्च शर्वाणी सर्वमंगला । शत्रुविद्राविणी शैवी शुंभासुरविनाशिनी ॥४३॥
धकारमंत्ररूपा च धूंबीजपरितोषिता । धनाध्यक्षसुता धीरा धरारूपा धरावती ॥४४॥
चर्विणी चन्द्रपूज्या च च्छन्दोरूपा छटावती । छाया छायावती स्वच्छा छेदिनी भेदिनी क्षमा ॥४५॥
वलिनी वर्द्धिनी वंद्या वेदमाता बुधस्तुता । धारा धारावती धन्या धर्मदानपरायणा ॥४६॥
गर्भिणी गुरुपूज्या च ज्ञानदात्री गुणान्विता । धर्मिणी धर्मरूपा च घण्टानादपरायणा ॥४७॥

घण्टानिनादिनी घूर्णा घूर्णिता घोररूपिणी । कलिघ्नी कलिदूती च कलिपूज्या कलिप्रिया ॥४८॥
कालनिर्णाशिनी काल्या काव्यदा कालरूपिणी । वर्षिणी वृष्टिदा वृष्टिर्महावृष्टिनिवारिणी ॥४९॥
घातिनी घाटिनी घोण्टा घातकी घनरूपिणी । धूंबीजा धूंजपा नन्दा धूंबीजजपतोषिता ॥५०॥
धूंधूंबीजजपासक्ता धूंधूंबीजपरायणा । धूंकारहर्षिणी धूमा धनदा धनगर्विता ॥५१॥
पद्मावती पद्ममाला पद्मयोनिप्रपूजिता । अपारा पूर्णपूर्णा तु पूर्णिमापरिवन्दिता ॥५२॥
फलदा फलभोक्त्री च फलिनी फलदायिनी । फूत्कारिणी फलावाप्त्री फलभोक्त्री फलान्विता ॥५३॥
वारिणी वारणप्रीता वारिपाथोधिपारगा । विवर्णा धूम्रनयना धूम्राक्षी धूम्ररूपिणी ॥५४॥
नीतिर्नीतिस्वरूपा च नीतिज्ञा नयकोविदा । तारिणीताररूपा च तत्त्वज्ञानपरायणा ॥५५॥
स्थूला स्थूलाधरा स्थात्री उत्तमस्थानवासिनी । स्थूला पद्मपदस्थाना स्थानभ्रष्टा स्थलस्थिता ॥५६॥
शोषिणी शोभिनी शीता शीतपानीयपायिनी । शारिणी शांखिनी शुद्धा शंखासुरविनाशिनी ॥५७॥
शर्वरी शर्वरीपूज्या शर्वरीशप्रपूजिता । शर्वरीजागृता योग्या योगिनी योगिवंदिता ॥५८॥
योगिनीगणसंसेव्या योगिनीयोगभाविता । योगमार्गरता युक्ता योगमार्गानुसारिणी ॥५९॥
योगभावा योगयुक्ता यमिनीपतिवन्दिता । अयोग्या योधिनी योद्धी युद्धकर्मविशारदा ॥६०॥
युद्धमार्गरतानंता युद्धस्थाननिवासिनी । सिद्धा सिद्धेश्वरी सिद्धिः सिद्धिगेहनिवासिनी ॥६१॥
सिद्धरीतिः सिद्धप्रीतिः सिद्धा सिद्धांतकारिणी । सिद्धगम्या सिद्धपूज्या सिद्धवंद्या सुसिद्धिदा ॥६२॥
साधिनी साधनप्रीता साध्या साधनकारिणी । साधनीया साध्यसाध्या साध्यसंघसुशोभिनी ॥६३॥
साध्वी साधुस्वभावा सा साधुसंततिदायिनी । साधुपूज्या साधुवंद्या साधुसंदर्शनोद्यता ॥६४॥
साधुदृष्टा साधुपृष्टा साधुपोषणतत्परा । सात्त्विकी सत्त्वसंसिद्धा सत्त्वसेव्या सुखोदया ॥६५॥
सत्त्ववृद्धिकरी शांता सत्त्वसंहर्षमानसा । सत्त्वज्ञाना सत्त्वविद्या सत्त्वसिद्धांतकारिणी ॥६६॥
सत्त्ववृद्धिः सत्त्वसिद्धिः सत्त्वसम्पन्नमानसा । चारुरूपा चारुदेहा चारुचञ्चललोचना ॥६७॥
छद्मिनी छद्मसंकल्पा छद्मवार्ता क्षमाप्रिया । हठिनी हठसम्प्रीतिर्हठवार्त्ता हठोद्यमा ॥६८॥
हठकार्य्या हठधर्म्मा हठकर्मपरायणा । हठसम्भोगनिरता हठात्काररतिप्रिया ॥६९॥
हठसंभेदिनी हृद्या हृद्यवार्ता हरिप्रिया । हरिणी हरिणीदृष्टिर्हरिणीमांसभक्षणा ॥७०॥
हरिणाक्षी हरिणपा हरिणीगणहर्षदा । हरिणीगणसंहंत्री हरिणीपरिपोषिका ॥७१॥
हरिणीमृगयासक्ता हरिणीमानपुरःसरा । दीना दीनाकृतिर्दूना द्राविणी द्रविणप्रदा ॥७२॥
द्रविणाचलसंवासा द्रविता द्रव्यसंयुता । दीर्घा दीर्घपदा दृश्या दर्शनीया दृढाकृतिः ॥७३॥
दृढा दुष्टमतिर्दुष्टा द्वेषिणी द्वेषिभंजिनी । दोषिणी दोषसंयुक्ता दुष्टशत्रुविनाशिनी ॥७४॥
देवतार्तिहरा दुष्टदैत्यसंघविदारिणी । दुष्टदानवहंत्री च दुष्टदैत्य निषूदिनी ॥७५॥
देवताप्राणदा देवी देवदुर्गतिनाशिनी । नटनायकसंसेव्या नर्त्तकी नर्त्तकप्रिया ॥७६॥

नाट्यविद्या नाट्यकर्त्री नादिनी नादकारिणी । नवीना नूतना नव्या नवीनवस्त्रधारिणी ॥७७॥
नव्यभूषा नव्यमाल्या नव्यालंकारशोभिता । नकारवादिनी नम्या नवभूषणभूषिता ॥७८॥
नीचमार्गा नीचभूमिर्नीचमार्गगतिर्गतिः । नाथसेव्या नाथभक्ता नाथानंदप्रदायिनी ॥७९॥
नम्रा नम्रगतिर्नेत्री निदानवाक्यवादिनी । नारीमध्यस्थिता नारी नारीमध्यगताऽनघा ॥८०॥
नारीप्रीतिर्नराराध्या नरनामप्रकाशिनी । रति रतिप्रिया रम्या रतिप्रेमा रतिप्रदा ॥८१॥
रतिस्थानस्थिताऽऽराध्या रतिहर्षप्रदायिनी । रतिरूपा रतिध्याना रतिरीतिसुधारिणी ॥८२॥
रतिरासमहोल्लासा रतिरासविहारिणी । रतिकांतस्तुता राशी राशिरक्षणकारिणी ॥८३॥
अरूपा शुद्धरूपा च सुरूपा रूपगर्विता । रूपयौवनसम्पन्ना रूपराशी रमावती ॥८४॥
रोधिनी रोषिणी रुष्टा रोषिरुद्धा रसप्रदा । मादिनी मदनप्रीता मधुमत्ता मधुप्रदा ॥८५॥
मद्यपा मद्यपध्येया मद्यपप्राणरक्षिणी । मद्यपानन्ददात्री च मद्यपप्रेमतोषिता ॥८६॥
मद्यपानरता मत्ता मद्यपानविहारिणी । मदिरा मदिरारक्ता मदिरापानहर्षिणी ॥८७॥
मदिरापानसंतुष्टा मदिरापानमोहिनी । मदिरामानसा मुग्धा माध्वीपा मदिराप्रदा ॥८८॥
माध्वीदानसदानन्दा माध्वीपानरता सदा । मोदिनी मोदसंदात्री मुदिता मोदमानसा ॥८९॥
मोदकर्त्री मोददात्री मोदमङ्गलकारिणी । मोदकादान संतुष्टा मोदकग्रहणक्षमा ॥९०॥
मोदकालब्धिसंक्रुद्धा मोदकप्राप्तितोषिणी । मांसादा मांससंभक्षा मांसभक्षणहर्षिणी ॥९१॥
मांसपाकपरप्रेमा मांसपाकालयस्थिता । मत्स्यमांसकृतास्वादा मकारपञ्चकाचिता ॥९२॥
मुद्रा मुद्रान्विता माता महामोहा मनस्विनी । मुद्रिका मुद्रिकायुक्ता मुद्रिकाकृतलक्षणा ॥९३॥
मुद्रिकालंकृता माद्री मन्दराचलवासिनी । मन्दराचलसंसेव्या मन्दराचलवासिनी ॥९४॥
मन्दरध्येयपादाब्जा मन्दरारण्यवासिनी । मन्दुरावासिनी मन्दा मारिणी मारिका मिता ॥९५॥
महामारी महामारीशमिनी शवसंस्थिता । शवमांसकृताहारा श्मशानालयवासिनी ॥९६॥
श्मशानसिद्धिसंहृष्टा श्मशानभवनस्थिता । श्मशानशयनागारा श्मशानभस्मलेपिता ॥९७॥
श्मशानभस्मभीमाङ्गी श्मशानावासकारिणी । शामिनी शमनाराध्या शमनस्तुतिवन्दिता ॥९८॥
शमनाचारसंतुष्टा शमनागारवासिनी । शमनस्वामिनी शांतिः शांतसज्जन पूजिता ॥९९॥
शांतपूजापरा शांता शांतागारप्रभोजिनी । शांतपूज्या शांतवंद्या शांतग्रहसुधारिणी ॥१००॥
शांतरूपा शांतियुक्ता शांतचन्द्रप्रभाऽमला । अमला विमलाऽम्लाना मालतीकुंजवासिनी ॥१०१॥
मालतीपुष्पसंप्रीता मालतीपुष्पपूजिता । महोग्रा महती मध्या मध्यदेशनिवासिनी ॥१०२॥
मध्यमध्वनिसंप्रीता मध्यमध्वनिकारिणी । मध्यमा मध्यमप्रीतिर्मध्यमप्रेमपूरिता ॥१०३॥
मध्याङ्गचित्रवसना मध्यखिन्ना महोद्धता । महेन्द्रसुरसम्पूज्या महेन्द्रपरिवन्दिता ॥१०४॥
महेन्द्रजालसंयुक्ता महेन्द्रजालकारिणी । महेन्द्रमानिता मान्या मानिनीगणमध्यगा ॥१०५॥

मानिनीमानसंप्रीता गानविध्वंसकारिणी । मानिन्याकर्षिणी मुक्तिर्मुक्तिदात्री सुमुक्तिदा ॥१०६॥
मुक्तिद्वेषकरी मूल्यकारिणी मूल्यहारिणी । निर्मूला मूल संयुक्ता मूलिनी मूलमंत्रिणी ॥१०७॥
मूलमन्त्रकृतार्हाद्या मूलमंत्रार्घहर्षिणी । मूलमंत्रप्रतिष्ठात्री मूलमंत्रप्रहर्षिणी ॥१०८॥
मूलमंत्रप्रसन्नास्या मूलमंत्रप्रपूजिता । मूलमंत्रप्रणेत्री च मूलमंत्रकृतार्चना ॥१०९॥
मूलमंत्रप्रहृष्टात्मा मूलविद्या मलापहा । विद्याऽविद्या वटस्था च वटवृक्षनिवासिनी ॥११०॥
वटवृक्षकृतस्थाना वटपूजापरायणा । वटपूजापरिप्रीता वटदर्शनलालसा ॥१११॥
वटपूजाकृताह्लादा वटपूजाविवर्द्धिनी । वशिनी विवशाराध्या वशीकरणमंत्रिणी ॥११२॥
वशीकरणसम्प्रीता वशीकारकसिद्धिदा । बटुका बटुकाराध्या बटुकाहारदायिनी ॥११३॥
बटुकार्चापरा पूज्या बटुकार्चाविवर्द्धिनी । बटुकानन्दकर्त्री च बटुकप्राणरक्षिणी ॥११४॥
बटुकेज्याप्रदाऽपारा पारिणी पार्वतीप्रिया । पर्वताग्रकृतावासा पर्वतेन्द्रप्रपूजिता ॥११५॥
पार्वतीपतिपूज्या च पार्वतीपतिहर्षदा । पार्वतीपतिबुद्धिस्था पार्वतीपतिमोहिनी ॥११६॥
पर्वतीयद्विजाराध्या पर्वतस्था प्रतारिणी । पद्मला पद्मिनी पद्मा पद्ममालाविभूषिता ॥११७॥
पद्मजाढ्यपदा पद्ममालालंकृतमस्तका । पद्मार्चितपदद्वंद्वा पद्महस्ता पयोधिजा ॥११८॥
पयोधिपारगंत्री च पयोधिपरिकीर्त्तिता । पाथोधिपारगा पूता पल्वलांबुप्रतर्पिता ॥११९॥
पल्वलांतः पयोमग्ना पवमानगतिर्गतिः । पयःपाना पयोदात्री पानीयपरिकांक्षिणी ॥१२०॥
पयोजमालाभरणा मुण्डमालाविभूषणा । मुण्डिनी मुण्डहंत्री च मुण्डिता मुण्डशोभिता ॥१२१॥
मणिभूषा मणिग्रीवा मणिमालाविराजिता । महामोहा महाशौर्या महामाया महाहवा ॥१२२॥
मानवी मानवीपूज्या मनुवंशविवर्द्धिनी । मठिनी मठसंहंत्री मठसम्पत्तिहारिणी ॥१२३॥
महाक्रोधवती मूढा मूढशत्रुविनाशिनी । पाठीनभोजिनी पूर्णा पूर्णाहारविहारिणी ॥१२४॥
प्रलयानलतुल्याभा प्रलयानलरूपिणी । प्रलयार्णव संमग्ना प्रलयाब्धिविहारिणी ॥१२५॥
महाप्रलयसंभूता महाप्रलयकारिणी । महाप्रलयसंप्रीता महाप्रलयसाधिनी ॥१२६॥
महाप्रलयसंपूज्या महाप्रलयमोदिनी । छेदिनी च्छिन्नमुण्डोग्रा छिन्ना छिन्नरुहार्थिनी ॥१२७॥
शत्रुसंछेदिनी छन्ना क्षोदिनी क्षोदकारिणी । लक्षिणी लक्षसंपूज्या लक्षिता लक्षणान्विता ॥१२८॥
लक्षशस्त्रसमायुक्ता लक्षबाणप्रमोचिनी । लक्षपूजापराऽलक्ष्या लक्षकोदण्डखण्डिनी ॥१२९॥
लक्षकोदण्डसंयुक्ता लक्षकोदण्डधारिणी । लक्षलीलालया लभ्या लक्षागारनिवासिनी ॥१३०॥
लक्षलोभपरा लोला लक्षभक्तप्रपूजिता । लोकिनी लोकसंपूज्या लोकरक्षणकारिणी ॥१३१॥
लोकवन्दित पादाब्जा लोकमोहनकारिणी । ललिता लालितालीना लोकसंहारकारिणी ॥१३२॥
लोकलीलाकरी लोक्या लोकसंभवकारिणी । भूतशुद्धिकरी भूतरक्षिणी भूतपोषिणी ॥१३३॥
भूतवेताल संयुक्ता भूतसेनासमावृता । भूतप्रेतपिशाचादिस्वामिनी भूतपूजिता ॥१३४॥
डाकिनी शाकिनी डेया डिण्डिमारावकारिणी । डमरुवाद्यसंतुष्टा डमरुवाद्यकारिणी ॥१३५॥

हूंकारकारिणी होत्री हविनी हवनार्थिनी । ह्रासिनी ह्रासिनी हास्यहर्षिणी हठवादिनी ॥१३६॥
अट्टाट्टहासिनी टीका टीकानिर्माणकारिणी । टंकिनी टंकिता टंका टंकामात्रसुवर्णदा ॥१३७॥
टंकारिणी टकाराढ्या शत्रुत्रोटनकारिणी । त्रुटिता त्रुटिरूपा च त्रुटिसंदेहकारिणी ॥१३८॥
तर्षिणी तृट्परिक्लांता क्षुत्क्षामा क्षुत्परिप्लुता । अक्षिणी तक्षिणी भिक्षाप्रार्थिनी शत्रुभक्षिणी ॥१३९॥
कांक्षिणी कुट्टिनी क्रूरा कुट्टिनीवेश्मवासिनी । कुट्टिनीकोटिसंपूज्या कुट्टिनीकुलमार्गिणी ॥१४०॥
कुट्टिनीकुलसंरक्षा कुट्टिनीकुलरक्षिणी । कालपाशावृता कन्या कुमारीपूजनप्रिया ॥१४१॥
कौमुदी कौमुदीदृष्टा करुणादृष्टिसंयुता । कौतुकाचारनिपुणा कौतुकागारवासिनी ॥१४२॥
काकपक्षधरा काकरक्षिणी काकसंवृता । काकांकरथसंस्थाना काकांकस्यन्दनस्थिता ॥१४३॥
काकिनी काकदृष्टिश्च काकभक्षणदायिनी । काकमाता काकयोनिः काकमण्डलमण्डिता ॥१४४॥
काकदर्शनसंशीला काकसंकीर्णमन्दिरा । काकध्यानस्थदेहादिध्यानगम्याऽधमावृता ॥१४५॥
धनिनी धनिसंसेव्या धनच्छेदनकारिणी । धुंधुरा धुंधुराकारा धूम्रलोचन - घातिनी ॥१४६॥
धूंकारिणी च धूंमंत्रपूजिताधर्मनाशिनी । धूम्रवर्णा च धूम्राक्षी धूम्राक्षासुरघातिनी ॥१४७॥
धूंबीजजपसंतुष्टा धूंबीजजपमानसा । धूंबीजजपपूजार्हा धूंबीजजपकारिणी ॥१४८॥
धूंबीजकर्षिता धृष्या धर्षिणी धृष्टमानसा । धूलिप्रक्षेपिणी धूलिव्याप्तधम्मिल्लधारिणी ॥१४९॥
धूंबीजजपमालाढ्या धूंबीजनिन्दकांतका । धर्मविद्वेषिणी धर्मरक्षिणी धर्मतोषिता ॥१५०॥
धारास्तंभकरी धूर्ता धारावारिविलासिनी । धां धीं धूं धैं मंत्रवर्णा धौं धः स्वाहास्वरूपिणी ॥१५१॥
धरित्रीपूजिता धूर्वा धान्यच्छेदनकारिणी । धिक्कारिणी सुधीपूज्या धामोद्याननिवासिनी ॥१५२॥
धामोद्यानपयोदात्री धामधूलिप्रधूलिता । महाध्वनिमती धूप्या धूपामोदप्रहर्षिणी ॥१५३॥
धूपादानमतिप्रीता धूपदानविनोदिनी । धीवरीगणसंपूज्या धीवरीवरदायिनी ॥१५४॥
धीवरीगणमध्यस्था धीवरीधामवासिनी । धीवरीगणगोप्त्री च धीवरीगणतोषिता ॥१५५॥
धीवरीधनधात्री च धीवरीप्राणरक्षिणी । धात्रीशा धातृसंपूज्या धात्रीवृक्षसमाश्रया ॥१५६॥
धात्रीपूजनकर्त्री च धात्रीरोपणकारिणी । धूम्रपान रतासक्ता धूम्रपानरतेष्टदा ॥१५७॥
धूम्रपानकरानन्दा धूम्रवर्षणकारिणी । धन्यशब्दश्रुतिप्रीता धुंधुकारिजनच्छिदा ॥१५८॥
धुंधुकारीष्टसंदात्री धुंधुकारिसुमुक्तिदा । धुंधुकार्य्याराध्यरूपा धुंधुकार्रिमनःस्थिता ॥१५९॥
धुंधुकारिहिताकांक्षी धुंधुकारिहितैषिणी । धिंधिमाराविणी ध्यात्री ध्यानगम्या धनार्थिनी ॥१६०॥
धोरिणी धोरणप्रीता घोरिणी घोररूपिणी । धरित्रीरक्षिणी देवी धराप्रलयकारिणी ॥१६१॥
धराधरसुताऽशेषधाराधरसमद्युतिः । धनाध्यक्षा धनप्राप्तिर्द्धनधान्यविवर्द्धिनी ॥१६२॥
धनाकर्षणकर्त्री च धनाहरणकारिणी । धनच्छेदनकर्त्री च धनहीना धनप्रिया ॥१६३॥
धनसंवृद्धिसंपन्ना धनदानपरायणा । धनहृष्टा धनपुष्टा दानाध्ययनकारिणी ॥१६४॥
धनरक्षा धनप्राणा धनानंदकरी सदा । शत्रुहंत्री शवारूढा शत्रुसंहारकारिणी ॥१६५॥

शत्रुपक्षक्षतिप्रीता शत्रुपक्षनिषूदिनी । शत्रुग्रीवाच्छिदा छाया शत्रुपद्धतिखण्डिनी ॥१६६॥
शत्रुप्राणहरा हार्य्याशत्रुन्मूलनकारिणी । शत्रुकार्य्यविहंत्री च सांगशत्रुविनाशिनी ॥१६७॥
सांगशत्रुकुलच्छेत्री शत्रुसद्मप्रदाहिनी । सांगसायुधसर्वारि - सर्वसम्पत्तिनाशिनी ॥१६८॥
सांगसायुधसर्वारिदेहगेह प्रदाहिनी । इतीदं धूमरूपिण्याः स्तोत्रं नामसहस्त्रकम् ॥१६९॥
यः पठेच्छून्यभवने संध्यांते यतमानसः । मदिरामोदयुक्तो वै देवीध्यानपरायणः ॥१७०॥
तस्य शत्रुः क्षयं याति यदि शक्रसमोऽपि वै । भवपाशहरं पुण्यं धूमावत्याः प्रियं महत् ॥१७१॥
स्तोत्रं सहस्त्रनामाख्यं मम वक्त्राद्विनिर्गतम् । पठेद्वा शृणुयाद्वापि शत्रुघातकरो भवेत् ॥१७२॥

न देयं परशिष्यायाऽभक्ताय प्राणवल्लभे ।
देयं शिष्याय भक्ताय देवीभक्तपराय च ।
इदं रहस्यं परमं दुर्लभं दुष्टचेतसाम् ॥१७३॥

॥ इति श्रीभैरवीतंत्रे भैरवीभैरव संवादे धूमावती सहस्त्रनाम स्तोत्रं समाप्तम् ॥

॥ इति श्री धूमावती तंत्रं सम्पूर्णम् ॥

॥ अथ श्री बगलामुखी तंत्रम् ॥

बगलामुखी देवी दशमहाविद्याओं में आठवीं महाविद्या के नाम से उल्लेखित है। **वेदिक शब्द वल्गा कहा है** जिसका अर्थ कृत्या संबंध है जो बाद में अपभ्रंश होकर **बगला** नाम से प्रचारित हो गया। बगलामुखी शत्रुसंहारक विशेष है अतः इसके दक्षिणाम्नायी पश्चिमाम्नायी मंत्र अधिक मिलते है। नैऋत्य व पश्चिमाम्नायी मंत्र प्रबल संहारक व शत्रु को पीड़ा कारक होते हैं। इसलिये इसका प्रयोग करते समय व्यक्ति घबराते हैं। वास्तव में इसके प्रयोग में सावधानी बरतनी चाहिये। ऐसी बात नहीं है कि यह विद्या शत्रुसंहारक ही है, ध्यान-योग में इससे विशेष सहायता मिलती हैं ऐसा मेरा अनुभव है। यह विद्या प्राणवायु व मन की चंचलता का स्तंभन कर उर्ध्वगति देती है इस विद्या के मंत्र के साथ ललितादि विद्याओं के कूट मंत्र मिलाकर भी साधना की जाती है। **बगला मंत्रों को मैंने ललिता, लक्ष्मी व काली मंत्रों से पुटित करके व पदभेद करके प्रयोग कराये हैं, सफल रहे हैं।** इस विद्या के उर्ध्वआम्नाय व उभय आम्नाय मंत्र भी है जिनका ध्यानयोग से ही विशेष संबंध रहता है। त्रिपुर सुंदरी के कूट मंत्रों के मिलाने से यह विद्या बगलासुंदरी हो जाती है जो शत्रुनाश भी करती है, वैभव भी देती है।

त्रयीसिद्ध विद्याओं में आपका पहला स्थान है। आवश्यकता में शुचि अशुचि अवस्था में भी इसके प्रयोग का सहारा लेना पड़े तो शुद्धमन से स्मरण करने पर भगवती आपकी सहायता करेगी ऐसा मेरा अनुभव है।

लक्ष्मीप्राप्ति व शत्रुनाश उभय कामना मंत्रों का प्रयोग भी सफलता से किया जा सकता है।

बगलामुखी उपासना पीलेवस्त्र पहनकर, पीले आसन पर बैठकर करें। गंधार्चन में केसर हल्दी का प्रयोग करें, स्वयं के पीला तिलक लगायें। दीपवर्तिका पीली बनायें। पीतपुष्प चढायें, पीला नैवेद्य चढावें। हल्दी से बनी हुई माला से जप करें। अभाव में रुद्राक्ष माला से जप करें। या सफेद चंदन की माला को पीली कर लेवें। तुलसी की माला पर जप नहीं करें।

शत्रु व राजकीय विवाद मुकदमेबाजी में विद्या शीघ्रसिद्धिप्रदा है। शत्रु के द्वारा कृत्या अभिचार किया गया हो, प्रेतादिक उपद्रव होतो उक्तविद्या का प्रयोग करना चाहिये। परन्तु मेरा यह अनुभव है कि यदि शत्रु का प्रयोग या प्रेतोपद्रव भारी होतो मंत्र क्रम में निम्न विघ्न बनते हैं -

१. जप नियम पूर्वक नहीं हो सकेगें।
२. मंत्र जाप में समय अधिक लगेगा, जिह्वा भारी होने लगेगी।
३. मंत्र में जहां **'जिह्वां कीलय'** शब्द आता है उस समय स्वयं की जिह्वा पर संबोधन भाव आने लगेगा उससे स्वयं पर ही मंत्र का कुप्रभाव पड़ेगा।
४. **'बुद्धिं विनाशय'** पर परिभाषा का अर्थ मन में स्वयं पर आने लगेगा।

सावधानियाँ

१. ऐसे समय तारा मंत्र पुटित बगलामुखी मंत्र प्रयोग में लेवें, अथवा कालरात्रि देवी का मंत्र व काली अथवा प्रत्यंगिरा मंत्र पुटित करें। तथा कवच मंत्रों का स्मरण करें। सरस्वती विद्या का स्मरण करें अथवा गायत्री मंत्र साथ में करें।

२. बगलामुखी मंत्र में **ॐ ह्लीं बगलामुखी सर्वदुष्टानां वाचं मुखं पदं स्तंभय जिह्वां कीलय बुद्धिं विनाश ह्लीं ॐ स्वाहा।** इस मंत्र में आप अगर यजमान का कार्य कर रहें है तो **सर्वदुष्टानां** शब्द से आशय यजमान के शत्रु को मानते हुये आगे ध्यान पूर्वक आगे का मंत्र पढ़ें तो कार्य सफल होवे।

३. यही संपूर्ण मंत्र जप समय यदि यजमान की शक्ल को ध्यान में रखकर किया तो यजमान का अहित हो जायेगा। स्वयं के लिये भी अगर निष्काम जप कर रहें हो तो **सर्वदुष्टानां** की जगह काम क्रोध लोभादि शत्रु एवं विघ्नों का ध्यान करें तथा **वाचं मुखं ...... जिह्वां कीलय** के समय देवी के बाँयें हाथ में शत्रु की जिह्वा है तथा **बुद्धिं विनाशय** के समय देवी शत्रु को पाशबद्ध कर मुद्गर से उसके मस्तिष्क पर प्रहार कर रही है ऐसी भावना करें।

४. बगलामुखी के अन्य उग्रप्रयोग **वडवामुखी, उल्कामुखी, ज्वालामुखी, भानुमुखी, वृहद्भानुमुखी, जातवेदमुखी** इत्यादि तंत्र ग्रंथों में वर्णित है। समय व परिस्थिति के अनुसार प्रयोग करना चाहियें।

५. विशेष विषय गुरुमुख से ज्ञात करना चाहियें। बगला प्रयोग के साथ भैरव, पक्षिराज, धूमावती विद्या का ज्ञान व प्रयोग करना चाहियें।

॥ बगला उत्पत्ति ॥

एक बार समुद्र में राक्षस ने बहुत बड़ा प्रलय मचाया, विष्णु उसका संहार नहीं कर सके तो उन्होने सौराष्ट्र देश में हरिद्रा सरोवर के समीप महात्रिपुरसुन्दरी की आराधना की तो श्रीविद्या ने ही **बगला** रूप में प्रकट होकर राक्षस का वध किया। **मंगलवार युक्त चतुर्दशी, मकरकुल नक्षत्रों से युक्त वीररात्रि कही जाती है।** इसी अर्धरात्रि में **श्रीबगला का आविर्भाव** हुआ था। मकारकुल नक्षत्र- भरणी, रोहिणी, पुष्य, मघा, उ. फा., चित्रा, विशाखा, ज्येष्ठा, पू. षा., श्रवण, उ.भा. नक्षत्र है।

॥ बगला उपासनायां उपयोगी कुल्लुकादि साधना ॥

बगला उपासना व दशमहाविद्याओं में मंत्र जाग्रति हेतु शापोद्धार मंत्र, सेतु, महासेतु, कुल्लादि मंत्र का जप करना जरुरी हैं। अतः उनकी जानकारी व अन्य विषय साधकों के लिये आवश्यक हैं।

नाम – बगलामुखी, पीताम्बरा, ब्रह्मास्त्रविद्या।

आम्नाय – मुख आम्नाय दक्षिणाम्नाय हैं इसके उत्तर, उर्ध्व व उभयाम्नाय मंत्र भी हैं।

आचार – इस विद्या का वामाचार क्रम मुख्य हैं, दक्षिणाचार भी हैं। कुल यह श्रीकुल की अङ्गविद्या हैं। शिव इस विद्या के त्र्यंबकशिव हैं।

भैरव – आनंद भैरव हैं। कई विद्वान आनंद भैरव को प्रमुख शिव व त्र्यंबक को भैरव बताते हैं। गणेश- इस विद्या के हरिद्रागणपति मुख्य गणेश हैं। स्वर्णाकर्षण भैरव का प्रयोग भी उपयुक्त है।

यक्षिणी – विडालिका यक्षिणी का मेरु तंत्र में विधान हैं। प्रयोग हेतु अंगविद्यायें - मृत्युंजय, बटुक आग्रेयास्त्र, वारुणास्त्र, पार्जन्यास्त्र, संमोहनास्त्र, पाशुपतास्त्र, कुल्लुका, तारा स्वप्नेश्वरी, वाराही मंत्र की उपासना करनी चाहिये।

कुल्लुका – "**ॐ क्ष्रौं**" अथवा **ॐ हूं क्ष्रौं** शिर में १० बार जप करना। **सेतु** – कण्ठ में १० बार "**ह्रीं**" मंत्र का जप करे। **महासेतु**- "**स्त्रीं**" इसका १० बार हृदय में जप करे। **निर्वाण- हूं, ह्रीं श्रीं** से संपुटित करे एवं मंत्र जप करे। दीपन पुरश्चरण आदि में "**ईं**" से संपुटित मंत्र का जप करे। **जीवन**-मूल मंत्र के अंत में "**ह्रीं ओं स्वाहा**" १० बार जपे नित्य आवश्यक नहीं हैं। **मुखशोधन**- (दातून) करने के बाद "**हं ह्रीं ऐं**" जल संकेत से जिह्वा पर अनामिका से लिखें एवं १० बार मंत्र जप करे।

शापोद्धार- "**ॐ ह्लीं बगले रुद्रशापं विमोचय विमोचय ॐ ह्लीं स्वाहा**" १० बार जपे। **उत्कीलन** :- "**ॐ ह्लीं स्वाहा**" मंत्र के आदि में १० बार जपे।

॥ वृहत् उत्कीलन् विधानम् ॥

पीताम्बरापीठ के स्वामीजी ने बगलामुखी रहस्य में विस्तृत विधान दिया है इसकी नित्य आवश्यकता नहीं हैं पर्वादि में या पुरश्चरण काल में अवश्य करना चाहिये।

विनियोग :- **अस्य श्री उत्कीलन मंत्रस्य सदाशिव ऋषिः, वृहत् गायत्री छंदः, सूचीमुख्यै उत्कीलन देवता, ॐ ऐं क्लीं ह्लीं ह्लीं ऐं अं बीजाय, ब्रह्मग्रंथिं उत्कीलय शक्तिः, ॐ ब्लूं ह्लौं ह्लं ह्लीं ह्लां ॐ कीलकं, श्रीं बगलामुखी मंत्र उत्कीलनार्थे जपे विनियोगः।**

ऋष्यादिन्यास :- **उत्कीलन मंत्र सदाशिव ऋषिः नमः शिरसि। वृहत् गायत्री छंदसे नमो मुखे। श्री ब्रह्मास्त्रोत्कीलनायै क्लीं ब्लूं ग्लौं ह्लीं ग्लौं ब्लूं क्लीं सं सं सं सूच्यग्रेणोत्कीलन सूचीमुख्यै देवतायै नमो हृदये। ॐ ऐं क्लीं ह्लीं ह्लीं ऐं अं बीजाय नमो गुह्ये। ॐ ह्लीं अं आं इं ईं....अं अः** (तीन बार कहकर मूलमंत्र उच्चारण करें) **ॐ ऐं ह्लीं ह्लीं ह्लीं ऐं ओं ब्लीं सं सं सं रुद्रसूच्यग्रेण ब्रह्मग्रंथिं उत्कीलय ॐ अं ह्लीं आं इं ब ईं ग उं ला ऊं मु ऋं खि ॠं स लृं वं लॄं दु एं ष्टा ऐं नां ओं वा औं चं अं मु अं खं अः प अं दं औं स्त ओं म्भ ऐं य एं जि लृं ह्वां लॄं की ॠं ल ऋं य ऊं बु उं द्धिं ईं वि इं ना आं श अं य ह्लीं ॐ क्षं ॐ स्वाहा। ॐ ऐं क्लीं क्लीं ह्लीं क्लीं ऐं ओं ब्लीं सं सं सं रुद्रसूच्यग्रेण ब्रह्मग्रंथिं उत्कीलय उत्कीलय, ॐ ब्लूं ह्रौं ह्रं ह्रीं ह्रां ॐ कीलकाय नमो नाभौ। ॐ ह्रीं ह्रीं ह्रसौं ॐ बगलामुखीमहामन्त्रे उत्कीलनार्थे जपे विनियोगाय नमः सर्वाङ्गे।**

पश्चात् **ॐ ऐं ह्लीं ह्लीं ह्लीं ऐं ओं ब्लीं सं सं सं रुद्रसूच्यग्रेण ब्रह्मग्रंथिं उत्कीलय उत्कीलय** से व्यापक न्यास करें।

करादिन्यासः- **ॐ इं लं हंसः ह्लां सोहं लं ईं ॐ उत्कीलिन्यै नमः अंगुष्ठाभ्यां नमः। ॐ इं लं हंसः ह्लीं सोहं लं ईं ॐ महोत्कीलिन्यै नमः तर्जनीभ्यां नमः। ॐ इं लं हंसः ह्लूं सोहं लं ईं ॐ रुद्रसूच्या उत्कीलिन्यै नमः मध्यमाभ्यां नमः। ॐ इं लं हंसः ह्लैं सोहं लं ईं ॐ ब्रह्मग्रंथि उत्कीलिन्यै नमः अनामिकाभ्यां नमः। ॐ इं लं हंसः ह्लौं सोहं लं ईं ॐ योगिन्यै उत्कीलिन्यै नमः कनिष्ठिकाभ्यां नमः। ॐ इं लं हंसः ह्लः सोहं लं ईं ॐ सर्वोत्कीलिन्यै नमः करतल करपृष्ठाभ्यां नमः।** इसी तरह हृदयादि न्यास करें।

॥ ध्यानम् ॥

रुद्रसूचीमुखीं ध्याये सर्वाभरणभूषिताम्। वरदाऽभयसूच्यग्र नखदंष्ट्राभयानकाम् ॥
चतुर्भुजां त्रिनयनां वरदाऽभय कुण्डिकाम्। शूलाग्रान खरतीक्ष्णग्रान् कुर्वतीं ग्रथिताक्षरान् ॥
वर्णमाला विभूषाङ्गी सर्ववर्णात्मिकां शिवाम्। प्रोद्यश्वतां मनून् सर्वान् नानावर्ण विजृंभितान् ॥

विविच्य वरदे मंत्रान् मालायां कुसुमानिव। प्रवेशय मनुं देहि प्रकटीकुरु सर्वदा ॥
अभयं टङ्कं वरदं पाशं पुस्तकमङ्कुशम्। शूलं सूच्यग्रमादाय देहि मे प्रणमामि त्वाम् ॥
इति ध्यात्वा जगद्धात्रीं जगदान्दरूपिणीम्। ग्रंथित्रय विशेषज्ञं शिवं ध्यात्वा जपेन्मनुम् ॥

ॐ इं लं हंसः ह्लीं उत्कीलिन्यै नमः। ॐ ईं लं हंसः ॐ वः ॐ ह्लीं बगलामुखि.....पूरा मंत्र ह्लीं लं ईं वः उत्कीलिन्यै स्वाहा। ॐ ईं हंसः रं सं रं ह्लः मूल मंत्र ॐ ईं लं हंसः हं ॐ वः उत्कीलिन्यै स्वाहा। यह तीन बार जपे। पुनः अं आं......सं हं लं क्षं ॐ ईं हंसः ॐ वः मूलमंत्र ॐ वः सः हं लं इं लं क्षं लं हं क्षकार से अकार तक विलोममातृका उच्चारण करे ॐ वः ह्लां इं लं हंसः मूलमंत्र सोहं लं ईं ॐ वः उत्कीलिन्यै स्वाहा।

जागरण :- **ॐ इं लं हंसः सोहं ॐ वः वः वः ॐ हंसः सोहं लं ईं ॐ मम हृदये चिरं तिष्ठ तिष्ठ स्वाहा हृदय पर हाथ रख कर ३ बार जपे। पुनः ॐ ह्लीं हंसः मूलमंत्र ॐ अं आं.....अं अः हंसः ह्लीं ॐ जप करे।**

मंत्र शुद्धिः- **अं आं.....हं लं क्षं ॐ ह्लीं हंसः सोहं ह्लीं सः सोहं मूल मंत्र पश्चात् क्षं लं हं.....आं अं विलोममातृका मम विद्याशुद्धिं कुरु कुरु स्वाहा।**

शापविमोचन :- **ॐ ह्लूं ह्लूं ह्लूं क्लीं क्लीं क्लीं ऐं ऐं ऐं ह्लीं ह्लीं ह्लीं क्रीं क्रीं क्रीं रुद्रसूच्यग्रेण उत्कीलय उत्कीलय अं आं ....अं अः बगलाशापोद्धारं कुरु कुरु अं आं......अं अः क्रीं क्रीं क्रीं ह्लीं ह्लीं ह्लीं ऐं ऐं ऐं क्लीं क्लीं क्लीं ह्लूं ह्लूं ह्लूं ॐ रुद्रसूच्यग्रेण बगलाशापविमोक्षं कुरु कुरु स्वाहा।** मूल मंत्र का आठ बार जप करे। ब्राह्मीमुद्रा दिखावें। अन्य पंचमुद्राओं से नमस्कार करें।

अन्य उत्कीलन विधिः- **१. ॐ ह्लीं क्लीं स्वाहा** जपने से **उत्कीलन** होवें। **२. ॐ ह्लीं स्वाहा** अथवा **ह्लीं ॐ स्वाहा** जपने से **संजीवन** होवें। **३. ॐ ह्लीं बगले रुद्रशाप विमोचय ह्लीं ॐ** से शापोद्धार होवें। **४. क्रीं ह्लीं क्लीं** से मूल मंत्र को संपुटित करें तो विद्या का जागरण होवें।

॥ अथ बगलामुखी मंत्र प्रयोगाः॥

एकाक्षरी मंत्रः- 'ह्लीं'।

इसे स्थिर माया कहते हैं। यह मंत्र दक्षिण आम्नाय का हैं। दक्षिणाम्नाय में बगलामुखी के दो भुजायें हैं। अन्य बीज "**ह्रीं**" का उल्लेख भी बगलामुखी के मंत्रों में आता हैं इसे "**भुवनमाया**" भी कहते हैं। चतुर्भुज रूप में यह विद्या विपरीत गायत्री (ब्रह्मास्त्र विद्या) बन जाती हैं। **ह्लीं** बीज युक्त अथवा चतुर्भुज ध्यान में बगलामुखी उत्तराम्नाय या उर्ध्वाम्नायात्मिका होती हैं। **ह्लीं** बीज का उल्लेख ३६ अक्षर मंत्र में करेंगे।

विनियोग :- **एकाक्षरी बगला मंत्रस्य ब्रह्मात्रऋषिः, गायत्री छंदः, बगलामुखी देवता, लं बीजं, ह्लीं शक्तिः, ईं कीलकं, सर्वार्थ सिद्ध्यर्थे जपे विनियोगः।** (बगलामुखी रहस्य में ह्रूं शक्तिः कहा जाता हैं।)

षडङ्गन्यास :- **ह्लां, ह्लीं, ह्लूं, ह्लैं, ह्लौं, ह्लः** से षडङ्गन्यास करे।

॥ ध्यानम् ॥

वादीभूकति रङ्कति क्षितिपतिः वैश्वानर शीतति, क्रोधी साम्यति दुर्जनः सुजनति क्षिप्रानुगः खञ्जति।
गर्वी खर्वति सर्व विच्च जडति त्वद्यन्त्रणा यन्त्रितः, श्रीनित्ये बगलामुखि प्रतिदिनं कल्याणि तुभ्यं नमः

॥

एक लाख जप कर, पीतपुष्पों से होम करे, गुड़ोदक से दशांश तर्पण करे।

त्र्यक्षर मंत्र :- "ॐ ह्लीं ॐ"।

चतुरक्षर मंत्र :- ॐ आं ह्लीं क्रों।

विनियोग :- इस मंत्र के बीज "ह्लीं" शक्ति "आं" कीलक "क्रों" हैं शेष पूर्ववत् हैं।

ॐ ह्लां, ॐ ह्लीं, इत्यादि से षडङ्गन्यास करे।

कुटिलालक संयुक्तां मदाघूर्णित लोचनां
मदिरामोदवदनां प्रवाल सदृशाधराम् ।
सुवर्णकलशप्रख्य कठिनस्तन मंडलां
आवर्त्त विलसन्नाभिं सूक्ष्ममध्यम संयुताम् ॥
रम्भोरु पादपद्मां तां पीतवस्त्र समावृताम्।

पञ्चाक्षर मंत्र:- ॐ ह्लीं स्त्रीं हुं फट्। इस मंत्र में तारा का बीज "स्त्रीं" संयुक्त हैं अतः इसके ऋषि, ध्यान तारा महाविद्या के समान हैं।

विनियोग:- **अस्य मंत्रस्य अक्षोभ्यऋषि, वृहतीछंदः, श्री बगलामुखी चिन्मयी देवता, हूं बीजं, "फट्" शक्ति "ह्लीं स्त्रीं" कीलकं ममाभीष्ट सिद्धये जपे विनियोगः।** ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः से षडङ्गन्यास करें।

प्रत्यालीढपरां घोरां मुण्डमालां विभूषितां। खर्वांलंबोदरीं भीमां पीताम्बर परिच्छदाम् ॥
नवयौवन संपन्नां पंचमुद्रा विभूषितां। चतुर्भुजां ललज्जिह्वां महाभीमां वरप्रदाम् ॥
खड्गकर्त्री समायुक्तां सव्येतर भुजद्वयां। कपालोल्पल संयुक्तां सव्यपाणि युगान्विताम् ।
पिङ्गोग्रैक सुखासीनं मौलावक्षोभ्य भूषितां। प्रज्वलत् पितृ-भूमध्यगतां दंष्ट्राकरालिनीम् ।
तां खेचरां स्मेरवदनां भस्मालङ्कार भूषितां। विश्व व्यापक तोयान्ते पीतपद्मोपरि स्थिताम् ।

सप्ताक्षर मंत्र:- मायाद्य (ह्लीं) च द्विठान्ता (स्वाहा) भगवति बगलाख्या चतुर्थीनिरूढा। ह्लीं बगलायै स्वाहा।

अष्टाक्षर मंत्र :- (१) ॐ आं ह्लीं क्रों हुं फट् स्वाहा। इस मंत्र का सांख्यायन तंत्र में "ॐ" **बीज, कीलक "क्रों"**, कहा है शेष एकाक्षरी मंत्रवत्। **(२) ॐ ह्लीं श्रीं आं क्रों बगला।** (बगलाकल्पतरु तथा रहस्ये)।

नवाक्षर मंत्र :- ह्लीं क्लीं ह्लीं बगलामुखि ठः।

एकादशाक्षर :- "ॐ" ह्लीं क्लीं ह्लीं बगलामुखि ठः ठः। (मंत्रोद्धार में **ठद्वयं** का अर्थ **स्वाहा** भी हो सकता है।)

पंचादशाक्षर मंत्र :- माया (ह्लीं) प्रद्युम्न (क्लीं) योनि (ऐं) व्युनुगतबगलाऽग्रे च मुख्यै गदाधारिण्यै स्वाहेति। अथ मंत्र - **ह्लीं क्लीं ऐं बगलामुख्यै गदाधारिण्यै स्वाहा।**

एकोनविंशाक्षर मंत्राः :- (भक्तमंदार मंत्र) यह मंत्र वांछाकल्पलता मंत्र हैं अर्थ प्राप्ति हेतु उत्तम मंत्र हैं। मैनें इसके पद को विभाग करके अन्य मंत्रों के साथ प्रयोग कराये हैं सफल रहे हैं।

मंत्र - (१) **श्रीं ह्रीं ऐं भगवति बगले मे श्रियं देहि देहि स्वाहा।**

(२) इस मंत्र के पद विभाग करके श्रीमद्‌भागवत के आठवें स्कंद के आठवें अध्याय के आठवें मंत्र से संयोग कर लक्ष्मी प्राप्ति हेतु काफी प्रयोग करायें सफल रहे हैं।

यथा - **श्रीं ह्रीं ऐं भगवति बगले ततश्चाविरभूत साक्षाच्छ्री रमा भगवत्पुरा । रञ्जयन्ती दिशः कान्त्या विद्युत् सौदामिनी यथा मे श्रियं देहि देहि स्वाहा॥** इस मंत्र से पुटित शतचण्डी प्रयोग आर्थिक रूप से आश्चर्य जनक से सफल रहें हैं।

त्रयविंशाक्षर मंत्रः- ॐ ह्लीं क्लीं ऐं बगलामुख्यै गदाधारिण्यै प्रेतासनाध्यासिन्यै स्वाहा ।

ॐ पीत शङ्ख गदाहस्ते पीतचन्दन चर्चिते । बगले मे वरं देहि शत्रुसङ्घविदारिणि ॥

चतुस्त्रिंशदक्षर मंत्रः- ॐ ह्लीं बगलामुखि सर्वदुष्टानां वाचं मुखं स्तंभय जिह्वां कीलय बुद्धिं विनाशय ह्लीं ॐ स्वाहा।

हिन्दी तंत्रसार व मूलमंत्रकोष में **नारद ऋषि, त्रिष्टुप् छन्द, देवता बगलामुखी, ह्लीं बीज, स्वाहा शक्ति** कहा गया हैं। पुरश्चर्यार्णव में **ऋषि नारायण, छन्द पंक्ति** कहा है।**ॐ ह्लीं। बगलामुखी। सर्वदुष्टानां। वाचं मुखं स्तंभय। जिह्वां कीलय। बुद्धिं विनाशय ह्लीं ॐ स्वाहा।** इनसे क्रमशः हृदय, शिर, शिखा, कवच, नेत्र एवं अस्त्र न्यास करे।

गंभीरां च मदोन्मत्तां स्वर्णकान्ती समप्रभां चतुर्भुजां त्रिनयनां कमलासन संस्थिताम् ।
मुद्‌गरं दक्षिणे पाशं वामे जिह्वां च वज्रकं पीताम्बरधरां देवीं दृढपीन पयोधराम् ॥
हेमकुण्डलभूषां च पीत चन्द्रार्द्ध शेखरां पीतभूषण भूषां च रत्नसिंहासने स्थिताम् ॥

तंत्र दीपनी में बीज मंत्र **''ह्लीं''** ही बताया हैं।

षट् त्रिंशदक्षर मंत्रः- (१) ॐ ह्लीं बगलामुखि सर्व दुष्टानां वाचं मुखं स्तंभय जिह्वां कीलय कीलय बुद्धिं नाशय ह्लीं ॐ स्वाहा। इसके ऋष्यादि ३४ अक्षर के समान है।

मध्ये सुधाब्धि मणिमण्डपरत्नवेद्यां सिंहासनोपरिगतां परिपीतवर्णाम् ।
पीताम्बराभरण माल्यविभूषिताङ्गीं देवीं स्मरामि धृतमुद्‌गर वैरिजिह्वाम् ॥१॥
जिह्वाग्रमादाय करेण देवीं वामेन शत्रून् परिपीडयन्तीम् ।
गदाभिघातेन च दक्षिणेन पीताम्बराढ्यां द्विभुजां नमामि ॥२॥

''ह्लींकार ह्लींकार मतभेदाः'' बगलामुखी के मूलमंत्र का उद्धार सांख्यायन तंत्र के पांचवें पटल में इस प्रकार हैं सो(ह) ऽन्तरा (ल) न्तसमायुक्तं चतुर्थस्वर (ई) संयुतं। रेफान्तान्तं (र) बिन्दुयुक्तं ब्रह्मास्त्रैकाक्षरो मनुः। दूसरे तंत्रों में- (पुरश्चर्यार्णव एवं मूल मंत्रकोष)-वह्निहीनेन्दुयुग् माया स्थिरमाया प्रकीर्तिता। अर्थात् **''ह्लीं'' का उल्लेख हैं।** सांख्यायन तंत्र में रेफहीन बीज को कीलित व स्तंभित बताया हैं रेफयुक्त ह्ल्रीं को श्रेष्ठ माना हैं। यथा सांख्यायन तंत्र ३२ वां पटल में उल्लेख हैं।

स्थिर बीजं समुद्धृत्य रतिविन्दुविभूषितम्। स्थिर माया त्वियं पुत्र विन्द्वर्ध चन्द्रभूषिता ॥
इयं शप्ता महाविद्या कीलिता स्तंभिता सुत। रेफयोगान्तहाशैव निःशप्ता फलदायिनी ॥
रेफयुक्तां जिपेद्विद्यां फलहीनां न संजपेत्। रेफहीनां जपन्विद्यां कोटि जापन्न सिद्धयति ॥

षट् त्रिंशदक्षर मंत्रः- (२) ॐ ह्लीं (ह्रीं) बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तंभय जिह्वां कीलय बुद्धिं विनाशय ह्लीं (ह्रीं) ॐ स्वाहा। (यह मंत्र अधिक प्रयोग में आता है)।

विनियोग :- **ॐ अस्य श्री बगलामुखी मंत्रस्य नारदऋषिः, त्रिष्टुप् छंदः, श्रीबगलामुखी देवता, ह्रीं बीजं, स्वाहा शक्तिः, ॐ कीलकं ममाभीष्ट सिद्ध्यर्थे च शत्रूणां स्तंभनार्थे जपे विनियोगः।**

मंत्र महोदधि में छंद वृहती लिखा हैं। सांख्या. तंत्र में छंद **अनुष्टुप् लं बीज, ह्रीं शक्ति, रं बीज** बताया है।

ऋष्यादि न्यास :- **नारदऋषये नमः शिरसि, त्रिष्टुप्छन्दसे मुखे, श्री बगलामुखी देवतायै हृदये। ह्रीं बीजाय गुह्ये। स्वाहा शक्तये नमः पादयो। ॐ कीलकाय नमः नाभौ। विनियोगाय नमः सर्वाङ्गे।**

करन्यास :- **ॐ ह्लीं अंगुष्ठाभ्यां नमः। बगलामुखि तर्जनीभ्यां नमः। सर्वदुष्टानां मध्यमाभ्यां नमः। वाचं मुखं पदं स्तंभय अनामिकाभ्यां नमः। जिह्वां कीलय कनिष्ठिकाभ्यां नमः। बुद्धिं विनाशय ह्लीं ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः।**

षडङ्गन्यास :- **ॐ ह्लीं हृदयाय नमः। बगलामुखि शिरसे स्वाहा। सर्वदुष्टानां शिखायै वषट्। वाचं मुखं पदं स्तंभय कवचाय हुं। जिह्वां कीलय नेत्रत्रयाय वौषट्। बुद्धिं विनाशय ह्लीं ॐ स्वाहा अस्त्राय फट्।**

ध्यान अधिकतर **''मध्येसुधाब्धि मणिमण्डप''** का पूर्व लिखित बोलते हैं। अन्य ध्यान भी दिया हैं जो मेरे अनुमान से उत्तराम्नाय व उर्ध्वाम्नाय मंत्रों के लिये उपयुक्त हैं।

सौवर्णासन संस्थिता त्रिनयनां पीतांशुकोल्लासिनीम् हेमाभाङ्गरुचिं शशाङ्क मुकुटां सच्चम्पक स्त्रग्युताम्।
हस्तैर्मुद्गर पाश वज्र रसनाः संबिभ्रतीं भूषणै र्व्याप्ताङ्गीं बगलामुखीं त्रिजगतां संस्तभ्मिनीं चिंतयेत्॥

सांख्यायन तंत्र में अन्य ध्यान दिया हैं। तथा न्यास हेतु मंत्र के जो विभाग हैं उनमें प्रत्येक के आगे **'' ॐ ह्रीं ''** जोड़ने की विधि दी हैं।

चतुर्भुजां त्रिनयनां कमलासन - संस्थितां, त्रिशूलं पान पात्रं च गदां जिह्वां च विभ्रतीम् ।
बिम्बोष्ठीं कम्बुकण्ठीं च सम पीनपयोधराम्, पीताम्बरां मदाघूर्णां ध्यायेद ब्रह्मास्त्र - देवताम् ॥

एक लाख जप करके चम्पा के फूल से व बिल्वकुसुमों से दशांश होम करे।

(३) ॐ ह्रीं बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तंभय जिह्वां कीलय बुद्धिं विनाशय ह्रीं ॐ स्वाहा। उपर्युक्त मंत्र में **ह्लीं** की जगह **भुवनमाया (ह्रीं) बीज** हैं अतः मंत्र **उभयाम्नाय उत्तर** व **उर्ध्वाम्नाय** बनता हैं। अतः उपर्युक्त दोनों ध्यान करे। मेरु तंत्र के अनुसार इसके **नारायण ऋषि, त्रिष्टुप्छंद, बगलामुखी देवता ह्रीं बीज तथा स्वाहा शक्ति** हैं।

(४) ॐ ह्रीं श्रीं क्लीं बगलामुखि रिपून् नाशय नाशय ऐश्वर्यं देहि देहि अभीष्टं साधय साधय ह्रीं स्वाहा। इस मंत्र के **भैरव ऋषि, विराट् छंद, बगलामुखी देवता, क्लीं बीज, अपरा शक्ति, ऐं कीलक, अभीष्टसिद्ध्यर्थे विनियोग** हैं। इसके लिये **उर्ध्वाम्नायात्मिक बगलामुखी** का **''सौवर्णासन संस्थिता''** ध्यान करे।

अष्ट त्रिंशदक्षर मंत्र - ॐ ह्लीं (ह्रीं) बगलामुखि सर्वदुष्टानां वाचं मुखं पदं गतिं स्तंभय जिह्वां कीलय बुद्धिं विनाशय ह्लीं (ह्रीं) ॐ स्वाहा।

त्रि चत्वारिंशदक्षर मंत्र :- ह्रीं हूं ग्लौं बगलामुखि वाचं मुखं पदं ग्रस ग्रस खाहि खाहि भक्ष भक्ष शोणितं

पिब पिब बगलामुखि ह्लीं ग्लौं हुं फट्। (साँख्यायन तंत्रे) परन्तु इस मंत्र में अमुक का उल्लेख नहीं हैं अतः बगलाकल्प तरु का ४५ अक्षरों का मंत्र जपना ही श्रेयकर हैं।

पंच चत्वारिंशदक्षर मंत्र :- ह्लीं हूं ग्लौं बगलामुखि मम शत्रून् वाचं मुखं ग्रस ग्रस खाहि खाहि भक्ष भक्ष शोणितं पिब पिब बगलामुखि ह्लीं ग्लौं हुं फट्। (बगलाकल्पतरु)

सप्तचत्वारिंशदक्षर :- (ऐश्वर्यप्राप्ति हेतु) ॐ ह्लीं श्रीं क्लीं श्रीबगलामुखि मम रिपून् नाशय नाशय ममैश्वर्याणि देहि देहि शीघ्रं मनोवांछितं कार्यं साधय साधय ह्लीं स्वाहा। अन्य जगह दूसरा मंत्रः- **नाशय नाशय के बाद ऐश्वर्याणि** है तथा **शीघ्रं** शब्द नहीं हैं। इस मंत्र के प्रयोग काफी अनुभूत हैं इससे प्रेतादिक उपद्रव दूर होते हैं, बंद होने वाले व्यापार पुनः चालू व स्थिर वृद्धि को प्राप्त करते हैं। शत्रु नाश व अर्थ प्राप्ति दोनों ही फल हैं। दुर्गा सप्तशती के संपुट पाठ से अधिक फल प्राप्ति होवे। विशेष बाधा में शतचण्डी प्रयोग करना चाहिये।

विनियोग :- **अस्य मंत्रस्य भैरव ऋषि, विराट् छन्दः, श्री बगलामुखी देवता, क्लीं बीजं, सौः शक्तिः ऐं कीलकं अमुक रोग शांति, अभीष्ट सिद्ध्यर्थे जपे विनियोगः।**

न्यास :- **भैरव ऋषये नमः शिरसि। विराट् छन्दसे नमः मुखे। बगलामुखी देवतायै नमः हृदि। क्लीं बीजाय नमः गुह्ये। सौः शक्तये नमः पादयोः। ऐं कीलकाय नमः नाभौ विनियोगाय नमः सर्वाङ्गे।**

षडङ्गन्यास :- **ॐ ह्लीं श्रीं क्लीं नमः हृदये। श्री बगलामुखि शिरसे स्वाहा। मम रिपुन नाशय नाशय शिखायै वषट्। ममैश्वर्याणि देहि देहि कवचाय हुं। शीघ्रं मनोवांछितं नेत्रत्रयाय वौषट्। कार्यं साधय साधय ह्लीं स्वाहा अस्त्राय फट्। इसी तरह करन्यास करे।**

एकोन पंचाशदक्षर मंत्र :-(पूर्व मंत्र से कुछ भिन्न)- **ॐ श्रीं ह्लीं ऐं क्लीं श्रीबगलानने मम रिपून् नाशय नाशय ममैश्वर्याणि देहि देहि शीघ्रं मनोवांछितं कार्यं साधय साधय ह्लीं श्रीं स्वाहा।** इसका प्रयोग भी पूर्ववत् फलदायी हैं। तीनों मंत्र उभय एवं उर्ध्वाम्नाय के हैं।

ध्यान - **सौवर्णासन संस्थितां.....चिन्तयेत्।** तथा **चतुर्भुजा त्रिनयनां ब्रह्मास्त्र देवतां** से ध्यान करे तथा अन्य ध्यान भी तीनों मंत्रों हेतु हैं।

वन्दे स्वर्णाभवर्णां मणिगण विलसद्धेम सिंहासनस्थां पीतं वासो वसानां वसुपद मुकुटोत्तंस हाराङ्गदाढ्याम्। पाणिभ्यां वैरिजिह्वामध उपरिगदां विभ्रतीं तत्पराभ्यां हस्ताभ्यां पाशमुच्चैरध उदितवरां वेदबाहुं भवानीम्॥

॥ अशीत्यक्षर हृदय मंत्रः॥

आं ह्लीं क्रों ग्लौं हूं ऐं क्लीं श्रीं ह्रीं बगलामुखि आवेशय आवेशय आं ह्लीं क्रों ब्रह्मास्त्ररूपिणि एहि एहि आं ह्लीं क्रों मम हृदये आवाहय आवाहय सान्निध्यं कुरु कुरु आं ह्लीं क्रों ममैव हृदये चिरं तिष्ठ तिष्ठ आं ह्लीं क्रों हुं फट् स्वाहा। पाठान्तर ममैव हृदये की जगह **ममहृदये** भी हैं।

॥ शताक्षर मंत्र॥

ह्लीं ऐं ह्लीं क्लीं श्रीं ग्लौं ह्लीं बगलामुखि स्फुर स्फुर सर्वदुष्टानां वाचं मुखं पदं स्तंभय स्तंभय प्रस्फुर प्रस्फुर विकटाङ्गि घोररूपि जिह्वां कीलय महाभ्रमकरि बुद्धिं नाशय विराण्मयि सर्वप्रज्ञामयि प्रज्ञां नाशय उन्मादं कुरु कुरु मनोपहारिणि ह्लीं ग्लौं श्रीं क्लीं ह्लीं ऐं ह्लीं स्वाहा।

॥ बगलागायत्री मंत्राः॥

१. ह्लीं बगलामुखी विद्महे दुष्टस्तंभनी धीमहि तन्नो देवी प्रचोदयात्। २. ॐ ह्लीं ब्रह्मास्त्राय विद्महे स्तंभनवाणाय धीमहि तन्नो बगला प्रचोदयात्। ३. ब्रह्मास्त्राय विद्महे स्तंभनं तन्नः बगला प्रचोदयात्। (बगलामुखी रहस्ये तथा बगला कल्पतरु) **४. ॐ बगलामुख्यै विद्महे स्तंभिन्यै धीमहि तन्नो देवी प्रचोदयात्। ५. बगलाम्बायै विद्महे ब्रह्मास्त्र विद्यायै धीमहि तन्न स्तंभिनी प्रचोदयात्। ६.** (बाला बीज पुटित) **ॐ ऐं बगलामुखि विद्महे ॐ क्लीं कान्तेश्वरि धीमहि ॐ सौः तन्नः प्रह्लीं प्रचोदयात्।**

॥ शाबर मंत्रः॥

शाबर मंत्र शीघ्र प्रभावी होते हैं। **ॐ मलयाचल बगला भगवती महाक्रूरी महाकराली राजमुखबंधनं ग्राम मुखबंधनं ग्राम पुरुबंधनं कालमुखबंधनं चौरमुखबंधनं व्याघ्रमुखबंधनं सर्वदुष्टग्रहबंधनं सर्वजनबंधनं वशीकुरु हुं फट् स्वाहा।**

पाण्डवी चेटिका विद्या-(मेरुतंत्रेऽष्टादश प्रकाशे) **ॐ पाण्डवी बगले बगलामुखि शत्रोः पदं स्तंभय स्तंभय क्लीं ह्लीं श्रीं ऐं ह्लीं स्फ्रीं स्वाहा।**

॥ ध्यानम् ॥

पीताम्बरां पीतवर्णां पीतगन्धानुलेपनाम्। प्रेतासनां पीतवर्णां विचित्रां पाण्डवीं भजे ॥

प्रतिप्रदा शुक्रवार को जपे। ३० हजार कुसुंभकुसुमों से होम करे। प्रसन्न होकर पाण्डवी साधक को वस्त्र प्रदान करती हैं तथा शत्रु का स्तंभन करती हैं।

॥ अथ बगलामुखी मातृका॥

प्रत्येक मंत्र के पहले **'ह्लीं श्रीं'** लगायें व **'नमः'** जोड़ें।

ॐ ह्लीं श्रीं अं बगलामुख्यै नमः शिरसि। आं स्तंभिन्यै मुखे। इं जिभृण्यै दक्षनेत्रे। ईं मोहिन्यै वामनेत्रे। उं वश्यायै दक्षकर्णे। ऊं चलायै वामकर्णे। ऋं अचलायै दक्षनासापुटे। ॠं दुर्द्धरायै वामनासापुटे। लृं कल्पगायै दक्षगण्डे। लॄं धीरायै वामगण्डे। एं कल्पनायै ऊर्ध्वोष्ठे। ऐं कालकर्षिण्यै अधरोष्ठे। ओं भ्रामिकायै उर्ध्वदंत पंक्तौ। औं मंदगमनायै अधोदंत पंक्तौ। अं भोगिन्यै मुखवृत्ते। अः योगिन्यै कण्ठे।

शुद्धस्वर्णनिभा पातु कण्ठमध्ये तथाऽम्बिका । कण्ठमूले महाभोगा सकन्धौ शत्रुविनाशिनी ॥
भुजौ मे पातु सततं बगला सुस्मिता परा । बगला मे सदा पातु कूर्परे कमलोद्भवा ॥
बगलाऽम्बा प्रकोष्ठौ तु मणिबन्धे महाबला। बगलाश्रीर्हस्तयोश्च कुरुकुल्ला कराङ्गुलिम् ॥
नखेषु वज्रहस्ता च हृदये ब्रह्मवादिनी । स्तनौ मे मन्दगमना कुक्षयोर्योगिनी तथा ॥
उदरं बगला माता नाभिं ब्रह्मास्त्रदेवता । पुष्टिं मुद्गरहस्ता च पातु नो देववन्दिता ॥
पार्श्वयोर्हनुमद्वन्द्या पशुपाशविमोचिनी । करौ रामप्रिया पातु ऊरुयुग्मं महेश्वरी ॥
भगमाला तु गुह्यं मे लिङ्गं कामेश्वरी तथा । लिङ्गमूले महाक्लिन्ना वृषणौ पातु दूतिका ॥
बगला जानुनी पातु जानुयुग्मं च नित्यशः । जङ्घे पातु जगद्धात्री गुल्फौ रावण-पूजिता ॥
चरणौ दुर्जया पातु पीताम्बा चरणाङ्गुलीः । पादपृष्ठं पद्महस्ता पादाधश्चक्रधारिणी ॥
सर्वाङ्गं बगला देवी पातु श्रीबगलामुखी । ब्राह्मी मे पूर्वतः पातु माहेशी बह्निभागतः ॥
कौमारी दक्षिणे पातु वैष्णावी स्वर्गमार्गतः । ऊर्ध्वं पाशधरा पातु शत्रुजिह्वाधरा ह्यधः ॥
रणे राजकुले वादे महायोगे महाभये । बगला भैरवी पातु नित्यं क्लींकाररूपिणी ॥
इत्येवं वज्रकवचं महाबह्मास्त्र संज्ञकम् । त्रिसन्ध्यं यः पठेद् धीमान् सर्वैश्वर्यमवाप्नुयात् ॥
न तस्य शत्रवः केऽपि सखायः सर्व एव च । बलेनाकृष्य शत्रुं सोऽपि मित्रत्वमाप्नुयात् ॥
शत्रुत्वे मरुता तुल्यो धनेन धनदोपमः । रूपेण कामतुल्यः स्याद् आयुषा शूलधृक्समः ॥
सनकादिसमो धैर्य श्रिया विष्णुसमो भवेत् । तत्तुल्यो विद्यया ब्रह्मन् यो जपेत् कवचं नरः ॥
नारी वापि प्रयत्नेन वाञ्छितार्थमवाप्नुयात् । द्वितीया सूर्यवारेण यदा भवति पद्मभूः ॥
तस्यां जातं शतावृत्या शीघ्रं प्रत्यक्षमाप्रंयात् । याता तुरीयं संध्यायां भूशय्यायां प्रयत्नतः ॥
सर्वान् शत्रून् क्षयं कृत्वा विजयं प्राप्नुयान् नरः । दारिद्र्यान् मुच्यते चाऽऽशु स्थिरा लक्ष्मीर्भवेद् गृहे ॥
सर्वान् कमानवाप्नोति सविषो निर्विषो भवेत् । ऋण निर्मोचनं स्याद् वै सहस्त्रावर्तनाद् विधे ॥

भूतप्रेतपिशाचदिपीडा तस्य न जायते । द्युमणिभ्राजते यद्वत् तद्वत् स्याच्छ्रीप्रभावतः ॥
स्थिराभया भवेत् तस्य यः स्मरेद् बगलामुखीम् । जयदं बोधनं काममसुकं देहि मे शिवे ॥
जपस्यान्ते स्मरेद् यो वै सोऽभीष्टफलमाप्नुयात् । इदं कवचमज्ञात्वा यो जपेद् बगलामुखीम् ॥
न स सिद्धिमवाप्नोति साक्षाद् वै लोकपूजितः । तस्मात् सर्वप्रयत्नेन कवचं ब्रह्मतेजसम् ॥
नित्यं पदाम्बुजध्यानन् महेशानसमो भवेत्।

॥ इति श्रीदक्षिणामूर्तिसंहितायां ब्रह्मास्त्रबगलामुखीकवचम् समाप्तम् ॥

॥ अथ श्री त्रैलोक्यविजय कवचम् ॥

॥ श्री भैरव उवाचः ॥

शृणु देवि प्रवक्ष्यामि स्वरहस्यं च कामदम् । श्रुत्वा गोप्यं गुप्ततमं कुरु गुप्तं सुरेश्वरि ॥१॥
कवचं बगलामुख्याः सकलेष्टप्रदं कलौ । तत्सर्वस्वं परं गुह्यं गुप्तं च शरजन्मना ॥२॥
त्रैलोक्यविजयं नाम कवचेशं मनोरमम् । मन्त्रगर्भं ब्रह्ममयं सर्वविद्या विनायकम् ॥३॥
रहस्यं परमं ज्ञेयं साक्षादमृतरूपकम् । ब्रह्मविद्यामयं वर्म दुर्लभं प्राणिनां कलौ ॥४॥
पूर्णमेकोनपञ्चाशद् वर्णैरुक्त महेश्वरि । त्वद्भक्त्या वच्मि देवेशि गोपनीयं स्वयोनिवत् ॥५॥

॥ श्री देव्युवाचः ॥

भगवन् करुणासार विश्वनाथ सुरेश्वर । कर्मणा मनसा वाचा न वदामि कदाचन् ॥१॥

॥ श्री भैरव उवाचः ॥

त्रैलोक्य विजयाख्यस्य कवचास्यास्य पार्वति । मनुगर्भस्य गुप्तस्य ऋषिर्देवोऽस्य भैरवः ॥१॥
उष्णिक्छन्दः समाख्यातं देवी श्रीबगलामुखी । बीजं ह्लीं ॐ शक्तिः स्यात् स्वाहा कीलकमुच्यते ॥२॥
विनियोगः समाख्यातः त्रिवर्गफलप्राप्तये । देवि त्वं पठ वर्मैतन्मन्त्रगर्भं सुरेश्वरि ॥३॥
बिनाध्यानं कुतः सिद्धि सत्यमेतच्च पार्वति। चन्द्रोद्भासितमूर्धजां रिपुरसां मुण्डाक्षमालाकराम् ॥४॥
बालांसत्त्रकचञ्चलां मधुमदां रक्तां जटाजूटिनीम्। शत्रुस्तम्भनकारिणीं शशिमुखीं पीताम्बरोद्भासिनीम् ॥५॥
प्रेतस्थां बगलामुखीं भगवतीं कारुण्यरूपां भजे । ॐ ह्लीं मम शिरः पातु देवी श्रीबगलामुखी ॥६॥
ॐ ऐं क्लीं पातु मे भालं देवी स्तम्भनकारिणी । ॐ अं इं हं भ्रुवौ पातु क्लेशहारिणी ॥७॥
ॐ हं पातु मे नेत्रे नारसिंही शुभङ्करी । ॐ ह्लीं श्रीं पातु मे गण्डौ अं आं इं भुवनेश्वरी ॥८॥
ॐ ऐं क्लीं सौः श्रुतौ पातु इं ईं ऊं च परेश्वरी । ॐ ह्लीं ह्लूं ह्लीं सदाव्यान्मे नासां ह्लीं सरस्वती ॥९॥
ॐ ह्लां ह्लीं मे मुखं पातु लीं एं ऐं छिन्नमस्तिका । ॐ श्री वं मेऽधरौ पातु ओं औं दक्षिणकालिका ॥१०॥
ॐ क्लीं श्रीं शिरसः पातु कं खं गं घं च सारिका । ॐ ह्रीं ह्रूं भैरवी पातु ङं अं अः त्रिपुरेश्वरी ॥११॥
ॐ ऐं सौः मे हनुं पातु चं छं जं च मनोन्मनी । ॐ श्रीं श्रीं मे गलं पातु झं ञं टं ठं गणेश्वरी ॥१२॥

ॐ स्कन्धौ मेऽव्याद् डं ढं णं हूं हूं चैव तु तोतला । ॐ ह्रीं श्रीं मे भुजौ पातु तं थं दं वरवर्णिनी ॥१३॥
ऐं क्लीं सौः स्तनौ पातु धं नं पं परमेश्वरी । क्रों क्रों मे रक्षयेद् वक्षः फं बं भं भगवासिनी ॥१४॥
ॐ ह्रीं रां पातु कक्षि मे मं यं रं वह्निवल्लभा । ॐ श्रीं हूं पातू मे पार्श्वौ लं बं लम्बोदर प्रसूः ॥१५॥
ॐ श्रीं ह्रीं हूं पातु मे नाभि शं षं षण्मुखपालिनी । ॐ ऐं सौः पातु मे पृष्ठ सं हं हाटकरूपिणी ॥१६॥
ॐ क्लीं ऐं कटि पातु पञ्चाशद्वर्णमालिका । ॐ ऐं क्लीं पातु मे गुह्यं अं आं कं गुह्यकेश्वरी ॥१७॥
ॐ श्रीं ऊं ॠं सदाव्यान्मे इं ईं खं खां स्वरूपिणी । ॐ जूं सः पातु मे जंघे रुं रूं धं अघहारिणी ॥१८॥
श्रीं ह्रीं पातु मे जानू उं ऊं णं गणवल्लभा । ॐ श्रीं सः पातु मे गुल्फौ लिं लीं ऊं चं च चण्डिका ॥१९॥
ॐ ऐं ह्रीं पातु मे वाणी एं ऐं छं जं जगत्प्रिया । ॐ श्रीं क्लीं पातु पादौ मे झं ञं टं ठं भगोदरी ॥२०॥
ॐ ह्रीं सर्वं वपुः पातु अं अः त्रिपुरमालिनी । ॐ ह्रीं पूर्वे सदाव्यान्मे झं झां डं ढं शिखामुखी ॥२१॥
ॐ सौःयाम्यं सदाव्यान्मे इं ईं णं तं च तारिणी । ॐ वारुण्यां च वाराही ऊं थं दं धं च कम्पिला ॥२२॥
ॐ श्रीं मां पातु चैशान्यां पातु ॐ नं जनेश्वरी । ॐ श्रीं मां चाग्नेयां ॠं भं मं धं च यौगिनी ॥२३॥
ॐ ऐं मां नैऋत्यां लूं लां राजेश्वरी तथा । ॐ श्रीं पातु वायव्यां लृं लं वीतकेशिनी ।
ॐ प्रभाते च मो पातु लीं लं वागीश्वरी सदा ॥२४॥
ॐ मध्याह्ने च मां पातु ऐं क्षं शङ्करवल्लभा । श्रीं ह्रीं क्लीं पातु सायं ऐ आं शाकम्भरी सदा ॥२५॥
ॐ ह्रीं निशादौ मां पातु ॐ सं सागरवासिनी । क्लीं निशीथे च मां पातु ॐ हं हरिहरेश्वरी ॥२६॥
क्लीं ब्राह्मे मुहूर्तेऽव्याद लं लां त्रिपुरसुन्दरी । विसर्गा तु यत्स्थानं वर्जित कवचेन तु ॥२७॥
क्लीं तन्मे सकलं पातु अं क्षं ह्रीं बगलामुखी । इतीदं कवचं दिव्यं मन्त्राक्षरमय परम् ॥२८॥
त्रैलाक्यविजयं नाम सर्ववर्णमयं स्मृतम् । अप्रकाश्यं सदा देवि श्रोतव्यं च वाचिकम् ॥२९॥
दुर्जनायाकुलीनाय दीक्षाहीनाय पार्वति । न दातव्यं न दातव्यमित्याज्ञा पारमेश्वरी ॥३०॥
दीक्षाकार्य विहीनाय शक्तिभक्ति विरोधिने । कवचस्यास्य पठनात् साधको दीक्षितो भवेत् ॥३१॥
कवचेशमिदं गोप्यं सिद्धविद्यामयं परम् । ब्रह्मविद्यामयं गोप्यं यथेष्टफलदं शिवे ॥३२॥
न कस्य कथितं चैतद् त्रैलोक्य विजयेश्वरम् । अस्य स्मरणमात्रेण देवी सद्योवशी भवेत् ॥३३॥
पठनाद् धारणादस्य कवचेशस्य साधकः । कलौ विचरते वीरो यथा श्रीबगलामुखी ॥३४॥
इदं वर्म स्मरन् मन्त्री संग्रामे प्रविशेद् यदा । युयुत्सुः पठन् कवचं साधको विजयी भवेत् ॥३५॥
शत्रुं कालसमानं तु जित्वा स्वगृहमेति सः । मूर्ध्नि धृत्वा यः कवचं मन्त्रगर्भं सुसाधकः ॥३६॥
ब्रह्माद्यमरान् सर्वान् सहसा वशमानयेत् । धृत्वा गले तु कवचं साधकस्य महेश्वरि ॥३७॥
वशमायान्ति सहसा रम्भाद्यप्सरसां गणाः । उत्पातेषु धोरेषु भयेषु विविधेषु च ॥३८॥
रोगेषु च कवचेशं मन्त्रगर्भं पठेन्नरः । कर्मणा मनसा वाचा तद्भयं शांतिमेष्यति ॥३९॥
श्रीदेव्या बगलामुख्याः कवचेशं मयोदितम् । त्रैलोक्यविजयं नाम पुत्रपौत्र धनप्रदम् ॥४०॥

ऋणं च हरते सम्यक् लक्ष्मीर्भोगविवर्धिनी । बन्ध्या जनयते कुक्षौ पुत्ररत्नं न चान्यथा ॥४१॥
मृतवत्सा च विभृयात् कवचं च गले सदा । दीर्घायुर्व्याधिहीनश्च तत्पुत्रो वर्धतेऽनिशम् ॥४२॥
इतीदं बगलामुख्याः कवचेशं सुदुर्लभम् । त्रैलोक्यविजयं नाम न देयं यस्यकस्यचित् ॥४३॥
अकुलीनाय मूढाय भक्तिहीनायदम्भिने । लोभयुक्ताय देवेशि न दातव्यं कदाचन् ॥४४॥
लोभदम्भविहीनाय कवचेशं प्रदीयताम् । अभक्तेभ्यो अपुत्रेभ्यो दत्वा कुष्ठी भवेन्नरः ॥४५॥
रवौ रात्रौ च सुस्नातः पूजागृहगतः सुधीः । दीपमुज्वाल्य मूलेन पठेद्वर्मेदमुत्तमग् ॥४६॥
प्राप्तौ सत्यां त्रिरात्रौ हि राजा तद्गृहमेष्यति । मण्डलेशो महेशानि देवि सत्यं न संशय ॥४७॥
इदं तु कवचेशं तु मया प्रोक्त नगात्मजे । गोप्यं गुह्यतरं देवि गोपनीयं स्वयोनिवत् ॥४८॥

॥ इति विश्वयामले बगलामुख्यास्त्रैलोक्यविजयं कवचम् ॥

॥ अथ श्री बगला यंत्रराज रक्षा स्तोत्रम् ॥

इस स्तोत्र में बगला मंत्र ऋषि नारद, छंद पंक्ति, देवता पीताम्बरा, ह्लीं बीजं, स्वाहा शक्ति, सं कीलक, शत्रुविनाशक विनियोग कहा गया है तथा इस स्तोत्र के पाठ से यंत्रार्चन का फल प्राप्त होता है।

वन्दे सकलसन्देह दावपावकमीश्वरम् । करुणावरुणावासं भक्तकल्परुं गुरुम् ॥१॥
उल्लसत्पीतविद्योति विद्योतिततनुत्रयम् । निगमागम सर्वस्वमीडेऽहं तन्महन्महः ॥२॥
ॐ पूर्वं स्थिरमायां च बगलामुखि सर्वतः । दुष्टानां वाचमुच्चार्य मुखं पदं तथोद्धरेत् ॥३॥
स्तम्भयेति ततो जिह्वां कीलयेति समुद्धरेत् । बुद्धिंविनाशयेति पदं स्थिरमायामनुस्मरेत् ॥४॥
प्रणवं वह्निजायां चेत्येष पैताम्बरो मनुः । पातु मां सर्वदा सर्वनिग्रहानुग्रहक्षमः ॥५॥
कण्ठं नारद ऋषिः पातु पङ्क्तिश्छन्दोऽवतान्मुखम् । पीताम्बरा देवता तु हृन्मध्यमवतान्मम् ॥६॥
ह्लीं बीजं स्तनयोर्मेऽव्यात् स्वाहा शक्तिश्च दन्तयोः । सं कीलकं तथा गुह्ये विनियोगोगोऽवताद् वपुः ॥७॥
षड्दीर्घभाजा बीजेन न्यासोऽव्यान्मे करादिकम् । द्विपञ्चपञ्चनन्देषुदशभिर्मन्त्र वर्णकैः ॥८॥
षडङ्गकल्पना पातु षडङ्गानि ह्यनुक्रमात् । ऐं विद्यातत्वं क्लीं मायातत्वं सौश्च शिवात्मकम् ॥९॥
तत्वत्रयं सं बीजं च मूलं हृत्कण्ठमध्यगः । सुधाब्धौ हेमभूरुढचम्पकोद्यानमध्यतः ॥१०॥
गारुडोत्पलनिर्व्यूढ स्वर्णसिंहासनोपरि । स्वर्णपङ्कजसंविष्टां त्रिनेत्रां शशिशेखराम् ॥११॥
पीतालङ्कारवसनां मल्लीचन्दनशोभिताम् । सव्याभ्यां पञ्चशाखाभ्यां वज्रं जिह्वां च विभ्रतीम् ॥१२॥
मुद्गरं नागपाशं च दक्षिणाभ्यां मदालसाम्। भक्तारिविग्रहोद्योग प्रगल्भां बगलामुखीम् ॥१३॥
ध्यायमानस्य मे पातु शात्रवोद्द्वेषणे भृशम् । भूकलादलदिक्पत्रषट्कोणं त्र्यस्त्रबैन्दुकम् ॥१४॥
यन्त्रं पैताम्बरं पायाद् पायात् सा माम् अविग्रहा । आधारशक्तिमारभ्य ज्ञानात्मान्तास्तु शक्तयः ॥१५॥
पीठाद्याः पान्तु पीठेऽत्र प्रथमं मां च रक्षतु। शान्तिशङ्खविशेषात्मशक्ति भूतानि पान्तु माम् ॥१६॥

आवाहनाद्याः पञ्चापि मुद्राश्च सुमनोजलैः। त्रिकोणमध्यमारभ्य पूजिता बगलामुखी ॥१७॥
क्रोधिनी स्तम्भिनी चापि धारिण्यश्चापि मध्यगाः। ओजः पूषादिपीठानि कोणाग्रेषु स्थितानि वै ॥१८॥
त्रिकोणबाह्यतः सिद्धनाथाद्या गुरवस्तथा। सिद्धनाथः सिद्धनन्दनाथः सिद्धपरेष्ठि-हि ॥१९॥
नाथः सिद्धः श्रीकण्ठश्च नाथः सिद्धचतुष्टयम्। पातु मामथ षट्कोणे सुभगा भगरूपिणी ॥२०॥
भगोदया च भगनिपातिनी भगमालिनी। भगावह च मां पातु षट्कोणाग्रेषु च क्रमात् ॥२१॥
त्वगामा शोणितात्म च मांसात्मा मेदसात्मकः। रूपात्मा परमात्मा च पातु मां स्थिरविग्रहा ॥२२॥
अष्टपत्रेषु मूलेषु ब्राह्मी माहेश्वरी तथा। कौमारी वैष्णवी वाराहीन्द्राणी च तथा पुनः ॥२३॥
चामुण्डा च महालक्ष्मीस्तत्र मध्ये पुनर्जया। विजया च जयाम्बा च राजिता जृम्भिणी तथा ॥२४॥
स्तम्भिनी मोहिनी वश्याऽकर्षिणी, अथ तदग्रके। असिताङ्गी रुरुश्चण्डः क्रोधोन्मत्तकपालिनः।
भीषणश्चापि संहार एते रक्षन्तु मां सदा ॥२५॥
ततः षोडशपत्रेषु मङ्ला स्तम्भिनी तथा। जृम्भिणी मोहिनी वश्या ज्वालासिंही वलाहका ॥२६॥
भूधरा कल्मषा धात्री कन्यका कालकर्षिणी। भान्तिका मन्दगमना भोगस्था भाविकेति च ॥२७॥
पातु मामथ भूसद्म दशदिक्षु दिगीश्वराः। इन्द्रोऽनलो यमो रक्षो वरुणो मारुतः शशी।
ईशाऽनन्तः स्वयम्भूश्च दशैते पान्तम मे वपुः ॥२८॥
वज्र शक्तिर्दण्डखड्गौ पाशाङ्कुशगदाः क्रमात्। शूलं चक्रं सरोजं च तत्तच्छस्त्राणि पान्तु माम् ॥२९॥
अथ च पूर्वादिचतुद्वरिषु परतः क्रमात्। पातु विघ्नेशवटुकौ योगिनी क्षेत्रपालकः ॥३०॥
गुरुत्रयं त्रिरेखासु पातु मे वपुरञ्जसा। पुनः पीताम्बरा पातु उपचारैः प्रपूजिता ॥३१॥
साङ्गावरणशक्तिश्च जयश्रीः पातु सर्वदा। वलयं, वटुकादिभ्यो रक्षां कुर्वन्तु मे सदा ॥३२॥
शक्तयः साधका वीराः, पान्तु मे देवता इमाः। इत्यर्चाक्रमतः प्रोक्तं स्तोत्रं पैताम्बरं परम् ॥३३॥
यः पठेत् सकृदप्येतत् सोऽर्चाफलमवाप्नुयात। सर्वथा कारयेत् क्षिप्रं प्रपद्यन्ते गदातुरान् ॥३४॥
राजानो राजपत्न्याश्च पौर जानपदास्तथा। वशगास्तस्य जायन्ते सततं सेवका इव ॥३५॥
गुरुकल्पाश्च विबुधा मूकता यान्ति तेऽग्रतः। स्थिरीभवति तद्गेहे चपलानि हरिप्रिया ॥३६॥
पीताम्बराङ्गवसनो यदि लक्षसंख्यं, पैताम्बरं मनुममुं प्रजपेत् नरो यः ॥
हैमीं सकृन्नियमवान् विधिना हरिद्रामालां दधत् भवति तदवशगा त्रिलोकी ॥३७॥
भवानि बगलामुखि त्रिदशकल्पवल्लि प्रभो कृपाजलनिधे तब चरणधूतबाधाखिलः ॥
सुरासुरनरादिक सकलभक्तभाग्यप्रदे, त्वदङ्घ्रिसरसीरुहद्वयमहं तु ध्याये सदा ॥३८॥
त्वमम्ब जगतां जनिस्थितिविनाशर्बी निज प्रकाशबहुलद्युतिर्भवति भक्तहृन्मध्यगा।
त्रयीमनुसुपूजिता हरिहरादिवृन्दारकै, रनुक्षणमनुक्षणं मयि शिवे क्षणं वीक्ष्यताम् ॥३९॥
शिवे तव तनूमहं हरिहराद्यगम्यां पराम्, निखिलतापप्रत्यूह हृद्दयाभावयुक्तां स्मरे ॥
विदारय विचूर्णय ग्लपय शोषय स्तम्भय, प्रणोदय विरोधय प्रविलय प्रबद्धारीणाम् ॥४०॥

क्व पार्वति कृपालसन् मयि कटाक्षपातं मनाग्। अनाकुलतया क्षणं क्षिप विपक्षसंक्षोभिणि।
यदीक्षणपथं गतः सकृदपि प्रभुः कश्चन स्फुटं मय वशंवदा भवतु तेन पीताम्बरे ॥४१॥
ॐ नमो भगवतेमहारुद्राय हुं फट् स्वाहा। इति भैरवमन्त्रः। इति अथर्वणरहस्ये बगलामुख्या अर्चाक्रमस्तोत्रम्॥

॥ इति श्रीदेवानन्दनाथशिष्यरामचन्द्रनाथविरचितायां मन्त्रसंग्रह दीपिकायां श्रीबगलास्तवराजः समाप्तः ॥

॥ अथ बगलापञ्जर स्तोत्रम् ॥

यह स्तोत्र स्वरक्षा कारक एवं श्रीवृद्धि कारक है।

॥ सूत उवाच ॥

सहस्त्रादित्यसंकाशं शिवं साम्बं सनातनम्। प्रणम्य नारदः प्राह विनम्रो नतकन्धरः ॥१॥

॥ श्री नारद उवाच ॥

भगवन् साम्ब तत्त्वज्ञ सर्वदुःखापहारक। श्रीमत्पीताम्बरादेव्याः पञ्जरं पुण्यदं सताम् ॥२॥
प्रकाशय विभो नाथ कृपां कृत्वा ममोपरि। यद्यहं तव पादाब्जधूलिधूसरितोऽभवम् ॥३॥

॥ श्रीशिव उवाच ॥

विनियोग च ऋष्यादिन्यास : – ॐ अस्य श्रीमद्बगलामुखीपीताम्बरा पञ्जररूपस्तोत्र मन्त्रस्य भगवते नारदऋषये नमः शिरसि, अनुष्टुप्छन्दसे नमो मुखे, जगद्वश्यकरी श्रीपीताम्बरा बगलामुखी देवतायै नमो हृदये, ह्लीं बीजाय नमो दक्षिणस्तने स्वाहा शक्तये नमो वामस्तने, क्लीं कीलकाय नमो नाभौ, मम विपक्ष परसैन्यमन्त्रतन्त्र यन्त्रादिकृत क्षयार्थं श्रीमत्पीताम्बराबगलादेव्याः प्रीतये जपे विनियोगः। करसम्पुटेन मूलेन करशुद्धिः। ह्लामिति षट्दीर्घेण षडङ्गः। मूलेन व्यापकन्यासं कुर्यात्।

ह्लां, ह्लीं, ह्लूं, ह्लैं, ह्लौं, ह्लः से षडङ्गन्यास करें।

॥ अथ ध्यानम् ॥

मध्येसुधाब्धिमणिमण्डित रत्नवेद्यां सिंहासनोपरिगतां परिपीतवर्णाम्।
पीताम्बराभरण माल्यविभूषिताङ्गीं देवीं नमामि धृतमुद्गरवैरिजिह्वाम् ॥

इति ध्यात्वा मनसा सम्पूज्य, मुद्रां प्रदर्श्य, ऋष्यादिन्यासं कृत्वा, पञ्जरं न्यसेत्।

॥ श्रीशिव उवाच ॥

पञ्जरं तत् प्रवक्ष्यामि देव्याः पापप्रणाशनम्। यं प्रविश्य न बाधन्ते बाणैरपि नराः क्वचित् ॥१॥
ॐ ऐं ह्लीं श्रीं श्रीमत्पीताम्बरा देवी बगला बुद्धिवर्धिनी। पातु मामनिशं साक्षात् सहस्त्रार्कसमद्युतिः ॥२॥
शिखादिपाद पर्यन्तं वज्रपञ्जरधारिणी। ॐ ऐं ह्लीं श्रीं श्रीमद्ब्रह्मास्त्रविद्या या पीताम्बर विभूषिता ॥३॥
बगला मामवत्वत्र मूर्धभागं महेश्वरी। ॐ ऐं ह्लीं श्रीं कामाङ्कुशकला पातु बगला शास्त्रबोधिनी ॥४॥
पीताम्बरा सहस्त्राक्षा ललाटं कामितार्थदा। ॐ ऐं ह्लीं श्रीं पातु बगला पीताम्बरसुधारिणी ॥५॥
कर्णयोश्चैव युगपद अतिरत्नप्रपूजिता। ॐ ऐं ह्लीं श्रीं पातु बगला नासिकां मे गुणाकरा ॥६॥

पीतपुष्पैः पीतवस्त्रैः पूजिता वेददायिनी । ॐ ऐं ह्रीं श्रीं पातु बगला ब्रह्माविष्णवादिसेविता ॥७॥
पीताम्बरा प्रसन्नास्या नेत्रयोर्युगपद् भ्रुवौ । ॐ ऐं ह्रीं श्रीं पातु बगला वलिदा पीतवस्त्रधृक् ॥८॥
अधरोष्ठौ तथा दन्तान् जिह्वां च मुखगां मम । ॐ ऐं ह्रीं श्रीं पातु बगला पीताम्बरसुधारिणी ॥९॥
गले हस्ते तथा वाह्वोः युगपद् बुद्धिदा सताम् । ॐ ऐं ह्रीं श्रीं पातु बगला दिव्यस्त्रगनुलेपना ॥१०॥
हृदये च स्तनौ नाभौ करावपि कृशोदरी । ॐ ऐं ह्रीं श्रीं पातु बगला पीतवस्त्रघनावृता ॥११॥
जङ्घायां च तथा चोर्वोर्गुल्फयोश्चातिवेगिनी । अनुक्तमपि यत् स्थानं त्वक्केशनखलोमकम् ॥१२॥
असृङ्मांसं तथाऽस्थीनि सन्धयश्चापिमे परा ॥

॥फलश्रुति॥

इत्येतद् वरदं गोप्यं कलावपि विशेषतः ॥१३॥
पञ्जरं बगलादेव्या दीर्घदारिद्र्यनाशनम् । पञ्जरं यः पठेत् भक्त्या स विघ्नैर्नाभिभूयते ॥१४॥
अव्याहतगतिश्चास्य ब्रह्मविष्णवादिसत्पुरे । स्वर्गे मर्त्ये च पाताले नाऽरयस्तं कदाचन ॥१५॥
प्रबाधन्ते नरव्याघ्रं पञ्जरस्थं कदाचन । अतो भक्तैः कौलिकैश्च स्वरक्षार्थं सदैव हि ॥१६॥
पठनीयं प्रयत्नेन सर्वाऽनर्थविनाशनम् । महादारिद्र्यशमनं सर्वमाङ्गल्यवर्धनम् ॥१७॥
विद्याविनयसत्सौख्यं महासिद्धिकरं परम् । इदं ब्रह्मास्त्रविद्यायाः पञ्जरं साधु गोपितम् ॥१८॥
पठेत् स्मरेद् ध्यानसंस्थः स जीयान् मरणान् नरः । यः पञ्जरं प्रविश्यैव मन्त्रं जपति वै भुवि ॥१९॥
कौलिकोऽकौलिको वापि व्यासवद् विचरेद् भुवि । चन्द्रसूर्यप्रभुर्भूत्वा वसेत् कल्पायुतं दिवि ॥२०॥

॥ श्री सूत उवाच ॥

इति कथितमशेषं श्रेयसामादिबीजं । भवशतदुरितघ्नं ध्वस्तमोहान्धकारम् ॥
स्मरणमतिशयेन प्राप्तिरेवात्र मर्त्यः । यदि विशति सदा वै पञ्जरं पण्डितः स्यात् ॥२१॥

॥ इति श्रीपरमरहस्यातिरहस्ये पीताम्बरापञ्जर स्तोत्रं समाप्तम् ॥

॥ अथ पञ्जरन्यास स्तोत्रम् ॥

(दिग्रक्षण प्रयोगः)

बगला पूर्वतो रक्षेद् आग्नेय्यां च गदाधरी । पीताम्बरा दक्षिणे च स्तम्भिनी चैव नैर्ऋते ॥१॥
जिह्वाकीलिन्यतो रक्षेत् पश्चिमे सर्वदा हि माम् । वायव्ये च मदोन्मत्ता कौवेर्यां च त्रिशूलिनी ॥२॥
ब्रह्मास्त्रदेवता पातु ऐशान्यां सततं मम । संरक्षेन् मां तु सततं पाताले स्तब्धमातृका ॥३॥
ऊर्ध्वं रक्षेन् महादेवी जिह्वास्तम्भनकारिणी। एवं दश दिशो रक्षेद् बगला सर्वसिद्धिदा ॥४॥
एवं न्यासविधिं कृत्वा यत् किञ्चिंज्जपमाचरेत् । तस्याः संस्मरणादेव शत्रूणां स्तम्भनं भवेत् ॥५॥

॥ इति पञ्जरन्यासस्तोत्रं सम्पूर्णम् ॥

॥ बगलामुखी कीलक स्तोत्रम् ॥

स्थान व देह रक्षा, शत्रुनिग्रह एवं विजय प्राप्ति हेतु

ह्लीं ह्लीं ह्लींकारवाणे रिपुदलदलने घोरगम्भीरनादे। ह्रीं ह्रींकाररूपे मुनिगणनमिते सिद्धिदे शुभ्रदेहे॥
भ्रों भ्रों भ्रोंकारनादे निखिलरिपुघटात्रोटने लग्नचित्ते। मातर्मातर्नमस्ते सकलभयहरे नौमि पीताम्बरे त्वाम्॥१॥
क्रौं क्रौं क्रौंमीशरूपे अरिकुलहनने देहकीले कपाले। हस्त्रौं हस्त्रौं स्वरूपे समरसनिरते दिव्यरूपे स्वरूपे॥
ज्रौं ज्रौं ज्रौं जातरूपे जहिजहि दुरितं जम्भरूपे प्रभावे। कालिकङ्कालरूपे अरिजनदलने देहि सिद्धिंपरां मे॥२॥
हस्त्रां हस्त्रीं च हस्त्रें त्रिभुवनविदिते चण्डमार्त्तण्डचण्डे। ऐं क्लीं सौं कौलविद्ये सततशमपरे नौमि पीतस्वरूपे॥
द्रौं द्रौं द्रौं दुष्टचित्ताऽऽदलनपरिणतबाहुयुग्मत्वदीये। ब्रह्मास्त्रे ब्रह्मरूपे रिपुदलहनने ख्यातदिव्यप्रभावे॥३॥
ठं ठं ठंकारवेशे ज्वलनप्रतिकृतिज्वालमालास्वरूपे। धां धां धां धारयन्तीं रिपुकुलरसनां मुद्गरं वज्रपाशम्।
मातर्मातर्नमस्ते प्रबलखलजनं पीडयन्तीं भजामि। डांडांडां डाकिन्याद्यैर्डिमकडिमडिमं डमरुकं वादयन्तीम्॥४॥
वाणीं व्याख्यानदात्रीं रिपुमुखखनने वेदशास्त्रार्थपूताम्। मातः श्री बगले परात्परतरे वादे विवादे जयम्॥
देहि त्वं शरणागतोऽस्मि विमले देवि प्रचण्डो द्धते। माङ्गल्यं वसुधासु देहि सततं सर्वस्वरूपे शिवे॥५॥
निखिलमुनिनिषेव्यं स्तम्भनं सर्वशत्रोः। शमपरमिह नित्यं ज्ञानिनां हार्दरूपम्॥
अहरहरनिशायां यः पठेद्देवि कीलम्। भवति परमेशो वादिनामग्रगण्यः॥६॥

॥ अथ बगलामुखी ह्रदय स्त्रोतम्॥

विनियोग - ॐ अस्य श्रीबगलामुखी ह्रदयमालामन्त्रस्य नारद ऋषिः, अनुष्टुप् छन्दः, श्रीबगलामुखी देवता, ह्लीं बीजं, क्लीं शक्तिः, ऐं कीलकं श्रीबगलामुखीवरप्रसादसिद्ध्यर्थे जपे विनियोगः।

अथ न्यासः- ॐ नारद ऋषये नमः शिरसि, ॐ अनुष्टुप् छन्दसे नमो मुखे, ॐ श्रीबगलामुख्यै देवतायै नमः ह्रदये, ॐ ह्लीं बीजाय नमो गुह्ये, ॐ क्लीं शक्तये नमः पादयोः, ॐ ऐं कीलकाय नमः सर्वाङ्गे।

अथ कराङ्गन्यासौ - ॐह्लीं अङ्गुष्ठाभ्यां नमः, ॐ क्लीं तर्जनीभ्यां नमः, ॐ ऐं मध्यमाभ्यां नमः, ॐ ह्लीं अनामिकाभ्यां नमः, ॐ क्लीं कनिष्ठिकाभ्यां नमः, ॐ ऐं करतलकरपृष्ठाभ्यां नमः॥ ॐ ह्लीं ह्रदयाय नमः, ॐ क्लीं शिरसे स्वाहा, ॐ ऐं शिखाये वषट्, ॐ ह्लीं कवचाय हुम्, ॐ क्लीं नेत्रत्रयाय वौषट्, ॐ ऐं अस्त्राय फट्॥ ॐ ह्लीं क्लीं ऐं इति दिग्बन्धः।

पीताम्बरां पीतमाल्यां पीताभरणभूषिताम्। पीतकञ्जपदद्वन्द्वां बगलां चिन्तयेऽनिशम्॥

इति ध्यात्वा सम्पूज्य

पीतशङ्खगदाहस्ते पीतचन्दनचर्चिते। बगले मे वरं देहि शत्रुसङ्घविदारिणी॥

इति सम्प्रार्थ्य, ॐह्लीं क्लीं ऐं बगलामुख्यै गदाधिरिण्यै प्रेतासनाध्यासिन्यै स्वाहा इति मन्त्रं जपित्वा स्तोत्रं च पठेत्।

॥ स्त्रोतम् ॥

वन्देऽहं बगलां देवीं पीतभूषणभूषिताम् । तेजोरूपमयीं देवीं पीततेजः स्वरूपिणीम् ॥ १ ॥
गदाभ्रमणभिन्नाभ्रां भ्रुकुटीभीषणाननाम् । भीषयन्तीं भीमशत्रून् भजे भव्यस्य भक्तिदाम् ॥ २ ॥
पूर्णचन्द्रसमानास्यां पीतगन्धानुलेपनाम् । पीताम्बरपरीधानां पवित्रामाश्रयाम्यहम् ॥ ३ ॥
पालयन्तीमनुपलं प्रसमीक्ष्याऽवनीतले । पीताचाररतां भक्तां स्ताम्भवानीं भजाम्यहम् ॥ ४ ॥
पीतपद्मपदद्वन्द्वां चम्पकारण्य रूपिणीम् । पीतावतंसां परमां वन्दे पद्मजवन्दिताम् ॥ ५ ॥

लसच्चारुसिञ्जत्सुमञ्जीरपादां चलत्स्वर्णकर्णावतंसाञ्चितास्याम् ।
वलत्पीतचन्द्राननां चन्द्रवन्द्यां भजे पद्मजादीड्यसत्पादपद्माम् ॥ ६ ॥

सुपीताभयामालया पूतमन्त्रं परं ते जपन्तो जयं संलभन्ते ।
रणे रागरोषाप्लुतानां रिपूणां विवादे बलाद्वैरकृद्घातमातः ॥ ७ ॥

भरत्पीतभास्वत्प्रभाहस्कराभां गदागञ्जितामित्रगर्वां गरिष्ठाम् ।
गरीयोगुणागारगात्रां गुणाढ्यां गणेशादिगम्यां श्रये निर्गुणाढ्याम् ॥ ८ ॥

जना ये जपन्त्युग्रबीजं जगत्सु परं प्रत्यहं ते स्मरन्तः स्वरूपम् ।
भवेद् वादिनां वाङ्मुखस्तम्भ आद्ये जयो जायते जल्पतामाशु तेषाम् ॥ ९ ॥

तव ध्याननिष्ठाप्रतिष्ठात्मप्रज्ञावतां पादपद्मार्चने प्रेमयुक्ताः ।
प्रसन्ना नृपाः प्राकृताः पण्डिता वा पुराणादिगा दासतुल्या भवन्ति ॥ १० ॥

नमामस्ते मातः कनककमनीयाङ्घ्रिजलजम् । बलद्विद्युद्वर्णं घनतिमिरविध्वंसकरणम् ॥
भवाब्धौ मग्नात्मोत्तरणकरणं सर्वशरणम् । प्रपन्नानां मातर्जगति बगले दुःखदमनम् ॥ ११ ॥
ज्वलज्ज्योत्स्ना रत्नाकरमणिविभुषिक्ताङ्क भवनम् । स्मरामस्ते धाम स्मरहरहरीन्द्रेन्दुप्रमुखैः ॥
अहोरात्रं प्रातः प्रणयनवनीयं सुविशदम् । परं पीताकारं परिचितमणिद्वीपवसनम् ॥ १२ ॥
वदामस्ते मातः श्रुतिसुखकरं नाम ललितम् । लसन्मात्रावर्णं जगति बगलेति प्रचरितम् ॥
चलन्तस्तिष्ठन्तो वयमुपविशन्तोऽपि शयने । भजामोयच्छ्रेयो दिवि दूरवलभ्यं दिविषदाम् ॥ १३ ॥
पदार्चायां प्रीतिः प्रतिदिनमपूर्वा प्रभवतु । यथा ते प्रासन्न्यं प्रतिपलमपेक्ष्यं प्रणमताम् ॥
अनल्पं तन्मातर्भवति भृतभक्त्या भवतु नो । दिशातः सद्भक्तिं भुवि भगवतां भूरि भवदाम् ॥ १४ ॥
मम सकलरिपूणां वाङ्मुखे स्तम्भयाशु । भगवति रिपुजिह्वां कीलय प्रस्थतुल्याम् ॥
व्यवसितखलबुद्धिं नाशयाऽऽशु प्रगल्भाम् । मम कुरु बहुकार्यं सत्कृपे ऽम्ब प्रसीद ॥ १५ ॥
व्रजतु मम रिपूणां सद्मनि प्रेतसंस्था । करधृतगदया तान् घातयित्वाऽऽशु रोषात् ॥
सधनवसनधान्यं सद्म तेषां प्रदह्य । पुनरपि बगला स्वस्थानमायातु शीघ्रम् ॥ १६ ॥
करधृतुरिपुजिह्वा पीडनव्यग्रहस्तां । पुनरपि गदया तांस्ताडयन्तीं सुतन्त्राम् ॥
प्रणतसुरगणानां पालिकां पीतवस्त्रां । बहुबलबगलान्तां पीतवस्त्रां नमामः ॥ १७ ॥
हृदयवचनकायः कुर्वतां भक्तिपुञ्जं । प्रकटति करुणार्द्रा प्रीणती जल्पतीति ॥

धनमथ बहुधान्यं पुत्रपौत्रादिवृद्धिः । सकलमपि किमेभ्यो देयमेवं त्ववश्यम् ॥१८॥
तव चरणसरोजं सर्वदा सेव्यमानं । द्रुहिणहरिहराद्यैर्देववृन्दैः शरण्यम् ॥
मृदुलमपि शरं ते शर्म्मदं सूरिसेव्यं । वयमिह करवामो मातरेतद् विधेयम् ॥१९॥
बगलाहृदयस्तोत्रमिदं भक्तिसमन्वितः । पठेद् यो बगला तस्य प्रसन्ना पाठतो भवेत् ॥२०॥
पीताध्यानपरो भक्तो यः शृणोत्यविकल्पत । निष्कल्मषो भवेन् मर्त्यो मृतो मोक्षमवाप्नुयात् ॥२१॥
आश्विनस्य सिते पक्षे महाष्टम्यां दिवानिशम् । यस्त्विदं पठते प्रेम्णा बगलाप्रीतिमेति सः ॥२२॥
देव्यालये पठन् मर्त्यो बगलां ध्यायतीश्वरीम् । पीतवस्त्रावृतो यस्तु तस्य नश्यन्ति शत्रवः ॥२३॥
पीताचाररतो नित्यं पीतभूषां विचिन्तयन् । बगलां यः पठेन् नित्यं हृदयस्तोत्रमुत्तमम् ॥२४॥
न किंचिद्दुर्लभं तस्यदृश्यते जगतीतले । शत्रवो ग्लानिर्मायान्ति तस्य दर्शनमात्रतः ॥२५॥

॥ इति श्रीसिद्धेश्वरतन्त्रे उत्तरखण्डे बगलापटले श्रीबगलाहृदय समाप्तमं ॥

॥ अथ श्रीब्रह्मास्त्रमहाविद्यास्तोत्रम् ॥

(बगलामुखी स्तोत्रम्)

विनियोग – ॐ अस्य श्री बगुलामुखीस्तोत्रस्य भगवान् नारद ऋषिः, श्री बगुलामुखी देवता, त्रिष्टुप् छन्दः, मम सन्निहितानामसन्निहितानां विरोधिनां दुष्टानां वाङ्मुखबुद्धीनां स्तभ्भनार्थं श्री महामायाबगलामुखी वरप्रसाद सिद्ध्यर्थं जपे (पाठे) विनियोगः।

करन्यास – ॐ ह्लीं अङ्गुष्ठाभ्यां नमः, ॐ बगलामुखि तर्जनीभ्यां स्वाहा, ॐ सर्वदुष्टानां मध्यमाभ्यां वषट्, ॐ वाचं मुखं पदं स्तंम्भय अनामिकाभ्यां हुम्, ॐ जिह्वां कीलय कनिष्ठिकाभ्यां वौषट्, ॐ बुद्धिं विनाशय ह्लीं ॐ स्वाहा करतलकरपृष्ठाभ्यां फट् । एवं हृदयादिषु।

॥ अथ ध्यानम् ॥

सौवर्णासनसंस्थितां त्रिनयनां पीतांशुकोल्लासिनीम् हेमाभाङ्गरुचिं शशाङ्कमुकुटां सच्चम्पकस्त्रग्युताम् ॥
हस्तैर्मुद्गरपाशवज्ररसनाः संबिभ्रतीं भूषणैः व्याप्ताङ्गीं बगलामुखीं त्रिजगतां संस्तभ्भिनीं चिन्तयेत् ॥

जपमन्त्रः – ॐ ह्लीं बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तंम्भय जिह्वां कीलय बुद्धिं विनाशय ह्लीं ॐ स्वाहा ।

॥ अथ स्तोत्रम् ॥

मध्येसुधाब्धि मणिमण्डप रत्नवेद्यां सिंहासनोपरिगतां परिपीतवर्णाम् ।
पीताम्बराभरण माल्यविभूषिताङ्गीम् देवीं नमामि धृतमुद्गरवैरिजिह्वाम् ॥ १ ॥
जिह्वाग्रमादाय करेणदेवीं, वामेन शत्रून् परिपीडयन्तीम् । गदाभिघातेन च दक्षिणेन पीताम्बराढ्यां द्विभुजां नमामि ॥२॥
त्रिशूलधारिणीमम्बां सर्वसौभाग्यदायिनीम् । सर्वशृङ्गारवेशाढ्यां देवीं ध्यात्वा प्रपूजयेत् ॥३॥
पीतवस्त्रां त्रिनेत्रां च द्विभुजां हाटकोज्ज्वलाम् । शिलापर्वतहस्तां च स्मरेत् तां बगलामुखीम् ॥४॥

रिपुजिह्वाग्रहां देवीं पीतपुष्पविभूषिताम् । वैरिनिर्दलनार्थाय स्मरेत् तां बगलामुखीम् ॥५॥
गम्भीरां च मदोन्मत्तां स्वर्णकान्तिसमप्रभाम् । चतुर्भुजां त्रिनेत्रां च कमलासनसंस्थिताम् ॥६॥
मुद्गरं दक्षिणे पाशं वामे जिह्वां च वज्रकम् । पीताम्बरधरां सान्द्रदृढपीनपयोधराम् ॥७॥
हेमकुण्डलभूषां च पीतचन्द्रार्धशेखराम् । पीतभूषणपीताङ्गीं स्वर्णसिंहासने स्थिताम् ॥८॥
एवं ध्यात्वा जपेत् स्तोत्रमेकाग्रकृतमानसः । सर्वसिद्धिमवाप्नोति मन्त्रध्यानपुरः सरम् ॥९॥
आराध्या जगदम्ब दिव्यकविभिः सामाजिकैः स्तोतृभिः । माल्यैश्चन्दनकुङ्कुमैः परिमलैरभ्यर्चिता सादरात् ॥
सम्यङ्न्यासिसमस्तभूतनिवहे सौभाग्यशोभाप्रदे श्रीमुग्धे बगले प्रसीद विमले दुःखापहे पाहि माम् ॥१०॥
आनन्दकारिणी देवी रिपुस्तम्भनकारिणी । मदनोन्मादिनी चैव प्रीतिस्तम्भनकारिणी ॥११॥
महाविद्या महामाया साधकस्य फलप्रदा । यस्याः स्मरणमात्रेण त्रैलोक्यं स्तम्भयेत् क्षणात् ॥१२॥
वामे पाशाङ्कुशौ शक्तिं तस्याधस्ताद् वरं शुभम् । दक्षिणे क्रमतो वज्रं गदाजिह्वाऽभयानि च ॥१३॥
विभ्रतीं संसमरेन्नित्यं पीतमाल्यानुलेपनाम् । पीताम्बरधरां देवीं ब्रह्मादिसुरवन्दिताम् ॥१४॥
केयूराङ्गदकुण्डलभूषां बालार्कद्युतिरञ्जितवेषाम् । तरुणादित्यसमानप्रतिमां कौशेयांशुकबद्धनितम्बाम् ॥१५॥
कल्पद्रुमतलनिहितशिलायां प्रमुदितचित्तौल्लासदलकान्ताम् । पञ्चप्रेतनिकेतनबद्धां भक्तजनेभ्यो वितरणशीलाम् ॥१६॥
एवं विधां तां बगलां ध्यात्वा मनसि साधकः । सर्वसम्पत्समृद्ध्यर्थं स्तोत्रमेतदुदीरयेत् ॥१७॥
चलत् कनककुण्डलोल्लसित चारुगण्डस्थलाम् । लसत्कनकचम्पकद्युतिमदिन्दुबिम्बाननाम् ॥
गदाहतविपक्षकां कलितलोलजिह्वां चलाम् । स्मरामि बगलामुखीं विमुखवाङ्मुखस्तम्भिनीम् ॥१८॥
पीयूषोदधि मध्यचारुविलसद्रत्नोज्ज्वले मण्डपे । तत्सिंहासनमूलपातितरिपुं प्रेतासनाध्यासिनीम् ॥
स्वर्णाभां करपीडितारिरसनां भ्राम्यद्गदां विभ्रमां । यस्त्वां ध्यायति, यान्ति तस्य विलयं सद्योऽथ सर्वापदः ॥१९॥
देवि त्वच्चरणाम्बुजार्चनकृते यः पीतपुष्पाञ्जलिं मुद्रां वामकरे निधाय च पुनर्मन्त्री मनोज्ञाक्षरम् ॥
पीताध्यानपरोऽथ कुम्भकवशाद् बीजं स्मरेत् पार्थिवं । तस्यामित्रमुखस्य वाचि हृदये जाड्यं भवेत् तत्क्षणात् ॥२०॥
मन्त्रस्तावदलं विपक्षदलने स्तोत्रं पवित्रं च ते । यन्त्रं वादिनियन्त्रणे त्रिजगतां जैत्रं न चित्रं हि तत् ॥
मातः श्रीबगलेति नाम ललितं यस्यास्ति जन्तोर्मुखे । तन्नामस्मरणेन संसदि मुखस्तम्भो भवेद्वादिनाम् ॥२१॥
वादी मूकति रङ्कति क्षितिपतिर्वैश्वानरः शीतति । क्रोधी शाम्यति दुर्जनः सुजनति क्षिप्रानुगः खञ्जति ॥
गर्वी खर्वति सर्वविच्च जडति त्वद्यन्त्रणायन्त्रितः श्रीनित्ये बगलामुखि प्रतिदिनं कल्याणि तुभ्यं नमः ॥२२॥
दुष्टस्तम्भनमुग्र विघ्नशमनं दारिद्र्यविद्रावणं । भूभृत्संनमनं चं यन्मृगदृशां चेतःसमाकर्षणम् ॥
सौभाग्यैकनिकेतनं समदृशां कारुण्यपूर्णेक्षणे । शत्रोर्मारणमाविरस्तु पुरतो मातस्त्वदीयं वपुः ॥२३॥
मातर्भञ्जय मद्विपक्षवदनं जिह्वां च संकीलय । ब्राह्मीं यन्त्रय मुद्रयाशु धिषणामुग्रां गतिं स्तम्भय ॥
शत्रूश्चूर्णय चूर्णयाशु गदया गौराङ्गि पीताम्बरे । विघ्नौघं बगले हर प्रणमतां कारुण्यपूर्णेक्षणे ॥२४॥
मातर्भैरवि भद्रकालि विजये वाराहि विश्वाश्रये । श्रीविद्ये समये महेशि बगले कामेशि वामे रमे ॥

मातङ्गि त्रिपुरे परात्परतरे स्वर्गापवर्गप्रदे। दासोऽहं शरणागतोऽस्मि कृपया विश्वेश्वरि त्राहि माम् ॥२५॥
त्वं विद्या परमा त्रिलोकजननी विघ्नौघविध्वंसिनी । योषाकर्षणकारिणी त्रिजगतामानन्दसंवर्धिनी ॥
दुष्टोच्चाटनकारिणी पशुमनःसंमोहसंदायिनी जिह्वाः कीलय वैरिणां विजयसे ब्रह्मास्त्रविद्या परा ॥२६॥
मातर्यस्तु मनोरमं स्तवमिमं देव्याः पठेत् सादरम् धृत्वा यन्त्रमिदं तथैव समरे बाह्वोः करे वा गले ॥
राजानो वरयोषितोऽथ करिणः सर्पामृगेन्द्राः खलास्ते वै यान्ति विमोहिता रिपुगणा लक्ष्मीः स्थिरा सर्वदा ॥२७॥
अनुदिनमभिरामं साधको यस्त्रिकालं पठति स भुवनेऽसौ पूज्यते देववर्गैः ॥
सकलममलकृत्यं तत्त्वद्रष्टा च लोके भवति परमसिद्धा लोकमाता पराम्बा ॥२८॥
पीतवस्त्रवसनामरिदेह प्रेतजासननिवेशितदेहाम्। फुल्लपुष्परविलोचनरम्यां दैत्यजालदहनोज्वलभूषाम् ॥२९॥
पर्यङ्कोपरि लसद्द्विभुजां कम्बुहेमनतकुण्डललोलाम्। वैरिनिर्दलनकारणरोषां चिन्तयामि बगलां हृदयाब्जे ॥३०॥
चिन्तयामि सुभुजां शृणिहस्तां सद्भुजांचसुरवन्दितचरणाम्। षष्ठिसप्ततिशतैधृतशस्त्रैर्बाहुभिः परिवृतां बगलाम्बाम् ॥३१॥
चौराणां संकटे च प्रहरणसमये बन्धने वारिमध्ये। वह्नौ वादे विवादे प्रकुपितनृपतौ दिव्यकाले निशायाम् ॥
वश्ये वा स्तम्भने वा रिपुवधसमये प्राणबाधे रणे वा। गच्छंस्तिष्ठस्त्रिकालं स्तवपठनमिदं कारयेदाशु धीरः ॥३२॥

विद्यालक्ष्मीःसर्वसौभाग्यमायुः पुत्राः सम्पद् राज्यमिष्टं च सिद्धिः।
मातः श्रेयः सर्ववश्यत्वसिद्धिः प्राप्तं सर्वं भूतले त्वत्परेण ॥३३॥

गेहं नाकति गर्वितः प्रणमति स्त्रीसंगमो मोक्षति द्वेषी मित्रति पातकं सुकृतति क्ष्मावल्लभो दासति ॥
मृत्युर्वैद्यति दूषणं गुणति वै यत्पादसंसेवनात् तां वन्दे भवभीतिभञ्जनकरीं गौरीं गिरीशप्रियाम् ॥३४॥
यत् कृतं जपसंध्यानं चिन्तनं परमेश्वरि । शत्रूणां स्तम्भनार्थाय तद् गृहाण नमोऽस्तुते ॥३५॥
ब्रह्मास्त्रमेतद् विख्यातं त्रिषु लोकेषु दुर्लभम् । गुरुभक्ताय दातव्यं न देयं यस्य कस्यचित् ॥३६॥
पीताम्बरां च द्विभुजां त्रिनेत्रां गात्रकोज्वलाम् । शिलामुद्गरहस्तां च स्मरेत् तां बगलामुखीम् ॥३७॥
सिद्धिं सध्येऽवगन्तुं गुरुवरवचनेष्वार्हविश्वासभाजाम्। स्वान्तः पद्मासनस्थां वररुचिंबगलां ध्यायतां तारतारम् ॥
गायत्रीपूतवाचां हरिहरमनने तत्पराणां नराणाम्। प्रातर्मध्याह्नकाले स्तवपठनमिदं कार्यसिद्धिप्रदं स्यात् ॥३८॥

॥ इति श्रीरुद्रयामले उत्तरखण्डे श्रीब्रह्मास्त्रमहाविद्याबगलामुखीस्तोत्रं सम्पूर्णम् ॥

॥ अथ श्री दिग्बंधन रक्षा स्तोत्रम् ॥

ब्रह्मास्त्रां प्रवक्ष्यामि बगलां नारदसेविताम्। देवगन्धर्वयक्षादि सेवितपादपङ्कजाम् ॥

त्रैलोक्यस्तम्भिनी विद्या सर्वशत्रुवशङ्करी आकर्षणकरी उच्चाटनकरी विद्वेषणकरी जारणकरी मारणकरी जृम्भणकरी स्तम्भनकरी ब्रह्मास्त्रेण सर्ववश्यं कुरु कुरु ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

ॐ ह्लां द्राविणि द्राविणि भ्रामिणि एहि एहि सर्वभूतान् उच्चाटय उच्चाटय सर्वदुष्टान निवारय निवारय भूत प्रेत पिशाच डाकिनी शाकिनीः छिन्धि छिन्धि खड्गेन भिन्धि भिन्धि मुद्गरेण संमारय संमारय, दुष्टान् भक्षय भक्षय, ससैन्यं भूपतिं कीलय कीलय मुखस्तम्भनं कुरु कुरु ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

आत्मा रक्षा ब्रह्म रक्षा विष्णु रक्षा रुद्र रक्षा इन्द्र रक्षा अग्नि रक्षा यम रक्षा नैर्ऋत रक्षा वरुण रक्षा वायु रक्षा कुवेर रक्षा ईशान रक्षा सर्व रक्षा भूत प्रेत पिशाच डाकिनी शाकिनी रक्षा अग्निवैताल रक्षा गण गन्धर्व रक्षा तस्मात् सर्वरक्षां कुरु कुरु, व्याघ्र गज सिंह रक्षा रणतस्कर रक्षा तस्मात् सर्व बन्धयामि ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

ॐ ह्लीं भो बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तम्भय जिह्वां कीलय बुद्धिं विनाशय ह्लीं ॐ स्वाहा।

ॐ ऐं ह्लीं श्रीं बगलामुखि एहि एहि पूर्वदिशायां बन्धय बन्धय इन्द्रस्य मुखं स्तम्भय स्तम्भय इन्द्रशस्त्रं निवारय निवारय सर्वसैन्यं कीलय कीलय पच पच मथ मथ मर्दय मर्दय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ह्लीं श्रीं पीताम्बरे एहि एहि अग्निदिशायां बन्धय बन्धय अग्निमुखं स्तम्भय स्तम्भय अग्निशस्त्रं निवारय निवारय सर्वसैन्यं कीलय कीलय पच पच मथ मथ मर्दय मर्दय ॐ ह्लीं अग्निस्तम्भं कुरु कुरु ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ह्लीं श्रीं महिषमर्दिनि एहि एहि दक्षिणदिशायां बन्धय बन्धय यमस्य मुखं स्तम्भय स्तम्भय यमशस्त्रं निवारय निवारय सर्वसैन्यं कीलय कीलय पच पच मथ मथ मर्दय मर्दय ॐ ह्लीं हृज्जृम्भणं कुरु कुरु ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ह्लीं श्रीं चण्डिके एहि एहि नैर्ऋत्यदिशायां बन्धय बन्धय नैर्ऋत्यमुखं स्तम्भय स्तम्भय नैर्ऋत्यशस्त्रं निवारय निवारय सर्वसैन्यं कीलय कीलय पच पच मथ मथ मर्दय मर्दय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ह्लीं श्रीं करालनयने एहि एहि पश्चिमदिशायां बन्धय बन्धय वरुणमुखं स्तम्भय स्तम्भय वरुणशस्त्रं निवारय निवारय सर्वसैन्यं कीलय कीलय पच पच मथ मथ मर्दय मर्दय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ह्लीं श्रीं कालिके एहि एहि वायव्यदिशायां बन्धय बन्धय वायुमुखं स्तम्भय स्तम्भय वायुशस्त्रं निवारय निवारय सर्वसैन्यं कीलय कीलय पच पच मथ मथ मर्दय मर्दय ॐ ह्लीं वश्यं कुरु कुरु ह्लां बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ह्लीं श्रीं महात्रिपुरसुन्दरि एहि एहि उत्तरदिशायां बन्धय बन्धय कुबेरमुखं स्तम्भय स्तम्भय कुबेरशस्त्रं निवारय निवारय सर्वसैन्यं कीलय कीलय पच पच मथ मथ मर्दय मर्दय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ऐं महाभैरवि एहि एहि ईशानदिशायां बन्धय बन्धय ईशानमुखं स्तम्भय स्तम्भय ईशानशस्त्रं निवारय निवारय सर्वसैन्यं कीलय कीलय पच पच मथ मथ मर्दय मर्दय ॐ ह्लीं वश्यं कुरु करु ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ऐं गाङ्गेश्वरि एहि एहि ऊर्ध्वदिशायां बन्धय बन्धय ब्रह्माणं चतुर्मुखं स्तम्भय स्तम्भय ब्रह्मशस्त्रं निवारय निवारय सर्वसैन्य कीलय कीलय पच पच मथ मथ मर्दय मर्दय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ऐं ललितादेवि एहि एहि अन्तरिक्षदिशायां बन्धय बन्धय विष्णुमुखं स्तम्भय स्तम्भय विष्णुशस्त्रं निवारय निवारय सर्वसैन्यं कीलय कीलय पच पच मथ मथ मर्दय मर्दय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लां

बगलामुखिं हुं फट् स्वाहा।

ॐ ऐं ऐं चक्रधारिणि एहि एहि अधोदिशायां बन्धय बन्धय वासुकिमुखं स्तम्भय स्तम्भय वासुकिशस्त्रं निवारय निवारय सर्वसैन्यं कीलय कीलय पच पच मथ मथ मर्दय मर्दय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

दुष्टमन्त्रं दुष्टयन्त्रं दुष्टपुरुषं बन्धयामि शिखां बन्ध ललाटं बन्ध भ्रुवौ बन्ध नेत्रे बन्ध कर्णौ बन्ध नसौ बन्ध ओष्ठौ बन्ध अधरौ बन्ध जिह्वां बन्ध रसनां बन्ध बुद्धिं बन्ध कण्ठं बन्ध हृदयं बन्ध कुक्षिं बन्ध हस्तौ बन्ध नाभिं बन्ध लिङ्गं बन्ध गुह्यं बन्ध ऊरू बन्ध जानू बन्ध जङ्घे बन्ध गुल्फौ बन्ध पादौ बन्ध स्वर्ग मृत्यु पातालं बन्ध बन्ध रक्ष रक्ष ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ऐं ॐ ह्लीं बगलामुखि इन्द्राय सुराधिपतये ऐरावतवाहनाय स्वेतवर्णाय वज्रहस्ताय सपरिवाराय एहि एहि मम विघ्नान् निरासय निरासय विभञ्जय विभञ्जय ॐ ह्लीं अमुकस्य मुखं स्तम्भय स्तम्भय ॐ ह्लीं अमुकस्य मुखं भेदय भेदय ॐ ह्लीं वश्यं कुरु ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ऐं ॐ ह्लीं बगलामुखि अग्नये तेजोधिपतये छागवाहनाय रक्तवर्णाय शक्तिहस्ताय सपरिवाराय एहि एहि मम विघ्नान् विभञ्जय विभञ्जय ॐ ह्लीं अमुकस्य मुखं स्तम्भय स्तम्भय ॐ ह्लीं अमुकस्य मुखं भेदय भेदय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ऐं ॐ ह्लीं बगलामुखि यमाय प्रेताधिपतये महिषवाहनाय कृष्णवर्णाय दण्डहस्ताय सपरिवाराय एहि एहि मम विघ्नान् विभञ्जय विभञ्जय ॐ ह्लीं अमुकस्य मुखं स्तम्भय स्तम्भय ॐ ह्लीं अमुकस्य मुखं भेदय भेदय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ऐं ॐ ह्लीं बगलामुखि वरुणाय जलाधिपतये मकरवाहनाय श्वेतवर्णाय पाशहस्ताय सपरिवाराय एहि एहि मम विघ्नान् विभञ्जय विभञ्जय ॐ ह्लीं अमुकस्य मुखं स्तम्भय स्तम्भय ॐ ह्लीं अमुकस्य मुखं भेदय भेदय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ऐं ॐ ह्लीं बगलामुखि वायव्याय मृगवाहनाय धूम्रवर्णाय ध्वजाहस्ताय सपरिवाराय एहि एहि मम विघ्नान् विभञ्जय विभञ्जय ॐ ह्लीं अमुकस्य मुखं स्तम्भय स्तम्भय ॐ ह्लीं अमुकस्य मुखं भेदय भेदय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ऐं ॐ ह्लीं बगलामुखि ईशानाय भूताधिपतये वृषभवाहनाय कर्पूरवर्णाय त्रिशूलहस्ताय सपरिवाराय एहि एहि मम विघ्नान् विभञ्जय विभञ्जय ॐ ह्लीं अमुकस्य मुखं स्तम्भय स्तम्भय ॐ ह्लीं अमुकस्य मुखं भेदय भेदय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ऐं ॐ ह्लीं बगलामुखि ब्रह्मणे ऊर्ध्वदिग्लोकपालाधिपतये हंसवाहनाय श्वेतवर्णाय कमण्डलुहस्ताय सपरिवारय एहि एहि मम विघ्नान् विभञ्जय विभञ्जय ॐ ह्लीं अमुकस्य मुखं स्तम्भय स्तम्भय ॐ ह्लीं अमुकस्य मुखं भेदय भेदय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ऐं ॐ ह्लीं बगलामुखि वैष्णवीसहिताय नागाधिपतये गरुडवाहनाय श्यामवर्णाय चक्रहस्ताय सपरिवाराय एहि एहि मम विघ्नान् विभञ्जय विभञ्जय ॐ ह्लीं अमुकस्य मुखं स्तम्भय स्तम्भय ॐ ह्लीं अमुकस्य मुखं भेदय भेदय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लीं बगलामुखि हुं फट् स्वाहा। ॐ नमो भगवति पुण्यपवित्रे स्वाहा।

ॐ ह्लीं बगलामुखि नित्यम् एहि एहि रविमण्डलमध्याद् अवतर अवतर सान्निध्यं कुरु कुरु। ॐ ऐं परमेश्वरीम्

आवाहयामि नमः। मम सान्निध्यं कुरु कुरु। ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ह्रीं श्रीं ह्लां ह्लीं ह्लूं ह्लैं ह्लौ ह्लः बगले चतुर्भुजे मुद्गरशरसंयुक्ते दक्षिणे जिह्वावज्रसंयुक्ते वामे श्रीमहाविद्ये पीतवस्त्रे पञ्चमहाप्रेनाधिरूढे सिद्धविद्याधरवन्दिते ब्रह्मविष्णुरुद्रपूजिते आनन्दस्वरूपे विश्वसृष्टिस्वरूपे महाभैरवरूप धारिणि स्वर्गमृत्युपातालस्तम्भिमनि वाममार्गाश्रिते श्रीबगले ब्रह्मविष्णुरुद्ररूपनिर्मिते षोडशकलापरिपूरिते दानवरूप सहस्त्रादित्यशोभिते त्रिवर्णे एहि एहि मम हृदयं प्रवेशय प्रवेशय शत्रुमुखं स्तम्भय स्तम्भय अन्यभूतपिशाचान् खादय खादय अरिसैन्यं विदारय विदारय परविद्यां परचक्रं छेदय छेदय वीरचक्रं धनुषां संभारय संभारय त्रिशूलेन् छिन्धि छिन्धि पाशेन् बन्धय बन्धय भूपतिं वश्यं कुरु कुरु संमोहय संमोहय विना जाप्येन सिद्धय सिद्धय विना मन्त्रेण सिद्धि कुरु कुरु सकलदुष्टान घातय घातय मम त्रैलोक्यं वश्यं कुरु कुरु सकलकुलराक्षसान् दह दह पच पच मथ मथ हन हन मर्दय मर्दय मारय मारय भक्षय भक्षय मां रक्ष रक्ष विस्फोटकादीन् नाशय नाशय ॐ ह्लीं विषमज्वरं नाशय नाशय विषं निर्विषं कुरु कुरु ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ क्लीं क्लीं ह्लीं बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तम्भय स्तम्भय जिह्वां कीलय कीलय बुद्धिं विनाशय विनाशय क्लीं क्लीं ह्लीं स्वाहा।

ॐ बगलामुखि स्वाहा। ॐ पीताम्बरे स्वाहा। ॐ त्रिपुरभैरवि स्वाहा। ॐ विजयायै स्वाहा। ॐजयायै स्वाहा। ॐशारदायै स्वाहा। ॐ सुरेश्वर्यै स्वाहा। ॐ रुद्राण्यै स्वाहा। ॐ विन्ध्यवासिन्यै स्वाहा। ॐ त्रिपुरसुन्दर्यै स्वाहा। ॐ दुर्गायै स्वाहा। ॐ भवान्यै स्वाहा। ॐ भुवनेश्वर्यै स्वाहा। ॐमहामायायै स्वाहा। ॐकमललोचनायै स्वाहा। ॐतारायै स्वाहा। ॐ योगिन्यै स्वाहा। ॐ कौमार्यै स्वाहा। ॐ शिवायै स्वाहा। ॐ इन्द्राण्यै स्वाहा। ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ ह्लीं शिवतत्वव्यापिनि बगलामुखि स्वाहा। ॐ ह्लीं मायातत्वव्यापिनि बगलामुखि हृदयाय स्वाहा। ॐ ह्लीं विद्यातत्वव्यापिनि बगलामुखि शिरसे स्वाहा। ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः शिरो रक्षतु बगलामुखि रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः भालं रक्षतु पीताम्बरे रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः नेत्रे रक्षतु महाभैरवि रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः कर्णौ रक्षतु विजये रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः नसौ रक्षतु जये रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः वदनं रक्षतु शारदे रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः कण्ठं रक्षतु रुद्राणि रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः स्कन्धौ रक्षतु विन्ध्यवासिनि रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः बाहू रक्षतु त्रिपुरसुन्दरि रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः करौ रक्षतु दुर्गे रक्ष रक्ष स्वाहा।

ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः हृदयं रक्षतु भवानी रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः उदरं रक्षतु भुवनेश्वरि रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः नाभिं रक्षतु महामाये रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः कटिं रक्षतु कमललोचने रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः उदरं रक्षतु तारे रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः सर्वाङ्गं रक्षतु महातारे रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः अग्रे रक्षतु योगिनि रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः पृष्ठे रक्षतु कौमारि रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः दक्षिणपार्श्वे रक्षतु शिवे रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः वामपर्श्वे रक्षतु इन्द्राणि रक्ष रक्ष स्वाहा।

ॐ गां गीं गूं गैं गौं गः गणपतये सर्वजनमुखस्तम्भनाय आगच्छ आगच्छ मम विघ्नान् नाशय नाशय दुष्टं खादय खादय दुष्टस्य मुखं स्तम्भय स्तम्भय अकालमृत्युं हन हन भो गणाधिपते ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लीं

बगलामुखि हुं फट् स्वाहा।

अष्टौ ब्राह्मणान् ग्राहयित्वा सिद्धिर्भवति नान्यथा। भूयुग्मं तु पठेत नात्र कार्यं संख्याविचारणम् ॥
यन्त्रिणां बगला राज्ञी सुराणां बगलामुखि। शूराणां बगलेश्वरी ज्ञानिनां मोक्षदायिनी ॥
एतत् स्तोत्रं पठेन् नित्यं त्रिसन्ध्यं बगलामुखि। विना जाप्येन सिध्येत साधकस्य न संशयः ॥
निशायां पायसतिलाज्यहोमं नित्यं तु कारयेत्। सिध्यन्ति सर्वकार्याणि देवी तुष्टा सदा भवेत् ॥
मासमेकं पठेत् नित्यं त्रैलोक्ये चातिदुर्लभम्। सर्वसिद्धिमवाप्नोति, देव्या लोकं स गच्छति ॥

॥ इति श्रीबगलामुखिकल्पे वीरतन्त्रे बगलासिद्धिप्रयोगः सम्पूर्णम् ॥

॥ अथ श्रीपीताम्बरा बगलामुखी खड्ग मालामन्त्रः ॥

यह स्तोत्र शत्रुनाश एवं कृत्यानाश, परविद्या छेदन करने वाला एवं रक्षाकार्य हेतु प्रभावी है। साधारण साधकों को कुछ समय आवेश व आर्थिक दबाव रहता है, अतः पूजा उपरांत नमस्तस्यादि शांति स्तोत्र पढ़ने चाहिये।

विनियोग :- **ॐ अस्य श्रीपीताम्बरा बगलामुखी खड्गमाला मन्त्रस्य नारायण ऋषिः, त्रिष्टुप्छन्दः, बगलामुखी देवता, ह्लीं बीजं, स्वाहा शक्तिः, ॐ कीलकं, ममाभीष्टसिद्ध्यर्थे सर्वशत्रुक्षयार्थे जपे विनियोगः।**

हृद यादिन्यास :- **नारायण ऋषये नमः शिरसि, त्रिष्टुप्छन्दसे नमो मुखे, श्रीबगलामुखी देवतायै नमः हृदये, ह्लीं बीजाय नमो गुह्ये, स्वाहाशक्तये नमः पादयोः, ॐ कीलकाय नमः सर्वाङ्गे।**

करन्यास :- **ॐ ह्लीं अङ्गुष्ठाभ्यां नमः, बगलामुखी तर्जनीभ्यां नमः, सर्वदुष्टानां मध्यमाभ्यां नमः, वाचं मुखं पदं स्तम्भय अनामिकाभ्यां नमः, जिह्वां कीलय कनिष्ठिकाभ्यां नमः, बुद्धिं विनाशय ह्लीं ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः। एवं हृदयादि न्यास कृत्वा।**

॥ ध्यानम् ॥

मध्येसुधाब्धि मणिमण्डित - रत्नवेद्यां सिंहासनोपरिगतां परिपीतवस्त्राम् ।
भ्राम्यद्गदां करनिपीडित वैरिजिह्वां पीताम्बरां कनकमाल्यवतीं नमामि ॥

मानसोपचारैः सम्पूज्य जपं कुर्यात्।

ॐ ह्लीं सर्वनिन्दकानां सर्वदुष्टानां वाचं मुखं पदं स्तम्भय स्तम्भय बुद्धिं विनाशय विनाशय अपरबुद्धिं कुरु कुरु अपस्मारं कुरु कुरु आत्मविरोधिनां शिरो ललाट मुख नेत्र कर्ण नासिका दन्तोष्ठ जिह्वा तालुकण्ठ बाहूदर कुक्षि नाभि पार्श्वद्वय गुह्य गुदाण्ड त्रिक जानुपाद सर्वाङ्गेषु पादादिकेशपर्यन्तं केशादिपादपर्यन्तं स्तम्भय स्तम्भय मारय मारय परमन्त्र परयन्त्र परतन्त्राणि छेदय छेदय आत्ममन्त्र यन्त्रतन्त्राणि रक्ष रक्ष, सर्वग्रहान् निवारय निवारय सर्वम् अविधिं विनाशय विनाशय दुःखं हनहन दारिद्र्यं निवारय निवारय सर्वमन्त्रस्वरूपिणि सर्वशल्ययोग स्वरूपिणि दुष्टग्रहचण्डग्रह भूतग्रहाऽऽकाशग्रह चौरग्रह पाषाणग्रह चाण्डालग्रह यक्षगन्धर्वकिंनरग्रह ब्रह्मराक्षसग्रह भूत-प्रेत-पिशाचादीनां शाकिनी डाकिनी ग्रहाणां पूर्वदिशं बन्धय बन्धय, वाराहि बगलामुखी मां रक्ष रक्ष दक्षिणदिशं बन्धय बन्धय, किरातवाराहि मां रक्ष रक्ष पश्चिमदिशं बन्धय बन्धय, स्वप्नवाराहि मां रक्ष रक्ष उत्तरदिशं बन्धय बन्धय धूम्रवाराहि मां रक्ष रक्ष सर्वदिशो बन्धय बन्धय, कुक्कुटवाराहि मां रक्ष रक्ष अधरदिशं बन्धय बन्धय

परमेश्वरि मां रक्ष रक्ष सर्वरोगान् विनाशय विनाशय, सर्वशत्रुपलायनाय सर्वशत्रुकुलं मूलतो नाशय नाशय, शत्रूणां राज्यवश्यं स्त्रीवश्यं जनवश्यं दह दह पच पच सकललोकस्तम्भिनि शत्रून् स्तम्भय स्तम्भय स्तम्भनमोहनाऽऽकर्षणाय सर्वरिपूणाम् उच्चाटनं कुरु कुरु ॐ ह्लीं क्लीं ऐं वाक्प्रदानाय क्लीं जगत्त्रयवशीकरणाय सौः सर्वमनः क्षोभणाय श्रीं महासम्पत्प्रदानाय ग्लौं सकलभूमण्डलाधिपत्य प्रदानाय दां चिरंजीवने। ह्रां ह्रीं ह्रूं क्लां क्लीं क्लूं सौः ॐ ह्लीं बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तम्भय जिह्वां कीलय बुद्धिं विनाशय राजस्तम्भिनि क्रों क्रों छ्रीं छ्रीं सर्वजन संमोहिनि सभास्तंभिनि स्त्रां स्त्रीं सर्वमुखरञ्जिनि मुखं बन्धय बन्धय ज्वल ज्वल हंस हंस राजहंस प्रतिलोम इहलोक परलोक परद्वार राजद्वार क्लीं क्लूं घ्रीं रूं क्रों क्लीं खाणि खाणि। जिह्वां बन्धयामि सकलजन सर्वेन्द्रियाणि बन्धयामि नागाश्व मृग सर्प विहङ्गम वृश्चिकादि विषं निर्विषं कुरु कुरु शैलकानन महीं मर्दय मर्दय शत्रूनोत्पाटयोत्पाटय पात्रं पूरय पूरय महोग्रभूतजातं बन्धयामि बन्धयामि अतीतानागतं सत्यं कथय कथय लक्ष्मीं प्रददामि प्रददामि त्वम् इह आगच्छ आगच्छ अत्रैव निवासं कुरु कुरु ॐ ह्लीं बगले परमेश्वरि हुं फट् स्वाहा।

पुनः विशेष –

मूलमन्त्रवता कुर्याद् विद्यां न दर्शयेत् क्वचित्। विपत्तौ स्वप्रकाले च विद्यां स्तम्भिनीं दर्शयेत्।
गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः। प्रकाशनात् सिद्धिहानिः स्याद् वश्यं मरणं भवेत्।
दद्यात् शान्ताय सत्याय कौलाचारपरायणः। दुर्गाभक्ताय शैवाय मृत्युञ्जयरताय च।
तस्मै दद्याद् इमं खड्गं स शिवो नात्र संशयः। अशाक्ताय च नो दद्याद् दीक्षाहीनाय वै तथा।
न दर्शयेद् इमं खड्गम् इत्याज्ञा शङ्करस्य च।

॥ इति श्रीविष्णुयामले बगलाखड्गमालामन्त्रः समाप्तः ॥

॥ अथ श्री बगला प्रत्यंगिरा कवचम् ॥

॥ श्री शिव उवाच ॥

अधुनाऽहं प्रवक्ष्यामि बगलायाः सुदुर्लभम्। यस्य पठन मात्रेण पवनोपि स्थिरायते ॥
प्रत्यंगिरां तां देवेशि शृणुष्व कमलानने। यस्य स्मरण मात्रेण शत्रवो विलयं गताः ॥

॥ श्री देव्युवाच ॥

स्नेहोऽस्ति यदि मे नाथ संसारार्णव तारक। तथा कथय मां शम्भो बगलाप्रत्यंगिरा मम ॥

॥ श्री भैरव उवाच ॥

यं यं प्रार्थयते मन्त्री हठात्तंतमवाप्नुयात्। विद्वेषणाकर्षणे च स्तम्भनं वैरिणां विभो ॥
उच्चाटनं मारणं च येन कर्तुं क्षमो भवेत्। तत्सर्वं ब्रूहि मे देव यदि मां दयसे हर ॥

॥ श्री सदाशिव उवाच ॥

अधुना हि महादेवि परानिष्ठा मतिर्भवेत्। अतएव महेशानि किंचिन्न वक्तुमर्हसि ॥

॥ श्री पार्वत्युवाच ॥

जिघान्सन्तं जिघान्सीयान्न तेन ब्रह्महा भवेत् । श्रृतिरेषाहि गिरिश कथं मां त्वं निनिन्दसि ॥

॥ श्री शिवउवाच ॥

साधु साधु प्रवक्ष्यामि श्रृणुष्वावहितानघे । प्रत्यंगिरां बगलायाः सर्वशत्रुनिवारिणीम् ॥
नाशिनीं सर्व - दुष्टानां सर्व - पापौघ - हारिणीम् । सर्वप्राणिहितां देवीं सर्व दुःख विनाशिनीम् ॥
भोगदां मोक्षद्रा चैव राज्य सौभाग्य दायिनाम् । मन्त्र - दोष - प्रमोचनीं ग्रहदोष निवारिणीम् ॥

विनियोगः :- अस्य श्री बगला प्रत्यंगिरा मन्त्रस्य नारद ऋषिस्त्रिष्टुप् छन्दः, प्रत्यंगिरा देवता, ह्लीं बीजं, हुं शक्तिः ह्रीं कीलकं, ह्लीं ह्लीं ह्लीं ह्लीं प्रत्यंगिरा मम शत्रु विनाशे विनियोगः।

ॐ प्रत्यंगिरायै नमः प्रत्यंगिरे सकल कामान् साधय मम रक्षां कुरु कुरु सर्वान शत्रून् खादय खादय मारय मारय घातय घातय ॐ ह्रीं फट् स्वाहा।

ॐ भ्रामरी स्तम्भिनी देवी क्षोभिणीमोहिनी तथा । संहारिणी द्राविणी च जृम्भिणी रौद्ररूपिणी ॥
इत्यष्टौ शक्तयो देवि शत्रु पक्षे नियोजिताः । धारयेत् कण्ठदेशे च सर्वशत्रु विनाशिनी ॥

ॐ ह्रीं भ्रामरि सर्वशत्रून् भ्रामाय भ्रामय ॐ ह्रीं स्वाहा। ॐ ह्रीं स्तम्भिनी मम शत्रून् स्तम्भय स्तम्भय ॐ ह्रीं स्वाहा। ॐ ह्रीं क्षोभिणि मम शत्रून् क्षोभय क्षोभय ॐ ह्रीं स्वाहा। ॐ ह्रीं मोहिनि मम शत्रून्मोहय मोहय ॐ ह्रीं स्वाहा। ॐ ह्रीं संहारिणि मम शत्रून् संहारय संहारय ॐ ह्रीं स्वाहा। ॐ ह्रीं द्राविणि मम शत्रून् द्रावय द्रावय ॐ ह्रीं स्वाहा। ॐ ह्रीं जृम्भिणि मम शत्रून् जृम्भय जृम्भय ॐ ह्रीं स्वाहा। ॐ ह्रीं रौद्रि मम शत्रून् सन्तापय सन्तापय ॐ ह्रीं स्वाहा।

इयं विद्या महाविद्या सर्व शत्रु निवारिणी। धारिता साधकेन्द्रेण सर्वान् दुष्टान् विनाशयेत् ॥
त्रिसन्ध्यमेकसन्ध्यं वा यः पठेत्स्थिरमानसः। न तस्य दुर्लभं लोके कल्पवृक्ष इव स्थितः ॥
यं य स्पृशति हस्तेन यं यं पश्यति चक्षुषा। स एव दासतां याति सारात्सारामिमं मनुम् ॥

॥ इति श्री रुद्रयामले शिवपार्वति सम्वादे बगला प्रत्यंगिरा कवचम् ॥

॥ कृत्यानाशक श्रीबगला सूक्तम् ॥

(अथर्ववेद पंचमकाण्डे षष्ठेऽनुवाक)

इस स्तोत्र का प्रयोग कृत्यानाश के लिये श्रेष्ठ है। किसी भी शत्रु ने अस्थि, मज्जा, वसा, माँस, पशुबलि या धान्यादि के द्वारा यज्ञशाला या श्मशान में कोई प्रयोग किया होतो उसका शमन होता है। मंत्र में शपथ है कि हे कृत्या तू हमारी अँगुलि की भी हानि नहीं कर सकती, तु कृत्या करने वाले पर ही वापस लौट जा। अन्यथा इन्द्र वज्र से मारेगा और अग्नि तुझे जला देगी।

यां ते चक्रुरामे पात्रे यां चक्रुर्मिश्रधान्यके । आमे मांसे कृत्यां यां चक्रुः पुनः प्रतिहरामि ताम् ॥१॥
यां ते चक्रुः कृकवाका वजे वा यां कुरीरिणि । अव्यां ते कृत्यां यां चक्रुः पुनः प्रतिहरामि ताम् ॥२॥
यां ते चक्रुरेकशफे पशूनामुभयादति । गर्दभे कृत्यां यां चक्रुः पुनः प्रतिहरामि ताम् ॥३॥

यां ते चक्रुरमूलायां वलगं वा नराच्याम् । क्षेत्रे ते कृत्यां यां चक्रुः पुनः प्रतिहरामि ताम् ॥४॥
यां ते चक्रुगार्हिपत्ये पूर्वाग्नावुत दुश्चितः । शालायां कृत्यां यां चक्रुः पुनः प्रतिहरामि ताम् ॥५॥
यां ते चक्रुः सभायां यां चक्रुरधिदेवते । अक्षेषु कृत्यां यां चक्रुः पुनः प्रतिहरामि ताम् ॥६॥
यां ते चक्रुः सेनायां यां चक्रुरिष्वायुधे । दुन्दुभौ कृत्यां यां चक्रुः पुनः प्रतिहरामि ताम् ॥७॥
यां ते कृत्यां कूपे वदधुः श्मशाने वा निचख्नुः । सद्मनि कृत्यां यां चक्रुः पुनः प्रतिहरामि ताम् ॥८॥
यां ते चक्रुः पुरुषस्यास्थे अग्नौ संकसुके च याम् । म्रोकं निर्दाहं क्रव्यादं पुनः प्रतिहरामि ताम् ॥९॥
अपथैनाज भारैणां तां पथेतः प्रहिण्मसि । अधीरो मर्या धीरेभ्यः संजभाराचित्या ॥१०॥
यश्चकार न शशाक कर्तुं शश्रे पादमङ्गुरिम् । चकार भद्रस्मभ्यमभगो भगवद्भ्यः ॥११॥
कृत्याकृतं वलगिनं मूलिनं शपथेऽप्ययम् । इन्द्रस्तं हन्तुमहता वधेनाग्निर्विध्यत्वस्तया ॥१२॥

॥ अथ श्री बगलाशतनाम स्तोत्रम् ॥

॥ श्री नारद उवाच ॥

भगवन् देवदेवेश सृष्टिस्थितिलयात्मकम् । शतमष्टोत्तरं नाम्नां बगलाया वदाऽधुना ॥१॥

॥ श्री भगवानुवाच ॥

श्रृणु वत्स प्रवक्ष्यामि नाम्नामष्टोत्तरं शतम् । पीताम्बर्याः महादेव्याः स्तोत्रं पापप्रणाशनम् ॥२॥
यस्य प्रपठनात् सद्यो वादी मूको भवेत् क्षणात् । रिपूणां स्तम्भनं याति सत्यं सत्यं वदाम्यहम् ॥३॥

विनियोगः - ॐ अस्य नीमाम्बर्य्यष्टोत्तर शतनामस्तोत्रस्य सदाशिव ऋषिः, अनुष्टप् छन्दः, श्रीपीताम्बरी देवता, श्रीपीताम्बरीप्रीतये जपे विनियोगः।

ॐ बगला विष्णुवनिता विष्णुशङ्करभामिनी । बहुला वेदमाता च महाविष्णुप्रसूरपि ॥१॥
महामत्स्या महाकूर्म्मा महावाराहरूपिणी । नरसिंहप्रिया रम्या वामना वटुरूपिणी ॥२॥
जामदग्न्यस्वरूपा च रामा रामप्रपूजिता । कृष्णा कपर्दिनी कृत्या कलहा कलविकारिणी ॥३॥
बुद्धिरूपा बुद्धिभार्या बौद्धपाखण्डखण्डिनी । कल्किरूपा कलिहरा कलिदुर्गतिनाशिनी ॥४॥
कोटिसूर्यप्रतीकाशा कोटिकन्दर्पमोहिनी । केवला कठिना काली कला कैवल्यदायिनी ॥५॥
केशवी केशवाराध्या किशोरी केशवस्तुता । रुद्ररूपा रुद्रमूर्ती रुद्राणी रुद्रदेवता ॥६॥
नक्षत्ररूपा नक्षत्रा नक्षत्रेशप्रपूजिता । नक्षत्रेशप्रिया नित्या नक्षत्रपतिवन्दिता ॥७॥
नागिनी नागजननी नागराजप्रवन्दिता । नागेश्वरी नागकन्या नागरी च नगात्मजा ॥८॥
नगाधिराजतनया नगराजप्रपूजिता । नवीना नीरदा पीता श्यामा सौन्दर्यकारिणी ॥९॥
रक्ता नीला घना शुभ्रा श्वेता सौभाग्यदायिनी । सुन्दरी सौभगा सौम्या स्वर्णभा स्वर्गतिप्रदा ॥१०॥

रिपुत्रासकरी रेखा शत्रुसंहारकारिणी । भामिनी च तथा माया स्तम्भिनी मोहिनी शुभा ॥११॥
रागद्वेषकरी रात्री रौरवध्वंसकारिणी । यक्षिणी सिद्धनिवहा सिद्धेशा सिद्धिरूपिणी ॥१२॥
लङ्कापतिध्वंसकरी लङ्केशरिपुवन्दिता । लङ्कानाथकुलहरा महारावणहारिणी ॥१३॥
देवदानव सिद्धौघपूजिता परमेश्वरी । पराऽणुरूपा परमा परतन्त्र - विनाशिनी ॥१४॥
वरदा वरदाऽऽराध्या वरदानपरायाणा । वरदेशप्रिया वीरा वीरभूषणभूषिता ॥१५॥
वसुदा बहुदा वाणी ब्रह्मरूपा वरानना । बलदा पीतवसना पीतभूषण - भूषिता ॥१६॥
पीतपुष्पप्रिया पीतहरा पीतस्वरूपिणी । इति ते कथितं विप्र नाम्नामष्टोत्तरं शतम् ॥१७॥
यः पठेत् पाठयेद् वापि शृणुयाद् वा समाहितः। तस्य शत्रः क्षयं सद्यो याति वै नात्र संशय ॥१८॥

प्रभातकाले प्रयतो मनुष्यः पठेत् सुभक्त्या परिचिन्त्य पीताम् ।
द्रुतं भवेत् तस्य समस्तवृद्धिर्विनाशमायाति च तस्य शत्रुः ॥१९॥

॥ इति श्रीविष्णुयामले नारदविष्णुसंवादे श्रीबगलाऽष्टोत्तरशतनामस्तोत्रम् सम्पूर्णम् ।

॥ अथ बगलाऽष्टोत्तरशतनाम स्तोत्रम् ॥

शतनाम स्तोत्र से देव कृपा होती है तथा अंगरक्षक के समान कार्य करता है।

ब्रह्मास्त्ररूपिणी देवी माताश्रीबगलामुखी । चिच्छक्तिर्ज्ञानरूपा च ब्रह्मानन्दप्रदायिनी ॥१॥
महाविद्या महालक्ष्मी श्रीमत्त्रिपुरसुन्दरी । भुवनेशी जगन्माता पार्वती सर्वमङ्गला ॥२॥
ललिता भैरवी शान्ता अन्नपूर्णा कुलेश्वरी । वाराही छिन्नमस्ता च तारा काली सरस्वती ॥३॥
जगत्पूज्या महामाया कामेशी भगमालिनी । दक्षपुत्री शिवांकस्था शिवरूपा शिवप्रिया ॥४॥
सर्वसम्पत्करी देवी सर्वलोक वशङ्करी । वेदविद्या महापूज्या भक्ताद्वेषी भयङ्करी ॥५॥
स्तम्भरूपा स्तम्भिनी च दुष्टस्तम्भनकारिणी । भक्तप्रिया महाभोगा श्रीविद्या ललिताम्बिका ॥६॥
मैनापुत्री शिवानन्दा मातङ्गी भुवनेश्वरी । नारसिंही नरेन्द्रा च नृपाराध्या नरोत्तमा ॥७॥
नागिनी नागपुत्री च नगराजसुता उमा । पीताम्बा पीतपुष्पा च पीतवस्त्रप्रिया शुभा ॥८॥
पीतगन्धप्रिया रामा पीतरत्नार्चिता शिवा । अर्द्धचन्द्रधरी देवी गदामुद्गरधारिणी ॥९॥
सावित्री त्रिपदा शुद्धा सद्योराग विवर्धिनी । विष्णुरूपा जगन्मोहा ब्रह्मरूपा हरिप्रिया ॥१०॥
रुद्ररूपा रुद्रशक्तिश्चिन्मयी भक्तवत्सला । लोकमाता शिवा सन्ध्या शिवपूजनतत्परा ॥११॥
धनाध्यक्षा धनेशी च नर्मदा धनदा धना । चण्डदर्पहरी देवी शुम्भासुरनिवर्हिणी ॥१२॥
राजराजेश्वरी देवी महिषासुरमर्दिनी । मधुकैटभहन्त्री च रक्तबीजविनाशिनी ॥१३॥
धूम्राक्षदैत्यहन्त्री च भण्डासुर विनाशिनी । रेणुपुत्री महामाया भ्रामरी भ्रमराम्बिका ॥१४॥
ज्वालामुखी भद्रकाली बगला शत्रुनाशिनी । इन्द्राणी इन्द्रपूज्या च गुहमाता गुणेश्वरी ॥१५॥

वज्रपाशधरा देवी जिह्वामुद्गरधारिणी । भक्तानन्दकरी देवी बगला परमेश्वरी ॥१६॥
अष्टोत्तरशतं नाम्नां बगलायास्तु यःपठेत् । रिपुबाधाविनिर्मुक्तः लक्ष्मीस्थैर्यमवाप्नुयात् ॥१७॥
भूतप्रेतपिशाचाश्च ग्रहपीड़ानिवारणम् । राजानो वशमायांति सर्वैश्वर्यं च विन्दति ॥१८॥
नानाविद्यां च लभते राज्यं प्राप्नोति निश्चितम् । भुक्तिमुक्तिमवाप्नोति साक्षात् शिवसमो भवेत् ॥१९॥

॥ इति रुद्रयामले सर्वसिद्धिप्रद बगलाऽष्टोत्तरशतनाम स्तोत्रम् ॥

॥ अथ बगला सहस्त्रनाम स्तोत्रम् ॥

सहस्त्रनाम से देव की प्रीति प्राप्त होती है तथा सेना के समान कार्य करता है।

सुरालयप्रधाने तु देवदेवं महेश्वरम् । शैलाधिराजतनया संग्रहे तमुवाच ह ॥१॥

॥ श्रीदेव्युवाच ॥

परमेष्ठिन् परंधाम प्रधान परमेश्वर । नाम्नां सहस्त्रं बगलामुख्याद्या ब्रूहि वल्लभ ॥२॥

॥ ईश्वर उवाच ॥

शृणु देवि! प्रवक्ष्यामि नामधेयसहस्त्रकम् । परब्रह्मास्त्र विद्यायाश्चतुर्वर्गफलप्रदम् ॥३॥
गुह्याद् गुह्यतरं देवि सर्वसिद्धैकवन्दितम् । अतिगुप्ततरं विद्या सर्वतन्त्रेषु गोपिता ॥४॥
विशेषतः कलियुगे महासिद्ध्योघदायिनी । गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ॥५॥
अप्रकाश्यमिदं सत्यं स्वयोनिरिव सुब्रते । रोधिनी विघ्नसंघानां मोहिनी सर्वयोषिताम् ॥६॥
स्तम्भिनी राजसैन्यानां वादिनी परवादिनाम् । पुरा चैकार्णवे घोरे काले परमभैरवः ॥७॥
सुन्दरीसहितो देव केशवं क्लेशनाशनः । उरगासनमासीनं योगनिद्रामुपागतम् ॥८॥
निद्राकाले च ते काले मया प्रोक्तः सनातनः । महास्तम्भकरं देवि! स्तोत्रं वा शतनामकम् ॥९॥
सहस्त्रनाम परमं वद देवस्य कस्यचित् ।

॥ श्रीभगवानुवाच ॥

शृणु शङ्कर देवेश परमातिरहस्यकम् ॥१०॥
अजोऽहं यत्प्रसादेन विष्णुः सर्वेश्वरेश्वरः । गोपनीयं प्रयत्नेन प्रकाशात् सिद्धिहानिकृत् ॥११॥

विनियोगः - ॐ अस्य श्रीपीताम्बरीसहस्त्रनामस्तोत्रमन्त्रस्य भगवान् सदाशिव ऋषिः, अनुष्टुप् छन्दः, श्रीजगद्वश्यकरी पीताम्बरी देवता, सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः।

॥ अथ ध्यानम् ॥

पीताम्बरपरीधानां पीनोन्नतपयोधराम् । जटामुकुटशोभाढ्यां पीतभूमिसुखासनाम् ॥१२॥
शत्रोर्जिह्वां मुद्गरं च विभ्रतीं परमां कलाम् । सर्वागमपुराणेषु विख्यातां भुवनत्रये ॥१३॥
सृष्टिस्थिति विनाशानामादिभूतां महेश्वरीम् । गोप्यां सर्वप्रयत्नेन शृणु तां कथयामि ते ॥१४॥
जगद्विध्वंसिनीं देवीमजरामरकारिणीम् । तां नमामि महामायां महदैश्वर्यदायिनीम् ॥१५॥

॥स्तोत्रम्॥

प्रणवं पूर्वमुद्धृत्य स्थिरमायां ततो वदेत् । बगलामुखि सर्वेति दुष्टानां वाचमेव च ॥१६॥
मुखं पदं स्तम्भयेति जिह्वां कीलय बुद्धिमत् । विनाशयेति तारं च स्थिरमायां ततो वदेत् ॥१७॥
वह्निप्रियां ततो मन्त्रश्चतुर्वर्गफलप्रदः । ब्रह्मास्त्रं ब्रह्मविद्या च ब्रह्ममाया सनातनी ॥१८॥
ब्रह्मेशी ब्रह्मकैवल्य बगला ब्रह्मचारिणी । नित्यानन्दा नित्यसिद्धा नित्यरूपा निरामया ॥१९॥
सन्धारिणी महामाया कटाक्षक्षेमकारिणी । कमला विमला नीला रत्नकान्तिर्गुणाश्रिता ॥२०॥
कामप्रिया कामरता कामकामस्वरूपिणी । मङ्गला विजया जाया सर्वमङ्गलकारिणी ॥२१॥
कामिनी कामनी काम्या कामुका कामचारिणी । कामप्रिया कामरता कामा कामस्वरूपिणी ॥२२॥
कामाख्या कामबीजस्था कामपीठनिवासिनी । कामदा कामहा काली कपाली च करालिका ॥२३॥
कंसारि कमला कामा कैलासेश्वरवल्लभा । कात्यायनी केशवा च करुणा कामकेलिभुक् ॥२४॥
क्रिया कीर्तिः कृत्तिका च काशिका मथुरा शिवा । कालाक्षी कालिका काली धवलाननसुन्दरी ॥२५॥
खचरी च खमूर्तिश्च क्षुद्रा क्षुद्रक्षुधा वरा । खड्गहस्ता खड्गरता खड्गिनी खर्परप्रिया ॥२६॥
गङ्गा गौरी गामिनी च गीता गोत्रविवर्धिनी । गोधरा गोकरा गोधा गन्धर्वपुरवासिनी ॥२७॥
गन्धर्वा गन्धर्वकला गोपनी गरुड़ासना । गोविन्दभावा गोविन्दा गान्धारी गन्धमादिनी ॥२८॥
गौराङ्गी गोपिकामूर्तिर्गोपी गोष्ठनिवासिनी । गन्धा गजेन्द्रगा मान्या गदाधरप्रिया ग्रहा ॥२९॥
घोरघोरा घोररूपा घनश्रोणी घनप्रभा । दैत्येन्द्रप्रवला घण्टावादिनी घोरनिस्वना ॥३०॥
डाकिन्युमा उपेन्द्रा च उर्वशी उरगासना । उत्तमा उन्नता उन्ना उत्तमस्थानवासिनी ॥३१॥
चामुण्डा मुण्डिता चण्डी चण्डदर्पहरेति च । उग्रचण्डा चण्डचण्डा चण्डदैत्यविनाशिनी ॥३२॥
चण्डरूपा प्रचण्डा च चण्डा चण्डशरीरिणी । चतुर्भुजा प्रचण्डा च चराचरनिवासिनी ॥३३॥
क्षत्रप्रायश्शिरोवाहा छला छलतरा छली । क्षत्ररूपा क्षत्रधरा क्षत्रियक्षयकारिणी ॥३४॥
जया च जयदुर्गा च जयन्ती जयदा परा । जायिनी जयनी ज्योत्स्ना जटाधरप्रियाऽजिता ॥३५॥
जितेन्द्रिया जितक्रोधा जयमाना जनेश्वरी। जितमृत्युर्जरातीता जाह्नवी जनकात्मजा ॥३६॥
झङ्कारा झञ्झरी झण्टा झङ्कारी झकशोभिनी । झखा झमेशा झङ्कारी योनिकल्याणदायिनी ॥३७॥
झञ्झरा झमुरी झारा झरा झरतरा परा । झञ्झा झमेता झङ्कारी झणा कल्याणदायिनी ॥३८॥
ईमना मानसी चिन्त्या ईमुना शङ्करप्रिया । टङ्कारी टिटिका टीका टङ्किनी चटवर्गगा ॥३९॥
टापा टोपा टटपतिष्टमनी टमनप्रिया । ठकारधारिणी ठीका ठङ्करी ठिकरप्रिया ॥४०॥
ठेकठासा ठकरती ठामिनी ठमनप्रिया । डारहा डाकिनी डारा डामरा डमरप्रिया ॥४१॥
डाकिनी डडयुक्ता च डमरूकरवल्लभा । ढक्का ढक्की ढक्कनादा ढोलशब्दप्रबोधिनी ॥४२॥
ढामिनी ढामनप्रीता ढगतन्त्रप्रकाशिनी । अनेकरूपिणी अम्बा अणिमा सिद्धिदायिनी ॥४३॥

अमन्त्रिणी अणुकरी अणुमद्धानुसंस्थिता । तार तन्त्रवती तन्त्रतत्त्वरूपा तपस्विनी ॥४४॥
तरङ्गिणी तत्त्वपरा तन्त्रिका तन्त्रविग्रहा । तपोरूपा तत्त्वदात्री तपःप्रीति प्रघर्षिणी ॥४५॥
तन्त्रयन्त्रार्चनपरा तलातलनिवासिनी । तल्पदा त्वल्पदा काम्या स्थिरा स्थिरतरा स्थितिः ॥४६॥
स्थाणुप्रिया स्थपरास्थिलता स्थानप्रदायिनी । दिगम्बरा दयारूपा दावाग्निदमनी दमा ॥४७॥
दुर्गा दुर्गपरा देवी दुष्टदैत्यविनाशिनी । दमनप्रमदा दैत्यदया - दानपरायणा ॥४८॥
दुर्गार्तिनाशिनी दान्ता दम्भिनी दम्भवर्जिता । दिगम्बरप्रिया दम्भा दैत्यदम्भविदारिणी ॥४९॥
दमना दशनसौन्दर्या दानवेन्द्रविनाशिनी । दयाधरा च दमनी दर्भपत्र विलासिनी ॥५०॥
धारणी धरणी धात्री धराधरधरप्रिया । धराधरसुता देवी सुधर्मा धर्मचारिणी ॥५१॥
धर्मज्ञा धवला धूला धनदा धनवर्द्धिनी । धीराऽधीरा धीरतरा धीरसिद्धिप्रदायिनी ॥५२॥
धन्वन्तरिधरा धीरा ध्येया ध्यानस्वरूपिणी । नारायणी नारसिंही नित्यानन्दा नरोत्तमा ॥५३॥
नक्ता नक्तवती नित्या नीलजीमूतसन्निभा । नीलाङ्गी नीलवस्त्रा च नीलपर्वतवासिनी ॥५४॥
सुनीलपुष्पखचिता नीलजम्बुसमप्रभा । नित्याख्या षोडशी विद्या नित्या नित्यसुखावहा ॥५५॥
नर्मदा नन्दना नन्दा नन्दानन्दविवर्धिनी । यशोदानन्दतनया नन्दनोद्यानवासिनी ॥५६॥
नागान्तका नागवृद्धा नागपत्नी च नागिनी । नमिताशेषजनता नमस्कारवती नमः ॥५७॥
पीताम्बरा पार्वती च पीताम्बरविभूषिता । पीतमाल्याम्बरधरा पीताभा पिङ्गमूर्धजा ॥५८॥
पीतपुष्पार्चनरता पीतपुष्पसमर्चिता । परप्रभा पितृपतिः परसैन्यविनाशिनी ॥५९॥
परमा परतन्त्रा च परमन्त्रा परापरा । पराविद्या परासिद्धिः परास्थानप्रदायिनी ॥६०॥
पुष्पा पुष्पवती नित्या पुष्पमालाविभूषिता । पुरातना पूर्वपरा परसिद्धिप्रदायिनी ॥६१॥
पीतानितम्बिनी पीता पीनोन्नतपयस्विनी । प्रेमा प्रमध्यमा शेषा पद्मपत्रविलासिनी ॥६२॥
पद्मावती पद्मनेत्रा पद्मा पद्ममुखी परा । पद्मासना पद्मप्रिया पद्मरागस्वरूपिणी ॥६३॥
पावनी पालिका पात्री परदा वरदा शिवा । प्रेतसंस्था परानन्दा परब्रह्मस्वरूपिणी ॥६४॥
जिनेश्वरप्रिया देवी पशुरक्तरतप्रिया । पशुमांसप्रियाऽपर्णा परामृतपरायणा ॥६५॥
पाशिनी पाशिका चापि पशुघ्नी पशुभाषिणी । फुल्लारविन्दवदनी फुल्लोत्पलशरीरिणी ॥६६॥
परानन्दप्रदा वीणा पशुपाशविनाशिनी । फुत्कारा फुत्करा फेणी फुल्लेन्दीवरलोचना ॥६७॥
फट्मन्त्रास्फटिका स्वाहा स्फोटाच फट्स्वरूपिणी । स्फाटिका घुटिकाघोरा स्फाटिकाद्रिस्वरूपिणी ॥६८॥
वराङ्गना वरधरा वाराही वासुकी वरा । विन्दुस्था विन्दुनी वाणी विन्दुचक्रनिवासिनी ॥६९॥
विद्याधरी विशालाक्षी काशीवासिजनप्रिया । वेदविद्या विरूपाक्षी विश्वयुग् बहुरूपिणी ॥७०॥
ब्रह्मशक्तिर्विष्णुशक्तिः पञ्चवक्त्रा शिवप्रिया । वैकुण्ठवासिनी देवी वैकुण्ठपददायिनी ॥७१॥
ब्रह्मरूपा विष्णुरूपा परब्रह्ममहेश्वरी । भवप्रिया भवोद्भावा भवरूपा भवोत्तमा ॥७२॥

भवपारा भवाधारा भाग्यवत्प्रियकारिणी । भद्रा सुभद्रा भवदा शुम्भदैत्यविनाशिनी ॥७३॥
भवानी भैरवी भीमा भद्रकाली सुभद्रिका । भगिनी भगरूपा च भगमाना भगोत्तमा ॥७४॥
भगप्रिया भगवती भगवासा भगाकरा । भगसृष्टा भाग्यवती भगरूपा भगासिनी ॥७५॥
भगलिङ्गप्रिया देवी भगलिङ्गपरायणा । भगलिङ्गस्वरूपा च भगलिङ्गविनोदिनी ॥७६॥
भगलिङ्गरता देवी भगलिङ्गनिवासिनी । भगमाला भगकला भगाधारा भगाम्बरा ॥७७॥
भगवेगा भगाभूषा भगेन्द्रा भाग्यरूपिणी । भगलिङ्गासम्भोगा भगलिङ्गासवावहा ॥७८॥
भगलिङ्गसमाधुर्य्या भगलिङ्गनिवेशिता । भगलिङ्गसुपूजा च भगलिङ्गसमन्विता ॥७९॥
भगलिङ्गविरक्ता च भगलिङ्गसमावृता । माधवी माधवी मान्या मधुरा मधुमानिनी ॥८०॥
मन्दहासा महामाया मोहिनी महदुत्तमा । महामोहा महाविद्या महाघोरा महास्मृतिः ॥८१॥
मनस्विनी मानवती मोदिनी मधुरानना । मेनका मानिनी मान्या मणिरत्नविभूषिता ॥८२॥
मल्लिका मौलिका माला मालाधरमदोत्तमा । मदना सुन्दरी मेधा मधुमत्ता मधुप्रिया ॥८३॥
मत्तहंसा समोन्नासा मत्तसिंहमहासनी । महेन्द्रवल्लभा भीमा मौल्यञ्च मिथुनात्मजा ॥८४॥
महाकाल्या महाकाली मनोबुद्धिर्महोत्कटा । माहेश्वरी महामाया महिषासुरघातिनी ॥८५॥
मधुरा कीर्तिमत्ता च मत्तमातङ्गगामिनी । मदप्रिया मांसरता मत्तयुक् कामकारिणी ॥८६॥
मैथुन्यवल्लभा देवी महानन्दा महोत्सवा । मरीचिर्मा रतिर्माया मनोबुद्धिप्रदायिनी ॥८७॥
मोहा मोक्षा महालक्ष्मीर्महत्पदप्रदायिनी । यमरूपा च यमुना जयन्ती च जयप्रदा ॥८८॥
याम्या यमवती युद्धा यदोः कुलविवर्धिनी । रमा रामा रामपत्नी रत्नमाला रतिप्रिया ॥८९॥
रत्नसिंहासनस्था च रत्नाभरणमण्डिता । रमणी रमणीया च रत्या रसपरायणा ॥९०॥
रतानन्दा रतवती रघूणां कुलवर्धिनी । रमणारिपरिभ्राज्या रैधा राधिकरत्नजा ॥९१॥
रावी रसस्वरूपा च रात्रिराजसुखावहा । ऋतुजदा ऋतुदा ऋद्धा ऋतुरूपा ऋतुप्रिया ॥९२॥
रक्तप्रिया रक्तवती रङ्गिणी रक्तदन्तिका । लक्ष्मीर्लज्जा च लतिका लीलालग्ना निताक्षिणी ॥९३॥
लीला लीलावती लोभा हर्षाह्लादनपट्टिका । ब्रह्मस्थिता ब्रह्मरूपा ब्रह्मणा वेदवन्दिता ॥९४॥
ब्रह्मोद्भवा ब्रह्मकला ब्रह्माणी ब्रह्मबोधिनी । वेदाङ्गना वेदरूपा वनिता विनता बसा ॥९५॥
बाला च युवती वृद्धा ब्रह्मकर्मपरायणा । विन्ध्यस्था विन्ध्यवासी च विन्दुयुग् विन्दुभूषणा ॥९६॥
विद्यावती वेदधारी व्यापिका बर्हिणी कला । वामाचारप्रिया वह्निर्वामाचारपरायणा ॥९७॥
वामाचाररता देवी वासुदेवप्रियोत्तमा । बुद्धेन्द्रिया विबुद्धा च वुद्धा चरणमालिनी ॥९८॥
बन्धमोचनकर्त्री च वारुणा वरुणालया । शिवा शिवप्रिया शुद्धा शुद्धाङ्गी शुक्लवर्णिका ॥९९॥
शुक्लपुष्पप्रिया शुक्ला शिवधर्मपरायणा । शुक्लस्था शुक्लिनी शुक्लरूपा शुक्लपशुप्रिया ॥१००॥
शुक्रस्था शुक्रिणी शुक्रा शुकरूपा च शुक्रिका । षण्मुखी च षडङ्गा च षट्चक्रविनिवासिनी ॥१०१॥

षड्ग्रन्थियुक्ता षोढा च षण्माता च षडात्मिका । षडङ्गयुवती देवी षडङ्गप्रकृतिर्वशी ॥१०२॥
षडानना षडस्त्रा च षष्ठी षष्ठेश्वरी प्रिया । षडङ्गवादा षोडशी च षोढा न्यासस्वरूपिणी ॥१०३॥
षट्चक्रभेदनकरी षट्चक्रस्थस्वरूपिणी । षोडशस्वररूपा च षण्मुखी षड्रदान्विता ॥१०४॥
सनकादिस्वरूपा च शिवधर्मपरायणा । सिद्धा सप्तस्वरी शुद्धा सुरमाता स्वरोत्तमा ॥१०५॥
सिद्धविद्या सिद्धमाता सिद्धासिद्धस्वरूपिणी । हरा हरप्रिया हारा हरिणी हारयुक्तथा ॥१०६॥
हरिरूपा हरिधारा हरिणाक्षी हरिप्रिया । हेतुप्रिया हेतुरता हिताहितस्वरूपिणी ॥१०७॥
क्षमा क्षमावती क्षीता क्षुद्रघण्टाविभूषणा । क्षयङ्करी क्षितीशा च क्षीणमध्यसुशोभना ॥१०८॥
अजाऽनन्ता अपर्णा च अहल्या शेषशायिनी । स्वान्तर्गता च साधूनामन्तरानन्तरूपिणी ॥१०९॥
अरूपा अमला चार्द्धा अनन्तगुणशालिनी । स्वविद्या विद्यका विद्याविद्या चारविन्दलोचना ॥११०॥
अपराजिता जातवेदा अजपा अमरावती । अल्पा स्वल्पा अनल्पाऽऽद्या अणिमासिद्धिदायिनी ॥१११॥
अष्टसिद्धिप्रदा देवी रूपलक्षणसंयुता । अरविन्दमुखी देवी भोगसौख्यप्रदायिनी ॥११२॥
आदिविद्या आदिभूता आदिसिद्धिप्रदायिनी । सीत्काररूपिणी देवी सर्वासनविभूषिता ॥११३॥
इन्द्रप्रिया च इन्द्राणी इन्द्रप्रस्थनिवासिनी । इन्द्राक्षी इन्द्रवज्रा च इन्द्रवद्योक्षिणी तथा ॥११४॥
ईला कामनिवासा च ईश्वरीश्वरवल्लभा । जननी चेश्वरी दीना भेदा चेश्वरकर्मकृत् ॥११५॥
उमा कात्यायनी ऊर्द्धा मीना चोत्तरवासिनी । उमापतिप्रिया देवी शिवा चोङ्काररूपिणी ॥११६॥
उरगेन्द्रशिरोरत्ना उरगोरगवल्लभा । उद्यानवासिनी माला प्रशस्तमणिभूषणा ॥११७॥
ऊर्द्धदन्तोत्तमाङ्गी च उत्तमा चोर्ध्वकेशिनी । उमासिद्धिप्रदा या च उरगासनसंस्थिता ॥११८॥
ऋषिपुत्री ऋषिच्छन्दा ऋद्धिसिद्धि प्रदायिनी । उत्सवोत्सवसीमान्ता कामिका च गुणान्विता ॥११९॥
एला एकारविद्या च एणी विद्याधरा तथा । ॐकार वलयोपेता ॐकारपरमा कला ॥१२०॥
ॐवद वद वाणी च ॐकाराक्षरमण्डिता । ऐन्द्री कुलिशहस्ता च ॐलोकपरवासिनी ॥१२१॥
ॐकारमध्यबीजा च ॐनमो रूपधारिणी । परब्रह्मस्वरूपा च अंशुकांशुकवल्लभा ॥१२२॥
ॐकारा अः फट्मंत्रा च अक्षाक्षरविभूषिता । अमन्त्रा मंत्ररूपा च पदशोभासमन्विता ॥१२३॥
प्रणवोङ्काररूपा च प्रणवोच्चारभाक् पुनः । ह्रींकाररूपा ह्रींकारी वाग्बीजाक्षरभूषणा ॥१२४॥
हृल्लेखा सिद्धियोगा च हृत्पद्मासनसंस्थिता । बीजाख्या नेत्रहृदया ह्रींबीजा भुवनेश्वरी ॥१२५॥
क्लीं कामराजक्लिन्ना च चतुर्वर्गफलप्रदा । क्लींक्लींक्लीं रूपिका देवी क्रीं क्रीं क्रीं नामधारिणी ॥१२६॥
कमला शक्तिबीजा च पाशाङ्कुशविभूषिता । श्रीं श्रींकारा महाविद्या श्रद्धाद्धाश्रवती तथा ॥१२७॥
ॐ ऐं क्लीं ह्रीं श्रीं परा च क्लींकारी परमा कला । ह्रीं क्लीं श्रीङ्कारस्वरूपा सर्वकर्मफलप्रदा ॥१२८॥
सर्वाढ्या सर्वदेवी च सर्वसिद्धिप्रदा तथा । सर्वज्ञा सर्वशक्तिश्च वाग्विभूतिप्रदायिनी ॥१२९॥
सर्वमोक्षप्रदा देवी सर्वभोगप्रदायिनी । गुणेन्द्रवल्लभा वामा सर्वशक्तिप्रदायिनी ॥१३०॥

सर्वानन्दमयी चैव सर्वसिद्धिप्रदायिनी । सर्वचक्रेश्वरी देवी सर्वसिद्धेश्वरी तथा ॥१३१॥
सर्वप्रियङ्करी चैव सर्वसौख्यप्रदायिनी । सर्वानन्दप्रदा देवी ब्रह्मानन्दप्रदायिनी ॥१३२॥
मनोवाञ्छितदात्री च मनोबुद्धि समन्विता । अकारादिक्षकारान्ता दुर्गा दुर्गतिनाशिनी ॥१३३॥
पद्मनेत्रा सुनेत्रा च स्वधा स्वाहा वषट्करी । स्ववर्गा देववर्गा च तवर्गा च समन्विता ॥१३४॥
अन्तस्था वेश्मरूपा च नवदुर्गा नरोत्तमा । तत्त्वसिद्धिप्रदा नीला तथा नीलपताकिनी ॥१३५॥
नित्यरूपा निशाकारी स्तम्भिनी मोहिनी च । वशङ्करी तथोच्चाटी उन्मादी कर्षिणीति च ॥१३६॥
मातङ्गी मधुमत्ता च अणिमा लघिमा तथा । सिद्धा मोक्षप्रदा नित्या नित्यानन्दप्रदायिनी ॥१३७॥
रक्ताङ्गी रक्तनेत्रा च रक्तचन्दनभूषिता । स्वल्पसिद्धिः सुकल्पा च दिव्याचरण शुक्रभा ॥१३८॥
संक्रांतिः सर्वविद्या च सस्यवासरभूषिता । प्रथमा च द्वितीया च तृतीया च चतुर्थिका ॥१३९॥
पञ्चमी चैव षष्ठी च विशुद्धा सप्तमी तथा । अष्टमी नवमी चैव दशम्येकादशी तथा ॥१४०॥
द्वादशी त्रयोदशी च चतुर्दश्यथ पूर्णिमा । अमावस्या तथा पूर्वा उत्तरा परिपूर्णिमा ॥१४१॥
खड्गिनी चक्रिणी घोरा गदिनी शूलिनी तथा । भुशुण्डी चापिनी वाणा सर्वायुधविभीषणा ॥१४२॥
कुलेश्वरी कुलवती कुलाचारपरायणा । कुलकर्म्मसुरक्ता च कुलाचारप्रवर्धिनी ॥१४३॥
कीर्तिः श्रीः चरमा रामा धर्म्मायै सततं नमः । क्षमा धृतिः स्मृतिर्मेधा कल्पवृक्षनिवासिनी ॥१४४॥
उग्रा उग्रप्रभा गौरी वेदविद्या विवर्धिनी । साध्या सिद्धा सुसिद्धा च विप्ररूपा तथैव च ॥१४५॥
काली कराली काल्या च कालदैत्यविनाशिनी । कौलिनी कालिकी चैव कचटतपवर्णिका ॥१४६॥
जयिनी जययुक्ता च जयदा जृम्भिणी तथा । स्राविणी द्राविणी देवी भरुण्डा विन्ध्यवासिनी ॥१४७॥
ज्योतिर्भूता च जयदा ज्वालामालासमाकुला । भिन्ना भिन्नप्रकाशा च विभिन्ना भिन्नरूपिणी ॥१४८॥
अश्विनी भरणी चैव नक्षत्रसम्भवानिला । काश्यपी विनता ख्याता दितिजा दितिरेव च ॥१४९॥
कीर्तिः कामप्रिया देवी कीर्त्या कीर्तिविवर्धिनी । सद्योमांससमालब्धा सद्यश्छिन्नासिशङ्करा ॥१५०॥
दक्षिणा चोत्तरा पूर्वा पश्चिमा दिक् तथैव च । अग्निनैर्ऋति वायव्या ईशान्या दिक् तथा स्मृता ॥१५१॥
ऊर्ध्वाङ्गाऽधोगता श्वेता कृष्णा रक्ता च पीतका । चतुर्वर्गा चतुर्वर्णा चतुर्मात्रामित्मकाक्षरा ॥१५२॥
चतुर्मुखी चतुर्वेदा चतुर्विद्या चतुर्मुखा । वतुर्गणा चतुर्माता चतुर्वर्गफलप्रदा ॥१५३॥
धात्री विधात्री मिथुना नारी नायकवासिनी । सुरा मुदा मुदवती मोदिनी मेनकात्मजा ॥१५४॥
ऊर्ध्वकाली सिद्धिकाली दक्षिणाकालिका शिवा । नील्या सरस्वती सा त्वं बगला छिन्नमस्तका ॥१५५॥
सर्वेश्वरी सिद्धिविद्या परा परमदेवता । हिङ्गुला हिङ्गुलाङ्गी च हिङ्गुलाधरवासिनी ॥१५६॥
हिङ्गुलोत्तमवर्णाभा हिङ्गुलाभरणा च सा । जाग्रती च जगन्माता जगदीश्वरवल्लभा ॥१५७॥
जनार्दनप्रिया देवी जययुक्ता जयप्रदा । जगदानन्दकारी च जगदाह्लादकारिणी ॥१५८॥
ज्ञानदानकरी यज्ञा जानकी जनकप्रिया । जयन्ती जयदा नित्या ज्वलदग्निसमप्रभा ॥१५९॥
विद्याधरा च विम्बोष्ठी कैलासाचलवासिनी । विभवा वडवाग्निश्च अग्निहोत्रफलप्रदा ॥१६०॥

मन्त्ररूपा परा देवी तथैव गुरुरूपिणी । गया गङ्गा गांमती च प्रभासा पुष्करापि च ॥१६१॥
विन्ध्याचलरता देवी विन्ध्याचलनिवासिनी । बहुबहुसुन्दरी च कंसासुरविनासिनी ॥१६२॥
शूलिनी शूलहस्ता च वज्रा वज्रहरापि च । दुर्गा शिवा शान्तिकरी ब्रह्माणी ब्राह्मणप्रिया ॥१६३॥
सर्वलोकप्रणेत्री च सर्वरोगहरापि च । मङ्गला शोभना शुद्धा निष्कला परमाकला ॥१६४॥
विश्वेश्वरी विश्वमाता ललिता हसितानना । सदाशिवा उमा क्षेमा चण्डिका चण्डविक्रमा ॥१६५॥
सर्वदेवमयी देवी सर्वागमभयापहा । ब्रह्मेशविष्णुनमिता सर्वकल्याणकारिणी ॥१६६॥
योगिनी योगमाता च योगीन्द्रहृदयस्थिता । योगिजाया योगवती योगीन्द्रानन्ददायिनी ॥१६७॥
इन्द्रादिनमिता देवी ईश्वरी चेश्वरप्रिया । विशुद्धिदा भयहरा भक्तद्वेषिभयङ्करी ॥१६८॥
भववेषा कामिनी च भरुण्डा भयकारिणी । बलभद्रप्रियाकारा संसारार्णवतारिणी ॥१६९॥
पञ्चभूता सर्वभूता विभूतिर्भूतिधारिणी । सिंहवाहा महामोहा मोहपाशविनाशिनी ॥१७०॥
मन्दुरा मदिरा मुद्रा मुद्रामुद्गरधारिणी । सावित्री च महादेवी परप्रियनिनायिका ॥१७१॥
यमदूती च पिङ्गाक्षी वैष्णवी शङ्करी तथा । चन्द्रप्रिया चन्द्ररता चन्दनारण्यवासिनी ॥१७२॥
चन्दनेन्द्रसमायुक्ता चण्डदैत्यविनाशिनी । सर्वेश्वरी यक्षिणी च किराती राक्षसी तथा ॥१७३॥
महाभोगवती देवी महामोक्षप्रदायिनी । विश्वहन्त्री विश्वरूपा विश्वसंहारकारिणी ॥१७४॥
धात्री च सर्वलोकानां हितकारणकामिनी । कमला सूक्ष्मदा देवी धात्री हरविनाशिनी ॥१७५॥
सुरेन्द्रपूजिता सिद्धा महातेजोवतीति च । परा रूपवती देवी त्रैलोक्याकर्षकारिणी ॥१७६॥
इति ते कथितं देवि पीतानामसहस्त्रकम् । पठेद् वा पाठयेद् वापि सर्वसिद्धिर्भवेत् प्रिये ॥१७७॥
इति मे विष्णुना प्रोक्तं महास्तम्भकरं परम् । प्रातःकाले च मध्याह्ने सन्ध्याकाले च पार्वती ॥१७८॥
एकचित्तः पठेदेतत् सर्वसिद्धिर्भविष्यति । एकवारं पठेद् यस्तु सर्वपापक्षयो भवेत् ॥१७९॥
द्विवारं च पठेद् यस्तु विघ्नेश्वर समोभवेत् । त्रिवारं पठनाद् देवि सर्वं सिध्यति सर्वथा ॥१८०॥
स्तवस्यास्य प्रभावेण साक्षाद्भवति सुव्रते । मोक्षार्थी लभते मोक्षं धनार्थी लभते धनम् ॥१८१॥
विद्यार्थी लभते विद्यां तर्कव्याकरणान्विताम् । महित्वं वत्सरान्ताच्च शत्रुहानिः प्रजायते ॥१८२॥
क्षोणीपतिर्वशस्तस्य स्मरणे सदृशो भवेत् । यः पठेत् सर्वदा भक्त्या श्रेयस्तु भवति प्रिये ॥१८३॥
गणाध्यक्षप्रतिनिधिः कविकाव्यपरो वरः । गोपनीयं प्रयत्नेन जननीजारवत् सदा ॥१८४॥
हेतुयुक्तो भवेन्नित्यं शक्तियुक्तः सदा भवेत् । यः इदं पठते नित्यं शिवेन सदृशौ भवेत् ॥१८५॥
जीवन् धर्मार्थभोगी स्यान् मृतो मोक्षपतिर्भवेत् । सत्यं सत्यं महादेवि सत्यं सत्यं न संशयः ॥१८६॥
स्तवस्यास्य प्रभावेण देवेन सह मोदते । सुचित्ताश्च सुराः सर्वे स्तवराजस्य कीर्तनात् ॥१८७॥
पीताम्बरपरीधानां पीतगन्धानुलेपनाम् । परमोदयकीर्तिः स्यात् स्मरतः सुरसुन्दरि ॥१८८॥

॥ इतिश्रीउत्कटशम्बरे नागेन्द्रप्रयाणतन्त्रे षोडशसहस्त्रे। विष्णुशङ्करसंवादे श्रीपीताम्बरीसहस्त्रनामस्तोत्रम् ॥११॥

॥ अथ श्री पूर्णाभिषेक स्तोत्रम् ॥

ग्रह शांतिवत् कर्म करें। प्रधान घट में देवी का आवाहन करें। पश्चात् घट के द्रव्य से शिष्य अभिषेक करें। शिष्य के सहस्त्रदल को जाग्रत करें, कुण्डलिनी का उत्थापन करें।

ततो गुरुः पूर्वोक्ते घटे शिष्येण देवीमर्चयित्वा । श्रीं ह्रीं जप्त्वा घटं चालयेत् ।

ॐ उत्तिष्ठ ब्रह्मकलश देवताभीष्टसिद्धद । सर्वतीर्थाम्बुपूर्णेन पूरयाऽस्य मनोरथम् ॥

विनियोगः :- **ॐ अस्य श्री अभिषेक स्तोत्रस्य सदाशिव ऋषिः, अनुष्टुप् छन्दः, शिष्येष्टदेवता देवता, प्रणवो बीजम्, आयुःकीर्तिबलारोग्याद्यवाप्त्यै पूर्णाभिषेके विनियोगः।**

ॐ गुरवस्त्वाऽभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः । दुर्गालक्ष्मीभवान्यस्त्वामभिषिञ्चन्तु मातरः ॥१॥
षोडशी तारिणी नित्या स्वाहा महिषमर्दिनी। एतास्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥२॥
जयदुर्गा विशालाक्षी ब्रह्माणी च सरस्वती । एतास्त्वामभिषिञ्चन्तु बगला वरदा शिवा ॥३॥
नारसिंही च वाराही वैष्णवी वनमालिनी इन्द्राणी वारुणी रौद्री त्वाऽभिषिञ्चन्तु शक्तयः ॥४॥
भैरवी भद्रकाली च तुष्टिः पुष्टिरुमा क्षमा। श्रद्धा कान्तिर्दया शान्तिरभिषिञ्चन्तु ते सदा ॥५॥
महाकाली महालक्ष्मी र्महानीलसरस्वती। उग्रचण्डा प्रचण्डाद्य अभिषिञ्चन्तु सर्वदा ॥६॥
मत्स्यः कूर्मो वराहश्च नृसिंहो वामनस्तथा। रामो भार्गवरामस्त्वामभिषिञ्चन्तु वारिणा ॥७॥
असिताङ्गो रुरुश्चण्डः क्रोधोन्मत्तक्षयङ्करः। कपाली भीषणश्च त्वामभिषिञ्चन्तु वारिणा ॥८॥
काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी । विप्रचित्ता महोग्रा त्वामभिषिञ्चन्तु सर्वदा ॥९॥
इन्द्रोऽग्निः शमनो रक्षो वरुणः पवनस्तथा । धनदश्च तथेशानः सिञ्चन्तु त्वां दिगीश्वराः ॥१०॥
रविः सोमा मङ्गलश्च बुधो जीवः सितः शनिः। राहुः केतुः सनक्षत्रा अभिषिञ्चन्तु ते ग्रहाः ॥११॥
नक्षत्रं करणं योगा वाराः पक्षौ दिनानि च । ऋतुर्मासो हायनस्त्वामभिषिञ्चन्तु सर्वदा ॥१२॥
लवणेक्षुसुरा सर्पिर्दधिदुग्धजलान्तकाः । समुद्रास्त्वाऽभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥१३॥
अनन्ताद्या महानागाः सुपर्णाद्याः पतत्रिणः। तरवः कल्पवृक्षाद्याः सिञ्चन्तु त्वां दिगीश्वराः ॥१४॥
पतालभूतलव्योमचारिणः क्षेमचारिणः। पूर्णाभिषेकसन्तुष्टा स्त्वाऽभिषिञ्चन्तु पाथसा ॥१५॥
दौर्भाग्यं दुर्यशो रोगा दौर्मनस्य तथा शुचः । विनश्यन्त्वभिषेकेण कालीबीजेन ताडिताः ॥१६॥
भूताः प्रेताः पिशाचाश्च ग्रहा येऽरिष्टकारिणः। विद्रुतास्ते विनश्यन्ति रमाबीजेन ताडिताः ॥१७॥
अभिचारकृता दोषा वैरिमन्त्रोद्भवाश्च ये । मनोवाक्कायजा दोषा विनश्यन्त्वभिषेचनात् ॥१८॥
नश्यन्तु विपदः सर्वाः सम्पदः सन्तु सुस्थिराः। अभिषेकेण पूर्णेन पूर्णाः सन्तु मनोरथाः ॥१९॥

इत्येतैर्मन्त्रैः शिष्यमभिषिञ्चय पशोर्मुखाद् यो मन्त्रो लब्धस्तं पुनः गुरु श्रावयेत्। पूर्वोक्तनाम्ना शिष्यं संबोध्य शक्तिसाधकान् विज्ञाप्य गुरूरानन्दनाथान्तं नाम शिष्याय दद्यात्। श्रुतमन्त्रो गुरौ इष्टदेवतां सम्पूज्य पञ्चतत्वैर्गुरमर्चयेत्। ततो गोभूहिरण्यवासोयानालङ्करणानि दक्षिणां च गुरवे दद्यात्। ततः पञ्चतत्वैः कौलशक्तिसाधकान् अभ्यर्च्य

गुरोश्चरणौ स्पृष्ट्वा, प्रार्थयेद्। यथा -

श्रीनाथ जगतां नाथ मन्नाथ करुणानिधे। परामृतप्रदानेन पूरयास्मन्मनोरथम् ॥

ततो गुरुः-

आज्ञा मे दीयतां कौलाः प्रत्यक्षशिवरूपिणः। सच्छिष्याय विनीताय ददामि परमामृतम् ॥

ते ब्रूयुः-

चक्रेश परमेशान कौलपङ्कजभास्कर। कृतार्थं कुरु सच्छिष्यं देह्यमुष्मै कुलामृतम् ॥

इति कौलाज्ञामादाय शुद्धिसहित कारणपात्रं शिष्याय दद्यात्। ततः स्रुवलग्नभस्मना सर्वेषां ललाटे तिलकं दद्यात्। ततश्चक्रं संपूर्णं कृत्वां यथेष्टं विहरेत्।

(वामेकेश्वर तंत्रे)

पूजावसाने देवेशि कलशैरभिषेचयेत्। विशेषतश्च तन्मन्त्रं वक्ष्यामि शृणु सादरात् ॥
ॐ ह्रीं श्रीं ह्सौः पुत्र त्वं सर्वसिद्धीश्वरो भव। इति पूर्वकलशेन गुरुः सिञ्चेच्छिशुं शुभम् ॥
ॐ ऐं ह्लीं श्रीं क्रौं हौं हंसः पुत्र त्वं वेतालो भव। इत्यग्निकलशेनैव गुरुः सिञ्चेच्छिशुं शुभम् ॥
ॐ ह्रीं ऐं ह्लीं ह्सौः हं सःपुत्र त्वं अणिमादिसिद्धीश्वरो भव। इतिदक्षिणनकलशेन गुरुः सिञ्चेच्छिशुं शुभम् ॥
ॐ हुं ह्रौं क्रीं श्रीं पुत्र त्वम् अञ्जनासिद्धीश्वरो भव। इति नैऋतकलशेन गुरुः सिञ्चेच्छिशुं शुभम् ॥
ॐ अं आं ऐं क्रौं श्रीं ह्लीं पुत्र त्वं लघिमासिद्धीश्वरो भव। इति वारुणकलशेन गुरुः सिञ्चेच्छिशुं शुभम् ॥
ॐ आं ऐं क्रीं ह्रीं पुत्र त्वं काम्यसिद्धीश्वरो भव। इति मरुत्कलशेन गुरुः सिञ्चेच्छिशुं शुभम् ॥
ॐ ऐं ओं ह्लीं पुत्र त्वं स्तम्भनादिसिद्धीश्वरो भव। इति कुबेरकलशेन गुरुः सिञ्चेच्छिशुं शुभम् ॥
ॐ हं सः ऐं ह्लीं नवनवनामकरणाभिधान पूर्वकं। पुत्र त्वमाकर्षणसिद्धीश्वरो भव ॥
इतीशानकलशेन गुरुः सिञ्चेच्छिशुं शुभम्। दक्षिणान्तं क्रियाकाण्डं कुर्यात् साधकसत्तमः ॥

॥ इति श्री बगलामुखी तंत्रं सम्पूर्णम् ॥

॥ श्री मातंगी तंत्रम् ॥

दशमहाविद्याओं में आप नवमी महाविद्या है। सिद्धविद्यात्रयी में आप दूसरी है। मातंगीविद्या की प्रसन्नता से ज्ञान वृद्धि शास्त्रज्ञाता व कवित्व शक्ति एवं संगीत विद्या की प्राप्ति होती है। मातंगी वशीकरण एवं संमोहन की अधिष्ठात्री भी है। इसके प्रयोग से भंडार की अक्षयवृद्धि प्राप्त होती है।

इनके कई नामान्तर है - **१. सुमुखी। २. लघुश्यामा या श्यामला। ३. उच्छिष्ट चाण्डालिनी। ४. उच्छिष्टमातंगी। ५. राजमातंगी। ६. कर्णमातंगी। ७.चण्डमातंगी। ८. वश्यमातंगी। ९. मातंगेश्वरि। १०. ज्येष्ठामातंगी। ११. सारिकाम्बा। १२. रत्नाम्बा मातंगी। १३. वार्ताली मातंगी।**

१. अष्टाक्षर मातङ्गी मंत्र:

मंत्र :- **कामिनी रञ्जिनी स्वाहा।**

विनियोग - **अस्य मंत्रस्य संमोहन ऋषिः निवृत् छन्दः सर्वसंमोहिनी देवता सर्वजन संमोहनार्थे जपे विनियोगः।**

॥ ध्यानम् ॥

श्यामङ्गीं वल्लकीं दोर्भ्यां वादयन्तीं सुभूषणाम्। चन्द्रावतंसां विविधैर्गायनैर्मोहतीं जगत् ॥

२० हजार जप करके मधुयुक्त मधूक पुष्पों से होम करें।

२. दशाक्षर मातङ्गी मंत्र:

मंत्र - **ॐ ह्रीं क्लीं हूं मातंग्यै फट् स्वाहा।**

विनियोग - **अस्य मंत्रस्य दक्षिणामूर्ति ऋषिर्विराट् छन्दः, मातङ्गी देवता, ह्रीं बीजं, हूं शक्तिः, क्लीं कीलकं, सर्वेष्टसिद्धये जपे विनियोगः।**

अङ्गन्यास - ह्रां, ह्रीं, ह्रूं, ह्रैं, ह्रौं, ह्रः से हृदयादि न्यास करें।

श्यामाङ्गीं शशिशेखरां त्रिनयनां सद्रत्न सिंहासने - संस्थां रत्न विचित्र भूषणयुतां संक्षीण मध्यस्थलाम्। आपीनस्तनमण्डलां स्मितमुखीं ध्यायेद् दधन्तीं क्रमाद् वेदैर्बाहुभिरंकुशासि लतिके पाशं तथा खेटकम् ॥१॥

श्यामाङ्गी शशिशेखरां त्रिनयनां वेदैः करैर्विभ्रतीम् पाशं खेटमथांऽकुश दृढमसिं नाशाय भक्तद्विषाम्। रत्नालङ्करण प्रभोज्वलतनुं भास्वत् किरीटां शुभाम् मातङ्गीं मनसा स्मरामि सदयां सर्वार्थसिद्धि प्रदाम् ॥२॥

श्याङ्गीं शशिशेखरां त्रिनयनां रत्नसिंहासन स्थिताम्। ध्यायेऽहं वेदैर्बाहु दण्डैरसि खेटक पाशांकुशधराम् ॥

॥ अथ यंत्रार्चनम् ॥

सर्वतोभद्रमण्डल पर '**ॐ मं मण्डूकादि परतत्त्वान्त पीठदेवतायै नमः**' से पूजन करें। यंत्र को आग्न्युत्तारण पूर्वक शुद्धकरें '**ॐ ह्रीं सर्वशक्तिकमलासनाय नमः**' से पुष्पादि से आसन देकर यंत्र स्थापित करें। अष्ट दिशाओं में पीठ शक्तियों की पूजा करें।

॥ आवरण पूजनम् ॥

मध्य में ध्यान पूर्वक आवाहन देवी का करें, षट्कोण में षड्ंग पूजा करें। **ह्रां हृदयाय नमः। ह्रीं शिरसे स्वाहा। ह्रूं शिखायै वषट्। ह्रैं कवचाय हुं। ह्रौं नेत्रत्रयाय वौषट्। ह्रः अस्त्राय फट्।** से देवी की षडङ्ग पूजा करें।पश्चात् अष्टदल में आवरण पूजा करें।

अष्टदलेषु - **ॐ रत्यै नमः। ॐ प्रीत्यै नमः। ॐ मनोभवायै नमः। ॐ क्रियायै नमः। ॐ शुद्धायै नमः। ॐ अनङ्गकुसुमायै नमः। ॐ अनङ्गमदनायै नमः। ॐ मदनालसायै नमः।**

भूपूर में इन्द्रादि लोकपालों का सायुध पूजन करें।

साधक छः हजार जप नित्य करते हुये २१ दिन प्रयोग करें, दशांश होम करें। चतुष्पद श्मशान या कलामध्य में मछली, मांस, खीर, गुगल का धूप देवे। इससे कवित्व शक्ति प्राप्त होवे। जल अग्नि एवं वाणी स्तंभन करने में समर्थ होता है। वादविवाद में वह दूसरा वृहस्पति बन जाता है। ऐसे साधक के घर में स्वयं कुबेर आकर धन प्रदान करते है। बिना मांस मछली के परदेवता की पूजा नहीं करें। पूजा अपने कुलधर्म व अनुकल्पों के आधार पर असमर्थ साधक को करनी चाहिये।

३. लघुश्यामा मातंगी

यह मातंगी विद्या वशीकरण हेतु प्रमुख है। इसका उच्छिष्ट नाम से संबोधन के कारण साधकों के मन में शंका रहती है कि उच्छिष्ट गणपति की तरह क्या **इसका प्रयोग भी उच्छिष्ट मुंह से करना चाहिये।** इसके मंत्र प्रयोगों में तो उच्छिष्ट मुंह की नहीं कही है परन्तु संभवतया ऐसा कर सकते हैं। क्योंकि **पुरश्चार्णव व मंत्रमहोदधि उच्छिष्ट भोजन देवता में इसके लिये लिखा है।** इसके पूजन की अंग देवियां सब कुमारीरूपा है। सुमुखी के मंत्र में उच्छिष्ट मुंह से जप करने का उल्लेख है।

विंशाक्षर मंत्र - ऐं नमः उच्छिष्ट चाण्डालि मातङ्गि सर्ववशङ्करि स्वाहा।

विनियोगः - **अस्य श्री लघुश्यामा मंत्रस्य मदनऋषिः, निचद्गायत्रीछन्दः, देवी लघुश्यामा देवता, ऐं बीजं, स्वाहा शक्तिः, ममाखिलभीष्ट सिद्ध्यर्थे जपे विनियोगः।**

ऋष्यादिन्यास :- **ॐ मदनऋषये नमः शिरसि। निचृद्गायत्रीछन्दसे नमः मुखे। देवी लघुश्याम देवतायै नमः हृदि। ऐं बीजाय नमः गुह्ये। स्वाहा शक्तये नमः पादयोः। विनियोगाय नमः सर्वाङ्गे।**

रत्यादिन्यास :- **ऐं रत्यै नमः मूर्ध्नि। ह्रीं प्रीत्यै नमः हृदि। क्लीं मनोभवायै नमः पादयोः। ऐं इच्छाशक्त्यै नमो मुखे। ह्रीं ज्ञानशक्त्यै नमः कण्ठे। क्लीं क्रियाशक्त्यै नमः लिङ्गे।**

वाणन्यासः - **द्रां द्रावणबाणाय नमः शिरसे। द्रीं शोषणवाणाय नमो मुखे। क्लीं तापनवाणाय नमो हृदि। ब्लूं मोहनवाणाय नमो गुह्ये। सः उन्मादनवाणाय नमः पादयोः।**

करन्यास :- ऐं नमः अंगुष्ठाभ्यां नमः। उच्छिष्ट तर्जनीभ्यां नमः। चाण्डालि मध्यमाभ्यां नमः। मातंग्यनामिकाभ्यां नमः। सर्ववशङ्करी कनिष्ठिकाभ्यां नमः। स्वाहा करतल करपृष्ठाभ्यां नमः।

षडङ्गन्यास :- ऐं नमः हृदयाय नमः। उच्छिष्ट शिरसे स्वाहा। चाण्डालि शिखायै वषट्। मातङ्गि कवचाय हुं। सर्ववशङ्करि नेत्रत्रयाय वौषट्। स्वाहा अस्त्राय फट्।

ब्राह्मयादि मातृकान्यास :- आं क्षां ब्राह्मीकन्यकायै नमः मूर्ध्नि। ईं लां माहेश्वरीकन्यकायै नमो वामांसे। ऊं हौं कौमारी कन्यकायै नमो वामपार्श्वे। ॠं सां वैष्णवीकन्यकायै नमः नाभौ। लृं षां वाराही कन्यकायै नमो दक्षपार्श्वे। ऐं शां इन्द्राणीकन्यकायै नमः दक्षांसे। औं वां चामुण्डा कन्यकायै नमः ककुदि। अः लां महालक्ष्मी कन्यकायै नमो हृदि।

सिद्धिन्यास :- ऐं अणिमासिद्धि कन्यकायै नमो ललाटे। इस तरह सब जगह नाम के बाद कन्यकायै नमः कहें। ऐं महिमा सिद्धि भ्रूमध्ये। ऐं लघिमासिद्धि क. कण्ठे। ऐं गरिमासिद्धि क. हृदि। ऐं असिता (ईशिता) सिद्धि क. नाभौ। ऐं वशितासिद्धि नमः क. आधारे। ऐं प्राकाम्यसिद्धि नमः क. लिङ्गे। ॐ ऐं प्राप्तिसिद्धि कन्यकायै नमो मूर्ध्नि। (मन्त्र महोदधि में ये न्यास मुर्ध्नि से लिङ्गे इस तरह दिये हैं)

अप्सरोन्यास - सर्वत्र अमुक नाम के बाद कन्यकायै नमः का उच्चारण करें। यथा - ॐ क्लीं उर्वश्यप्सर कन्यकायै नमो मूर्ध्नि। ॐ क्लीं मेनकाप्सरः क. नमः ललाटे। ॐ क्लीं रम्भाप्सरः क. दक्षनेत्रे। ॐ क्लीं घृताच्यप्सरः क. वामनेत्रे। ॐ क्लीं पुञ्जिकस्थल्यप्सरः क. वक्त्रे। ॐ क्लीं सुकेश्यप्सरः क. दक्षकर्णे। ॐ क्लीं मञ्जघोषाप्सर क. वामकर्णे। ॐ क्लीं महारङ्गवत्यप्सरः क. ककुदि।

अष्टकन्यान्यास :- ॐ क्लीं यक्षकन्यकायै नमः दक्षांसे। ॐ क्लीं गंधर्व क. नमः वामांसे। ॐ क्लीं सिद्धकन्यकायै नमः हृदि। ॐ क्लीं नरकन्यकायै नमः दक्षस्तने। ॐ क्लीं नागकन्यकायै नमः वामस्तने। ॐ क्लीं विद्याधरकन्यकायै नमो जठरे। ॐ क्लीं किंपुरुषकन्यकायै नमः गुह्ये। ॐ क्लीं पिशाचकन्यकायै नमः मूलाधारे।

मंत्रवर्णन्यास :- ॐ ऐं नमः दक्षिणबाहुमूले। ॐ नं नमः दक्षिण कर्पूरे। ॐ मं नमः दक्षिणमणिबंधे। ॐ उं नमः दक्षहस्तांगुलिमूले। ॐ च्छि नमः दक्षहस्तांगुल्यग्रे। ॐ ष्टं नमः वामबाहूमूले। ॐ चां नमः वामकर्पूरे । ॐ डां नमः वाममणिबन्धे। ॐ लिं नमः वामहस्तांगुलिमूले। ॐ मां नमः वामहस्तांगुल्यग्रे। ॐ तं नमः दक्षपादमूले। ॐ गिं नमः दक्ष जानुनि। ॐ सं नमः दक्षगुल्फे। ॐ र्वं नमः दक्षपादांगुलिमूले। ॐ वं नमः दक्षपादांगुल्यग्रे। ॐ शं नमः वामपादमूले। ॐ कं नमः वामजानुनि। ॐ रिं नमः वामगुल्फे। ॐ स्वां नमः वामपादांगुलिमूले। ॐ हां नमः वामपादांगुल्यग्रे।

॥ध्यानम्॥

माणिक्याभरणान्वितां स्मितमुखीं नीलोत्पलाभाम्बराम्
रम्यालक्त कलिप्त पादकमलां नेत्रत्रयोल्लासिनीम् ।
वीणावादन - तत्परां सुरनतां कीरच्छदश्यामलां
मातङ्गीं शशिशेखरामनु भजेत् तांबूलपूर्णाननाम् ॥

॥ आवरण पूजा प्रयोगः ॥

सर्वतोभद्रमण्डल पर **ॐ मं मण्डूकादि परतत्वान्त पीठ देवताभ्यों नमः** से पीठ देवताओं का पूजन करे। पश्चात पीठशक्तियों का पूजन करे। **ॐ भूत्यै लघुश्यामायै नमः। ॐ उन्नत्यै लघुश्यामायै नमः। ॐ कान्त्यै लघुश्यामायै नमः। ॐ सृष्ट्यै लघुश्यामायै नमः। ॐ कीर्त्यै लघुश्यामायै नमः। ॐ सन्नत्यै लघुश्यामायै नमः। ॐ व्युष्ट्यै लघुश्यामायै नमः। ॐ उत्कृष्ट्यै लघुश्यामायै नमः।** मध्ये- **ॐ ऋद्धयै लघुश्यामायैनमः।** यंत्र का शोधन कर भद्रमण्डल रखे, पुष्पादि से देवी को आसन देवे। ध्यान मंत्र से आवाहन करे। पश्चात –

॥ मातंगी (विंशत्यक्षर) यन्त्रम् ॥

ऐं शुकप्रियायै विद्महे क्लीं कामेश्वरि धीमहि तन्नः श्यामा प्रचोदयात् ॥

उक्त मंत्र से यागवस्तुओं का प्रोक्षण करे। **समस्त पूजन क्रम में चतुर्थी से आवाहन तथा प्रथमा नाम मंत्र सहित पादुकां पूजयामि तर्पयामि नमः कहे।** गंधाक्षत पुष्प से अर्चन करे। पुष्पांजलि लेकर देवी से पूजन की आज्ञा मांगे।

ॐ संविन्मये परे देवि परामृत रसप्रिये। अनुज्ञां देहि देवेशि परिवारार्चनाय मे।

प्रथमावरणम्:– (त्रिकोणे) देवी के अग्र भाग में – **ॐ ऐं रत्यै नमः। रति श्री पादुकां पूजयामि तर्पयामि नमः।** इस तरह सर्वत्रनाम मंत्र के साथ सभी आवरण पूजा करे। देवी दक्षिणतः **ॐ ह्रीं प्रीत्यै नमः।** देवीवामे-**ॐ क्लीं मनोभवायै नमः।** पुनः त्रिकोण में देवी के आगे-**ऐं इच्छाशक्त्यै नमः।** देवीदक्षिणतः– **ह्रीं ज्ञानशक्त्यै नमः।** देवीवामे **क्लीं क्रियाशक्त्यै नमः।**

पुष्पांजलि अर्पण करे-

अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

अर्घ पात्र से जल छोड़ कर कहे **पूजितास्तर्पिताः सन्तु।** ऐसा सभी आवरण पूजा बाद करें।

द्वितीयावरणम्:– (पंचकोणे) देवी के पास में पांचवाणों का पूजन करे। **ॐ द्रां द्रावणवाणाय नमः। द्रीं शोषणवाणाय नमः। क्लीं तापनवाणाय नमः। ब्लूं मोहन वाणाय नमः। सः उन्मादनवाणाय नमः।**

तृतीयावरणम् :– पंचकोण एवं वृत्तमध्ये षड्दिक्षु – **ऐं नमः हृदयाय नमः। उच्छिष्ट शिरसे स्वाहा। चाण्डालि शिखायै वषट्। मातङ्गि कवचाय हुं। सर्ववशङ्करि नेत्रत्रयाय वौषट्। स्वाहास्त्राय फट्।**

चतुर्थावरणम् :– (अष्टदले) अष्टदल में ब्राह्मयादि अष्टमातृओं का पूजन करे। उनके नाम मातृकान्यास में कहें जा चुके हैं। यथा-**पूर्वे आं क्षां ब्राह्मीकन्यकायै नमः। ब्राह्मीकन्याका श्री पादुकां पूजयामि।**

पंचमावरणम् :– (अष्टदलाग्रे) अष्टदल में अणिमादि अष्टसिद्धियां जो सिद्धिन्यास में कहीं हैं उनका पूजन करे। यथा– **ॐ ऐं अणिमासिद्धि कन्यकायै नमः। अणिमा सिद्धि कन्यका श्री पादुकां पूजयामि नमः।**

षष्ठमावरणम् :– (षोडशदले) अष्टअप्सरा तथा अष्टकन्या नाम में जो नाम न्यासविधि में कहे हैं उनसे पूजन करे।

यथा-ॐ **क्लीं उर्वश्यप्सरः कन्यकायै नमः। उर्वश्यप्सरः कन्यका श्री पादुकां पूजयामि नमः।**

सप्तमावरणम्ः- भूपूर के चारों द्वारों में पूर्वादि क्रम से १६-१६ योगनियों का पूजन करे। प्रत्येक नाम के पहले ॐ तथा **पश्चात् योगिन्यै नमः** कहकर पूजन करे। यथा-

ॐ गजाननायै योगिन्यै नमः। गजानना योगिनी श्री पादुकां पूजयामि नमः। ॐ सिंहमुख्यै। गृध्रास्यायै। काकतुण्डिकायै। उष्ट्रग्रीवायै। हयग्रीवायै। वाराह्यै। शरभाननायै। उलूकिकायै। शिवारावायै। मयूर्यै। विकटाननायै। अष्टवक्त्रायै। कोटराक्ष्यै। कुब्जकायै। विकटलोचनायै। दक्षिण द्वारेः- **ॐ शुष्कोदर्य्यै योगिन्यै नमः। शुष्कोदरी योगिनी श्री पादुकां पूजयामि नमः। ललज्जिह्वायै। अश्वदंष्ट्रायै। वानराननायै। ऋक्षाक्ष्यै। केकराक्ष्यै। वृहत्तुण्डायै। सुराप्रियायै। कपालहस्तायै। रक्ताक्ष्यै। शुक्यै। श्येन्यै। कपोतिकायै। पाशहस्तायै। दण्डहस्तायै। प्रचण्डायै।** पश्चिम द्वारेः- **ॐ चण्डविक्रमायै योगिन्यै नमः। चण्डयोगिनी श्री पादुकां पूजयामि नमः। शिशुध्न्यै। पापहन्त्र्यै नमः। काल्यै। रुधिरपायिन्यै। वसाधरायायै । गर्भभक्षायै। शवहस्तायै। अन्त्रमालिन्यै। स्थूलकेशिन्यै। वृहत्कुक्ष्यै। सर्पास्यायै। प्रेतवाहनायै। दंदशूककरायै। क्रौंच्यै। मृगशीर्षायै।** उत्तरद्वारेः- **वृषाननायै योगिन्यै नमः। वृषानना योगिनी श्रीपादुकां पूजयामि नमः। वृत्तास्यायै। धूम निःश्वासायै। व्योमैकचरणायै। उर्ध्वदृशे। तापिन्यै। शोषिण्यै। दृष्ट्यै। कोटरायै। स्थूलनासिकायै। विद्युत्प्रभायै। बलाकास्यायै। मार्जार्यै। कटपूतनायै। अट्टाट्टहासायै। कामाक्ष्यै।**

अष्टमावरणम् :- (भूपूरे) अग्निकोणे- **ॐ बं बटुकाय नमः।** नैऋत्ये- **गं गणपतये नमः।** वायवे-ॐ **क्षं क्षेत्रपालाय नमः।** ईशाने - **ॐ दुं दुर्गायै नमः।**

नवमावरणम् :- (भूपूरे) **इन्द्रादि दशदिक्पालों** का पूर्वादिक्रमेण पूजन करे।

दशमावरणम् :-(भूपूरे) **इन्द्रादि के वज्रादि आयुधों** का पूजन करे।

एकादशावरणम् :- (भूपुरे) पूर्वादि चारों दिशाओं में - **ॐ वीणाय नमः। ॐ वीतताय नमः।** ॐ घनाय **नमः। ॐ सुषिराय नमः।**

इसके पश्चात् देवि की विधिवत् पूजा करे। एक लक्ष जप कर महुये के पुष्पों व समिध से दशांश होम कर तर्पण मार्जन करे। इसके प्रयोग से शाकिनी डाकिनी भूतप्रेत बाधा नहीं पहुंचा सकते। देवी साधक की समस्त इच्छाओं की पूर्ति करती हैं तथा वह मनुष्य देवतुल्य हो जाता हैं। साधक को स्त्रियों का सदैव आदर करना चाहिये। राजा, प्रजा का साधक वशीकरण करने में समर्थ हो जाता है।

४. एकोन विंशाक्षर उच्छिष्ट मातङ्गी

मंत्र - **नमः उच्छिष्ट चाण्डालि मातङ्गि सर्ववशङ्करि स्वाहा।**

विनियोगः- **अस्य मंत्रस्य नारद तुम्बुर ऋषि, सगायत्री निवृत् छंदः, मातंगी देवता, सर्वजन वशीकरणार्थे जपे विनियोगः।**

षडङ्गन्यासः- **नमः हृदयाय नमः। उच्छिष्ट शिरसे स्वाहा। चाण्डालि शिखायै वषट्। मातङ्गि कवचाय हुं। सर्ववशङ्करि नेत्रत्रयाय वौषट्। स्वाहा अस्त्राय फट्।**

कृष्णाम्बरां यावकार्द्र चरणामुन्नत स्तनीं। मुक्ता प्रवाल मालाढ्यां शङ्ख कुण्डल धारिणीम्॥

अन्य मंत्रः- **उच्छिष्ट चाण्डालि मातङ्गि सर्ववशङ्करि नमः स्वाहा।**

५. द्वात्रिंशदक्षरो मातंगी

मंत्र:- **ॐ ह्रीं ऐं श्रीं नमो भगवति उच्छिष्टचाण्डालि श्रीमातङ्गेश्वरि सर्वजन वशङ्करि स्वाहा।** अन्यत्र **''नमो''** की जगह **नमः** भी हैं।

विनियोग:- **अस्य मंत्रस्य मतंगऋषिः, अनुष्टुप् छंदः, श्रीमातङ्गी देवता, ममाभीष्टसिद्ध्यर्थे जपे विनियोगः।**

ऋष्यादिन्यास:- **मतङ्गऋषये नमः शिरसि। अनुष्टुप् छंदसे नमः मुखे। मातंगी देवतायै नमः हृदि। विनियोगाय नमः सर्वाङ्गे।**

करन्यास:- **ॐ ह्रीं ऐं श्रीं अंगुष्ठाभ्यां नमः। नमो भगवति तर्जनीभ्यां नमः। उच्छिष्ट चाण्डालि मध्यमाभ्यां नमः। श्रीमातंगेश्वरि अनामिकाभ्यां नमः। सर्वजनवशंकरि कनिष्ठिकाभ्यां नमः। स्वाहा करतल करपृष्ठाभ्यां नमः।**

षडङ्गन्यास:- **ॐ ह्रीं ऐं श्रीं हृदयाय नमः। नमो भगवति शिरसे स्वाहा। उच्छिष्टचाण्डालि शिखायै वषट्। श्रीमातंगेश्वरि कवचाय हुम्। सर्वजनवशंकरि नेत्रत्रयाय वौषट्। स्वाहा अस्त्राय फट्।**

॥ ध्यानम् ॥

घनश्यामलाङ्गीं स्थितां रत्नपीठे शुकस्योदितं शृण्वतीं रक्तवस्त्राम्।
सुरापानमत्तां सरोजस्थितां श्रीं भजे वल्लकीं वादयन्तीं मातंगीम् ॥

॥ अथ यंत्रार्चनम् ॥

भद्रमण्डल पर पीठदेवताओं का **''ॐ मं मंडूकादि परतत्त्वान्त पीठदेवताभ्यो नमः''** से पूजन करे। देवी यंत्र को शोधित कर पीठ पर रखे। भद्रपीठ में नव पीठ शक्तियों का पूजन करे। **ॐ विभूत्यै मातंग्यै नमः। ॐ उन्नत्यै मातंग्यै नमः। ॐ कांत्यै मातंग्यै नमः। ॐ सृष्ट्यै मातंग्यै नमः। ॐ कीर्त्यै मातंग्यै नमः। ॐ सन्नत्यै मातंग्यै नमः। ॐ व्युष्ट्यै मातंग्यै नमः। ॐ उत्कृष्टये मातंग्यै नमः। मध्ये- ॐ ऋद्धयै मातंग्यै नमः। ''ॐ ह्रीं सर्वशक्ति कमलासनाय नमः''** से पुष्पासन देकर यंत्र रखे।

॥ अथ आवरण पूजा प्रयोगः ॥

पुष्पांजलि लेकर देवी से आज्ञा मांगे-

ॐ संविन्मये देवि परामृतरसप्रिये। अनुज्ञां देहि मातङ्गी परिवारार्चनाय मे॥

ध्यान मंत्र से देवी का आवाहन करे।

प्रथमावरणम् :- (त्रिकोणे) **ॐ ह्रीं ऐं श्रीं रत्यै मातंग्यै नमः। ॐ ह्रीं ऐं श्रीं प्रीत्यै मातंग्यै नमः। ॐ ह्रीं ऐं श्रीं मनोभवायै मातंग्यै नमः।**

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सल। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्॥

मंत्र से पुष्पांजलि देकर अर्घ्यपात्र से बिन्दु छोड़ते हुये कहे **पूजितास्तर्पिताः सन्तु।** इस तरह प्रत्येक आवरण पूजा के बाद कहे।

द्वितीयावरणम् :- (षट्कोणे) आग्नेयादि चतुष्कोणे -**ॐ ह्रीं ऐं श्रीं हृदयाय नमः। हृदयशक्ति श्री पादुकां पूजयामि तर्पयामि नमः।** इति सर्वत्र। **नमो भगवति शिरसे स्वाहा। उच्छिष्ट चाण्डालि शिखायै वषट्। श्रीमातंगेश्वरि कवचाय हुं।** अग्रे- **सर्वजन वशङ्करि नेत्रत्रयाय वौषट्, नेत्र श्री पा.पू.।** दिक्षु- **स्वाहा अस्त्राय फट्, अस्त्र श्री पा. पू.।**

॥ मातंगी (द्वात्रिंशदक्षरो) यन्त्रम् ॥

तृतीयावरणम्:- (अष्टदले) प्रत्येक नाम के पहले "**ॐ ह्रीं ऐं श्रीं**" तथा बाद में **अमुक मातंगी पादुकां पूजामि तर्पयामि** कहे। यथा- **ॐ ह्रीं ऐं श्रीं ब्राह्मयै मातंग्यै नमः। ब्राह्मी श्री पादुकां पूजयामि नमः। माहेश्वर्यै मातंग्यै नमः कोमार्यै मातंग्यै नमः। वैष्णव्यै मातंग्यै नमः। वाराह्यै मातंग्यै नमः। इन्द्राण्यै मातंग्यै नमः। चामुण्डायै मातंग्यै नमः। महालक्ष्म्यै मातंग्यै नमः।**

चतुर्थावरणम् :- (अष्टदलाग्रे) प्रत्येक भैरव नाम के पहले **ॐ ह्रीं ऐं श्रीं** तथा बाद में **मातंग्यै नमः** बोलकर आवाहन पूजन करे। **ॐ ह्रीं ऐं श्रीं असितांग भैरवाय मातंग्यै नमः। असितांग भैरव श्री पादुकां पूजयामि तर्पयामि नमः। रुरुभैरवाय। चण्डभैरवाय। क्रोधभैरवाय। उन्मत्तभैरवाय। कपालभैरवाय। भीषणभैरवाय। संहार भैरवाय।**

पंचमावरणम् :-(षोडशदले) पूर्व की तरह नाम मंत्र पहलें **ॐ ह्रीं ऐं श्रीं** तथा पश्चात् **मातंग्यै नमः** से आवाहन पूजन करे। **ॐ ह्रीं ऐं श्रीं वामायै मातंग्यै नमः। वामा श्री पा.। जेष्ठायै। रोद्र्यै। शान्त्यै। श्रद्धायै। माहेश्वर्यै। क्रियायै। लक्ष्म्यै। सृष्ट्यै। मोहिन्यै। प्रमथायै। श्वासिन्यै। विद्युल्लतायै। सुन्दर्यै। नन्दायै। नन्दबुद्ध्यै।**

षष्ठमावरणम् :- (भूपूरे) पूर्वे- **मातंग्यै**। दक्षिणे- **महामातंग्यै**। पश्चिमे- **महालक्ष्म्यै**। उत्तरे- **सिद्ध्यै**। आग्नेयादि चारों कोणों में **ॐ विघ्नेशाय नमः। ॐ दुर्गायै नमः। ॐ वटुकाय नमः। ॐ क्षेत्रपालाय नमः।**

सप्तमावरणम् :- (भूपूरे) भूपूर में इन्द्रादि दशदिक्पालों का उनके वज्रादि आयुध सहित पूजन करे।

पुरश्चरण १० हजार जप का कहा हैं। मधुयुक्त महुये के पुष्प व समिधा से होम करें। मल्लिका पुष्प होम से योग सिद्धि। बेलपुष्प होम से राज्य प्राप्ति। पलाश पत्र व फल होम से जनवशीकरण। गिलोय होम से रोगनाश। नीम के टुकड़ों (निमित्त मात्र) व चावल से होम करने पर लक्ष्मी प्राप्ति होवे। नीम के तेल से सिक्त नमक के होम से शत्रुनाश। लवणहोम से आकर्षण। तगर व वेतस होम से जलसिद्धि। अन्न (पक्वान्न) होम से आहार सिद्धि। हरिद्रा व नमक होम से स्तंभन। गंधाष्टक होम से संसार का वशीकरण। अष्टगंध को अभिमंत्रित कर तिलक करने से जगत्प्रिय होवे। केले के फल के होम से समस्त कामनाओं की पूर्ति होती हैं। मधुसिक्त नमक से बनायी गयी पुतली को दाहिने पैर की ओर से तपाने से एवं १०८ बार में खैर की अग्नि में होम करने से शत्रु वश्य होवे।

॥ सुमुखी मातङ्गी प्रयोगः ॥

यहां दो मंत्र दिये जा रहे हैं, दोनों में **केवल ई की मात्रा का भेद** हैं परन्तु ऋषि अलग अलग हैं।

मंत्रो यथा- **१. उच्छिष्ट चाण्डालिनी सुमुखी देवी महापिशाचिनी ह्रीं ठः ठः ठः**। पुरश्चार्यार्णव में इस मंत्र के **ऋषि अज, छंद गायत्री तथा देवता सुमुखी मातंगी हैं।**

मंत्रमहार्णव में ध्यान **गुंजानिर्मितहार ....**। फेत्कारिणी तंत्र में ध्यान इस प्रकार है -

शवोपरि समासीनां रक्तांबर परिच्छदां रक्तालङ्कार संयुक्तां गुञ्जाहार विभूषिताम् ।
षोडशाब्द च युवतीं पीनोन्नत पयोधरां कपाल कर्त्रिका हस्तां परज्योतिः स्वरूपिणीम् ॥

पुरश्चरण में आठ हजार जप उच्छिष्ट मुंह से करे।

२. (मंत्र महोदधौ) **उच्छिष्ट चाण्डालिनि सुमुखि देवि महापिशाचिनि ह्रीं ठः ठः ठः।**

विनियोग:- **अस्य सुमुखि मंत्रस्य भैरव ऋषि गायत्रीश्छन्दः सुमुखि देवता ममाभीष्ट सिद्धयर्थे जपे विनियोगः।**

ऋष्यादिन्यास:-**ॐ भैरव ऋषये नमः शिरसि। गायत्रीश्छंद से नमः मुखे। सुमुखीदेवतायै नमः हृदि। विनियोगाय नमः सर्वाङ्गे।**

करन्यास:- **ॐ उच्छिष्ट चाण्डालिनि अंगुष्ठाभ्यां नमः। सुमुखि तर्जनीभ्यां नमः। देवि मध्यमाभ्यां नमः। महापिशाचिनि अनामिकाभ्यां नमः। ह्रीं कनिष्ठिकाभ्यां नमः। ठः ठः ठः करतल कर पृष्ठाभ्यां नमः।**

षडङ्गन्यास:- **उच्छिष्ट चाण्डालिनि हृदयाय नमः। सुमुखि शिरसे स्वाहा। देवि शिखायै वषट्। महापिशाचिनि कवचाय हुँ। ह्रीं नेत्रत्रयाय वौषट्। ठः ठः ठः अस्त्राय फट्।**

गुञ्जानिर्मितहार भूषित कुचां सद्यौवनोल्लसिनीं, हस्ताभ्यां नृकपाल खड्गलतिके रम्ये मुदा बिभ्रतीम्।
रक्तालंकृति वस्त्रलेपन लसद् देहप्रभां ध्यायतां, नृणां श्रीसुमुखीं शवासनगतां स्युः सर्वदा सम्पदः।

॥ यंत्रार्चनम् ॥

फेत्कारिणि तंत्र में पूर्व मंत्र वाला ध्यान दिया हैं। इसके बाद भद्रपीठ पर "**ॐ मं मण्डूकादि परतत्त्वान्त देवताभ्यो नमः**" से पीठ देवताओं का पूजन करे। अष्ट दिशाओं में - **ॐ जयायै नमः। ॐ विजयायै नमः। ॐ अजितायै नमः। ॐ अपराजितायै नमः। ॐ नित्यायै नमः। ॐ विलासिन्यै नमः। ॐ दोग्ध्र्यै नमः। ॐ अघोराय नमः।** मध्ये **ॐ मंगलायै नमः।** इन नव पीठ शक्तियों का पूजन करे।

॥ आवरण पूजा प्रयोगः ॥

सर्वतोभद्र पर पीठशक्तियों के पूजन पश्चात् स्वर्ण यंत्र का शोधन कर घी से अभ्यङ्ग कर दुग्धधारा से अग्न्युत्तारण कर "**ॐ ह्रीं सुमुखीयोग पीठात्मने नमः**" से पुष्पाद्यासन देकर पीठ मध्य में रखे। प्राणप्रतिष्ठा करे। देवी का ध्यानपूर्वक आवाहन करे। पुष्पांजलि लेकर देवि से आज्ञा मांगे।

ॐ संविन्मये परे देवि परामृतरसप्रिये। अनुज्ञां देहि सुमुखि परिवारार्चनाय मे॥

प्रथमावरणम् :- (पंचकोणे) **ॐ चन्द्रायै नमः, चन्द्रा, श्री पादुकां पूजयामि तर्पयामि नमः। इति सर्वत्र। ॐ चन्द्राननायै नमः। ॐ चारुमुख्यै नमः। ॐ चामीकरप्रभायै नमः। ॐ चतुरायै नमः।**

पुष्पांजलि देवे-

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

अर्घ्यपात्र से बिन्दु छोड़कर करे "**पूजितास्तर्पिताः सन्तु**"। इति सर्वत्र॥

द्वितीयावरणम्- हृदयादि न्यास मंत्रों से देवि की अंग पूजा करे।

तृतीयावरणम्- (अष्टदले) **ॐ ब्राह्म्यै नमः। ब्राह्मी श्री पादुकां पूजयामि॥ ॐ माहेश्वर्यै नमः। ॐ कौमार्यै नमः। ॐ वैष्णव्यै नमः। ॐ वाराह्यै नमः। ॐ इन्द्राण्यै नमः। ॐ चामुण्डायै नमः। ॐ महालक्ष्म्यै नमः।**

॥ सुमुखी यन्त्रम् ॥

महालक्ष्मी श्री पा. पू.।

चतुर्थावरणम् :- (षोडशदले) **ॐ कलायै नमः। ॐ कलानिधये नमः। ॐ काल्यै नमः। ॐ कमलायै नमः। ॐ क्रियायै नमः। ॐ कृपायै नमः। ॐ कुलायै नमः। ॐ कुलनीयै नमः। ॐ कल्याण्यै नमः। ॐ कुमार्यै नमः। ॐ कलभाषिण्यै नमः। ॐ करालाख्यायै नमः। ॐ किशोर्यै नमः। ॐ कोमलायै नमः। ॐ कुलभूषणायै नमः। ॐ कल्पदायै नमः।**

पंचमावरणम् :- (भूपूरे) इन्द्रादि दिक्पालों व उनके आयुधों का पूजन करे।

धूपदीपादि से नमस्कार पर्यन्त पूजन कर मंत्र जपे। एक लाख मंत्र जप कर पलाश, किंशुक पुष्प व समिधा से होम करे। जो इस मंत्र को जूठे मुंह दस हजार बार जपता हैं वह संपत्तिवान हो जाता हैं। जूठे मुंह ही निरंतर बलि देनी चाहिये। दही से सिक्त पीली सरसों व चावल से हवन करे तो मंत्री राजा सभी वशी होवे। बिल्ली के मांस होम से शस्त्र वशीकरण होवे। बकरे के मांस होम से धनसमृद्धि प्राप्त होवे। खीर के होम से विद्या प्राप्ति होवे। मधुयुक्त खीर तथा स्त्री के रज से युक्त वस्त्र से होम करने से जनता साधक के वश में हो जाती हैं। मधु तथा घृत युक्त पान के पत्तों के होम से महासमृद्धि प्राप्त होवे। मधु और घी के साथ तत्काल मारी गयी बिल्ली के मांस को चाण्डाल के बालों के साथ होम करने से स्त्री का आकर्षण होता हैं। मधु से युक्त खरहे के मांस से होम करने से विद्या की सिद्धि होती हैं। धत्तूरे की समिधाओं से प्रदीप्त चिता की अग्नि में कोयल और कौए के पंखों से होम करने से साधक शीघ्र ही शत्रुओं को मार देता हैं। कौए एवं उल्लू के पंखों के होम से शत्रुओं में विद्वेषण होवे। उल्लू के पंख का होम करने से सगर्भा स्त्री का गर्भपात हो जाता हैं। जो साधक घी से सिक्त बेल के हजार पत्रों से एक मास तक होम करता हैं उससे बंध्या स्त्री भी पुत्र प्राप्त करे। बन्धूक पुष्पों के होम से दुर्भगा भी सौभाग्य प्राप्त करे। वाममार्ग से देवी शीघ्र फल प्रदान करती हैं। श्मशान, चौराहा अथवा निर्जन में बलि अवश्य देनी चाहिये। सुमुखि शीघ्र फल प्रदा हैं।

बलि मंत्र :- श्री मातङ्गीश्वरि बलिं गृह्ण, गृह्ण हुं फट् स्वाहा क्षेत्रे इमं बलिं गृह्ण गृह्ण हुं फट् स्वाहा।

६. ज्येष्ठ मातंगी मंत्रा:

१. एकोन त्रिंशाक्षर ज्येष्ठ मातंगी- ऐं ह्रीं क्लीं सौः ऐं ज्येष्ठमातंगि नमामि उच्छिष्ट चाण्डालिनि त्रैलोक्यवशङ्करि स्वाहा। (हिन्दी तन्त्रसार)

२. त्रिंशाक्षर ज्येष्ठ मातङ्गी- हूं ऐं ह्रीं क्लीं सौः ऐं ज्येष्ठमातङ्गि नमामि उच्छिष्ट चाण्डालिनि त्रैलोकवशङ्करि स्वाहा।

३. एकत्रिंशाक्षर ज्येष्ठमातङ्गी- ऐं ह्रीं क्लीं सौः ऐं ज्येष्ठमातङ्गि नमामि उच्छिष्ट चाण्डालिनि त्रैलोक्यवशङ्करि स्वाहा। यह मंत्र जूठे मुंह जपना चाहिये। तंत्रदीपिनी के अनुसार न्यासादि की आवश्यकता नहीं हैं। सिद्धविद्या होने के कारण १८ हजार जप कहे। एक लाख मंत्र जप आवश्यक नहीं हैं।

ध्यान **''शवोपरि समासीनां''** सुमुखीमातंगी का करें।

७. सारिकाम्बा (चतुस्त्रिंशाक्षर) मंत्र:

मंत्र - **ॐ ऐं ह्रीं श्रीं ॐ नमो भगवति सारिके सकलकला कोविदे मम देवि बोधय बोधय स्वाहा।**

विनियोग:- **अस्य मंत्रस्य शौनक ऋषि:, अति जगती छन्द:, सारिकाम्बा देवता, ऐं बीजं, ह्रीं शक्ति:, श्रीं कीलकं, ममाभीष्टसिद्धये जपे विनियोग:।**

॥ ध्यानम् ॥

श्यामां कराम्भोरुह केलिलग्नां, सोमवतंसां श्रुतिपाठ दक्षाम् ।
विद्यातिहृद्यां विशदामुपासे, सारीं चतुष्षष्टिकल स्वरूपाम् ॥

ध्यान के अनुसार सिद्ध हैं कि इस विद्या की कृपा से साधक समस्त शास्त्रों का ज्ञाता एवं ६४ लाख कला निदान हो जाता हैं।

८. हसन्ती श्यामलाम्बा (एक चत्वारिंशाक्षर) मंत्र:

मंत्र - **ॐ ऐं ह्रीं श्रीं ॐ ह्रीं हसन्तीं हसतालापे मातङ्गि परिचारिके मम विघ्नापदां नाशं कुरु कुरु ठः ठः ठः हुं फट् स्वाहा।**

विनियोग:- (महाविद्या चतुष्टये) **अस्तयमंत्रस्य मतङ्गऋषि, अनुष्टुप् छंद:, हसन्तीश्यामलाम्बा देवता, ऐं बीजं ह्रीं शक्ति:, श्रीं कीलकं, ममाभीष्ट सिद्धये जपे विनियोग:।**

॥ ध्यानम् ॥

अंगुल्यान्तावलम्बामरुण मणिनिभां कुंचुकीं धारयन्ती कादम्बर्या कपालं नयनत्रयुता कन्दला मन्दहासा।
मेघश्यामा मृगङ्की लसित कबरिका पाणि पद्मात्तवेत्रा मातङ्गी सा हसन्ती मम भवतु सदा मंत्रविघ्नोपशान्त्यै॥

९. कर्णमातङ्गी (त्रिचत्वारिंशाक्षर) मंत्र:

मंत्र :- **ऐं नमः श्री मातङ्गि अमोघे सत्यवादिनि ममकर्णे अवतर अवतर सत्यं कथय कथय एह्येहि श्रीं मातंग्यै नमः।** पुरश्चर्मार्णव के अनुसार ''ऐं'' बीज से षडङ्गन्यास करे।

१०. वश्यमातङ्गी (सप्त चत्वारिंशाक्षर) मंत्र:

मंत्र :- **ॐ राजमुखि राजाधिमुखि वश्यमुखि ह्रीं श्रीं क्लीं देव-देवि महादेवि देवाधिदेवि सर्वजनस्य मुखं मम वशं कुरु कुरु स्वाहा।** ऋष्यादि विवरण राजमातङ्गी वत्।

११. राजमातङ्गी (चतुष्पञ्चाक्षर) मंत्र:

मंत्र :- **(१) ह्रीं नमः ब्रह्म श्रीराजिते राजपूजिते जये विजये गौर्यषे गान्धारि त्रिभुवनवशङ्करि सर्वस्त्रीपुरुष वशङ्करि सु सु दु दु घे घे वा वा स्वाहा।**

विनियोग:- **अस्य मंत्रस्य अज ऋषि निवृद्गायत्री छंदः श्रीराजमातङ्गी देवता सर्वराजपुरुषानां वशमानार्थे जपे विनियोग:।**

षडङ्गन्यास:- **ह्रां, ह्रीं, ह्रूं, ह्रैं, ह्रौं, ह्रः** से न्यास करें।

॥ ध्यानम् ॥

ध्यान में जो यंत्रोद्धार दिया है तदानुसार त्रिकोण, अष्टदल, षोडशदल एवं चार द्वारयुक्त भूपुर यंत्र बनायें।

अमृतोदधिमध्यस्थे रत्नद्वीपे मनोहरे, स्वर्णप्राकार संवीते मणिरत्न विनिर्मिते ।
कदम्बविल्वकद्वारे कल्पवृक्षोपशोभिते, वेदिमध्ये सुखास्तीर्णे रत्नसिंहासने शुभे ॥
अष्टपत्रं महापद्मं केशराढ्यं सकर्णिकं, तन्मध्ये तु त्रिकोणं स्यादष्टपत्रं ततो बहिः ।
पुनः षोडशपत्रं स्यात् तद्बाह्ये स्याच्चतुर्दलं, वेदास्त्रं स चतुर्द्वारं मण्डलं प्रोक्तमुत्तमम् ॥
तस्य मध्ये सुखासीनां श्यामवर्णां शुचिस्मितां, कदम्बमाला भरणं पूजितां च सुरासुरैः ।
प्रलम्बालक संयुक्तां चन्द्ररेखा वतंसिकां, ललाटे तिलकोपेताभीषत् प्रहसिताननाम् ॥
किञ्चित् स्वेदाम्बुमधुर ललाट फलकोज्ज्वलां, वलीतरङ्गमध्यमां रोमराजी विराजिताम् ।
सर्वाभरण संयुक्तां मुक्ताहार विभूषितां, नानामणि गणोन्नद्ध कटिसूत्रैरलंकृताम् ॥
वलयै रत्नखचितैः केयूरैर्मणिभूषितैः। भूषितां द्विभुजां बालां मदाघूर्णित लोचनाम् ।
आपीन मण्डलाभोग समुन्नत पयोधरां, प्रलम्ब वर्णाभरणां कर्णोत्तंस विराजिताम् ॥
तमालनीलां तरुणीं मधुमत्तां मतङ्गिनीं, चतुः षष्टिकलारूपां पार्श्वस्थ शुक सारिकाम् ।
कोटिबालार्क सङ्काशां जपाकुसुम सन्निभां एवं वा पीतवर्णां वा ध्यायेन्मातङ्गिनीं पराम् ॥

पुरश्चरणमें अयुत जप, मधुत्रय युक्त बंधूकपुष्पों से दशांश होम करे।

(२) राजमातंगी पञ्चाशीत्यक्षर मंत्रः- ऐं ह्रीं श्रीं ऐं ॐ नमो भगवति मातङ्गीश्वरि सर्वजन मनोहारि सर्वजन मुखरञ्जनि क्लीं सर्वराज वशङ्करि सर्वस्त्रीपुरुष वशङ्करि सर्वदुष्ट मृग वशङ्करि सर्वसत्व वशङ्करि सर्वलोकं अमुकं मे वशमानय स्वाहा। महाविद्या चतुष्टय में बीजाक्षरों में भेद हैं तथा सर्वसत्व के स्थान पर सर्वशत्रु छपा हैं तथा स्वाहा के बाद लघुश्यामा का मंत्र देने से कुछ भ्रम बनता हैं।

विनियोगः- **अस्य मंत्रस्य मतङ्गऋषि, अमित छन्द, मातंगीश्वरि देवता, ऐं बीजं, ह्रीं शक्तिः, श्रीं कीलकं, चतुर्विध पुरुषार्थ सिद्धये जपे विनियोग हैं।**

षडङ्गन्यास हेतु मंत्र के विभाग इस प्रकार हैं। **ऐं ह्रीं श्रीं ऐं ॐ नमो भगवति मातंगीश्वरि सर्वजन मनोहारि। सर्वजन मुखरञ्जनि क्लीं सर्वराजवशङ्करि सर्वस्त्रीपुरुष वशङ्करि। सर्वदुष्ट मृग वशंकरि सर्वसत्व वशङ्करि। सर्वलोकं अमुकं मे वशमानय। स्वाहा।**

॥ ध्यानम् ॥

मातङ्गीं भूषिताङ्गीं विविधमणि धरामिन्दु सूर्याक्षि युग्माम् ।
स्विद्यद् वक्त्रां कदम्ब प्रसद परिलसद् वेणुकामात्र वीणाम् ॥
बिम्बोष्ठीं रक्तवस्त्रां मृगमदतिलकामिन्दुरेखा वतंसाम् ।
कर्णोद्यच्छङ्ख पत्रां कठिनकुचभराक्रान्त मध्यां नमामि ॥

(३) राजमातंगी अष्टाशीत्यक्षर मंत्रः- ऐं ह्रीं श्रीं ॐ नमो भगवति श्रीमातङ्गीश्वरि सर्वजन मनोहारि सर्वसुखराजि सर्वमुखरञ्जिनि सर्वराज वशङ्करि सर्वस्त्रीपुरुष वशङ्करि सर्वदुष्ट मृग वशङ्करि सर्वसत्व वशङ्करि अमुकं सर्वलोकं मे वशमानय स्वाहा।

विनियोग :- (शारदा तिलके)- **अस्य मंत्रस्य दक्षिणामूर्ति ऋषिः, गायत्री छंदः, राजमातंगी देवता, ह्रीं बीजं, स्वाहा शक्तिः चतुर्विधपुरुषार्थ सिद्धये जपे विनियोगः।**

षडङ्गन्यासः- मंत्र के २४,१३,१८,१८,१३,२ अक्षरों के पद विभाग करके हृदयादि न्यास करे।

ध्यायेयं रत्नपीठे शुककल पठितं शृण्वतीं श्यामलांगीं
न्यस्तैकांघ्रि सरोजे शशिशकलधरां वल्लकीं वादयन्तीम् ।
कल्हाराबद्धमालां नियमित विलसच्चोलिकां रक्तवस्त्रां मातंगीं
शङ्खपात्रां मधुमद विवशां चित्रकोद्भासि मालाम् ॥

पुरश्चरणमें दस सहस्त्र जप त्रिमधुरयुक्त मधूकपुष्पों से दशांश होम करे।

(४) राजमातंगी एकोत्तरशताक्षर मंत्रः- ऐं ह्रीं श्रीं ऐं क्लीं सौः ॐ नमो भगवति राजमातंगीश्वरि सर्वजनमनोहारिणि सर्वमुख रञ्जनि क्लीं ह्रीं श्रीं सर्वराज वशङ्करि सर्वस्त्रीपुरुष वशङ्करि सर्वदुष्ट मृग वशंकरि सर्वसत्व वशङ्करि सर्वजनं मे वशमानय स्वाहा सौः क्लीं ऐं श्रीं ह्रीं ऐं। ध्यानादि पूर्व राज मातंगी मंत्रवत् हैं।

१२. चण्डमातंगी (पञ्चदशाक्षर) मंत्र

मंत्र - **ह्रीं नमः हिलि हिलि चण्डमातंगिनी स्वाहा।** ऋष्यादि सर्व राजमातंगी के समान हैं। यह विद्या शत्रु मानमर्दन कर शास्त्रार्थ में विजय दिलाती है।

१३. रत्नाम्बा मातंगेश्वरी (त्रयस्सप्तत्यक्षर) मंत्र

मंत्रः- **(१) ऐं क्लीं सौः ऐं ह्रीं श्रीं ॐ नमो भगवति मातङ्गेश्वरि सर्वजन मनोहरि सर्वराज वशङ्करि सर्वमुखरंजनि सर्वस्त्रीपुरुष वशङ्करि सर्वदुष्ट मृग वशङ्करि सर्वलोक वशंकरि ह्रीं श्रीं क्लीं ऐं।**

विनियोगः- **अस्य मंत्रस्य मातङ्ग ऋषिः, गायत्री छन्द, श्रीमातङ्गेश्वरी रत्नाम्बा देवता, क्लीं बीजं, ऐं शक्तिः, सौः कीलकं, चतुर्विध पुरुषार्थे, सिद्धये जपे विनियोगः।**

अम्भोजर्पित दक्षांघ्रि क्षौमां ध्यायेन्मतङ्गिनीं, लसद्वीणा लसन्नाद श्लाध्यां दीक्षित कुण्डलाम् ।
दन्तपंक्तिप्रभां रम्यां शिवां सर्वाङ्गसुन्दरीम्, कदम्बपुष्प वामाढ्यं वीणावादन तत्पराम् ॥
श्यामाङ्गीं शंखवलयां ध्यायेत् सर्वार्थसिद्धये॥

पुरश्चरण में एक लाख जप कर मधूकपुष्पों से दशांश होम करे।

(२) अष्टसप्तत्यक्षर मंत्रः- ऐं ह्रीं श्रीं ऐं क्लीं सौः ॐ नमः भगवति श्रीमातङ्गीश्वरि सर्वजनमनोहरि सर्वमुख रंजनि क्लीं ह्रीं श्रीं सर्वराज वशंकरि सर्वसत्व वशंकरि सर्वलोक वश्यंकरि अमुकं मे वशमानय स्वाहा सौः क्लीं ऐं श्रीं ह्रीं ऐं ।

विनियोगः- **अस्य मंत्रस्य महायोगी मतङ्ग ऋषिः, त्रिष्टुप् छंदः, सर्वकाम प्रदायिनी श्रीमातंगीश्वरी देवता, ऐं बीजं, ह्रीं शक्तिः श्रीं कीलकं सर्वकार्य सिद्धये जपे विनियोगः।**

षडङ्गन्यास हेतु **ऐं ह्रीं श्रीं** से सभी न्यास करे। ध्यानम् -

नीलोत्पल प्रतीकाशां नीलमेघ समप्रभाम्। महामरकत प्रख्यां नीलाम्बर विराजिताम् ।
इन्द्रनीलमणि - प्रख्यां कमलायत - लोचनाम्, वीणासक्तां महादेवीं शङ्ख - कुण्डल - धारिणीम् ॥
गानासक्तां जगद्वन्द्यां बिम्बाधर - विराजितां, सर्वालङ्कार - भूषाङ्गीं कदम्बवन - वासिनीम् ।
सर्वकामप्रदां देवीं भक्तानामभय - प्रदां, स्मितास्यां तामहं वन्दे मातङ्गीं परमेश्वरीम् ॥

नित्य १०८ बार उक्त मंत्र जप करने से साधक सभी सुखों का उपभोग कर अंत में मोक्ष को प्राप्त करता हैं।

१४. मातङ्गी गायत्री:

१. ॐ शुकप्रियायै विद्महे श्रीकामेश्वर्यै धीमहि तन्नः श्यामा प्रचोदयात्।

२. ऐं शुक्र प्रियायै विद्महे क्लीं कामेश्वरीं धीमहि तन्नः श्यामा प्रचोदयात्।

१५. वार्ताली मातंगी

ॐ नमो भगवति देवि कूष्माण्डिनि सर्वकार्य प्रसाधिनि सर्वनिमित्त प्रकाशिनि एह्येहि त्वर त्वर वरं देहि लिहि लिहि मातङ्गिनि सत्यं ब्रूहि ब्रूहि स्वाहा। उपरोक्त मंत्र के १ लाख जप करें, विल्वपुष्प फल, पलाश समिध या महुआ समिध तथा कुष्माण्डखण्ड से होम करें। रमल विद्या से ज्योतिष फलित कहने वाला इस मंत्र को जप कर पाशे डाले। जौ, गेहूं, या चावल अक्षत से फलित कहने वाले ज्योतिषी इस विद्या का स्मरण कहे तो सत्य फलित होवें। ऐसा अनुभवी विद्वानों को प्रयोगिक हैं। सिद्ध होने पर साधक को स्वप्न में प्रश्नों के उत्तर देती है।

१६. शुक मंत्र

मंत्र :- **ॐ ऐं ह्रीं श्रीं ॐ नमो भगवते धन्वन्तरये अमृतकलश हस्ताय महाशुकाय त्रिभुवनालङ्काराय राजमद मर्दनाय शीघ्रं राजानं वशमानय स्वाहा।**

विनियोग:- **अस्य मंत्रस्य शुकऋषि पंक्तिश्छंदः श्रीशुक देवता, ऐं बीजं, ह्रीं शक्तिः, श्रीं कीलकं, सर्वराज पुरुषां वशमानार्थे जपे विनियोगः।**

षडङ्गन्यास:- **ऐं, ह्रीं, श्रीं, पुनः ऐं, ह्रीं, श्रीं से अंगन्यास करें।**

निगम सहकार मूले निर्मितालवाल तार वलायन्ते।
प्रति फलितागम शाखा फल रसिकः शुकोऽस्तु मम तुष्टयै॥

१७. वीणा मंत्र

मंत्र:- **ॐ नमो भगवति वीणायै मम सङ्गीत विद्यां प्रयच्छ स्वाहा।**

विनियोग:- **अस्य मंत्रस्य मतङ्ग ऋषिः, अनुष्टुप् छंदः, श्रीवीणा देवता सवार्थ साधने जपे विनियोगः।**

॥ ध्यानम् ॥

कामगान गुणनामकल्पना कल्पशिष्य सरसी परस्परम् ।
वेणुकीं स्तनतटे विहारिणीं वल्लकीं मनसि भावयाम्यहम् ॥

१८. वेणुमंत्र :-

मंत्र :- ऐं ह्रीं श्रीं ॐ नमो भगवते वेणवे मम सङ्गीतविद्यां प्रयच्छ स्वाहा।

विनियोग के ऋषि देवता वीणा मंत्रवत् हैं।

॥ ध्यानम् ॥

वक्त्र सौरभ वशीकृतरन्ध्रो ब्रह्म वाग्वदन शीलनयुक्तः।
गानदोहन कलाकलनादो मानदो भवतु मे मणिवेणुः॥

॥ अथ मातङ्गी त्रैलोक्य मङ्गल कवचम् ॥

विनियोग :- ॐ अस्य श्रीमातङ्गी कवचस्य श्रीदक्षिणामूर्तिः ऋषिः। विराट् छन्दः। श्रीमातङ्गी देवता। चतुर्वर्ग सिद्धये पाठे विनियोगः।

ऋष्यादिन्यास :- श्रीदक्षिणा मूर्ति ऋषये नमः शिरसि। विराट् छन्दसे नमः मुखे। श्रीमातङ्गी देवतायै नमः हृदि। चतुवर्ग सिद्धये जपे विनियोगाय नमः सर्वाङ्गे।

॥ मूल कवच स्तोत्र ॥

ॐ शिरो मातङ्गिनी पातु भुवनेशी तु चक्षुषी। तोडला कर्णयुगलं त्रिपुरा वदनं मम॥
पातु कण्ठे महामाया हृदि माहेश्वरी तथा। त्रिपुष्पा पार्श्वयोः पातु गुदे कामेश्वरी मम॥
ऊरुद्वये तथा चण्डी जङ्घयोश्च हरप्रिया। महामाया पादयुग्मे सर्वाङ्गेषु कुलेश्वरी॥
अङ्गं प्रत्यङ्गकं चैव सदा रक्षतु वैष्णवी। ब्रह्मरन्ध्रे सदा रक्षेन् मातङ्गी नाम संस्थिता॥
रक्षेन्नित्यं ललाटे सा महापिशाचिनीति च। नेत्रयोः सुमुखी रक्षेत् देवी रक्षतु नासिकाम्॥
महापिशाचिनी पायान्मुखे रक्षतु सर्वदा। लज्जा रक्षतु मां दन्ताञ्चौष्ठौ सम्मार्जनी करा॥
चिबुके कण्ठदेशे च ठकार त्रितयं पुनः। सविसर्गं महादेवि! हृदयं पातु सर्वदा॥
नाभिं रक्षतु मां लोला कालिकाऽवतु लोचने। उदरे पातु चामुण्डा लिङ्गे कात्यायनी तथा॥
उग्रतारा गुदे पातु पादौ रक्षतुचाम्बिका। भुजौ रक्षतु शर्वाणी हृदयं चण्डभूषणा॥
जिह्वायां मातृका रक्षेत्पूर्वे रक्षतु पुष्टिका। विजया दक्षिणे पातु मेधा रक्षतु वारुणे॥
नैर्ऋत्ये सुदया रक्षेद् वायव्यां पातु लक्ष्मणा। ऐशान्यां रक्षेन्मां देवी मातङ्गी शुभकारिणी॥
रक्षेत् सुरेशी चाग्नेय्यां बगला पातु चोत्तरे। ऊर्ध्वं पातु महादेवी! देवानां हितकारिणी॥
पाताले पातु मां नित्यं वशिनी विश्वरूपिणी। प्रणवं च तमो माया कामबीजं च कूर्चकम्॥
मातङ्गिनी ङेयुतास्त्रं वह्निजायाऽवधिर्मनुः। सार्द्धैकादश वर्णा सा सर्वत्र पातु मां सदा॥

॥ फलश्रुति ॥

इति ते कथितं देवि! गुह्याद् गुह्यतरं परम् । त्रैलोक्य - मङ्गलं नाम कवचं देव दुर्लभम् ॥
य इदं प्रपठेन्नित्यं जायते सम्पदालयम् । परमैश्वर्यमतुलं प्राप्नुयान्नात्र संशयः ॥
गुरुमभ्यर्च्य विधिवत् कवचं प्रपठेद्यदि । ऐश्वर्यं सु कवित्वं च वाक् सिद्धिं लभते ध्रुवम् ॥
नित्यं तस्य तु मातङ्गी महिला मङ्गलं चरेत् । ब्रह्मा विष्णुश्च रुद्रश्च ये देवाः सुर सत्तमाः ॥
ब्रह्मराक्षस वेताला ग्रहाद्या भूतजातयः । तं दृष्ट्वा साधकं देवि लज्जायुक्ता भवंति ते ॥
कवचं धारयेद्यस्तु सर्वसिद्धिं लभेद् ध्रुवम् । राजानोऽपि च दासाःस्युः षट्कर्माणि च साधयेत् ॥
सिद्धो भवति सर्वत्र किमन्यैर्बहु भाषितैः । इदं कवचमज्ञात्वा मातङ्गीं यो भजेन्नरः ॥
अल्पायुर्निर्द्धनो मूर्खो भवत्येव न संशयः । गुरौ भक्तिः सदा कार्या कवचे च दृढा मतिः ॥
तस्मै मातङ्गिनी देवी सर्वसिद्धिं प्रयच्छति ॥

॥ इति नन्द्यावर्ते उत्तरखण्डे त्वरित फलदायिनी मातंगिनी कवचं समाप्तम् ॥

॥ अथ मातंगी स्तोत्रम् ॥

॥ ईश्वर उवाच ॥

आराध्य मातश्चरणाम्बुजे ते ब्रह्मादयो विस्तृतकीर्तिमापुः ।
अन्ये परं वा विभवं मुनीन्द्राः परां श्रियं भक्तिभरेण चान्ये ॥१॥
नमामि देवीं नवचन्द्रमौलेर्मातंगिनीं चन्द्रकलावतंसाम् ।
आम्नायप्राप्तिप्रतिपादितार्थं प्रबोधयंतीं प्रियमादरेण ॥२॥
विनम्रदेवासुरमौलिरत्नैर्नीराजितं ते चरणारविंदम् ।
भजंति ये देवि महीपतीनां व्रजंति ते संपदमादरेण ॥३॥
कृतार्थयंतीं पदवीं पदाभ्यामास्फालयंतीं कृतवल्लकीं ताम् ।
मातंगिनीं सद्धृदयां धिनोमि लीलांशुकां शुद्धनितम्बबिंबाम् ॥४॥
तालीदलेनार्पितकर्णभूषां माध्वीमदोद्घूर्णित नेत्रपद्माम् ।
घनस्तनीं शंभुवधूं नमामि तडिल्लता कांतिमनर्घ्यभूषाम् ॥५॥
चिरेण लक्ष्यं नवलोमराज्या स्मरामि भक्त्या जगतामधीशे ।
वलित्रयाढ्यं तव मध्यमम्ब नीलोत्पलांशु श्रियमावहंत्याः ॥६॥
कांत्या कटाक्षैः कमलाकराणां कदम्बमालाञ्चितकेशपाशाम् ।
मातङ्गकन्यां हृदि भावयामि ध्यायेयमारक्तकपोलबिंबाम् ॥७॥
बिम्बाधरन्यस्त ललामवश्यमालील लीलालकमायताक्षम् ।

मन्दस्मितं ते वदनं महेशि स्तुत्यानया शंकरधर्मपत्नीम् ॥८॥
मातंगिनीं वागधिदेवतां तां स्तुवंति ये भक्तियुता मनुष्याः ।
परां श्रियं नित्यमुपाश्रयंति परत्र कैलासतले वसन्ति ॥९॥
उद्यद्भानुमरीचिवीचिविलसद्वासो वसाना परां गौरीं संगतिपानकर्परकरामानन्द कन्दोद्भवाम् ।
गुंजाहारचलद्विहारहृदयामापीनतुंगस्तनीं मत्तस्मेरमुखीं नमामि सुमुखीं शावासनासेदुषीम् ॥१०॥

॥ इति रुद्रयामले मातंगीस्तोत्रं समाप्तम् ।

॥ अथ मातंगी शतनाम स्तोत्रम् ॥

॥ श्रीभैरव्युवाच ॥

भगवञ्छ्रोतुमिच्छामि मातंग्याः शतनामकम् । यद्गुह्यं सर्वतंत्रेषु न कस्यापि प्रकाशितम् ॥१॥

॥ श्रीभैरव उवाच ॥

शृणु देवि प्रवक्ष्यामि रहस्यातिरहस्यकम् । नाख्येयं यत्र कुत्रापि पठनीयं परात्परम् ॥२॥
यस्यैकवारपठनात्सर्वे विघ्ना उपद्रवाः । नश्यंति तत्क्षणादेवि वह्निना तूलराशिवत् ॥३॥
प्रसन्ना जायते देवि मातंगी चास्य पाठतः । सहस्रनामपठने यत्फलं परिकीर्तितम् ।
तत्कोटिगुणितं देवि नामाष्टशतकं शुभम् ॥४॥

विनियोग :- ॐ अस्य श्रीमातंगीशतनामस्तोत्रस्य भगवान्मतंग ऋषिः । अनुष्टुप्छंदः । मातंगी देवता । मातंगीप्रीतये पाठे विनियोगः ।

महामत्तमातंगिनी सिद्धिरूपा तथा योगिनी भद्रकाली रमा च ।
भवानी भयप्रीतिदा भूतियुक्ता भवाराधिता भूतिसम्पत्करी च ॥१॥
धनाधीशमाता धनागारदृष्टिर्धनेशार्चिता धीरवापी वरांगी ।
प्रकृष्टा प्रभारूपिणी कामरूपा प्रहृष्टा महाकीर्तिदा कर्णनाली ॥२॥
काराली भगा घोररूपा भगांगी भगाह्वा भगप्रीतिदा भीमरूपा ।
भवानी महाकौशिकी कोशपूर्णा किशोरी किशोरप्रिया नन्दईहा ॥३॥
महाकारणा कारणा कर्मशीला कपाली प्रसिद्धा महासिद्धखण्डा ।
मकारप्रिया मानरूपा महेशी मलोल्लासिनी लास्यलीलालयांगी ॥४॥
क्षमा क्षेमशीला क्षपाकारिणी चाक्षयप्रीतिदा भूतियुक्ता भवानी ।

भवाराधिता भूतिसत्यात्मिका च प्रभोद्भासिता भानुभास्वत्करा च ॥५॥
धराधीशमाता धनागारदृष्टिर्द्धनेशार्चिता धीवरा धीवरांगी ।
प्रकृष्टप्रभारूपिणी प्राणरूपा प्रकृष्टस्वरूपा स्वरूपप्रिया च ॥६॥
चलत्कुंडला कामिनी कांतयुक्ता कपालाचला कालकोद्धारिणी च ।
कदम्बप्रिया कोटरी कोटदेहा क्रमा कीर्तिदा कर्णरूपा च काक्ष्मीः ॥७॥
क्षमांगी क्षयप्रेमरूपा क्षया च क्षयाक्षा क्षयाह्वा क्षयप्रांतरा च ।
क्षवत्कामिनी क्षारिणी क्षीरपूर्णा शिवांगी च शाकंभरी शाकदेहा ॥८॥
महाशाकयज्ञा फलप्राशका च शकाह्वा शकाह्वाशकाख्या शका च ।
शकाक्षांतरोषा सुरोषा सुरेखा महाशेष - यज्ञोपवीतप्रिया च ॥९॥
जयंती जया जाग्रती योग्यरूपा जयांगा जपध्यानसंतुष्टसंज्ञा ।
जयप्राणरूपा जयस्वर्णदेहा जयज्वालिनी यामिनी याम्यरूपा ॥१०॥
जगन्मातृरूपा जगद्रक्षणा च स्वधावौषडंता विलम्बाविलम्बा ।
षडङ्गा महालंबरूपासिहस्ता पदाहारिणीहारिणी हारिणी च ॥११॥
महामंगला मंगलप्रेमकीर्तिर्निशुंभच्छिदा शुम्भदर्पत्वहा च ।
तथाऽनन्दबीजादिमुक्तिस्वरूपा तथा चण्डमुण्डापदा मुख्यचण्डा ॥१२॥
प्रचण्डाऽप्रचण्डा महाचण्डवेगा चलच्चामरा चामरा चन्द्रकीर्तिः ।
सुचामीकरा चित्रभूषोज्ज्वलाङ्गी सुसंगीतगीतञ्च पायादपायात् ॥१३॥

इति ते कथितं देवि नाम्नामष्टोत्तरं शतम् । गोप्यं च सर्वतंत्रेषु गोपनीयं च सर्वदा ॥१४॥
एतस्य सतताभ्यासात्साक्षाद्देवो महेश्वरः । त्रिसंध्यं च महाभक्त्या पठनीयं सुखोदयम् ॥१५॥
न तस्य दुष्करं किंचिज्जायते स्पर्शतः क्षणात् । सुकृतं यत्तदेवाप्तं तस्मादावर्त्तयेत्सदा ॥१६॥
सदैव सन्निधौ तस्य देवी वसति सादरम् । अयोगा ये त एवाग्रे सुयोगाश्च भवंति वै ।
त एव मित्रभूताश्च भवंति तत्प्रसादतः ॥१७॥
विषाणि नोपसर्प्पंति व्याधयो न स्पृशंति तान् । लूताविस्फोटकाः सर्वे शमं यांति च तत्क्षणात् ॥१८॥
जरापलितनिर्मुक्तः कल्पजीवी भवेन्नरः । अपि किं बहुनोक्तेन सान्निध्यं फलमाप्नुयात् ॥१९॥
यावन्मया पुरा प्रोक्तंफलं साहस्त्रनामकम् । तत्सर्वं लभते मर्त्यो महामायाप्रसादतः ॥२०॥

॥ इति श्रीरुद्रयामले मातंगीशतनामस्तोत्रं समाप्तम् ॥

॥ अथ मातङ्गी सहस्त्रनाम स्तोत्रम् ॥

॥ ईश्वर उवाच ॥

शृणु देवि प्रवक्ष्यामि साम्प्रतं तत्त्वतः परम् । नाम्नां सहस्त्रं परमं सुमुख्याः सिद्धये हितम् ॥१॥
सहस्त्रनामपाठी यः सर्वत्र विजयी भवेत् । पराभवो न तस्यास्ति सभायां वा महारणे ॥२॥
यथा तुष्टा भवेद्देवी सुमुखी चास्य पाठतः । तथा भवति देवेशि साधकः शिव एव सः ॥३॥
अश्वमेघसहस्त्राणि वाजपेयस्य कोटयः । सकृत्पाठेन जायंते प्रसन्ना सुमुखी भवेत् ॥४॥
मातंगोऽस्य ऋषिश्छंदोऽनुष्टुप् देवी समीरिता । सुमुखी विनियोगः स्यात्सर्वसंपत्तिहेतवे ॥५॥
एवं ध्यात्वा पठेदेतद्यदीच्छेत्सिद्धिमात्मनः ॥६॥

॥ अथ ध्यानम् ॥

देवीं षोडशवार्षिकीं शवगतां माध्वीरसाघूर्णितां श्यामांगीमरुणाम्बरां पृथुकुचां गुंजावलीशोभिताम् ।
हस्ताभ्यां दधतीं कपालममलं तीक्ष्णं तथा कर्त्रिकां ध्यायेन्मानसपङ्कजे भगवतीमुच्छिष्टचाण्डालिनीम् ॥१॥

॥ अथ स्तोत्रम् ॥

ॐ सुमुखी शेमुषी सेव्या सुरसा शशिशेखरा । समानास्या साधनी च समस्तसुरसम्मुखी ॥२॥
सर्वसम्पत्तिजननी सम्पदा सिंधुसेविनी । शम्भुसीमंतिनी सौम्या समाराध्या सुधारसा ॥३॥
सारंगासवलीवेला लावण्यवनमालिनी । वनजाक्षी वनचरी वनी वनविनोदिनी ॥४॥
वेगिनी वेगदा वेगा बगलस्था बलाधिका । काली कालप्रिया केली कामला कालकामिनी ॥५४॥
कमला कमलस्था च कमलस्था कलावती । कुलीना कुटिला कांता कोकिला कलभाषिणी ॥६॥
कीरा केलिकरा काली कपालिन्यपि कालिका । केशिनी च कशावर्ता कौशाम्भी केशवप्रिया ॥७॥
काली काशी महाकालसङ्काशा केशदायिनी । कुण्डला च कुलस्था च कुण्डलाङ्गदमंडिता ॥८॥
कुण्डपद्मा कुमुदिनी कुमुदप्रीतिवर्द्धिनी । कुण्डप्रिया कुण्डरुचिः कुरंगनयनाकुला ॥९॥
कुन्दबिम्बालिनदिनी कुसुंभकुसुमाकरा । काञ्चीकनकशोभाढ्या क्वणत्किंकिणिकाकटिः ॥१०॥
कठोरकरणा काष्ठा कौमुदी कण्ठवत्यपि । कपर्दिनी कपटिनी कठिनी कलकण्डिनी ॥११॥
कीरहस्ता कुमारी च कुरूढकुसुमप्रिया । कुंजरस्था कुंजरता कुंभी कुंभस्तनी कला ॥१२॥
कुम्भिकांगा करभोरूः कदलीकुशशायिनी । कुपिता कोटरस्था च कङ्कीला कन्दलालया ॥१३॥
कपालवासिनी केशी कम्पमानशिरोरुहा । कादम्बरी कदम्बस्था कुंकुमप्रेमधारिणी ॥१४॥
कुटुम्बिनी कृपायुक्ता क्रतुः क्रतुकरप्रिया । कात्यायनी कृत्तिका च कार्तिकी कुशवर्तिनी ॥१५॥
कामपत्नी कामदात्री कामेशी कामवन्दिता । कामरूपा कामरतिः कामाख्या ज्ञानमोहिनी ॥१६॥
खड्गिनी खेचरी खञ्जा खञ्जरीटेक्षणा खगा । खरगा खरनादा च खरस्था खेलनप्रिया ॥१७॥
खरांशुः खेलिनी खट्वा खरा खट्वांगधारिणी । खरखण्डिन्यपि ख्यातिः खण्डिता खण्डनप्रिया ॥१८॥

खण्डप्रिया खण्डखाद्या खण्डसिंधुश्च खण्डिनी । गंगा गोदावरी गौरी गौतम्यपि च गोमती ॥१९॥
गंगा गया गगनगा गारुडी गरुडध्वजा । गीता गीतप्रिया गेया गुणप्रीतिर्गुरुर्गिरी ॥२०॥
गौर्गौरी गण्डसदना गोकुला गोप्रतारिणी । गोप्ता गोविन्दिनी गूढा गूढविग्रस्तगुञ्जिनी ॥२१॥
गजगा गोपिनी गोपी गोक्षा जयप्रिया गणा । गिरिभूपालदुहिता गोगा गोकुलवासिनी ॥ २२॥
घनस्तनी घनरुचिर्घनोरुर्घन - निस्स्वना । घुङ्कारिणी घुक्षकरी घूघूकपरिवारिता ॥२३॥
घण्टानादप्रिया घण्टा घोटा घोटकवाहिनी । घोररूपा च घोरा च घृतप्रीतिर्घृताञ्जनी ॥ २४॥
घृताची घृतवृष्टिश्च घण्टाघटघटावृता । घटस्था घटना घातकरी घातनिवारिणी ॥२५॥
चंचरीकी चकोरी च चामुण्डा चीरधारिणी । चातुरी चपला चञ्चुश्चिता चिंतामणिस्थिता ॥२६॥
चातुर्वर्ण्यमयी चंचुश्चोराचार्य्या चमत्कृतिः । चक्रवर्तिवधूश्चित्रा चक्रांगी चक्रमोदिनी ॥२७॥
चेतश्चरी चित्तवृत्तिश्चेतना चेतनप्रिया । चापिनी चम्पकप्रीतिश्चण्डा चण्डालवासिनी ॥२८॥
चिरंजीविनी तच्चित्ता चिंचामूलनिवासिनी । छुरिका छत्रमध्यस्था छिन्दा छिन्दकरी छिदा ॥२९॥
छुच्छुन्दरी छलप्रीतिश्छुच्छुन्दरिनिभस्वना । छलिनी छत्रदा छिन्ना छिण्टिच्छेदकरी छटा ॥३०॥
छद्मिनी छान्दसी छाया छरुच्छन्दकरीत्यपि । जयदाजयदा जाती जायिनी जामला जतुः ॥३१॥
जम्बूप्रिया जीवनस्था जंगमा जंगमप्रिया । जपापुष्पप्रिया जप्या जगज्जीवा जगज्जनिः ॥३२॥
जगज्जंतुप्रधाना च जगजीवपरा जवा । जातिप्रिया जीवनस्था जीमूतसदृशीरुचिः ॥३३॥
जन्या जनहिता जाया जन्मभूर्जंभसी जभूः ॥३४॥
जयदा जगदावासा जायिनी ज्वरकृच्छ्रजित् । जपा च जपती जप्या जपार्हा जायिनी जना ॥३५॥
जालन्धरमयी जानुर्जालाका जाप्यभूषणा । जगज्जीवमयी जीवा जरत्कारुर्जनप्रिया ॥३६॥
जगतीजननिरता जगच्छोभाकरी जवा । जगतीत्राणकृज्जङ्घा जातीफलविनोदिनी ॥३७॥
जातीपुष्पप्रिया ज्वाला जातिहा जातिरूपिणी । जीमूतवाहनरुचिर्जीमूता जीर्णवस्त्रकृत् ॥३८॥
जीर्णवस्त्रधरा जीर्णा ज्वलती जालनाशिनी । जगत्क्षोभकरी जातिर्जगत्क्षोभविनाशिनी ॥३९॥
जनापवादा जीवा च जननी गृहवासिनी । जनानुरागा जानुस्था जलवासा जलार्तिकृत् ॥४०॥
जलजा जलवेला च जलचक्रनिवासिनी । जलमुक्ता जलारोहा जलसा जलजेक्षणा ॥४१॥
जलप्रिया जलौका च जलशोभावती तथा । जलविस्फूर्जितवपुर्ज्वलत्पावकशोभिनी ॥४२॥
झिञ्झा झिल्लमयी झिञ्झाझणत्कारकरी जया । झंझी झंपकरी झंपा झंपत्रासनिवारिणी ॥४३॥
टंकारस्था टंककरी टंकारकरणांहसा । टंकारोट्टकृतष्ठीवा डिण्डीरवसनावृता ॥४४॥
डाकिनी डामरी चैव डिण्डिमध्वनिनादिनी । डकारनिस्स्वनरुचिस्तपिनी तापिनी तथा ॥४५॥
तरुणी तुन्दिला तुन्दा तामसी च तमः प्रिया । ताम्रा तामवती तंतुस्तुन्दिलातुलसंभवा ॥४६॥
तुलाकोटिसुवेगा च तुल्यकामा तुलाश्रया । तुदनी तुननी तुम्बी तुलाकाला तुलाश्रवा ॥४७॥

तुमुला तुलजा तुल्या तुलादानकरी तथा । तुल्यवेगा तुल्यगतिस्तुला-कोटिनिनादिनी ॥४८॥
ताम्रौष्ठा ताम्रपर्णी च तमःसंक्षोभकारिणी । त्वरिता ज्वरहा तीरा तारकेशी तमालिनी ॥४९॥
तमोदानवती ताम्रतालस्थानवती तमी । तामसी च तमिस्त्रा च तीव्रा तीव्रपराक्रमा ॥५०॥
तटस्था तिलतैलाक्ता तरुणी तपनद्युतिः । तिलोत्तमा च तिलकृत्तारकाधीशशेखरा ॥५१॥
तिलपुष्पप्रिया तारा तारकेशी कुटुम्बिनी । स्थाणुपत्नी स्थिरकरी स्थूलसम्पद्विवर्द्धिनी ॥५२॥
स्थितिः स्थैर्यस्थविष्ठा च स्थपतिःस्थूलविग्रहा । स्थूलस्थलवती स्थाली स्थलसंगविवर्द्धिनी ॥५३॥

दण्डिनी दंतिनी दामा दरिद्रां दीनवत्सला ।
देवी देववधूर्द्दित्या दामिनी देवभूषणा ।
दयादमवती दीनवत्सला दाडिमस्तनी ॥५४॥
देवमूर्तिकरा दैत्या दारिणी देवतानता ।
दोलाक्रीडा दयालुश्च दम्पती देवतामयी ।
दशादीपस्थिता दोषा दोषहा दोषकारिणी ॥५५॥

दुर्गा दुर्गार्तिशमनी दुर्गम्या दुर्गवासिनी । दुर्गन्धनाशिनी दुःस्था दुःखप्रशमकारिणी ॥५६॥
दुर्गंधा दुन्दुभिध्वांता दूरस्था दूरवासिनी । दरदा दरदात्री च दुर्व्याधदयिता दमी ॥५७॥
धुरंधरा धुरीणा च धौरेयी धनदायिनी । धीरारवा धरित्री च धर्मदा धीरमानसा ॥५८॥
धनुर्द्धरा च धमनी धमनीधूर्तविग्रहा । धूम्रवर्णा धूम्रपाना धूमला धूममोदिनी ॥५९॥
नन्दिनीनन्दिनी नन्दा नन्दिनी नन्दबालिका । नवीना नर्मदा नर्मनेमिर्नियमनिस्स्वना ॥६०॥
निर्मला निगमाधारा निम्नगा नग्नकामिनी । नीला निरत्ना निर्वाणा निर्लोभा निर्गुणा नतिः ॥६१॥
नीलग्रीवा निरीहा च निरञ्जनजनानवा । निर्गुण्डिका च निर्गुण्डा निर्नासा नासिकाभिधा ॥६२॥
पताकिनी पताका च पत्रप्रीतिः पयस्विनी । पीना पीनस्तनी पत्नी पवनाशा निशामयी ॥६३॥
परा परपरा काली पारकृत्यभुजप्रिया । पवनस्था च पवना पवनप्रीतिवर्द्धिनी ॥६४॥
पशुवृद्धिकरी पुष्पपोषिका पुष्टिवर्द्धिनी । पुष्पिणी पुस्तककरा पूर्णिमाऽतलवासिनी ॥६५॥
पेशी पाशकरी पाशा पांशुहा पांशुला पशुः । पटुः पराशा परशुधारिणी पाशिनी तथा ॥६६॥
पापघ्नी पतिपत्नी च पतिता पतितापनी । पिशाची च पिशाचघ्नी पिशिताशनतोषिणी ॥६७॥
पानदा पानपात्री च पानदानकरोद्यता । पेया प्रसिद्धा पीयूषा पूर्णा पूर्णमनोरथा ॥६८॥
पतंगाभा पतंगा च पौनः पुन्यमिवापरा । पङ्किला पंकमग्ना च पानीया पञ्जरस्थिता ॥६९॥
पञ्चमी पञ्चयज्ञा च पञ्चता पञ्चमप्रिया । पिचुमन्दा पुण्डरीका पिकी पिंगललोचना ॥७०॥
प्रियंगुमञ्जरी पिण्डी पण्डिता पाण्डुरप्रभा । प्रेतासना प्रियालस्था पाण्डुघ्नी पीनसापहा ॥७१॥
फलिनी फलदात्री च फलश्रीः फलभूषणा । फूत्कारकारिणी स्फारी फुल्ला फुल्लाम्बुजानना ॥७२॥
स्फुलिंगहा स्फीतमतिः स्फीतकीर्तिकरी तथा । बलमाया बलारातिर्बलिनी बलवर्द्धिनी ॥७३॥

वेणुवाद्या वनचरी विरिञ्चिजनयित्र्यपि । विद्याप्रदा महाविद्या बोधिनी बोधदायिनी ॥७४॥
बुद्धमाता च बुद्धा च वनमालावती वरा । वरदा वारुणी वीणा वीणावादनतत्परा ॥७५॥
विनोदिनी विनोदस्था वैष्णवी विष्णुवल्लभा । वैद्या वैद्यचिकित्सा च विवशा विश्वविश्रुता ॥७६॥
विद्यौघविह्वला वेला वित्तदा विगतज्वरा । विरावा विवरीकारा बिम्बोष्ठी बिम्बवत्सला ॥७७॥
विंध्यस्था वरवंद्या च वीरस्थानवरा च वित् । वेदांतवेद्या विजया विजया विजयप्रदा ॥७८॥
विरोगिवन्दिनी वंध्या वंद्यबधनिवारिणी । भगिनी भगमाला च भवानी भवनाशिनी ॥७९॥
भीमा भीमाननाभीमा भंगुरा भीमदर्शना । भिल्ली भिल्लधरा भीरुर्भरुण्डा भीर्भयावहा ॥८०॥
भगसर्पिण्यपि भगा भगरूपा भगालया । भगासना भगाभोगा भेरीझङ्काररञ्जिता ॥८१॥
भीषणा भीषणारावा भगवत्यहिभूषणा । भारद्वाजा भोगदात्री भूतिघ्नी भूतिभूषणा ॥८२॥
भूमिदा भूमिदात्री च भूपतिर्भरदायिनी । भ्रमरी भ्रामरी भाला भूपालकुलसंस्थिता ॥८३॥
माता मनोहरा माया मानिनी मोहिनी मही । महालक्ष्मीर्मदक्षीबा मदिरा मदिरालया ॥८४॥
मदोद्धता मतंगस्था माधवी मधुमर्द्दिनी । मोदा मोदकरी मेधा मेध्या मध्याधिपस्थिता ॥८५॥
मद्यपा मांसलोमस्था मोदिनी मैथुनोद्यता । मूर्द्धावती महामाया मायामहिममन्दिरा ॥८६॥
महामाला महाविद्या महामारी महेश्वरी । महादेववधूर्मान्या मथुरा मेरुमण्डिता ॥८७॥
मेदस्विनी मिलिन्दाक्षी महिषासुरमर्द्दिनी । मण्डलस्था भगस्था च मदिरारागगर्विता ॥८८॥
मोक्षदा मुण्डमाला च माला मालविलासिनी । मातंगिनी च मातंगी मातंगतनयापि च ॥८९॥
मधुस्रवा मधुरसा बंधूककुसुमप्रिया । यामिनी यामिनीनाथभूषा यावकरञ्जिता ॥९०॥
यवांकुरप्रिया यामा यवनी यवनार्द्दिनी । यमघ्नी यमकल्पा च यजमानस्वरूपिणी ॥९१॥
यज्ञा यज्ञयजुर्यक्षी यशोनिष्कंपकारिणी । यक्षिणी यक्षजननी यशोदायासधारिणी ॥९२॥
यशस्सूत्रपदा यामा यज्ञकर्मकरीत्यपि । यशस्विनी यकारस्था यूपस्तंभनिवासिनी ॥९३॥
रंजिता राजपत्नी च रमा रेखा रवीरणा । रजोवती रजश्चित्रा रंजनी रजनीपतिः ॥९४॥
रोगिणी रजनी राज्ञो राज्यदा राज्यवर्द्धिनी । राजन्वती राजनीतिस्तथा रजतवासिनी ॥९५॥
रमणी रमणीया च रामा रामावती रतिः । रेतोरती रतोत्साहा रोगघ्नी रोगकारिणी ॥९६॥
रंगा रंगवती रागा रागज्ञा रागकृद्दया । रामिका रजकी रेवा रजनी रंगलोचना ॥९७॥
रक्तचर्मधरा रंगी रंगस्था रंगवाहिनी । रमा रंभाफलप्रीती रंभोरू राघवप्रिया ॥९८॥
रंगा रंगांगमधुरा रोदसी च महारवा । रोगकृद्रोगहंत्री च रोगभृद्रोगस्राविणी ॥९९॥
बन्दी बन्दिस्तुता बन्धुर्बन्धूककुसुमाधरा । वंदिता वंद्यमाना च वैद्रावी वेदविद्विधा ॥१००॥
विकोपा विकपाला च विकस्था विङ्कवत्सला । वेदिर्विलग्नलग्ना च विधिविङ्ककरी विधा ॥१०१॥
शङ्खिनी शङ्खवलया शंखमालावती शमी । शंखपात्राशिनी शंखस्वना शंखगला शशी ॥१०२॥

शबरी शांबरी शंभुः शंभुकेशा शरासिनी । शवा श्येनवती श्यामा श्यामांगी श्यामलोचना ॥१०३॥
श्मशानस्था श्मशाना च श्मशानस्थानभूषणा । शमदा शमहंत्री च शंखिनी शंखरोषणा ॥१०४॥
शांतिः शांतिप्रदा शेषा शेषाख्या शेषशायिनी । शेमुषी शोषिंणी शेषा शौर्य्या शौर्य्यशरा शरी ॥१०५॥
शापदा शापहा शापा शापपंथाः सदाशिवा । भंगिणी भंगिपलभुक् शङ्करी शांकरी शिवा ॥१०६॥
शवस्था शवभुक् शांता शवकर्णा शवोदरी । शाविनी शवशिंशा श्रीः शवा च शवशायिनी ॥१०७॥
शवकुण्डलिनी शैवा शीकरा शिशिराशना । शवकाञ्ची शवश्रीका शवमाला शवाकृतिः ॥१०८॥
स्रवंती सङ्ग्चा शक्तिः शंतनुः शवदायिनी । सिंधुः सरस्वती सिंधुः सुंदरी सुन्दरानना ॥१०९॥
साधुः सिद्धिप्रदात्री च सिद्धा सिद्धसरस्वती । संततिः सम्पदा संविच्छंकिसम्पत्तिदायिनी ॥११०॥
सपत्नी सरसा सारा सारस्वतकरी सुधा । सुरा समांसाशना च समाराध्या समस्तदा ॥१११॥
समधीः सामदा सीमा संमोहा समदर्शना । सामतिः सामदा सीमा सावित्री सविधा सती ॥११२॥
सवना सवनासारा सवरा सावरा समी । सिमरा सतता साध्वी सध्रीची ससहायिनी ॥११३॥
हंसी हंसगतिर्हंसी हंसोज्वलनिचोलयुक् । हलिनी हालिनी हाला हलश्रीर्हरवल्लभा ॥११४॥
हला हलवती ह्वेषा हेला हर्षविवर्द्धिनी । हंतिर्हंता हया हाहाहताऽहंतातिकारिणी ॥११५॥
हंकारी हंकृतिर्हंका हीहीहाहाहिता हिता । हीतिर्हेमप्रदा हारा राविणी हरिसम्मता ॥११६॥
होरा होत्री होलिका च होमा होमहविर्हविः । हारिणी हरिणीनेत्रा हिमाचलनिवासिनी ॥११७॥
लम्बोदरी लम्बकर्णा लम्बिका लम्बविग्रहा । लीला लीलावती लोला ललना ललिता लता ॥११८॥
ललामलोचना लोम्या लोलाक्षीसत्कुलालया । लपत्नी लपती लम्या लोपामुद्रा ललंतिका ॥११९॥
लतिका लंघिनी लंघा लालिमा लघुमध्यमा । लघीयसी लघूदर्य्या लूता लूताविनाशिनी ॥१२०॥
लोमशा लोमलम्बी च ललंती च लुलुम्पती । लुलायस्था च लहरी लङ्कापुरपुरंदरा ॥१२१॥
लक्ष्मीर्लक्ष्मीप्रदाऽलभ्या लाक्षाक्षी लुलितप्रभा । क्षणा क्षणक्षुः क्षुत्क्षीणी क्षमा क्षांतिः क्षमावती ॥१२२॥
क्षमा क्षामोदरी क्षेम्या क्षोभभृत्क्षत्रियांगना । क्षया क्षयकरी क्षीरा क्षीरदा क्षीरसागरा ॥१२३॥
क्षेमंकरी क्षयकरी क्षयकृत्क्षयदा क्षतिः । क्षुद्रिकाऽक्षुद्रिका क्षुद्रा क्षुत्क्षामा क्षीणपातका ॥१२४॥
मातुः सहस्रनामेदं सुमुख्याः सिद्धिदायकम् । यः पठेत्प्रयतो नित्यं स एव स्यान्महेश्वरः ॥१२५॥
अनाचारात्पठेन्नित्यं दरिद्रो धनवान्भवेत् । मूकः स्याद्वाक्पतिर्द्देवि रोगी नीरोगतां व्रजेत् ॥१२६॥
पुत्रार्थी पुत्रमाप्नोति त्रिषु लोकेषु विश्रुतम् । वंध्यापि सूते सत्पुत्रं विदुषः सदृशं गुरोः ॥१२७॥
सत्यं च बहुधा भूयाद्गावश्च बहुदुग्धदाः । राजानः पादनम्राः स्युस्तस्य हासा इव स्फुटाः ॥१२८॥
अरयः संक्षयं यांति मनसा संस्मृता अपि । दर्शनादेव जायंते नरा नार्य्योऽपि तद्वशाः ॥१२९॥
कर्ता हर्ता स्वयं वीरो जायते नात्र संशयः । यं यं कामयते कामं तं तं प्राप्नोति निश्चितम् ॥१३०॥
दुरितं न च तस्यास्ति नास्ति शोकः कथंचन । चतुष्पथेऽर्द्धरात्रे च यः पठेत्साधकोत्तमः ॥१३१॥

एकाकी निर्भयो वीरो दशवारं स्तवोत्तमम् । मनसा चिंतितं कार्यं तस्य सिद्ध्येन्नसंशयः ॥१३२॥
विना सहस्त्रनाम्नां यो जपेन्मंत्रं कदाचन । न सिद्धिर्जायते तस्य कल्पकोटिशतैरपि ॥१३३॥
कुजवारे श्मशाने वा मध्याह्ने यो जपेत्सदा । कृतकृत्यः स जायेत कर्ता हर्ता नृणामिह ॥१३४॥
रोगार्तोऽर्द्धनिशायां यः पठेदासनसंस्थितः । सद्यो नीरोगतामेति यदि स्यान्निर्भयस्तदा ॥१३५॥
अर्द्धरात्रे श्मशाने वा शनिवारे जपेन्मनुम् । अष्टोत्तरसहस्त्रं तु दशवारं जपेत्ततः ॥१३६॥
सहस्त्रनाम चैतद्धि तदा याति स्वयं शिवा । महापवनरूपेण घोरगोमायुनादिनी ॥१३७॥
ततो यदि न भीतिः स्यात्तदा देहीति वाग्भवेत् । तदा पशुबलिं दद्यात्स्वयं गृह्णाति चण्डिका ॥१३८॥
यथेष्टं च वरं दत्त्वा प्रयाति सुमुखी शिवा । रोचनागरुकस्तूरीकर्पूरैश्च सचन्दनैः ॥१३९॥
कुंकुमेन दिने श्रेष्ठे लिखित्वा भूर्जपत्रके । शुभनक्षत्रयोगे च कृतमारुतसत्क्रियः ॥१४०॥
कृत्वा सम्पातनविधिं धारयेद्दक्षिणे करे । सहस्त्रनाम स्वर्णस्थं कण्ठे वां विजितेन्द्रियः ॥१४१॥
तदा यं प्रणमेन्मंत्री क्रुद्धः स म्रियते नरः । दुष्टश्वापदजंतूनां न भीः कुत्रापि जायते ॥१४२॥
बालकानामियं रक्षा गर्भिणीनामपि प्रिये । मोहनस्तंभनाकर्षमारणोच्चाटनानि च ॥१४३॥
यंत्रधारणतो नूनं जायंते साधकस्य तु । नीलवस्त्रे विलिख्यैतत्तद्ध्वजे स्थापयेद्यदि ॥१४४॥
तदा नष्टा भवत्येव प्रचण्डाप्यरिवाहिनी । एतज्जप्तं महाभस्म ललाटे यदि धारयेत् ॥१४५॥
तद्विलोकन एव स्युः प्राणिनस्तस्य किंकराः । राजपत्न्योऽपि विवशाः किमन्याः पुरयोषितः ॥१४६॥
एतज्जप्तं पिबेत्तोयं मासेन स्यान्महाकविः । पण्डितश्च महावादी जायते नात्र संशयः ॥१४७॥
अयुतं च पठेत्स्तोत्रं पुरश्चरणसिद्धये । दशांशं कमलैर्हुत्वा त्रिमध्वाक्तैर्विधानतः ॥१४८॥
स्वयमायाति कमला वाण्या सह तदालये । मंत्रो निष्कील तामेति सुमुखी सुमुखी भवेत् ॥१४९॥
अनंतं च भवेत्पुण्यमपुण्यं च क्षयं वज्रेत् । पुष्करादिषु तीर्थेषु स्नानतो यत्फलं भवेत् ॥१५०॥
तत्फलं लभते जंतुः सुमुख्याः स्तोत्रपाठतः । एतदुक्तं रहस्यं ते स्वसर्वस्वं वरानने ॥१५१॥
न प्रकाश्यं त्वया देवि यदि सिद्धिं त्वमिच्छसि । प्रकाशनादसिद्धिः स्यात्कुपिता सुमुखी भवेत् ॥१५२॥
नातः परतरं लोके सिद्धिदं प्राणिनामिह ॥१५३॥

वन्दे श्रीसुमुखीं प्रसन्नवदनां पूर्णेन्दुविम्बाननां, सिन्दूरांकितमस्तकां मधुमदोल्लोलोच्चमुक्तावलीम् ।
श्यामां कज्जलिकाकरां करगतं चाध्यापयंतीं शुकं, गुंजापुंजविभूषणां सकरुणामामुक्तवेणीलताम् ॥१५४॥

॥ इति श्रीनन्द्यावर्ततंत्रे उत्तरखण्डे मातंगीसहस्त्रनाम स्तोत्रं सम्पूर्णम् ॥

॥ इति श्री मातंगी तंत्रं सम्पूर्णम् ॥

॥ श्री कमला तंत्रम् ॥

दशमहाविद्याओं के अन्तर्गत कमला महाविद्या का दसवां स्थान है। सिद्धविद्यात्रयी में कमला को तीसरा स्थान प्राप्त है। कमला की उपासना दक्षिण और वाम दोनों मार्गों से होती है। इसके अधिष्ठाता का नाम सदाशिव-विष्णु है। कमला षड्ऐश्वर्य की अधिष्ठात्री है।

मंत्र की सफलता साधक की श्रद्धा व नियमोपासना पर निर्भर है। प्रारब्ध के कारण फल विलंब से भी प्राप्त हो सकता है। एक डाक्टर साहब ऋण समस्या से ग्रस्त थे मंत्र में अशुद्ध उच्चारण के भय से उसे एकाक्षरी मंत्र '**श्रीं**' के १२ लाख जप करने को कहा। १०० माला नित्य के हिसाब से ४ महिने में जप पूरा हुआ। उन्होने होम विषय में पूछा तो मैंने उनकी विपरीत परिस्थिति देखकर कहा कि ताम्र या लोह पात्र में "**श्रीं स्वाहा**" से यथा शक्ति १-२ किलो घी से होम कर लेना। दूसरे दिन डाक्टर साहब आँखों पर पट्टी बाँधकर आये तो उन्होने कहा कि रात्रि को कमरे के बाहर से वेल्डिंग की तरह की तेज रोशनी आ रहीं थी मैं भय के मारे बाहर नहीं निकल सका, गर्दन झुका रखी तो भी रोशनी से आँखे जैसे कच्ची हो गई। शान्ति स्तोत्र का पाठ किया १-२ दिन में आँखे ठीक हो गई परन्तु प्रारब्ध के कारण कुछ समय शेष था सो २ महिने बाद उनकी समस्या का निदान हुआ जबकि ऐसे अच्छे दृष्टान्त का अर्थ है कि कार्य शीघ्र सफल होना चाहिऐ।

एकाक्षर मंत्र- "श्रीं" ।

विनियोगः- **अस्य श्री कमला एकाक्षर मंत्रस्य भृगु ऋषिः, निवृद् गायत्री छन्दः, श्री लक्ष्मी देवता ममाभीष्ट सिद्ध्यर्थे जपे विनियोगः।**

अंगन्यासः- **श्रां हृदयाय नमः। श्रीं शिरसे स्वाहा। श्रूं शिखायै वषट्। श्रैं कवचाय हुं। श्रौं नेत्रत्रयाय वौषट्। श्रः अस्त्राय फट्।** इसी तरह करन्यास करें।

ध्यानम्-

कान्त्या कांचनसन्निभा हिमगिरि प्रख्यैश्चतुर्भिर्गजैः । हस्तोत्क्षिप्त हिरण्याऽमृत घटैरासिच्यमानां श्रियम् । विभ्राणां वरमब्जयुतमभयं हस्तैः किरोटोज्ज्वलाम् क्षौमाबद्ध नितम्बबिम्बललितां वन्देऽरविन्द स्थिताम्॥

१२ लाख जप करके घृत, मधु, शर्करायुत पद्म-तिल बिल्वफलों से होम करें।

द्व्यक्षर साम्राज्य लक्ष्मी मंत्रः- स्ह्क्लीं हं।

विनियोगः- **अस्य मंत्रस्य हरि ऋषिः, गायत्री छन्दः, साम्राज्यदा मोहिनी लक्ष्मी देवता, स्ह्क्लीं बीजं, श्रीं शक्तिं, ममाभीष्ट सिद्ध्यर्थे जपे विनियोगः।**

श्रां, श्रीं, श्रूं, श्रैं, श्रः से षड्ङ्गन्यास करें।

त्र्यक्षर साम्राज्य लक्ष्मी मंत्रः- १. श्रीं क्लीं श्रीं। इसके ऋषिन्यास एकाक्षरी मंत्र की तरह है।

२. **श्रीं स्हक्ल्हीं श्रीं।** इसका विनियोग तथा ध्यान द्वयक्षर मंत्रवत् है।

षडङ्गन्यास- आं, ईं, ऊं, ऐं, औं, अः, से षडङ्गन्यास करें।

अतशीपुष्य सङ्काशा रत्नभूषणभूषितां शङ्खचक्रगदा- पद्मशार्ङ्ग- बाणधरां करैः। षड्भिः कराभ्यां देवेशीं वरदाभय शोभितां एवमष्टभुजां लक्ष्मीं नौमि साम्राज्यदायिनीम् ॥

चतुरक्षर मंत्रः- (१) ऐं श्रीं ह्रीं क्लीं (हिन्दी तंत्रसारे)- ऋष्यादि एकाक्षरी मंत्रवत् है।

॥ ध्यानम् ॥

माणिक्य प्रतिमप्रभां हिमनिभैस्तुङ्गैश्चतुर्भिर्गजैः, हस्तग्राहित रत्नकुंभ सलिलैरासिञ्च्यमानां मुदा । हस्ताब्जैर्वरदानम्बुज युगाभीतिर्दधानां हरेः, कान्तां कांक्षित परिजात लतिकां वन्दे सरोजसनाम् ॥

(२) मंत्र- **ऐं ह्रीं श्रीं क्लीं (मेरु तंत्रोक्त) ऋषि भृगु, छन्द निवृत्पूर्वमनुष्टुप्, देवता कमला है।**

आसिच्यमाना रत्नाभा पद्मस्था पद्मलोचना ।
पद्मद्वयं च हस्तेषु बिभ्रती नृपसेविता ॥

पञ्चाक्षर मंत्र- श्रीं क्लीं श्रीं नमः।

सप्ताक्षर रमा मंत्रः - नमः ब्रह्मतनये ।

ऋषि, ध्यान, एकाक्षर मंत्रवत् है। अंगन्यास हेतु दोनों पदों से तीन-तीन आवृत्ति करें।

॥ अथ यंत्रपूजा विधानम् ॥

उपरोक्त सभी मंत्रों की यंत्र पूजा एकाक्षरी मंत्रवत् समान है।

यंत्रोद्धार- षट्कोण, अष्टदल एवं भूपूर बनायें। सर्वतोभद्रमण्डल बनाकर उस पर पीठ पूजा कर यंत्र स्थापित करें।

॥ श्री कमला यन्त्रम् ॥

पीठ पूजा- **ॐ मण्डूकादि परतत्वांत पीठ देवताभ्यो नमः।** अष्ट दिशाओं में पीठ शक्तियों का पूजन करें। **ॐ विभूत्यै नमः। ॐ उन्मन्यै नमः। ॐ कान्त्यै नमः। ॐ सृष्ट्यै नमः। ॐ कीर्त्यै नमः। ॐ सन्नत्यै नमः। ॐ पुष्ट्यै नमः। ॐ उत्कृष्ट्यै नमः। मध्ये- ॐ ऋद्ध्यै नमः।**

यंत्र पर देवता हेतु आसन प्रदान करें पुष्प चढ़ावें '' **ॐ कमलासनाय नमः** '' प्रधान देवता का आवाहन करें पूजन करें यंत्रावरण देवताओं का गंधाक्षत पुष्प से पूजन एवं तर्पण करें तथा नाम के बाद **श्रीपादुकां पूजयामि तर्पयामि** कहें। चतुर्थी से आवाहन करे, तथा प्रथमा से पूजन तर्पण करें। यथा-

प्रथमावरण- (षट्कोण केसरेषु)- **ॐ श्रां हृदयाय नमः** - अग्निकोणे। **ॐ श्रीं शिरसे स्वाहा** - नैर्ऋत्ये। **ॐ श्रूं शिखायै वषट्**

- वायव्ये। **ॐ श्रैं कवचाय हुं** - ऐशान्ये। **ॐ श्रौं नेत्रत्रयाय वौषट्** - अग्रे। **ॐ श्रः अस्त्राय फट्**- **देवी** पश्चिमे।

प्रत्येक आवरण के बाद आवरण का नाम लेते हुए पुष्पांजलि देवें।

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सले । भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

"**पूजिताः स्तर्पिताः सन्तुः**" कहकर जल छोड़े। इति सर्वत्र॥

द्वितीयावरणम्- (अष्टदले)- पूर्वे- **ॐ वासुदेवाय नमः। वासुदेव श्रीपादुकां पूजयामि तर्पयामि। इति सर्वत्र॥** दक्षिणे-**ॐ संकर्षणाय नमः**। पश्चिमे- **ॐ प्रद्युम्नाय नमः**। उत्तरे- **ॐ अनिरुद्धाय नमः**। आग्नेये- **ॐ दमकाय नमः**। नैर्ऋत्ये- **ॐ सलिलाय नमः**। वायव्ये- **ॐ गुग्गुलाय नमः**। ऐशान्ये- **ॐ करुंटकाय नमः**। देव्या दक्षिणे- **ॐ शंखनिधये नमः। ॐ वसुधायै नमः**। देव्या वामे- **ॐ पद्मनिधये नमः। ॐ वसुमत्यै नमः**।

तृतीयावरणम्- (अष्टदलाग्रे)-पूर्वादि क्रमेण- **ॐ बलाक्यै नमः। ॐ विमलायै नमः। ॐ कमलायै नमः। ॐ वनमालिकायै नमः। ॐ विभिषिकायै नमः। ॐ मालिकायै नमः। ॐ शांकर्य्यै नमः। ॐ वसुमालिकायै नमः।**

चतुर्थावरणम्- (भूपूरे)- **ॐ लं इन्द्राय नमः** पूर्वे। **ॐ रं अग्नये नमः** आग्नेये। **ॐ मं यमाय नमः** दक्षिणे। **ॐ क्षं निर्ऋतये नमः** नैर्ऋत्ये। **ॐ वं वरुणाय नमः** पश्चिमे। **ॐ यं वायवे नमः** वायव्ये। **ॐ कुं कुबेराय नमः** उत्तरे। **ॐ हं ईशानाय नमः ऐशान्ये**। ईशानपूर्वयोर्मध्ये- **ॐ आं ब्रह्मणे नमः**। निर्ऋति पश्चिमयोर्मध्ये- **ॐ ह्रीं अनंताय नमः।**

पंचमावरणम्- (भूपूरे)- दिक्पालों के पास उनके आयुधों का पूजन करें। **ॐ वज्राय नमः। ॐ शक्तये नमः। ॐ दण्डाय नमः। ॐ खड्गाय नमः। ॐ पाशाय नमः। ॐ अंकुशाय नमः। ॐ गदायै नमः। ॐ त्रिशूलाय नमः। ॐ पद्माय नमः। ॐ चक्राय नमः।**

पूजन तर्पण कर पुष्पांजलि देवें।

॥ नवाक्षर सिद्धि लक्ष्मी मंत्र ॥

मंत्र - **ॐ ह्रीं हूं हां ग्रें क्षों क्रों नमः।**

विनियोगः- **अस्य मंत्रस्य नारद ऋषिः, गायत्री छन्दः, सिद्धि लक्ष्मी देवता, ह्रीं बीजं, हूं शक्तिः, क्रों कीलकं, सर्वार्थसाधने जपे विनियोगः।**

श्रां, श्रीं, श्रूं, श्रैं, श्रौं, श्रः से षडङ्गन्यास करें।

श्वेतां श्वेतश्वारूढां नृमुण्डकृतकुण्डलां । पञ्चवक्त्रां महारौद्रीं प्रतिवक्त्रं त्रिलोचनाम् ॥
व्याघ्रचर्मावृतकटीं शुष्कावयव-भूषितां । आबद्धयोगपट्टां च नरास्थिकृत-भूषणाम् ॥
हस्तैः षोडशाभिर्दीप्तां विस्त्रस्त-घनकुन्तलां । खड्गं बाणं तथा शूलं चक्रं शक्तिं गदामपि ॥
जपमालां कर्तृकां च विभ्रतीं दक्षिणेर्भुजैः । फलकं कार्मुकं नागपाशं परशुमेव च ॥
डमरुं फेरु-पोतं च नरमुण्डकपालकं । उद्वहन्तीं करैर्वामै दीर्घ सर्वाङ्गभूषणाम् ॥

॥ दशाक्षरी कमला मंत्र ॥

मंत्र - 'श्रीः' १. मंत्रः- नमः कमलवासिन्यै स्वाहा।

विनियोगः- **अस्य मंत्रस्य दक्ष ऋषिः, विराट् छन्दः, श्री लक्ष्मी देवता, सर्वेष्टसिद्धये जपे विनियोगः।**

ऋष्यादि न्यासः- **दक्ष ऋषये नमः शिरसि। विराट् छन्दसे नमः मुखे। श्रियै देवतायै नमः हृदि। विनियोगाय नमः सर्वाङ्गे।**

करन्यासः- **ॐ देव्यै नमोऽगुष्ठाभ्यां। ॐ पद्मिन्यै नमः तर्जनीभ्यां। ॐ विष्णुपत्न्यै नमो मध्यमाभ्यां। ॐ वरदायै नमोऽनामिकाभ्यां। ॐ कमलायै नमः कनिष्ठिकाभ्यां।**

षडङ्गन्यासः- इन्हीं मंत्रों से नेत्रन्यास के अलावा अन्य न्यास करें।

आसीना सरसीरुहे स्मितमुखी हस्ताम्बुजै र्बिभ्रती दानं पद्मयुगाभये च वपुषा सौदामिनी सन्निभा ।
मुक्ताहार-विराजमान पृथुलोत्तुङ्गस्तनोद् भासिनी पायाद् वः कमला कटाक्ष विभवैरानन्दयन्ती हरिम् ॥

अन्य मंत्रः- २. ॐ क्लीं श्रौं श्रीं लक्ष्मी देव्यै नमः।

॥ यंत्रार्चनम् ॥

यंत्रोद्धार- षट्कोण, अष्टदल एवं भूपूर बनायें। पीठपूजा व पीठ शक्तियों का पूजन कर यंत्र स्थापित कर मूल देवता का आवाहन कर आवरण पूजा करें।

प्रथमावरणम् :- (षट्कोणे)- **ॐ देव्यै नमो हृदयाय नमः**, अग्निकोणे। **ॐ पद्मिन्यै नमः शिरसे स्वाहा**, नैर्ऋत्ये। **ॐ विष्णुपत्न्यै नमः शिखायै वषट्**, वायवे। **ॐ वरदायै नमः कवचाय हुं** ऐशान्ये। देवीपश्चिमे - **ॐ कमलरूपायै नमोऽस्त्राय फट्।**

द्वितीयावरणम्- (अष्टदले)- पूर्वादि क्रमेण- ॐ बलाक्यै नमः .... **इत्यादि सभी देवता एवं भूपूर में तृतीय-चतुर्थावरण** पूजन एकाक्षरी मंत्र की यंत्रवत् पूजा करें।

॥ एकादशाक्षर सिद्ध लक्ष्मी मंत्र ॥

मंत्र - **ॐ श्रीं ह्रीं क्लीं श्रीं सिद्ध लक्ष्म्यै नमः।**

विनियोगः- **अस्य मंत्रस्य हिरण्यगर्भ ऋषिः, अनुष्टुप् छन्दः, श्रीमहाकाली महालक्ष्मी महासरस्वती देवता, श्रीं बीजं, ह्रीं शक्तिः, क्लीं कीलकं, सर्वक्लेश पीड़ा परिहारार्थं सर्वदुःख-दारिद्रयनाशार्थं च सर्वकार्य सिद्ध्यर्थे** जपे **विनियोगः।**

षडङ्गन्यासः- **श्रीं हृदयाय नमः। ह्रीं शिरसे स्वाहा। क्लीं शिखायै वषट्। श्रीं कवचाय हुं। सिद्धलक्ष्म्यै नेत्रत्रयाय वौषट्। नमः अस्त्राय फट्।**

॥ ध्यानम् ॥

ब्राह्मीं च वैष्णवीं भद्रां षड्भुजां च चतुर्मुखीं, त्रिनेत्रां खड्गशूलाभी पद्मचक्रगदा-धराम् ।
पीताम्बरधरां देवीं नानालंकार भूषितां, तेजपुञ्जधरीं श्रेष्ठीं ध्यायेद् बालकुमारिकाम् ॥

॥ एकादशाक्षर लक्ष्मी मंत्रः ॥

मंत्र - **यौं नौं मौं नमः ऐं श्रियै श्रीं नमः। (मेरुतंत्रे)**

विनियोगः- **अस्य मंत्रस्य जमदग्नि ऋषिः, त्रिष्टुप् छन्दः, श्रीरमा देवता, सर्वाभीष्ट सिद्धये जपे विनियोगः।**

षडङ्गन्यासः- **यौं नौं मौं नमः ऐं हृदयाय नमः। यौं नौं मौं नमः ऐं शिरसे स्वाहा। यौं नौं मौं नमः ऐं शिखायै वषट्। यौं नौं मौं नमः ऐं कवचाय हुं। श्रियै नमः नमः नेत्रत्रयाय वौषट्। श्रीं नमः अस्त्राय फट्।**

ध्यान- २७ अक्षरात्मक मंत्र के अनुसार करें। सात रात्रियों में नित्य १२ हजार जप करें।

॥ द्वादशाक्षर महालक्ष्मी मंत्रः ॥

मंत्र - **ऐं ह्रीं श्रीं क्लीं सौः (ह्सौः) जगत्प्रसूत्यै नमः।**

शारदातिलक में पाँचवा बीज **सौः** है। हिन्दीतंत्रसार के अनुसार **ह्सौः** तथा मेरुतंत्र के अनुसार पांचवां बीज **ह्स्रौः** है

विनियोगः- **अस्यमंत्रस्य ब्रह्मा ऋषिः, गायत्रीश्छन्दः, श्रीमहालक्ष्मी देवता, श्रीं बीजम्, सर्वाभीष्ट सिद्ध्यर्थं जपे विनियोगः।**

करन्यासः- **ऐं। ह्रीं। श्रीं। क्लीं। सौः। जगत्प्रसूत्यै नमः।** से क्रमशः करन्यास करें।

षडङ्गन्यासः- **ॐ ऐं ज्ञानाय हृदयाय नमः। ॐ ह्रीं ऐश्वर्याय शिरसे स्वाहा। ॐ श्रीं शक्तये शिखायै वषट्। ॐ क्लीं बलाय कवचाय हुं। ॐ सौः (ह्सौः) वीर्याय नेत्रत्रयाय वौषट्। ॐ जगत्प्रसूत्यै नमस्तेजसे अस्त्राय फट्।** इसी तरह करन्यास करें।

वर्णन्यासः- **ऐं नमः मूर्ध्नि। ह्रीं नमः मुखे। श्रीं नमः हृदये। क्लीं नमः गुह्ये। सौः नमः पादयोः।**

पश्चात् हृदय पर हाथ रखकर न्यास करें- **जं नमः त्वचि। गत् नमः रक्ते। प्रं नमः मांसे। सूं नमः मेदसि। त्यैं नमः अस्थिनि। नं नमः मज्जायाम्। मं नमः शुक्रे।**

॥ ध्यानम् ॥

बालाऽर्कद्युतिमिन्दुखण्ड विलसत् कोटिरहारोज्ज्वलाम् ।
रत्नाकल्प विभूषितां कुचनतां शालेः करैर्मञ्जरीम् ॥
पद्मं कौस्तुभ रत्नमप्यविरतं संविभ्रतीं सस्मिताम् ।
फुल्लाम्भोज विलोचन त्रययुतां ध्यायेत् परामम्बिकाम् ॥

॥ यंत्रार्चनम् ॥

यंत्रोद्धार- षट्कोण, अष्टकोण एवं भूपूर बनायें। सर्वतोभद्र पीठ पर पीठ देवता एवं नवपीठशक्तियों का अर्चन करें। प्रधानदेव का यंत्र मध्य में आवाहन करें। यंत्र के देवताओं का गंधाक्षत पुष्पों से पूजन कर तर्पण करें।

प्रथमावरणम्- देव्या दक्षिणे- **ॐ शंकरनन्दनाय नमः। ॐ शंकरनंदन श्री पादुकां पूजयामि तर्पयामि नमः।** देव्या वामे- **ॐ पुष्पधन्वने नमः। ॐ पुष्पधन्व श्री पादुकां पू. त.॥ इति सर्वत्र॥** प्रत्येक आवरण के बाद पुष्पाञ्जलि देवें।

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सले । भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

पूजितास्तर्पिताः सन्तुः कहकर विशेषार्घ पात्र से जल छोड़े। इति सर्वत्र॥

द्वितीयावरणम्- (षट्कोणे)- **ऐं ज्ञानाय हृदयाय नमः** अग्निकोणे। **ह्रीं ऐश्वर्याय शिरसे स्वाहा** नैर्ऋत्ये। **श्रीं शक्तये शिखायै वौषट्** वायव्ये। **क्लीं बलाय कवचाय हुँ** ऐशान्ये। **सौः वीर्याय नेत्रत्रयाय वौषट्** देवाग्रे। देव्या पश्चिमे- **जगत्प्रसूत्यै नमस्तेजसे अस्त्राय फट्।**

तृतीयावरणम्-(अष्टदले)- पूर्वादि क्रमेण- **ॐ उमायै नमः। ॐ श्रियै नमः। ॐ सरस्वत्यै नम। ॐ दुर्गायै नमः। ॐ धरण्यै नमः। ॐ गायत्र्यै नमः। ॐ देव्यै नमः। ॐ उषायै नमः।**

चतुर्थावरणम्-(देव्या दक्षिणे) **ॐ जह्नुसुतायै नमः। ॐ शंखनिधये नमः।** देव्या वामे- **ॐ सूर्यसुतायै नमः। ॐ पद्मनिधये नमः।**

पश्चिमे **धृतातपत्रं वरुणं** पूजयित्वा। पुष्पांजलिं दद्यात्।

पंचमावरणम्-(अष्टदलाग्रेषु)- पूर्वादिक्रमेण- **ॐ सूर्याय नमः। ॐ सोमाय नमः। ॐ भौमाय नमः। ॐ बुधाय नमः। ॐ बृहस्पतये नमः। ॐ शुक्राय नमः। ॐ शनैश्चराय नमः। ॐ राहवे नमः। ॐ केतवे नमः।**

षष्ठावरणम् - (भूपूर एवं अष्टदल अभ्यंतरे) पूर्वादिक्रमेण- **ॐ ऐरावताय नमः। ॐ पुंडरीकाय नमः। ॐ वामनाय नमः। ॐ कुमुदाय नमः। ॐ अंजनाय नमः। ॐ पुष्पदंताय नमः। ॐ सर्वभौमाय नमः। ॐ सुप्रतीकाय नमः।**

सप्तमावरण में भूपूर में इन्द्रादि दशदिक्पालों का एवं अष्टमावरण में उनके आयुधों का पूजन करें।

॥ काम्य प्रयोगः ॥

एक लक्ष जप करें। तिल, त्रिमधु, श्रीफल, बिल्वफल, एवं कमल के होम से श्रीवृद्धि। दूर्वा, गुडूची, आज्य होम से आयुवृद्धि। शालीहोम पुष्प-लक्ष्मीवल्ली (विल्वकाष्ठ) तथा सर्षप होम से लक्ष्मी प्राप्ति होवें। मरीची-जीरा, नारिकेल, गुडौदक, आज्यपक्वान्न के होम से राज्य लाभ। नागवल्ली भस्म से तिलक करने से वशीकरण। ब्राह्मण ब्रह्मवृक्ष (पलाश) की समिद्-पुष्पों से, वैश्य रक्तपुष्प व राजा जातीपुष्प से होम करें। शूद्र नीलपुष्प से होम करें। यंत्र मध्य में कलश स्थापित कर उसमें शतौषधियाँ डाले। यंत्रार्चन कर अभिषेक करने से सभी बाधाऐं दूर होवें। संतान की प्राप्ति होवें।

॥ इति द्वादशाक्षर मंत्र प्रयोगः॥

त्रयोदशाक्षर महालक्ष्मी मंत्रः-(१) **ॐ ऐं ह्रीं श्रीं क्लीं सौः जगत्प्रसूत्यै नमः।** (शारदायाम्)। (२) **ॐ ऐं ह्रीं श्रीं क्लीं ह्सौः जगत्प्रसूत्यै नमः।** (तंत्रसारे)। (३) **ॐ ऐं ह्रीं श्रीं क्लीं ह्स्रौः जगत्प्रसूत्यै नमः।** (मेरुतंत्रे)।

विनियोगः- **अस्य मंत्रस्य भृगु ऋषिः, निवृत् छन्दः, श्री देवता, श्रीं बीजम्, सर्वाभीष्ट सिद्धये जपे विनियोगः।**

चतुर्दशाक्षर लक्ष्मी हृदय मंत्रः- ॐ शुद्धवाससे नमो महाश्रियै नमः।

चतुर्दशाक्षर पद्मप्रभा लक्ष्मी मंत्रः- पद्मप्रभे पद्मसुन्दरि पद्मेशि स्वाहा।

दोनों मंत्रों के ऋष्यादि ध्यान एकाक्षरी मंत्रवत् है।

षोडशाक्षर सिद्धि लक्ष्मी मंत्रः- ह्रीं हूं फ्रें ह्सौः ह्रीं क्रों फ्रें स्त्रीं श्रीं हों जूं ब्लौं व्रीं स्वाहा।

ऋष्यादि नवाक्षर मंत्रवत् है।

॥ ध्यानम् ॥

खट्वाङ्गांऽकुश पाशशूलवरकृद्भीत्राण - पात्रं शिरः
कुंभासि ज्वलितोद्भटैर्भुज-वैराभासमानां शिवाम् ।
रुद्रस्कंधगतां शरच्छशिनिभां पञ्चाननां सुन्दरीम्
पञ्चत्र्यक्ष विराजितां भगवतीं श्रीसिद्धलक्ष्मीं भजे ॥

॥ सप्तविंशाक्षर महालक्ष्मी मंत्र प्रयोगः॥

मंत्र - ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः।

विनियोगः- **अस्य मंत्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीमहालक्ष्मीर्देवता, श्रीं बीजम्, नमः शक्तिः, सर्वेष्टसिद्धये जपे विनियोगः।**

ऋष्यादि न्यासः- **ब्रह्म ऋषये नमः शिरसि। गायत्री च्छन्दसे नमः मुखे। श्रीमहालक्ष्मी देवतायै नमः हृदि। श्रीं बीजाय नमः गुह्ये। नमः शक्तये नमः पादयोः। विनियोगाय नमः सर्वाङ्गे।**

अङ्गन्यासः- मंत्र के पहिले सर्वत्र आदि व अन्त में "**ॐ श्रीं ह्रीं श्रीं**" जोड़कर न्यास करें।

मंत्र	करन्यासः	षडङ्गन्यासः
कमले	**अंगुष्ठाभ्यां नमः।**	**हृदयाय नमः।**
कमलालये	**तर्जनीभ्यां नमः।**	**शिरसे स्वाहा।**
प्रसीद	**मध्यमाभ्यां नमः।**	**शिखायै वषट्।**
प्रसीद	**अनामिकाभ्यां नमः।**	**कवचाय हुँ।**
महालक्ष्म्यै नमः	**कनिष्ठिकाभ्यां नमः।**	**अस्त्राय फट्।**

(यहाँ नेत्र न्यास का अभाव है)

॥ ध्यानम् ॥

सिन्दूरारुणकान्तिमब्ज वसतिं सौन्दर्यवारां निधिं कोटीराङ्गदहारकुण्डल कटीसूत्रादिभिर्भूषिताम् ॥
हस्ताब्जैर्वसुपात्रमब्जयुगलादर्शौ वहन्तीं परामावीतां परिचारिकाभिरनिशं ध्यायेत् प्रियां शार्ङ्गिणः ॥

॥ यंत्रार्चनम् ॥

(पीठ पूजा एकाक्षरी मंत्रवत्)

यंत्रोद्धार-षट्कोण अष्टदल एवं भूपूर युक्त यंत्र बनायें। यंत्र की पीठ पूजा एकाक्षरी मंत्रवत् करें। पश्चात् प्रधान देव का आवाहन करें।

प्रथमावरणम्-(षट्कोणे) अग्निकोणे- **ॐ श्रीं ह्रीं श्रीं कमले श्रीं ह्रीं श्रीं हृदयाय नमः।** निर्ऋतिकोणे- **ॐ श्रीं ह्रीं श्रीं कमलालये श्रीं ह्रीं श्रीं शिरसे स्वाहा।** वायव्ये- **ॐ श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं शिखायै वषट्।** ऐशान्याम्- **ॐ श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं कवचाय हुम्।**

देवी पश्चिमे- **ॐ श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः, श्रीं ह्रीं श्रीं अस्त्राय फट्।**

इति पंचाङ्गानि पूजयेत्। पुष्पांजलिमादाय-

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सले । भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

पूजिताः तर्पिताः सन्तुः कहकर जल छोड़े।

॥ श्री महालक्ष्मी यन्त्रम् ॥

द्वितीयावरणम् – (अष्टदलेषु)– पूर्वादिक्रमेण– **ॐ श्रीधराय नमः। श्रीधर श्रीपादुकां पूजयामि तर्पयामि नमः॥** इति सर्वत्र॥ **ॐ हृषीकेशाय नमः। ॐ वैकुण्ठाय नमः। ॐ विश्वरूपाय नमः। ॐ वासुदेवाय नमः। ॐ संकर्षणाय नमः। ॐ प्रद्युम्नाय नमः। ॐ अनिरुद्धाय नमः।**

तृतीयावरणम् – (अष्टदलमध्येषु) पूर्वादिक्रमेण– **ॐ भारत्यै नमः। ॐ पार्वत्यै नमः। ॐ चान्द्र्यै नमः। ॐ शच्यै नमः। ॐ दमकायै नमः। ॐ सलिलाय नमः। ॐ गुग्गुलवे नमः। ॐ कुरुण्टकाय नमः।**

चतुर्थावरणम्– (अष्टदलाग्रेषु) पूर्वादिक्रमेण– **ॐ अनुरागाय महालक्ष्मीवाणाय नमः। ॐ संवादाय महालक्ष्मीवाणाय नमः। ॐ विजयाय महालक्ष्मीवाणाय नमः। ॐ वल्लभाय महालक्ष्मीवाणाय नमः। ॐ मदाय महालक्ष्मीवाणाय नमः। ॐ हर्षाय महालक्ष्मीवाणाय नमः। ॐ बलाय महालक्ष्मीवाणाय नमः। ॐ तेजसे महालक्ष्मीवाणाय नमः।**

पंचमावरणम्–(भूपूरे) पूर्वादिक्रमेण– **पूर्वे– इन्द्राय नमः। अग्नेये नमः। यमाय नमः। नैर्ऋत्यै नमः। वरुणाय नमः। वायवे नमः। कुबेराय नमः। ईशानाय नमः। ईशानपूर्वयोर्मध्ये– ॐ ब्रह्मणे नमः। नैर्ऋत्यपश्चिमयोर्मध्ये– अनन्ताय नमः।**

षष्ठमावरणम् – (भूपूरे) लोकपालों के समीप में आयुध पूजन करें। **वज्राय नमः। शक्तये नमः। दण्डाय नमः। खड्गाय नमः। पाशाय नमः। अंकुशाय नमः। गदायै नमः। त्रिशूलाय नमः। पद्माय नमः। चक्राय नमः।**

धूप, दीप नीराजन कर जपादि प्रयोग करें। होमद्रव्य एकाक्षरी व द्वादशाक्षर मंत्रवत् है।

॥ वसुधा लक्ष्मी मंत्र प्रयोगः॥

अष्टाविंशाक्षर मंत्रः– **ॐ ग्लौं श्रीं अन्नं मह्यन्नं मे देह्यन्नधिपतये ममान्नं प्रदापय स्वाहा श्रीं ग्लौं ॐ।**

विनियोगः– **अस्य मंत्रस्य ब्रह्मा ऋषिः, निचृद् गायत्री छन्दः, वसुधा श्री देवता, ग्लौं बीजम्, श्रीं शक्तिः, ममाभीष्ट प्राप्त्यै जपे विनियोगः।**

मंत्र	करन्यासः	पञ्चाङ्गन्यासः
ॐ अन्नं महि ग्लां श्रीं	**अंगुष्ठाभ्यां नमः।**	**हृदयाय नमः।**
ॐ अन्नं मे देहि ग्लीं श्रीं	**तर्जनीभ्यां नमः।**	**शिरसे स्वाहा।**
ॐ अन्नाधिपतये ग्लूं श्रीं	**मध्यमाभ्यां नमः।**	**शिखायै वषट्।**
ममान्न प्रदापय ग्लैं श्रीं	**अनामिकाभ्यां नमः।**	**कवचाय हुँ।**
स्वाहा ग्लौं श्रीं	**कनिष्ठिकाभ्यां नमः।**	**अस्त्राय फट्।**

॥ यंत्रार्चनम् ॥

॥ ध्यानम् ॥

कल्पाद्रुमाधो मणिवेदिकायां समास्थिते वस्त्रविभूषणाढ्ये ।
भूमिश्रियौ वाञ्छितवामदक्षे संचिंतयेद् देवमुनीन्द्रवंद्ये ॥

यंत्रोद्धार- षट्कोण, अष्टदल एवं भूपूर बनायें। सर्वतोभद्र मण्डल पर पीठ देवता व पीठ शक्तियों का आवाहन कर यंत्र स्थापित करें।

ॐ मं मण्डूकादि परतत्वांत पीठ देवताभ्यो नमः। पूर्वादि क्रमेण- **ॐ विमलायै नमः। ॐ उत्कर्षिण्यै नमः। ॐ ज्ञानायै नमः। ॐ क्रियायै नमः। ॐ योगायै नमः। ॐ प्रह्वायै नमः। ॐ सत्यायै नमः। ॐ ईशानाय नमः।** मध्ये- **ॐ अनुग्रहायै नमः।**

प्रत्येक नामावलि का गंधपुष्पाक्षत् से अर्चन कर तर्पण करते हुयें प्रथमा नाम सम्बोधन पूर्वक कहें- **अमुकीं पादुकां पूजयामि तर्पयामि नमः।**

पुष्पांजलि प्रदान कर आवरण पूजा की आज्ञा माँगे।

ॐ सविन्मये परे देवि परामृतरसप्रिये । अनुज्ञां देहि वसुधे परिवारार्चनाय मे ॥

ध्यान पूर्वक मूल देवता का आवाहन करें।

प्रथमावरणम् - (षट्कोणे) **ॐ अन्नं महि ग्लां श्रीं हृदयाय नमः** अग्निकोणे। **ॐअन्नं मे देहि ग्लीं श्रीं शिरसे स्वाहा** नैर्ऋत्ये। **ॐ अन्नाधिपतये ग्लूं श्रीं शिखायै वषट्** वायव्ये। **ॐ ममान्नं प्रदापय ग्लैं श्रीं कवचाय हुं** ऐशान्ये। **ॐ स्वाहा ग्लौं श्रीं अस्त्राय फट्** देवी पश्चिमे।

पुष्पांजलि- **ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सले । भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥**

पूजितास्तर्पिताः सन्तुः कहकर जल छोड़ें। इति सर्वत्र॥

द्वितीयावरणम् - (अष्टदले) पूर्वादिक्रमेण- **ॐ पृथिव्यै नमः पूर्वे। ॐ अग्नये नमः दक्षिणे। ॐ जलाय नमः पश्चिमे। ॐ मारुताय नमः उत्तरे। ॐ निवृत्यै नमः आग्नेये। ॐ प्रतिष्ठायै नमः नैर्ऋत्ये। ॐ विद्यायै नमः वायवे। ॐ शांत्यै नमः ऐशान्ये।**

तृतीयावरणम् - (अष्टदलाग्रेषु) पूर्वादिक्रमेण- **ॐ बलाकायै नमः। ॐ विमलायै नमः। ॐ कमलायै नमः। ॐ वनमालायै नमः। ॐ विभीषायै नमः। ॐ मालिकायै नमः। ॐ शांकर्यै नमः। ॐ वसुमालिकायै नमः।**

चतुर्थावरण - में इन्द्रादि लोकपालों एवं पञ्चमावरण में उनके आयुधों का पूजन करें। धूप दीपादि अर्चन कर नीराजन करें।

॥ काम्य प्रयोगः ॥

एक लक्ष जप करें। उसका दशांश कुबेर मंत्र के जप करें। पश्चात् मूल मंत्र का दशांश होम करें। तिल, बिल्वपत्र, बिल्वफल, पायस, तिलाज्य से हवन करें। वटवृक्ष की समिद् से कुबेर हेतु होम करें तो बहुअन्नसंपदा प्राप्त करें। **अग्नि मध्ये कुबेरं तु चिंतयेद्।**

कुबेर मंत्र - ॐ वैश्रवणाय स्वाहा।

॥ ध्यानम् ॥

धनपूर्णं स्वर्णकुंभं तथा रत्नकरंडकम् । हस्ताभ्यां विप्लुतं खर्वकरपादं च तुंदिलम् ॥

॥ अथ त्रयोविंशत्यक्षर लक्ष्मी मंत्रः ॥

मंत्र – **(प्राकृत ग्रंथे) ॐ श्रीं ह्रीं क्लीं श्रीं लक्ष्मीरागच्छाऽगच्छ मम मन्दिरे तिष्ठ तिष्ठ स्वाहा।**

इस मंत्र का नित्य १०८ बार जप करे तो लक्ष्मी प्रसन्न होकर द्रव्य प्रदान करती है।

॥ ज्येष्ठा लक्ष्मी मंत्र प्रयोगः ॥

पुराणों में ज्येष्ठा लक्ष्मी को दुःख दरिद्रता की अधिष्ठात्री माना है इसके निवास को क्लेश कारक माना है परन्तु यहाँ ध्यान मंत्र में इसका स्वरूप कुंभ-धनपात्र युक्त कमल पर विराजमान कहा है। अतः **साधक को मंत्र जप करते समय भावना करनी चाहियें कि क्लेश, चिन्ता, दुःख, दरिद्रता हमारे घर से विदा हो रहे है** एवं लक्ष्मी जी हमें धन धान्य तथा अभय प्रदान कर रही है। भाद्रपद शुक्ला अष्टमी- ज्येष्ठा नक्षत्र को इसकी पूजा का विशेष महत्व है।

मंत्र महोदधि में वसुधा लक्ष्मी के विनियोग में भी **ज्येष्ठा लक्ष्मी मंत्रस्य**.....प्रयुक्त किया गया है।

मंत्र- **ऐं ह्रीं श्रीं ज्येष्ठालक्ष्मि स्वयंभुवे ह्रीं ज्येष्ठायै नमः।**

विनियोगः- **अस्य ज्येष्ठालक्ष्मी मंत्रस्य ब्रह्मा ऋषिः, अष्टिश्छन्दः, ज्येष्ठालक्ष्मी देवता, ह्रीं बीजम्, श्रीं शक्तिः, ममाभीष्ट सिद्ध्यर्थे जपे विनियोगः।**

ऋष्यादि न्यासः- **ब्रह्मऋषये नमः शिरसि। अष्टिच्छन्दसे नमो मुखे। ज्येष्ठालक्ष्मी देवतायै नमः हृदि। ह्रीं बीजाय नमः लिङ्गे। श्रीं शक्तये नमः पादयोः। विनियोगाय नमः सर्वाङ्गे।**

मंत्र	करन्यासः	अङ्गन्यासः
ऐं ह्रीं श्रीं	**अंगुष्ठाभ्यां नमः।**	**हृदयाय नमः।**
ज्येष्ठालक्ष्मि	**तर्जनीभ्यां नमः।**	**शिरसे स्वाहा।**
स्वयंभुवे	**मध्यमाभ्यां नमः।**	**शिखायै वषट्।**
ह्रीं	**अनामिकाभ्यां नमः।**	**कवचाय हुँ।**
ज्येष्ठायै	**कनिष्ठिकाभ्यां नमः।**	**नेत्रत्रयाय वौषट्।**
नमः	**करतलकर पृष्ठाभ्यां नमः।**	**अस्त्राय फट्।**

उद्यद्भास्करसन्निभा स्मितमुखी रक्ताम्बरालेपना
सत्कुंभं धनभाजनं सृणिमथो पाशं करैर्बिभ्रती ।
पद्मस्था कमलेक्षणा दृढकुचा सौन्दर्य्य वारांनिधि-
र्ध्यातव्या सकलाभिलाष फलदा श्रीज्येष्ठालक्ष्मीरियम् ॥

॥ यंत्रार्चनम् ॥

यंत्रोद्धार - षट्कोण, अष्टदल एवं भूपूर युक्त यंत्र बनायें। सर्वतोभद्रमण्डल पर पीठ देवता व पीठ शक्तियों का पूजन करें। **ॐ मं मण्डूकादि परतत्वांत पीठदेवताभ्यो नमः।**

पीठ शक्तियों का पूर्वादि क्रम से पूजन करें- **ॐ लोहिताक्ष्यै नमः। ॐ विरूपायै नमः। ॐ करात्यै नमः। ॐ नीललोहितायै नमः। ॐ समदायै नमः। ॐ वारुण्यै नमः। ॐ पुष्ट्यै नमः। ॐ अमोघायै नमः। मध्ये- ॐ विश्वमोहिन्यै नमः।**

प्रधान देवता का आवाहन करें। यंत्रावरण पूजा में चतुर्थी से आवाहन कर नामावली के बाद प्रथमा से गंधाक्षत पुष्प से पूजन करते हुए **पादुकां पूजयामि तर्पयामि नमः** कहते हुए तर्पण करें।

प्रथमावरणम् - (षट्कोणे)- **ऐं ह्रीं श्रीं हृदयाय नमः** आग्नेये। **ज्येष्ठालक्ष्मि शिरसे स्वाहा** नैर्ऋत्ये। **स्वयंभुवे शिखायै वषट्** वायवे। **ह्रीं कवचाय हुँ ऐशान्ये। ज्येष्ठायै नेत्रत्रयाय वौषट्** अग्रे। **नमः अस्त्राय फट्** देवी पश्चिमे। पुष्पाञ्जलि- **ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सले । भक्त्यासमर्पये तुभ्यं प्रथमावरणार्चनम् ॥**

पूजिताः तर्पिताः सन्तु कहकर जल छोड़े॥ इति सर्वत्र॥

द्वितीयावरणम् -(अष्टदले) पूर्वादिक्रमेण- **ॐ ब्राह्म्यै नमः। ॐ माहेश्वर्यै नमः। ॐ कौमार्यै नमः। ॐ वैष्णव्यै नमः। ॐ वाराह्यै नमः। ॐ इन्द्राण्यै नमः। ॐ चामुण्डायै नमः। ॐ महालक्ष्म्यै नमः।**

तृतीयावरणम् - में भूपूर में इन्द्रादिलोकपालों का एवं चतुर्थावरणम् में उनके वज्रादि आयुधों का पूजन करें। धूप, दीप नैवेद्यादि अर्पण कर नीराजन कर पुष्पांजलि देवें।

ज्येष्ठा गायत्री मंत्रः- ॐ रक्तज्येष्ठायै विद्महे नील ज्येष्ठायै धीमहि तन्नो लक्ष्मीः प्रचोदयात्।

॥ अथ श्रीसूक्त प्रयोग विधानम् ॥

विनियोगः- **ॐ हिरण्यवर्णामिति पंचदशर्चस्य श्री सूक्तस्य आनंद कर्दम चिक्लीत श्रीपुत्रेभ्यो ऋषयाः, श्रीविभावसुभ्यां-श्रीरग्निर्देवता, आद्यास्तिस्त्रोऽनुष्टुण्, चतुर्थी वृहती, पंचमी षष्ठ्यो त्रिष्टुभौ ततौष्टावनुष्टुभः अन्त्या प्रस्तार पंक्तिछन्दाः, हिरण्यवर्णामिति बीजम्, तामावह जातवेद इति शक्तिः, कीर्तिमृद्धिं ददातु मे कीलकम्, ममगृहे श्रीमहालक्ष्मी वर प्रसाद सिद्ध्यर्थे जपे च विनियोगः।**

ऋष्यादि न्यासः- **आनंद कर्दम चिक्लीत श्री पुत्रेभ्यः ऋषिभ्यो नमः शिरसि। श्रीविभावसुभ्यां देवताभ्यां नमः हृदि। अनुष्टुप्-वृहती त्रिष्टुप्-अनुष्टुप्- प्रस्तार पंक्तिभ्यश्छन्दोभ्यो नमः मुखे। हिरण्यवर्णामिति बीजाय नमो नाभौ। तां आवह जातवेदेति शक्तये नमः कट्यां। कीर्तिमृद्धिं ददातु मे इति कीलकाय नमः पादयोः। मम सकुटुम्बस्य क्षेमस्थैर्यायुरारोग्याभिवृद्धये श्री महालक्ष्मी वरप्रसाद सिद्ध्यर्थे च जपे विनियोगः सर्वाङ्गे।**

मंत्र	करन्यासः	षडङ्गन्यासः
ॐ हिरण्यायै नमः	अंगुष्ठाभ्यां नमः।	हृदयाय नमः।
ॐ चन्द्रायै नमः	तर्जनीभ्यां नमः।	शिरसे स्वाहा।
ॐ रजतस्त्रजायै नमः	मध्यमाभ्यां नमः।	शिखायै वषट्।
ॐ हिरण्यस्त्रजायै नमः	अनामिकाभ्यां नमः।	कवचाय हुँ।
ॐ हिरण्यायै नमः	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।
ॐ हिरण्यवर्णायै नमः	करतलकर पृष्ठाभ्यां नमः।	अस्त्राय फट्।

षडङ्गन्यासः- **श्रां, श्रीं, श्रूं, श्रैं, श्रौं, श्रः से षडङ्गन्यास करें।**

अंगन्यासः- ऋचा का प्रारंभिक संकेत दिया है पूरी ऋचा बोलकर न्यास करें। शिरसि- **हिरण्यवर्णां०**। नेत्रयोः-**तां मावह०**। कर्णयोः- **अश्वपूर्वां**। नासिकायां- **कांसोस्मितां०**। मुखे- **चन्द्रां प्रभा०**। गले- **आदित्यवर्णे०**। बाह्वोः- **उपैतु मां०**। हृदि-**क्षुत्पिपासा०**। नाभौ- **गंधद्वारां**। गुह्ये- **मनसः काम**। गुदे- **कर्दमेन०**। ऊर्वोः- **आपः सृजन्ति०**। जान्वोः - **आर्द्रां०**। जङ्घयोः- **आर्द्रां०**। पादयोः- **ताम्म आवह०**।

॥ ध्यानम् ॥

अरुणकमलसंस्था तद्रजः पुञ्जवर्णा, करकमलधृतेष्टाभीति-युग्माम्बुजा च। मणिमुकुट विचित्रालङ्कृता कल्पजातैः, भवतु भुवनमाता सन्ततं श्रीः श्रिये वः ॥

॥ श्रीसूक्तम् ॥

विनियोग :- **ॐ अस्य श्रीसूक्तस्य आनन्द कर्दम चिक्लीथ ऋषिः, अग्निदेवताः आदौत्रयस्य अनुष्टुप् छंद शेषांसा प्रसार पंक्ति, त्रिष्टुप्, अनुष्टुप् पुनः प्रसार पंक्तिश्छंदः, हिरण्य वर्णां बीजं, तां आवह इति शक्तिः कीर्तिमृद्धिं ददातु इति कीलकं श्री महालक्ष्मी वर प्रसाद सिद्धर्थं पाठे जपे विनियोगः।**

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् । चन्द्रां हिरण्यमयीं लक्ष्मीं जातवेदोममावह ॥१॥

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥२॥

अश्वपूर्णां रथमध्यां हस्तिनाद प्रबोधिनीम् । श्रियं देवीमुपह्वये श्रीर्मा देवी र्जुषताम् ॥३॥

कांसोस्मितां हिरण्यप्रकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्। पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥४॥

चन्द्रांप्रभासांयशसां ज्वलन्तींश्रियंलोके देवजुष्टामुदाराम्।
तांपद्मनेमिशरणमहं प्रपद्येअलक्ष्मीर्मे नश्यतां त्वांवृणे ॥५॥

आदित्यवर्णे तपसोधिजातो वनस्पतिस्तव वृक्षोऽथबिल्वः।
तस्यफलानि तपसानुदन्तुमायान्तरायाश्चबाह्या अलक्ष्मीः ॥६॥

उपैतु मां देवसखः कीर्तिश्च मणिना सह । प्रादुर्भूतोऽस्मि - राष्ट्रेऽस्मिन्कीर्तिमृद्धिं ददातुमे ॥७॥

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीर्नाशयाम्यहम् । अभूतिं समृद्धिं च सर्वानिर्णुद मे गृहात् ॥८॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥९॥

मनसः काम माकूतिं वाचः सत्यमशीमहि । पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥१०॥

कर्दमेन प्रजाभूता मयि सम्भव कर्दम । श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥११॥

आपः सृजन्तु स्निग्धानि चिल्कीत (चिक्लीत) वसमे गृहे । नि च देवीं मातरं श्रियं वासय मे कुले ॥१२॥

आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् । चन्द्रां हिरण्यमयीं लक्ष्मीं जातवेदोममावह ॥१३॥

आर्द्रां यः करणीं यष्टिं सुवर्णां हेममालिनीम् । सूर्यां हिरण्यमयीं लक्ष्मीं जातवेदो ममावह ॥१४॥

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम् ॥१५॥

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् । सूक्तं पंचदशर्चं च श्रीकामः सततं जपेत् ॥१६॥

(कहीं कहीं पुष्टिं, सुवर्णां तथा यष्टिंपिंगलां पद्ममालिनीम् है)

॥श्रीसूक्त यन्त्रार्चनम्॥

यंत्रोद्धार- षट्कोण, अष्टदल बनायें उसके बाहर द्वादश दल बनायें एवं उसके बाहर षोडश दल बनायें पश्चात् तीन वृत्तबनाकर बाद में भूपूर बनायें।

षट्कोण में षडङ्ग पूजा करें। अष्टदल में **हिरण्यवर्णा से तामिहोपह्वये** श्रियम् इन चार श्लोकों की आधी आधी ऋचा लिखें। द्वादशदल में **चन्द्रां प्रभासा से श्रीः श्रयतां यशः** इन छः ऋचाओं की आधी-आधी ऋचा लिखें। इस तरह १० ऋचा का लेखन हुआ। शेष छः ऋचाओं की आधी-आधी ऋचा ६ करने पर १२ बार लेखन षोडशदल में होगा फिर भी ४ दल बाकी रहेगें। इसका उल्लेख श्री विद्यार्णव तंत्र द्वाविंशश्वास में नहीं है। यहाँ ३ संभावनायें है।

॥ श्री सूक्त यन्त्रम् ॥

(१) किन्हीं दो ऋचा की आधी-आधी ऋचायें चार दलों में पुनरुक्त होगी।

(२) दुर्गेस्मृता मंत्र के १४-१४ वर्ण एक-एक दल में होगें।

(३) महालक्ष्मी मंत्र- श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः को चार पदों में चार दलों में लिखा जायें। यथा-**१. श्रीं ह्रीं श्रीं कमले। २.कमलालये प्रसीद। ३. प्रसीद श्रीं ह्रीं श्रीं। ४. महालक्ष्म्यै नमः**। ऐसा क्रम होवें तभी षोडशदल पूर्ण होगा।

षोडश दल पश्चात् तीन वृतों के मध्य में दो मार्ग वीथिकायें बनेगीं। प्रथम वीथिका में ''**यः शुचि प्रयतो भूत्वा जुहुयादाज्यमन्वहम् श्रियः पञ्चदशर्चं च श्रीकामः सततं जपेत्**'' लिखें। द्वितीय मार्ग वीथिका में मातृका वर्ण **अं आं....हं लं क्षं** वेष्टित करते हुयें वृत्ताकार लिखें। उसके बाहर भूपूर के कोणों में **श्रीं श्रीं श्रीं श्रीं** लिखें यंत्र मध्य में **श्रीं सहित साध्य नामः**। यथा- **श्रीं कमले, श्रीं लक्ष्मी।**

॥ आवरण पूजनम् ॥

सर्वतोभद्र मण्डल पर मंडूकादि पीठ देवता तथा पीठ शक्तियों का **एकाक्षरी मंत्रवत्** पूजन करें। यंत्र मध्य में प्रधानदेव का आवाहन करें। श्री सूक्त की एक-एक ऋचा से देवता की षोडशोपचार पूजन करें।

प्रथमावरणम् - (षट्कोणे) **ॐ हिरण्यायै हृदयाय नमः। हृदय श्री पादुकां पूजयामि तर्पयामि नमः**। इति सर्वत्र। **ॐ चन्द्राय शिरसे स्वाहा। रजतस्त्रजायै शिखायै वषट्। हिरण्यस्त्रजायै कवचाय हुं। हिरण्यायै नेत्रत्रयाय वौषट्। हिरण्यवर्णायै अस्त्राय फट्। अस्त्रश्री पा.पू.त.।**

द्वितीयावरणम् - (अष्टदले) पूर्वादिक्रमेण प्रत्येक अर्धऋचा के बाद **श्रीमहालक्ष्मी श्री पादुकां पूजयामि तर्पयामि नमः कहें।**

१. हिरण्यवर्णां हरिणीं सुवर्णरजस्त्रजाम् । श्रीमहालक्ष्मी श्री पा. पू. त.॥ २. चन्द्रां हिरण्यमयीं लक्ष्मीं जातवेदो ममावह। श्रीमहालक्ष्मी श्री पा. पू. त.॥ ३. ताम्म आवहजातवेदो लक्ष्मीमनपगामिनीम्। श्रीमहालक्ष्मी

श्री पा. पू. त. ॥ ४. यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्। श्रीमहालक्ष्मी श्री पा. पू. त. ॥ ५. अश्वपूर्वां रथमध्यां हस्तिनाद प्रमोदिमीम्। श्रीमहालक्ष्मी श्री पा. पू. त. ॥ ६. श्रियं देवीमुपह्वये श्रीर्मा देवीजुषताम्। श्रीमहालक्ष्मी श्री पा. पू. त. ॥ ७. कांसोस्मितां हिरण्यप्रकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्। श्रीमहालक्ष्मी श्री पा. पू. त. ॥ ८. पद्मेस्थितां स्थितां पद्मवर्णां तामिहोपह्वये श्रियम्। श्रीमहालक्ष्मी श्री पा. पू. त. ॥

पुष्पाञ्जलि देवे - ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सले । भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ॥

पूजिताः तर्पिताः सन्तु कहकर जल छोड़ें। इति सर्वत्र।

तृतीयावरणम् - (द्वादश दले) पूर्वादिक्रमेण- १. चन्द्रा प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् । श्री महा० ॥ २. तां पद्मनेमिं शरणं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि । श्री महा० ॥ ३. आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्व। श्री महा० ॥ ४. तस्य फलानि तपसानुदन्तु मायान्तराश्च बाह्या अलक्ष्मीः। श्री महा० ॥ ५. उपैतु मां देवसखः कीर्तिश्च मणिना सह । श्री महा० ॥ ६. प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिं वृद्धिं ददातु मे। श्री महा० ॥ ७. क्षुत्पिपासामला ज्येष्ठा अलक्ष्मीर्नाशयाम्यहम् । श्री महा० ॥ ८. अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् । श्री महा० ॥ ९. गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । श्री महा० ॥ १०. ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् । श्री महा० ॥ ११. मनसः काममाकूतिं वाचः सत्यमशीमहि । श्री महा० ॥ १२. पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः । श्री महा० ॥

चतुर्थावरणम् - (षोडशदले) प्रारम्भ के चार दलों में दुर्गा मंत्र या लक्ष्मी मंत्र से पूजन करें। १. दुर्गे स्मृता हरसि भीतिमशेषजन्तोः । श्री महालक्ष्मी पा. पू. त. ॥ २. स्वस्थैः स्मृता मतिमतीव शुभां ददासि । श्री महालक्ष्मी पा. पू. त. ॥ ३. दारिद्र्य दुःख भय-हारिणी कात्वदन्या । श्री महालक्ष्मी पा. पू. त. ॥ ४. सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता। श्री महालक्ष्मी पा. पू. त. ॥

अथवा चार दलों में लक्ष्मी मंत्र से पूजन करें।

१. श्रीं ह्रीं श्रीं कमले नमः । श्री महालक्ष्मी पा. पू. त. ॥ २. कमलालये प्रसीद नमः । श्री महालक्ष्मी पा. पू. त. ॥ ३. प्रसीद श्रीं ह्रीं श्रीं नमः। श्री महालक्ष्मी पा. पू. त. ॥ ४. महालक्ष्म्यै नमो नमः। श्री महालक्ष्मी पा. पू. त. ॥

पश्चात्-

५.कर्दमेन प्रजाभूतामयि संभव कर्दम। श्री महालक्ष्मी पा. पू. त. ॥ ६. श्रियं वासय मे कुले मातरं पद्ममालिनीम्। श्री महालक्ष्मी पा. पू. त. ॥ ७. आपः सृजन्तु स्निग्धानि चिल्कीत (चिक्लीत) वस मे गृहे। श्री महालक्ष्मी पा. पू. त. ॥ ८. नि च देवीं मातरं श्रियं वासय मे कुले। श्री महालक्ष्मी पा. पू. त. ॥ ९. आर्द्रां पुष्करिणीं यष्टिं सुवर्णां हेममालिनीम्। श्री महालक्ष्मी पा. पू. त. ॥ १०. चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह। श्री महालक्ष्मी पा. पू. त. ॥ ११. आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम्। श्री महालक्ष्मी पा. पू. त. ॥ १२. सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो ममावह। श्री महालक्ष्मी पा. पू. त. ॥ १३. ताम्म आवह जातवेदो लक्ष्मीमनपगामिनीम्। श्री महालक्ष्मी पा. पू. त. ॥ १४. यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान विन्देयं पुरुषानहम्। श्री महालक्ष्मी पा. पू. त. ॥ १५. यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम्। श्री महालक्ष्मी पा. पू. त. ॥ १६. श्रियः पञ्चदशर्चं च श्रीकामः सततं जपेत्। श्री महालक्ष्मी पा. पू. त. ॥

पंचमावरणम् - वृत्त की प्रथम वीथिका में- ''यः शुचिः ....श्रीकामः सततं जपेत्'' ऋचा से पूजन करें। श्री महालक्ष्मी पा. पू. त. ॥

षष्ठमावरणम् – (द्वितीय वीथिका) – **अं आं......हं लं क्षं मातृका रूपायै श्री महालक्ष्म्यै नमः। श्री महालक्ष्मी पा. पू. त.॥**

सप्तमावरणम् – (षोडशदल एवं भूपुर मध्ये) पूर्वादिक्रमेण–**ॐ पद्मायै नमः। ॐ पद्मवर्णायै नमः। ॐ पद्मस्थायै नमः। ॐ आर्द्रायै नमः। ॐ तर्पयन्त्यै नमः। ॐ तृप्तायै नमः। ॐ ज्वलन्त्यै नमः। ॐ स्वर्णप्राकारायै नमः।**

अष्टमावरणम् – (भूपुरे) पूर्वे **इन्द्राय नमः।** आग्नेयां– **आग्नेये नमः।** दक्षिणे– **यमाय नमः।** नैऋत्यां– **निर्ऋत्ये नमः।** पश्चिमे– **वरुणाय नमः।** वायव्यां– **वायवे नमः।** उत्तरे– **कुबेराय नमः।** ऐशान्यां– **ईशानाय नमः। ईशानपूर्वयोर्मध्ये– ब्रह्मणे नमः।** नैऋत्य– पश्चिमयोर्मध्ये– **अनन्ताय नमः।**

नवमावरणम् – (भूपुरे) लोकपाल समीपे– **वज्राय नमः। शक्तये नमः। दण्डाय नमः। खड्गाय नमः। पाशाय नमः। अङ्कुशाय नमः। गदायै नमः। त्रिशूलाय नमः। पद्माय नमः। चक्राय नमः।**

धूप दीप नैवेद्यादि का अर्पण कर नीराजन करें।

॥ काम्य प्रयोगः ॥

श्री सूक्त की १२ हजार आवृत्ति का एक पुरश्चरण कहा है। कमल, बिल्वफल, क्षीरान्न, वीरान्न से होम करें। ४० दिन अथवा ४० शुक्रवार नित्यहोम करें। तुरीयसंध्या (मध्यरात्रि) में ११ आहुति ६ मास तक श्रीसूक्त की देवें, अचल संपत्ति प्राप्त होवे। हवन पश्चात् ३२ योगिनियों को बलि प्रदान करें। यथा –

प्रणवाद्या हृदन्ताश्च (ॐ एवं स्वाहा युक्त नाम से बलि देवें) **श्रीर्लक्ष्मीर्वरदायिका। विष्णुपत्नी च वसुदा रूपाप्यन्या हिरण्यतः॥ स्वर्णमालिन्यपि परा ततः स्याद् रजतस्त्रजा। सुवर्णादिगृहा स्वर्णप्राकारा पद्मवासिनी॥ पद्महस्तप्रिया मुक्तालङ्कारा सूर्यकापरा। चन्द्राविश्व** (बिल्व) **प्रियेश्वर्यौ भुक्तिश्चापि प्रमुक्तियुक्॥ विभुर्वृद्धिः** (भूत्यृद्धी) **समृद्धिश्च तुष्टिः पुष्टिर्धनाद्यदा। भुवनेशी च शुद्धा स्याद्योगिनी भोगदामता॥ धात्री विधात्री द्वात्रिंच्छक्तयः समुदीरिताः। द्वात्रिंशाद्भिश्च पूजान्ते मन्त्रैर्बलिं हरेत्॥**

॥ संपुटित श्रीसूक्त प्रयोगः ॥

१. दुर्गा मंत्रेण संपुट प्रयोगः

दुर्गेस्मृता... मन्त्र से प्रत्येक ऋचा को पाद भेद क्रम से संपुटित करें। यथा –

हिरण्यवर्णां हरिणीं सुवर्ण रजतस्त्रजाम् दुर्गेस्मृता हरसि भीतिमशेष जन्तोः स्वस्थैः स्मृता मति मतीव शुभां ददासि। चन्द्रां हिरण्यमयीं लक्ष्मीं जातवेदो ममावह दारिद्र्य दुःखभय हारिणि कात्वदन्या सर्वोपकार करणाय सदार्द्रचित्ता॥

२. **श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः।** मन्त्र प्रत्येक ऋचा के आगे-पीछे संपुटित करके पाठ करें।

३. **दुर्गे स्मृता....।** मन्त्र से पुटित ऊपर जो विधान बताया गया है, उसे भी पुनः लक्ष्मीं मन्त्र से पुटित करें।

श्रीं ह्रीं श्रीं कमले.....महालक्ष्म्यै नमः। हिरण्यवर्णां.....रजतस्त्रजात्, दुर्गेस्मृता....शुभां ददासि। चन्द्रां....ममावह, दारिद्र्य....सदार्द्रचित्या ॥ श्रीं ह्रीं कमले महालक्ष्म्यै नमः॥

४. बीजाक्षर पुष्टित सिद्धि लक्ष्मी ''श्रीसूक्त''

(क) सिद्धि लक्ष्मी के षोडशाक्षरी मन्त्र - **'ह्रीं हूं फ्रें ह्सौः ह्रीं क्रों फ्रें स्त्रीं श्रीं ह्रों जूं ब्लौं व्रीं स्वाहा'** से क्रम २ या क्रम ३ के विधान की तरह प्रत्येक ऋचा को पुटित करके पाठ करें।

(ख) **'ॐ आं ह्रीं क्रों ऐं श्रीं क्लीं ब्लूं सौं रं वं श्रीं'** मन्त्र से पुटित करके पाठ करें।

(ग) **'ॐ आं ह्रीं क्रों ऐं श्रीं क्लीं ब्लूं सौं रं वं श्रीं'**

हिरण्यवर्णां हरिणीं सुवर्ण रजतस्त्रजाम् दुर्गेस्मृता हरसि भीतिमशेष जन्तोः स्वस्थैः स्मृता मति मतीव शुभां ददासि । चन्द्रां हिरण्यमयीं लक्ष्मीं जातवेदो ममावह दारिद्र्य दुःखभय - हारिणी कात्वदन्या सर्वोप्रकार करणाय सदार्द्रचित्ता ॥

'ॐ आं ह्रीं क्रों ऐं श्रीं क्लीं ब्लूं सौं रं वं श्रीं'।

(घ) प्रत्येक ऋचा के ऋष्यादिन्यास व ध्यान पूर्वक जप विधान सहित।

श्रीसूक्त के संपुट के अलग-अलग प्रयोग आगे दिये गये है।

ऋष्यादिन्यास हेतु प्रत्येक ऋचा के पठन पूर्व ऋष्यादिन्यास एक बार अवश्य करें। अधिक आवृत्तियों के करने पर बार-बार न्यास करना जरुरी नहीं है।

जिसप्रकार **मन्त्रात्मक सप्तशती** में विनियोग ऋषि देवता, बीजं शक्ति, उत्कीलन के अलावा, तत्व, मुद्रा, ज्ञानेन्द्रिय, रस, स्वर कर्मेन्द्रिय सहित विनियोग है उसी प्रकार श्रीसूक्त के विनियोग हैं।

उपरोक्त प्रयोगों में से किसी एक विधि से संपुट लगाये। अलग-अलग ऋचाओं के विनियोग इस प्रकार है।

॥ प्रति ऋचा संकल्पित श्रीसूक्त प्रयोगः॥

१. विनियोगः :- **अस्य श्री हिरण्यवर्णां इति सूक्तस्य कर्दम चिक्लीत ऋषि, सर्वसिद्धि प्रदात्री श्रीमहाविद्या देवता, श्रीं बीजं, सर्वार्थ साधिनी शक्ति, भुवनेशी महाविद्या, रजोगुणा, रसना-वाक् कर्मेन्द्रियं, मध्यमस्वरस्वरूपा भूतत्व प्रकृति कलारूपा, ह्रीं उत्कीलनं प्रवाहिनी मुद्रा द्वारा मम गृहे अतुलधनायुरारोग्यादि वृद्ध्यर्थं च जपे विनियोगः।**

ऋष्यादिन्यासः - **कर्दम चिक्लीत ऋषये नमः शिरसि, सर्वसिद्धि प्रदात्री श्रीमहाविद्या देवतायै नमः हृदि, श्रीं बीजाय जाप गुह्ये, सर्वार्थ साधिनी शक्तिः नाभौ, भुवनेशी महाविद्यायै नमः कण्ठे, रजोगुणारूपायै नमः मनसि, रसना-वाक् कर्मेन्द्रियै नमः चेतसि, मध्यमस्वररूपायै नमः कण्ठे, भूतत्वाय नमो गुदे। प्रकृति कलायै नमः करतले। ह्रीं उत्कीलनाय नमः पादयोः प्रवाहिनी मुद्रा च विनियोगः सर्वाङ्गे।**

मंत्र	करन्यासः	षडंगन्यासः
ॐ हिरण्यवर्णां	**अंगुष्ठाभ्यां नमः।**	**हृदयाय नमः।**
श्रीं हरिणीं	**तर्जनीभ्यां नमः।**	**शिरसे स्वाहा।**
ह्रीं सुवर्णरजतस्त्रजाम्	**मध्यमाभ्यां नमः।**	**शिखायै वषट्।**
श्रीं चन्द्रां हिरण्यमयी लक्ष्मीं	**अनामिकाभ्यां नमः।**	**कवचाय हुँ।**
ऐं जातवेदो	**कनिष्ठिकाभ्यां नमः।**	**नेत्रत्रयाय वौषट्।**
सौः ममावह	**करतलकर पृष्ठाभ्यां नमः।**	**अस्त्राय फट्**

या सा पद्मासनस्था विपुलकटितटि पद्मपत्रायताक्षी
गंभीरावर्तनाभिः स्तनभरनिमितां शुभ्रवस्त्रोत्तरीया ।
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगण खचितैः स्नापिता हेमकुंभैर्नित्यं
सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥

२. विनियोग: :- अस्य श्री ताम्म आवह इति सूक्तस्य कर्दमचिक्लीत ऋषिः सर्वकामप्रदात्री भगवती देवी, श्रीं बीजं ज्योति शक्ति कमलामहाविद्या, रजोगुणा श्रौत्रज्ञानेन्द्रिय शान्तिरसा, वाक्अधिष्ठात्री उच्चस्वरा, भूतत्व विद्याकलायै, क्लीं उत्कीलनं, संकोचिनी मुद्रा मम.... विनियोगः।

ऋष्यादिन्यास: - श्री कर्दमचिक्लीत ऋषये नमः शिरसि। सर्वकामप्रदा भगवती देवतायै नमः हृदि। श्रीं बीजाय नमः गुह्ये। ज्योति शक्त्यै नमः नाभौ। कमलामहाविद्यायै नमः कंठे। रजोगुणाय नमः मनसि। श्रोत्रेन्द्रिय नमः कर्णयोः। वाक्उच्चस्वरायै नमः कंठे। भूतत्वाय नमः मूलाधारे। विद्याकलाय नमः करतले। क्लीं उत्कीलनाय नमः पादयोः। संकोचिनी मुद्रा च विनियोगाय नमः सर्वाङ्गे।

षडङ्गन्यास - ॐ श्रीं ह्रीं हृदयाय नमः। ॐ नमो नमः शिरसे स्वाहा। ताम्म आवह जातवेदो शिखायै वषट्। लक्ष्मीमनपगामिनीम् कवचाय हुं। यस्यां हिरण्यं विन्देयं नेत्रत्रयाय वौषट्। गामश्वं पुरुषानहम अस्त्राय फट्। इसी तरह करन्यास करें।

कान्त्या कांचनसन्निभां हिमगिरि प्रख्यैश्चतुर्भिर्गजैः। हस्तोत्क्षिप्त हिरण्मयामृत-घटैरासिच्यमानां श्रियम् ॥
विभ्राणं वरमब्जयुग्ममभयं हस्तै किरीटोज्वलाम् । क्षौमाबद्ध नितम्बलसितां वन्देऽरविन्द स्थिताम् ॥

३. विनियोग : अस्य श्री अश्वपूर्वा श्रीसूक्त कर्दमचिक्लीत ऋषिः, महालक्ष्मीदेवता श्रीं बीजं। पद्मावतीशक्तिं। मातंगीमहाविद्या, रजोगुणा, स्वःज्ञानेन्द्रिय शान्तरसा वाक्कर्मेन्द्रिय मध्यमस्वरायुक्त। आकाशतत्वाय शांतिकलायै। क्रों उत्कीलनं योनिमुद्रा मम.... . विनियोगः।

ऋष्यादिन्यास :- कर्दमचिक्लीत ऋषये नमः शिरसि। महालक्ष्मी देवतायै नमः हृदि। पद्मावती शक्त्यै नमः नाभौ। श्रीं बीजाय नमः गुह्ये। मातंगीमहाविद्यायै नमः कंठे। रजोगुणाय नमः मनसि। स्वः नमः ज्ञानेन्द्रिये। शांतरसाय नमः चेतसि। वाक्मध्यमस्वराय नमः कंठे। आकाशतत्वाय नमः मूलाधारे। शांतिकलायै नमः करतले। क्रों उत्कीलये नमः पादयोः। योनि मुद्रा च विनियोगाय नमः सर्वाङ्गे।

षडङ्गन्यास: - ॐ श्रीं ह्रीं श्रीं हृदयाय नमः। नमो नमः शिरसे स्वाहा। अश्वपूर्वां रथमध्यां शिखायै वषट्। हस्तिनादप्रबोधिनीम् कवचाय हुं। श्रियं देवीमुपह्वये नेत्रत्रयाय वौषट्। श्रीर्मा देवीजुषताम् अस्त्राय फट्।

इसी प्रकार से करन्यास करें।

निधे नित्यस्मरे निरवधिगुणे नीति निपुणे । निराधाट ज्ञाने नियम परचित्तैकनिलये ॥
नित्यानित्य निर्मुक्ते निखिल निगमान्तस्तुत पदे । निरांतके नित्ये निगमय ममापि स्तुतिमिमाम् ॥

४. विनियोग: :- अस्य श्री कांसोस्मिता श्रीसूक्तस्य कर्दमचिक्लीत ऋषि। सर्वकामप्रदा देवी। ह्रां बीजं। चूडामणिशक्तिः। महाविद्या श्रीमहाशक्ति। सत्वगुणा। नेत्र ज्ञानेन्द्रिय। सौम्यरस। करकर्मेन्द्रिय मध्यमस्वर। भूतत्व प्रवृत्तिकलायै। श्रीं ह्रीं उत्कीलनं मोहिनी मुद्रा मम...... विनियोगः।

ऋष्यादिन्यासः - कर्दमचिक्लीत ऋषये नमः शिरसि। सर्वकामप्रदा देव्यै नमः हृदि। चूडामणि शक्त्यै नमः नाभौ। ह्रां बीजाय नमः गुह्ये। महाविद्या महाशक्त्यै नमः कंठे। सत्वगुणाय नमः मनसि। करकर्मेन्द्रिये नमः करे। मध्यमस्वराय नमः कंठे। भूतत्वाय नमः मूलाधारे (गुदे)। प्रवृत्तिकलायै नमः करतले। श्रीं ह्रीं उत्कीलनाय नमः पादयोः। मोहिनी मुद्रा च विनियोगाय नमः सर्वाङ्गे।

षडङ्गन्यास - ॐ श्रीं ह्रीं श्रीं हृदयाय नमः। ॐ नमो नमः शिरसे स्वाहा। कांसोस्मिता हिरण्यप्राकारा शिखायै वषट्। मार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् कवचाय हुं। पद्मेस्थितां पद्मवर्णां नेत्रत्रयाय वौषट्। तामिहोपह्वये श्रियम् अस्त्राय फट्।

इसी तरह से करन्यास करें।

प्रदीप ज्वालाभिर्दिवस करनी राजन विधिः। सुधासुतेश्चन्द्रोपल जल लवैरर्घ्यं रचना ॥
स्वकीयै रंभोमि सलिल निधि सौहित्य करण । त्वदीयाभिर्वाग्मिस्त व जननि वाचां स्तुतिरियम् ॥

५. विनियोग :- अस्य चन्द्रां प्रभासां सूक्त मन्त्रस्य श्री असितऋषि। विष्णुर्देवता। वं बीजं ह्रीं शक्तिं कुमारीमहाविद्या रजोगुणप्रधान श्रौत्रेन्द्रिय मृदुरसा वाक्कर्मणि सौम्यस्वर। आवाशतत्व विद्याकला। ब्लौं उत्कीलन द्राविणीमुद्रायुता मम...... विनियोग।

ऋष्यादिन्यासः - ॐ असित ऋषये नमः शिरसि। विष्णुर्देवतायै नमः हृदि। वं बीजाय नमः गुह्ये। ह्रीं शक्त्यै नमः नाभौ। कुमारी महाविद्यायै नमः कंठे। रजोगुणाय नमः मनसि। श्रोत्रेन्द्रियाय नमः श्रोत्रे। मृदुरसाय नमः चित्ते। वाक्कर्मेन्द्रिय नमः मुखे। सौम्यस्वराय नमः कंठे। आकाशतत्वाय नमः मूलाधारे। विद्याकलायै नमः कराग्रे। ब्लौं उत्कीलनाय नमः पादयोः। द्राविणीमुद्रा च विनियोगाय नमः सर्वाङ्गे।

षडङ्गन्यास - ॐ श्रीं ह्रीं श्रीं हृदयाय नमः। ॐ नमो नमः शिरसे स्वाहा। चन्द्रांप्रभासां यशसा ज्वलन्तीं शिखायै वषट्। श्रियं लोके देव जुष्टामुदारां कवचाय हुं। तां पद्मनेमि शरणं प्रपद्ये नेत्रत्रयाय वौषट्। अलक्ष्मीर्मे नश्यतां त्वां वृणे अस्त्राय फट्।

अरुणकमलसंस्था तद्रजः पुञ्जवर्णा। करकमलधृतेष्टाऽभीति- युग्माम्बुजाता ॥
मणिमुकुट विचित्रालंकृता कल्पजालैः। सकलभुवनमाता सन्ततं श्रीः श्रियै नः ॥

६. विनियोगः - अस्य श्री आदित्यवर्णे तपसोधिजात इति सूक्तस्य ब्रह्माऋषि सूर्योदेवता ॐ बीजं तेजसः शक्ति श्री मातंगीमहाविद्या तमोगुण। चक्षुः ज्ञानेन्द्रिय। मृदुरस। करकर्मेन्द्रिय। मृदुस्वर। खः तत्व। पराशान्तिकला। ह्रीं उत्कीलन। संपुटमुद्रा मम .... विनियोगः।

ऋष्यादिन्यासः - ॐ ब्रह्म ऋषये नमः शिरसि। सूर्योदेवताय नमः हृदि। ॐ बीजाय नमः गुह्ये। तेजसः शक्त्यै नमः नाभौः। मातंगी महाविद्यायै नमः कंठे। तमोगुणाय नमः मनसि। चक्षु ज्ञानेन्द्रिय नमः चक्षुषि। मृदुरसाय नमः चित्ते। करकर्मेन्द्रिय नमः करतले। मृदुस्वराय नमः कंठे। खः तत्वाय नमः मूलाधारे। शान्तिकलायै नमः कराग्रे। ह्रीं उत्कीलनाय नमः पादयोः। संपुटमुद्रायै च विनियोगाय नमः सर्वाङ्गे।

षडङ्गन्यासः - ॐ श्रीं ह्रीं श्रीं हृदयाय नमः। ॐ नमो नमः शिरसे स्वाहा। आदित्यवर्णे तपसोऽधिजातो शिखायै वषट्। वनस्पतिस्तव वृक्षोऽथ बिल्व कवचाय हुं। तस्य फलानि तपसानुदन्तु नेत्रत्रयाय वौषट्।

मायान्तरायाश्च बाह्याऽलक्ष्मी अस्त्राय फट्।

कान्त्या कांचनसन्निभां हिमगिरि प्रख्यैश्चतुर्भिर्गजैः।
हस्तोत्क्षिप्त हिरण्यमयामृत-घटैरासिंच्यमानां श्रियम् ॥
विभ्राणां वरमब्जयुग्ममभयं हस्तै किरीटोज्वलाम् ।
क्षौमाबद्ध नितम्बबिम्बलसितां वन्देऽरविन्द स्थिताम् ॥

७. विनियोगः – अस्य श्री उपैतु मां देव सखः इति सूक्तस्य। मृकण्ड ऋषिः। सर्वसंपत्ति पूरिण्यै देवता। सौः बीजं। शिवाशक्ति। श्री मातंगीमहाविद्या तमोगुण। रसना ज्ञानेन्द्रिय। मृदुरस करकर्मेन्द्रिय। मध्यमस्वर। जल तत्व। प्रतिष्ठाकला। ऐं उत्कीलन। राजसीमुद्रा मम .... विनियोगः।

ऋष्यादिन्यासः – ॐ मृकण्ड ऋषये नमः शिरसि। सर्वसंपत्तिपूरिण्यै नमः हृदि। सौः बीजाय नमः गुह्ये। मातंगी महाविद्यायै नमः कंठे। तमोगुणाय नमः मनसि। रसना ज्ञानेन्द्रियाय नमः रसने। मृदुरसाय नमः चित्ते। करकर्मेन्द्रियाय नमः कराग्रे। मध्यमस्वराय नमः कंठे। जल तत्वाय नमः मूलाधारे। प्रतिष्ठाकलायै नमः करतले। ऐं उत्कीलनायै नमः पादयोः। राजसीमुद्रा च विनियोगाय नमः सर्वाङ्गे।

षडङ्गन्यास – ॐ श्रीं ह्रीं श्रीं हृदयाय नमः। ॐ नमो नमः शिरसे स्वाहा। उपैतु मां देवसखः शिखायै वषट्। कीर्तिश्चमणिनासह कवचाय हुं। प्रादूर्भूतोस्मिराष्ट्रेऽस्मिन् नेत्रत्रयाय वौषट्। कीर्तिमृद्धिं ददातु मे अस्त्राय फट्। इसी तरह करन्यास करें।

॥ मातंगी स्वरूपा ध्यानम् ॥

कदाकाले मातः कथय कलितालक्तक सम । पिबेयं विद्यार्थी तवचरण निर्णेजन जलम् ॥
प्रकृत्या मूकानामपि च कविताकारण तया । यदाधत्ते वाणीमुखकमल ताम्बूलरसताम् ॥

८. विनियोगः– अस्य श्रीक्षुत्पिपासामलां ज्येष्ठा इति सूक्तस्य नारदऋषिः, सर्वसौभाग्य प्रदा देवता, सौं बीजं, सर्वेश्वर्यै इतिशक्ति, कमलामहाविद्या रजोगुण, चक्षु ज्ञानेन्द्रिय, मोहरस भगकर्मेन्द्रिय, सौम्यस्वर, भूतत्व प्रवृत्तिकला ह्रीं उत्कीलन संपुटमुद्रा मम....विनियोगः।

ऋष्यादिन्यासः – ॐ नारद ऋषये नमः शिरसि। सर्वसौभाग्यप्रदा देवतायै नमः हृदि। सौं बीजाय नमः गुह्ये। सर्वेश्वर्य शक्त्यै नमः नाभौः। कमलामहाविद्यायै नमः कंठे। रजोगुणाय नमः मनसि। चक्षुज्ञानेन्द्रियाय नमः चक्षुषिः, मोहरसाय नमः चित्ते। भगाय नमः भगे, सौम्यस्वराय नमः कण्ठे। भूतत्वाय नमः गुदे। प्रवृत्तिकलायै नमः करतले।, ह्रीं उत्कीलनाय नमः पादयोः, संपुटमुद्रायै च विनियोगाय नमः सर्वाङ्गे।

षडङ्गन्यास – ॐ ऐं हृदयाय नमः। ॐ रों नमः शिरसि। क्षुत्पिपासामला ज्येष्ठा शिखायै वषट्। अलक्ष्मीं नाशयाम्यहम् कवचाय हुं। अभूतिमसमृद्धिं च नेत्रत्रयाय वौषट्। सर्वानिर्णुद मे गृहात् अस्त्राय फट्।

धूम्राभां धूम्रवस्त्रां प्रकटितदशनां मुक्तकेशीं दुरन्ताम् ।
नित्यं कलहान्तरालां मुहुरति कुटिलां क्रोधमोहाधिकाराम् ॥
चर्वन्तीमस्थिखण्डं विषयद्विषकरा शत्रूणां भीतिदास्या ।
लक्ष्मीद्विषतामलक्ष्मी हरतु मम भयं पातु मां श्रीरनाद्या ॥

९. विनियोगः– अस्य श्री गंधद्वारां दुराधर्षां सूक्तस्य मेधसऋषि, श्री सर्वसिद्धिप्रदा देवता ब्रीं बीजं, भ्रामरी

शक्ति, कमलामहाविद्या रजोगुण, नासिका ज्ञानेन्द्रिय सौम्यरस, पाणिकर्मेन्द्रिय, मृदुस्वर भूतत्व मोहिनीकला क्लीं उत्कीलनं द्राविणी मुद्रा मम......विनियोगः।

ऋष्यादिन्यासः - मेधस ऋषये नमः शिरसि। श्रीसर्वसिद्धि देवतायै नमः हृदि। ब्रीं बीजाय नमः गुह्ये। भ्रामरी शक्त्यै नमः नाभौ। कमलामहाविद्यायै नमः कंठे। रजोगुणाय नमः मनसि। नासिका ज्ञानेन्द्रियाय नमः नासिकायां। सौम्यरसाय नमः चित्ते। पाणिकर्मेन्द्रियाय नमः कराग्रे। मृदुस्वराय नमः कण्ठे। भूतत्वाय नमः मूलाधारे। मोहिनीकलायै नमः करतले। क्लीं उत्कीलनाय नमः पादयोः। द्राविणीमुद्रायै च विनियोगाय नमः सर्वाङ्गे।

षडंगन्यास- ॐ ऐं रं नमः हृदयाय नमः। ॐ नमो नमः शिरसे स्वाहा। गंधद्वारां दुराधर्षां शिखायै वषट्। नित्यपुष्टां करीषिणीं कवचाय हुं। ईश्वरी सर्वभूतानां नेत्रत्रयाय वौषट्। तामिहोपह्वये श्रियम् अस्त्राय फट्।

॥ ध्यानम् ॥

कान्तिर्कर्णिक-रागपुञ्ज पिहितां त्वत्तेजसाद्यामिमां
मुर्वीं चापि विलीन यावक रस प्रस्तार मग्नामिव ।
पश्यन्तीं कुलमप्यनन्य मनसस्तेषां कलाद्या गुणाः
सद्या सिद्धि-सुशील-श्लाध्य सगुणो सर्वेशि तुभ्यं नमः ॥

१०. विनियोगः- अस्य श्री मनसकाम माकूतिं सूक्तस्य श्री वेदव्यास ऋषिः, श्रीसर्वप्रियंकर्यै देवी, क्रों बीजं, शताक्षी शक्ति, श्रीसुन्दरीमहाविद्या रजोगुण, श्रोत्र कर्मेन्द्रिय, मोहरस मन कर्मेन्द्रिय सौम्यस्वर जलतत्वं अविद्याकला श्रीं उत्कीलनं योनिमुद्रा मम........विनियोगः।

ऋष्यादि न्यासः- श्रीवेदव्यास ऋषये नमः शिरसि। श्रीसर्वप्रियंकर्यै देव्यै नमः हृदि। क्रों बीजाय नमः गुह्ये। शताक्षी शक्त्यै नमः नाभौ। श्री सुन्दरी महाविद्यायै नमः कण्ठे। रजोगुणाय नमः मनसि। श्रोत्रेन्द्रियाय नमः श्रोत्रे। मोहरसाय नमः कर्मेन्द्रिये। सौम्यस्वराय नमः कण्ठमूले। जलतत्वाय नमः गुह्ये। अविद्याकलायै नमः करतले। श्रीं उत्कीलनाय च विनियोगाय नमः सर्वाङ्गे।

षडंगन्यासः- ॐ ऐं ब्लूं नमः हृदयाय नमः। ॐ नमो नमः शिरसे स्वाहा। मनसः काममाकूतिं शिखायै वषट्। वाचः सत्यमशीमहि कवचाय हुँ। पशूनांरूपमन्नस्य नेत्रत्रयाय वौषट्। मयि श्रीः श्रयतां यश अस्त्राय फट्।

॥ ध्यानम् ॥

ऐन्द्रस्येव शरासनं विदधतीं मध्ये ललाट प्रभाम् शौक्लीं कान्तिममुष्य गोरिव शिरस्यातन्वतीं सर्वतः ।
एषाऽसौ त्रिपुराहृदि द्युतिरिवोष्मांशोः सदाहस्थिता रोगान् सर्वभयाननुग्रहयुता हन्ति स्वयं सिद्धिदा ॥

११. विनियोगः- अस्य श्री कर्दमेनप्रजाभूता सूक्तस्य श्रीविष्णु ऋषिः, सर्वव्याधिविनाशिनि देवी, ह्रां बीजं, श्रीमहासरस्वती देवता, रूं बीजं, इन्द्राणि शक्ति, भुवनेश्वरी महाविद्या सतोगुण त्वक्ज्ञानेन्द्रिय, स्तवनरस करकर्मेन्द्रिय मृदुस्वर वायुस्तत्वं शान्तिकला, ऐं उत्कीलनं संपुटमुद्रा मम.....विनियोगः।

ऋष्यादिन्यासः- विष्णु ऋषये नमः शिरसि। सर्वव्याधि विनाशिनि देव्यै नमः हृदि। ह्रां बीजाय नमः गुह्ये। इन्द्राणि शक्त्यै नमः नाभौ। श्रीभुवनेश्वरी महाविद्यायै नमः कण्ठे। सतोगुणाय नमः मनसि। त्वक् ज्ञानेन्द्रिय नमः त्वचे। स्तवनरसाय नमः चित्ते। करकर्मेन्द्रिय नमः कराग्रे। मृदुस्वराय नमः कण्ठे। वायुस्तत्वाय नमः मूलाधारे। शांतिकलायै नमः करतले। ऐं उत्कीलनाय नमः पादयोः। संपुटमुद्रा च......... विनियोगाय नमः सवाङ्गे।

षडंगन्यासः- ॐ ऐं ज्रां नमः हृदयाय नमः। ॐ नमो नमः शिरसे स्वाहा। कर्दमेन प्रजाभूता शिखायै वषट्। मयि संभव कर्द्दम कवचाय हुं। श्रियम् वासय मे कुले नेत्रत्रयाय वौषट्। मातरं पद्ममालिनीम् अस्त्राय फट्।

॥ ध्यानम् ॥

या बालेन्दु दिवाकराक्षि-मधुरा या श्वेतपद्मासना, रत्नाकल्प विराजिताङ्ग लतिका पूर्णेन्दु-वक्त्रोज्वला । अक्षस्त्रक् सृणि पाश पुस्तक करा या बालभानुप्रभा, तां देवीं त्रिपुरां शिवां हृदि भजे श्रीशारदाम्बां सदा ॥

१२. विनियोगः- ॐ अस्य श्री आपः स्त्रजन्तु स्निग्धानि सूक्तस्य अजय ऋषिः, श्रीमहालक्ष्मीदेवता, ह्रां बीजं, शूलधारिणी शक्तिः, पीताम्बरा महाविद्या, रजोगुण, त्वक् ज्ञानेन्द्रिय, गांभीर्यरस, गुदकर्मेन्द्रिय, गंभीर स्वर, भूतत्व प्रवृत्तिकला, ह्लीं उत्कीलनं, मत्स्यमुद्रा मम.......विनियोगः।

ऋष्यादि न्यासः- अजय ऋषये नमः शिरसि। श्रीमहालक्ष्मी देव्यै नमः हृदि। ह्रां बीजाय नमः गुह्ये। शूलधारिणी शक्त्यै नमः नाभौ। पीताम्बरा महाविद्यायै नमः कण्ठे। रजोगुणाय नमः मनसि। त्वक् ज्ञानेन्द्रियाय नमः त्वचे। गंभीर रसाय नमः चित्ते। गुदकर्मेन्द्रिय नमः गुदे। गंभीरस्वराय नमः कण्ठे। भूत्त्वाय नमः मूलाधारे। प्रवृत्ति कलायै नमः करतले। ह्लीं उत्कीलनाय नमः पादयोः। मत्स्यमुद्रायै च..........विनियोगाय नमः सर्वाङ्गे।

षडंगन्यास - ऐं स्त्रीं नमः हृदयाय । ॐ नमो नमः शिरसे स्वाहा। आपः स्त्रजन्तु स्निग्धानि शिखायै वषट्। चिक्लीतवस मे गृहे कवचाय हुं। नि च देवी मातरं नेत्रत्रयाय वौषट्। श्रियं वासय मे कुले अस्त्राय फट्।

॥ ध्यानम् ॥

ज्वलत्कोटि-बालार्क-भासारुणाङ्गीं, सुलावण्य श्रृंगारशोभाभिरामाम् ।
महापद्म किंजल्कमध्ये विराजत् त्रिकोणोल्लसन्तीं भजे श्रीभवनीम् ॥

१३. विनियोगः- अस्य श्री आर्द्रा पुष्करिणीं पुष्टीं सूक्तस्य मेधस ऋषिः, श्रीसर्वसौभाग्यदायिनी देवीं द्रां बीजं, भीमाशक्ति ज्येष्ठामहाविद्या रजोगुण, घ्राणं ज्ञानेन्द्रिय, गंभीररस, पाणिकर्मेन्द्रिय, दीनस्वर, वायुस्तत्वं, पराशांति कला ऐं उत्कीलनं धेनुमुद्रा मम......... विनियोगः।

ऋष्यादि न्यासः- श्री मेधस ऋषये नमः शिरसि। श्रीसर्वसौभाग्यदायिनी देव्यै नमः हृदि। द्रां बीजाय नमः गुह्ये। भीमा शक्त्यै नमः नाभौ। ज्येष्ठा महाविद्यायै नमः कण्ठे। रजोगुणाय नमः मनसि। घ्राणं ज्ञानेन्द्रियाय नमः घ्राणे। गांभीर्यरसाय नमः चित्ते। पाणिकर्मेन्द्रियाय नमः कराग्रे। दीनस्वराय नमः कण्ठे। वायुस्तत्वाय नमः गुदे। पराशांतिकलायै नमः करतले। ऐं उत्कीलनाय नमः पादयोः। धेनुमुद्रायै च..........विनियोगाय नमः सर्वाङ्गे।

षडङ्गन्यास - ॐ ऐं ह्रीं नमः हृदयाय नमः। ॐ नमो नमः शिरसे स्वाहा। आर्द्रां पुष्करिणीं पुष्टिं शिखायै वषट्। पिंगलां पद्ममालिनीं कवचाय हुं। चन्द्रां हिरण्यमयीं लक्ष्मीं नेत्रत्रयाय वौषट्। जातवेदो ममावह अस्त्राय फट्।

हंसो बाह्यान्धकार प्रदलनचतुरो मोदचोद प्रकाशः ।
पद्मानामेष मे दत्तः स्थित तिमिर ततेवरियित्र्याश्च रात्रौ ॥
देवानां देहभूतं शिरसि शिवमयं पूर्णतेजस्वरूपाज्जाता ।
रूपाधिरूपा अनलबलमया शक्तिरूपा पुनातु ॥

१४. विनियोगः- अस्य श्री आर्द्रां पुष्करिणीं यष्टिं सूक्तस्य श्रीवेदव्यास ऋषिः, श्रीसर्वाह्लादिन्यै देवी, रूं

बीजं, वारुणी शक्तिं, श्रीतारा महाविद्या सतोगुण, श्रोत्रज्ञानेन्द्रिय, सौम्यरस, पदकर्मेन्द्रिय मध्यमस्वर वायुस्तत्वं, विद्याकला क्रीं उत्कीलनं आकर्षिणी मुद्रा मम....... विनियोगः।

ऋष्यादि न्यासः- वेदव्यास ऋषये नमः शिरसि। सर्वाह्लादिन्यै देव्यै नमः हृदि। रूं बीजाय नमः गुह्ये। वारुणी शक्त्यै नमः नाभौ। ताराह्लह्लह्लह्यवज्रविमहाविद्यायै नमः कण्ठे। सतोगुणाय नमः मनसि। श्रोत्रेन्द्रियाय नमः श्रोत्रेः। सौम्यरसाय नमः चित्ते। पदकर्मेन्द्रियाय नमः पादयोः। मध्यमस्वराय नमः कण्ठे। वायुस्तत्वाय नमः मूलाधारे। विद्याकलायै नमः करतले। क्रौं उत्कीलनाय नमः पादयोः। आकर्षिणी मुद्रा च..........विनियोगाय नमः सर्वाङ्गे।

षडंगन्यास - ॐ ऐं कृं नमः हृदयाय नमः। ॐ नमो नमः शिरसे स्वाहा। आर्द्रां यः करिणीं यष्टिं शिखायै वषट्। सुवर्णां हेममालिनीं कवचाय हुं। सूर्यां हिरण्मयीं लक्ष्मीं नेत्रत्रयाय वौषट्। जातवेदो ममावह अस्त्राय फट्।

॥ ध्यानम् ॥

उद्यदभानु सहस्त्रकान्तिममलां विद्युच्छटाभास्वरां। खड्ग चर्मवराभयं विदधतीं केयूरहारोज्ज्वलाम् ॥
सूर्यकाल समुद्रवेद प्रकृतिं श्रीश्चोदयन्तीं भुवे। विष्णुब्रह्म सुरेन्द्रसेवितपदां श्रीक्षीरजां चिन्तयेत् ॥

१५. विनियोगः- अस्य श्री तां म आवह जातवेदो सूक्तस्य ब्रह्मा ऋषिः, श्रीसर्वशक्ति देवी, ज्रां बीजं, धनदाशक्ति, मातंगी महाविद्या, रजोगुण, त्वक् ज्ञानेन्द्रिय, स्तवनरस, पादकर्मेन्द्रिय मृदुस्वर, आकाश तत्त्व, पराशांतिकला, श्रीं उत्कीलन संपुटमुद्रा मम.........विनियोगः।

ऋष्यादि न्यासः- ब्रह्मा ऋषये नमः शिरसि। सर्वशक्त्यै देव्यै नमः हृदि। ज्रां बीजाय नमः गुह्ये। धनदा शक्त्यै नमः नाभौ। मातंगी महाविद्यायै नमः कण्ठे। रजोगुणाय नमः मनसि। त्वक्ज्ञानेन्द्रियाय नमः त्वचे। स्तवनरसाय नमः चित्ते। पादकर्मेन्द्रियाय नमः पादयोः। मृदुरसाय नमः कण्ठे। आकाश तत्वाय नमः मूलाधारे। पराशांति कलायै नमः करतले। श्रीं उत्कीलनाय नमः पादयोः। संपुट मुद्रा च..........विनियोगाय नमः सर्वाङ्गे।

षडङ्गन्यास - ॐ ऐं नमः हृदयाय नमः। ॐ नमो नमः शिरसे स्वाहा। तां म आवह जातवेदो शिखायै वषट्। लक्ष्मीमनपगामिनीम् कवचाय हुं। यस्यां हिरण्यं प्रभूतिं गावो नेत्रत्रयाय वौषट्। दास्योश्वान्विन्देयं पुरुषानहम् अस्त्राय फट्।

॥ ध्यानम् ॥

स्मरयोनिं लक्ष्मीं त्रितयमिमादौ तवमनोर्निधायैके नित्ये निरवधि महाभोग रसिकाः।
भजंति त्वां चिन्तामणि गुण निबद्धाक्षरलयाः शिवाऽग्नौ जुहवन्तः सुरभिघृतधाराऽहुतिशतः ॥

१६. विनियोगः- अस्य श्री यः शुचिः प्रयतो भूत्वा सूक्तस्य श्रीब्रह्मा ऋषिः, श्रीमहासरस्वती देवता, प्रूं बीजं, सिद्धिदा शक्ति, श्रीकमला महाविद्या, सतोगुण, घ्राणं ज्ञानेन्द्रिय, स्तवनरस, पादकर्मेन्द्रिय मृदुस्वर जलतत्व, शांतिकला, ह्रीं उत्कीलनं संपुटमुद्रा मम........विनियोगः।

ऋष्यादि न्यासः- ब्रह्मा ऋषये नमः शिरसि। श्रीमहासरस्वती देवतायै नमः हृदि। प्रूं बीजाय नमः गुह्ये। सिद्धिदा शक्त्यै नमः नाभौ। श्रीकमला महाविद्यायै नमः कण्ठे। सतोगुणाय नमः मनसि। घ्राणं ज्ञानेन्द्रियाय नमः घ्राणे। स्तवनरसाय नमः चित्ते। पादकर्मेन्द्रियाय नमः पादयोः। मृदुस्वराय नमः कण्ठे। जलतत्वाय नमः मूलाधारे।

षडङ्गन्यास - ॐ ऐं क्लीं श्रीं नमः हृदयाय नमः। ॐ नमो नमः शिरसे स्वाहा। यः शुचिः प्रयतो भूत्वा शिखायै वषट्। जुहुयादाज्यमन्वहम् कवचाय हुं। सूक्तं पंचदर्शर्चं च नेत्रत्रयाय वौषट्। श्रीकामः सततं जपेत् अस्त्राय फट्।

॥ ध्यानम् ॥

स्तौमि त्वां त्वां च वन्दे ममकरधरितं मा कदाचित् त्यजेथा ।
नो मे बुद्धिर्विरोधा भवतु न च मनोभक्तिहीनां कदाचित् ॥

॥ श्री लक्ष्मी सूक्त प्रयोगः॥

श्री सूक्त की तरह लक्ष्मी सूक्त भी लक्ष्मी मंत्र से अथवा दुर्गेस्मृता मंत्र से भी संपुटित किया जा सकता है तथा यथा संख्या अथवा ११००० पाठ करें।

॥ श्री लक्ष्मी सूक्तम् ॥

सरसिज निलये सरोजहस्ते धवलतरां शुकगन्धमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥
धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः । धनमिन्द्रो वृहस्पतिर्वरुणं धनमश्विनौ ॥
वैनतेय सोमं पिब सोमं पिबतु वृत्रहा । सोमं धनस्य सोमनो मह्यं ददातु सोमिनः ॥
न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः । भवन्ति कृतपुण्यानां भक्तानां सूक्तजापिनाम् ॥
पद्मानने पद्मऊरु पद्माक्षि पद्मसम्भवे । तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम् ॥
विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् । विष्णुप्रियां सखीं देवीं नमाम्यच्युत वल्लभाम् ॥
महालक्ष्मी च विद्महे विष्णुपत्नीं च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् ।
पद्मानने पद्मिनि पद्मपत्रे पद्मप्रिये पद्मदलायताक्षि । विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥
आनन्दः कर्दमः श्रीदश्चिक्लीत इति विश्रुताः । ऋषयः श्रियपुत्राश्च मय श्रीर्देवी देवता ॥
ऋणरोगादि दारिद्र्यं पापञ्च अपमृत्युवः । भयशोकमनस्तापा नश्यन्तु मम सर्वदा ॥
श्रीर्वचस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते । धनंधान्यंपशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥

॥ इति श्रीलक्ष्मी सूक्तम् ॥

॥ श्री महालक्ष्मी सूक्तम् ॥

विनियोग :- ॐ अस्य श्री महालक्ष्मी सूक्तस्य ओं विष्णुः ऋषिः। ओं अनुष्टुप्छन्दः। ॐ महालक्ष्मी देवता। ॐ ओं बीजं। ॐ श्री महालक्ष्मी शक्तिः। ॐ स्वाहा कीलकम्। श्री महालक्ष्मी प्रीत्यर्थं महालक्ष्मी सूक्त पारायणे विनियोगः।

ॐ श्रां श्रीं श्रूं श्रैं श्रौं श्रः। षट् करन्यासाः, हृदयादिन्यासाश्च। ।।

ॐ श्रीं नमः ॐ श्रीं ॐ॥ नित्यां स्वर्ण सरोरुह प्रकटितां बालार्क कोटि प्रभां, श्वेतास्य स्तन मंडलारुण मयां मध्ये विचित्र प्रभाम्। सत्साला कमलेषु खड्ग कुलिशं कौमोदकीं चक्रकम्, शूलं वै परशुं च शंखममलं घंटा च पाशक्रमात्। ॐ श्रीं ॐ मः न श्रीं ॐ ॥१॥

इसी तरह सभी श्लोकों के ॐ श्रीं नमः ॐ श्रीं ॐ का लोम विलोम संपुट लगावें।

शक्ति दंडक चर्मं चाप दशकं दोर्भिर्बहंती मुदा, सांद्रानंदमयीं कमण्डलु धरां नीलोरजंघाकुचाम्। चित्रां माहिषै मर्दिनीं गुणमयीं साम्राज्य लक्ष्मीप्रदां, माया बीजमयीं परावर महालक्ष्मीं भजे राजसीम् ॥२॥

हिरण्य वर्णा० (इत्यादि श्री सूक्त मंत्राः) ॥३॥ ताम् आवह० ॥४॥ अश्वपूर्णां० ॥५॥ कांसोस्मितां० ॥६॥ चंद्रांप्रभासां० ॥७॥ आदित्यवर्णे० ॥८॥ उपैतुमां देवसखः ॥९॥ क्षुत्पि पासामलां ज्येष्ठां० ॥१०॥ गंध द्वारां० ॥११॥ मनसः काममाकूतिं० ॥१२॥ कर्दमेन प्रजा भूता० ॥१३॥ अपः स्त्रजंतु० ॥१४॥ आर्द्रांयः करिणीं० ॥१५॥ तांम आवहजात वेदो० ॥१६॥ यः शुचिः प्रयतो भूत्वा० ॥१७॥

अज्ञान संभ वमना कलितान्वयं हि भिक्षुं कपालिनमन्ना मसमा द्वितीयाम्।
पूर्वकर ग्रहण मंगलतो भवत्याः, शंभुं कररवि विबुधे गिरिराजकन्ये ॥१८॥
चर्मांबरं च शव - भस्म विलेपनं च, वेताल संहति परिग्रहता च शंभोः।
भिक्षाट नं च नटनं च परेत भूमौ शोभां विभर्ति गिरिजे तव साहचर्यात्॥ ॥१९॥

॥नारायण उवाच ॥२०॥

परावरेशीं जगदादि भूतां परां वरेण्यां वरदां वरिष्ठाम्।
वागीश्वरीं बहुवाग्भिः प्रणीतां त्वां विश्वयोनिं शरणं प्रपद्ये ॥२१॥
श्रियं समस्तैरधिवास भूतां महासुलक्ष्मीं धरणी धरां च।
अनादिमादिं परमार्थरूपां त्वां विश्वयोनिं शरणं प्रपद्ये ॥२२॥
एकामनेकां विविधां सुकार्यां सुकारिणीं सदसद्रूपिणीं च।
कल्याणरूपां च शिवो शिवप्रदां त्वां विश्वयोनिं शरणं प्रपद्ये ॥२३॥
सर्वाश्रयां सर्वजगन्निवासां श्रीमन्महालक्ष्मी मनादि देवीम्।
शक्तिस्वरूपां च शिवस्वरूपां त्वां विश्वयोनिं शरणं प्रपद्ये ॥२४॥
कामाभिधानां श्याधिवास भूतां ह्रीं - रूपिणीं कपि बीज प्रभावाम्।

कर्णाष्टबीजां परमार्थ संज्ञांत्वां विश्वयोनिं शरणं प्रपद्ये ॥२५॥
वैश्वानर स्त्री सहितेन देवीं श्री मंत्रराजेन विराजमानाम् ।
सर्वार्थदात्रीं परमां पवित्रां त्वां विश्वयोनिं शरणं प्रपद्ये ॥२६॥
त्रिकोण पंचार युग प्रभावां षट्कोण मिश्रां द्विदशार युक्ताम् ।
अष्टार चक्रादि निवासभूतां त्वां विश्वयोनिं शरणं प्रपद्ये ॥२७॥
पुनर्दशार द्वितीयेन युक्तां पंचार कोणांकित भूगृहां च ।
यंत्राधि वासामपि यंत्ररूपां त्वां विश्वयोनिं शरणं प्रपद्ये ॥२८॥
संभावितां सर्वदा न्यास गम्यां सर्व स्वरूपा मपि सर्व सेव्याम् ।
सर्वाक्षर न्यासवशां वरिष्ठां त्वां विश्वयोनिं शरणं प्रपद्ये ॥२९॥
विधायकुंडं विधिनास्थंडिलंवा सुगंधि होमं सफलं प्रकुर्वते ।
त्वत्तोषणा ज्जायते भाग्यपात्रं तेषांसुदेवैरपि योगगम्यम् ॥३०॥

॥ऋषि उवाच ॥३१॥

इति स्तुत्वाऽवसाने समहालक्ष्मीं ददर्श सः ।
चतुर्भुजां त्रिनयनां महिषासुर घातिनीम् ॥३२॥

॥ इति श्री महालक्ष्मी सूक्तं समाप्तम् ॥११॥

॥ श्री लक्ष्मी द्वादशनामानि स्तोत्रम् ॥

त्रैलोक्य पूजिते देवि कमले विष्णुवल्लभे । यथा त्वमचला कृष्णे तथा भव मयि स्थिरा ॥
ईश्वरी कमला लक्ष्मीश्चला भूतिर्हरिप्रिया । पद्मा पद्मालया सम्पदुच्चैः श्रीः पद्मधारिणी ॥
द्वादशैतानि नामानि लक्ष्मीं सम्पूज्य यः पठेत् । स्थिरा लक्ष्मीर्भवेत्तस्य पुत्रदारादिभिः सह ॥

॥ इति श्रीलक्ष्मी द्वादश नामानि स्तोत्रम् सम्पूर्णम् ॥

॥ श्री कमला कवचम् ॥

अथ वक्ष्ये महेशानि कवचं सर्वकामदम् । यस्य विज्ञानमात्रेण भवेत्साक्षात्सदाशिवः ॥१॥
नार्चनं तस्य देवेशि मन्त्रमात्रं जपेन्नरः । स भवेत्पार्वतीपुत्रः सर्वशास्त्रविशारदः ॥२॥
विद्यार्थिनां सदा सेव्या धनदात्रीविशेषतः । धनार्थिभिः सदा सेव्या कमला विष्णुवल्लभा ॥३॥

विनियोग:- अस्याश्चतुरक्षरी विष्णुवल्लभायाः कवचस्य श्रीभगवान शिव ऋषिः, अनुष्टुप् छन्दो वाग्भवी शक्तिर्देवता, वाग्भवं बीजं, लज्जा रमा कीलकं, कामबीजात्मकं कवचं मम सुपाण्डित्य कवित्व सर्वसिद्धि समृद्धये पाठे विनियोगः ।

ऐङ्कारो मस्तके पातु वाग्भवी सर्वसिद्धिदा । ह्रीं पातु चक्षुषोर्मध्ये चक्षुर्युग्मे च शाङ्करी ॥४॥
जिह्वायां मुखवृत्ते च कर्णयोर्दन्तयोर्नसि । ओष्ठाधरे दन्तपंक्तौ तालुमूले हनौ पुनः ॥५॥
पातु मां विष्णुवनिता लक्ष्मीः श्रीवर्णरूपिणी ॥६॥
कर्णयुग्मे भुजद्वन्द्वे स्तनद्वन्द्वे च पार्वती । हृदये मणिबन्धे च ग्रीवायां पार्श्वयोः पुनः ॥७॥
पृष्ठदेशे तथा गुह्ये वामे च दक्षिणे तथा । उपस्थे च नितम्बे च नाभौ जंघाद्वये पुनः ॥८॥
जानुचक्रे पदद्वद्वे घुटिकेंगुलिमूलके । स्वधातुप्राणशक्त्यात्मसीमन्ते मस्तके पुनः ॥९॥
विजया पातु भवने जया पातु सदा मम । सर्वांगे पातु कामेशी महादेवी सरस्वती ॥१०॥
तुष्टिः पातु महामाया उत्कृष्टिः सर्वदाऽवतु । ऋद्धिः पातु महादेवी सर्वत्र शम्भुवल्लभा ॥११॥
वाग्भवी सर्वदा पातु पातु मां हरगेहिनी । रमा पातु महादेवीं पातु माया स्वराट् स्वयं ॥१२॥
सर्वांगे पातु मां लक्ष्मीर्विष्णुमाया सुरेश्वरी । शिवदूती सदा पातु सुन्दरी पातु सर्वदा ॥१३॥
शैरवी पातु सर्वत्र भेरुण्डा सर्वदाऽवतु । त्वरिता पातु मां नित्यमुग्रतारा सदाऽवतु ॥१४॥
पातु मां कालिका नित्यं कालरात्रिः सदाऽवतु । नवदुर्गा सदा पान्तु कामाक्षी सर्वदाऽवतु ॥१५॥
योगिन्यः सर्वदा पान्तु मुद्राः पान्तु सदा मम । मात्रा पान्तु सदा देव्यश्चक्रस्था योगिनीगणाः ॥१६॥
सर्वत्र सर्वकार्येषु सर्वकर्मसु सर्वदा । पातु मां देवदेवी च लक्ष्मीः सर्वसमृद्धिदा ॥१७॥
इति ते कथितं दिव्यं कवचं सर्वसिद्धये । यत्र तत्र न वक्तव्यं यदीच्छेदात्मनो हितम् ॥१८॥
शठाय भक्तिहीनाय निन्दकाय महेश्वरी । न्यूनांगे चातिरिक्तांगे दर्शयेन्न कदाचन ॥१९॥
न स्तवं दर्शयेद्दिव्यं सन्दर्श्य शिवहा भवेत् । कुलीनाय महेच्छाय दुर्गाभक्तिपराय च ॥२०॥
वैष्णवाय विशुद्धाय दद्यात्कवचमुत्तमम् । निजशिष्याय शांताय धनिने ज्ञानिने तथा ॥२१॥
दद्यात् कवचमित्युक्तं सर्वतन्त्रसमन्वितम् । शनौ मङ्गलवारे च रक्तचन्दनकैस्तथा ॥२२॥
यावकेन लिखेन्मन्त्रं सर्वतन्त्रसमन्वितम् । विलिख्य कवचं दिव्यं स्वयम्भुकुसुमैः शुभैः ॥२३॥
स्वशुक्रः परशुक्रैर्वा नानागन्धसमन्वितैः । गोरोचना कुंकुमेन रक्तचन्दनकेन वा ॥२४॥
सुतिथौ शुभयोगे वा श्रवणायां रवेर्दिने । आश्विन्यां कृत्तिकायां वा फाल्गुन्यां वा मघासु च ॥२५॥
पूर्वभाद्रपदायोगे स्वात्यां मंगलवासरे । विलखेत्प्रपठेत्स्तोत्रं शुभयोगे सुरालये ॥२६॥
आयुष्मत्प्रीतियोगे च ब्रह्मयोगे विशेषतः । इन्द्रयोगे शुभे योगे शुक्रयोगे तथैव च ॥२७॥
कौलके बालके चैव वणिजे चैव सत्तमः । शून्यागारे श्मशाने च विजने च विशेषतः ॥२८॥
कुमारीं पूजयित्वादौ यजेद्देवीं सनातनीम् । मत्स्यैर्मांसैः शाकसूपैः पूजयेत्परदेवताम् ॥२९॥
घृताद्यैः सोपकरणैः पुष्पधूपैर्विशेषतः । ब्राह्मणान् भोजयित्वा च पूजयेत्परमेश्वरीं ॥३०॥
अखेटकमुपाख्यानं तत्र कुर्याद्दिनत्रयम् । तदाधरेन्महाविद्यां शंकरेण प्रभाषिताम् ॥३१॥
मारणद्वैषणादीनि लभते नात्र संशयः । स भवेत्पार्वतीपुत्रः सर्वशास्त्रपुरस्कृतः ॥३२॥

गुरुर्देवो हरः साक्षात्पत्नी तस्य हरप्रिया । अभेदेन भजेद्यस्तु तस्य सिद्धिरदूरतः ॥३३॥
पठति य इह मर्त्यो नित्यमार्द्रान्तरात्मा जपफलमनुमेयं लप्स्यते यद्विधेयम् ।
स भवति पदमुच्चैः सम्पदां पादनम्र- क्षितिपमुकुटलक्ष्मीर्लक्षणानां चिराय ॥३४॥

॥ इति विश्वसारतंत्रे कमलात्मिका कवचम् ॥

॥ श्रीमहालक्ष्मी हृदयम् ॥

विनियोगः- आद्यादि श्रीमहालक्ष्मीहृदयमाला मंत्रस्य भार्गव ऋषिः, आद्यादि श्रीमहालक्ष्मीर्देवता, अनुष्टुबादिनानाछन्दासि, श्रीं बीजम्, ह्रीं शक्तिः, ऐं कीलकम्, आद्यादिमहालक्ष्मीप्रसादसिद्ध्यर्थं जपे विनियोगः।

न्यासः- ॐ भार्गव ऋषये नमः शिरसि। अनुष्टुबादिनानाछन्देभ्यो नमः मुखे। आद्यादिमहालक्ष्म्यै देवतायै नमो हृदये। श्रीं बीजाय नमः गुह्ये। ह्रीं शक्तये नमः पादयोः। ऐं कीलकाय नमः नाभौ। ॐ विनियोगाय नमः सर्वाङ्गेषु।

करन्यासः- ॐश्रीं अंगुष्ठाभ्यां नमः। ॐ ह्रीं तर्जनीभ्यां नमः। ॐ ऐं मध्यमाभ्यां नमः। ॐ श्रीं अनामिकाभ्यां नमः। ॐह्रीं कनिष्ठिकाभ्यां नमः। ॐ ऐं करतल करपृष्ठाभ्यां नमः।

षडङ्गन्यास :- ॐश्रीं हृदयाय नमः। ॐह्रीं शिरसे स्वाहा। ॐ ऐं शिखायै वषट्। ॐ श्रीं कवचाय हुँ। ॐ ह्रीं नेत्रत्रयाय वौषट्। ॐ ऐं अस्त्राय फट्।

ॐ श्रीं ह्रीं ऐं इति दिग्बन्धः।

॥ध्यानम्॥

हस्तद्वयेन कमले धारयन्तीं स्वलीलया। हारनूपुरसंयुक्तां लक्ष्मीं देवीं विचिन्तये ॥

सम्पूज्य प्रार्थयेत्-

शंखचक्रगदाहस्ते शुभ्रवर्णे सुवासिनि । मम देहि वरं लक्ष्मि सर्वसिद्धिप्रदायिनि ॥

ॐ श्रीं ह्रीं ऐं महालक्ष्म्यै कमलधारिण्यै सिंहवाहिन्यै स्वाहा। इति मंत्रं जपित्वा स्तोत्रं पठेत्। यथा-

वन्दे लक्ष्मीं परिशिवमयीं शुद्धजांबूनदाभां । तेजोरूपां कनकवसनां सर्वभूषोज्ज्वलांगीम् ॥
बीजापूरं कनककलशं हेमपद्मं दधानामाद्यां । शक्तिं सकलजननीं विष्णुवामाङ्कसंस्थाम् ॥१॥
श्रीमत्सौभाग्यजननीं स्तौमि लक्ष्मीं सनातनीं । सर्वकामफलावाप्ति साधनैकसुखावहां ॥२॥
स्मरामि नित्यं देवेशि त्वया प्रेरितमानसः । त्वदाज्ञां शिरसा धृत्वा भजामि परमेश्वरीं ॥३॥

समस्तसम्पत्सुखदां महाश्रियं, समस्तसौभाग्यकरीं महाश्रियम् ।
समस्तकल्याणकरीं महाश्रियम्, भजाम्यहं ज्ञानकरीं महाश्रियम् ॥४॥
विज्ञानसम्पत्सुखदां सनातनीं, विचित्रवाग्भूतिकरीं मनोहराम् ।
अनन्तसामोदसुखप्रदायिनीं, नमाम्यहं भूतिकरीं हरिप्रियाम् ॥५॥
समस्तभूतान्तरसंस्थिता त्वं, समस्तभोक्त्रीश्वरि विश्वरूपे ।

तन्नास्ति यत्त्वद्व्यतिरिक्तवस्तु, त्वत्पादपद्मं प्रणमाम्यहं श्री ॥६॥
दारिद्र्यदुःखौघतमोपहन्त्रि, त्वत्पादपद्मं मयि सन्निधत्स्व ।
दीनार्तिविच्छेदनहेतुभूतैः, कृपाकटाक्षैरभिषिञ्च मां श्रीं ॥७॥
अम्बं प्रसीद करुणासुधयार्द्रदृष्ट्या, मां त्वत्कृपा द्रविण गेहमिमं कुरुष्व ।
आलोकय प्रणतहृद्गतशोकहन्त्रि, त्वत्पादपद्मयुगलं प्रणमाम्यहं श्रीः ॥८॥
शान्त्यै नमोऽस्तु शरणागत रक्षणायै, कान्त्यै नमोऽस्तु कमनीयगुणाश्रयायै ।
क्षान्त्यै नमोऽस्तु दुरितक्षयकारणायै, धात्र्यै नमोऽस्तु धनधान्यसमृद्धिदायै ॥९॥
शक्त्यै नमोऽस्तु शशिशेखरसंस्तुतायै, रत्यै नमोऽस्तु रजनीकरसोदरायै ।
भक्त्यै नमोऽस्तु भवसागरतारकायै, मत्यै नमोऽस्तु मधुसूदनवल्लभायै ॥१०॥
लक्ष्म्यै नमोऽस्तु शुभलक्षणलक्षितायै, सिद्ध्यै नमोऽस्तु शिवसिद्धपूजितायै ।
धृत्यै नमोऽस्त्वमित दुर्गतिभञ्जनायै, गत्यै नमोऽस्तु वरसद्गतिदायकायै ॥११॥
देव्यै नमोऽस्तु दिवि देवगणार्चितायै, भूत्यै नमोऽस्तु भुवनार्तिविनाशनायै ।
दात्र्यै नमोऽस्तु धरणीधरवल्लभायै, पुष्ट्यै नमोऽस्तु पुरुषोत्तमवल्लभायै ॥१२॥
सुतीव्र दारिद्र्यविदुःख हन्त्र्यै, नमोऽस्तु ते सर्वभयापहन्त्र्यै ।
श्रीविष्णुवक्षःस्थलसंस्थितायै, नमो नमस्सर्वविभूतिदायै ॥१३॥
जयतु जयतु लक्ष्मीर्लक्षणालंकृताङ्गी, जयतु जयतु पद्मा पद्मा पद्मसद्माभिवन्द्या ।
जयतु जयतु विद्या विष्णुवामाङ्कसंस्था, जयतु जयतु सम्यक्सर्वसम्पत्करी श्रीः ॥१४॥
जयतु जयतु देवी देवसङ्घाभिपूज्या, जयतु जयतु भद्रा भार्गवी भाग्यरूपा ।
जयतु जयतु नित्या निर्मलज्ञानवेद्या, जयतु जयतु सत्या सर्वभूतान्तरस्था ॥१५॥
जयतु जयतु रम्या रत्नगर्भान्तरस्था, जयतु जयतु शुद्धा शुद्धजाम्बूनदाभा ।
जयतु जयतु कान्ता कान्तिमद्भासिताङ्गी, जयतु जयतु शान्ता शीघ्रमागच्छ सौम्ये ॥१६॥
यस्याः कलाद्याः कमलोद्भवाद्या, रुद्राश्च शक्रप्रमुखाश्च देवाः ।
जीवन्ति सर्वा अपि शक्तयस्ताः, प्रभुत्वमाप्ताः परमायुषस्ते ॥१७॥
लिलेख निटिले विधिर्मम लिपिं विसृज्यान्तरं, विलिखितव्यमेतदिति तत्फलप्राप्तये ।
तदन्तरफले स्फुटं कमलवासिनी श्रीरमां , समर्पयं समुद्रिकां सकलभाग्य संसूचिकाम् ॥१८॥
कलया ते यथा देवि जीवन्ति सचराचराः । तथा सम्पत्करे लक्ष्मि सर्वदा सम्प्रसीद मे ॥१९॥
यथा विष्णुर्ध्रुवे नित्यं स्वकलां सन्न्यवेशयत् । तथैव स्वकलां लक्ष्मि मयि सम्यक् समर्पय ॥२०॥
सर्वसौख्यप्रदे देवि भक्तानामभयप्रदे । अचलां कुरु यत्नेन कलां मयि निवेशिताम् ॥२१॥
मुदास्तां मद्भाले परमपदलक्ष्मीः स्फुटकला । सदा वैकुण्ठश्रीर्निवसतु कला मे नयनयोः ॥
वसेत्सत्ये लोके मम वचसि लक्ष्मीवरकला । श्रियश्श्वेतद्वीपे निवसतु कला मे स्वकरयोः ॥२२॥

तावन्नित्यं ममांगेषु क्षीराब्धौ श्रीकला वसेत् । सूर्याचन्द्रमसौ यावद्यावल्लक्ष्मीपतिः श्रिया ॥२३॥
सर्वमंगलसम्पूर्णा सर्वैश्वर्य समन्विता । आद्यादिश्रीमहालक्ष्मि त्वत्कला मयि तिष्ठतु ॥२४॥
अज्ञानतिमिरं हन्तुं शुद्धज्ञानप्रकाशिका । सर्वैश्वर्यप्रदामेस्तु त्वत्कला मयि संस्थिता ॥२५॥
अलक्ष्मीं हरतुः क्षिप्रं तमः सूर्यप्रभा यथा । वितनोतु मम श्रेयस्त्वत्कला मयि संस्थिता ॥२६॥
ऐश्वर्य मंगलोत्पत्तिस्त्वत्कलायां निधीयते । मयि तस्मात्कृतार्थोऽस्मि पात्रमस्मि स्थितेस्तव ॥२७॥
भवदावेश भाग्यार्हो भाग्यवानस्मि भार्गवि । त्वत्प्रसादात्पवित्रोऽहं लोकमातर्नमोस्तु ते ॥२८॥
पुनासिमां त्वंकलयैवयस्मादतः समागच्छममाग्रतस्त्वम् । परम्पदंश्रीर्भवसुप्रसन्नामय्यच्युतेनप्रविशादिलक्ष्मि ॥२९॥
श्रीवैकुण्ठस्थिते लक्ष्मि समागच्छ ममाग्रतः । नारायणेन सह मां कृपादृष्ट्याऽवलोकय ॥३०॥
सत्यलोकस्थिते लक्ष्मि त्वं ममागच्छ सन्निधिम् । वासुदेवेन सहिता प्रसीद वरदा भव ॥३१॥
श्वेतद्वीपस्थिते लक्ष्मि शीघ्रमागच्छ सुव्रते । विष्णुना सहिते देवि जगन्मातः प्रसीद मे ॥३२॥
क्षीराम्बुधिस्थिते लक्ष्मि समागच्छ समाधवे । त्वत्कृपादृष्टिसुधया सततं मां विलोकय ॥३३॥
रत्नगर्भस्थिते लक्ष्मि परिपूर्णहिरणमये । समागच्छ समागच्छ स्थित्वाऽऽशु पुरतो मम ॥३४॥
स्थिरा भव महालक्ष्मि निश्चला भव निर्मले । प्रसन्ने कमले देवि प्रसन्नहृदया भव ॥३५॥
श्रीधरे श्रीमहाभूते त्वदन्तःस्थं महानिधिम् । शीघ्रमुद्धृत्य परतः प्रदर्शय समर्पय ॥३६॥
वसुन्धरे श्रीवसुधे वसुदोग्धि कृपामयि । त्वत्कुक्षिगतसर्वस्वं शीघ्रं मे सम्प्रदर्शय ॥३७॥
विष्णुप्रिये रत्नगर्भे समस्तफलदे शिवे । त्वद्गर्भगतहेमादीन् सम्प्रदर्शय दर्शय ॥३८॥
रसातलगते लक्ष्मि शीघ्रमागच्छ मे पुरः । न जाने परमं रूपं मातर्मे सम्प्रदर्शय ॥३९॥
आविर्भव मनोवेगाच्छीघ्रमागच्छ मे पुरः । मा वत्स भैरिहेत्युक्त्वा कामं गौरिव रक्ष माम् ॥४०॥
देविं शीघ्रं समागच्छ धरणीगर्भसंस्थिते । मातस्त्वद्भृत्यभृत्योऽहं मृगये त्वां कुतूहलात् ॥४१॥
उत्तिष्ठ जागृहि त्वंमे समुत्तिष्ठ सुजागृहि । अक्षयान् हेमकलशान् सुवर्णेन सुपूरितान् ॥४२॥
निक्षेपान् मे समाकृष्य समुद्धृत्य ममाग्रतः । समुन्नतानना भूत्वा समाधेहि धरान्तरात् ॥४३॥
मत्सन्निधिं समागच्छ मदाहितकृपारसात् । प्रसीद श्रेयसान्दोग्धि लक्ष्मि मे नयनाग्रतः ॥४४॥
अत्रोपविश लक्ष्मि त्वं स्थिरा भव हिरणमयि । सुस्थिरा भव सम्प्रीत्या प्रसीद वरदा भव ॥४५॥
आनीय त्वं तथा देवि निधीन् मे सम्प्रदर्शय । अद्य क्षणेन सहसा दत्वा संरक्ष मां सदा ॥४६॥
मयि तिष्ठ तथा नित्यं यथेन्द्रादिषु तिष्ठसि । अभयं कुरु मे देवि महालक्ष्मि नमोऽस्तुते ॥४७॥
समागच्छ महालक्ष्मि शुद्धजाम्बूनद प्रभे । प्रसीद पुरतः स्थित्वा प्रणतं मां विलोकय ॥४८॥
लक्ष्मि भुवं गता भासि यत्र यत्र हिरणमयी । तत्र तत्र स्थिता त्वं मे तव रूपं प्रदर्शय ॥४९॥
क्रीडते बहुधा भूमौ परिपूर्णहिरणमये । मम मूर्द्धनि ते हस्तमविलम्बितमर्पय ॥५०॥
फलद्भाग्योदये लक्ष्मि समस्तपुरवासिनि । प्रसीद मे महालक्ष्मि परिपूर्णमनोरथे ॥५१॥

अयोध्यादिषु सर्वेषु नगरेषु समास्थिते । वैभवैर्विविधैर्युक्ता समागच्छ बलान्विते ॥५२॥
समागच्छ समागच्छ ममाग्रे भव सुस्थिरा । करुणारसनिष्पन्द नेत्रद्वय विलासिनी ॥५३॥
सन्निधत्स्व महालक्ष्मि त्वत्पाणिं मम मस्तके । करुणासुधया मां त्वमभिषिञ्च स्थिरीकुरु ॥५४॥
सर्वराजगृहे लक्ष्मि समागच्छ मुदान्विते । स्थित्वाशु पुरतो मेऽद्य प्रसादेनाऽभयं कुरु ॥५५॥
सादरं मस्तके हस्तं मम त्वं कृपयाऽर्पय । सर्वराजगृहे लक्ष्मि त्वत्कला मयि तिष्ठतु ॥५६॥
आद्यादि श्रीमहालक्ष्मि विष्णुवामाङ्कसंस्थिते । प्रत्यक्षं कुरु मे रूपं रक्ष मां शरणागतम् ॥५७॥
प्रसीद मे महालक्ष्मि सुप्रसीद महाशिवे । अचला भव सम्प्रीत्या सुस्थिरा भव मद्गृहे ॥५८॥
यावत्तिष्ठन्ति वेदाश्च यावत्त्वन्नाम तिष्ठति । यावद्विष्णुश्च यावत्त्वं तावत्कुरु कृपांमयि ॥५९॥
चान्द्रीकला यथा शुक्ले वर्द्धते सा दिने दिने । तथा दया ते मय्येव वर्द्धतामभिवर्द्धताम् ॥६०॥
यथा वैकुण्ठनगरे यथा वै क्षीरसागरे । तथा मद्भवने तिष्ठ स्थिरं श्रीविष्णुना सह ॥६१॥
योगिनां हृदये नित्यं यथा तिष्ठसि विष्णुना । तथा मद्भवने तिष्ठ स्थिरं श्रीविष्णुना सह ॥६२॥

नारायणस्य हृदये भवती यथास्ते नारायणोपि तव हृत्कमले यथाऽस्ते ।
नारायणस्त्वमपि नित्यमुभौ तथैव तौ तिष्ठतां हृदि ममापि दयावति श्रीः ॥६३॥

विज्ञानवृद्धिं हृदये कुरु श्रीः सौभाग्यवृद्धिं कुरु मे गृहे श्रीः ।
दया सुवृद्धिं कुरुतां मयि श्रीः सुवर्णवृद्धिं कुरु मे गृहे श्रीः ॥६४॥

न मां त्यजेथाः श्रितकल्पवल्लि सद्भक्तचिन्तामणि कामधेनो ।
विश्वस्य मातर्भव सुप्रसन्ना गृहे कलत्रेषु च पुत्रवर्गे ॥६५॥

आद्यादि माये त्वमजाण्डबीजं त्वमेव साकार निराकृति स्त्वम् ।
त्वया धृताश्चाब्जभवाण्ड सङ्घान् चित्रं चरित्रं तव देवि विष्णोः ॥६६॥

ब्रह्मरुद्रादयो देवा वेदाश्चापि न शक्नुयुः । महिमानं तव स्तोतुं मन्दोऽहं शक्नुयां कथम् ॥६७॥
अम्ब त्वद्वत्सवाक्यानि सूक्ता सूक्तानि यानि च । तानि स्वीकुरु सर्वज्ञे दयालुत्वेन सादरम् ॥६८॥
भवतीं शरणं गत्वा कृतार्थाः स्युः पुरातनाः । इति संचिन्त्य मनसा त्वामहं शरणं ब्रजे ॥६९॥
अनन्ता नित्यसुखिनस्त्वद्भक्तास्त्वत्परायणाः । इति वेदप्रमाणाद्धि देवि त्वां शरण ब्रजे ॥७०॥
तव प्रतिज्ञा मद्भक्ता न नश्यन्तीत्यपि क्वचित् । इति सञ्चिन्त्य संचिन्त्य प्राणान्सन्धारयाम्यहम् ॥७१॥
त्वदधीनस्त्वहं मातस्त्वत्कृपा मयि विद्यते । यावत्सम्पूर्णकामः स्यात्तावद्देहि दयानिधे ॥७२॥
क्षणमात्रं न शक्नोमि जीवितुं त्वत्कृपां विना । न जीवन्तीह जलजा जलं त्यक्त्वा जलग्रहाः ॥७३॥
यथाहि पुत्र वात्सल्याज्जननी प्रस्नुतस्तनी । वत्सं त्वरितमागत्य सम्प्रीणयति वत्सला ॥७४॥
यदि स्यान्तव पुत्रोऽहं माता त्वं यदि मामकी । दया पयोधरस्तन्य सुधाभिरभिषिञ्च माम् ॥७५॥
मृग्यो न गुणलेशोऽपि मयि दोषैकमन्दिरे । पांसूनां वृष्टिविन्दूनां दोषाणाञ्च नमेमितिः ॥७६॥

पापिनामहमेवान्यो दयालूनान् त्वमग्रणीः । दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये ॥७७॥
विधिनाहन्न सृष्टश्चेन्न स्यात्तव दयालुता । आमयो वा न सृष्टश्चेदौषधस्य वृथोदयः ॥७८॥
कृपा मदग्रजा किं ते अहं किं वा तदग्रजः । विचार्य देहि मे वित्तं तव देवि दयानिधे ॥७९॥

माता पिता त्वं गुरु सद्गतिः श्रीस्त्वमेव सञ्जीवनहेतुभूता ।
अन्यन्न मन्ये जगदेकनाथे त्वमेव सर्वं मम देवि सत्ये ॥८०॥
आद्यादिलक्ष्मीर्भव सुप्रसन्ना विशुद्धविज्ञान सुखैकदोग्ध्री ।
अज्ञानहन्त्री त्रिगुणातिरिक्ता प्रज्ञाननेत्री भव सुप्रसन्ना ॥८१॥
अशेषवाग् जाड्यमलाप हन्त्री नवन्नवं स्पष्ट सुवाक् प्रदायिनी ।
ममेह जिह्वाग्र सुरङ्ग नर्त्तकी भव प्रसन्ना वदने च मे श्रीः ॥८२॥
समस्तसम्पत्सु विराजमाना, समस्ततेजश्चय भासमाना ।
विष्णुप्रिये त्वम् भव दीप्यमाना वाग्देवता मे नयने प्रसन्ना ॥८३॥
सर्वं प्रदर्शे सकलार्थदे त्वं प्रभा सुलावण्य दया प्रदोग्ध्री ।
सुवर्णदे त्वं सुमुखी भव श्रीर्हिरण्यमयी मे नयने प्रसन्ना ॥८४॥
सर्वार्थदा सर्वजगत्प्रसूतिः सर्वेश्वरी सर्वभयाप - हन्त्री ।
सर्वोन्नता त्वं सुमुखी भव श्रीर्हिरण्यमयी मे नयने प्रसन्ना ॥८५॥
समस्त विघ्नौघ विनाशकारिणी समस्तभक्तोद्धरणे विचक्षणा ।
अनन्त सौभाग्य सुखप्रदायिनी हिरण्यमयी मे नयने प्रसन्ना ॥८६॥
देवि प्रसीद दयनीयतमाय मह्यं देवाधिनाथ भव देवगणाभिवन्द्ये ।
मातस्तथैव भव सन्निहिता दृशोर्मे पत्या समं मम मुखे भव सुप्रसन्ना ॥८७॥
मा वत्सभैरभयदानकरोऽर्पितस्ते मौलौ ममेति मम दीनदयानुकम्पे ।
मातः समर्पय मुदा करुणाकटाक्षं मांगल्यबीजमिह नः सृज जन्प्रमातः ॥८८॥
कटाक्ष इहकामधुक्तव मनस्तु चिन्तामणिः करः सुरतरुः सदा नवनिधिस्त्वमेवेन्दिरे ।
भवेत्तव दयारसो मम रसायनं चान्वहं मुखं तव कलानिधिर्विविध वाञ्छितार्थप्रदम् ॥८९॥
यथा रसस्पर्शनतोऽयसोपि सुवर्णता स्यात्कमले तथा ते ।
कटाक्षसंस्पर्शनतो जनानाममङ्गलानामपि मंगलं त्वम् ॥९०॥
देहीति नास्तीति वचः प्रवेशाद्भीतो रमे त्वां शरणं प्रपद्ये ।
अतः सदाऽस्मिन्नऽभयप्रदा त्वं सहैव पत्या मयि सन्निधेहि ॥९१॥
कल्पद्रुमेण मणिना सहिता सुरम्या श्रीस्ते कलामयि रसेन र सायनेन ।
आस्तां यतो मम च दृक् शिरपाणिपादस्पृष्टाः सुवर्णवपुषः स्थिरजङ्गमाः स्युः ॥९२॥
आद्यादिविष्णोः स्थिरधर्मपत्नी त्वमेव पत्या मयि सन्निधेहि ।

आद्यादिलक्ष्मि त्वदनुग्रहेण पदे पदे मे निधिदर्शनं स्यात् ॥९३॥
आद्यादि लक्ष्मीहृदयं पठेद्यः स राज्यलक्ष्मीमचलां तनोति ।
महादरिद्रोऽपि भवेद्-धनाढ्यस्तदन्वये श्रीः स्थिरतां प्रयाति ॥९४॥
यस्य स्मरण मात्रेण तुष्टा स्याद् विष्णुवल्लभा । तस्याभीष्टं ददात्याशु तं पालयति पुत्रवत् ॥९५॥
इदं रहस्यं हृदयं सर्वकामफलप्रदम् । जपः पंचसहस्त्रं तु पुरश्चरणमुच्यते ॥९६॥
त्रिकालमेककालं वा नरो भक्तिसमन्वितः । यः पठेच्छृणुयाद्वापि स याति परमां श्रियम् ॥९७॥
महालक्ष्मीं समुद्दिश्य निशि भार्गववासरे । इदं श्रीहृदयं जप्त्वा पंचवारं धनी भवेत् ॥९८॥
अनेन हृदयेनान्नं गर्भिण्या अभिमन्त्रितम् । ददाति तत्कुले पुत्रो जायते श्रीपतिः स्वयम् ॥९९॥
नरेण वाऽथवा नार्य्या लक्ष्मीहृदयमन्त्रिते । जले पीते च तद्वंशे मन्दभाग्यो न जायते ॥१००॥

य आश्विने मासि च शुक्लपक्षे रमोत्सवे सन्निहितेसु भक्त्या ।
पठेत्तथैकोत्तरवारवृद्ध्या लभेत्स सौवर्णमयीं सुवृष्टिम् ॥१०१॥
य एकभक्तोन्वहमेकवर्षं विशुद्धधीः सप्ततिवारजापी ।
स मन्दभाग्योपि रमाकटाक्षाद् भवेत् सहस्त्राक्षशताधिक श्रीः ॥१०२॥
श्रीशांघ्रिभक्तिं हरिदासदास्यं प्रसन्नमन्त्रार्थदृढैकनिष्ठाम् ।
गुरोः स्मृतिं निर्मलबोधबुद्धिं प्रदेहि मातः परमं पदं श्रीः ॥१०३॥
पृथ्वीपतित्वं पुरुषोत्तमत्वं विभूतिवासं विविधार्थसिद्धिम् ।
सम्पूर्णकीर्तिं बहुवर्षभोगं प्रदेहि मे लक्ष्मि पुनः पुनस्त्वम् ॥१०४॥
वादार्थसिद्धिं बहुलोकवश्यं वयः स्थिरत्वं ललनासुभोगं ।
पौत्रादिलब्धिं सकलार्थसिद्धिं प्रदेहि मे भार्गविजन्मजन्मनि ॥१०५॥
सुवर्णवृद्धिं कुरु मे गृहे श्रीर्विभूतिवृद्धिं कुरु मे गृहे श्रीः ।
शिरोबीजं - ॐ यं हं कं लं पं श्रीं ।
ध्यायेल्लक्ष्मीं प्रहसितमुखीं कोटिबालार्कभासां ।
विद्युद्वर्णाम्बरवरधरां भूषणाढ्यां सुशोभाम् ॥१०६॥
बीजापूरं सरसिजयुगलं बिभ्रतीं स्वर्णपात्रं । भर्त्रायुक्तां मुहुरभयदां मह्यमप्यच्युत श्रीः ॥१०७॥
गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृत जपम् । सिद्धिर्भवतु मे देवि त्वत्प्रसादान्मयि स्थिरा ॥१०८॥

॥ इति श्रीअथर्वणरहस्ये श्रीलक्ष्मीहृदयस्तोत्रं सम्पूर्णम् ॥

॥ सद्य: फलदा लक्ष्मीस्तव हृदयम् ॥

श्रीमत्सौभाग्य जननीं स्तौमि लक्ष्मीं सनातनीम् । सर्वकामफलवाप्ति साधनैकसुखावहाम् ॥१॥
श्रीवैकुण्ठस्थिते लक्ष्मि समागच्छ ममाग्रतः । नारायणेन सह मां कृपादृष्ट्यावलोकय ॥२॥
सत्यलोकस्थिते लक्ष्मि त्वं समागच्छ सन्निधिम् । वासुदेवेन सहिता प्रसीद वरदा भव ॥३॥
श्वेतद्वीपस्थिते लक्ष्मि शीघ्रमागच्छ सुव्रते । विष्णुना सहिते देवि जगन्मातः प्रसीद मे ॥४॥
क्षीराब्धिसंस्थिते लक्ष्मि समागच्छ समाधवे । त्वत्कृपादृष्टिसुधया सततं मां विलोकय ॥५॥
रत्नगर्भस्थिते लक्ष्मि परिपूर्ण हिरणमयि । समागच्छ समागच्छ स्थित्वा सुपुरतो मम ॥६॥
स्थिरा भव महालक्ष्मि निश्चला भव निर्मले । प्रसन्ने कमले देवि प्रसन्ना वरदा भव ॥७॥
श्रीधरे श्रीमहाभूमे त्वदन्तस्थ महानिधिम् । शीघ्रमुद्धृत्य पुरतः प्रदर्शय समर्पय ॥८॥
वसुन्धरे श्रीवसुधे वसुदोग्धे कृपामयि । त्वत्कुक्षिगत सर्वस्वं शीघ्रं मे तु प्रदर्शय ॥९॥
विष्णुप्रिये रत्नगर्भे समस्तफलदे शिवे । त्वद्गर्भगत हेमादीन् सम्प्रदर्शय दर्शय ॥१०॥
अत्रोपविश्य लक्ष्मि त्वं स्थिराभव हिरण्यमयि । सुस्थिराभव सुप्रीत्या प्रसन्न वरदाभव ॥११॥
सादरे मस्तके हस्तं मम तव कृपयार्पय । सर्वराजग्रहे लक्ष्मि त्वत्कलामयि तिष्ठतु ॥१२॥
यथा वैकुण्ठनगरे यथैव क्षीरसागरे । तथा मद्भवने तिष्ठ स्थिरं श्रीविष्णुना सह ॥१३॥
आद्यालक्ष्मि महालक्ष्मि विष्णुवामाङ्कसंस्थिते । प्रत्यक्षं कुरु मे रूपं रक्ष मां शरणागतम् ॥१४॥
समागच्छ महालक्ष्मि धनधान्यसमन्विते । प्रसीद पुरतः स्थित्वा प्रणतं मां विलोकय ॥१५॥
दया सुदृष्टिं कुरुतां मयि श्रीः । सुवर्णवृष्टिं कुरु मे गृहे श्रीः ॥१६॥
महालक्ष्मीः समुद्दिश्य निशि भार्गववासरे । इदं श्रीहृदयं जप्त्वा शतवारं धनी भवेत् ॥

॥ इति श्रीसद्यः फलदा लक्ष्मीस्तव हृदयं ॥

॥ श्रीमहालक्ष्मी पञ्जर स्तोत्रम् ॥

विनियोगः- ॐ अस्य श्रीलक्ष्मीपञ्जर महामन्त्रस्य ब्रह्मा ऋषिः, पंक्तिश्छन्दः, श्रीमहालक्ष्मीर्देवता, श्रीं बीजं, स्वाहा शक्तिः, श्रियै इति कीलकं, मम सर्वाभीष्ट सिद्ध्यर्थे लक्ष्मी पञ्जरस्तोत्र जपे विनियोगः।

करन्यासः- ॐ श्रीं ह्रीं विष्णुवल्लभायै अंगुष्ठाभ्यां नमः। ॐ श्रीं ह्रीं जगज्जनन्यै तर्जनीभ्यां नमः। ॐ श्रीं ह्रीं सिद्धिसेवितायै मध्यमाभ्यां नमः। ॐ श्रीं ह्रीं सिद्धिदात्र्यै अनामिकाभ्यां नमः। ॐ श्रीं ह्रीं वाञ्छितपूरिकायै कनिष्ठिकाभ्यां नमः। ॐ श्रीं ह्रीं श्रीं श्रियै नमः स्वाहेति करतल करपृष्ठाभ्यां नमः।

षडङ्गन्यासः- ॐ श्रीं ह्रीं विष्णुवल्लभायै हृदयाय नमः। ॐ श्रीं ह्रीं जगज्जनन्यै शिरसे स्वाहा। ॐ श्रीं ह्रीं सिद्धिसेवितायै शिखायै वषट्। ॐ श्रीं ह्रीं सिद्धिदात्र्यै कवचाय हुम्। ॐ श्रीं ह्रींवाञ्छितपूरिकायै नेत्राभ्यां वौषट्। श्रीं ह्रीं श्रीं श्रियै नमः स्वाहेत्यस्त्राय फट्।

॥ध्यानम्॥

ॐ वन्दे लक्ष्मीं परिशिवमयीं शुद्धजांबूनदाभां । तेजोरूपां कनकवसनां सर्वभूषोज्ज्वलांगीम् ॥
बीजापूरं कनककलशः हेमपद्मं दधानामाद्यां । शक्तिं भुक्ति सकलजननीं विष्णुवामाङ्कसंस्थाम् ॥१॥
शरणं त्वां प्रपन्नोऽस्मि महालक्ष्मि हरिप्रिये । प्रसादं कुरु देवेशि मयि दुष्टेऽपराधिनि ॥२॥
कोटिकन्दर्पलावण्यां सौन्दर्य्यैकस्वरूपताम् । सर्वमंगल मांगल्यां श्रीरामां शरणं ब्रजे ॥३॥

॥ मूलमन्त्र षट्क्रम ॥

ॐ श्रीं ह्रीं ऐं क्लीं नमो विष्णुवल्लभायै महामायायै कं खं गं घं ङंनमस्ते नमस्ते मां पाहि पाहि रक्ष रक्ष धनं धान्यं श्रियं समृद्धि देहि देहि श्रीं श्रियै नमः स्वाहा ॥१॥

ॐ श्रीं ह्रीं ऐं क्लीं नमो जगज्जनन्यै वात्सल्यनिधये चं छं जं झं ञं नमस्ते नमस्ते मां पाहि पाहि रक्ष रक्ष श्रियं प्रतिष्ठां वाक्सिद्धि मे देहि देहि श्रीं श्रियै नमः स्वाहा ॥२॥

ॐ श्रीं ह्रीं ऐं क्लीं नमः सिद्धि सेवितायै सकलाभीष्टदान- दीक्षितायै टं ठं डं ढं णं नमस्ते नमस्ते मां पाहि पाहि रक्ष रक्ष सर्वतोऽभयं देहि देहि श्रीं श्रियै नमः स्वाहा ॥३॥

ॐ श्रीं ह्रीं ऐं क्लीं नमः सिद्धिदात्र्यै महा अचिन्त्यशक्तिकायै तं थं दं धं नं नमस्ते नमस्ते मां पाहि पाहि रक्ष रक्ष मे सर्वाभीष्ट सिद्धिं देहि देहि श्रीं श्रियै नमः स्वाहा ॥४॥

ॐ श्रीं ह्रीं ऐं क्लीं नमो वाञ्छितपूरिकायै सर्वसिद्धिमूलभूतायै पं फं बं भं मं नमस्ते नमस्ते मांपाहिपाहि रक्षरक्षमे मनोवाञ्छितां सर्वार्थभूतां सिद्धिं देहि देहि श्रीं श्रियै नमः स्वाहा ॥५॥

ॐ श्रीं ह्रीं ऐं क्लीं कमले कमलालये मह्यम् प्रसीद प्रसीद महालक्ष्मि तुभ्यं नमो नमस्ते जगद्धितायै यं रं लं वं शं षं सं हं क्षं नमस्ते नमस्ते मां पाहि पाहि रक्ष रक्ष मे वश्याकर्षण मोहनस्तंभनोच्चाटन ताडनाचिन्त्यशक्तिवैभवं देहि देहि श्रीं श्रियै नमः स्वाहा ॥६॥

ॐ श्रीं ह्रीं ऐं क्लीं धात्र्यै नमः स्वाहा। ॐ श्रीं ह्रीं ऐं क्लीं श्रीं बीजरूपायै नमः स्वाहा। ॐ श्रीं ह्रीं ऐं क्लीं विष्णुवल्लभायै नमः स्वाहा। ॐ श्रीं ह्रीं ऐं क्लीं सिद्ध्यै नमः स्वाहा। ॐ श्रीं ह्रीं ऐं क्लीं बुद्ध्यै नमः स्वाहा। ॐ श्रीं ह्रीं ऐं क्लीं धृत्यै नमः स्वाहा। ॐ श्रीं ह्रीं ऐं क्लीं मत्यै नमः स्वाहा। ॐ श्रीं ह्रीं ऐं क्लीं कान्त्यै नमः स्वाहा। ॐ श्रीं ह्रीं ऐं क्लीं शान्त्यै नमः स्वाहा। ॐ श्रीं ह्रीं ऐं क्लीं सर्वतोभद्ररूपायै नमः स्वाहा। ॐ श्रीं ह्रीं ऐं क्लीं श्रीं श्रियै नमः स्वाहा। ॐ नमो भगवति ब्रह्मादि वेदमातर्वेदोद्भवे वेदगर्भे सर्वशक्तिशिरोमणे श्रीं हरिवल्लभे ममाभीष्टं पूरय पूरय मां सिद्धिभाजनं कुरु कुरु अमृतं कुरु कुरु अभयं कुरु कुरु सर्व कार्येषु ज्वल ज्वल प्रज्वल प्रज्वल मे सुतशक्तिं दीपय दीपय ममाहितान् नाशय नाशय असाध्य कार्यं साधय साधय ह्रीं ह्रीं ह्रीं ग्लौं ग्लौं ग्लौं श्रीं श्रियै नमः स्वाहा।

॥ इति लक्ष्मीमाला मन्त्रः १०८ जपं कुर्यात् ॥

॥ लक्ष्मी पञ्जर स्तोत्रम् ॥

ॐ शिरो मे रक्षताद् देवी पद्मा पङ्कजधारिणी । भालं पातु जगन्माता लक्ष्मीः पद्मालया च मे ॥१॥
मुखं पायान्महामाया दृशौ मे भृगुकन्यका । घ्राणं सिन्धुसुता पायान्नेत्रे मे विष्णुवल्लभा ॥२॥
कण्ठं रक्षतु कौमारी स्कन्धौ पातु हरिप्रिया । हृदयं मे सदा रक्षेत्सर्वशक्तिविधायिनी ॥३॥
नाभिं सर्वेश्वरी पायात्सर्वभूतालया च मे । कटिञ्च कमला पातु ऊरू ब्रह्मादि देवता ॥४॥
जंघे जगन्मयी रक्षेत्पादौ सर्व सुखावहा । श्रीबीज वास निरता सर्वाङ्गे जनकात्मजा ॥५॥
सर्वतोभद्ररूपा मामव्याद् दिक्षु विदिक्षु च । विषमे सङ्कटे दुर्गे पातु मां व्योमदासिनी ॥६॥
इतीदं पञ्जरं लक्ष्म्या गुह्याद् गुह्यतरं महत् । गोपनीयं प्रयत्नेन न दद्याद्यस्य कस्य च ॥७॥
यः पठेत्प्रयतोनित्यं फलाहारी जितेन्द्रियः । ध्यायेल्लक्ष्मीपदं प्रीत्या तस्य किञ्चिन्न दुर्लभं ।
विष्णोर्नाम्ना सहस्रेण सम्पुटीकृत्य यः पठेत् ॥८॥
पञ्चायुत प्रयत्नेन स सिद्धस्स्याद्यथा हरिः । विल्वपीठे लिखेद्यन्त्रं षट्कोणं मन्त्रसंयुतम् ॥९॥
तत्र सम्पूजयन्देवीं तदग्रे पाठमाचरेत् । हरिद्रामालया संख्यां कुर्वन्नित्यमतन्द्रितः ॥१०॥
सर्वसिद्धिमवाप्नोति यद्यद्वाञ्छिति सत्वरम् ॥११॥

॥ इति श्रीअथर्वणरहस्ये श्रीलक्ष्मीपंजरस्तोत्रं सम्पूर्णम् ॥

॥ श्री लक्ष्मीस्तोत्रम् ॥

क्षमस्व भगवत्यम्ब क्षमाशीले परात्परे । शुद्धसत्त्वस्वरूपे च कोपादिपरिवर्जिते ॥
उपमे सर्वसाध्वीनां देवीना देवपूजिते । त्वया विना जगत्सर्वं मृततुल्यं च निष्फलं ॥
सर्वसम्पत्स्वरूपा त्वं सर्वेषां सर्वरूपिणी । रासेश्वर्यधिदेवी त्वं त्वत्कलाः सर्वयोषितः ॥
कैलासे पार्वती त्वं च क्षीरोदे सिन्धुकन्यका । स्वर्गे च स्वर्गलक्ष्मीस्त्वं मर्त्यलक्ष्मीश्च भूतले ॥
वैकुण्ठे च महालक्ष्मीर्देवदेवी सरस्वती । गंगा च तुलसी त्वं च सावित्री ब्रह्मलोकतः ॥
कृष्णप्राणाधिदेवी त्वं गोलोके राधिका स्वयं । रासे रासेश्वरी त्वं च वृन्दावनवने वने ॥
कृष्णप्रिया त्वं भाण्डीरे चन्द्रा चन्दनकानने । विरजा चम्पकवने शतशृङ्गे च सुन्दरी ॥
पद्मावती पद्मवने मालती मालतीवने । कुन्ददन्ती कुन्दवने सुशीला केतकीवने ॥
कदम्बमाला त्वं देवी कदम्बकाननेऽपि च । राजलक्ष्मी राजगेहे गृहलक्ष्मीर्गृहे गृहे ॥
इत्युक्त्वा देवताः सर्वे मुनयो मनवस्तथा । रुरुदुर्नम्रवदनाः शुष्ककण्ठोष्ठतालुकाः ॥
इति लक्ष्मीस्तवं पुण्यं सर्वदेवैः कृतं शुभं । यः पठेत्प्रातरुत्थाय स वै सर्वं लभेद्ध्रुवं ॥
अभार्यो लभते भार्यां विनीतां च सुतां सतीं । सुशीलां सुन्दरीं रम्यामतिसुप्रियवादिनीं ॥

पुत्रपौत्रवतीं शुद्धां कुलजां कोमलां वरां । अपुत्रो लभते पुत्रं वैष्णवं चिरजीवनम् ॥
परमैश्वर्ययुक्तं च विद्यावन्तं यशस्विनम् । भ्रष्टराज्यो लभेद्राज्यं भ्रष्टश्रीर्लभते श्रियं ॥
हतबन्धुर्लभेद्बन्धुं धनभ्रष्टो धनं लभेत् । कीर्तिहीनो लभेत्कीर्तिं प्रतिष्ठां च लभेद्ध्रुवं ॥
सर्वमंगलदं स्तोत्रं शोकसन्तापनाशनम् । हर्षानन्दकरं शश्वद्धर्ममोक्षसुहृत्प्रदम् ॥

॥ इति श्रीलक्ष्मीस्तोत्रम् सम्पूर्णम् ॥

॥ श्री सिद्धलक्ष्मी स्तोत्रम् ॥

विनियोग:- **ॐ अस्य श्रीसिद्धिलक्ष्मीस्तोत्र मंत्रस्य हिरण्यगर्भ ऋषिः, अनुष्टुप् छन्दः, श्रीमहाकाली-महालक्ष्मी-महासरस्वत्यो देवताः, श्रीं बीजं, ह्रीं शक्तिः, क्लीं कीलकं, मम सर्वक्लेशपीडा परिहारार्थं सर्वदुःखदारिद्र्य नाशनार्थं सर्वकार्यसिद्ध्यर्थं च श्रीसिद्धलक्ष्मीस्तोत्र पाठे विनियोगः।**

ऋष्यादिन्यास:- **ॐ हिरण्यगर्भ ऋषये नमः शिरसि, अनुष्टुप् छन्दसे नमः मुखे, श्रीमहाकाली-महालक्ष्मी-महासरस्वती देवताभ्यो नमो हृदि, श्रीं बीजाय नमो गुह्ये, ह्रीं शक्तये नमः पादयौः, क्लीं कीलकाय नमो नाभौ, विनियोगाय नमः सर्वांगे।**

करन्यास:- **श्रीं सिद्धलक्ष्म्यै अंगुष्ठाभ्यां नमः। ह्रीं विष्णुतेजसे तर्जनीभ्यां नमः। क्लीं अमृतानन्दायै मध्यमाभ्यां नमः। श्रीं दैत्यमालिन्यै अनामिकाभ्यां नमः। ह्रीं तेजःप्रकाशिन्यै कनिष्ठिकाभ्यां नमः। क्लीं ब्राह्म्यै वैष्णव्यै रुद्राण्यै करतलकर पृष्ठाभ्यां नमः।**

षडङ्गन्यास:- **ॐ श्रीं सिद्धलक्ष्म्यै हृदयाय नमः। ॐ ह्रीं विष्णुतेजसे शिरसे स्वाहा। ॐ क्लीं अमृतानन्दायै शिखायै वषट्। ॐ श्रीं दैत्यमालिन्यै कवचाय हुं। ॐ ह्रीं तेजःप्रकाशिन्यै नेत्रत्रयाय वौषट्। ॐ क्लीं ब्राह्म्यै वैष्णव्यै रुद्राण्यै अस्त्राय फट्।**

"**ॐ श्रीं ह्रीं क्लीं श्रीं सिद्धलक्ष्म्यै नमः**" इस मंत्र से तालत्रय कर दिग्बंधन करें। फिर ध्यान करें।

॥ ध्यानम् ॥

ब्राह्मीं च वैष्णवीं भद्रां षड्भुजां च चतुर्मुखीम् । त्रिनेत्रां खड्गत्रिशूलपद्मचक्रगदाधराम् ॥१॥
पीताम्बरधरां देवीं नानालंकारभूषिताम् । तेजपुञ्जधरीं श्रेष्ठां ध्यायेद्बालकुमारिकाम् ॥२॥

॥ स्तोत्रम् ॥

ॐकारं लक्ष्मीरूपं तु विष्णुं हृदयमव्ययम् । विष्णुमानन्दमव्यक्तं ह्रींकारं बीजरूपिणीम् ॥१॥
क्लीं अमृतानन्दिनीं भद्रां सदात्यानन्द दायिनीम् । श्रीं दैत्यशमनीं शक्तिं मालिनीं शत्रुमर्दिनीम् ॥२॥
तेजः प्रकाशिनीं देवीं वरदां शुभकारिणीम् । ब्राह्मीं च वैष्णवीं रौद्रीं कालिकारूपशोभिनीम् ॥३॥
अकारे लक्ष्मीरूपं तु उकारे विष्णुमव्ययं । मकारः पुरुषोऽव्यक्तो देवीप्रणव उच्यते ॥४॥
सूर्यकोटि प्रतीकाशं चन्द्रकोटिसमप्रभं । तन्मध्ये निकरं सूक्ष्मं ब्रह्मरूपं व्यवस्थितम् ॥५॥
ॐकारं परमानन्दं सदैव सुखसुन्दरीं । सिद्धलक्ष्मि मोक्षलक्ष्मि आद्यलक्ष्मि नमोऽस्तु ते ॥६॥

सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥
प्रथमं त्र्यम्बका गौरी द्वितीयं वैष्णवी तथा ॥७॥
तृतीयं कमला प्रोक्ता चतुर्थं सुन्दरी तथा । पञ्चमं विष्णुशक्तिश्च षष्ठं कात्यायनी तथा ॥८॥
वाराही सप्तमं चैव ह्यष्टमं हरिवल्लभा । नवमी खड्गिनी प्रोक्ता दशमं चैव देविका ॥९॥
एकादशं सिद्धलक्ष्मीर्द्वादशं हंसवाहिनी । एतत्स्तोत्रवरं देव्या ये पठन्ति सदा नराः ॥१०॥
सर्वापद्भ्यो विमुच्यन्ते नात्र कार्या विचारणा । एकमासं द्विमासं च त्रिमासं माञ्चतुष्टयं ॥११॥
पञ्चमासं च षण्मासं त्रिकालं यः सदा पठेत् । ब्राह्मणः क्लेशितो दुःखी दारिद्र्यामयपीडितः ॥१२॥
जन्मान्तरसहस्त्रोत्थैर्मुच्यते सर्वकिल्बिषैः । दरिद्रो लभते लक्ष्मीमपुत्रः पुत्रवान् भवेत् ॥१३॥
धन्यो यशस्वी शत्रुघ्नो वह्निचौरभयेषु च । शाकिनी भूतवेताल सर्पव्याघ्रनिपातने ॥१४॥
राजद्वारे सभास्थाने कारागृहनिबन्धने । ईश्वरेण कृतं स्तोत्रं प्राणिनां हितकारकं ॥१५॥
स्तुवन्तु ब्राह्मणा नित्यं दारिद्र्यं न च बाधते । सर्वपापहरा लक्ष्मीः सर्वसिद्धिप्रदायिनी ॥१६॥

॥ इति श्रीब्रह्मपुराणे श्रीसिद्धलक्ष्मीस्तोत्रं सम्पूर्णम् ॥

॥ अथ प्रसन्न वरदा श्री लक्ष्मीस्तोत्रम् ॥

जय पद्मपलाशाक्षि जय त्वं श्रीपतिप्रिये । जय मातर्महालक्ष्मि संसारार्णवतारिणि ॥१॥
महालक्ष्मि नमस्तुभ्यं नमस्तुभ्यं सुरेश्वरि । हरिप्रिये नमस्तुभ्यं नमस्तुभ्यं दयानिधे ॥२॥
पद्मालये नमस्तुभ्यं नमस्तुभ्यं च सर्वदे । सर्वभूतहितार्थाय वसुवृष्टिं सदा कुरु ॥३॥
जगन्मातर्नमस्तुभ्यं नमस्तुभ्यं दयानिधे । दयावति नमस्तुभ्यं विश्वेश्वरि नमोस्तु ते ॥४॥
नमः क्षीरार्णवसुते नमस्त्रैलोक्यधारिणि । वसुदृष्टे नमस्तुभ्यं रक्ष मां शरणागतम् ॥५॥
रक्ष त्वं देव देवेशि देवदेवस्य वल्लभे । दरिद्रात्त्राहि मां लक्ष्मि कृपां कुरु ममोपरि ॥६॥
नमस्त्रैलोक्यजननि नमस्त्रैलोक्यपावनि । ब्रह्मादयो नमन्ते त्वां जगदानन्ददायिनि ॥७॥
विष्णुप्रिये नमस्तुभ्यं नमस्तुभ्यं जगद्धिते । आर्तिहन्त्रि नमस्तुभ्यं समृद्धिं कुरु मे सदा ॥८॥
अब्जवासे नमस्तुभ्यं चपलायै नमो नमः । चञ्चलायै नमस्तुभ्यं ललितायै नमो नमः ॥९॥
नमः प्रद्युम्नजननिमातस्तुभ्यं नमो नमः । परिपालय भो मातर्मातुभ्यं शरणागतम् ॥१०॥
शरण्ये त्वां प्रपन्नोऽस्मि कमले कमलालये । त्राहि-त्राहि महालक्ष्मि परित्राण परायणे ॥११॥
पाण्डित्यं शोभते नैव न शोभन्ति गुणा नरे । शीलत्वं नैव शोभेत महालक्ष्मि त्वया विना ॥१२॥
तावद्विराजते रूपं तावच्छील विराजते । तावद्गुणा नराणाञ्च यावल्लक्ष्मी प्रसीदति ॥१३॥
लक्ष्मित्वयालंकृतमानवा ये पापैर्विमुक्ता नृपलोकमान्याः ।
गुणैर्विहीना गुणिनो भवन्ति दुःशीलिनः शीलवतां वरिष्ठाः ॥१४॥

(१) ॥ श्री कमला स्तोत्रम् ॥

ओङ्कार रूपिणी देवि विशुद्धसत्त्वरूपिणी । देवानां जननी त्वं हि प्रसन्ना भव सुन्दरी ॥
तन्मात्रञ्चैव भूतानि तव वक्षःस्थलं स्मृतम् । त्वमेव वेदगम्या तु प्रसन्ना भव सुन्दरि ॥
देवदानवगंधर्वयक्षराक्षसकिन्नरैः । स्तूयसे त्वं सदा लक्ष्मि प्रसन्ना भव सुन्दरि ॥
लोकातीता द्वैतातीता समस्तभूतवेष्टिता । विद्वज्जनकीर्त्तिता च प्रसन्ना भव सुन्दरि ॥
परिपूर्णा सदा लक्ष्मि त्रात्री तु शरणार्थिषु । विश्वाद्या विश्वकर्त्री च प्रसन्ना भव सुन्दरि ॥
ब्रह्मरूपा च सावित्री त्वद्दीप्त्या भासते जगत् । विश्वरूपा वरेण्या च प्रसन्ना भव सुन्दरि ॥
क्षित्यप्तेजो मरुद्व्योमपंचभूतस्वरूपिणी । बन्धादेः कारणं त्वं हि प्रसन्ना भव सुन्दरि ॥
महेशे त्वं हेमवती कमला केशवेऽपि च । ब्रह्मणः प्रेयसी त्वं हि प्रसन्ना भव सुन्दरि ॥
चण्डी दुर्गा कालिका च कौशिकी सिद्धिरूपिणी । योगिनी योगगम्या च प्रसन्ना भव सुन्दरि ॥
बाल्ये च बालिका त्वं हि यौवने युवतीति च । स्थविरे वृद्धरूपा च प्रसन्ना भव सुन्दरि ॥
गुणमयी गुणातीता आद्या विद्या सनातनी । महत्तत्त्वादिसंयुक्ता प्रसन्ना भव सुन्दरि ॥
तपस्विनी तपः सिद्धिः स्वर्गसिद्धिस्तदर्थिषु । चिन्मयी प्रकृतिस्त्वं तु प्रसन्ना भव सुन्दरि ॥
त्वमादिर्जगतां देवि त्वमेव स्थितिकारणम् । त्वमन्ते निधनस्थानं स्वेच्छाचारा त्वमेव हि ॥
चराचराणां भूतानां वहिरन्तस्त्वमेव हि । व्याप्यव्यापकरूपेण त्वं भासि भक्तवत्सले ॥
त्वन्मायया हृतज्ञाना नष्टात्मानो विचेतसः । गतागतं प्रपद्यन्ते पापपुण्यवशात्सदा ॥
तावन्सत्यं जगद्भाति शुक्तिकारजतं यथा । यावन्न ज्ञायते ज्ञानं चेतसा नान्वगामिनी ॥
त्वज्ज्ञानात्तु सदा युक्तः पुत्रदारगृहादिषु । रमन्ते विषयान्सर्व्वानन्ते दुःखप्रदान् ध्रुवम् ॥
त्वदाज्ञया तु देवेशि गगने सूर्यमण्डलम् । चन्द्रश्च भ्रमते नित्यं प्रसन्ना भव सुन्दरि ॥
ब्रह्मेशविष्णुजननी ब्रह्माख्या ब्रह्मसंश्रया । व्यक्ताव्यक्ता च देवेशि प्रसन्ना भव सुन्दरि ॥
लचला सर्वगा त्वं हि मायातीता महेश्वरि । शिवात्मा शाश्वता नित्या प्रसन्ना भव सुन्दरि ॥
सर्वकायनियन्त्री च सर्वभूतेश्वरेश्वरी । अनन्ता निष्कला त्वं हि प्रसन्ना भव सुन्दरि ॥
सर्वेश्वरी सर्ववन्द्या अचिन्त्या परमात्मिका । भुक्तिमुक्तिप्रदा त्वं हि प्रसन्ना भव सुन्दरि ॥
ब्रह्माणी ब्रह्मलोके त्वं वैकुण्ठे सर्वमंगला । इन्द्राणी अमरावत्यामम्बिका वरुणालये ॥
यमालये कालरूपा कुबेरभवने शुभा । महानन्दाग्निकोणे च प्रसन्ना भव सुन्दरि ॥
नैर्ऋत्यां रक्तदन्ता त्वं वायव्यां मृगवाहिनी । पाताले वैष्णवीरूपा प्रसन्ना भव सुन्दरि ॥
सुरसा त्वं मणिद्वीपे ऐशान्यां शूलधारिणी । भद्रकाली च लंकायां प्रसन्ना भव सुन्दरि ॥
रामेश्वरी सेतुबंधे सिंहले देवमोहिनी । विमला त्वं च श्रीक्षेत्रे प्रसन्ना भव सुन्दरि ॥
कालिका त्वं कालिघट्टे कामाख्या नीलपर्वते । विरंजा ओड्रदेशे त्वं प्रसन्ना भव सुन्दरि ॥

(१) ॥ श्री कमला स्तोत्रम् ॥

ओंङ्कार रूपिणी देवि विशुद्धसत्त्वरूपिणी । देवानां जननी त्वं हि प्रसन्ना भव सुन्दरी ॥
तन्मात्रञ्चैव भूतानि तव वक्षःस्थलं स्मृतम् । त्वमेव वेदगम्या तु प्रसन्ना भव सुन्दरि ॥
देवदानवगंधर्वयक्षराक्षसकिन्नरैः । स्तूयसे त्वं सदा लक्ष्मि प्रसन्ना भव सुन्दरि ॥
लोकातीता द्वैतातीता समस्तभूतवेष्टिता । विद्वज्जनकीर्त्तिता च प्रसन्ना भव सुन्दरि ॥
परिपूर्णा सदा लक्ष्मि त्रात्री तु शरणार्थिषु । विश्वाद्या विश्वकर्त्री च प्रसन्ना भव सुन्दरि ॥
ब्रह्मरूपा च सावित्री त्वद्दीप्त्या भासते जगत् । विश्वरूपा वरेण्या च प्रसन्ना भव सुन्दरि ॥
क्षित्यप्तेजो मरुद्व्योमपंचभूतस्वरूपिणी । बन्धादेः कारणं त्वं हि प्रसन्ना भव सुन्दरि ॥
महेशे त्वं हेमवती कमला केशवेऽपि च । ब्रह्मणः प्रेयसी त्वं हि प्रसन्ना भव सुन्दरि ॥
चण्डी दुर्गा कालिका च कौशिकी सिद्धिरूपिणी । योगिनी योगगम्या च प्रसन्ना भव सुन्दरि ॥
बाल्ये च बालिका त्वं हि यौवने युवतीति च । स्थविरे वृद्धरूपा च प्रसन्ना भव सुन्दरि ॥
गुणमयी गुणातीता आद्या विद्या सनातनी । महत्तत्त्वादिसंयुक्ता प्रसन्ना भव सुन्दरि ॥
तपस्विनी तपः सिद्धिः स्वर्गसिद्धिस्तदर्थिषु । चिन्मयी प्रकृतिस्त्वं तु प्रसन्ना भव सुन्दरि ॥
त्वमादिर्जगतां देवि त्वमेव स्थितिकारणम् । त्वमन्ते निधनस्थानं स्वेच्छाचारा त्वमेव हि ॥
चराचराणां भूतानां वहिरन्तस्त्वमेव हि । व्याप्यव्यापकरूपेण त्वं भासि भक्तवत्सले ॥
त्वन्मायया हृतज्ञाना नष्टात्मानो विचेतसः । गतागतं प्रपद्यन्ते पापपुण्यवशात्सदा ॥
तावन्सत्यं जगद्भाति शुक्तिकारजतं यथा । यावन्न ज्ञायते ज्ञानं चेतसा नान्वगामिनी ॥
त्वज्ज्ञानात्तु सदा युक्तः पुत्रदारगृहादिषु । रमन्ते विषयान्सर्व्वानन्ते दुःखप्रदान् ध्रुवम् ॥
त्वदाज्ञया तु देवेशि गगने सूर्यमण्डलम् । चन्द्रश्च भ्रमते नित्यं प्रसन्ना भव सुन्दरि ॥
ब्रह्मेशविष्णुजननी ब्रह्माख्या ब्रह्मसंश्रया । व्यक्ताव्यक्ता च देवेशि प्रसन्ना भव सुन्दरि ॥
लचला सर्वगा त्वं हि मायातीता महेश्वरि । शिवात्मा शाश्वता नित्या प्रसन्ना भव सुन्दरि ॥
सर्वकायनियन्त्री च सर्वभूतेश्वरेश्वरी । अनन्ता निष्कला त्वं हि प्रसन्ना भव सुन्दरि ॥
सर्वेश्वरी सर्ववन्द्या अचिन्त्या परमात्मिका । भुक्तिमुक्तिप्रदा त्वं हि प्रसन्ना भव सुन्दरि ॥
ब्रह्माणी ब्रह्मलोके त्वं वैकुण्ठे सर्वमंगला । इन्द्राणी अमरावत्यामम्बिका वरुणालये ॥
यमालये कालरूपा कुबेरभवने शुभा । महानन्दाग्निकोणे च प्रसन्ना भव सुन्दरि ॥
नैर्ऋत्यां रक्तदन्ता त्वं वायव्यां मृगवाहिनी । पाताले वैष्णवीरूपा प्रसन्ना भव सुन्दरि ॥
सुरसा त्वं मणिद्वीपे ऐशान्यां शूलधारिणी । भद्रकाली च लंकायां प्रसन्ना भव सुन्दरि ॥
रामेश्वरी सेतुबंधे सिंहले देवमोहिनी । विमला त्वं च श्रीक्षेत्रे प्रसन्ना भव सुन्दरि ॥
कालिका त्वं कालिघट्टे कामाख्या नीलपर्वते । विरजा ओड्रदेशे त्वं प्रसन्ना भव सुन्दरि ॥

वाराणस्यामन्नपूर्णा अयोध्यायां महेश्वरी । गयासुरी गयाधाम्नि प्रसन्ना भव सुन्दरि ॥
भद्रकाली कुरुक्षेत्रे त्वञ्च कात्यायनी व्रजे । महामाया द्वारकायां प्रसन्ना भव सुन्दरि ॥
क्षुधा त्वं सर्वजीवानां वेला च सागरस्य हि । महेश्वरी मथुरायां प्रसन्ना भव सुन्दरि ॥
रामस्य जानकी त्वञ्च शिवस्य मनमोहिनी । दक्षस्य दुहिता चैव प्रसन्ना भव सुन्दरि ॥
विष्णुभक्तिप्रदा त्वं च कंसासुरविनाशिनी । रावणनाशिनी चैव प्रसन्ना भव सुन्दरि ॥
लक्ष्मीस्तोत्रमिदं पुण्यं यः पठेद्भक्तिसंयुतः । सर्वज्वरभयं नश्येत्सर्वव्याधि निवारणम् ॥
इदं स्तोत्रं महापुण्यमापदुद्धारकारणम् । त्रिसंध्यमेकसन्ध्यं वा यः पठेत्सततः नरः ॥
मुच्यते सर्वपापेभ्यो तथा तु सर्वसंकटात् । मुच्यते नात्र सन्देहो भुवि स्वर्गे रसातले ॥
समस्तं च तथा चैकं यः पठेद्भक्तितत्परः । स सर्वदुष्करं तीर्त्वा लभते परमां गतिम् ॥
सुखदं मोक्षदं स्तोत्रं यः पठेद्भक्तिसंयुतः । स तु कोटितीर्थफलं प्राप्नोति नात्र संशयः ॥
एका देवी तु कमला यस्मिंस्तुष्टा भवेत्सदा । तस्याऽसाध्यं तु देवेशि नास्ति किंचिज्जरत्रये ॥
पठनादपि स्तोत्रस्य किं न सिद्ध्यति भूतले । तस्मात्स्तोत्रवरं प्रोक्तं सत्यं सत्यं हि पार्वति ॥

॥ इति श्रीकमला स्तोत्रं सम्पूर्णम् ॥

(२) ॥ श्री कमला स्तोत्रम् ॥

॥ श्री पुरन्दर उवाचः ॥

नमः कमलावासिन्यै नारायण्यै नमो नमः । कृष्णप्रियायै सततं महालक्ष्म्यै नमो नमः ॥१॥
पद्मपत्रेक्षणायै च पद्मास्यायै नमो नमः । पद्मसनायै पद्मिन्यै वैष्णव्यै च नमो नमः ॥२॥
सर्वसम्पत्स्वरूपिण्यै सर्वाराध्यै नमो नमः । हरिभक्तिप्रदात्र्यै च हर्षदात्र्यै नमो नमः ॥३॥
कृष्णवक्षः स्थितायै च कृष्णेशायै नमो नमः । चन्द्रशोभायस्वरूपायै रत्नपद्मे च शोभने ॥४॥
सम्पत्यधिष्ठातृदेव्यै महादेव्यै नमो नमः । नमो वृद्धिस्वरूपायै वृद्धिदायै नमो नमः ॥५॥
वैकुण्ठे या महालक्ष्मीर्यालक्ष्मीः क्षीरसागरे । स्वर्गलक्ष्मीरिन्द्रगेहे राजलक्ष्मीर्नृपालये ॥६॥
गृहलक्ष्मीश्च गृहिणी गेहे च गृहदेवता । सुरभिः सागरे जाता दक्षिणा यज्ञकामिनी ॥७॥
अदितिर्देवमाता त्वं कमला कमलालया । स्वाहा त्वं च हविर्दाने कव्यदाने स्वधा स्मृता ॥८॥
त्वं हि विष्णुस्वरूपा च सर्वाधारा वसुन्धरा । शुद्धसत्वस्वरूपा त्वं नारायणपरायणा ॥९॥
क्रोधहिंसावर्जिता च वरदा शारदा शुभा । परमार्थ प्रदा त्वं च हरिदास्यप्रदा परा ॥१०॥
यया विना जगत्सर्वं भस्मीभूतमसारकम् । जीवन्मृतं च विश्वं च शश्वत्सर्व यया विना ॥११॥
सर्वेषां च परा माता सर्वबांधवरूपिणी । धर्मार्थकाममोक्षाणां त्वं च कारणरूपिणी ॥१२॥
यथा माता स्तनांधानां शिशूना शैशवे सदा । तथा त्वं सर्वदा माता सर्वेषां सर्वरूपतः ॥१३॥

मातृहीनः स्तनांधस्तु स च जीवति दैवतः । त्वया हीनो जनः कोऽपि न जीवत्येव निश्चितम् ॥१४॥
सुप्रसन्नस्वरूपा त्वं मां प्रसन्ना भवाम्बिके । वैरिग्रस्तं च विषयं देहि मह्यं सनातनि ॥१५॥
अहं यावत्त्वया हीनो बन्धुहीनश्च भिक्षुकः । सर्वसम्पद्विहीनश्च तावदेव हरिप्रिये ॥१६॥
ज्ञानं देहि च धर्मं च सर्वसौभाग्यमीप्सितम् । प्रभावं च प्रतापं च सर्वाधिकारमेव च ॥१७॥
जयं पराक्रमं युद्धे परमैश्वर्यमेव च ।

॥श्रीनारायण उवाच:॥

इत्युक्त्वां च महेन्द्रश्च सर्वैः सुरगणैः सह ॥१८॥
प्रणमाम साश्रुनेत्रो मूर्ध्ना चैव पुनः पुनः । ब्रह्मा च शङ्करश्चैव शेषो धर्मश्च केशवः ॥१९॥
सर्वे चक्रुः परीहारं सुरार्थे च पुनः पुनः । देवेभ्यश्च वरं दत्वा पुष्पमालां मनोहराम् ॥२०॥
केशवाय ददौ लक्ष्मीः संतुष्टा सुरसंसदि । ययुर्देवाश्च संतुष्टाः स्वं स्वं स्थानं च नारद ॥२१॥
देवी ययौ हरेः स्थानं दृष्ट्वा क्षीरोदशायिनः । ययतुश्चैव स्वगृहं ब्रह्मेशानौ च नारदः ॥२२॥
दत्वा शुभाशिषं तौ च देवेभ्यः प्रीतिपूर्वकम् । इदं स्तोत्रं महापुण्यं त्रिसंध्यं य पठेन्नरः ॥२३॥
कुबेरतुल्यः स भवेद्राजराजेश्वरो महान् । पंचलक्षजपे नैव स्तोत्रसिद्धिर्भवेन्नृणाम् ॥२४॥
सिद्धस्तोत्रं यदि पठेन्मासमेकं तु सन्ततम् । महासुखी च राजेन्द्रो भविष्यति न संशयः ॥२५॥

॥ इति श्रीकमला स्तोत्रम् ॥

॥ श्री महालक्ष्म्यष्टकस्तव:॥

॥इन्द्र उवाचः॥

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते । शङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते ॥
नमस्ते गरुडारूढे कोलासुरभयङ्करि । सर्वपापहरे देवि महालक्ष्मि नमोऽस्तु ते ॥
सर्वज्ञे सर्ववरदे सर्वदुष्टभयङ्करि । सर्वदुःखहरे देवि महालक्ष्मि नमोऽस्तु ते ॥
सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनि । मंत्रमूर्ते सदा देवि महालक्ष्मि नमोऽस्तु ते ॥
आद्यन्तरहिते देवि आद्यशक्ति महेश्वरि । योगजे योगसम्भूते महालक्ष्मि नमोऽस्तु ते ॥
स्थूलसूक्ष्ममहारौद्रे महाशक्ति महोदरे । महापापहरे देवि महालक्ष्मि नमोऽस्तु ते ॥
पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि । परमेशि जगन्मातर्महालक्ष्मि नमोऽस्तु ते ॥
श्वेताम्बरधरे देवि नानालङ्कारभूषिते । जगत्स्थिते जगन्मातर्महालक्ष्मि नमोऽस्तु ते ॥
महालक्ष्म्यष्टकस्तोत्रं यः पठेद्भक्तिमान्नरः । सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा ॥
एककालं पठेन्नित्यं महापापविनाशनम् । द्विकालं यः पठेन्नित्यं धनधान्यसमन्वितः ॥
त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम् । महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा ॥

॥ इति इन्द्रकृतः महालक्ष्म्यष्टकस्तवः सम्पूर्णः ॥

॥ श्री कमलात्मिकोपनिषत् ॥

अथ लोकान् पर्यटन् सनत्कुमारो ह वैदेहः। पुण्यचिंताल्लोकानतीत्य वैष्णवंधाम दिव्यगणोपेतं। विद्रुमवेदिकामणि मुक्तागणार्चितं प्राप। तत्रापश्यन् महामायां पराद्धर्य वस्त्राभरणोत्तरीयां पर्यङ्कस्थांपारे चरन्तीमादि देवं भगवन्तं परमेश्वरं दृष्ट्वा च तां गद्‌गदवाक्-प्रफुल्लरोमा स्तोतुमुपचक्रमे ॥

वाचं मे दिशतु श्रीर्देवी मनो मे दिशतु वैष्णवी। ओजस्तेजो बलं दाक्ष्यं बुद्धेर्वैभवमस्तु मे। त्वत्प्रसादाद् भगवति प्रज्ञानं मे ध्रुवं भवेत्। शन्नो दिशतु श्रीर्देवी महामाया। वैष्णवी शक्तिराद्या यामासाद्य स्वयमादिदेवो भगवान् परावरज्ञस्तिधा सम्भिन्नो लोकांस्त्रीन् सृजत्यवत्यत्ति च। यद् भ्रू विक्षेपबलमापन्नो ह्यब्जयोनिस्तदितरे चामरा मुख्याः सृष्टिचक्रप्रणेतारः सम्बभूवुः या वै वरदा स्वोपायां सुप्रसन्ना सुखयति सहस्त्रपुरुषान् ये लोकाः सन्ततमानमन्ति शिरसा हृदये न च तामेकां लोकपूज्यां न ते दुर्गतिं यान्ति भूताः ।

अथ महत्या सम्वृद्ध्या साम्राज्येन पुत्रैः पौत्रैरन्वितो भूमिपृष्ठे शतं समास्त इज्याभिरिष्ट्वा देवान् पितृन मनुष्यानथ भूरिदक्षिणाभिस्त्वत्प्रसादान्महान्तो गच्छन्ति वैष्णवं लोकमपुनर्भवाय ये राजर्षयो ब्रह्मर्षयस्तेऽपि चासत्-कृत् त्वां प्रागसन्त एव सुखमामनन्ति नान्यः पन्था विद्यतेऽयनाय किं पुनरिहादिदेवो भगवान् नारायणस्त्वामाधिदेवाखिलं करोति। किं वर्णये त्वां सहस्त्रकृत्वो नमस्ते ॥

य इमा ऋचः पठन्ति प्रातरुत्थाय भूरि दान तेषां किञ्चिदिहियावशिष्टय्यदैश्वर्यं दुर्लभं प्राणिनां हि॥

॥ इति श्रीकमलात्मिकोपनिषत् सम्पूर्णा ॥

॥ श्रीकमला अष्टोत्तरशतनाम स्तोत्रम् ॥

॥ श्री शिव उवाच ॥

शतमष्टोत्तरं नाम्नां कमलाया वरानने । प्रवक्ष्याम्यतिगुह्यं हि न कदापि प्रकाशयेत् ॥१॥
महामाया महालक्ष्मीर्महावाणी महेश्वरी । महादेवी महारात्रिर्महिषासुरमर्द्दिनी ॥२॥
कालरात्रिः कुहूः पूर्णानन्दाऽद्या भद्रिका निशा । जया रिक्ता महाशक्तिर्देवमाता कृशोदरी ॥३॥
शचीन्द्राणी शक्रनुता शंकरप्रियवल्लभा । महावराहजननी मदनोन्मथिनी मही ॥४॥
वैकुण्ठनाथरमणी विष्णुवक्षःस्थलस्थिता । विश्वेश्वरी विश्वमाता वरदाऽभयदा शिवा ॥५॥
शूलिनी चक्रिणी मा च पाशिनी शङ्खधारिणी । गदिनी मुण्डमाला च कमला करुणालया ॥६॥
पद्माक्षधारिणी ह्यम्बा महाविष्णुप्रियंकरी । गोलोकनाथरमणी गोलोकेश्वरपूजिता ॥७॥
गया गंगा च यमुना गोमती गरुडासना । गण्डकी सरयूस्तापी रेवा चैव पयस्विनी ॥८॥
नर्मदा चैव कावेरी केदारस्थलवासिनी । किशोरी केशवनुता महेन्द्रपरिवन्दिता ॥९॥
ब्रह्मादिदेवनिर्माणकारिणी देवपूजिता । कोटिब्रह्माण्डमध्यस्था कोटिब्रह्माण्डकारिणी ॥१०॥
श्रुतिरूपा श्रुतिकरी श्रुतिस्मृतिपरायणा । इन्दिरा सिन्धुनतया मातंगी लोकमातृका ॥११॥
त्रिलोकजननी तन्त्रा तन्त्रमंत्रस्वरूपिणी । तरुणी च तमोहन्त्री मंगला मंगलायना ॥१२॥

मधुकैटभमथनी शुम्भासुरविनाशिनी । निशुम्भादिहरा माता हरिशंकरपूजिता ॥१३॥
सर्वदेवमयी सर्वा शरणागतपालिनी । शरण्या शम्भुवनिता सिन्धुतीरनिवासिनी ॥१४॥
गन्धर्वगानरसिका गीता गोविन्दवल्लभा । त्रैलोक्यपालिनी तत्त्वरूपतारुण्यपूरिता ॥१५॥
चन्द्रावली चन्द्रमुखी चन्द्रिका चन्द्रपूजिता । चन्द्रा शशाङ्कभगिनी गीतवाद्यपरायणा ॥१६॥
सृष्टिरूपा सृष्टिकरी सृष्टिसंहारकारिणी । इति ते कथितं देवि रमानामशताष्टकम् ॥१७॥
त्रिसन्ध्यं प्रयतो भूत्वा पठेदेतत्समाहितः । यं यं कामयते कामं तं तं प्राप्नोत्यसंशयः ॥१८॥

इमं स्तवं यः पठतीह मर्त्यो वैकुण्ठपत्न्या : परमादरेण ।
धनाधिपाद्यैः परिवन्दितः स्यात् प्रयास्यति श्रीपदमन्तकाले ॥१९॥

॥ इति श्रीकमलाया अष्टोत्तरशतनाम स्तोत्रं सम्पूर्णम् ॥

॥ श्रीलक्ष्मी सहस्रनाम स्तोत्रम् ॥

ॐ तामाह्वयामि सुभगां लक्ष्मीं त्रैलोक्यपूजिताम् । एह्येहि देवि पद्माक्षि पद्माकरकृतालये ॥१॥
आगच्छागच्छ वरदे पश्य मां स्वेन चक्षुषा । आयाह्यायाहि धर्मार्थकाममोक्षमये शुभे ॥२॥
एवं विधैः स्तुतिपदैः सत्यैस्सत्यार्थसंस्तुता । कनीयसी महाभागा चन्द्रेण परमात्मना ॥३॥
निशाकरश्च सा देवी भ्रातरौ द्वौ पयोनिधेः । उत्पन्नमात्रौ तावास्तां शिवकेशवसंश्रितौ ॥४॥
सनत्कुमारस्तमृषिं समाभाष्य पुरातनम् । प्रोक्तवानितिहासं तु लक्ष्म्याः स्तोत्रमनुत्तमम् ॥५॥
अथेदृशान्महाघोराद्दारिद्र्यान्नरकात्कथम् । मुक्तिर्भवति लोकेऽस्मिन् दारिद्र्यं याति भस्मताम् ॥६॥

॥ सनत्कुमार उवाच ॥

पूर्वं कृतयुगे ब्रह्मा भगवान् सर्वलोककृत् । सृष्टिं नानाविधां कृत्वा पश्चाच्चिन्तामुपेयिवान् ॥७॥
किमाहाराः प्रजास्त्वेताः सम्भविष्यन्ति भूतले । तथैव चासान्दारिद्र्यात्कथमुत्तरणं भवेत् ॥८॥
दारिद्र्यान्मरणं श्रेयस्त्विति संचिन्त्य चेतसि । क्षीरोदस्योत्तरे कूले जगाम कमलोद्भवः ॥९॥
तत्र तीव्रं तपस्तप्त्वा कदाचित्परमेश्वरम् । ददर्श पुण्डरीकाक्षं वासुदेवं जगद्गुरुम् ॥१०॥
सर्वज्ञं सर्वशक्तीनां सर्वावासं सनातनम् । सर्वेश्वरं वासुदेवं विष्णुं लक्ष्मीपतिं प्रभुम् ॥११॥
सोमकोटिप्रतीकाशं क्षीरोदविमले जले । अनन्तभोगशयनं विश्रान्तं श्रीनिकेतनम् ॥१२॥
कोटिसूर्यप्रतीकाशं महायोगेश्वरेश्वरम् । योगनिद्रारतं श्रीशं सर्वावास सुरेश्वरम् ॥१३॥
जगदुत्पत्ति संहारस्थिति कारणकारणम् । लक्ष्म्यादिशक्तिकरणं जातमण्डलमण्डितम् ॥१४॥
आयुधैर्देहवद्भिश्च चक्राद्यैः परिवारितम् । दुर्निरीक्ष्यं सुरैः सिद्धैर्महायोनिशतैरपि ॥१५॥
आधारं सर्वशक्तिनां परं तेजः सुदुस्सहम् । प्रबुद्धं देवमीशानं दृष्ट्वा कमलसम्भवः ॥१६॥
शिरस्यञ्जलिमाधाय स्तोत्रं पूर्वमुवाचह । मनोवाञ्छित सिद्धिं त्वं पूरयस्य महेश्वर ॥१७॥

जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन । नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ॥१८॥
सर्वेश्वर जयानन्द सर्वावास परात्पर । प्रसीद मम भक्तस्य छिन्धि सन्देहजं तमः ॥१९॥
एवं स्तुतः स भगवान् ब्राह्मणाऽव्यक्तजन्मना । प्रसादाभिमुखः प्राह हरिर्विश्रान्तलोचनः ॥२०॥

॥ श्रीभगवान् उवाच ॥

हिरण्यगर्भ तुष्टोऽस्मि ब्रूहि यत्तेऽभिवाञ्छितम् । तद्वक्ष्यामि न सन्देहो भक्तोसि मम सुव्रत ॥२१॥
केशवाद्वचनं श्रुत्वा करुणाविष्टचेतनः । प्रत्युवाच महाबुद्धिर्भगवन्तं जनार्दनम् ॥२२॥
चतुर्विधं भवस्यास्य भूतसर्गस्य केशव । परित्राणाय मे ब्रूहि रहस्यं परमाद्भुतम् ॥२३॥
दारिद्र्यशमनं धन्यं मनोज्ञं पावनं परम् । सर्वेश्वर महाबुद्धे स्वरूपं भैरवं महत् ॥२४॥
श्रियः सर्वातिशायिन्यास्तथा ज्ञानं च शाश्वतम् । नामानि चैव मुख्यानि यानि गौणानि चाच्युतः ॥२५॥
त्वद्वक्त्रकमलोत्थानि श्रोतुमिच्छामि तत्त्वतः । इति तस्य वचः श्रुत्वा प्रतिवाक्यमुवाच सः ॥२६॥

॥ श्रीभगवान् उवाच ॥

महाविभूतिसंयुक्ता षाड्गुण्यवपुरुषः प्रभोः । भगवद्वासुदेवस्य नित्यं चैषाऽनपायिनी ॥२७॥
एकैव वर्त्ततेऽभिन्ना ज्योत्स्नेव हिमदीधितेः । सर्वशक्त्यात्मिका चैव विश्वं व्याप्य व्यवस्थिता ॥२८॥
सर्वैश्वर्यगुणोपेता नित्यशुद्धस्वरूपिणी । प्राणशक्तिः परा ह्येषा सर्वेषां प्राणिनां भुवि ॥२९॥
शक्तीनां चैव सर्वासां योनिभूता परा कला । अहं तस्याः परं नाम्नां सहस्रमिदमुत्तमम् ॥३०॥
श‍ृणुष्वावहितो भूत्वा परमैश्वर्यभूतिदम् । देव्याख्यास्मृतिमात्रेण दारिद्र्यं याति भस्मताम् ॥३१॥
श्रीः पद्मा प्रकृतिः सत्वा शान्ता चिच्छक्तिरव्यया । केवला निष्फला शुद्धा व्यापिनी व्योमविग्रहा ॥३२॥
व्योमपद्मकृताधारा परा व्योमा मतोद्भवा । निर्व्योमा व्योममध्यस्था पंचव्योमपदाश्रिता ॥३३॥
अच्युता व्योमनिलया परमानन्दरूपिणी । नित्यशुद्धा नित्यतृप्ता निर्विकारा निरीक्षणा ॥३४॥
ज्ञानशक्तिः कर्तृशक्तिर्भोक्तृशक्तिः शिखावहा । स्नेहाभाषा निरानन्दा विभूतिर्विमला चला ॥३५॥
अनन्ता वैष्णवी व्यक्ता विश्वानन्दा विकाशिनी । शक्तिर्विभिन्नसर्वार्तिः समुद्रपरितोषिणी ॥३६॥
मूर्तिः सनातनी हार्द्दी निस्तरङ्गा निरामया । ज्ञानज्ञेया ज्ञानगम्या ज्ञानज्ञेयविकासिनी ॥३७॥
स्वच्छन्दशक्तिर्गहना निष्कम्पाऽर्चिः सुनिर्मला । स्वरूपा सर्वगाऽपारा बृंहिणी सुगुणोर्जिता ॥३८॥
अकलङ्का निराधारा निस्सङ्कल्पा निराश्रया । असङ्कीर्णा सुशान्ता च शाश्वती भासुरी स्थिरा ॥३९॥
अनौपम्या निर्विकल्पा निर्यन्त्रा यन्त्रवाहिनी । अभेद्या भेदिनी भिन्ना भारती वैखरी खगा ॥४०॥
अग्राह्या ग्राहिका गूढा गम्भीरा विश्वगोपिनी । अनिर्देश्याऽप्रतिहता निर्बीजा पावनी परा ॥४१॥
अप्रतर्क्याऽपरिमिता भवभ्रान्तिविनाशिनी । एका द्विरूपा त्रिविधा असंख्याता सुरेश्वरी ॥४२॥
सुप्रतिष्ठा महाधात्री स्थितिवृग्गद्धिर्ध्रुवा गतिः । ईश्वरी महिमा ऋद्धिः प्रमोदा उज्ज्वलोद्यमा ॥४३॥
अक्षया वर्द्धमाना च सुप्रकाशा विहङ्गमा । नीरजा जननी नित्या जया रोचिष्मती शुभा ॥४४॥
तपोनुदा च ज्वाला च सुदीप्तिश्वांशुमालिनी । अप्रमेया त्रिधा सूक्ष्मा परा निर्वाणदायिनी ॥४५॥

अवदाता सुशुद्धा च अमोघाख्या परम्परा । सन्धानकी शुद्धविद्या सर्वभूतमहेश्वरी ॥४६॥
लक्ष्यीस्तुष्टिर्महाधीरा शान्तिरपूरणेन वा । अनुग्रहाशक्तिराद्या जगज्ज्येष्ठा जगद्विधिः ॥४७॥
सत्या प्रह्वाक्रियायोग्या ह्यपर्णाह्लादिनी शिवा । सम्पूर्णाह्लादिनी शुद्धा ज्योतिष्मत्यमतावहा ॥४८॥
रजोवत्यर्कप्रतिभाऽकर्षिणी कर्षिणी रसा । परा वसुमती देवी कान्तिः शान्तिर्मतिः कला ॥४९॥
कला कलंकरहिता विशालोद्दीपनी रतिः । सम्बोधिनी हारिणी च प्रभावा भवभूतिदा ॥५०॥
अमृतस्यन्दिनी जीवा जननी खण्डिका स्थिरा । धूमा कलावती पूर्णा भासुरा सुमती रसा ॥५१॥
शुद्धा ध्वनिः सृतिः सृष्टिर्विकृतिः कृष्टिरेव च । प्रापणी प्राणदा प्रह्वा विश्वा पाण्डुरवासिनी ॥५२॥
अवनिर्वज्रनलिका चित्रा ब्रह्माण्डवासिनी । अनन्तरूपाऽनन्तात्मा ऽनन्तस्थाऽनन्तसम्भवा ॥५३॥
महाशक्तिः प्राणशक्तिः प्राणदात्री रतिम्भरा । महासमूहा निखिला इच्छाधारा सुखावहा ॥५४॥
प्रत्यक्षलक्ष्मीर्निष्कम्पा प्ररोहाबुद्धि गोचरा । नानादेहा महावर्ता बहुदेहविकासिनी ॥५५॥
सहस्त्राणी प्रधाना च न्यायवस्तुप्रकाशिका । सर्वाभिलाषपूर्णेच्छा सर्वा सर्वार्थभाषिणी ॥५६॥
नानास्वरूपचिद्धात्री शब्दपूर्वा पुरातना । व्यक्ताऽव्यक्ता जीवकेशा सर्वेच्छापरिपूरिता ॥५७॥
सङ्कल्पसिद्धा सांख्येया तत्त्वगर्भा धरावहा । भूतरूपा चित्स्वरूपा त्रिगुणा गुणगर्विता ॥५८॥
प्रजापतीश्वरी रौद्री सर्वाधारा सुखावहा । कल्याणवाहिका कल्या कलिकल्मषनाशिनी ॥५९॥
निरूपोद्धिन्नसन्ताना सुयन्त्रा त्रिगुणालया । महामाया योगमाया महायोगेश्वरी प्रिया ॥६०॥
महास्त्री विमला कीर्तिर्जया लक्ष्मीर्निरञ्जना । प्रकृतिर्भगवन्माया शक्तिर्निद्रा यशस्करी ॥६१॥
चिन्ता बुद्धिर्यशः प्रज्ञा शान्तिराप्तातिवर्द्धिनी । प्रद्युम्नमाता साध्वी च सुखसौभाग्यसिद्धिदा ॥६२॥
काष्ठा निष्ठा प्रतिष्ठा च ज्येष्ठा श्रेष्ठा जयावहा । सर्वातिशायिनी प्रीतिर्विश्वशक्तिर्महाबला ॥६३॥
वरिष्ठा विजया वीरा जयन्ती विजयप्रदा । हृद्गृहा गोपिनी गुह्या गणगन्धर्वसेविता ॥६४॥
योगीश्वरी योगमाया योगिनी योगसिद्धिदा । महायोगेश्वरवृता योगा योगेश्वरप्रिया ॥६५॥
ब्रह्मेन्द्ररुद्रनमिता सुरासुरवरप्रदा । त्रिवर्त्मगा त्रिलोकस्था त्रिविक्रमपदोद्भवा ॥६६॥
सुतारा तारिणी तारा दुर्गा सन्तारिणी परा । सुतारिणी तारयन्ती भूरितारेश्वरप्रभा ॥६७॥
गुह्यविद्या यज्ञविद्या महाविद्यासुशोभिता । अध्यात्मविद्या विघ्नेशी पद्मस्था परमेष्ठिनी ॥६८॥
आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिर्नयात्मिका । गौरी वागीश्वरी गोप्त्री गायत्री कमलोद्भवा ॥६९॥
विश्वम्भरा विश्वरूपा विश्वमाता वसुप्रदा । सिद्धिः स्वाहा स्वधा स्वस्ति सुधा सर्वार्थसाधिनी ॥७०॥
इच्छा सृष्टिर्द्युतिर्भूतिः कीर्तिः श्रद्धा दया मतिः । श्रुतिर्मेधा धृति ह्रीः श्रीर्विद्या विबुधवन्दिता ॥७१॥
अनसूया घृणा नीतिर्निर्वृतिः कामधुक्करा । प्रतिज्ञासन्ततिर्भूतिर्द्यौः प्रज्ञा विश्वमानिनी ॥७२॥
स्मृतिर्वाग्विश्वजननी पश्यन्ती मध्यमा समा । सन्ध्या मेधा प्रभा भीमा सर्वाकारा सरस्वती ॥७३॥
कांक्षा माया महामाया मोहिनी माधवप्रिया । सौम्याभोगा महाभोगा भोगिनी भोगदायिनी ॥७४॥

सुधौतकनकप्रख्या सुवर्णकमलासना । हिरण्यगर्भा सुश्रोणी हारिणी रमणी रमा ॥७५॥
चन्द्रा हिरणमयी ज्योत्स्ना रम्या शोभा शुभावहा । त्रैलोक्यमण्डना नारी नरेश्वर वरार्चिता ॥७६॥
त्रैलोक्यसुन्दरी रामा महाविभववाहिनी । पद्मस्था पद्मनिलया पद्ममालाविभूषिता ॥७७॥
पद्मयुग्मधरा कान्ता दिव्याभरणभूषिता । विचित्ररत्नमुकुटा विचित्राम्बरभूषणा ॥७८॥
विचित्रमाल्यगंधाढ्या विचित्रायुधवाहना । महानारायणी देवी वैष्णवी वीरवन्दिता ॥७९॥
कालसङ्कर्षिणी घोरा तत्त्वसंकर्षिणी कला । जगत्सम्पूरणी विश्वा महावैभवभूषणा ॥८०॥
वारुणी वरदा व्याख्या घण्टाकर्णविराजिता । नृसिंह भैरवी ब्राह्मी भास्करी व्योमचारिणी ॥८१॥
ऐन्द्री कामधेनुः सृष्टिः कामयोनिर्महाप्रभा । दृष्टा काम्या विश्वशक्ति र्बीजगत्यात्मदर्शना ॥८२॥
गरुडारूढहृदया चान्द्री श्रीर्मधुरानना । महोग्ररूपा वाराही नारसिंही हतासुरा ॥८३॥
युगान्तहुतभुग्ज्वाला कराला पिङ्गला कला । त्रैलोक्यभूषणा भीमा श्यामा त्रैलोक्यमोहिनी ॥८४॥
महोत्कटा महारक्ता महाचण्डा महासना । शङ्खिनी लेखिनी स्वस्था लिखिता खेचरेश्वरी ॥८५॥
भद्रकाली चैव वीरा कौमारी भवमालिनी । कल्याणी कामधुग्ज्वालामुखी चोत्पलमालिका ॥८६॥
वालिका धनदा सूर्या हृदयोत्पलमालिका । अजिता वर्षिणी रीतिर्भरुण्डा गरुडासना ॥८७॥
वैश्वानरी महामाया महाकाली विभीषणा । महामन्दारविभवा शिवानन्दा रतिप्रिया ॥८८॥
उद्रीतिः पद्ममाला च धर्मवेगा विभावनी । सत्क्रिया देवसेना च हिरण्यरजताश्रया ॥८९॥
सहसावर्तमाना च हस्तिनादप्रबोधिनी । हिरण्यपद्मवर्णा च हरिभद्रा सुदुर्द्धरा ॥९०॥
सूर्या हिरण्यप्रकट सदृशी हेममालिनी । पद्मानना नित्यपुष्टा देवमाताऽमृतोद्भवा ॥९१॥
महाधना च या शृङ्गी कार्द्दमी कम्बुकन्धरा । आदित्यवर्णा चन्द्राभा गन्धद्वारा दुरासदा ॥९२॥
वरार्चिता वरारोहा वरेण्या विष्णुवल्लभा । कल्याणी वरदा वामा वामेशी विन्ध्यवासिनी ॥९३॥
योगनिद्रा योगरता देवकी कामरूपिणी । कंसविद्रावणी दुर्गा कौमारी कौशिकी क्षमा ॥९४॥
कात्यायनी कालरात्रिर्निशितृप्ता सुदुर्जया । विरूपाक्षी विशालाक्षी भक्तानां परिरक्षिणी ॥९५॥
बहुरूपा स्वरूपा च विरूपा रूपवर्जिता । घण्टानिनादबहुला जीमूतध्वनिनिःस्वना ॥९६॥
महादेवेन्द्रमथिनी भ्रुकुटीकुटिलानना । सत्योपयाचिता चैका कौबेरी ब्रह्मचारिणी ॥९७॥
आर्या यशोदा सुतदा धर्मकामार्थमोक्षदा । दारिद्र्यदुःखशमनी घोरदुर्गार्तिनाशिनी ॥९८॥
भक्तार्तिशमनी भव्या भवभर्गापहारिणी । क्षीराब्धितनया पद्म कमला धरणीधरा ॥९९॥
रुक्मिणी रोहिणी सीता सत्यभामा यशस्विनी । प्रज्ञाधाराऽमिताबुद्धिर्वेद माता यशोवती ॥१००॥
समाधिर्भावना मैत्री करुणा भक्तवत्सला । अंतर्वेदी दक्षिणा च ब्रह्मचर्यपरागतिः ॥१०१॥
दीक्षा वीक्षा परीक्षा च समीक्षा वीरवत्सला । अम्बिका सुरभिः सिद्धा सिद्धविद्याधरार्चिता ॥१०२॥
सुदीप्ता लेलिहाना च कराला विश्वपूरका । विश्वसंहारिणी दीप्तिस्तापनी ताण्डवप्रिया ॥१०३॥

उद्भवा विरजा राज्ञी तापनी विन्दुमालिनी । क्षीरधारासुप्रभावा लोकमाता सुवर्चसा ॥१०४॥
हव्यगर्भा चाज्यगर्भा जुह्वतो यज्ञसम्भवा । आप्यायनी पावनी च दहनी दहनाश्रया ॥१०५॥
मातृका माधवी मुच्या मोक्षलक्ष्मीर्महर्द्धिदा । सर्वकामप्रदा भद्रा सुभद्रा सर्वमंगला ॥१०६॥
श्वेता सुशुक्लवसना शुक्लमाल्यानुलेपना । हंसा हीनकरी हंसी हृद्या हृत्कमलालया ॥१०७॥
सितातपत्रा सुश्रोणी पद्मपत्रायते क्षणा । सावित्री सत्यसंकल्पा कामदा कामकामिनी ॥१०८॥
दर्शनीया दृशा दश्या स्पृश्या सेव्या वराङ्गना । भोगप्रिया भोगवती भोगीन्द्रशयनासना ॥१०९॥
आर्द्रा पुष्करिणी पुण्या पावनी पापसूदनी । श्रीमती च शुभाकारा परमैश्वर्य भूतिदा ॥११०॥
अचिन्त्यानन्तविभवा भवभावविभावनी । निश्रेणिः सर्वदेहस्था सर्वभूतनमस्कृता ॥१११॥
बला बलाधिका देवी गौमती गोकुलालया । तोषणी पूर्णचन्द्राभा एकानन्दा शतानना ॥११२॥
उद्यानगरद्वारहर्म्यो - पवनवासिनी । कूष्माण्डीदारुणा चण्डा किराती नन्दनालया ॥११३॥
कालायना कालगम्याऽभयदा भयनाशिनी । सौदामिनी मेघरवा दैत्यदानवमर्द्दिनी ॥११४॥
जगन्माता भयकरी भूतधात्री सुदुर्लभा । काश्यपी शुभदाना च वनमाला शुभा वरा ॥११५॥
धन्या धन्येश्वरी धन्या रत्नदा वसुवर्द्धिनी । गान्धर्वी रेवती गंगा शकुनी विमलानना ॥११६॥
इडा शान्तिकरी चैव तामसी कमलालया । आज्यपा वज्रकौमारी सोमपा कुसुमाश्रया ॥११७॥
जगत्प्रिया च सरथा दुर्जया खगवाहना । मनोभवा कामचारा सिद्धचारणसेविता ॥११८॥
व्योमलक्ष्मी र्महालक्ष्मीस्तेजोलक्ष्मीः सुजोज्वला । रसलक्ष्मीर्जगद्यो निर्गन्धलक्ष्मीर्वनाश्रया ॥११९॥
श्रवणा श्रावणा नेत्रा रसनाप्राणचारिणी । विरिञ्चिमाता विभवा वरवारिजवाहना ॥१२०॥
वीर्या वीरेश्वरी वन्द्या विशोका वसुवर्द्धिनी । अनाहता कुण्डलिनी नलिनी वनवासिनी ॥१२१॥
गान्धारिणीन्द्रनमिता सुरेन्द्रनमिता सती । सर्वमंगलमाङ्गल्या सर्वकामसमृद्धिदा ॥१२२॥
सर्वानन्दा महानन्दा सत्कीर्तिः सिद्धसेविता । सिनीवाली कुहू राका अमा चानुमतिर्द्युतिः ॥१२३॥
अरुन्धती वसुमती भार्गवी वास्तुदेवता । मायूरी वज्रवेताली वज्रहस्ता वरानना ॥१२४॥
अनघा धरणिर्धीरा धमनी मणिभूषणा । राजश्रीरूपसहिता ब्रह्मश्रीर्ब्रह्मवन्दिता ॥१२५॥
जयश्रीर्जयदा ज्ञेया सर्गश्रीः स्वर्गतिः सताम् । सुपुष्पा पुष्पनिलया फलश्रीर्निष्कलप्रिया ॥१२६॥
धनुर्लक्ष्मीस्त्वमिलिता परक्रोधनिवारिणी । कद्रूर्द्धनायुः कपिला सुरसा सुरमोहिनी ॥१२७॥
महाश्वेता महानीला महामूर्तिर्विषापहा । सुप्रभा ज्वालिनी दीप्तिस्तृप्तिर्व्याप्तिः प्रभाकरी ॥१२८॥
तेजोवती पद्मबोधा मदलेखारुणावती । रत्ना रत्नावलीभूता शतधामा शतापहा ॥१२९॥
त्रिगुणा घोषिणी रक्ष्या नर्द्दिनी घोषवर्जिता । साध्याऽदितिर्दितिर्देवी मृगवाहा मृगाङ्कगा ॥१३०॥
चित्रनीलोत्पलगता वृषरत्नाकराश्रया । हिरण्यरजतद्वन्द्वा शङ्खभद्रासनस्थिता ॥१३१॥
गोमूत्र गोमयक्षीरदधि सर्पिर्जलाश्रया । मरीचिश्चीरवसना पूर्णा चन्द्रार्कविष्टरा ॥१३२॥

सुसूक्ष्मा निर्वृतिस्थूला निवृत्तारातिरेव च । मरीचिज्वालिनी धूम्रा हव्यवाहा हिरण्यदा ॥१३३॥
दायिनी कालिनी सिद्धिः शोषिणी सम्प्रबोधिनी । भास्वरा संहतिस्तीक्ष्णा प्रचण्डज्वलनोज्ज्वला ॥१३४॥
साङ्गा प्रचण्डा दीप्ता च वैद्युतिः सुमहाद्युतिः । कपिला नीररक्ता च सुषुम्ना विस्फुलिङ्गिनी ॥१३५॥
अर्चिष्मती रिपुहरा दीर्घा धूमावली जरा । सम्पूर्णमण्डला पूषा स्त्रांसिनी सुमनोहरा ॥१३६॥
जया पुष्टिकरीच्छाया मानसा हृदयोज्ज्वला । सुवर्णकारिणी श्रेष्ठा मृतसंजीवनी रणे ॥१३७॥
विशल्यकरणी शुभ्रा सन्धिनी परमौषधिः । ब्रह्मिष्ठा ब्रह्मसहिता ऐन्दवी रत्नसम्भवा ॥१३८॥
विद्युत्प्रभा बिन्दुमती त्रिस्वभावगुणाम्बिका । नित्योदिता नित्यदृष्टा नित्यकामकरीषिणी ॥१३९॥
पद्माङ्का वज्रजिह्वा व वक्रदण्डा विभासिनी । विदेहपूजिता कन्या माया विजयवाहिनी ॥१४०॥
मानिनी मंगला मान्या मानिनी मानदायिनी । विश्वेश्वरी गणवती मण्डला मण्डलेश्वरी ॥१४१॥
हरिप्रिया भौमसुता मनोज्ञा मतिदायिनी । प्रत्यंगिरा सोमगुप्ता मनोभिज्ञा वदन्मतिः ॥१४२॥
यशोधरा रत्नमाला कृष्णा त्रैलोक्यबन्धिनी । अमृताधारिणी हर्षा विनता वल्लकी शची ॥१४३॥
संकल्पा भामिनी मिश्रा कादम्बर्यामृता प्रभा । आगता निर्गता वज्रा सुहिता सहिताऽक्षता ॥१४४॥
सर्वार्थसाधनकरी धानुर्द्धारणिकामला । करुणाधारसम्भूता कमलाक्षी शशिप्रिया ॥१४५॥
सौम्यरूपा महादीप्ता महाज्वाला विकासिनी । माला कांचनमाला च सद्वज्रा कनकप्रभा ॥१४६॥
प्रक्रियापरमा भोक्त्री क्षोभिका च सुखोदया । विजृम्भणा च वज्राख्या शृङ्खला कमलेक्षणा ॥१४७॥
जयंकरी मधुमती हरिता शशिनी शिवा । मूलप्रकृतिरीशानी योगमाता मनोजवा ॥१४८॥
धर्मोदया भानुमती सर्वाभासा सुखावहा । धुरन्धरा च बाला च धर्मसेव्या तथागता ॥१४९॥
सुकुमारा सौम्यमुखी सौम्यसम्बोधनोत्तमा । सुमुखी सर्वतोभद्रा गुह्य शक्तिर्गुहालया ॥१५०॥
हलायुधा च कावीरा सर्वशास्त्रसुधारिणी । व्यौमशक्तिर्महादेहा व्योमगा मग्नमन्मयी ॥१५१॥
गंगा वितस्ता यमुना चन्द्रभागा सरस्वती । तिलोत्तमोर्वशी रम्भा स्वामिनी सुरसुन्दरी ॥१५२॥
बाणप्रहरणा बाला बिम्बोष्ठी चारुहासिनी । ककुद्मिनी चारुपृष्ठा दृष्टादृष्टफलप्रदा ॥१५३॥
काम्यचरी च काम्या च कामाचारविहारिणी । हिमशैलेन्द्र संकाशा गजेन्द्रवरवाहना ॥१५४॥
अशेषसुखसौभाग्य सम्पदां योनिरुत्तमा । सर्वोत्कृष्टा सर्वमयी सर्वा सर्वेश्वरप्रिया ॥१५५॥
सर्वाङ्गयोनिः साऽव्यक्ता सम्प्रधानेश्वरेश्वरी । विष्णुवक्षःस्थलगता किमतः परमुच्यते ॥१५६॥
परा निर्महिमा देवी हरिवक्षःस्थलाश्रया । सा देवी पापहन्त्री च सान्निध्यं कुरुतान्मम ॥१५७॥
इति नाम्नां सहस्रं तु लक्ष्म्याः प्रोक्तं शुभावहम् । परावरेण भेदेन मुख्यगौणेन भागतः ॥१५८॥
यश्चैतत्कीर्तयेन्नित्यं शृणुयाद्वापि पद्मज । शुचिः समाहितो भूत्वा भक्तिश्रद्धासमन्वितः ॥१५९॥
श्रीनिवासं समभ्यर्च्य पुष्पधूपानुलेपनैः । भोगैश्च मधुपर्काद्यैर्यथाशक्ति जगद्गुरुम् ॥१६०॥
तत्पार्श्वस्थांश्रियं देवीं सम्पूज्य श्रीधर प्रियाम् । ततो नामसहस्रैण तोषयेत्परमेश्वरीम् ॥१६१॥

नानारत्नावलीस्तोत्रमिदं यः सततं पठेत् । प्रसादाभिमुखी लक्ष्मीः सर्वं तस्मै प्रयच्छति ॥१६२॥
यस्या लक्ष्म्याश्च सम्भूताः शक्तयो विश्वगाः सदा । कारणत्वं न तिष्ठन्ति जगत्यस्मिंश्चराचरे ॥१६३॥
तस्मात्प्रीता जगन्माता श्रीर्यस्याच्युतवल्लभा । सुप्रीता शक्तयस्तस्य सिद्धिमिष्टां दिशन्ति हि ॥१६४॥
एक एव जगत्स्वामी शक्तिमानच्युतः प्रभुः । तदंशशक्तिमन्तोऽन्ये ब्रह्मेशानादयो यथा ॥१६५॥
तथैवैका परा शक्तिः श्रीस्तस्य करुणाश्रया । ज्ञानादिषड्गुण्यमयी या प्रोक्ता प्रकृतिः परा ॥१६६॥
एकैकशक्तिः श्रीस्तस्या द्वितीयात्मनि वर्त्तते । परा परेशी सर्वेशी सर्वाकारा सनातनी ॥१६७॥
अनन्तनामधेया च शक्तिचक्रस्य नायिका । जगच्चराचरमिदं सर्वं व्याप्य व्यवस्थिता ॥१६८॥
तस्मादेकैव परमा श्रीर्ज्ञेया विश्वरूपिणी । सौम्या सौम्येन रूपेण संस्थिता नटजीववत् ॥१६९॥
योयो जगति पुंभावः स विष्णुरिति निश्चयः । याया तु नारीभावस्था तत्र लक्ष्मीर्व्यवस्थिता ॥१७०॥
प्रकृतेः पुरुषाच्चान्यस्तृतीयो नैव विद्यते । अथ किं बहुनोक्तेन नरनारीमयो हरिः ॥१७१॥
अनेकभेदभिन्नस्तु क्रियते परमेश्वरः । महाविभूतिं दयितां ये स्तुवन्त्यच्युतप्रियाम् ॥१७२॥
ते प्राप्नुवन्ति परमां लक्ष्मी संशुद्धचेतसः । पद्मयोनिरिदं प्राप्य पठं स्तोत्रमिदं क्रमात् ॥१७३॥
दिव्यमष्टगुणैश्वर्यं तत्प्रसादाच्च लब्धवान् । सकामानाञ्च फलदामकामानां च मोक्षदाम् ॥१७४॥
पुस्तकाख्यां भयत्रात्रीं सितवस्त्रां त्रिलोचनाम् । महापद्मनिषण्णां तां लक्ष्मीमजरतां नमः ॥१७५॥
करयुगलगृहीतं पूर्णकुम्भं दधाना, क्वचिद्मलगतस्था शङ्खपद्माक्षपाणिः ।
क्वचिदपि दयिताङ्गे चामरव्यग्रहस्ता, क्वचिदपि सृंणिपाशं विभ्रती हेमकान्तिः ॥१७६॥

॥इति श्रीब्रह्मपुराणे काश्मीर वर्णने हिरण्यगर्भ हृदये सर्वकामप्रदायकं पुरुषोत्तम प्रोक्तं लक्ष्मीसहस्रनाम स्तोत्रं सम्पूर्णम्॥

॥ इति श्री कमला तंत्रं सम्पूर्णम्॥

॥ मिश्र तंत्रम् ॥

॥ श्रीसंग्राम विजया विद्या मालामंत्र ॥

विनियोग :- **ॐ अस्य श्रीसंग्राम विजया विद्यायाः श्रीईश्वर ऋषिः। उष्णिक् छन्दः। श्रीचामुण्डा देवता सर्व कार्येषु जयार्थे, शत्रु नाशार्थे, वा जपे विनियोगः।**

ऋष्यादि न्यास :- **शिरसि श्रीईश्वर ऋषये नमः। मुखे उष्णिक् छन्दसे नमः। हृदि श्रीचामुण्डा देवतायै नमः। सर्वाङ्गे सर्व कार्येषु जयार्थे (शत्रु नाशार्थे वा) जपे विनियोगाय नमः।**

षडङ्गन्यास	करन्यास	अङ्गन्यास
ॐ ह्रां	**अंगुष्ठाभ्यां नमः**	**हृदयाय नमः**
ॐ ह्रीं	**तर्जनीभ्यां नमः।**	**शिरसे स्वाहा**
ॐ ह्रूँ	**मध्यमाभ्यां नमः।**	**शिखायै वषट्**
ॐ ह्रैं	**अनामिकाभ्यां नमः।**	**कवचाय हुम्**
ॐ ह्रौं	**कनिष्ठिकाभ्यां नमः।**	**नेत्रत्रयाय वौषट्**
ॐ ह्रः	**करतल करपृष्ठाभ्यां नमः**	**अस्त्राय फट्**

॥ ध्यानम् ॥

अष्टाविंश भुजा चण्डी असिखेटक धृक्करौ। गदामुण्ड युतौ चान्यौ शरचाप धरौ परौ ॥ मुष्टिमुद्गर संयुक्तौ शङ्ख खड्ग युतौ परौ। ध्वज वज्रयुतौ चान्यौ सचक्रपरशुपरौ ॥ डमरु दर्पणाढ्यौ च शक्तिकुन्तधरौ परौ। हलेन मुसलेनाढ्यो पाश तोमरसंयुतौ ॥ ढक्कापणव संयुक्तौ अभयस्वस्ति कान्वितौ। तर्जनी च वरमुद्रा युतां ध्यायेच्छ्रीचामुण्डाम् ॥

इति ध्यात्वा, मानसोपचारैः सम्पूज्य मालामन्त्रं जपेत्। यथा -

॥ श्रीईश्वर उवाच ॥

संग्राम विजयां विद्या **पदमालां वदाम्यहम्।**

ॐ ह्रीं चामुण्डे, श्मशान वासिनि, खट्वाङ्ग कपाल हस्ते, महाप्रेत समारूढे, महाविमान समाकुले, कालरात्रि महागणपरिवृते, महामुखे, बहुभुजे, घण्टा डमरु किङ्किणी अट्टाट्टहासे। किलि किलि ॐ हूँ फट्। दंष्ट्रा घोरान्धकारिणि

नाद शब्द बहुले गजचर्म प्रावृत शरीरे मांस दिग्धे लेलिहानोग्र जिह्वे महाराक्षसि रौद्रदंष्ट्रा कराले भीमा अट्टाट्टहासे स्फुरद् विद्युत् प्रभे। चल चल ॐ चकोरनेत्रे। चिलि चिलि। ॐ भीं भ्रकुटी मुखि हुङ्कार भय त्रासनि कपाल मालावेष्टित जटामुकुट शशाङ्क धारिणि अट्टाटहासे किलि किलि ॐ हूं फट् दंष्ट्रा घोरान्धकारिणि सर्वविघ्न विनाशिनि इदं कर्म साधय साधय। ॐ शीघ्रं कुरु कुरु ॐ फट्। ॐ अंकुशेन शमय प्रवेशय। ॐ रङ्ग रङ्ग कम्पय कम्पय। ॐ चालय। ॐ रुधिरमांस मद्य प्रिये। हन हन ॐ कुट्ट कुट्ट ॐ छिन्द, ॐ मारय, ॐ अनुक्रमय, ॐ वज्र शरीरं पातय। ॐ त्रैलोक्य गतं दुष्टमदुष्टं वा गृहीतम गृहीतंवा आवेशय। ॐ नृत्य ॐ वन्द। ॐ कोटराक्षि ऊर्ध्वकेशि उलूकवदने करङ्किणि ॐ करङ्कमाला धारिणि दह ॐ पच पच। ॐ गृह्ण। ॐ मण्डलमध्ये प्रवेशय। ॐ किं विलम्बसि? ब्रह्मसत्येन विष्णुसत्येन रुद्रसत्येन ऋषिसत्येन आवेशय। ॐ किलि किलि ॐ खिलि खिलि विलि विलि। ॐ विकृतरूप धारिणि कृष्णभुजङ्ग वेष्टित शरीरे सर्वग्रहा वेशनि प्रलम्बौष्ठिनि भ्रू भङ्गलग्रनासिके विकट मुखि कपिल जटे ब्राह्मि भञ्ज। ॐ ज्वालामुखि। स्वन ॐ पातय। ॐ रक्ताक्षि। घूर्णय भूमिं पातय। ॐ शिरो गृह्ण चक्षुर्मीलय। ॐ हस्तपादौ गृह्ण मुद्रां स्फोटय। ॐ फट् ॐ विदारय, ॐ त्रिशूलेन छेदय छेदय। ॐ वज्रेण हन हन। ॐ दण्डेन ताड़य ताडय। ॐ चक्रेण छेदय छेदय। ॐ शक्त्या भेदय। ॐ दंष्ट्रया कीलय। ॐ कर्णिकया पाटय। ॐ अंकुशेन गृह्ण। ॐ शिरोऽक्षि ज्वरमैकाहिकं द्व्याहिकं त्र्याहिकं चातुर्थिकं डाकिनी स्कन्द ग्रहान् मुञ्च मुञ्च। ॐ पच ॐ उत्सादय ॐ भूमिं पातय ॐ गृह्ण। ॐ ब्रह्माणि! एहि ॐ माहेश्वरि! एहि ॐ कौमारि! एहि ॐ वैष्णवि एहि ॐ वाराहि एहि ॐ एन्द्रि एहि ॐ चामुण्डे एहि, ॐ रेवति ! एहि ॐ आकाश रेवति ! एहि ॐ हिमवच्चारिणि ! एहि ॐ रुरु मर्दिनि असुर क्षयङ्करि आकाशगामिनि! पाशेन बन्ध बन्ध अंकुशेन कट कट समयं तिष्ठ। ॐ मण्डलं प्रवेशय। ॐ गृह्ण ॐ मुखं बन्ध ॐ चक्षुर्बन्ध हस्त पादौ च बन्ध दुष्ट ग्रहान् सर्वान् बन्ध ॐ दिशो बन्ध ॐ विदिशो बन्ध अधस्ताद् बन्ध ऊर्ध्वं बन्ध। ॐ भस्मना पानीयेन वा मृत्तिकया सर्षपैर्वा सर्वान् आवेशय। ॐ पातय। ॐ चामुण्डे ! किलि किलि। ॐ विच्चे हुँ फट् स्वाहा॥

पदमाला जयाख्येयं सर्वकर्म प्रसाधिका ।
सर्वदा होम जप्याद्यैः पाठाद्यैश्च रणे जयः ॥

विधि :- ग्रह पीड़ा, सिर और आँख के रोगों व ज्वरों से ग्रस्त व्यक्ति को ३, ५ या ७ बार अभिमन्त्रित जल के छींटे दें अथवा भस्म, मिट्टी या सरसों मारें। शत्रुविजय के लिये अभिमन्त्रि लाल सरसों को शत्रु के घर में फेंके। अभिचार नाश के लिए पाठ करें। १०००० पाठ का पुरश्चरण करने से ब्रह्मास्त्रवत् कार्य सिद्धि प्रदान करता है। व अभिष्ट सिद्धि के लिए १००० पाठ करें।

॥ इति श्री आदि अग्निपुराणे युद्धजयार्णवे श्रीसंग्राम विजया विद्या माला मन्त्रम् ॥

॥ अथ श्रीत्रिशिरा देवी विधानम् ॥

विनियोग :- **ॐ अस्य श्री शत्रुविध्वंसिनी स्तोत्र मन्त्रस्य ज्वलत् पावकः ऋषिः, अनुष्टुप् छन्दः, श्रीशत्रुविध्वंसिनी देवता, मम शत्रुं विध्वंसनार्थे जपे विनियोगः।**

ऋष्यादिन्यास :- **ज्वलत् पावक ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखेः। श्रीशत्रुविध्वंसिनी देवतायै नमः हृदि। श्री शत्रुविध्वंसिनी देवता प्रसादात् मम शत्रुं शीघ्रं विध्वंसनार्थे जपे विनियोगाय नमः सर्वाङ्गे।**

मन्त्रः	करन्यास	मंत्र	षड्ङ्गन्यास
ॐ शत्रुविध्वंसिन्यै	अंगुष्ठाभ्यां नमः	घोर दंष्ट्रायै	हृदयाय नमः
ॐ रौद्रायै	तर्जनीभ्यां नमः।	त्रिशूलिन्यै	शिरसे स्वाहा
ॐ त्रिशिरसे	मध्यमाभ्यां नमः।	दिगम्बर्यै	शिखायै वषट्
ॐ रक्त लोचनायै	अनामिकाभ्यां नमः।	मुक्तकेश्यै	कवचाय हुँ
ॐ अग्निर्ज्वालायै	कनिष्ठिकाभ्यां नमः।	रक्तपाण्यै	नेत्रत्रयाय वौषट्
ॐ रौद्रमुख्यै	करतलकरपृष्ठाभ्यां नम।	महोदर्यै	अस्त्राय फट्।

'फट्' से ताल-त्रय दें और 'ॐ रौद्रमुख्यै नमः' से दशों दिशाओं में चुटकी बजाकर दिग्बन्धन करें।

॥ ध्यानम् ॥

रक्ताङ्गीं शिव वाहनां त्रिशिरसां रौद्री महाभैरवीम्
धूम्राक्षीं भवनाशिनीं घननिभां नीलालंकार कृताम्।
खड्गं शूलं त्रिशूलं वराभय युतां ध्यात्वा कृताङ्गीं
कामरूपा कामविद्या, कामरूपादिकालिका । कामरूपकला काम्या, कामरूपकुलेश्वरी ॥
कामरूपजनानन्दा, कामरूपकुशाग्र - धीः । कामरूपकराकाशा, कामरूपतरुस्थिता ॥
कामात्मजा कामकला, कामरूपविहारिणी । कामशास्त्रार्थमध्यस्था, कामरूपक्रियाकला ॥
कामरूपमहाकाली, कामरूपयशोमयी । कामरूपरमानन्दा, कामरूपादिकामिनी ॥
कुलमूला कामरूपपद्ममध्यनिवासिनी । कृताञ्जलिप्रिया कृत्या, कृत्यादेवीस्थिता कटा ॥
कटका काटका कोटिकटिघण्टविनोदिनी । कटिस्थूलतरा काष्ठा, कात्यायन सुसिद्धिदा ॥
कात्यायनी काचलस्था, कामचन्द्राननाकथा । काश्मीरदेशनिरता, काश्मीरी कृषिकर्मजा ॥
कृषिकर्मस्थिता कौर्मा, कूर्मपृष्ठनिवासिनी। कालघण्टानादरता, कलमञ्जीरमोहिनी ॥
कलयन्ती शत्रुवर्गान्, क्रोधयन्ती गुणागुणं । कामयन्ती सर्वकामं काशयन्ती जगत्त्रयं ॥
कौलकन्या कालकन्या, कौलकालकुलेश्वरी । कौलमन्दिरसंस्था च, कुलधर्मविडम्बिनी ॥
कुलधर्मरताकारा, कुलधर्मविनाशिनी । कुलधर्मपण्डिता च, कुलधर्मसमृद्धिदा ॥
कौलभोगमोक्षदा च, कौलभोगेन्द्रयोगिनी । कौलकर्मा नवकुला, श्वेतचम्पकमालिनी ॥
कुलपुष्पमाल्यकान्ता, कुलपुष्पभवोद्भवा । कौलकोलहलकरा, कौलकर्मप्रियापरा ॥
काशीस्थिता काशकन्या, काशीचक्षुप्रिया कुथा। काष्ठासनप्रिया काका, काकपक्षकपालिका ॥
कपालरसभोज्या च, कपालनवमालिनी । कपालस्था च कापाली, कपालसिद्धिदायिनी ॥
कपाला कुलकर्त्री च, कपालशिखरस्थिता। कथना कृपणश्रीदा, कृपी कृपणसेविता ॥
कर्महन्त्री कर्मगता, कर्माकर्मविवर्जिता । कर्मसिद्धिरता कामी, कर्मज्ञाननिवासिनी ॥
कर्मधर्मसुशीला च, कर्मधर्मवशङ्करी । कनकाब्जसुनिर्माण - महासिंहासन - स्थिता ॥
कनकग्रन्थिमाल्याढ्या, कनकग्रन्थिभेदिनी । कनकोद्भवकन्या च, कनकाम्भोजवासिनी ॥
कालकूटादिकूटस्था, किटिशब्दान्तरस्थिता । कङ्कपक्षिनादमुखा, कामधेनूद्भवा कला ॥
कङ्कणाभा - धरा कर्दा, कर्दमा कर्दमस्थिता । कर्दमस्थजलाच्छन्ना, कर्दमस्थजनप्रिया ॥
कमठस्था कार्मुकस्था, कम्प्रस्था कंसनाशिनी । कंसप्रिया कंसहन्त्री, कंसाज्ञानकरालिनी ॥
काञ्चनाभा काञ्चनदा, कामदा क्रमदा कदा । कान्तभिन्ना कान्तचिन्ता, कमलासनवासिनी ॥
कमलासनसिद्धिस्था, कमलासनदेवता । कुत्सिता कुत्सितरता, कुत्साशापविवर्जिता ॥

कुपुत्ररक्षिका कुल्ला, कुपुत्रमानसापहा । कुजरक्षकरी कौजी, कुब्जाख्या कुब्जविग्रहा ॥
कुनखी कूपदिक्षुस्था, कुकरी कुधनी कुदा । कुप्रिया कोकिलानन्दा, कोकिला कामदायिनी ॥
कुकामिनी कुबुद्धिस्था, कूर्मवाहनमोहिनी । कुलका कुललोकस्था, कुशासनसिद्धिदा ॥
कौशिकीदेवता कस्या, कन्नादनादसुप्रिया । कुसौष्ठवा कुमित्रस्था, कुमित्रशत्रुघातिनी ॥
कुज्ञाननिकरा कुस्था, कुजिस्था कर्जदायिनी । ककर्जा कर्जकारिणी, कर्जबद्धविमोहिनी ॥
कर्जशोधनकर्त्री च, कालास्त्रधारिणी सदा । कुगतिः कालसुगतिः, कलिबुद्धिविनाशिनी ॥
कलिकालफलोत्पन्ना, कलिपावनकारिणी । कलिपापहरा काली, कलिसिद्धिसुसूक्ष्मदा ॥
कालिदासवाक्यगता, कालिदाससुसिद्धिदा । कलिशिक्षा कालशिक्षा, कन्दशिक्षापरायणा ॥
कमनीयभावरता कमनीयसुभक्तिदा । करकाजनरूपा च, कक्षावादकराकरा ॥
कञ्चुवर्णा काकवर्णा, क्रोष्टुरूपा कषामला । कोष्टनादरता कीता, कातरा कातरप्रिया ॥
कातरस्था कातराज्ञा, कातरानन्दकारिणी । काशमर्दतरुद्भूता, काशमर्दविभक्षिणी ॥
कष्टहानिः कष्टदात्री, कष्टलोकविरक्तिदा । कायागता कायसिद्धिः कायानन्दप्रकाशिनी ॥
कायगन्धहरा कुम्भा कायकुम्भाकठोरिणी । कठोरतरुसंस्था च, कठोरलोकनाशिनी ॥
कुमार्गस्थापिता कुप्रा, कार्पासतरुसम्भवा । कार्पासवृक्षसूत्रस्था, कुवर्गस्था करोत्तरा ॥
कर्णाटकर्मसम्भूता, कार्णाटी कर्णपूजिता । कर्णास्त्ररक्षिका कर्णा, कर्णहा कर्णकुण्डला ॥
कुन्तलादेशनमिता, कुटुम्बा कुम्भकारिका । कर्णासरासना कृष्टा, कृष्णहस्ताम्बुजार्जिता ॥
कृष्णाङ्गी कृष्णदेहस्था, कुदेशस्था कुमङ्गला । क्रूरकर्मस्थिता कोरा, किरातकुलकामिनी ॥
कालवारिप्रिया कामा, काव्यवाक्यप्रिया क्रुधा। कुञ्जलता कौमुदी च, कुज्योत्स्ना कलनप्रिया ।
कलना सर्वभूतानां, कपित्थवनवासिनी। कटुनिम्बस्थिता काख्या, कवर्गाख्या कवर्गिका ॥
किरातच्छेदिनी कार्या, कार्याकार्यविवर्जिता । कात्यायनादिकल्पस्था, कात्यायनसुखोदया ॥
कुक्षेत्रस्था कुलाविघ्ना, करणादिप्रवेशिनी। काङ्काली किङ्कला काला, कीलितासर्वकामिनी ॥
कीलितापेक्षिता कूटा, कूटकुंकुमचर्चिता । कुंकुमागन्धनिलया, कुटुम्बभवन स्थिता ॥
कुंकृपा कारणानन्दा कवितारसमोहिनी । काव्यशास्त्रानन्दरता, काव्यपूज्या कवीश्वरी ॥
कटकादिहस्तिरथहयदुन्दुभि - शब्दिनी । कितवा क्रूरधूर्तस्था, केकाशब्दनिवासिनी ॥
कें केवलाम्बिता केता, केतकी - पुष्पमोहिनी । कैं कैवल्यगुणोद्वास्या, कैवल्यधनदायिनी ॥
करीधनीन्द्रजननी, काक्षताक्ष कलङ्किनी । कुडुवान्ता कान्तिशान्ताकांक्षापारमहंस्यगा ॥
कर्त्रीचित्ता कान्तवित्ता, कृषणा कृषिभोजिनी । कुंकुमासक्तहृदया, केयूरहारमालिनी ॥
कीश्वरी केशवा कुम्भा, कैशोरजनपूजिता । कालिकामध्यनिरता, कोकिलस्वरगामिनी ॥
कुरदेहहरा कुम्बा, कुडुम्बा कुरमेदिनी । कुण्डलीश्वरसंवादा, कुण्डलीश्वरमध्यगा ॥

कालसूक्ष्मा कालयज्ञा, कालहारकरी कहा । कहलस्था कलहस्था, कलहा कलहङ्करी ॥
कुरङ्गीश्री कुरङ्गस्था, कोरङ्गी कुण्डलापहा । कुललक्ष्मीः कृष्णबुद्धिः, कृष्णाध्याननिवासिनी ॥
कुतवा काष्ठवलता, कृतार्थकरणी कुसी । कनकस्था क स्वरस्था, कलिकादोषभङ्गजा ॥
कुसुमाकारकमला कुसुमस्रग्विभूषणा । किंजल्का कैतवाकाशा, कमनीय - जालोदया ॥
ककारकूट सर्वाङ्गी, ककाराम्बरमालिनी । कालभेदकरा काटा, कर्पवासा ककुत्स्थला ॥
कुवासा कबरी कर्वा, कूसवी कुरुपालिनी । कुरुपृष्ठा कुरुश्रेष्ठा, कुरूणां ज्ञाननाशिनी ॥
कुतूहलरता कान्ता, कुव्याप्ता कष्टबन्धना । कषायणतरुस्था च , कषायणरसोद्भवा ॥
कविविद्या कुष्टहन्त्री, कुष्ठशोकविसर्जनी। काष्ठासनगता कार्याश्रया काश्रयकौलिका ॥
कालिका कालिसंत्रस्ता, कौलिकध्यानवासिनी। क्लृप्तस्था क्लृप्त जननी क्लृप्तच्छन्ना कलिध्वजा ॥
केशवा केशवानन्दा केश्यादि - दानवापहा । केशवाङ्गज - कन्या च केशवाङ्गजमोहिनी ॥
किशोरार्चन योग्या च किशोर देव देवता । कांतश्री करणी कुल्या कपटाप्रिय घातिनी ॥
कुकामजनिता कौञ्चा कौञ्चस्था कौञ्चवासिनी । कूपस्था कूपबुद्धिस्था कूपमाला मनोरमा ॥
कुलपुष्पाश्रया कान्तिः, क्रमदाक्रमदा क्रमा । कुविक्रमा कुक्रमस्था, कुण्डली कुण्डदेवता ॥
कौण्डिल्यनगरोद्भूता, कौडिल्यगोत्रपूजिता । कपिराजस्थिता कापी, कपिबुद्धिबलोदया ॥
कपिध्यानपरामुख्या, कुव्यवस्था कुसाक्षिदा । कुमध्यस्था कुकल्पा च, कुलपंक्तिप्रकाशिनी ॥
कुलभ्रमरदेहस्था, कुलभ्रमरनादिनी। कुलासङ्गा कुलाक्षी च, कुलमत्ता कुलानिला ॥
कलिचिह्ना कालचिह्ना, कण्ठचिह्ना कवीन्द्रजा। करीन्द्रा कमलेशश्रीः, कोटिकन्दर्प दर्पहा ॥
कोटितेजोमयी कोट्या कोटीर पद्ममालिनी । कोटीरमोहिनी कोटिः कोटिकोटिविधूद्भवा ॥
कोटिसूर्यसमानास्या, कोटि कालानलोपमा । कोटीरहारललिता, कोटिपर्वतधारिणी ॥
कुलयुग्मधरादेवी, कुचकामप्रकाशिनी । कुचानन्दा कुचाच्छन्ना, कुचकाठिन्यकारिणी ॥
कुचयुग्ममोहनस्था, कुचमायातुरा कुचा । कुचयौवनसम्मोहा, कुचमर्दनसौख्यदा ॥
काचस्था काचदेहा च, काचपूरनिवासिनी । काचग्रस्था काचवर्णा, कीचकप्राणनाशिनी ॥
कमलालोचनप्रेमा, कोमलाक्षीमनुप्रिया । कमलाक्षी कमलजा, कमलास्या करालजा ॥
कमलांघ्रिद्वया काम्या, कराख्या करमालिनी । करपद्मधरा कन्दा, कन्दबुद्धिप्रदायिनी ॥
कमलोद्भवपुत्री च, कमलापुत्रकामिनी । किरन्ती किरणाच्छन्ना, किरणप्राणवासिनी ॥
काव्यप्रदा काव्यचित्ता, काव्यसारप्रकाशिनी । कलाम्बा कल्पजननी, कल्पभेदासनस्थिता ॥
कालेच्छा कालसारस्था, कालमारणघातिनी । किरणक्रमदीपस्था, कर्मस्था क्रमदीपिका ॥
काललक्ष्मीः कालचण्डा, कुलचण्डेश्वरप्रिया । काकिनीशक्तिदेहस्था, कितवा किंतकारिणी ॥
करञ्चा कञ्चुका कौञ्चा, काकचंचुपुटस्थिता। काकाख्या काकशब्दस्था, कालाग्निदहनार्थिका ॥

कुचक्षनिलया कुत्रा, कुपुत्रा क्रतुरक्षिका। कनकप्रतिमाकारा, करबन्धाकृतिस्थिता ॥
कृतिरूपा कृतिप्राणा, कृतिक्रोधनिवारिणी। कुक्षिरक्षाकरा कुक्षा, कुक्षिब्रह्माण्डधारिणी ॥
कुक्षिदेवस्थिता कुक्षिः, क्रियादक्षा क्रियातुरा। क्रियानिष्ठा क्रियानन्दा, क्रतुकर्मा क्रियाप्रिया ॥
कुशलासवासंसक्ता, कुशारिप्राणवल्लभा। कुशारिवृक्षमदिरा, काशीराजवशोद्यमा ॥
काशीराजगृहस्था च कर्तृभ्रातृगृहस्थिता। कर्णाभरणभूषाढ्या, कण्ठभूषा च कण्ठिका ॥
कण्ठस्थानगता कण्ठा, कण्ठपद्मनिवासिनी, कण्ठप्रकाशकरिणी, कण्ठमाणिक्यमालिनी ॥
कण्ठपद्मसिद्धिकरी, कण्ठाकाशनिवासिनी। कण्ठपद्मसाकिनीस्था, कण्ठषोडशपत्रिका ॥
कृष्णाजिनधराविद्या, कृष्णाजिनसुवाससी। कुतकस्था कुखेलस्था, कुण्डवालंकृताकृता ॥
कलगीता कालध्वजा, कलभङ्गपरायणा। कालीचन्द्रा कला काव्या, कुचस्था कुचलप्रदा ॥
कुचौरघातिनी कच्छा, कच्छादस्था कजातना। कंजाछदमुखी कंजा, कंजतुण्डाकजीवनी ॥
कामराजीवरवाद्यस्था, कियद्हुङ्कारनादिनी। कणादयज्ञसूत्रस्था, कीलालमज्ञसंज्ञका ॥
कटिहासा कपाटस्था, कटुधूमनिवासिनी। कटिनादघोरतरा, कुट्टलापाटलिप्रिया ॥
कामचाराब्जनेत्रा च, कामचोद्गारसंक्रमा। काष्ठपर्वतसन्दाहा, कष्टाकष्टनिवारिणी ॥
कहोडमन्त्रसिद्धस्था, काहलाडिण्डिमप्रिया। कुलडिण्डिमवाद्यस्था, कामडामरसिद्धिदा ॥
कुलतामरमध्यस्था, कुलकेकानिनादिनी। कोजागरढोलनादा, कास्यवीररणस्थिता ॥
कालादिकरणच्छिद्रा, करुणानिधिवत्सला। क्रतुश्रीदा कृतार्थश्रीः, कालताराकुलोत्तरा ॥
कथापूज्या कथानन्दा, कथना कथनप्रिया। कार्थचिन्ता कार्थविद्या, काममिथ्यापवादिनी ॥
कदम्बपुष्पसङ्काशा, कदम्बपुष्पमालिनी। कादम्बरीपानतुष्टा, कायदम्भा कदोद्यमा ॥
कंकुलेपत्रमध्यस्था, कुलाधारधराप्रिया। कुलदेवशरीरार्धा, कुलधामा कलाधरा ॥
कामरागभूषणाढ्या, कामिनीरगुणप्रिया। कुलीननागहस्ता च, कुलीननाग वाहिनी ॥
कामपूरस्थिता कोपा, कपालीवन्दनोद्भवा। कारागारजनापाल्या, कारागारप्रपालिनी ॥
क्रियाशक्तिः कालपंक्तिः, कर्णपंक्तिः कफोदया। कामफुल्लारविन्दस्था, कामरूपफलाफला ॥
कायफला कायफेणा, कान्ता नाड़ीफलीश्वरा। कामफेरुगतागौरी, कायवाणी कुवीरगा ॥
कबरीमणिबन्धस्था, कावेरीतीर्थसङ्गमा। कामभीतिहरा कान्ता, कामवाकुभ्रमातुरा ॥
कविभावहराभामा, कमनीयभयापहा। कामगर्भदेवमाता, कामकल्पलतामरा ॥
कमठप्रियमांसादा, कमठा कामठप्रिया। किमाकारा किमाधारा, कुम्भकारमनस्थिता ॥
काम्ययज्ञस्थिताचण्डा, कामयज्ञोपवीतिका। कामयज्ञसिद्धिकरी, काममैथुनयामिनी ॥
कामाख्यायमलासस्था, कालयामा कुयोगिनी। कुरुयागहतायोग्या, कुरुमांसविभक्षिणी ॥
कुरुरक्तप्रियाकारी, किङ्करप्रियकारिणी। कर्त्रीश्वरी कारणात्मा, कविभक्षा कविप्रिया ॥

कविशत्रुप्रष्ठलग्रा, कैलासोपवनस्थिता । कलित्रिधात्रिसिद्धिस्था, कलित्रिदिनसिद्धिदा ॥
कलङ्करहिता काली, कलिकल्मषकामदा । कुलपुष्परङ्गसूत्रमणिग्रन्थिसुशोभना ॥
कम्बोजवङ्गदेशस्था, कुलवासुकिरक्षिका । कुलशास्त्रक्रियाशान्तिः, कुलशान्तिः कुलेश्वरी ॥
कुशलप्रतिभा काशी, कुलषट्चक्रभेदिनी । कुलषट्पद्ममध्यस्था, कुलषट्पद्मदीपिनी ॥
कृष्णमार्जारकोलस्था, कृष्णमार्जारषष्ठिका । कुलमार्जारकुपिता, कुलमार्जारषोडशी ॥
कालान्तकवलोत्पन्ना, कपिलान्तकघातिनी । कलहासा कालहश्री, कहलार्था कलामला ॥
कक्षपपक्षरक्षा च, कुक्षेत्रपक्षसंक्षया । काक्षरक्षारक्षिणी च, महामोक्षप्रतिष्ठिता ॥
अर्ककोटिशतच्छाया, आन्वीक्षिकिंकरार्चिता । कावेरीतीरभूमिस्था, आग्नेयार्कास्त्रधारिणी ॥
इं किं श्रीं कामकमला, पातु कैलासरक्षिणी। मम श्री ईंबीजरूपा, पातु काली शिरस्थलम् ॥
उरुस्थलाब्जं सकलं, तमोल्का पातु कालिका। उडूमूलार्करमणी, उष्टोग्रा कुलमातृका ॥
कृतापेक्षा कृतमती, कुङ्कारी किंलिपिस्थिता। कुंदीर्घस्वरा क्लृप्ता, के कैलासकरार्चिका ॥
कैशोरी कैं करी कैं कें वीजाख्या नेत्रयुग्मकं । कोमामतङ्गयजिता, कौशल्यादिकुमारिका ॥
पातु मे कर्णयुग्मं तु, क्रौं क्रौं जीवकरालिनी । गण्डयुग्मं सदा पातु, कुण्डलीस्वाङ्कवासिनी ॥
अर्ककोटिशताभासा, अक्षराक्षरमालिनी । आशुतोषकरी हस्ता, कुलदेवी निरञ्जना ॥
पातु मे कुलपुष्पाढ्या, पृष्ठदेशं सुकृत्तमा । कुमारी कामनापूर्णा, पार्श्वदेशं सदाऽवतु ॥
देवी कामाख्यका देवी, पातु प्रत्यङ्गिरा कटिं । कटिस्थदेवता पातु, लिङ्गमूलं सदा मम ॥
गुह्यदेशं काकिनी मे, लिङ्गाधः कुलसिंहिका । कुलनागेश्वरी पातु, नितम्बदेशमुत्तमं ॥
कङ्कालमालिनी देवी मे पातु चोरुमूलकं । जङ्घायुग्मं सदा कीर्तिः, चक्रापहारिणी ॥
पादयुग्मं पाकसंस्था, पाकशासनरक्षिका । कुलालचक्रभ्रमरा पातु, पादांगुलीर्मम ॥
नखाग्राणि दशविधा, तथा हस्तद्वयस्य च । विंशरूपा कालनाक्षा, सर्वदा परिरक्षतु ॥
कुलच्छत्राधाररूपा, कुलमण्डलगोपिता । कुलकुण्डलिनीमाता, कुलपण्डितमण्डिता ॥
काकानना काकतुण्डी, काकायुःप्रखरार्कजा। काकञ्वरा काकजिह्वा, कपिक्रोधासनस्थिता ॥
कपिध्वजा कपिक्रोशा, कपिबाला कपिस्वरा। कालकाञ्चीविंशतिस्था, सदाविंशनखाग्रहं ॥
पातु देवी कालरूपा, कलिकालफलालया । वाते वा पर्वते वापि, शून्यागारे चतुष्पथे ॥
कुलेन्द्रसमयाचारा, कुलाचारजनप्रिया । कुलपर्वतसंस्था च, कुलकैलासवासिनी ॥
महादावानले पातु, कुमार्गे कुत्सिताग्रहे । राज्ञोऽप्रिये राजवश्ये, महाशत्रुविनाशने ॥
कलिकालमहालक्ष्मीः, क्रियालक्ष्मीः कुलाम्बरा। कवीन्द्रकीलिता कीला, कीलालस्वर्गवासिनी ॥
दशदिक्षु सदा पातु, इन्द्रादिदशलोकपा । नवच्छिन्ने सदा पातु, सूर्यादिकनवग्रहाः ॥
पातु मां कुलमांसाढ्या, कुलपद्मनिवासिनी । कुलद्रव्यप्रिया मध्या, षोडशी भुवनेश्वरी ॥
विद्यावादे विवादे च, मत्तकाले महाभये । दुर्भिक्षादिभये

सर्वत्र सर्वदेशे च, कुलरूपा सदाऽवतु। इत्येतत् कथितं नाथ! मातुः प्रसादहेतुना ॥
अष्टोत्तरशतं नामसहस्त्रं कुण्डलीप्रियं। कुलकुण्डलिनीदेव्याः, सर्वमन्त्रसुसिद्धये ॥

॥ फलश्रुति ॥

सर्वदेवमनूनां च, चैतन्याय सुसिद्धये । अणिमाद्यष्टसिद्ध्यर्थं साधकानां हिताय च ॥
ब्राह्मणाय प्रदातव्यं, कुलद्रव्यपराय च । अकुलीनेऽब्राह्मणे च, न देयः कुण्डलीस्तवः ॥
प्रवृत्ते कुण्डली चक्रे, सर्वे वर्णा द्विजातयः। निवृत्ते भैरवीचक्रे, सर्वे वर्णाः पृथक् पृथक् ॥
कुलीनाय प्रदातव्यं, साधकाय विशेषतः । दानादेव हि सिद्धिः स्यान्ममाज्ञाबलहेतुना ॥
मम क्रियायां यः तिष्ठेत्, स मे पुत्रो न संशयः। स आयाति मम पदं, जीवन्मुक्तः स मानवः ॥
आसवेन समांसानि, कुलवह्नौ महानिशि । नाम प्रत्येकमुच्चार्य, जुहुयात् कार्यसिद्धये ॥
पञ्चाचाररतो भूत्वा, ऊर्ध्वरेता भवेद् यतिः। सम्वत्सरान्मम स्थाने, आयाति नात्र संशयः ॥
ऐहिके कार्यसिद्धिः स्यात्, दैहिके सर्वसिद्धिदः । वशी भूत्वा त्रिमार्गस्थाः, स्वर्गभूतलवासिनः ॥
अस्य भृत्याः प्रभवन्ति, इन्द्रादिलोकपालकाः । स एव योगी परमो, यस्यार्थेऽयं सुनिश्चलः ॥
यो लोकः प्रजपत्येवं, स शिवो न च मानुषः। स समाधिगतो नित्यो, ध्यानस्थो योगि वल्लभः ॥
चतुर्व्यूहगतो देवः, सहसा नात्र संशयः । यः प्रधारयते भक्त्या, कण्ठे वा मस्तके भुजे ॥
स भवेत् कालिकापुत्रो, विद्यानाथः स्वयं भुवि । धनेशः पुत्रवान् योगी, यतीशः सर्वगो भवेत् ॥
यदि पठति मनुष्यो मानुषी वा महत्या। सकलधनजनेशी पुत्रिणी जीववत्सा ॥
कुलपतिरिह लोके, स्वर्गमोक्षैकहेतुः । स भवति भवनाथो योगिनीवल्लभेशः ॥
पठति य इह नित्यं भक्तिभावेन मर्त्यो । हरणमपि करोति प्राणविप्राणयोगः ॥
स्तवनपठनपुण्यं कोटि जन्माघनाशं । कथितुमपि न शक्तोऽहं महामांसभक्षा ॥

॥श्रीरुद्रयामले महाकुलकुण्डलिनी अष्टोत्तरसहस्त्रनामस्तोत्रम्॥

॥ गर्भ स्तम्भन मन्त्र ॥

ॐ ऐं ह्रीं क्लीं वं वटुकाय आपदुद्धारणाय श्रीमते वीर वटुकाय ते नमः। कष्टं नाशय गर्भ पक्षात् सौख्यं वितर सर्वान् कामान् पूरय पूरय। वं क्लीं ह्रीं ऐं ॐ।

यह मंत्र १००० जप करने से सिद्धि प्रदान करता है। हवन सामग्री- **गुडुचि, शतावर, गुग्गुल,** इन तीनों को घी में मिलाकर हव्य प्रस्तुत करें।

॥ अथ गंगा पूजन प्रयोगः॥

॥ अथ गङ्गादेव्यास्य मंत्राः॥

१. ॐ भगवत्यै दशहरायै भागीरथ्यै नमः।

२. ॐ भगवत्यै दशपापहरायै भागीरथ्यै नमः।

३. ॐ ह्रीं गङ्गादेव्यै नमः।

४. ॐ नमो भगवति हिलि हिलि मिलि मिलि गङ्गे माँ पावय पावय नमः स्वाहा।

५. ॐ नमो भगवत्यै नारायण्यै दशपापहरायै शिवायै गंगायै विष्णुमुख्यायै क्षयायै रेवत्यै भागीरथ्यै नमो नमः।

६. ॐ ह्रीं श्रीं नमो भगवति गंगे दयति नमो हुं फट्।

७. ॐ नमः शिवायै नारारयण्यै दशहरायै गंगायै स्वाहा। ॥

॥ गंगाभद्रमण्डले देवता आवाहनम् ॥

सर्वतोभद्र मण्डल पर गंगा का आवाहन करे। अथवा गंगा यंत्र बनाये। षट्कोण, अष्टदल के बाहर भूपूर बनाकर गंगा यंत्र बनाये। अथवा अगर सर्वतोभद्रमण्डल बनाकर गंगा यंत्र रखें यंत्र नहीं हो तो यंत्र की कल्पना कर पूजन करे। **जयादि नव पीठ शक्तियों** का पूजन करे।

यथा- **ॐ जयायै नमः, ॐ विजयायै नमः, ॐ अजितायै नमः, ॐ अपराजितायै नमः, ॐ नित्यायै नमः, ॐ विलासिन्यै नमः, ॐ दोग्ध्र्यै नमः, ॐ अघोरायै नमः। मध्ये ॐ मंगलायै नमः।**

त्रिकोण मध्य में गंगाजी का ध्यान करे। (गंगा जी की शीशी लायी हुई हो तो उसे भद्रमण्डल पर रखें)

उत्फुल्लामलपुण्डरीक रुचिरा कृष्णेश विध्यात्मिका,
कुंभोष्टाभयतोयजा विदधती श्वेताम्बरालंकृता ।
हृष्टास्या शशिशेखराखिल नदीशोणादिभिः सेविता,
ध्येया पापविनाशिनी मकरगा भागीरथी साधकैः॥

ॐ इमं में गंगे श्रुधी हवमद्या च मृडय त्वामवस्युराचके। अध क्षय करे देवि चन्द्रचूड़ प्रियेऽनघे। निजरूप समासाद्य ह्यागच्छ मम सन्निधोभव।

॥ गंगा यन्त्रम् ॥

॥ अथ श्री गंगायंत्रार्चनम् ॥

षट्कोणे- **ॐ नमः हृदयाय नमः। ॐ शिवायै शिरसे स्वाहा। ॐ नारायण्यै शिखायै वषट्। ॐ दशहरायै कवचाय हुँ। ॐ गंगायै नेत्र त्रयाय वौषट्। ॐ स्वाहा अस्त्राय फट्।**

अष्टदले- **ॐ रुद्राय नमो रुद्रमावाहयामि। ॐ हरये नमः, हरि.। ॐ ब्रह्मणे नमो, ब्रह्मणं.। ॐ सूर्याय नमो सूर्यम। ॐ हिमाचलाय नमो, हिमाचलं.। ॐ मैनायै नमः, मैनाय.। ॐ भागीरथाय नमो, भागीरथम्.। ॐ अपांपतये नमः अपांपति आवाहयामि।**

अष्टदल मध्यै- **ॐ नंदिन्यै नमः, नन्दीय आस्था.। ॐ नलिन्यै नमः।**

ॐ जाह्नव्यै नमः। ॐ मालत्यै नमः। ॐ मलापहन्त्र्यै नमः। ॐ विष्णुपादाब्जसंभूत्यै नमः। ॐ त्रिपथगामिन्यै नमः। ॐ भागीरथ्यै नमः।

अष्टदलाग्रे- ॐ मीनाय नमो मीन.। ॐ कूर्माय नमः, कूर्म.। ॐ मण्डूकाय नमो, मंडूकम्। ॐ मकराय नमो, मकरम्.। ॐ हंसाय नमो, हंसम्.। कारंडाय नमः, कारंडम्.। ॐ चक्रवाजकाय नमः चक्रवाजकम्.। ॐ सारसाय नमः। सारसम्.॥

अष्टदलाग्रवहिः- ॐ भीष्मादि अष्टगंगापुत्रेभ्यो नमः आ. स्था.।

भूपुरे - परिधि में इन्द्रादि दशदिक्पालों का सायुध आवाहन करें।

॥ श्रीगङ्गा कवचम् ॥

गङ्गा अष्टाक्षर मंत्र - ॐ ह्रीं श्रीं गङ्गायै स्वाहा।

॥ ध्यानम् ॥

ददर्श पुरतो गङ्गां द्विभुजां मकरासनाम् ।
कुन्देन्दु शङ्ख धवलां सर्वाभरण भूषिताम् ॥

विनियोग :- ॐ गङ्गायै नमः। ॐ अस्य श्रीगङ्गा कवचस्य श्रीविष्णुः ऋषिः। विराट् छन्दः। श्रीगङ्गा देवता। चतुर्दश पुरुषोद्धारणार्थ पाठे विनियोगः।

ऋष्यादि न्यास :- श्रीविष्णु ऋषये नमः शिरसि। विराट् छन्दसे नमः मुखे। श्रीगङ्गा देवतायै नमः हृदि। चतुर्दश पुरुषोद्धारणार्थ पाठे विनियोगाय नमः सर्वाङ्गे।

॥ स्तोत्रम् ॥

ॐ द्रव्यरूपा महाभागा स्नाने च तर्पणेऽपि च । अभिषेके पूजने च पातु मां शुक्लरूपिणी ॥१॥
विष्णु पादप्रसूताऽसि वैष्णवी नामधारिणी । पाहि मां सर्वतो रक्षेत् गङ्गा त्रिपथगामिनी ॥२॥
मन्दाकिनी सदा पातु देहान्ते स्वर्ग वल्लभा । अलक नन्दा च वामभागे पृथिव्यां या तु तिष्ठति ॥३॥
भोगवती च पाताले स्वर्गे मन्दाकिनी तथा । पञ्चाक्षरमिमं मन्त्रं यः पठेच्छृणुयादपि ॥४॥
रोगी रोगात् प्रमुच्येत् बद्धो मुच्येत बन्धनात् । गर्भिणी जनयेत् पुत्रं बन्ध्या पुत्रवती भवेत् ॥५॥
गङ्गा स्मरण मात्रेण निष्पापो जायते नरः । यः पठेद् गृहमध्ये तु गङ्गास्नान फलं लभेत् ॥६॥
स्नान काले पठेद् यस्तु शतकोटि फलं लभेत् । यः पठेत् प्रयतो भक्त्या मुक्तः कोटि कुलैः सह ॥७॥

॥ इति श्रीविष्णु यामलोक्त श्रीगङ्गा कवचम् ॥

॥ कालिन्दि तंत्रम् ॥

गर्गाचार्य संहितायां माधुर्यखण्डे-

॥ श्रीनारद उवाच ॥

व्रजेशो हि पुराधीशो गोपो नन्दो धनी महान् ।
तद्गृहं मंगलो गत्वा कुटुंबभरणाक्षमः ।
अदात्सहस्त्रशस्तस्मै पोषणार्थं स्वकन्यकाः ॥१॥

जाता मत्स्यवरात्तास्तु समुद्रे गोपकन्यकाः । तथाऽन्याश्चात्रि वाचापि पृथिव्या दोहनान्नृप ॥२॥
बर्हिष्मतीपुरंध्र्यो या जाता जातिस्मराः पराः । तथान्याप्सरसोऽभूवन् वरान्नारायणस्य च ॥३॥
तथा सुतलवासिन्यो वामनस्य वरात्स्त्रियः । तथा नागेन्द्रकन्याश्च जाताः शेषवरात्परात् ॥४॥
ताभ्यो दुर्वाससा दत्तं कृष्णापंचांगमद्भुतम् । तेन सम्पूज्य यमुनां वव्रिरे श्रीपतिं वरम् ॥५॥
एकदा श्रीहरिस्ताभिर्वृन्दारण्ये मनोहरे । यमुना निकटे दिव्ये पुंस्कोकिल मधुव्रते ॥६॥
मधुपध्वनि संयुक्ते कूजत्कोकिलसागरे । मधुमासे मन्दवायौ वसंतलतिकावृते ॥७॥
दोलोत्सवं समारेभे हरिर्मदनमोहनः । कदम्बवृक्षे रहसि कल्पवृक्षमनोहरे ॥८॥
कालिन्दीजल कल्लोल कोलाहल समाकुले । सद्दोलाखेलनं चक्रुस्ता गोप्यः प्रेमविह्वलाः ॥९॥
राधया कीर्तिसुधया चन्द्रकोटिप्रकाशया । रेजे वृन्दावने कृष्णो यथा रत्या रतीश्वरः ॥१०॥
एवं प्राप्ताश्च याः सर्वाः श्रीकृष्णं नन्दनन्दनम् । परिपूर्णतमं साक्षात्तासां किं वर्ण्यते तपः ॥११॥
नागेन्द्रकन्यकाः सर्वाश्चैत्रमासे मनोहरे । बलभद्रं हरिं प्राप्ताः कृष्णातीरे तु ताः शुभाः ॥१२॥
इदं मया ते कथितं गोपीनां चरितं शुभम् । सर्वपापहरं पुण्यं किं भूयः श्रोतुमिच्छसि ॥१३॥

॥ बहुलाश्व उवाच ॥

यमुनायाश्च पंचांगं दत्तं दुर्वाससा मुने । गोपीभ्यो येन गोविन्दः प्राप्तस्तद् ब्रूहि मां प्रभो ॥१४॥

॥ श्रीनारद उवाच ॥

अत्रैवोदाहरंतीममितिहासं पुरातनम् । यस्य श्रवणमात्रेण पापहानिः परा भवेत् ॥१५॥
अयोध्याधिपतिः श्रीमान्मान्धाता राजसत्तमः । मृगयां विचरन् प्राप्तः सौभरेराश्रमं शुभम् ॥१६॥
वृन्दावने स्थितं साक्षात्कृष्णातीरे मनोहरे । नत्वा जामातरं राजा सौभरिं प्राहमानदः ॥१७॥

॥ मान्धातोवाच ॥

भगवन्सर्ववित्साक्षात्त्वं परावरवित्तमः । लोकानां तमसांधानां दिव्यसूर्य इवापरः ॥१८॥
इहलोके भवेद्राज्यं सर्वसिद्धि समन्वितम् । अमुत्र कृष्णसारूप्यं येन स्यात्तद्वदाशु मे ॥१९॥

॥ सौभरिरुवाच ॥

यमुनायाश्च पंचांगं वदिष्यामि तवाग्रतः । सर्वसिद्धिकरं शश्वत्कृष्ण सारूप्यकारणम् ॥२०॥
यावत्सूर्य्ये उदेतिस्म यावच्च प्रतितिष्ठति । तावद्राज्यप्रदं चात्र श्रीकृष्णवशकारकम् ॥२१॥

कवचं च स्तवं नाम्नः सहस्त्रं पटलं तथा । पद्धतिं सूर्यवंशेन्द्र पंचांगानि बिदुर्बुधाः ॥२२॥

तत्रादौ यमुना पटल प्रारंभः

॥ मान्धातोवाच ॥

कृष्णायाः पटलं पुण्यं कामदं पद्धतिं तथा । वद मां मुनि- शार्दूल त्वं साक्षाज्ज्ञानशेवधिः ॥१॥

॥ सौभरिरुवाच ॥

पटलं पद्धतिं वक्ष्ये यमुनाया महामते । कृत्वा श्रुत्वाऽथ जप्त्वा वा जीवन्मुक्तो भवेन्नरः ॥२॥

एकादशाक्षर मंत्रः-(मन्त्रो यथा)- **ॐ ह्रीं श्रीं क्लीं कालिन्दी देव्यै नमः।** इत्येकादशाक्षरो मन्त्रः।

विनियोगः- **ॐ अस्य श्रीकालिन्दी मन्त्रस्य सौभरिः ऋषिः, अनुष्टुप् छन्दः, श्रीयमुना देवता, ह्रीं बीजं, श्रीं शक्तिः, क्लीं कीलकम्, श्रीकलिन्द- नन्दिनी प्रसाद सिद्ध्यर्थे जपे विनियोगः।**

ऋष्यादिन्यासः- **ॐ सौभरि ऋषये नमः शिरसि, अनुष्टुप् छन्दसे नमो मुखे, श्रीयमुना देवतायै नमो हृदि, ह्रीं बीजाय नमो गुह्ये, श्रीं शक्तये नमः पादयोः, क्लीं कीलकाय नमो नाभौ, विनियोगाय नमः सर्वाङ्गे। इति ऋष्यादिन्यासः।**

करन्यासः- **ॐ अङ्गुष्ठाभ्यां नमः। ह्रीं तर्जनीभ्यां नमः। श्रीं मध्यमाभ्यां नमः। क्लीं अनामिकाभ्यां नमः। कालिन्दी देव्यै कनिष्ठिकाभ्यां नमः। नमः करतल करपृष्ठाभ्यां नमः। इति करन्यासः।**

हृदयादि षडङ्गन्यासः- **ॐ हृदयाय नमः। ह्रीं शिरसे स्वाहा। श्रीं शिखायै वषट्। क्लीं कवचाय हुम्। कालिन्दी देव्यै नेत्रत्रयाय वौषट्। नमः अस्त्राय फट्। इति हृदयादि षडङ्गन्यासः।**

॥ ध्यानम् ॥

ॐ श्यामाम्भोजनेत्रां सघनघनरुचिं रत्नमञ्जीर कूजत्कांची-
-केयूरयुक्तां कनकमणिमये बिभ्रतीं कुण्डले द्वे ।
भ्राजच्छ्रील नीलवस्त्रां स्फुरदमल चलद्धारभारां मनोज्ञां
ध्याये मार्तण्डपुत्रीं तनुकिरण चयोद्दीप्तदीपाभिरामाम् ॥१॥

॥ यंत्रार्चनम् ॥

ध्यान करने के पश्चात् रचित पीठादि पर सर्वतोभद्र मण्डल में मण्डूकादि परतत्त्वान्त पीठदेवताओं को स्थापित कर - **ॐ मं मंडूकादि परतत्त्वान्त पीठदेवताभ्यो नमः** इस मंत्र से पीठदेवताओं की पूजा करके मध्य में देवी सिंहासन स्थापित करें तत् पश्चात् स्वर्णादि से निर्मित यन्त्र पत्र को ताम्रपात्र में रखकर घी से उस पर अभ्यङ्ग करके अग्न्युत्तारण मन्त्रोपचारण पूर्वक उस पर दूध एवं जल की धारा डालकर स्वच्छ वस्त्र से पोंछकर देव्यष्टगंध से कर्णिका, षोडशदल भूपुरात्मक यन्त्र को लिखकर **ॐ नमो भगवत्यै कलिन्द नन्दिन्यै सूर्यकन्यायै यमभगिन्यै श्रीकृष्णप्रियायै यूथीभूतायै पद्मपीठाय नमः।**

इस मंत्र से पुष्पाद्यासन देकर एवं सिंहासन पर स्थापित कर उसमें प्राणप्रतिष्ठा करें। तत् पश्चात् कर्णिका के मध्य में श्रीकृष्ण के साथ कालिन्दी का ध्यान करें-

"**ॐ नमो भगवत्यै कलिन्द नन्दिन्यै सूर्यकन्ययायै यमभगिन्यै श्रीकृष्णप्रियायै यूथीभूतायै स्वाहा**"। इस मंत्र से आवाहनादि से लेकर पुष्पाञ्जलिदानान्त उपचारों के साथ पूजा करके देवी की आज्ञा लेकर आवरण की पूजा करें एवं पुष्पांजलि देकर मूलमंत्र का उच्चारण करके-

ॐ संविन्मये परे देवि परामृतरसप्रिये । अनुज्ञां देहि यमुने परिवारार्चनाय मे ॥

इस मंत्र से पुष्पांजलि देवें, इस प्रकार आज्ञा लेकर आवरण पूजा प्रारंभ करें। त्रिकोण मध्य में देवी का आवाहन करें। तत् पश्चात् पूज्य और पूजक के अन्तराल को पूर्व दिशा मानकर तदनुसार अन्य दिशाओं की कल्पना करके पूर्वादि क्रम से षोडश दलों में-

॥ कालिन्दी यन्त्रम् ॥

प्रथमावरणम् – (षोडश दले) **ॐ जाह्नव्यै नमः। जाह्नवी श्री पादुकां पूजयामि तर्पयामि नमः। इति सर्वत्र॥ ॐ विरजायै नमः। विरजा श्रीपा.॥ ॐ कृष्णायै नमः। कृष्णा श्रीपा.॥ ॐ चन्द्रभागायै नमः। चन्द्रभागा श्रीपा.॥ ॐ सरस्वत्यै नमः। सरस्वती श्रीपा. ॐ गोमत्यै नमः। गोमती श्रीपा.। ॐ कौशिक्यै नमः। कौशिकी श्रीपा.। ॐ वेण्यै नमः। वेणी श्रीपा.॥ ॐ सिन्धवे नमः। सिन्धु श्रीपा.॥ ॐ गोदावर्यै नमः। गोदावरी श्रीपा.॥ ॐ वेदस्मृत्यै नमः। वेदस्मृति श्रीपा.॥ ॐ वेत्रवत्यै नमः। वेत्रवती श्रीपा.॥ ॐ शतद्रवै नमः। शतद्रु श्रीपा.॥ ॐ सरयवै नमः। सरयू श्रीपा.॥ ॐ ऋषिकुल्यायै नमः। ऋषिकुल्या श्रीपा.॥ ॐ ककुद्मत्यै नमः। ककुद्मती श्रीपा.॥**

इन मंत्रों से सोलह देवताओं की पूजा करें। इसके बाद पुष्पांजलि लेकर निम्न मंत्र का उच्चारण करें-

ॐ अभीष्टसिद्धिं मे देहि शरणागत वत्सले । भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

यह मंत्र पढ़कर पुष्पाञ्जलि देकर विषेश अर्घ से बिन्दु छोडकर "**पूजिताः तर्पिताः सन्तु**" कहें।

द्वितीयावरणम् – इसके बाद भूपूर के भीतर चारों दिशाओं में पूर्वादिक्रम से- **ॐ वृन्दावनाय नमः। वृन्दावन श्रीपा.। ॐ गोवर्द्धनाय नमः। गोवर्द्धन श्रीपा.। ॐ वृन्दायै नमः। वृन्दा श्रीपा.। ॐ तुलस्यै नमः। तुलसी श्रीपा.।**

इससे चारों की पूजा करके पुष्पाञ्जलि देवें । इति द्वितीयावरणम्।

तृतीयावरणम् – इसके बाद भूपुर के बारह पूर्वादि क्रम से- **ॐ लं इन्द्राय नमः। ॐ रं अग्नये नमः। ॐ मं यमाय नमः। ॐ क्षं निर्ऋत्ये नमः। ॐ वं वरुणाय नमः। ॐ यं वायवे नमः। ॐ कुं कुबेराय नमः। ॐ हं ईशानाय नमः।** इन्द्रेशानयोर्मध्ये- **ॐ आं ब्राह्मणे नमः।** वरुणनिर्ऋतिमध्ये- **ॐ ह्रीं अनन्ताय नमः।**

चतुर्थावरणम् – इसके बाद दश दिक्पालों की पूजा करें एवं उनके समीप- **ॐ वं वज्राय नमः। ॐ शं शक्तये नमः। ॐ दं दण्डाय नमः। ॐ खं खड्गाय नमः। ॐ पां पाशाय नमः। ॐ अं अङ्कुशाय नमः। ॐ गं गदायै नमः। ॐ त्रिं त्रिशूलाय नमः। ॐ पं पद्माय नमः। ॐ चं चक्राय नमः।**

इससे अस्त्रों की पूजा करें। इस प्रकार आवरण पूजा और धूपदान से नमस्कार पर्यन्त पूजा करके जप करें। इसका पुरश्चरण ग्यारह लाख जप का है। तत्तद्दशांश से होम, तर्पण, मार्जन और ब्राह्मण भोजन करें। ऐसा करने पर मंत्र सिद्ध होता है और मनोवाञ्छित फल प्राप्त होता है।

ग्यारह लाख मंत्र का जप करने पर मंत्र की सिद्धि होती है इसके बाद मनुष्य जो कामना करता है उसे वह सब स्वतः प्राप्त होता है। जब तक पुरश्चरण पूर्ण न हो तब तक साधक ब्रह्मचारी एवं मौनव्रती होकर जप करें। यव का भोजन करें। भूमि पर सोये व फलों का भोजन करें, मन को वश में रखें। काम, क्रोध, लोभ, मोह व द्वेष को छोड़कर साधक परम भक्ति से वर्तमान ब्रह्ममुहूर्त्त में उठकर कालिन्दी देवी का ध्यान करके सूर्योदय बेला में नदी में स्नान करें। मध्याह्न व

साँयकाल भी संध्या वन्दन में तत्पर रहें। नियम के समाप्त हो जाने पर कालिन्दी के किनारे रहते हुए ब्राह्मणों की पूजा करके गन्ध-पुष्पों के साथ उन्हें उत्तम भोजन देकर वस्त्र, आभूषण, पात्र एवं दक्षिणा देवें। इसके बाद निश्चित रूप से सिद्धि प्राप्त होती है।

॥ श्री यमुना कवचम् ॥

॥ मान्धातोवाच ॥

यमुनायाः कृष्णराज्ञाः कवचं सर्वतोऽमलम् । देहि मह्यं महाभाग धारयिष्याम्यहं सदा ॥१॥

॥ सौभरिरुवाच ॥

यमुनायाश्च कवचं सर्वरक्षाकरं नृणाम् । चतुष्पदार्थदं साक्षाच्छृणु राजन्महामते ॥२॥
कृष्णां चतुर्भुजां श्यामां पुण्डरीकदलेक्षणाम् । रथस्थां सुन्दरीं ध्यात्वा धारयेत्कवचं ततः ॥३॥
स्नातः पूर्वमुखो मौनी कृतसंध्यः कुशासने । कुशैर्बद्धशिखो विप्रः पठेद्वै स्वस्तिकासनः ॥४॥
यमुना मे शिरः पातु कृष्णा नेत्रद्वयं सदा । श्यामा भ्रूभंगदेशं च नासिकां नाकवासिनी ॥५॥
कपोलौ पातु मे साक्षात्परमानन्दरूपिणी । कृष्णवामांससंभूता पातु कर्णद्वयं मम ॥६॥
अधरौ पातु कालिन्दी चिबुकं सूर्यकन्यका । यमस्वसा कंधरां च हृदयं मे महानदी ॥७॥
कृष्णप्रिया पातु पृष्ठं तटिनी मे भुजद्वयम् । श्रोणीतटं च सुश्रोणी कटिं मे चारुदर्शना ॥८॥
उरुद्वयं तु रंभोरूर्जानुनी अधिमेदिनी । गुल्फौ रासेश्वरी पातु पादौ पापपहारिणी ॥९॥
अंतर्बहिरधश्चोर्ध्वं दिशासु विदिशासु च । समंतात्पातु जगतः परिपूर्णतमप्रिया ॥१०॥
इदं श्रीयमुनायाश्च कवचं परमाद्भुतम् । दशवारं पठेद्भक्त्या निर्धनो धनवान् भवेत् ॥११॥
त्रिभिर्मासैः पठेद्धीमान् ब्रह्मचारी मिताशनः । सर्वराज्याधिपत्यं च प्राप्नोति नात्र संशयः ॥१२॥
दशोत्तरशतं नित्यं त्रिमासावधि भक्तितः । यः पठेत्प्रयतो भूत्वा तस्य किं किं न जायते ॥१३॥
यः पठेत्प्रातरुत्थाय सर्वतीर्थफलंलभेत् । अंते व्रजेत्परं धाम गोलोकं योगिदुर्लभम् ॥१४॥

॥ इति श्रीमद्गर्गाचाऽर्यः संहितायां श्रीमाधुर्यखण्डे श्रीसौभरिमान्धातृसंवादे श्रीयमुनाकवचं समाप्तम् ॥

॥ श्री यमुनास्तवम् ॥

॥ मान्धातोवाच ॥

यमुनायाः स्तवं दिव्यं सर्वसिद्धिकरं परम् । सौभरे मुनि शार्दूल वद मां कृपया त्वरन् ॥१॥

॥श्रीसौभरिरुवाच ॥

मार्तण्डकन्यकायास्तु स्तवं शृणु महामते । सर्वसिद्धिकरं भूमौ चातुर्वर्ग्यफलप्रदम् ॥२॥

ॐ कृष्णवामांसंभूतायै कृष्णायै सततं नमः । नमः श्रीकृष्णरूपिण्यै कृष्णे तुभ्यं नमो नमः ॥३॥

यः पापपंकांबु- कलंककुत्सितः कामी कुधीः सत्सु कलिं करोति हि । वृन्दावनं धाम ददाति तस्मै

नदन्मिलिन्दारिकलिन्दनन्दिनी ॥४॥

कृष्णे साक्षात्कृष्णरूपा त्वमेव वेगावर्ते वर्तते मत्स्यरूपी । ऊर्मावूर्मौ कूर्मरूपी सदा ते बिंदौ बिंदौ भाति गोविंददेवः ॥५॥

वन्दे लीलावतीं त्वां सघनघननिभां कृष्णवामांसभूतां वेगं वै वैरजाख्यं सकलजलचयं खण्डयंतीं बलात्स्वात्।

छित्त्वा ब्रह्माण्डमारात्सुरनगरनगान् गंडशैलादिदुर्गान् भित्त्वा भूखण्डमध्ये तटिनि वृतवतीमूर्मिमालां प्रयांतीम् ॥६॥

दिव्यं कौ नामधेयं श्रुतमथ यमुने दंडयत्यद्रितुल्यं पापव्यूहं त्वखंडं वसतु मम गिरां मंडलेऽनुक्षणं तत् ।

दंड्यांश्चाकार्य दण्ड्यान्सकृदपि वचसा खंडितं यद्गृहीतं भ्रातुर्मार्तण्डसूनोररतिपरिदृढस्ते प्रचण्डोऽतिदंडः ॥७॥

रज्जुर्वा विषयांधकूपतरणे पापाखुदर्वीकरीवेण्युष्णिक् च विराजमूर्तिशिरसो मालास्ति वा सुन्दरी । धन्यं भाग्यमतः परं भुवि नृणां यात्रादिकृद्दुल्लभा गोलोकेऽप्यतिदुर्लभाति सुभगा भात्यद्वितीया नदी ॥८॥

गोपीगोकुलगोपकेलिकलिते कालिन्दि कृष्णप्रभे त्वत्कूले जललोलगोलविचलत्कल्लोलकोलाहलः । त्वत्कांतारकुतूहलालिकुल कृज्झंकारकेकाकुलः कूजत्कोकिलसंकुलो व्रजलतालंकारभृत्पातु माम् ॥९॥

भवंति जिह्वास्तनुरोमतुल्या गिरो यदा भूसिकता इव स्युः । तदप्यलं यांति न ते गुणांतं संतो महांतः किल शेषतुल्याः ॥१०॥

कलिन्दगिरिनन्दिनीस्तव उषस्ययं वा परः श्रुतं च यदि पाठितो भुवि तनोति सन्मंगलम् । जनोऽपि यदि धारयेत्किल पठेच्च यो नित्यशः स याति परमं पदं निज-निकुंजलीलावृतम् ॥११॥

॥ इति श्रीमद्गर्गाचार्यसंहितायां श्रीमाधुर्यखण्डे श्रीसौभरिमान्धातृसंवादे श्रीयमुनास्तवराजः समाप्तः ॥

॥ यमुना सहस्त्रनाम स्तोत्रम् ॥

॥ मान्धात्तोवाच ॥

नाम्नां सहस्त्रं कृष्णायाः सर्वसिद्धिकरं परम् । वद मां मुनिशार्दूल त्वं सर्वज्ञो निरामयः ॥१॥

॥ सौभरिरुवाच ॥

नाम्नां सहस्त्रं कालिन्द्या मान्धातस्ते वदाम्यहम् । सर्वसिद्धिकरं दिव्यं श्रीकृष्णवशकारकम् ॥२॥

विनियोग :- ॐ अस्य श्रीकालिन्दी सहस्त्रनाम स्तोत्रमंत्रस्य सौभरिर्ऋषिः । श्रीयमुना देवता । अनुष्टुप्छंदः । मायाबीजमिति कीलकम् । रमाबीजमिति शक्तिः । श्रीकलिन्दनन्दिनीप्रसादसिद्ध्यर्थे पाठे विनियोगः ।

॥ ध्यानम् ॥

ॐ श्यामामंभोजनेत्रां सघनघनरुचिं रत्नमंजीर-
कूजत्कांचीकेयूरयुक्तां कनकमणिमये बिभ्रतीं कुण्डले द्वे ।
भ्राजच्छ्रीनीलवस्त्रां स्फुरदमलचलद्धारभारां मनोज्ञां
ध्यायेन्मार्तण्डपुत्रीं तनुकिरण-चयोद्दीप्तदीपाभिरामाम् ॥३॥

ॐ कालिन्दी यमुना कृष्णा कृष्णरूपा सनातनी । कृष्णवामांससंभूता परमानन्दरूपिणी ॥४॥
गोलोकवासिनी श्यामावृन्दावनविनोदिनी । राधासखी रासलीला रासमण्डलमण्डिता ॥५॥
निकुंजमाधवी वल्ली रङ्गवल्लीमनोहरा । श्रीरासमण्डली भूता यूथीभूता हरिप्रिया ॥६॥
गोलोकतटिनी दिव्या निकुंजतलवासिनी । दीर्घोर्मिवेगगंभीरा पुष्पपल्लववासिनी ॥७॥
घनश्यामा मेघमाला बलाका पद्ममालिनी । परिपूर्णतमा पूर्णा पूर्णब्रह्मप्रिया परा ॥८॥
महावेगवती साक्षान्निकुंजद्वारनिर्गता । महानदी मन्दगतिर्विरजा वेगभेदिनी ॥९॥
अनेकब्रह्माण्डगता ब्रह्मद्रवसमाकुला । गङ्गा मिश्रा निर्मलाभा निर्जला सरितां वरा ॥१०॥
रत्नबद्धोभयतटा हंसपद्मादिसंकुला । नदी निर्मलपानीया सर्वब्रह्माण्डपावनी ॥११॥
वैकुण्ठपरिखीभूता परिखा पापहारिणी । ब्रह्मलोकागता ब्राह्मी स्वर्गा स्वर्गनिवासिनी ॥१२॥
उल्लसंती प्रोत्पतंती मेरुमालामहोज्वला । श्रीगंगांभः शिखरिणी गण्डशैलविभेदिनी ॥१३॥
देशान्पुनंती गच्छंती महती भूमिमध्यगा । मार्तण्डतनुजा पुण्या कलिन्दगिरिनन्दिनी ॥१४॥
यमस्वसा मन्दहासा सुद्विजा रचिताम्बरा । नीलाम्बरा पद्ममुखी चरंती चारुदर्शना ॥१५॥
रम्भोरूः पद्मनयना माधवी प्रमदोत्तमा । तपश्चरंती सुश्रोणी कूजन्नूपुरमेखला ॥१६॥
जलस्थिता श्यामलांगी खाण्डवाभा विहारिणी । गाण्डीविभाषिणी वन्या श्रीकृष्णाम्बरमिच्छती ॥१७॥
द्वारकागमना राज्ञी पट्टराज्ञी परंगता । महाराज्ञी रत्नभूषा गोमतीतीरचारिणी ॥१८॥
स्वकीया स्वसुखा स्वार्था स्वीयकार्यार्थसाधिनी । नवलांगाऽबला मुग्धा वरांगा वामलोचना ॥१९॥
अज्ञातयौवनाऽदीना प्रभा कांतिर्द्युतिश्छविः । सोमाभा परमा कीर्तिः कुशला ज्ञातयौवना ॥२०॥
नवोढा मध्यगा मध्या प्रौढिः प्रौढा प्रगल्भका । धीराऽधीरा धैर्य्यधरा ज्येष्ठा श्रेष्ठा कुलांगना ॥२१॥
क्षणप्रभा चंचलार्चा विद्युत्सौदामिनी तडित् । स्वाधीनपतिका लक्ष्मीः पुष्टा स्वाधीनभर्तृका ॥२२॥
कलहांतरिता भीरुरिच्छा प्रोत्कंठिताकुला । कशिपुस्था दिव्यशय्या गोविन्दहृतमानसा ॥२३॥
खण्डिताखण्डशोभाढ्या विप्रलब्धाभिसारिका । विरहार्ता विरहिणी नारी प्रोषितभर्तृका ॥२४॥
मानिनी मानदा प्राज्ञा मन्दारवनवासिनी । झङ्कारिणी झणत्कारी रणन्मंजीरनूपुरा ॥२५॥
मेखला मेखलाकांची श्रीकांची कांचनामयी । कंचुकी कंचुकमणिः श्रीकंठाढ्या महामणिः ॥२६॥
श्रीहारिणी पद्महरा मुक्ता मुक्ता फलार्चिता । रत्नकंकणकेयूरा स्फुरदंगुलिभूषणा ॥२७॥
दर्पणा दर्पणीभूता दुष्टदर्पविनाशिनी । कंबुग्रीवा कंबुधरा ग्रैवेयक विराजिता ॥२८॥
ताटंकिनी दंतधरा हेमकुण्डलमण्डिता । शिखाभूषा भालपुष्पा नासामौक्तिकशोभिता ॥२९॥
मणिभूमिगता देवी रैवताद्रिविहारिणी । वन्दावनगता वृन्दा वृन्दारण्यनिवासिनी ॥३०॥
वृन्दावनलता माध्वी वृन्दारण्यविभूषणा । सौन्दर्यलहरी लक्ष्मीर्मधुरा- तीर्थवासिनी ॥३१॥
विश्रांतवासिनी काम्या रम्या गोकुलवासिनी । रमणस्थल- शोभाढ्या महावन- महानदी ॥३२॥

प्रणता प्रोन्नता पुष्टा भारती ·भारतार्च्चिता । तीर्थराज- गतिर्गात्रा गंगासागरसंगमा ॥३३॥
सप्ताब्धिभेदिनी लोला सप्तद्वीपगता बलात् । लुठंती शैलभिद्यंती स्फुरंती वेगवत्तरा ॥३४॥
कांचनी कांचनीभूमिः कांचनीभूमिभाविता । लोकदृष्टिर्लोकलीला लोकालोकाचलार्चिता ॥३५॥
शैलोद्गता स्वर्गगता स्वर्गार्च्या स्वर्गपूजिता । वृन्दावन वनाध्यक्षा रक्षा कक्षा तटी पटी ॥३६॥
असिकुण्डगता कच्छा स्वच्छन्दोच्छलिताद्रिजा । कुहरस्था रयप्रस्था प्रस्था शांतेतरातुरा ॥३७॥
अंबुच्छटासीकराभा दर्दुरा दर्दुरीधरा । पापांकुशा पापसिंही पापद्रुमकुठारिणी ॥३८॥
पुण्यसंधा पुण्यकीर्तिः पुण्यदा पुण्यवर्द्धिनी । मधोर्वन - नदीमुख्या तुला तालवनस्थिता ॥३९॥
कुमुद्वननदी कुब्जा कुमुदांभोजवर्द्धिनी । प्लवरूपा वेगवती सिंहसर्वादिवाहिनी ॥४०॥
बहुली बहुदा बह्वी बहुला वनवन्दिता । राधा कुण्डकुलाराध्या कृष्णा कुण्डजलाश्रिता ॥४१॥
ललिता कुण्डगा घंटा विशाखा कुण्डमण्डिता । गोविन्दकुण्डनिलया गोपकुंडतरंगिणी ॥४२॥
श्रीगंगा मानसीगंगा कुसुमांबरभाविनी । गोवर्धिनी गोधनाढ्या मयूरी वरवर्णिनी ॥४३॥
सारसी नीलकंठाभा कूजत्कोकिलपोतकी । गिरिराजप्रभू- र्भूरिरातपत्रातपत्रिणी ॥४४॥
गोवर्द्धनांका गोदंती दिव्यौषधिनिधिः श्रुतिः । पारदी पारदमयी नारदी शारदी भृतिः ॥४५॥
श्रीकृष्णचरणांकस्था कामा कामवनांचिता । कामाटवी नन्दिनी च नन्दग्राम-महीधरा ॥४६॥
बृहत्सानुद्युतिः प्रोता नन्दीश्वरसमन्विता । काकली कोकिलमयी भांडारकुशकौशला ॥४७॥
लोहार्गलप्रदाकारा काश्मीरवसनावृता । बर्हिषदी शोणपुरी शूरक्षेत्रपुराधिका ॥४८॥
नानाभरणशोभाढ्या नानावर्णसमन्विता । नानानारी कदम्बाढ्या नानावस्त्रविराजिता ॥४९॥
नानालोकगता वीचिर्नानाजलसमन्विता । स्त्रीरत्नं रत्ननिलया ललनारत्नरंजिनी ॥५०॥
रंगिणी रंगभूमाढ्या रंगा रंगमहीरुहा । राजविद्या राजगुह्या जगत्कीर्तिर्घनापहा ॥५१॥
विलोलघंटाकृष्णांगी कृष्णदेहसमुद्भवा । नीलपंकजवर्णाभा नीलपंकजहारिणी ॥५२॥
नीलाभा नीलपद्माढ्या नीलांभोरुहवासिनी । नागवल्ली नागपुरी नागवल्लीदलार्चिता ॥५३॥
ताम्बूलचर्चिता चर्चा मकरन्दमनोहरा । सकेसरा केसरिणी केशपाशाभिशोभिता ॥५४॥
कज्जलाभा कज्जलाक्ता कज्जलीकलितांजना । अलक्तचरणा ताम्रा लालाताम्रकृतांबरा ॥५५॥
सिन्दूरिता लिप्तवाणी सुश्रीः श्रीखण्डमंडिता । पाटीरपंकवसना जटामांसीरुचाम्बरा ॥५६॥
आगर्व्य गरुगंधाक्ता तगराश्रितमारुता । सुगंधितैलरुचिरा कुंतलालिः सुकुंतला ॥५७॥
शकुंतलाऽपांसुला च पातिव्रत्यपरायणा । सूर्यकोटिप्रभा सूर्यकन्या सूर्यसमुद्भवा ॥५८॥
कोटिसूर्यप्रतीकाशा सूर्यजा सूर्यनन्दिनी । संज्ञा संज्ञासुता स्वेच्छा संज्ञामोदप्रदायिनी ॥५९॥
संज्ञापुत्री स्फुरच्छाया तपंती तापकारिणी । सावर्ण्यानुभवा वेदी वडवा सौख्यदायिनी ॥६०॥
शनैश्चरानुजा कीला चन्द्रवंशविवर्धिनी । चन्द्रवंशवधूश्चन्द्रा चन्द्रावलि सहायिनी ॥६१॥

चन्द्रावती चन्द्रलेखा चन्द्रकांतानुगांशुका । भैरवी पिंगलाशंकी लीलावत्यागरीमयी ॥६२॥
धनश्रीदेवगांधारी स्वर्मणिर्गुणवर्द्धिनी । व्रजमल्लार्यंधकरी विचित्रा जयकारिणी ॥६३॥
गांधारी मंजरी टोडी गुर्ज्जर्यासावरी जया । कर्णाटी रागिणी गौडी वैराटी गारवाटिका ॥६४॥
चतुश्चन्द्रकला हेरी तैलंगी विजयावती । ताली तालस्वरा गानक्रिया मात्राप्रकाशिनी ॥६५॥
वैशाखी चंचला चारुर्माचारी घुंघटी घटा । वैरागरी सोरठी सा कैदारी जलधारिका ॥६६॥
कामाकरश्रीकल्याणी गौडकल्याणमिश्रिता । रामसंजीवनी हेला मन्दारी कामरूपिणी ॥६७॥
सारंगी मारुती होढा सागरी कामवादिनी । वैभासी मंगला चान्द्री रासमंडलमंडना ॥६८॥
कामधेनुः कामलता कामदा कमनीयका । कल्पवृक्षस्थली स्थूला क्षुधा सौधनिवासिनी ॥६९॥
गोलोकवासिनी सूभ्रूयोष्टिभृद्द्वारपालिका । श्रृंगारप्रकरा श्रृंगा स्वच्छाक्षय्योपकारिका ॥७०॥
पार्षदा सुमुखी सेव्या श्रीवृन्दावनपालिका । निकुंजभृत्कुंजपुंजा गुंजाभरणभूषिता ॥७१॥
निकुंजवासिनी प्रेष्या गोवर्द्धनतटीभवा । विशाखा ललितारामा नीरुजा मधुमाधवी ॥७२॥
एकानैकसखी शुक्ला सखीमध्या महामनाः । श्रुतिरूपा ऋषिरूपा मैथिलाः कौशलाः स्त्रियः ॥७३॥
अयोध्यापुरवासिन्यो यज्ञसीताः पुलिंदकाः । रमा वैकुण्ठवासिन्यः श्वेतद्वीपसखीजनाः ॥७४॥
उर्ध्ववैकुण्ठवासिन्यो दिव्याजितपदाश्रिताः । श्रीलोकाचलवासिन्यः श्रीसख्यः सागरोद्भवाः ॥७५॥
दिव्या अदिव्या दिव्यांगा व्याप्तास्त्रिगुणवृत्तयः । भूमिगोप्यो देवनार्य्यो लता ओषधिवीरुधः ॥७६॥
जालंधर्य्यः सिंधुसुताः पृथुबर्हिष्मतीभवाः । दिव्यांबरा अप्सरसः सौतला नागकन्यकाः ॥७७॥
परंधाम परंब्रह्म पौरुषा प्रकृतिः परा । तटस्था गुणभूर्गीता गुणागुणमयी गुणा ॥७८॥
चिद्घना सदसन्माला दृष्टिर्दृश्या गुणाकरा । महत्तत्त्वमहंकारो मनोबुद्धिः प्रचेतना ॥७९॥
चेतोवृत्तिः स्वांतरात्मा चतुर्द्धा चतुरक्षरा । चतुर्व्यूहश्चतुर्मूर्ति- र्व्योम-वायुरदो जलम् ॥८०॥
मही शब्दो रसो गंधः स्पर्शो रूपमनेकधा । कर्मेन्द्रियं कर्ममयी ज्ञानं ज्ञानेन्द्रियं द्विधा ॥८१॥
त्रिधाधिभूतमध्यात्ममधि दैवमधिस्थितम् । ज्ञानशक्तिः क्रियाशक्तिः सर्वदेवाधिदेवता ॥८२॥
तत्त्वसंघा विराण्मूर्तिर्धारणा धारणामयी । श्रुतिः स्मृतिर्वेदमूर्तिः संहिता गर्गसंहिता ॥८३॥
पाराशरी सैव सृष्टिः पारहंसी विधातृका । याज्ञवल्की भागवती श्रीमद्भागवतार्चिता ॥८४॥
रामायणमयी रम्या पुराणपुरुषप्रिया । पुराणमूर्तिः पुण्यांगी शास्त्रमूर्तिर्महोन्नता ॥८५॥
मनीषा धिषणा बुद्धिर्वाणी धीः शेमुषी मतिः । गायत्री वेदसावित्री ब्रह्माणी ब्रह्मलक्षणा ॥८६॥
दुर्गापर्णा सती सत्या पार्वती चंडिकांबिका । आर्या दाक्षायणी दाक्षी दक्षयज्ञविघातिनी ॥८७॥
पुलोमजा शचीन्द्राणी वेदी देववरार्पिता । वाधुना धारिणी धन्या वायवी वायुवेगगा ॥८८॥
यमानुजा संयमनी संज्ञाच्छाया स्फुरद्द्युतिः । रत्नदेवी रत्नवृन्दा तारा तरणिमण्डला ॥८९॥
रुचिः शांतिः क्षमा शोभा दया दक्षा द्युतिस्त्रपा । तलतुष्टिर्विभा पुष्टिः संतुष्टिः पुष्टभावना ॥९०॥

चतुर्भुजा चारुनेत्रा द्विभुजाष्टभुजा बला। शंखहस्ता पद्महस्ता चक्रहस्ता गदाधरा ॥९१॥
निषंगधारिणी चर्मखड्गपाणिर्धनुर्धरा। धनुष्टंकारिणी योद्ध्री दैत्योद्भटविनाशिनी ॥९२॥
रथस्था गरुडारूढा श्रीकृष्णहृदयस्थिता। वंशीधरा कृष्णवेषा स्रग्विणी वनमालिनी ॥९३॥
किरीटधारिणी याना मन्दा मन्दगतिर्गतिः। चन्द्रकोटिप्रतीकाशा तन्वी कोमलविग्रहा ॥९४॥
भैष्मी भीष्मसुता भीमा रुक्मिणी रुक्मरूपिणी। सत्यभामा जांबवती सत्या भद्रा सुदक्षिणा ॥९५॥
मित्रवृन्दा सखीवृन्दा वृन्दारण्य ध्वजोर्ध्वगा। शृंगारकारिणी शृंगा शृंगभूः शृंगदाशुगा ॥९६॥
तितिक्षेक्षा स्मृतिः स्पर्धा स्पृहा श्रद्धा स्वनिर्वृतिः। ईशा तृष्णाभिधा प्रीतिर्हिता याञ्चाक्लमा कृषिः ॥९७॥
आशा निद्रा योगनिद्रा योगिनी योगदायुगा। निष्ठा प्रतिष्ठा समितिः सत्त्वप्रकृतिरुत्तमा ॥९८॥
तमःप्रकृतिर्दुर्मर्षा रजःप्रकृतिरानतिः। क्रियाऽक्रियाकृतिर्ग्लानिः सात्त्विक्याध्यात्मिकी वृषा ॥९९॥
सेवा शिखामणि- र्वृद्धिराहूतिः सुमतिर्द्युभूः। राज्जुर्द्विदाम्नी षड्वर्गा संहिता सौख्यदायिनी ॥१००॥
मुक्तिः प्रोक्तिर्देशभाषा प्रकृतिः पिंगलोद्भवा। नागभावा नागभूषा नागरी नगरी नगा ॥१०१॥
नौर्नौका भवनौर्भाव्या भवसागरसेतुका। मनोमयी दारुमयी सैकती सिकतामयी ॥१०२॥
लेख्या लेप्या मणिमयी प्रतिमा हेमनिर्मिता। शैला शैलभवा शीला शीकारामा चलाचला ॥१०३॥
अस्थिता स्वस्थिता तूली वैदिकी तांत्रिकी विधिः। संध्या संध्याभ्रवसना वेदसंधिः सुधामयी ॥१०४॥
सायंतनी शिखावेध्या सूक्ष्मा- जीवकला कृतिः। आत्मभूता भाविताऽण्वी प्रह्वा कमलकर्णिका ॥१०५॥
नीराजनी महाविद्या कंदली कार्यसाधिनी। पूजा प्रतिष्ठा विपुला पुनंती पारलौकिकी ॥१०६॥
शुक्लशुक्तिर्मौक्तिका च प्रतीतिः परमेश्वरी। विराजोष्णिग् विराट् वेणी वेणुका वेणुनादिनी ॥१०७॥
आवर्तिनी वार्तिकदा वार्त्ता वृत्तिर्विमानगा। सासाढ्यरासिनी सासी रासमण्डलमंडली ॥१०८॥
गोपगोपीश्वरी गोपी गोपीगोपालवंदिता। गोचारिणी गोपनदी गोपानन्दप्रदायिनी ॥१०९॥
पशव्यदा गोपसेव्या कोटिशो गोगणावृता। गोपानुगा गोपवती गोविंदपदपादुका ॥११०॥
वृषभानुसुता राधा श्रीकृष्णवशकारिणी। कृष्णप्राणाधिका शश्वद्रसिका रसिकेश्वरी ॥१११॥
अवटोदा ताम्रपर्णी कृतमाला विहायसी। कृष्णा वेणी भीमरथी तापी रेवा महापगा ॥११२॥
वैयासकी च कावेरी तुंगभद्रा सरस्वती। चन्द्रभागा वेत्रवती गोविंदपदपादुका ॥११३॥
गोमती कौशिकी सिंधुर्बाणगंगातिसिद्धिदा। गोदावरी रत्नमाला गंगा मंदाकिनीबला ॥११४॥
स्वर्णदी जाह्नवी वेला वैष्णवी मंगलालया। बाला विष्णुप्रदीपोक्ता सिंधुसागरसंगता ॥११५॥
गंगासागरशोभाढ्या सामुद्री रत्नदा धुनी। भागीरथी स्वर्धुनी भूः श्रीवामनपदच्युता ॥११६॥
लक्ष्मी रमा रामणीया भार्गवी विष्णुवल्लभा। सीतार्चिर्जानकी माता कलंकरहिता कला ॥११७॥
कृष्णपादाब्जसंभूता सर्वा त्रिपथगामिनी। धरा विश्वंभराऽनंता भूमिर्धात्री क्षमामयी ॥११८॥
स्थिरा धरित्री धरणिरुर्वी शेषफणस्थिता। अयोध्या राघवपुरी कौशिकी रघुवंशजा ॥११९॥

मथुरा माथुरी पंथा यादवी ध्रुवपूजिता । माया पूर्बिल्वनीला द्वार्गंगाद्वारविनिर्गता ॥१२०॥
कुशावर्तमयी ध्रौव्या ध्रुवमण्डलमध्यगा । काशी शिवपुरी शेषा विंध्या वाराणसी शिवा ॥१२१॥
अवंतिका देवपुरी प्रोज्ज्वलोज्जयिनी जिता । द्वारावती द्वारकामा कुशभूता कुशस्थली ॥१२२॥
महापुरी सप्तपुरी नन्दिग्रामस्थलस्थिता । शास्त्रग्रामशिलादित्या शंभलग्राममध्यगा ॥१२३॥
वंशगोपालिनी क्षिप्रा हरिमन्दिरवर्त्तिनी । बर्हिष्मती हस्तिपुरी शक्रप्रस्थनिवासिनी ॥१२४॥
दाडिमी सैंधवी जंबुः पौष्करी पुष्करप्रसूः । उत्पलावर्तगमना नैमिषी नैमिषावृता ॥१२५॥
कुरुजांगलभूः काली हैमवत्यर्बुदी बुधा । शूकरक्षेत्रविदिता श्वेतवाराहधारिता ॥१२६॥
सर्वतीर्थमयी तीर्था तीर्थानां कीर्तिकारिणी । हारिणी सर्वदोषाणां दायिनी सर्वसम्पदाम् ॥१२७॥
वर्द्धिनी तेजसां साक्षाद्गर्भवासनिकृंतनी । गोलोकधामधनिनी निकुंजनिजमंजरी ॥१२८॥
सर्वोत्तमा सर्वपुण्या सर्वसौंदर्य्यशृंखला । सर्वतीर्थोपरिगता सर्वतीर्थाधिदेवता ॥१२९॥
नाम्नांसहस्त्रं कालिन्द्याः कीर्तिदं कामदं परम् । महापापहरं पुण्यमायुर्वर्द्धनमुत्तमम् ॥१३०॥
एकवारं पठेद्रात्रौ चोरेभ्यो न भयं भवेत् । द्विवारं प्रपठेन्मार्गे दस्युभ्यो न भयं क्वचित् ॥१३१॥
द्वितीयां तु समारभ्य पठेत्पूर्णावधिं द्विजः । दशवारमिदं भक्त्या ध्यात्वा देवीं कलिन्दजाम् ॥१३२॥
रोगी रोगात्प्रमुच्येत बद्धो मुच्येत बंधनात् । गुर्विणी जनयेत्पुत्रं विद्यार्थी पंडितो भवेत् ॥१३३॥
मोहनं स्तंभनं शश्वद्वशीकरणमेव च । उच्चाटनं घातनं च शोषणं दीपनं तथा ॥१३४॥
उन्मादनं तापनं च निधिदर्शनमेव च । यद्यद्वांछति चित्तेन तत्तत्प्राप्नोति मानवः ॥१३५॥
ब्राह्मणो ब्रह्मवर्चस्वी राजन्यो जगतीपतिः । वैश्यो निधिपतिर्भूयाच्छूद्रः श्रुत्वा तु निर्मलः ॥१३६॥
पूजाकाले तु यो नित्यं पठते भक्तिभावतः । लिप्यते न स पापेन पद्मपत्रमिवांभसा ॥१३७॥
शतवारं पठेन्नित्यं वर्षावधिमतः परम् । पटलं पद्धतिं कृत्वा स्तवं च कवचं तथा ॥१३८॥
सप्तद्वीप महीराज्यं प्राप्नुयान्नात्र संशयः । निष्कारणं पठेद्यस्तु यमुनाभक्तिसंयुतः ॥१३९॥
त्रैवर्ग्यमेत्य सुकृती जीवन्मुक्तो भवेदिह ॥१४०॥
निजकुंजलीला ललितं मनोहरं कलिन्दजाकूल- लताकदम्बकम् ।
वृन्दावनोन्मत्त- मिलिन्दशब्दितं व्रजेत्स गोलोकमिदं पठेच्च यः ॥१४१॥

॥इति श्रीमद्गर्गाचार्य्यसंहितायां श्रीमाधुर्य्यखण्डे श्रीसौभरिमान्धातृसंवादे श्रीयमुनासहस्रनामस्तोत्रं समाप्तम् ।

॥ इति श्री मिश्र तंत्रं सम्पूर्णम् ॥

ग्रंथ कर्ता वंश परिचय

वंशे ह्यस्मिन् रूपरामो महाभागेषु सत्तमः। स्वर्ण-दीनार-संवृष्ट्या तीर्थेष्वकरदीकृतः ॥ १ ॥ श्री किशनश्च चन्द्राख्यो, 'मिश्र' इत्येव विश्रुतः। विराज मानस् साखूणे, जिलान्तर्जैपुरे स्थितः ॥ २ ॥ सानन्दावसतस्तस्याऽनन्दी लालात्मजोऽभवत्। कथयां कर्मकाण्डे च 'मिश्राख्य' पदवी गतः ॥ ३ ॥ कृष्णवल्लभ शास्त्र्याख्य उपवीतेन दीक्षितः। दुर्गालालाऽभिधस्तस्य तनयाध्यापकः स्मृतः ॥ ४॥ तस्यात्मजो रमेशश्च, चन्द्रोडोभाऽवटंकितः। ग्रन्थान् संकलितान्प्रास्तौ च्वतुश्चन्द्रैरलंकृतान् ॥ ५ ॥ सेवामेवाशयारूढ़ः क्षनतव्योऽयं च सूरिभिः। अनेन विद्या विदुषां स्यामहं ह्यनुकम्पितः ॥ ६ ॥

(उद्गीतकः- **कृष्णवल्लभ शास्त्री**, वेद-साहित्याचार्य एम०ए०, शिक्षा शास्त्री, कचनारिया वाले)

श्रीचक्र पूजा करते समय देवी के पूर्ण स्वरूप का ध्यान करें -

प्रातः पद्मनिभां देवीं बालार्ककिरणारुणाम् ।
जपाकुंकुम संकाशां दाडिमी कुसुमोपमाम् ॥१॥
पद्मराम प्रतिकाशां कुंकुमोदर संनिभाम् ।
स्फुरन्मुकुट माणिक्य किङ्किणी ज्वालमण्डिताम् ॥२॥
कालिलिकुल संकाश कुटिलालक पल्लवाम् ।
प्रत्यग्रारुण संकाश वदनाम्भोज मण्डलम् ॥३॥

॥ श्री ललिता प्रातः स्तोत्र पञ्चकम् ॥

प्रातः स्मरामि ललिता वदनारविन्दं, बिम्बाधरं पृथुल मौक्तिकशोभि - नासाम् ।
आकर्ण दीर्घनयनं मणिकुण्डलाढ्यं, मन्दस्मितं मृगमदोज्ज्वल भालदेशम् ॥१॥
प्रातर्भजामि ललिता भुजकल्प वल्लीं, रक्ताङ्गुलीय लसदंगुलि पल्लवाढ्याम् ।
माणिक्य हेमवलयाङ्गद शोभमानां, पुण्ड्रेक्षु चापकुसुमेषु सृणीर्दधानाम् ॥२॥
प्रातर्नमामि ललिता चरणारविन्दं, भक्तेष्टदान निरतं भवसिन्धु पोतम् ।
पद्मासनादि सुरनायक पूजनीयं, पद्माङ्कुशध्वज सुदर्शन लांछनाढ्यम् ॥३॥
प्रातः स्तुवै परशिवां ललितां भवानीं, त्रय्यन्त वेद्य विभवां करुणानवद्याम् ।
विश्वस्य सृष्टि विलय स्थिति हेतुभूतां, विश्वेश्वरीं निगमवाङ मनसादि दूराम् ॥४॥
प्रातर्वदामि ललिते! तव पुण्यनाम, कामेश्वरीति कमलेति महेश्वरीति ।
श्रीशाम्भवोति जगतां जननी परेति वाग्देवतेति वचसा त्रिपुरेश्वरीति ॥५॥

॥ फलश्रुति ॥

यच्छ्लोक पञ्चकमिदं ललिताम्बिकायाः, सौभाग्यदं सुललितं पठति प्रभाते ।
तस्मै ददाति ललिता झटिति प्रसन्ना, विद्यां श्रियं विमल सौख्यमनन्तकीर्तिम् ॥